संस्कृत-संशोधन-संसद्-ग्रन्थमाला

श्री भा ष्य म्

भगवद्रामानुजविरचितं शारीरकमीमांसाभाष्यम्

(विमर्शात्मकं सम्पादनम्)

तृतीयसम्पुटः

SRĪBHĀṢYAM

ŚĀRĪRAKAMĪMĀṂSĀBHĀṢYAM

Volume III

प्रकाशनस्थानम्

संस्कृत-संशोधन-संसत्

(यादवाद्रिः) मेलुकोटे-५७१४३१

१९९०

श्रीभाष्यम्

[शारीरकमीमांसाभाष्यम्]

तृतीयं सम्पुटम्

SRĪBHĀṢYAM

ŚĀRĪRAKAMĪMĀṂSĀBHĀṢYAM

Volume III

संस्कृत-संशोधन-संसद्-ग्रन्थमाला

श्री भाष्य म्

भगवद्रामानुजविरचितं शारीरकमीमांसाभाष्यम्

(विमर्शात्मकं सम्पादनम्)

तृतीयसम्पुटः

प्रकाशनस्थानम्

संस्कृत-संशोधन-संसत्

(यादवाद्रिः) मेलुकोटे-५७१४३१

१९९०

श्रीभाष्यम् (तृतीयसम्पुटः)
भगवद्रामानुजग्रन्थमालानिगमः
संस्कृत-संशोधन-संसत्,
मेलुकोटे-५७१४३१

प्रमुखसम्पादकः
एम्. ए. एस्. राजन्, ऐ.ए.एस्. (निवृत्तः)
अध्यक्षः

प्रधानसम्पादकः
प्रा. एम्. ए. लक्ष्मीताताचार्यः, एम्.ए., सि.ए.इ.,
कुलसचिवः

प्रकाशनस्थानम्
संस्कृत-संशोधन-संसत्, यादवाद्रिः

प्रथमं संस्करणम् : १९९०

प्रतयः : १०००

सर्वेऽधिकाराः संसदायत्ताः ©

मूल्यम् : 95.00

मुद्रणस्थानम् :
विवेक मुद्रणालयः,
८९१/२, नारायणशास्त्री वीथी,
मैसूरु-५७०००४

The Academy of Sanskrit Research Series

ŚRĪBHĀṢYAM

ŚĀRĪRAKAMĪMĀṂSĀBHĀṢYAM

(Critical Edition)

Vol. III

Published by
THE ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571 431
1990

SRĪBHĀSYAM Vol. III

A Project of the Academy of Sanskrit Research, Melkote

General Editor :
M. A. S. Rajan, I.A.S. (Retd.)
President

Chief Editor :
Prof. M. A. Lakshmithathachar
Registrar

Publisher :
The Academy of Sanskrit Research, Melkote

First Edition : 1990

Copies : 1000

© with the Publisher

Price : Full Calico—Rs.
Half Calico—Rs.

Printed at :
M/s. Vivek Printers
891/2, N. S. Road
Mysore-570 004

कार्यनिर्वाहकमण्डली

प्रमुखसम्पादकः

एम्. ए. एस्. राजन्, ऐ.ए.एस्. (निवृत्तः)

प्रधानसम्पादकः

एम. ए. लक्ष्मीताताचार्यः, एम्.ए., सि.ए.इ.,

न्यायविद्वान्, राष्ट्रभाषा प्रवीणः

सम्पादकः, निगमाध्यक्षश्च

एन्. एस्. रामभद्राचार्यः

प्राचीनन्याय-नवीनन्याय-अलङ्कारविद्वान्

विश्रान्तनवीनन्यायोपाध्यायः

FOREWORD

It gives the Academy much pleasure to offer this the third volume of SRIBHASHYAM. The preparation and publication of critical editions of the works of Acharya Sri Ramanuja is one of the major undertakings of the Academy. The critical edition of Sribhashyam, the Acharya's masterly work, is the first project in this effort. The first volume of Sribhashyam was published in 1985 and the second in 1987.

The first volume presented the introductory portion of Sribhashyam in which Acharya Sri Ramanuja dealt with the opening four *Brahmasutras* of the first chapter. The exigesis of the rest of the chapter was included in the second volume. This volume presents the second chapter of the text, known as *Avirodhadhyaya*. This is the penultimate volume. The last volume will take us to the end of the text covering the last two chapters, *Sadhanadhyaha* and *Phaladhyaya*.

Acharya Sri Ramanuja has devoted his discussion in *Avirodhadhyaya* to the inconsistencies that are seen in the earlier schools of thought and has put forward his thesis by meticulously resolving the contradictions seen in these schools. It is in this chapter that the Acharya has firmly argued the case for depicting *Parabrahman* as the creator, sustainer and destroyer of the Universe comprising both sentient and insentient beings.

In the foreword to the first volume a brief account of the place of Sribhashyam in Vedic literature was given. Some

extracts from it were presented in the second volume. I wish to take the liberty of inviting the reader to peruse the former, instead of burdening this foreward with a repetition.

However there is one point which bears repetition here. The volumes on Sribhashyam are the first in a series which will include critical editions of all of Sri Ramanuja's writings on *Visistadvaita*. The Academy hopes to follow on with the publication of other works of the *Visistadvaita* school. All of this effort will have yielded research by-products. And it is the cherished hope of the Academy that such research in turn will be a step in its endeavour to build up comparative studies which would illuminate various other schools of philosophical thought prevalent in the country and elsewhere.

A basic aim of the Academy is to offer the principal works of our scriptural literature to the present generation of scholars and researchers in authoritative, well-referenced user-friendly editions. As in the case of the earlier volumes the signal contribution of this volume is in the appendices. The appendices are an attempt to provide in condensed form all the adjuncts and facilities needed by the scholarly reader.

The working Editor of this series, Vidwan N. S. Ramabhadracharya has continued his good work to produce a volume of high excellence. My thanks on behalf of the Academy are due to him. The scholars associated with him have worked with single-minded devotion and to the best of their ability. The Academy is grateful to them.

In this connection the Academy is much beholden to the distinguished scholars, who as members of the Scrutiny Committee, have contributed to the merits of this work.

The Academy is also grateful to Prof. M. A. Lakshmithathachar, the Registrar and Chief Editor of the Sribhashyam series. In the midst of his many administrative preoccupations he has intensely followed up the publication through its various stages, apart from bestowing valuable academic guidance.

The Government of India and Government of Karnataka have continued to give generous financial aid to the publication work of the Academy. The Academy is deeply grateful to them.

March 1990
Bangalore

M. A. S. Rajan
President

PREFACE

It gives me pleasure to present the THIRD VOLUME of the critically edited SRIBHASHYAM in the hands of lovers of Sanskrit and Philosophy. Volumes I and II were published in 1985 and 1987 respectively. The fourth and final volume is in the press.

Sribhashyam, a voluminous commentary written by Sri Ramanuja is the most faithful exposition of Maharshi Badarayana's BRAHMASUTRA. Any ardent student of philosophy cannot but appreciate the vehemence and impregnability of his argumentation in support of ***Savisesadvaita.*** The text is divided into four chapters (***adhyayas***) of which Chapter I, called ***Samanvayadhyaya*** was covered in Volumes I & II.

In the first chapter it is conclusively proved that the Supreme Brahman is distinct from the matter (insentient) and from the individual self (sentient) both in the state of liberation and that of bondage. It is also shown that it is an epitome of perfection, the repository of infinite good qualities.

Chapter II is the subject matter of the present volume. This is called ***Avirodhadhyaya***, since the conclusion that Brahman is the sole cause of this universe is demonstrated to be unassailable from every possible objection with powerful logic in this chapter.

In the first two sections of the second chapter the views of two respected authorities viz., Kapila & Hiranyagarbha, which

are at variance with the *Vedantic* point of view are examined and set aside. In the other eight sections, different arguments assailing the view that Brahman alone is the cause of the universe, based on independent reasoning and logic, are examined and refused.

The Academy is thankful to Vidwan N.S. Ramabhadracharya and his assistants for their sincere and devoted work in this volume. The Academy is indebted to Panditaratnam K. S. Varadacharya and other scholars who have scrutinized the manuscript thoroughly. Thanks are due to Sri N. S. Janardanacharya who has read the press proofs.

I remain grateful to our President Sri M.A.S. Rajan for his personal guidance at all levels in the activities of the Academy. It is my duty to pay my respectful thanks to the Secretary of the Academy, Sri Gururaj, Commissioner for Religious and Charitable Endowments in Karnataka and the other members of the Managing Committee, who are whole-heartedly supporting these research and publication activities.

Sincere thanks are due to M/s. Vivek Printers of Mysore who have printed this work nicely.

March 1990 **M.A. Lakshmithathachar**
Melkote Registrar

॥ श्रीः ॥

श्रीमते रामानुजाय नमः ॥

श्रीभाष्यतृतीयसम्पुटप्रास्ताविकं किञ्चित् ॥

चिदचित्परतत्त्वानां तत्त्वयाथात्म्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ॥

भगवद्रामानुजाचार्यानुगृहीते श्रीभाष्याभिधे शारीरकमीमांसाभाष्ये चतुःसूत्र्यन्तो भागः, शास्त्रारम्भसमर्थनपरतया उपोद्घातपेटिकारूपः, आद्ये सम्पुटे प्राकाश्यं नीतः । द्वितीये तु सम्पुटे, तत्पश्चात्तनः समग्रः समन्वयाध्यायः प्रकाशितः । यत्र च परमात्मेतरचेतनाचेतनपरत्वशङ्कास्पदानां वेदान्तवाचाम् परमात्मपरत्वनिर्णयात्, 'कारणं तु ध्येयः' इति श्रुतिप्रतिपन्नं कारणत्वप्रयुक्तमोक्षोपायध्यानगोचरत्वं, सर्वकारणस्य सर्वेश्वरस्य भगवतो नारायणस्यैवेति सोपबृंहणैर्न्यायैः निर्णीतम् ॥

अस्मिंश्च तृतीये सम्पुटे—श्रीभाष्यस्य द्वितीयोऽध्यायः प्रकाशितोऽस्ति । द्वितीयाध्यायस्य 'अविरोधाध्याय' इति नामानुगुणं प्रयोजनं तावत्—श्रीभाष्यगतेन, 'अनन्तरम् अस्यार्थस्य सम्भावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनाय द्वितीयोऽध्यायः प्रारभ्यते' इत्यनेन भागेन स्पष्टीकृतः ॥

श्रुत्यनुग्राहकैः तर्कोपबृंहणादिभिः श्रुत्यर्थानुग्रहस्यावश्यकत्वात्, श्रुतेः तर्कोपबृंहणाद्यनुगुणं नेयत्वेन, प्रधानादावचेतने, चेतने जीवात्मन्यपि च कारणवाक्याविषयत्वनिर्णयेनैव, श्रुतीनां ब्रह्मणि कारणतातात्पर्यं दृढीभवतीति, समन्वयाध्यायनिर्णीतार्थस्य उपबृंहणैस्तर्कैश्च अविरोधेन सिद्धिं स्थापयत्यनेन द्वितीयेनाऽध्यायेनेत्यतः, अविरोधाध्याय इत्याख्या अस्याऽन्वर्था जागर्ति ॥

अस्मिंश्चाध्याये—स्मृति-तर्क-वियत्-प्राणशब्दोपपदाः चत्वारः पादाः । उक्तं च—'स्मृतिन्यायाविरोधश्च परपक्षपराहतिः । कार्यता वियदादीनामक्षादेश्च द्वितीयतः ॥'—इति श्रीदेशिकेश्वरार्यैः ॥ श्रीमद्भिर्वेदान्ताचार्यैरप्यधिकरणसारावल्याम्—'पश्चात् स्मृत्यादिकैरक्षतिरहितिरितिः कार्यताऽत्रेन्द्रियादेः' इति विवृतम् ॥ न्यायसहकृतप्रमाणानुरोधिना तत्त्वहितपुरुषार्थानां

याथात्म्यावबोधेन मुमुक्षूणाम् अक्षुब्धतत्त्वचिन्तननैरन्तर्यम्, तेन परमपुरुषप्रसादः, तत उपायपरिपूर्तिः, तया च परमं निश्श्रेयसं च यथायोग्यं चेतनैरवाप्यत इति सूत्रकारादीनां तात्पर्यं ग्राह्यमस्माभिरिति भाति ॥

इदं सम्पुटं, महाजनानामध्येतृबृन्दस्य च करकमलेष्वद्य समर्प्यत इति प्रमोदस्थानमेतत्। शीघ्रमेव च चतुर्थमपि सम्पुटं तृतीय-तुरीयाभ्यां द्वाभ्यामप्यध्यायाभ्यां युतं प्रकाश्य समग्रा श्रीभाष्यकृतिः सटिप्पणा सानुबन्धा च समाप्तिं नेष्यते इति प्रहृष्टान्तःकरणा निवेदयामः। येन च समारब्धोऽयमुद्यमः निरन्तरायः समाप्तिं गतः भगवद्रामानुजार्याणां तदीयदर्शनरुचीनां च स्वान्तसन्तोषकरो जायेत ॥

विमर्शात्मकसम्पादनकार्येऽस्मिन् (क्रिटिकल् इडीषन्) संस्कृतसंशोधनसंसदः अपेक्षामादृत्य आचार्य-तद्दर्शन-तदीयग्रन्थेषु सभक्तिश्रद्धं सावधानेन मनसा यथाशक्ति प्रयतितं निर्व्यूढं च। अकस्माद्दोषाश्चेदापतिताः स्युः, तान् सहृदयाः क्षाम्यन्तु—इति नम्रेण स्वान्तेन प्रार्थयामः ॥

संस्करणेऽस्मिन् योजिता इमेंशाः—

(I) श्रीभाष्यम् (मूलम्)—

(क) अध्याय-पादनाम्नां तदर्थानां च सूचनी पट्टिका।

(ख) प्रतिपादम् आदौ तत्तत्पादगताधिकरणानामर्थसूचनी पट्टिका।

(ग) (ग्रन्थे) अध्यायादौ पादादौ च अध्यायपादनामानि तद्गताधिकरणसूत्राणां संख्याः, अध्यायार्थ-पादार्थौ, तथा अधिकरणादौ अधिकरणनाम, तद्गतसूत्राणां संख्या, अधिकरणार्थश्च निर्दिष्टाः। अधिकरणानां सूत्राणां च आदितः क्रमसंख्या, तत्तदध्याय-पादाधिकरणक्रमागताः संख्याश्च निर्दिष्टाः।

(घ) श्रीभाष्यग्रन्थश्च, विषयविभाग-शीर्षिका-बोधोपयोगि सन्धिविभजन-पादविरामार्धविरामादिभिः सह योजितः। प्रमाणानि च ग्रन्थपंक्तितः पृथक्कृत्य तत्रैव आकरस्थानावगमोपयोग्यङ्कनसंख्यानिर्देशैश्च योजितानि।

(II) टिप्पणी—

(क) प्राधान्येन श्रुतप्रकाशिकातः, आवश्यकतामनुरुध्य श्रुतप्रदीपिका-भावप्रकाशिकादिभ्यश्च विवरणभागानुद्धृत्य यथायोग्यं योजनेन सङ्कलिता। व्याख्यास्थाः

ग्रन्थावतरणतदुपर्याक्षेप-समाधानभागाः परमतनिराकरणभागाश्च नैव सङ्कलिताः ॥ टिप्पण्यां प्रत्यधिकरणमप्यन्ते अधिकरणगतानां यावतां सूत्राणामादिभागः ससंख्यं ज्ञापितः ।

(ख) प्रतिसूत्रं सरलया रीत्या प्रतिपदार्थविवृतिः [ ] कुण्डलनस्यान्तः सङ्ग्रथ्य योजिता । अन्ते च गृहीतार्थधारणानुकूला ब्रह्मसूत्रपद्यमालिकानाम्नी अहोबलास्थाननिर्वहणधूर्वहाणां श्रीस्वामिपादानां कृतिः सङ्गमिता ।

(III) पाठभेदः—

प्रायः सम्प्रदायप्राप्तं दाक्षिणात्याद्दतं पाठमेव उपरि निवेश्य, इतरे पाठाः विलक्षणाः, लिखित-मुद्रितपुस्तकगताः दाक्षिणात्यौत्तरेयसम्बन्धिनः शुद्धा अशुद्धा वा यथावस्थितं निवेशिताः ।

(IV) अनुबन्धाः—

(क) शारीरकन्यायकलापसङ्ग्रह—तत्त्वसार—अधिकरणसारावली—अधिकरणार्थसङ्ग्रह—नयसङ्गतिमालिकाः आद्येऽनुबन्धे योजिताः । तेषु आदिमानां त्रयाणाम् पदार्थविवृतिः अस्माभिरेव सङ्ग्रथ्य योजिता । शिष्टौ द्वौ यथाग्रन्थं निवेशितौ ।

(ख) प्रमाणार्थकोषः द्वितीयोऽनुबन्धः । सोप्यस्माभिरेव सङ्ग्रथितः ।

(ग) तृतीयः पदार्थकोषः ।

(घ) ग्रन्थस्थाः सिद्धान्तार्थनिर्णायिका उक्तयः ।

(ङ) ग्रन्थपराणि, ग्रन्थकर्तृपराणि च नामानि, अन्यानि चावश्यकत्वेन ज्ञप्तिपथं नेयानि कानिचित् ।

(च) एतत्सम्पुटोपयुक्तानां सङ्केताक्षराणां सूचनी ।

(छ) अकाराद्यनुक्रमणी ।

(ज) शोधनिका च ।

(V) आदौ तृतीयसम्पुटप्रास्ताविकम्, पुस्तकस्थविषयाणां सामान्यसूचनी, पाठान्तरनिर्देशस्थ-सङ्केताक्षरसूचनी, द्वितीयाध्यायस्थविषयाणां सूचनी, शान्तिपाठः आदावन्ते च, गुरुपरम्परास्तुतिः ॥

एतावता परिष्कारेण साकं सम्पादितं श्रीभाष्यद्वितीयाध्यायरूपमिदं तृतीयं सम्पुटं महाजनानां करकमलेषु समर्प्य कृतार्थीभवामः ॥

इति सहृदयविद्वज्जनाशीःकांक्षी

विभवसंवत्सरः
यादवगिरिक्षेत्रम्

सम्पादकः
क्रतुनाथवंश्यः, विद्वान् एन्. एस्. रामभद्राचार्यः
संस्कृतसंशोधनसंसत्–मेलुकोटे

एतत्पुस्तकस्थविषयाणां सूचनी

पृ.सं.

१. Foreword (संसदध्यक्षस्य)
२. Preface (संसत्कुलसचिवस्य)
३. श्रीभाष्यप्रास्ताविकम् (सम्पादकस्य)
४. एतत्पुस्तकस्थविषयाणां सूचनी (,,)
५. पाठान्तरसङ्केताक्षरसूचनी (,,)
६. तृतीयसम्पुटस्याऽस्य सम्पादने उपयुक्तानां पुस्तकानां पट्टिका
७. श्रीभाष्यग्रन्थस्थानां (एतत्सम्पुटीयानां) विषयाणां सूचनी
८. द्वितीयाध्याय-तद्गतपादानामर्थसूचनी
९. ,, प्रथमपादाधिकरणार्थसूचनी
१०. पूर्वशान्तिपाठः
११. गुरुपरंपरास्तुतिः
१२. श्रीभाष्यग्रन्थः (सम्पूर्णो द्वितीयोऽध्यायः) 1–270

अनुबन्धः—१. [273-393]

(प्रत्यधिकरणं योजिता एते)

१. शारीरकन्यायकलापसङ्ग्रहः (सविवृतिः)
२. तत्त्वसारः (सविवृतिः)
३. अधिकरणसारावलिः (सविवृतिः)
४. अधिकरणार्थसङ्ग्रहः (,,)
५. नयसङ्गतिमालिका

अनुबन्धः—२. [395–463]

१. श्रुतयः (सविवरणाः, अकारादिक्रमप्रमाणाकरस्थानैः सह)

२. स्मृतयः (पुराणेतिहाससूत्रभगवद्गीतापूर्वाचार्यसूक्तयः)

अनुबन्धः—३. [465–517]

१. पदार्थकोषः

२. सिद्धान्तोक्तयः

३. ग्रन्थोल्लिखितानि नामानि (ऋष्यादीनां, दार्शनिकानां, ग्रन्थानां, दर्शनपरशब्दानां, दर्शनाभ्युपगन्तॄणां, अर्थविशेषचिन्तौपयिकानां च शब्दानां सूचनी)

४. उपयुक्तानां सङ्केताक्षराणां सङ्केतितग्रन्थानां तत्कर्तॄणां च नामानि

अनुबन्धः—४.

१. अधिकरण-सूत्रादीनां अकारादि सूचनी

२. शोधनिका

—o—

श्रीभाष्यमूलसम्बन्धिपाठभेदनिर्देशगतानां सङ्केताक्षराणां सूचनी

	पुस्तकं	लिपिः	पुस्तकस्थानम्	सङ्केतः
१.	श्रीभाष्यमूलम्	ग्रं.	विद्वान् अैयर् रामशर्मा मेलुकोटे	अ
२.	,,	,,	,, जग्गू सुदर्शनाचार्यः ,,	आ
३.	,, श्रु. प्र. युतम्	आं	सं. कालेज् ,,	इ
४.	,, ,,	,,	विद्वान् मुडुम्बै नरसिह्माचार्यः ,,	ई
५.	रामानुजग्रन्थमाला	,,	कांची प्र. भ. अण्णङ्गराचार्यः	क
६.	श्रीभाष्यम् श्रु. प्र. युतम्	,,	चेङ्कल्वरायः मद्रास्	ख
७.	,, ,,	,,	श. चक्रवर्त्यैयङ्गार्यः मैसूरु	ग
८.	,, श्रु. प्र. व. टी. [illegible] [illegible]युतम्	दे	धरणीधरशास्त्री वृन्दावनम्	घ
९.	श्रीभाष्यम् श्रु. प्र. युतम्	,,	उ. वीरराघवाचार्यः मद्रास्	ङ
१०.	,, मूलम्	दे	अ. वी. नरसिंहाचार्यः ,,	च
११.	,, श्रु. प्र. युतम्	ग्रं	भारद्वाजरामानुजार्यः कांची	छ
१२.	,, द्रमिडभाषानुवादेनसह	,,	ए. वी. गोपालाचार्यः कुंभघोणम्	ज
१३.	,, श्रु. प्र. युतम् ४ सूत्री	दे	निर्णयसागर प्रेस् बाम्बे	झ
१४.	,, १० व्याख्यायुतम्	,,	V. कृष्णमाचार्यः मदरास्	ञ
१५.	,, श्रु.प्र.गूढार्थसंग्रहाभ्यां	दे	परकालमठास्थानम् मैसूरु	ट
१६.	,, मूलम्	दे	धनीरामशास्त्री मथुरा	ठ
१७.	,, कन्नडानुवादेन सह	क	होळेनरसीपुरम् कर्णाटक	ड
१८.	,, हिन्दी अनुवादेन	दे	रङ्गनाथाचार्यः प्रयागः	ढ
१९.	,, हस्तलिखितम् मूलम्	,,	रामचन्द्रजीग्रन्थालयः अलवार	थ

पुस्तकं		लिपिः	पुस्तकस्थानम्	सङ्केतः
२०.	श्रीभाष्यम् मूलं मुद्रितम्	,,	महाराजग्रन्थालयः बिकानेर्	द
२१.	,, ,,	,,	कलकत्ता मुद्रणालयः कलकत्ता	ध
२२.	,, श्रु. प्र. युतम्	,,	,, काशी	न
२३.	,, मूलमात्रम्	,,	,, ,,	ण
२४.	,, ,,	,,	अ. वासुदेवशास्त्री पूना	वा
२५.	,, श्रु. प्र. दीप सारैर्युतम्	आं	श्रीपेरुम्बूदूर्	—

—o—

एतत्सम्पुटसम्पादनायादृतानीमानि पुस्तकानि

१. श्रीभाष्यम् ।

२. वेदान्तदीप: ।

३. वेदान्तसार: ।

४. श्रुतप्रकाशिका ।

५. श्रुतप्रदीपिका ।

६. भावप्रकाशिका ।

७. भाष्यार्थदर्पण: ।

८. नयमयूखमालिका ।

९. शारीरकशास्त्रार्थदीपिका ।

१०. शारीरकाधिकरणरत्नमाला ।

११. वेदार्थसङ्ग्रह: व्याख्यया सहित: ।

१२. श्रीभाष्यप्रकाशिका ।

१३. दर्शनोदय: ।

१४. मानमेयरहस्यश्लोकवार्तिकम् ।

१५. तत्त्वसार: तिसृभि:व्याख्याभि: सह ।

१६. शारीरकन्यायकलापसंग्रह:

१७. अधिकरणसारावलि: व्याख्यात्रयेण सह ।

१८. ईशादिदशोपनिषद: रं. रा. भाष्यम् कूरभाष्यं च ।

१९. ,, शां. भाष्यम् ।

२०. श्वेताश्वतरकौषीतक्यौ सभाष्यौ ।

२१. श्रीभगवद्गीताभाष्यम् तात्पर्यचन्द्रिकया सह ।

२२. श्रीविष्णुपुराणं सव्याख्यम् ।

२३. तैत्तिरीयसंहिता-ब्राह्मणारण्यकानि सभाष्याणि ।

२४. अध्वरमीमांसाकुतूहलवृत्तिः ।

२५. जैमिनीयन्यायमालाविस्तरः ।

२६. काशिकावृत्तिः ।

२७. सिद्धान्तकौमुदी ।

२८. शब्दकल्पद्रुमः ।

२९. वैजयन्तीकोशः ।

३०. अमरकोशः ।

३१. हलायुधः ।

३२. शब्दार्थकौस्तुभः ।

३३. उपनिषद्वाक्यकोशः ।

३४. न्याय-वैशेषिकदर्शने ।

३५. सर्वदर्शनसङ्ग्रहः ।

एतानि विविधसंस्करणात्मकानि, अन्यानि च कानिचन पुस्तकानि स्वीकृतानि ।

—o—

श्रीभाष्यद्वितीयाध्यायस्थविषयसूचनी

पृ.सं.

द्वितीये अविरोधाध्याये— 1

निखिलजगदेककारणं ब्रह्म वेदान्तवेद्यमिति प्रथमाध्यायोक्तार्थस्य संभावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनपरे—

I. **आद्ये स्मृतिपादे**—(ब्रह्मणः जगत् प्रति अभिन्ननिमित्तोपादानत्वे आशङ्कित स्मृतिविरोधपरिहारपरे)—

1. **स्मृत्यधिकरणे**—(ब्रह्मणो जगत्कारणत्ववादिनां वेदान्तानां कापिलस्मृतिविरोधनिरासपरे)—

१. प्रथमाध्यायार्थसङ्ग्रहः, द्वितीयाध्यायार्थसारः 2

२. अधिकरणारम्भाक्षेप-तत्परिहारौ ,,

३. कापिलस्मृतेरनवकाशत्वापत्त्या वेदान्तैरबाध्यता 3

४. मन्वादिस्मृतीनां अनवकाशत्वशङ्का- तन्निराकरणे 4

५. **सिद्धान्ते**—अन्यासां स्मृतीनामाशयोपस्थापनम् ,,

६. कापिलस्मृतेः वेदान्तानुपबृंहणता 9

७. मन्वादिस्मृतीनां परमपुरुषाराधनरूपधर्मप्रतिपादकता 7

८. ,, सावकाशत्वशङ्का-तन्निरासौ 8

९. आप्तिमात्रवतः कपिलस्यादरणे अतिप्रसक्तिः ; कपिलस्मृतेः भ्रान्तिमूलता च 9

2. **योगप्रत्युक्त्यधिकरणे**—वेदान्तविरोधित्वेन योगतन्त्रस्य जगत्कारणत्वांशे अप्रामाण्यपरे— 10

१. सूत्रार्थविवरणम् 11

२. योगस्मृतेः वेदान्तोपबृंहणत्वशङ्का, अनुपबृंहणत्वनिर्णयश्च ,,

पृ.सं.

3. **विलक्षणत्वाधिकरणे**—(ब्रह्मणो जगदपेक्षया वैलक्षण्यस्य तत्कारणत्वाविरोधितापरे)— 12

१. सङ्गतिः सूत्राक्षरविवरणं च (पूर्वः पक्षः) ,,

२. ब्रह्मणि जगद्वैलक्षण्यस्य शब्दप्रमाणतोऽवगमः 13

३. कार्यसालक्षण्यवत एव कारणत्वे युक्तिः ,,

४. प्रमाणानां तर्कानुग्रहापेक्षाप्रकारः, शास्त्रस्य तन्नियमश्च 14

५. जगति सत एव चैतन्यस्य अनुद्भूतत्वाभ्युपगमेन ब्रह्मसालक्षण्यशङ्का-तत्परिहारौ 15

६. उक्तसालक्षण्यविवेचनतः ब्रह्मण उपादानत्व-तन्निषेधौ ,,

७. कार्य-कारणयोः सालक्षण्यनियमस्यानैकान्त्यम्, तत्परिहारश्च 16

८. पृथिव्यादावपि श्रौतत्वेन सालक्षण्यमस्तीति शङ्का ,,

९. श्रौतानां तादृशव्यपदेशानां अभिमानिदेवतापरत्वेन, सालक्षण्याभावनिश्चयः 17

१०. एतदधिकरणीयः सिद्धान्तः (तत्र) विलक्षणयोरप्युपादानोपादेयभावः 18

११. असतः सकाशात् कार्योत्पतिस्वीकारापत्तिशङ्का-तत्परिहारौ 19

१२. ब्रह्मणो जगत्कारणत्वे प्रलयादौ जगद्गतदोषस्य ब्रह्मण्यापादनम् ,,

१३. 'अपीतौ तद्वदि'ति सूत्राशयवर्णनम् 20

१४. जगद्-ब्रह्मणोः शरीर-शरीरिभावासम्भवशङ्का 20, 21

१५. जगतः ब्रह्मशरीरत्वाभावसमर्थनम् 21

१६. शरीरलक्षणान्तरानुगुण्येन जगतो ब्रह्मशरीरत्वशङ्का-तत्परिहारौ 22

१७. सिद्धान्त्यभिमतशरीरलक्षणदूषणम् ,,

१८. ईश्वरस्याशरीरतायाः श्रौतता, प्रकृतसूत्रार्थनिगमनं च 23

१९. पूर्वोक्तासामञ्जस्यस्य 'न तु दृष्टान्ते'ति सूत्रेण परिहारः ,,

पृ.सं.

२०. 'न तु दृष्टान्तभावादि'ति सूत्रार्थनिष्कर्षः आवश्यको दृष्टान्तश्च 23

२१. सिद्धान्ते पूर्वोक्तायाः जगति ब्रह्मशरीरत्वासम्भवशङ्कायाः अनूद्य निरासः 24

२२. जगद्-ब्रह्मणोः शरीर-शरीरिभावबोधिकाः श्रुतयः 24

२३. परमात्मनः सर्वशरीरकत्वस्य स्मृतितोऽवगमः 25

२४. सिद्धान्तिसंमतं निर्दुष्टं शरीरलक्षणम् 26

२५. ब्रह्मणः शरीरनिषेधपरश्रुतेराशयः 27

२६. सांख्यसमयगतः अन्यश्च दोषो तद्दर्शनत्यागे हेतुरिति, सूत्रेणोपपादनम् ,,

२७. स्वपक्षदोषाच्चेति सूत्रस्यार्थविवृतिः 28

२८. केवलतर्काश्रितसिद्धान्तस्यानाश्रयणीयत्वं 'तर्काप्रतिष्ठाना'दिति सूत्रेण ,,

२९. विलक्षणतर्काश्रयणेऽपि उक्तदोषादनिस्तारस्य 'अन्यथानुमेय'मिति सूत्रेण वर्णनम् ,,

4. शिष्टापरिग्रहाधिकरणे—(वेदापरिगृहीतसर्वपक्षप्रतिक्षेपपरे) 30

१. 'एतेन शिष्टे'ति सूत्रार्थविवृतिः, अधिकाशङ्का-परिहारौ च 30, 31

5. भोक्त्रापत्त्यधिकरणे—(ब्रह्मणः शरीरसम्बन्धायत्तसुखदुःखभोक्तृत्वनिरासपरे) 32

१. सङ्गतिः, सूत्रार्थः, अधिकरणारम्भाक्षेप-तत्परिहारौ च ,,

२. पूर्वपक्षार्थः 33

३. सिद्धान्तार्थः 34

४. सूत्रोक्तस्य 'लोकवत्' इति दृष्टान्तस्य विशदीकरणम् ,,

५. अस्य सूत्रस्य परकीयव्याख्यानुवादः, तद्दूषणं च 35

६. तदीयव्याख्यायाः स्वरूपपरिणामनिबन्धनशङ्कापरिहारपरत्वस्याप्यनुपपत्तिः ,,

पृ.सं.

६. **आरम्भणाधिकरणे**—(जगद् ब्रह्मणोः श्रुत्युक्ताया अनन्यतायाः कार्यकारण-भावकृतत्वपरे) 37–82

१. सङ्गतिः, कार्यकारणयोरनन्यत्वे वैशेषिकाणामाक्षेपश्च 37
२. वैशेषिकोपरि सांख्यानां प्रत्यवस्थानम्, तस्य अनवस्थादिदूषितत्वं च 38
३. अभिव्यक्तिपक्षासिद्ध्या सत्कार्यवादस्याऽसिद्धिः 39
४. असत्कार्यवादिनं प्रति कारकव्यापारानुपपत्तिचोदना-तत्परिहारौ ,,
५. अद्वैतिसंमतया कार्य-कारणयोरनन्यत्वरीत्या उत्तरम् ,,
६. अद्वैतिरीत्या मृत्-तद्विकारदृष्टान्ते साध्यवैकल्यशङ्का-परिहारौ 40
७. कार्यस्य सदसदनिर्वचनीयता, अत एव मिथ्यात्वं च ,,
८. कार्यस्य जगतः दुर्निरूपत्वकृतमसत्यत्वम् 41
९. कारणात् कार्योत्पत्तेः अबाधितप्रतीतिवशात् सिद्धिः, तन्निरासश्च ,,
१०. भाष्यविकल्पितकोटिद्वये आद्यकल्पभूतस्य द्रव्यमात्रकारणत्वस्य निरासः ,,
११. विकल्पितद्वितीय-तृतीयकोट्योः आकार-तद्विशिष्टद्रव्यकारणत्वयो-दूषणम् 42
१२. ब्रह्मातिरिक्तमिथ्यात्वदृढीकरणम्, तस्य श्रुतिकण्ठोक्तिसिद्धत्वं च ,,
१३. ब्रह्मातिरिक्तमिथ्यात्वे प्रत्यक्षविरोधशङ्कापरिहारौ 43
१४. जीवमिथ्यात्वशङ्कापरिहारौ ,,
१५. उक्तेऽद्वैतवादे, व्यवस्थानुपपत्त्युद्भावनम् 44
१६. व्यवस्थासिद्ध्यौपयिकतया जीवाज्ञानवादोपन्यासः ,,
१७. मुख्याद्वैतिभिः उक्तवादस्य दूषणम् 45
१८. जीवस्य अविद्याश्रयतायाः कल्पितेनाकल्पितेन चाकारेणासम्भवः ,,
१९. अविद्याया अविनाश-विनाशविकल्पनेन अद्वैतिदूषणम् 46
२०. अविद्यायाः ब्रह्म-जीवगतत्वविकल्पनेन ,, ,,
२१. जीवाश्रयया अविद्यया बद्ध-मुक्तव्यवस्थायाः असिद्धिः 47

प्र.सं.

२२.	प्रवाहानादितया प्राप्तदोषनिवारणशङ्का-तन्निरासौ	47
२३.	दुर्घटत्वतः सर्वदोषाप्रसक्तिशङ्का-तन्निरासौ	48
२४.	मोक्षानुपपत्त्या दूषणम्	,,
२५.	व्यवस्थासिद्ध्यै निदर्शितदृष्टान्तानामालोचनतो दूषणम्	,,
२६.	दोषोच्छेदार्थं दोषप्रतिभासस्यावश्यकतया, दृष्टान्तानुपपत्तिः	49
२७.	अविद्याकार्यस्य भ्रमस्य आश्रयचिन्ता	,,
२८.	मायाऽविद्याविभागवादनिरासः	50
२९.	विधान्तरेण मायाऽविद्ययोर्वैषम्यवर्णनं, तन्निरासश्च	51
३०.	मायया ब्रह्मणः प्रयोजनाभावः	,,
३१.	आश्रयविभागानुपपत्त्या मायाविद्ययोर्विभागाभावः, ब्रह्मण एवाविद्याश्रयता च	52
३२.	व्यवस्थानुपपत्तेः इष्टापत्त्या निरासः	,,
३३.	उक्तार्थस्य अनुमानप्रयोगतो दृढीकरणम्	53
३४.	काणादपक्षेऽपि बद्ध-मुक्तव्यवस्थादौर्घट्यम्	,,
३५.	एकस्याऽविद्यया सर्वव्यवस्थोपपत्तिः, ब्रह्माज्ञानपक्षस्योपसंहारः	54
३६.	वैशेषिकाभिमतः ब्रह्माज्ञानवादिनिरासः	,,
३७.	तत्र कारणमात्रसत्यतानिरासः	55
३८.	मिथ्यात्वानित्यत्वयोर्भेदः, कार्यसत्यत्वानुमानं च	,,
३९.	कारणात्कार्योत्पत्तेः, कारणस्य सहकारिसमवधानस्य चासंभवनिरासः	56
४०.	सहकारिसमवधान-कार्यारम्भकत्वयोः कारणगतयोः अनपह्नवनीयता	,,
४१.	हेमादेः कारणस्य स्वातिरिक्तकार्यारम्भकत्वस्थापनम्	57
४२.	मृषावाद्युक्तानुमानदूषणं, तत्र एकात्मवाददूषणम्	,,
४३.	सर्वशरीराणां एकगताविद्याकल्पितत्वाद्यर्थनिरासः	58
४४.	जगन्मिथ्यात्ववादिनां मोक्षार्थयत्नवैयर्थ्यम्	59

पृ.सं.

४५.	ब्रह्मणः स्वरूपपरवाक्यवेद्यतापक्षे अनिष्टप्रसञ्जनम्	59
४६.	चिन्मात्रस्य ब्रह्मणः साक्षित्व-स्वयम्प्रकाशत्वादेरपोहः	,,
४७.	अपरमार्थादपि परमार्थकार्योत्पत्तिशङ्का तन्निरासौ	60
४८.	शून्यवाददृष्टान्तात् ब्रह्मवादस्याप्यकिंचित्करत्वापत्तिः	,,
४९.	ज्ञातृ ज्ञान-ज्ञेयपारमार्थ्यस्यैव व्यवहारव्यवस्थाहेतुता	61
५०.	अध्यासस्य अधिष्ठानपारमार्थ्यं विनाऽपि सिद्धिः	,,
५१.	भेदवादेऽपि व्यवस्थानुपपत्त्याद्यापादन-तन्निरासौ	62
५२.	आत्मसु भेदस्य जडत्वादिप्रसञ्जकत्वाशङ्का-परिहारौ	63
५३.	ब्रह्मणो भिन्नत्वाभ्युपगमे आनन्त्यानुपपत्तिशङ्का-परिहारौ	,,
५४.	आनन्त्यश्रुतेरर्थसङ्कोचशङ्का-परिहारौ	,,
५५.	सामान्यतो भेदाख्यतत्त्वस्य अवश्याभ्युपगन्तव्यता	64
५६.	वैशेषिकमतोपसंहारतः सिद्धान्तसूत्रावतारणम्	65
५७.	सूत्रार्थविवरणम्, आरम्भणशब्दादीनि च	,,
५८.	आरम्भणशब्दादीनां जगतो ब्रह्मानन्यत्वबोधकत्वप्रकारविशदीकारः	65
५९.	वाचारम्भणवाक्यस्य लोकसिद्धकार्य-कारणानन्यत्वप्रतिपादनपरता	66
६०.	कार्यस्य कारणादनन्यत्वे, उत्पत्ति-विनाशात्मकभावाभावयोर्विरोध-शङ्का निरासौ	67
६१.	उत्पत्ति-सत्कार्यवादयोर्व्याघातशङ्का-परिहारौ	68
६२.	स्व(विशिष्टाद्वैति)मते सर्वसामरस्यस्पष्टीकरणम्	,,
६३.	'सदेवे'त्यादिभिः कारणवाक्यैः कार्यस्य कारणानन्यत्वोपपादनम्	69
६४.	सेयं देवतेति वाक्यस्य उक्तकारणवाक्यार्थोपपादकता	,,
६५.	एकस्यैव सतः सच्छब्दाभिधेयस्य अनुप्रवेशानुपपत्तिशङ्का-तत्परिहारौ	70
६६.	सदेवेति वाक्यस्य सर्वांशोपपन्नता उक्तार्थवर्णने, ब्रह्मणि विकारादेर-संसर्गश्च	,,

पृ.सं.

६७. श्रुत्यन्तस्थानां वाक्यानामपि कार्यभूतस्य जगतो ब्रह्मानन्यत्वप्रतिपादकता 71
६८. कार्यकारणोभयावस्थावस्थितत्वं ब्रह्मण एवेत्यंशस्य विशदीकरणम् 72
६९. जगतो ब्रह्मणश्च शरीरात्मभावेनाशङ्कितदोषाभावस्य पूर्वमेवोक्तता ,,
७०. भास्करमतरीत्या एतत्सूत्रार्थानिर्वाहकृतं वैघट्यम् 72
७१. यादवप्रकाशसंमते जगतो ब्रह्मानन्यत्वप्रकारे दोषप्रकटनम् 73
७२. सामान्यशब्दानां विशेषे पर्यवसानम्, तेन नारायणस्यैव जगत्कारणत्वसिद्धिः 74
७३. ईश्वरस्य सन्मात्रत्वाभ्युपगमे अनौचित्यम् 75
७४. एकस्यैव अंशत्वांशित्वयोर्विरुद्धता, उक्तविधानन्यताया एव दृढता 76
७५ बुद्धिशब्दान्तरादीनां अवस्थानिबन्धनत्वानैयत्यशङ्का-तत्परिहारौ 'भावे चे'ति सूत्रात्'' 76-77
७६. प्रत्यभिज्ञा जात्यैक्यत एव न व्यक्त्यैक्यादिति शङ्का, तन्निरासश्च 77
७७. सत्कार्यवादतः कारणात् कार्यस्यानन्यत्वम् 'सत्त्वाच्चापरस्ये'ति सूत्रेण 78
७८. सत्कार्यवादस्य श्रुतिविरुद्धत्वशङ्का-तत्परिहारौ 'असद्व्यपदेशा'दितिसूत्रेण 79
७९. सत्त्वासत्त्वयोः स्वरूपविवेकः 80
८०. वाक्यशेष-युक्ति-शब्दान्तराणामुक्तार्थगमकता ,,
८१. पट-प्राणदृष्टान्तद्वयोपादानेन कार्यस्य कारणानन्यत्वं द्वाभ्यां सूत्राभ्याम् 81-82

7. इतरव्यपदेशाधिकरणे—(जगत्स्रष्टुर्ब्रह्मणः स्वहिताकरणादिदोषप्रसङ्गनिवारणपरे) 83
१. अवान्तरसङ्गतिः, सूत्राशयविशदीकरणं च ,,
२. भास्करमतानुवादः तद्दूषणं च, ब्रह्माज्ञानवादिनः एतदधिकरणवैघट्यम् 84

पृ.सं.

३. श्रुतिभिः ब्रह्मणो जीवादर्थान्तरत्वसमर्थनम् 'अधिकंत्वि'तिसूत्रेण 84–85
४. चेतनस्य ब्रह्मभावासाङ्गत्यं वस्तुविरोधात् 'अश्मादिवच्चे'ति सूत्रेण 85
५. जीव-ब्रह्मणोर्भेदेऽपि तयोः सामानाधिकरण्यनिर्देशनिर्वाहप्रकारः 86
६. उक्तसूत्रद्वयस्य परोक्तेऽर्थे असाङ्गत्यम् 87
७. अस्मिन्नधिकरणे 'अधिकंत्विति' सूत्रपौनरुक्त्यस्य परिहारः ,,

8. **उपसंहारदर्शनाधिकरणे**—(अत्यद्भुतशक्तेर्ब्रह्मणः सङ्कल्पमात्रेण जगत्सृष्टियोगप्रतिपादनपरे) 89
१. अवान्तरसङ्गतिः, एतदधिकरणोत्थापकशङ्कानुदयाक्षेपः, तत्परिहारश्च 89
२. एतदधिकरणीयः पूर्वः पक्षः, पूर्वपक्षहेतोः उदाहरणानुपसंहारस्य श्रुतिप्रतिपन्नता च 90
३. क्षीरदृष्टान्तेन सिद्धान्तप्रदर्शनम् 91
४. भगवतः सङ्कल्पमात्रेण सृष्टौ देवादिदृष्टान्तप्रदर्शनम् ,,

9. **कृत्स्नप्रसक्त्यधिकरणे**—(निरवयवस्याऽपि ब्रह्मणः जगत्कारणत्वस्य श्रुतिप्रतिपन्नतया असाङ्गत्याभावप्रतिपादनपरे) 92
१. श्रुतिभिः ब्रह्मणो निरवयवत्वरूपस्यैकत्वस्य प्रतिपादनम् ,,
२. कृत्स्नैकदेशविकल्पतः ब्रह्मणो जगत्कारणत्वानुपपत्तिशङ्का 93
३. श्रुत्येकगम्यस्यार्थस्य तर्केणाऽप्रधृष्यताकथनं 'श्रुतेस्त्वि'ति सूत्रेण ,,
४. सामान्यतः अन्यत्र दृष्टस्य धर्मस्य, अन्यत्र तद्विसजातीये अनारोपणीयता 94
५. उक्तेऽर्थे पुराणाम्नायवचनोपष्टम्भः 95
६. प्रधानादिकारणतावादेऽपि निर्वाहदौःस्थ्यवर्णनं, 'स्वपक्षदोषादि'ति सूत्रेण ,,
७. परमात्मनः स्वेतरसमस्तविजातीयतया सर्वशक्तिमत्त्वेन श्रुतितः सिद्धिः 96

पृ.सं.

८. देहेन्द्रियादिविरहिणोऽपि ब्रह्मणः श्रुत्युक्तकारणत्वाविरोधः 'विकरणत्वा'दित्यनेन 97

10. **प्रयोजनवत्त्वाधिकरणे**—(अवाप्तसमस्तकामस्याऽपि ब्रह्मणः लीलार्थजगत्स्रष्टृत्वसमर्थनपरे) 99

१. आप्तकामस्य भगवतः जगत्सृष्टेः प्रयोजनाभावः, अतो जगत्कारणत्वानुपपत्तिश्च ,,

२. लीलां निमित्तीकृत्य सृष्टेः सप्रयोजनता, अतो जगत्कारणत्वनिर्वाहसिद्धान्तश्च 100

३. परमात्मनः सृष्टिवैविध्यनिबन्धनपक्षपातित्व-निर्दयत्वयोरापादनं, तन्निरासश्च 100

४. सृष्टिप्राक्काले जीवानामभावः, अतः वैषम्यप्रयोजककर्माभावश्चेति शङ्का, तत्परिहारश्च 101

५. ब्रह्मणो जगत्कारणत्वे, अवैकल्प्येन सर्वार्थानामुपपन्नतोक्तिः 'सर्वधर्मोपपत्ते'श्चेत्यनेन 103

II. **द्वितीये तर्कपादे**—(सांख्यादिपक्षाणां तर्कतः प्रतिक्षेपपरे पांचरात्रप्रामाण्यसमर्थनपरे च) 105

1. **रचनानुपपत्त्यधिकरणे**—(ब्रह्मानधिष्ठितस्य सांख्योक्तप्रधानस्य जगत्कारणत्वायोगसमर्थनपरे)

१. आदित एतदन्तं शारीरकप्रतिपादिता अर्थाः, सङ्गतिः, द्वितीयपादस्य प्रयोजनं च 105

२. कापिलमतस्य प्रथमं निरासे हेतुः, पौनरुक्त्यनिरासश्च 106

३. सांख्यमतीया प्रक्रिया ,,

४. सांख्यप्रक्रियायां सम्प्रतिपन्नः निरसनीयश्चांशः 107

५. सांख्याभिमतानुमाननिरासाय तदीयप्रक्रियाशोधनम् 108

पृ.सं.

६. तैः अव्यक्तापरपर्यायप्रधानकल्पने हेतवः 109

७. चेतनानधिष्ठितप्रधानकारणतावादनिरासतः सिद्धान्तार्थवर्णनम् 110

८. कार्यान्वयवतः कारणत्वव्याप्तेः द्रव्ये विश्रान्तिः, सत्त्वादीनां गुणतैव, न द्रव्यत्वम् ,,

९. सांख्यसंमतायाः कारणतायाः तन्मते अनुपपत्त्युद्भावनम् 111

१०. प्राज्ञानधिष्ठितप्रधानप्रवृत्तौ दृष्टान्तस्यासिद्धिः ; सर्वस्याऽपि पक्षकोटि-प्रवेशात् 112

११. पूर्वोक्तविरोधाशङ्का-तत्परिहारौ 113

१२. प्राज्ञाधिष्ठानस्याऽनपेक्षणे सर्ग-प्रतिसर्गव्यवस्थालोपः ,,

१३. प्राज्ञाधिष्ठानेऽपि व्यवस्थालोपशङ्का-तत्परिहारौ ,,

१४. सृष्टि-प्रलयादिसर्वव्यवस्थानां जीवीयकर्मानुगुणप्रकृतिपरिणामायत्तता 114

१५. जीवीयकर्मणो वेदैकगम्यत्वं, परमपुरुषप्रीत्यप्रीतिरूपता च ,,

१६. भगवतो दयास्वरूपस्य, दयाविषयस्य च शोधनम् 116

१७. अनपेक्षाया अपि प्रकृतेः परिणामप्रवृत्तिशङ्का-तत्परिहारौ 117

१८. पुरुषस्य स्वसंनिधिमात्रेण प्रधानप्रवृत्तिजनकत्वशङ्का-तत्परिहारौ 118

१९. प्रलयानन्तरं पुनःसृष्टेरनुपपत्त्या अनपेक्षप्रधानकारणत्वायोगः 119

२०. कालविशेषनियतशक्तिमत्प्रधानानुमानेऽपि दोषप्रतिपादनम् 120

२१. प्रधानानुमानस्य अनुपयोगाद्वैयर्थ्यम् ,,

२२. सांख्यदर्शनप्रक्रियायां मिथोव्याघाततः अनौचित्यपूर्णता ,,

२३. सूत्रोक्तस्य विप्रतिषेधस्योपपादनम् 122

२४. सांख्योक्ता प्रकृतेः निःस्पृहतया पुरुषोपकारिता ,,

२५. सांख्योक्तार्थे असांगत्योपपादनम् 122–123

२६. (प्रसङ्गात्) मायावादिपक्षगतम् असामञ्जस्यम् 123

२७. प्रकृतौ परमार्थापरमार्थविभागेन वैषम्यकल्पनाया अनौचित्यम् 124

पृ.सं.

2. महद्दीर्घाधिकरणे—(तार्किकाभिमतपरमाणुकारणतावादनिरासपरे—) 125

१. उक्तार्थानुवादतः सङ्गतिप्रदर्शनम् ,,

२. सूत्रार्थविवरणम्, उक्तासामञ्जस्यविवरणं च 126

३. एतस्मिन् परोक्तनिर्वाहप्रकारानुवादः, तद्दूषणं च 127

४. महद्दीर्घवद्वेति 'वा' शब्दसमुच्चितस्याऽसामञ्जस्यस्य प्रदर्शनम् (उभयथेत्यादि) 128

५. अदृष्टस्य विपाकापेक्षत्वेन सदोत्पादकत्वाभावशङ्का-तत्परिहारौ 129

६. वैशेषिकमते समवायाख्यसम्बन्धाभ्युपगमकृतम् असामञ्जस्यम् 129

७. 'समवायाभ्युपगमाच्चे'ति सूत्रार्थनिष्कर्षणम् 130

८. तत्संमते समवाये विशिष्टदोषोद्भावनम् 'नित्यमेवे'त्यादिसूत्रेण 131

९. कार्यसरूपाणामेव कार्यानुमेयत्वात्, परमाणूनामनित्यत्वाद्यापत्तिः ,,

१०. परमाणुषु रूपाद्यभ्युपगमतदभावपक्षयोः असामञ्जस्यापादकत्वम् 132

११. कणादपक्षस्य वैदिकैः सर्वथा अपरिग्रहात् मुमुक्ष्वनादरणीयत्वम् 133

3. समुदायाधिकरणे—(बौद्धवैभाषिक-सौत्रान्तिकपक्षयोः निरसनपरे) 134

१. सङ्गतिप्रदर्शनम्, बौद्धप्रभेदानां तत्तन्मतानां च सामान्यतः प्रदर्शनम् ,,

२. वैभाषिक-सौत्रान्तिकाख्ययोर्बौद्धयोः तदभिप्रायानुवादपूर्वकं निरासः 135

३. अविद्यादीनां मिथः कार्य-कारणभावेन सङ्घातभावोपपत्तिशङ्का-तत्परिहारौ 136

४. क्षणिकत्वपक्षे जगदुत्पत्तेरनुपपत्त्या दूषणम् 138

५. हेत्वभावेऽपि कार्योत्पादपक्षस्य अनौचित्यम् 139

६. सतोऽर्थस्य निरन्वयविनाशायोगेन, क्षणिकत्वायोगः 140

७. बौद्धाभिमतयोः उत्पत्ति-विनाशयोः स्वरूपे दोषः 141

८. सौगतसंमतस्य आकाशतुच्छत्वस्य प्रतिक्षेपः ,,

९. आकाशस्य अभावान्तर्भावस्य प्रतिक्षेपः 142

पृ.सं.

१०. प्रत्यभिज्ञाबलेन वस्तुस्थिरत्वोपपादनम् 143
११. प्रत्यक्षानुमानाभ्यां वस्तुक्षणिकत्वासिद्धिशङ्कानिरासौ 143
१२. क्षणिकत्वसाधकहेतुदूषणम् 144
१३. प्रत्यभिज्ञया स्थिरत्वसिद्धेर्दृढीकरणम् 145
१४. ज्ञेयार्थस्य ज्ञानसमकालवर्तित्वानुपयोगः सौत्रान्तिकोक्तः 146
१५. सौत्रान्तिकोक्तार्थस्य 'नासतो दृष्टत्वा'दिति सूत्रार्थवर्णनतो निरासः ,,
१६. अनुद्यमिनामपि सर्वेष्टार्थसिद्धिप्रसङ्गेन क्षणध्वंसादेर्दुष्टत्वम् 147

4. उपलब्ध्यधिकरणे—(विज्ञानमात्रास्तित्ववादियोगाचारपक्षप्रतिक्षेपपरे—) 148
१. योगाचाराख्यबौद्धानां प्रत्यवस्थानरीतिः ,,
२. अर्थगतस्याकारस्य ज्ञानगतत्वोपपादनम् 149
३. बाह्यार्थाभावः ,,
४. वेदान्तिसिद्धान्तः ज्ञानातिरिक्तार्थसत्यता च ,,
५. ग्राह्य-ग्राहकयोरभेदोक्तौ स्वव्याघातः 150
६. वासनाया असिद्ध्या ज्ञानवैचित्र्यस्यार्थवैचित्र्यकृतत्वम् ,,
७. ज्ञाने अर्थासाधारण्यस्य अर्थसम्बन्धायत्तता ,,
८. ज्ञानानां निरालम्बनत्ववादनिरासः (जागरितज्ञानानां स्वाप्नज्ञान-वैधर्म्यात्) 151
९. तादृशज्ञानानुपलम्भात् ज्ञानानामर्थशून्यत्वासिद्धिः ,,

5. सर्वथाऽनुपपत्त्यधिकरणे—(माध्यमिकसंमतसर्वशून्यतावादप्रतिक्षेपपरे—) 152
१. पूर्वपक्षतया माध्यमिकपक्षसंक्षिप्तानुवादः ,,
२. माध्यमिकेन ब्रह्माज्ञानवादिचोद्यनिराकरणम् 153
३. वेदान्तिसिद्धान्तेन सर्वशून्यतावादनिरासः ,,

		प्र.सं.
6.	**एकस्मिन्नसम्भवाधिकरणे**—(आर्हतसंमतानैकान्तवादनिरसनपरे—)	154
१.	सङ्गतिः, सङ्ग्रहेणार्हतमतानुवादः	,,
२.	आर्हतमते जीवमोक्षौपयिकार्थसङ्ग्रहः	155
३.	असाधारणो जैनप्रक्रियाविशेषः	156
४.	स्वसिद्धान्तप्रतिपादनाय जैनमतदूषणम्, सूत्रोक्तासम्भवस्योपपादनं च	157
५.	कालस्य पदार्थविशेषणत्वनैयत्यम्	,,
६.	वेदान्तवादेऽपि अनैकान्तवादाभ्युपगमशङ्का-परिहारौ	,,
७.	उक्तानैकान्त्यनियमस्याऽपि भङ्गोपपादनम्	158
८.	जैनमते जीवात्मनो देहसमपरिमाणत्वाभ्युपगमकृतो दोषः	,,
९.	आत्मस्वरूपे सङ्कोच-विकासाभ्युपगमशङ्का-तत्परिहारौ	159
१०.	मोक्षावस्थापूर्वभाविजीवपरिमाणानाशकृतः जीवस्य देहसमपरिमाणत्वायोगः	,,
7.	**पशुपत्यधिकरणे**—(पाशुपतमतस्य वेदविरुद्धत्वायत्तनिरसनीयत्वपरे—)	160
१.	सङ्गतिः, पाशुपतप्रक्रियाया अनुवादः	160–161
२.	पाशुपतमतानौचित्योपपादनतः स्वसिद्धान्तौचित्यप्रदर्शनम्	161
३.	अस्य वेदविरुद्धत्वकृतमनौचित्यम्	162
४.	श्रौतं मोक्षसाधनमुपासनम्, तदङ्गानि च वर्णाश्रमधर्मादीनि	,,
५.	शम्भु-शिवादिशब्दानां नारायणपरत्वनिर्वाहः	,,
६.	ईश्वरस्य केवलजगन्निमित्तत्वकल्पनानौचित्यम्	163
७.	अशरीरस्येश्वरस्य प्रधानाधिष्ठातृत्वायोगः	164
८.	ईश्वरस्य पुण्य-पापयोरभ्युपगमे दोषः	165
९.	अस्याधिकरणस्य जैमिनीयमतविरोधाधिकरणेन गतार्थतानिरासः	,,

पृ.सं.

8. **उत्पत्त्यसम्भवाधिकरणे** —(जीवोत्पत्तिवादाशङ्कितपञ्चरात्रतन्त्राप्रामाण्याप-नोदनपरे—) 166

१. अवान्तरसङ्गतिः, प्रकृताधिकरणारम्भोपयोगिन्याशङ्का च जीवोत्पत्ति-वादासाधुत्वपरा ,,

२. पाञ्चरात्रस्थस्य मनसो जीवादुत्पत्तिवादस्याप्यसाधुता 167

३. जीवोत्पत्तिवादादिवाक्यस्य आशयवर्णनतः सिद्धान्तकथनम् ,,

४. उक्तार्थे, एतत्तन्त्रोक्तस्य जीवोत्पत्तिनिषेधवादस्य उपष्टम्भकता 170

५. शाण्डिल्यस्य वेदेषु निष्ठाया अलाभोक्तेः तात्पर्यचिन्तनम् 171

६. दुर्ज्ञेयस्य वेदार्थस्य सुखावबोधसङ्कल्पेन भगवता पञ्चरात्रारम्भः 172

७. पाञ्चरात्रतन्त्रप्रणयने भगवतस्तात्पर्यम् ,,

८. अन्योक्तस्य एतदधिकरणार्थस्य सूत्राक्षराननुगुणता प्रत्युत तद्विरोधोऽपि 173

९. पाञ्चरात्रप्रामाण्यस्थापकमहाभारतवचनादि 173–174

१०. महाभारतगतायाः प्रशंसायाः अनैकान्त्यशङ्का-समाधाने 174

११. 'वक्ता नारायणः स्वयम्' इत्यस्याशयस्पष्टीकरणम् 176

१२. उक्तस्यार्थस्य वचनान्तरेण विशदीकरणम् ,,

१३. सर्वस्यापि पञ्चरात्रस्य एकत्वोक्तेराशयः 177

१४. शारीरके तन्त्रान्तरनिराकरणस्याशयः ,,

III. **तृतीये वियत्पादे**—(वियदादेः (आकाशादेः) प्रपञ्चस्य ब्रह्मकार्यत्वचिन्तापरे—) 179

1. **वियदधिकरणे**—(आकाशस्य ब्रह्मकार्यत्वचिन्तनपरे—)

१. पादसङ्गतिप्रदर्शनाय पूर्वापरार्थसङ्ग्रहः ,,

२. संशयाकारः, सयुक्तिकः पूर्वः पक्षः, पूर्वपक्षितार्थनिर्वाहः, विय-दुत्पत्तिश्रुतेरर्थविरोधश्च 180

३. श्रुत्याश्रयणेन वियदुत्पत्तिसिद्धान्तः, आकाशोत्पत्तिश्रुतेः गौणत्व-शङ्का च 181

पृ.सं.

४. एकस्यैव 'सम्भूत'शब्दस्य आकाशांशे गौणत्वस्य अन्यंशे मुख्यत्वस्य चानुपपत्तिः 182
५. वियदुत्पत्तिशङ्कायाः सूत्रतः परिहारः 183
६. छान्दोग्यश्रुतितोऽपि आकाशोत्पत्तिप्रतीतिः 184
७. सर्वस्याऽपि कार्यत्वश्रुत्या आकाशस्याऽपि कार्यत्वावश्यंभावः 185
८. आकाशोत्पत्तिसिद्ध्या वायोरप्युत्पत्तेरुक्तप्रायता ,,
९. उत्पत्तेरभावस्य ब्रह्ममात्रवृत्तिता 186

2. **तेजोऽधिकरणे**—('तेज आदिशरीरकाद् ब्रह्मण एव अबादिसृष्टिः' इत्यर्थनिर्णयपरे—) 187
१. अवान्तरसङ्गतिस्पष्टीकरणम्, प्रकृताधिकरणीयविचारौपयिकः संशयश्च ,,
२. सहेतुकः पूर्वः पक्षः ,,
३. अपां, केवलादेव तेजसः उत्पत्तिशङ्का, पृथिव्या अपि केवलाभ्योऽद्भ्यः सृष्टिशङ्का च 188
४. श्रुतिस्थस्य अन्नशब्दस्य पृथिव्यभिधायकत्वम् 189
५. सर्वस्या अपि ब्रह्मणः संकाशादुत्पत्तेः पारम्परिकत्वम् ,,
६. सिद्धान्तप्रतिपादनम् (तत्तद्वस्तुशरीरकात् परमात्मन एव सर्वा सृष्टिः) 190
७. सृष्टिसङ्कल्पात्मकस्य ईक्षणस्य परब्रह्मासाधारणता ,,
८. श्रुतायाः प्राणादिसृष्टेः पारम्परिकत्वतात्पर्याभावः 191
९. 'एतस्मा'दित्यादेः, ब्रह्मणः साक्षात्सम्भवपरत्वोत्तम्भकत्वाभावशङ्कापरिहारौ 192
१०. सर्वशब्दानां ब्रह्मवाचित्वे व्युत्पत्तिविरोधशङ्काया निरासः 193
११. सूत्रस्य 'चराचरव्यपाश्रयः' इत्यादेः योजनाभेदेनार्थवर्णनम् 194

3. **आत्माधिकरणे**—(जीवानामुत्पत्ति-विनाशराहित्येन नित्यताप्रतिपादनपरे—) 195
१. अवान्तरसङ्गतिः, अधिकरणे विचारणीयोंऽशः, पूर्वपक्षश्च ,,

पृ.सं.

२. जीवस्य ब्रह्माभेदमादाय नित्यत्वशङ्का, तत्परिहारश्च 196

३. प्रकृताधिकरणीयः सिद्धान्तः (आत्मानुत्पत्तिपरः) ,,

४. आत्मनो नित्यत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अनुपपत्तिशङ्का, तत्परिहारश्च 197

५. जीव-वियदादिगतकार्यस्वरूपवैलक्षण्यादौ नियामकादि (तत्त्वत्रय-विवेकः) ,,

६. ब्रह्मण एव कार्यत्व-कारणत्वयोः स्वरूपविवेकः 198

७. अवस्थान्तरापत्तिरूपविकारस्य चिदचिदीश्वरेषु समानता ,,

८. उत्पत्त्यनुत्पत्त्यादिपरश्रुतिविषयविभागः 199

९. सर्वदा चेतनविशिष्टस्याऽपि ब्रह्मणः सृष्टेः प्राक् एकत्वोपपत्तिः ,,

१०. अद्वैतप्रकारत्रयेऽपि एकत्वावधारणनिर्वाहे अविशेषः ,,

११. विशिष्टाद्वैतिनां त्रिविधानामद्वैतिनामपि विशेषः 200

4. **ज्ञाधिकरणे**—(ज्ञानाश्रयत्वस्य जीवस्वरूपतासमर्थनपरे—) 201

१. अवान्तरसङ्गतिः, अधिकरणीयः संशयश्च ,,

२. पूर्वः पक्षः, चेतनस्य ज्ञानमात्रस्वरूपत्वम्, न ज्ञातृत्वम् इति, जीवस्य आगन्तुकं चैतन्यमेवेति मतं च 202

३. सिद्धान्तप्रदर्शनम्; चेतनस्य ज्ञातृत्वस्वरूपतैवेति 203

४. आत्मनो विभुत्वे समुन्मिषतो दोषस्य अणुत्वतो निरासः 204

५. ,, ,, गत्यागत्योः सर्वथा अनुपपत्तिः 205

६. श्रुतौ महत्वोक्तेर्जीवविषयकत्वभ्रान्तेः प्राप्तस्य अणुत्वविरोधस्य परिहारः ,,

७. आत्मनोऽणुत्वस्य श्रुतितः सिद्धिः 206

८. आत्मनोऽणुत्वे सर्वावयवावच्छेदेन सुखादिसंवेदनानुपपत्तिशङ्का—तत्परिहारौ 207

पृ.सं.

९. अणोरात्मनः 'अविरोधश्चन्दनवदि'ति चन्दनबिन्दुदृष्टान्तासाङ्गत्य-तत्समाधाने 207

१०. अस्मिन् विषये सूत्रकृतः स्वाभिप्रायाविष्कारः 208

११. ज्ञानस्वरूपस्याप्यात्मनः स्वातिरिक्तज्ञानगुणकत्वोपपत्तिः 209

१२. ज्ञान तदाश्रययोः पृथक्तया श्रुतिकण्ठोक्तिः ,,

१३. ज्ञातृत्वस्वरूपेप्यात्मनि ज्ञानशब्दप्रयोगौचित्यम् 210

१४. ज्ञानस्य स्वरूपानुबन्धिधर्मत्वतः आत्मनि ताच्छब्द्यम् 211

१५. ज्ञानस्य आत्मस्वरूपानुबन्धिधर्मत्वाभावशङ्का-परिहारौ 212

१६. आत्मप्रकाशस्य सार्वकालिकता ,,

१७. ज्ञानमात्रात्मवादे विभुत्वे, जडात्मवादे विभुत्वे च दूषणम् 213

१८. सूत्रोक्तयोः उपलब्ध्यनुपलब्ध्योः उभयोर्वा प्रसङ्गप्रकारः 214

5. **कर्त्रधिकरणे**—(कर्तृत्वम् आत्मन एव, न गुणानामिति समर्थनपरे—) 215

१. अवान्तरसङ्गतिः, अधिकरणीयो विचारश्च, पूर्वपक्षश्च सयुक्तिकः (प्रकृतेरेव कर्तृतेति) ,,

२. सिद्धान्तमुखेन सूत्रार्थः 216

३. अनुवादपूर्वकं पूर्वपक्षस्य निरासः 217

४. आत्मनः देहेन्द्रिययोः प्रेरणं प्रति कर्तृतायाः श्रुत्युपदेशात्सिद्धिः 218

५. आत्मनः लौकिक-वैदिकाख्योभयविधकर्मसु कर्तृतायाः श्रुतिसिद्धता ,,

६. आत्मनः कर्तृत्वानभ्युपगमे दोषः 219

७. बुद्धेः कर्तृत्वाभ्युपगमे आत्मापलापपर्यवसानम् ,,

८. प्रकृतेरेव कर्तृत्वे, तस्यां प्रकृत्यन्यताख्यातिरूपसमाधेः मोक्षहेतोरनुपपत्तिः 220

९. आत्मनः कर्तृत्वे कर्तृत्वस्य तस्मिन्ननुपरतिशङ्कापरिहारौ ,,

6. परायत्ताधिकरणे—(जीवात्मगतविहित-निषिद्धक्रियाकर्तृत्वस्य परमात्माधीनत्व समर्थनपरे—) 221

१. अधिकरणविचारणीयोऽर्थः, पूर्वः पक्षः, (स्वायत्तकर्तृत्वपरः) ,,

२. पूर्वपक्षोक्ताया युक्तेः अनूद्य निरासः, परमात्मायत्तत्वेऽपि, फलं जीवस्यैव 222

३. परमात्मनः जीवीयप्रथमप्रवृत्तावनुमन्तृत्वे श्रुतिविरोध-तत्परिहारौ 223

7. अंशाधिकरणे—(जीवात्मनां परमात्मांशत्वसमर्थनपरे—) 226

१. अवान्तरसङ्गतिः, संशयश्च ,,

२. अस्याधिकरणस्य आरम्भाधिकरणेन पौनरुक्त्याशङ्का परिहारौ 227

३. हेतूपन्यासपूर्वकः पूर्वः पक्षः, ब्रह्माशतापक्षनिरासः ,,

४. ब्रह्माज्ञानवादेन पूर्वः पक्षः, उपहितब्रह्मणो जीवत्ववादेन पूर्वःपक्षश्च 228

५. सूत्रार्थः सिद्धान्तवर्णनम् (जीवस्य ब्रह्मांशतेति) ,,

६. जीवस्य ब्रह्मणः सकाशात् भेदव्यपदेशानां अन्यथासिद्धत्वशङ्का-परिहारौ 229

७. शास्त्रस्य भेदभ्रमोपदेशपरत्वानुपपत्तिः ,,

८. उपहितब्रह्मजीववादनिरासः, जीवस्य ब्रह्मांशतायाः श्रुतिकण्ठोक्ति-सिद्धता च 230

९. आत्मसु अत्यन्तसरूपेषु भेदकाकारावगन्तृत्वं आत्मज्ञानामेव 231

१०. जीवस्य ब्रह्मांशतायाः स्मृतिकण्ठोक्तितो लाभः ,,

११. ब्रह्मणो जीवांशित्वायत्तजीवदोषाश्रयत्वप्रसङ्गवारणम् ,,

१२. अंशत्वपरिष्कारः, ततः प्रकृतोपयोगश्च, अंशांशिनोरपि मिथोऽर्थान्तरता 232

१३. भेदाभेदव्यपदेशयोः श्रुत्यादिगतयोः विषयविवेकः 233

१४. उक्तविधस्यैवांशांशिभावस्य स्मृतितोऽपि लाभः ,,

पृ.सं.

१५. सर्वेषां जीवानां ब्रह्मांशत्वाविशेषेऽपि अधिकारादितारतम्ये युक्ति-प्रदर्शनम् 234
१६. सर्वेषु जीवेषु ब्रह्मांशत्वनिबन्धनस्य भोगसाङ्कर्यस्यानवकाशः ,,
१७. ब्रह्माज्ञानवादे भोगव्यवस्थायाः असिद्धिः 235
१८. सत्योपाध्युपहितब्रह्मजीववादेऽपि अव्यवस्था 236
१९. अदृष्टहेतुभूतसङ्कल्पव्यवस्थयाऽपि भोगव्यवस्थाया असिद्धिः ,,
२०. उपाधिप्रदेशनानात्वकृतभोगव्यवस्थायाः निरासः 237

IV. **चतुर्थे प्राणपादे**—(प्राणादिजीवोपकरणानां जीवकार्यत्वचिन्तापरे—) 239

1. **प्राणोत्पत्त्यधिकरणे**—(प्राणशब्दवाच्यानामिन्द्रियाणामपि वियदादिवत् ब्रह्मकार्यत्वचिन्तापरे—) ,,
१. पादसङ्गतिः ,,
२. विचाराङ्गः संशयः, पूर्वः पक्षः (इन्द्रियाणां जीववदेवानुत्पत्तिरिति) 240
३. अतिदेशतः चिन्त्या श्रुतिः ,,
४. श्रुतेः अन्यथानेयत्वाशङ्का-तत्परिहारौ 241
५. अधिकरणीयः सिद्धान्तः (इन्द्रियोत्पत्तिरेव युक्तेति) ,,
६. इन्द्रियोत्पत्तिवादस्य आत्मोत्पत्तिवादवैषम्यम् 242
७. 'असद्वा' इति प्रस्तुतस्य वाक्यस्य परमात्मपरता ,,
८. 'ऋषि-प्राण' शब्दयोः परमात्मपरत्वे, बहुवचनविरोधोपशमनम् ,,
९. उक्तवाक्यस्थप्राणशब्दस्य परमात्मपरत्वे उपष्टम्भकं प्रमाणम् 243

2. **सप्तगत्यधिकरणे**—(इन्द्रियाणाम् एकादशसङ्ख्यत्वसमर्थनपरे—) 244
१. विचारोपयोगी संशयः, पूर्वपक्षः (इन्द्रियाणि सप्तैवेति) तत्र हेतुश्च ,,
२. हस्तपादादिष्विन्द्रियपदव्यपदेशस्यौपचारिकता (पूर्वपक्षे) 245
३. इन्द्रियाणामेकादशत्वनिर्णायकं सिद्धान्तसूत्रम् ,,

पृ सं.

४. क्वचित् आत्मशब्देन मनसो व्यपदेशः, न्यूनाधिकसंख्यावादानां तात्पर्यं च 246

3. प्राणाणुत्वाधिकरणे—(इन्द्रियाणामणुपरिमाणतास्थापनपरे—) 247

१. सप्रमाणः पूर्वः पक्षः, (इन्द्रियाणां विभुत्वमिति) ,,

२. सिद्धान्तरूपः सूत्राशयः ,,

३. मुख्यप्राणस्याप्युत्पत्तिमत्तानिरूपणम् 248

4. वायुक्रियाधिकरणे—(श्रेष्ठप्राणस्य वायुसामान्यरूपत्व-तत्क्रियारूपत्वनिषेधेन विशिष्टवायुत्वपरे—) 250

१. विचारोपयोगी संशयः, सहेतुकः पूर्वः पक्षः, सिद्धान्तार्थवर्णनं च ,,

२. वायोः प्राणस्य भूतान्तरत्वनिरासः 251

३. मुख्यप्राणस्य चक्षुरादिवत् जीवोपकरणत्वम् 252

४. प्राणापानादीनां तत्त्वान्तरत्वशङ्कानिरासः 253

5. श्रेष्ठाणुत्वाधिकरणे—(मुख्यप्राणस्याऽपि विभुत्वनिषेधेन अणुत्वसमर्थनपरे—) 255

१. श्रुतिस्थैः पदैः अपरिच्छिन्नत्वशङ्का, उत्क्रान्त्यादितः परिच्छिन्नत्वनिर्णयश्च ,,

6. ज्योतिराद्यधिकरणे—(जीवस्य देवतानां च प्राणादिप्रवर्तकतायाः, परमात्मसङ्कल्पायत्तत्वपरे—) 256

१. अवान्तरसङ्गतिः प्रकृतविषयशोधनं च ,,

२. संशयः, पूर्वपक्षश्च (स्वायत्तत्वमिति) ,,

३. सिद्धान्ततः सूत्रार्थविवरणम् 257

४. सर्वेषां परमात्माधिष्ठितत्वनैयत्यात् (परमात्मसङ्कल्पायत्तत्वमिति) 258

पृ. सं

7. **इन्द्रियाधिकरणे**—(श्रेष्ठप्राणव्यतिरिक्तप्राणानामेव इन्द्रियरूपत्वसमर्थनपरे—) 259

१. विचारौपयिकः संशयः, पूर्वः पक्षः (प्राणपदवाच्यानि सर्वाणीन्द्रियाण्येवेति) ,,

२. सिद्धान्तरूपेण सूत्रार्थविवरणम् ,,

३. उक्तार्थव्यवस्थापकतया प्राणे पृथक्त्वश्रवणेन्द्रियवैलक्षण्ययोः उपपादनम् ,,

४. इन्द्रियाणां प्राणपदव्यपदेश्यत्वे हेतुः 260

8. **संज्ञामूर्तिक्लृप्त्यधिकरणे**—(नामरूपव्याकरणात्मकसृष्टेः त्रिवृत्कर्तृसमानकर्तृकता 261

१. पेटिकासङ्गतिः ,,

२. विचारार्थः संशयः, पूर्वः पक्षः (प्रपञ्चव्यष्टिसृष्टेः समष्टिजीवकर्तृकत्वमिति) 262

३. उक्तविधे व्याख्याने लाक्षणिकत्वाशङ्का-परिहारौ 263

४. सिद्धान्तार्थः सूत्रार्थविवृतितः 264

५. प्रविशतेरुत्तमपुरुषस्य चतुर्मुखसृष्टौ नामरूपव्याकरणोपदेशस्य च सामरस्यम् 265

६. उक्तार्थानुगुणः अनुप्रवेश-नामरूपव्याकरणश्रुतेरर्थः ,,

७. उक्तार्थे वैधर्म्यशङ्कायाः परिहाररूपतया 'मांसादि' इत्युत्तरसूत्रावतरणम् 266

८. शङ्कानुवादपूर्वकं सूत्रार्थवर्णनतः परिहारः ,,

९. अग्न्यादिषु त्रिवृत्करणप्रदर्शनप्रयोजनम् 269

१०. तेजोबन्नात्मकत्वेन त्रिरूपस्य एकैकरूपेण व्यपदेशे उपपत्तिः ,,

इति द्वितीयाध्यायार्थविषयसूचनी

विदुषा रामभद्राचार्यशर्मणा सङ्ग्रथिता श्रीभाष्य प्रथम-द्वितीयाध्याययोः विषयसूचनी समाप्ता ।

—o—

श्रीः

अध्यायपादार्थसूचनी

द्वितीयः अविरोधाध्यायः

[पादाः-४. अधिकरणानि-३३. सूत्राणि-१४९.]

अध्यायार्थः—'निखिलजगदेककारणं ब्रह्म वेदान्तवेद्यं जिज्ञास्यं च' इति आद्याध्याय-समर्थितस्यार्थस्य सम्भावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनम् ।

1. **स्मृतिपादः**—(अधि—10, सूत्राणि—36) P. 1-103

पादार्थः—ब्रह्मणो जगत् प्रति अभिन्ननिमित्तोपादनत्वे, आशङ्कितस्मृतिविरोधपरिहारः ।

2. **तर्कपादः**—(अधि—8, सूत्राणि—42) P. 105-177

पादार्थः—सांख्यादिपक्षाणां तर्कतः प्रतिक्षेपः, पाञ्चरात्रप्रामाण्यसमर्थनं च ।

3. **वियत्पादः**—(अधि—7, सूत्राणि—52) P. 179-237

पादार्थः—वियदादेः प्रपञ्चस्य ब्रह्मकार्यत्वचिन्ता ।

4. **प्राणपादः**—(अधि—8, सूत्राणि—19) P. 239-270

पादार्थः—प्राणादीनां जीवोपकरणानां ब्रह्मकार्यत्वचिन्ता ।

—o—

॥ श्रीः ॥

॥ अनुसन्धेयाः शान्तिपाठाः ॥

ओम् ॥ वाङ्मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य म आणी स्थः । श्रुतं मे मा प्रहासीः । अनेनाऽधीतेनाऽहोरात्रान् सन्दधामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारमवतु वक्तारम् ॥ ओं शान्तिः शान्तिः शान्तिः ॥

ओम् ॥ शंनो मित्रः शं वरुणः । शंनो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्माऽसि । त्वामेव प्रत्यक्षं ब्रह्म+वदिष्यामि । ऋतं+वदिष्यामि । सत्यं+वदिष्यामि । तन्मामवतु× । तद्वक्तारमवतु× । ×अवतु माम् । ×अवतु वक्तारम् ॥ ओं शान्तिः शान्तिः शान्तिः ॥*

ओम् ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यँ करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ओं शान्तिः शान्तिः शान्तिः ॥

ओम् ॥ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवाऽवशिष्यते ॥ ओं शान्तिः शान्तिः शान्तिः ॥

ओम् ॥ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि, सर्वं ब्रह्मौपनिषदम् । माऽहं ब्रह्म निराकुर्याम्, मा मा ब्रह्म निराकरोत् । अनिराकरणमस्त्वनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ओं शान्तिः शान्तिः शान्तिः ॥

ओम् ॥ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाऽक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ ओं शान्तिः शान्तिः शान्तिः ॥ ओम् ॥

ओम् ॥ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोश्श्रुतं माच्योढ्वं ममाऽमुष्य ओम् ॥

[* सू :—उत्तरशान्तिपाठे + एवं चिह्नितेषु स्थानेषु 'ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम्' तन्मामावीत्, तद्वक्तारमावीत्' इति, × एवं चिह्नितयोः'आवीन्माम् । आवीद्वक्तारम् ।' इत्येतावति विशेषः]

॥ श्रीः ॥

गुरुपरम्परास्तुतिः

अस्मद्गुरुभ्यो नमः । अस्मत्परमगुरुभ्यो नमः । अस्मत्सर्वगुरुभ्यो नमः ॥

श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ॥

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो-
रामानुजस्य चरणौ शरणं प्रपद्ये ॥

स्वस्वाचार्यप्रभृति रामानुजाचार्यपर्यन्तं स्वस्वसम्प्रदायानुगुण्येन गुरुपरम्पराम् अनुसन्धाय रामानुजाचार्यप्रणतिपद्यमनुसन्धाय पुनः भगवत्पर्यन्तं स्वीयसम्प्रदायानुगुण्येन श्लोकाः अनुसन्धेयाः॥

॥ अस्मद्गुरुपरम्परायै नमः ॥

श्रीः

प्रथमपादाधिकरणार्थसूचनी

क्र.सं.	अधिकरणनामानि	सू.सं.	अधिकरणार्थाः
1.	स्मृत्यधिकरणम्	(1–2)	ब्रह्मणो जगत्कारणत्ववादिनां वेदान्तानां कपिलस्मृतिविरोधनिरासः ।
2.	योगप्रत्युक्त्यधिकरणम्	(3)	योगतन्त्रस्य वेदान्तविरोधित्वेन जगत्कारणत्वांशे अप्रामाण्यम् ।
3.	विलक्षणत्वाधिकरणम्	(4–12)	ब्रह्मणो जगदपेक्षया वैलक्षण्यस्य जगत्कारणत्वाविरोधिता ।
4.	शिष्टापरिग्रहाधिकरणम्	(13)	वेदापरिगृहीतसर्वपक्षप्रतिक्षेपः ।
5.	भोक्त्रापत्त्यधिकरणम्	(14)	ब्रह्मणः शरीरसम्बन्धकृतसुखादिभोक्तृतानिरासः ।
6.	आरम्भणाधिकरणम्	(15–20)	श्रुत्युक्तायाः जगद्-ब्रह्मणोरनन्यतायाः कार्यकारणभावकृतत्वम् ।
7.	इतरव्यपदेशाधिकरणम्	(21–23)	जगत्स्रष्टुर्ब्रह्मणः स्वहिताकरणादिदोषप्रसङ्गनिवारणम् ।
8.	उपसंहारदर्शनाधिकरणम्	(24-25)	अत्यद्भुतशक्तेर्ब्रह्मणः सङ्कल्पमात्रेण जगत्सृष्टियोगः ।
9.	कृत्स्नप्रसक्त्यधिकरणम्	(26–31)	निरवयवस्यापि ब्रह्मणो जगत्कारणत्वे असाङ्गत्याभावः ।
10.	प्रयोजनवत्त्वाधिकरणम्	(32–36)	अवाप्तसमस्तकामस्यापि ब्रह्मणः लीलार्थं जगत्सृष्टियोगः ।

—o—

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ॥

श्रीभाष्यम्

श्रीभगवद्रामानुजविरचितं शारीरकमीमांसाभाष्यम्

॥ द्वितीयः अविरोधाध्यायः ॥

[अधिकरणानि—33. सूत्राणि—149]

[अध्यायार्थः—'निखिलजगदेककारणं ब्रह्म वेदान्तवेद्यम्' इति प्रथमाध्यायोक्तार्थस्य सम्भावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनम्]

(5) ॥ प्रथमः स्मृतिपादः ॥

[अधिः—10. सूत्राणि—36]

[पादार्थः—ब्रह्मणः जगत् प्रति अभिन्ननिमित्तोपादानत्वे, आशङ्कितस्मृतिविरोधपरिहारः]

(36) स्मृत्यधिकरणम् । (२-१-१) ॥ (सू 1-2)

[अधिकरणार्थः—ब्रह्मणो जगत्कारणत्ववादिनां वेदान्तानां, कापिलस्मृतिविरोधशङ्कानिरासः]

१३९. स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नाऽन्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ २-१-१ ॥

[सूत्रार्थः—(वेदान्तवाक्यानां यथाश्रुतार्थग्रहणेन ब्रह्मैककारणकत्वे जगतः अभ्युपगम्यमाने) **स्मृत्यनवकाशदोषप्रसङ्गः**—प्रधानकारणत्वप्रतिपादककापिलस्मृतेः निरवकाशत्वापादनरूपस्य दोषस्य प्राप्तिः, **इति चेत्, न**—एवमाक्षेपः, नोचितः ; (तथा सति,) **अन्य....प्रसङ्गात्**—इतरासां मन्वादिस्मृतीनां वेदान्ताऽविरोधिनीनां निरवकाशत्वरूपदोषस्यापातात् ॥]

प्रधानस्याकारणत्वे त्यक्ता स्यात् कापिलस्मृतिः ।
इति न ; ब्रह्मणोऽतत्त्वे मन्वादिस्मृतयो वृथा ॥ (ब्र. प. १३९)

[सङ्गतिनिरूपणार्थं प्रथमाध्यायार्थसङ्ग्रहः]

प्रथमेऽध्याये — प्रत्यक्षादिप्रमाणगोचरात् अचेतनात्, तत्संसृष्टात् तद्वियुक्ताच्च चेतनात् अर्थान्तरभूतम्, निरस्तनिखिलाविद्याद्यपुरुषार्थगन्धम्, अनन्तज्ञानानन्दैकतानम्, अपरिमितोदारगुणसागरम्, निखिलजगदेककारणम्, अन्तरात्मभूतं [1]परंब्रह्म[1], वेदान्तवेद्यम् — इत्युक्तम् ॥

[द्वितीयाध्यायार्थसारः]

अनन्तरम्, अस्याऽर्थस्य सम्भावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनाय, द्वितीयोऽध्यायः आरभ्यते ॥

[आद्याधिकरणकृत्यम्; अधिकरणारम्भाक्षेपन्तत्परिहारौ च]

प्रथमं तावत्, [2]कपिल[2]स्मृतिविरोधात्, वेदान्तानाम् अतत्परत्वमाशंक्य, [3]तन्निराक्रियते[3] ।

प्रथमे .... इत्युक्तमिति । [अनेन] । प्रथम-द्वितीयाध्याययोः सङ्गतिज्ञापनार्थं प्रथमाध्यायपादचतुष्टयार्थस्य सङ्ग्रहेण ज्ञापनार्थं च, प्रथमाध्यायार्थं सङ्ग्रहेणाऽऽह **प्रत्यक्षादिप्रमाणगोचरात्** इत्यनेन, ईक्षत्यानन्दमयाधिकरणयोः पौर्वापर्यहेतुर्विवक्षितः । **आदिशब्दः** अनुमानपरः । प्रत्यक्षपृथिव्यादीनाम् अनुरूपं कारणं हि! अनुमीयते । तस्मादचेतनस्य प्रथमं बुद्धिस्थतया तन्निरासः । मुक्तव्यावृत्त्यर्थम् **निरस्तेति** । **अनन्तेति,** धर्मिस्वरूपमाह । **'अपरिमितः उदारगुणसागरः** यस्य' इति बहुव्रीहिः । 'सागर' शब्देन समूहो विवक्षितः । **निखिलजगदेककारणम्** — आकाशादेरपि कारणम् । निमित्तोपादानरूपोभयविधकारणं चेत्यर्थः । जगत्कारणत्वे पूर्वोक्तहेयप्रत्यनीकत्वानुपपत्तिमाशङ्क्य, **'सर्वान्तरात्मभूतम्'** इत्याह ।

अनन्तरम् इति द्वितीयाध्यायार्थमाह । प्रसक्तविरोधो हि परिहार्यः । अतः, **सम्भावनीयेति,** विरोधप्रसङ्गमाह । पादचतुष्टयेऽपि ये विरोधावतरणमुखभेदाः ते **'समस्तप्रकार'**शब्देन विवक्षिताः । प्रथमेध्याये, अयोगान्ययोगव्यवच्छेदमुखेन वेदान्तस्थवाक्यानां ब्रह्मैककारणतापरत्वं वाक्यतात्पर्यपर्यालोचनया समर्थितम् । अथ द्वितीयेऽध्याये बाह्यतर्कविरोधपरिहार उच्यत इत्यर्थः ।

पादार्थः द्वितीयपादसङ्गत्यर्थं वक्ष्यते । तस्मात्, **'प्रथमं तावत्'** इति प्रथमाधिकरणकृत्यमाह । प्रथमाध्यायनिरूपितकारणत्वं विषयः । कपिल-मन्वादिस्मृतिविप्रतिपत्तेः संशयः । अत्रैवं विचारः—

---

[1] ब्रह्म—द. [2] कापिल—न. [3] निराक्रियते – बा.

कथं स्मृतिविरोधात् श्रुतेः अन्यपरत्वम् ? । उक्तं हि !

'विरोधे[1]त्वनपेक्ष्यं[1]स्यात्' (पू. मी. सू. 1-3-3)

इति, श्रुतिविरुद्धायाः स्मृतेः अनादरणीयत्वम् ।

सत्यम् ;

'औदुम्बरीं स्पृष्ट्वोद्गायेत्'

इत्यादिषु, स्वत एवाऽर्थनिश्चयसम्भवात्, तद्विरुद्धा स्मृतिः अनादरणीयैव । इह तु, [2]वेदान्तवेद्य[2]तत्त्वस्य दुरवबोधत्वेन, [3]परमर्षि[3]प्रणीतस्मृतिविरोधे सति, अयमर्थः इति निश्चयायोगात्, स्मृत्या श्रुतेः अतत्परत्वोपपादनम् अविरुद्धम् ।

[कापिलस्मृतेः अनवकाशत्वापत्त्या वेदान्तैरबाध्यता]

एतदुक्तं भवति—प्राचीनभागोदितनिखिलाभ्युदय[4]साधनभूता[4]ग्निहोत्र दर्शपूर्ण-

किं ब्रह्मणो जगत्कारणत्वं चालयितुं शक्यते ? न वा ? इति । तदर्थं किं वेदान्तवाक्यानि ब्रह्मकारणत्वपराणि ? उत अन्यपराणि ? इति । तदर्थं, साङ्ख्यस्मृतिविरोधः वेदान्तवाक्यानाम् अतत्परत्वमापादयति ? न ? इति । तदर्थं, साङ्ख्यस्मृत्या वेदान्तोपबृंहणं कार्यम् ? उत मन्वादि स्मृत्या ? इति । तदर्थं, साङ्ख्यस्मृतिः किं भ्रान्तिमूला ? उत न ? इति ।

यदा न भ्रान्तिमूला, तदा तया वेदान्तानाम् उपबृंहणीयत्वेन, तद्विरोधात्तेषामन्यपरत्वात्, ब्रह्मकारणत्वं चालयितुं शक्यमिति ।

यदा भ्रान्तिमूला तदा तया तेषामनुपबृंहणीयत्वात्, तद्विरोधे तेषामन्यपरत्वाभावात्, ब्रह्मकारणत्वम् अविचाल्यमिति । [पूर्वोत्तरपक्षयोः फलफलिभावः]

'कथं' शब्दः क्षेपे । **'उक्तं हि'** इत्यत्र हिः हेतौ । 'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्' इति सूत्रम् । प्रत्यक्षश्रुतिविरुद्धं स्मृतिवचनम्, **अनपेक्ष्यम्**—अनादरणीयम् । प्रत्यक्षश्रुतिविरोधे असति हि ! स्मृतिमूलश्रुत्यनुमानम्, इत्यर्थः ।

सत्यमिति । तत्र श्रुतिविरोधात् स्मृतेरनादरणीयत्वमुक्तमेव; अत्र तु विशेषोऽस्तीत्यर्थः । **औदुम्बरीमित्यादि** । 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति श्रुतिः । 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः । अत्रायं विवक्षितो भेदः—'औदुम्बरी'मित्यादिषु प्रत्यक्षश्रुतेरव्याकुलत्वेन, स्मृति-निरपेक्षं स्वत एवार्थो निश्चेतुं शक्यते । तत्र विरुद्धार्था स्मृतिः उपेक्ष्या ; व्याकुलत्वाद्वे-दान्तवाक्यानाम्, अर्थः स्वतो निश्चेतुं न शक्यते । 'श्रुतेरयमर्थः' इति निश्चिते सति हि ! तद्विरोधात् स्मृतेः अनादरणीयत्वम् । स च स्वतो दुर्निश्चय इति, तदर्थं स्मृत्यपेक्षा ॥

[1] त्वनपेक्षं—अ. [2] वेदान्तवेद्यस्य—त. न. [3] परमपुरुष—द. [4] साधनीभूता—थ.

मास-ज्योतिष्टोमादिकर्माणि यथावदभ्युपगच्छता, श्रुतिस्मृतीतिहासपुराणेषु,

'ऋषिं प्रसूतं कपिलम्' (श्वे. उ. 5-2)

इत्यादिवाक्यैः आप्तत्वेन सङ्कीर्तितेन परमर्षिणा कपिलेन, परमनिश्रेयस-तत्साधनावबोधित्वेनोपनिबद्धस्मृत्युपबृंहणेन विना, अल्पश्रुतैः मन्दमतिभिः वेदान्तार्थ-निश्चयायोगात्, यथाश्रुतार्थग्रहणे च, आप्तप्रणीतायाः साङ्ख्यस्मृतेः सकलाया एव अनवकाशप्रसङ्गाच्च, 'स्मृतिप्रसिद्ध एवाऽर्थो वेदान्तवेद्यः' इति, बलादभ्युप-गमनीयम्—इति ।

[मन्वादिस्मृतीनां सावकाशत्वशङ्का-तन्निराकरणे]

न च वाच्यम्—मन्वादिस्मृतीनां ब्रह्मैककारणत्ववादिनीनाम्, एवं सति अनव-काशत्व [1]दोषप्रसङ्गः[1]—इति ; धर्मप्रतिपादन[2]पर[2]प्राचीनभागोपबृंहण एव सावकाश-त्वात् । अस्यास्तु कृत्स्नायाः, तत्त्वप्रतिपादनपरत्वात् ; तथाऽनभ्युपगमे [3]निरव[3]काशत्व-मेव स्यात् । तदिदमाशङ्कते—स्मृत्यनवकाशदोषप्रसङ्ग इति चेत्—इति ॥

[सिद्धान्तारम्भः]

[तत्र अन्यस्मृतीनामाशयोपस्थापनम्]

[4]तत्रोत्तरम्[4]—न अन्यस्मृत्यनवकाशदोषप्रसङ्गात्—इति । अन्या हि मन्वादि-स्मृतयः ब्रह्मैककारणतां वदन्ति । यथाऽऽह मनुः—

'आसीदिदं तमोभूतम्' (म. स्मृ. 1-5)

इत्यारभ्य,

'अभ्युपगच्छते'त्यन्तेन लोकायतव्यावृत्तिः । 'ऋषि'मिति तस्याऽऽप्तत्वे प्रमाणमुक्तम् । 'परमनिःश्रेयसे'ति अनन्यपरत्वमुक्तम् । स्मृत्युपबृंहणेन—स्मृतिरूपोपबृंहणेन । निश्चया-योगादिति । अनन्तशाखानुगतस्य वाक्यार्थस्य एकदेशज्ञैः दुरवबोधत्वादिति भावः ॥

[प्राचीनभागः—कर्मकाण्डम् । उपबृंहणम्—श्रुतिप्रतिपन्नार्थविशदीकरणम् ।]

तदिदमिति, पूर्वपक्षस्य अनुत्सूत्रत्वमाह ।

प्रलयावस्थाज्ञापनार्थम्, आसीदिदमिति । सत्कार्यवादकाष्ठामभिप्रेत्य 'इदं तमोभूत'मिति सामानाधिकरण्येनोक्तम् । तमोभूतम्—तमोभाववत्, तमोऽवस्थमासीदित्यर्थः । 'तमसि लीयते'

---

[1] प्रसङ्गः—थ. द. [2] द्वारा—च. [3] अनव—न. [4] अत्रोत्तरम्—बा.

'ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ।। (म. स्मृ. 1-6)
सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्य'मपासृजत्[1] ।।' (म. स्मृ. 1-8)

इति । भगवद्गीतासु च,

'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (भ. गी. 7-6)

'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते' (भ. गी. 10-8)

इति च । महाभारते,

'कुतः सृष्टमिदं सर्वं जगत् स्थावर-जङ्गमम् !
प्रलये च कमभ्येति ? तन्मे ब्रूहि पितामह !' (म. भा. शां. 175-1)

इति पृष्ट आह—

इति निर्देशस्याऽयमर्थ इत्यभिप्रायः । यथाऽऽह भगवान् बादरायणपिता पराशरः— 'अन्यवस्थे च सलिले वाय्ववस्थे च तेजसि' इति । **ततः**—सर्गकाले प्राप्ते । परमकारणविषयः **'स्वयम्भू'**शब्दः, अवयवार्थपौष्कल्यात् नारायणपरः । 'विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः' इति आश्वमेधिके । **'भगवानि'**ति देवताविशेषनिर्णयार्थं, कारणत्वोपयोगिगुणपौष्कल्यज्ञापनार्थं, च । **इदं व्यञ्जयन्**—व्यष्टिरूपकार्यजातं व्यञ्जयितुम् । 'लक्षणहेत्वोः क्रियायाः' (पा. सू. 3-2-126) इति शतृप्रत्ययः । **महाभूतानि**—व्यष्टिकारणानि पृथिव्यादीनि । 'आदि'शब्देन तत्कारणभूतमहदहङ्कारौ गृह्येते । तेषु **वृत्तौजाः**—प्रवृत्तसङ्कल्पज्ञानरूपतेजाः । तदर्थम् **अव्यक्तः** प्रादुरासीत् । अर्शआद्यजन्तत्वात् पुलिङ्गता । पूर्वमविभक्ततमःशरीरको भगवान् , व्यष्टिसृष्टिहेतुभूततन्मात्राहङ्कारसृष्ट्यर्थं स्वसङ्कल्पात् विभक्ततमःशरीरकः अक्षरावस्थाप्राप्तिपूर्वकम् अव्यक्तावस्थप्रकृतिशरीरकोऽभूत् इत्यर्थः । **अभिध्यानम्**—सङ्कल्पः । **'शरीर'**शब्देन, तमोऽव्यक्तावस्थापन्नं चित्संसृष्टम् अचिद्वस्तूच्यते । **सिसृक्षुरिति** । व्यष्टिसिसृक्षयेत्यर्थः । **'अप एवे'**त्यप्शब्दः, अण्डकारणसमस्ततत्त्वप्रदर्शनार्थः । पृथिवीमयस्याऽण्डस्य अनन्तरकारणं ह्यापः । **एव**कारेण त्रिवृत्करणं व्यावर्त्यम् । अत्रिवृत्कृता अपः इत्यर्थः । **तासु.... सृजदिति** । त्रिवृत्करणजनिताम् अण्डोत्पादनशक्तिं तास्वजनयदित्यर्थः ।

---

[1] मथाऽसृजत्—भ. थ.

'नारायणो जगन्मूर्तिरनन्तात्मा सनातनः' (म. भा. शां. 175-10)
इति । तथा,

'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम !' (म. भा. शा. 321-29)
[1]इति ;

'अव्यक्तं[1] पुरुषे ब्रह्मन् ! निष्क्रिये सम्प्रलीयते' (म. भ. शा. 326-30)
इति च । आह च भगवान् पराशरः—

'विष्णोः सकाशादुद्भूतं जगत् तत्रैव च स्थितम् ।
स्थिति-संयमकर्ताऽसौ जगतोऽस्य जगच्च सः ॥' (वि. पु. 1-1-31)

इति । आह च आपस्तम्बः—

'पूः प्राणिनः [2]सर्वे एव गुहा[2]शयस्य [3]अहन्य[3]मानस्य विकल्मषस्य' (आप. ध. 1-22-4)
इत्यारभ्य,

'तस्मात्कायाः प्रभवन्ति सर्वे समूलं शाश्वतिकः स नित्यः' (आप. ध. 1-23-2)
इति ॥

[कापिलस्मृतेः वेदान्तानुपबृंहणता]

यदि कपिलस्मृत्या [4]वेदान्तवाक्यार्थ[4]व्यवस्था स्यात् ; तदा [5]एतासां सर्वासां[5] स्मृतीनाम्, अनवकाशत्वरूपो [6]महान्[6] दोषः [7]प्रसज्येत[7] । अयमर्थः—

[नारायण इति । 'रीङ्-क्षये' (पा. धा. 1138) इति धातोः, ड प्रत्यये टिलोपे च कृते, 'र' इति भवति । नरः—अक्षयः, निर्विकारः । 'जह्नुर्नारायणो नरः' (वि.स.ना. 246) इति वचनात्, 'नरः' इति भगवन्नाम । 'तस्माज्जाताः' इति अण्प्रत्यये, 'नाराः' इति भवति । नाराख्याः आपः अयनमस्येति नारायणः । एवं नरशब्देन निर्विकारत्वम्, 'नार' शब्देन जगत्कारणत्वम्, 'अयन' शब्देन जगदन्तरात्मत्वं चेति अर्थत्रयमुक्तं भवति ।] सनातनः—[अव्यक्तशरीरकत्वेऽपि स्वयमप्रच्युतस्वभावः ।]

'पूः प्राणिनः' इति वाक्यम्, अध्यात्मखण्डयोः प्रथमे खण्डे । 'तस्मात् कायाः' इति वाक्यं, द्वितीये खण्डे । 'तस्मात्' इत्युक्ते कस्मात्? इत्यपेक्षापूरणार्थं, 'काय' शब्दस्य भगवच्छरीरपरत्वदर्शनार्थं च, 'पूः प्राणिनः' इति वाक्यमुपात्तम् । पूः—पुरम् शरीरमित्यर्थः ॥

---

[1] अव्यक्तं—द. [2] सर्वगुहा—वा. [3] न हन्य—वा. [4] अर्थ—द.
[5] एतासां—थ. [6] महानयं—इ. द. [7] स्यात्—इ. वा.

यद्यपि, वेदान्तवाक्यानाम् अतिक्रान्तप्रत्यक्षादिसकलेतरप्रमाणसम्भावनाभूमिभूतार्थप्रतिपादनपरत्वात्, तदर्थवैशद्याय अल्पश्रुतानां प्रतिपत्तॄणां तदुपबृंहणमपेक्षितम्; तथाऽपि, तदर्थानुसारिणीनाम् आप्ततमप्रणीतानां बह्वीनां स्मृतीनां तदुपबृंहणाय प्रवृत्तानाम्, अनवकाशत्वं मा प्रसाङ्क्षीदिति; श्रुतिविरुद्धार्था [1]कपिल[1]स्मृतिः उपेक्षणीया। उपबृंहणं च श्रुतिप्रतिपन्नार्थविशदीकरणम्। तच्च विरुद्धार्थया स्मृत्या न शक्यते कर्तुम्॥

[मन्वादिस्मृतीनां परमपुरुषाराधनरूपधर्मप्रतिपादकता]

न च, एतासां स्मृतीनां प्राचीनभागोदित धर्मांशविशदीकरणेन सावकाशत्वम्; परब्रह्मभूत[2]परमपुरुषाराधन[2]त्वेन धर्मान् विदधतीनामेतासाम्, आराध्यभूतपरमपुरुषप्रतिपादनाभावे सति, तदाराधनभूतधर्मप्रतिपादनासम्भवात्। [3]तथाहि![3] परमपुरुषा-

---

सम्भावनाभूमिभूतेति, 'भूत' शब्दः, सिद्धपरः; सिद्धार्थप्रतिपादनपरत्वात्। अयमर्थः—कार्यपरत्वे, तुल्यविकल्पत्वेन अधिकारिभेदेन वा अर्थविरोधः सुपरिहरः। सिद्धवस्तुपरत्वे, अन्यतरस्मृत्यनुगुणं वेदार्थो नेयः; न तु उभयानुगुणमिति। आप्तेति। [आप्तिर्द्विविधा—यथावस्थितवस्तुदर्शित्वं, यथादृष्टार्थवादित्वं चेति। कपिलस्योच्यमानं महर्षित्वम्, अतीन्द्रियानेकार्थद्रष्टृत्वादिनाऽप्युपपद्यते; न तु सार्वत्रिकं यथावस्थितार्थदर्शित्वमपेक्षते। मन्वादीनां तु, 'यद्वै किं च मनुरवदत्' 'सहोवाच व्यासः' इत्यादिभिः, सार्वत्रिकयथावस्थितदर्शनपूर्वकयथादृष्टार्थवादित्वमुक्तम्। तस्मादाप्ततमाः मन्वादयः। कपिलस्य तु आप्तिमात्रमिति॥]

श्रुतिविरुद्धार्था—न्यायानुगृहीतश्रुतिविरुद्धार्थेति भावः। उपेक्षणीयेति। आप्ततमप्रणीतन्यायानुगृहीतानेकस्मृत्यनुगृहीतश्रुतिः, आप्तमात्रोक्तन्यायविरुद्धैकस्मृत्यनुगृहीतश्रुतेरपि प्रबलेति। विरुद्धार्थया—न्यायानुगुणस्मृत्यनुगृहीतश्रुतिविरुद्धार्थया। उपबृंहणानुपपत्तिः दूषणमित्यर्थः॥

[नचेति। [अनेन] सावकाशत्वं प्रतिवदति। [अस्थिराणां कर्मणां कालान्तरभाविफलप्रदत्वं सद्वारकमेव। तत्र कृष्यादेरङ्कुरादिद्वारकत्ववत्, किमचेतनद्वारकत्वम्? उत राजसेवादेरिव, चेतनद्वारकत्वम्? इत्यपेक्षायाम्, चेतनद्वारकत्वं श्रुतिरेवाऽऽहेति, श्रुतहानाश्रुतकल्पनानुपपत्त्या, परब्रह्मणि तासां तात्पर्यमस्तीत्यर्थः।] [तथाहीत्यादि। पूर्वभागोपबृंहण-

---

[1] कापिल—त. थ. [2] पुरुषाराधन—थ. परमपुरुषार्थ—द. [3] तदा हि—थ.

राधनरूपता, सर्वेषां कर्मणां स्मर्यते—

'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' ॥ (भ. गी. 18-46)

'[1]ध्यायेन्नारायणं[1]देवं स्नानादिषु च कर्मसु ।
ब्रह्मलोकमवाप्नोति नचेहा[2]ऽऽवर्तते[2]पुनः ॥' (द. स्मृ.)

'यैः स्व[3]कर्म[3]परैर्नाथ ! नरैराराधितो भवान् ।
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये ॥' (वि. पु. 5-30-16)

इति ॥

[उक्तस्मृतीनां सावकाशत्वशङ्का-परिहारौ]

न च-ऐहिकामुष्मिकसांसारिकफलसाधनकर्मप्रतिपादनेन एतासां सावकाशत्वम् ; यतः, तेषामपि कर्मणां परमपुरुषाराधनत्वमेव स्वरूपम् । यथोक्तम्—

'[4]येऽप्य[4]न्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः ।
तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम् ॥' (भ. गी. 9-23)

'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनाऽतश्च्यवन्ति ते ॥' (भ. गी. 9-24)

इति । तथा,

'यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाऽच्युत !
हव्य-कव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ॥' (वि. पु. 5-20-97)

[5]इति[5] ॥

पराणामपि स्मृतीनां कर्माराध्ये भगवति तात्पर्यमस्त्येव । उपनिषद्भागोपबृंहणपराणाम्, अत एवाऽन्यत्र निरवकाशानाम्, इतिहास-पुराणानाम् अतीव तात्पर्यमस्ति । इतिहास-पुराणयोः कर्मकीर्तनं, भगवदुपासनाङ्गत्वेन । धर्मशास्त्रेषु ब्रह्मकीर्तनं, कर्माराध्यत्वेनेत्यभिप्रायः ।]

नचैहिकेति । अनभिसंहितफलकर्मणां हि भगवदाराधनरूपता ; फलप्रदानां तु कर्मणां तदाराधनरूपत्वाभावात्, न तत्प्रतिपादकशास्त्रस्य ब्रह्मणि तात्पर्यम् —इति [शङ्काशयः]

---

[1] ध्यायन्नारायणं—थ. [2] ऽऽजायते—द. [3] धर्म—पा. [4] येत्व—पा.
[5] इति च—वा

[आप्तिमात्रवतः कपिलस्य स्मृतेरादरणे, अतिप्रसक्तिः]

यदुक्तम्—'ऋषिं प्रसूतं कपिलम्' (श्वे. उ. 5-2) इति, कपिलस्याऽऽप्ततया संकीर्तनात्, तत्स्मृत्यनुसारेण [1]वेदान्तार्थ[1]व्यवस्थापनं न्याय्यम्—इति ; तदसत् ; बृहस्पतेः, श्रुति-स्मृतिषु सर्वेषामतिशयितज्ञानानां निदर्शनत्वेन सङ्कीर्तनात्, तत्प्रणीतेन लोकायतेन श्रुत्यर्थव्यवस्थापनप्रसक्तेः—इति ॥ १ ॥

[कपिलस्मृतेः भ्रान्तिमूलतोपपादनम्]

अथ स्यात्—कपिलस्य स्वयोगमहिम्ना वस्तुयाथात्म्योपलब्धेः, तत्स्मृत्यनुसारेण [2]वेदान्तार्थो[2] व्यवस्थापयितव्यः—इति ; अत उत्तरं पठति—

१४०. इतरेषां चाऽनुपलब्धेः ॥ २-१-२ ॥

'च'शब्दः, 'तु'शब्दार्थः चोदिताशङ्कानिवृत्त्यर्थः । इतरेषां—मन्वादीनां बहूनां स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वयाथात्म्यानां, निखिलजगद्भेषजभूत[3]स्व[3]वाक्यतया,

'यद्वै [1]किञ्च[1] मनुरवदत् तद्भेषजम्' (तै. सं. 2-3-3-2)

इति श्रुतिप्रसिद्धानां, कपिलदृष्टप्रकारेण तत्त्वानुपलब्धेः, श्रुतिविरुद्धा कपिलोपलब्धिः भ्रान्तिमूलेति, न तया यथोक्तो [2]वेदान्तार्थः[2] चालयितुं [3]शक्यः[3]—इति सिद्धम् ॥ १-१-१ ॥

इति स्मृत्यधिकरणम् ॥ १ ॥

तदसदिति । बृहस्पतिप्रणीतस्याऽपि लोकायतस्य परित्यागो यद्धेतुकः, स श्रुतिविरोधः अत्राऽपि विद्यते चेत् ; तद्वदेव कपिलस्मृतिरपि विरुद्धांशे त्याज्या । तथा च 'औदुम्बरी सर्वा वेष्टयितव्या' इत्यत्र च निर्णीतम् ॥

अथेति । मन्वादीनां धर्मप्रवर्तनादिषु अन्यपरत्वात्, न योगावसरः । कपिलस्तु योगसाक्षात्कृतार्थतत्त्व इति, तत्स्मृतिः आदरणीयेत्यर्थः ॥ यदि कपिलस्य स्वस्मृतिप्रकारेणोप-

---

[सूत्रार्थः—**इतरेषाम्**—कपिलेतरेषां मन्वादीनाम्, **अनुपलब्धेश्च**—कपिलदृष्टार्थादर्शनादपि—(कपिलस्मृतेः भ्रान्तिमूलतैवेति ।)] [सूत्रे । 1 स्मृत्यन 2 इतरेषां]

इतरेषां मुनीनां तु प्रधानस्य जगत् प्रति ।
कारणत्वानुपलब्धेः ब्रह्मैवाऽत्र तु कारणम् ॥ इति स्मृत्यधिकरणम् ॥ १ ॥

---

1 वेदार्थ—वा. 2 वेदार्थो—इ. वा. 3 स्व—थ.

(37) योगप्रत्युक्त्यधिकरणम् ॥ २-१-२ ॥

[अधि. अर्थः ; वेदान्तविरोधित्वात् योगतन्त्रस्य जगत्कारणत्वे प्रामाण्यनिरासः]

१४१. एतेन योगः प्रत्युक्तः ॥ २-१-३ ॥

लब्धिरस्ति, सा बहूनां स्मर्तॄणां तत्त्वोपलब्धिविरोधात् भ्रान्तिरित्यर्थः ॥ न च तेषां धर्मानुष्ठानेऽन्यपरत्वात् योगानवसरः ; अनभिसंहितफलधर्मानुष्ठानस्य योगाङ्गतया अत्यन्तानुकूलत्वात्, तद्रहितस्य योगो न समीचीनः, सरजस्तमस्कत्वात् ॥

अत्र विषय-संशयहेतू पूर्ववत् । ब्रह्मकारणत्वं विचार्यं ? उत न ? इति विचारः । तदर्थम्, ईश्वराधिष्ठितं प्रधानं कारणम् ? उत ब्रह्म ? इति । किं योगस्मृतिविरोधेन वेदान्तानाम् अन्यपरत्वमापाद्यम् ? उत न ? इति । किं तया वेदान्तोपबृंहणं कार्यम् ? उत न? इति । किं सा भ्रान्तिमूला ? उत न ? इति । किं हिरण्यगर्भस्य भ्रमः सम्भवति ? न? इति ।

यदा न सम्भवति तदा, तदुपबृंहणीयतया वेदान्तानां, तद्विरोधेऽन्यपरत्वात्, ईश्वराधिष्ठितं प्रधानं कारणमिति, ब्रह्मकारणत्वं विचार्यमिति । [पूर्वपक्षे]

यदा भ्रमः सम्भवति तदा, उपबृंहणीयत्वाभावाद्वेदान्तवाक्यानां, तद्विरोधे अन्यपरत्वाभावात्, ईश्वराधिष्ठितप्रधानस्य जगत्कारणत्वाभावात् ब्रह्मकारणत्वम् अविचार्यमिति [सिद्धान्ते च फल-फलिभावः] ।

[सूत्रार्थः ; **एतेन**—वेदविरुद्धकपिलस्मृतिप्रामाण्यनिराकरणेन, वेदविरुद्धत्वाविशेषात् साङ्ख्योक्तप्रधानकारणतानिराकरणेन च, **योगः**—हिरण्यगर्भोक्ततन्त्रात्मको योगोप्यब्रह्मात्मकप्रधानकारणतापरः, **प्रत्युक्तः**—वेदान्तोपबृंहणरूपो न भवतीति दत्तोत्तरः ।]

निमित्तमात्रं ब्रह्मेति वदन्ती वेधसः स्मृतिः ।
पूर्वोक्तेन नयेनैव प्रत्याख्याता श्रुतेर्बलात् ॥ (ब्र. प. 141)

---

[1] किञ्चन—न.   [2] वेदार्थः—थ.   [3] शक्यत—बा.

[सूत्रार्थविवरणम्]

एतेन—[1]कापिल[1]स्मृतिनिराकरणेन, योगस्मृतिरपि प्रत्युक्ता।

का पुनरत्र अधिकाशङ्का ; यन्निराकरणाय न्यायातिदेशः ?

[योगस्मृतेः वेदान्तोपबृंहणत्वशङ्का]

योग[2]स्मृतावपि[2]—[3]ईश्वरा[3]भ्युपगमात्, मोक्षसाधनतया '[4]वेदान्त[4]विहितयोगस्य चाऽभिधानात्, वक्तुर्हिरण्यगर्भस्य सर्ववेदान्तप्रवर्तनाधिकृतत्वाच्च ; तत्स्मृत्या वेदान्तोपबृंहणं न्याय्यम्—इति ॥

[योगस्मृतेः वेदान्तानुपबृंहणत्वोपपादनम्]

[5]परिहारस्तु[5]—अब्रह्मात्मकप्रधानकारणवादात्, [6]निमित्तकारण[6]मात्रेश्वराभ्युपगमात्, ध्यानात्मकस्य योगस्य ध्येयैकनिरूपणीयस्य ध्येयभूतयोः आत्मेश्वरयोः, ब्रह्मात्मकत्व-जगदुपादानतादिसर्वकल्याणगुणात्मकत्व[7]विरहेण[7] अवैदिकत्वात्, वक्तुः हिरण्यगर्भस्यापि क्षेत्रज्ञभूतस्य, [8]कदाचित् रज[8]स्तमोऽभिभवसम्भवाच्च, योगस्मृतिरपि तत्प्रणीतरजस्तमोमूलपुराणवत् भ्रान्तिमूलेति ; न तया [1]वेदान्तो[1]पबृंहणं न्याय्यम्—इति ॥ ३ ॥

इति योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

एतेनेति, सूत्रस्य अक्षरार्थमाह ।

[**न्यायातिदेशः** ; योगनिराकरणहेतुं कमपि अस्मिन्नधिकरणे अनुक्त्वा, साङ्ख्यनिराकरणनिदानभूतांशस्यैव अत्राऽपि हेतुतायाः एतेनेत्यंशेन वर्णनात्] **ईश्वराभ्युपगमात्, योगस्यचाऽभिधानादिति,** वैदिकतत्त्वाभ्युपगमम्, अनुष्ठानाभ्युपगमं चाऽऽह ।

अब्रह्मात्मकेति, [योगस्मृतेः] तत्त्ववैषम्यमाह। **ध्यानात्मकस्येति,** अनुष्ठानवैषम्यं चाह ।

[नहि ! ध्यानस्य ध्यानत्वान्मोक्षोपायत्वम् ; गर्दभध्यानादिषु व्यभिचारात् । तस्मात्, ध्येयविशेषविषयमेव ध्यानं मोक्षसाधनमिति, ध्येयवैषम्यात् तदेकनिरूपणीयध्यानवैषम्यादित्यर्थः । **आत्मेश्वरयोरिति** । ब्रह्मात्मकत्वं जीवस्य ; जगदुपादानतादिकल्याणगुणयोगः ईश्वरस्य । **क्षेत्रज्ञभूतस्येति** । 'यो ब्रह्माणं विदधाति' इति सृज्यत्वश्रुतिः, अवतारश्रुत्यनपोदिता ब्रह्मणः क्षेत्रज्ञत्वे प्रमाणम् ; यथा इन्द्रवरुणादीनाम् । कर्मकृतनामरूपाभ्यां योजनीयत्वं हि ! चेतनस्य सृज्यत्वमिति भावः । **कदाचिदिति,** कल्पविशेषेषु गुणविशेषोन्मेषविषयपुराणवचनार्थः अभिप्रेतः॥

---

[1] कपिल—वा. [2] स्मृतौ—वा. [3] ईश्वरतत्त्वा—द. [4] वेद—त, थ, द.
[5] परिहारः—द. [6] निमित्त—थ, द. [7] विरहात्—न. [8] रज—थ.

(38) विलक्षणत्वाधिकरणम् ॥ २-१-३ ॥ (सू. 4–12)

[अधि–अर्थः ; ब्रह्मणो जगदपेक्षया वैलक्षण्यं जगत्कारणत्वाविरोधि]

१४२. न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥२-१-४॥

[सङ्गतेः प्रदर्शनम्]

पुनरपि, स्मृतिविरोधवादी तर्कमवलम्बमानः प्रत्यवतिष्ठते ;

[सूत्राक्षरविवरणम्]

यत्—साङ्ख्यस्मृतिनिराकरणेन जगतो ब्रह्मकार्यत्वम्—उक्तम् ,

[चतुर्मुखस्य ब्रह्मणः, 'त्वमप्यत्र महाभाग! मदंशः कमलोदरात् । मन्त्राभिसम्भवाज्जातः प्रजासृष्टिकरः परः ॥' इति भगवदंशत्वव्यपदेशः, 'उत्पाद्य पृथिवीं सम्यक् स्थापयित्वा यथा पुरा । सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापतिम् ॥' इति, तदनुप्रवेशनिबन्धन इति तत्रैवोक्तम् ॥ २ ॥

इति योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

पुनरपि इत्यादि । 'मन्वादिस्मृतिभिः उपबृंहणं कार्यम्' इत्युक्तम् । [मन्वादिस्मृतयः तर्कविरुद्धाः । साङ्ख्यस्मृतिः तर्कानुगृहीता । अतः तयोपबृंहणं कार्यमिति प्रत्यवस्थानात् सङ्गतिः—इत्यर्थः ।

[सूत्रार्थः ; अस्य—अज्ञत्वासुखत्वादिना धर्मेणोपलब्धस्य चिदचिन्मिश्रस्य जगतः, विलक्षणत्वात्—सर्वज्ञत्वादिगुणकाद्ब्रह्मणो विभिन्नजातीयद्रव्यत्वात् , न—ब्रह्मोपादानकत्वं न सम्भवति, तथात्वं च—विलक्षणत्वं च, शब्दात्—श्रुत्यात्मकात् शब्दात् ('विज्ञानं चाऽविज्ञानं च') अवगम्यते ॥]

जगद्विलक्षणत्वेन कारणत्वं न सिध्यति ।
ब्रह्मणश्च तथात्वं तु सच्चत्यच्चेति शब्दतः ॥ (ब्र.प. 142)

---

[1] वेदो—थ.

तत् नोपपद्यते ; अस्य—प्रत्यक्षादिभिः अचेतनत्वेन अशुद्धत्वेन अनीश्वरत्वेन दुःखात्मक[1]त्वेन च[1] उपलभ्यमानस्य चिदचिदात्मकस्य [2]जगतः[2], भवदभ्युपेतात् सर्वज्ञात् सर्वेश्वरात् हेयप्रत्यनीकात् आनन्दैकतानात् ब्रह्मणो विलक्षणत्वात् ॥

[शब्दतश्च ब्रह्मणि जगद्वैलक्षण्यप्रदर्शनम्]

न केवलं प्रत्यक्षादिभिरेव जगतो वैलक्षण्यमुपलभ्यते ; [3]शब्दाच्च तथात्वं[3]—विलक्षणत्वम् उपलभ्यते ।

'विज्ञानं चाऽविज्ञानं च' (तै.उ.आन. 6-3)

'एवमेवैता भूतमात्राः [4]प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणेऽर्पिताः[4]
(कौषी.उ. 3-61)

'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः' (मुण्ड.उ. 3-1-2)

'अनीशश्चाऽऽत्मा बध्यते भोक्तृभावात्' (श्वे.उ. 1-8)

इत्यादिभिः, कार्यस्य हि । जगतः अचेतनत्व-दुःखित्वादयो निर्दिश्यन्ते ॥

[कार्यसमानलक्षणस्यैव कारणत्वे युक्तिः]

यद्धि यत्कार्यं ; तत् तस्मादविलक्षणम् ; यथा मृत्-सुवर्णादिकार्यं घट-रुचकादि ।

प्रथमविचारः पूर्ववत् । तदर्थं, किं चेतनाद्ब्रह्मणः अचेतनजगदुत्पत्तिः सम्भवति ? न ? इति । तदर्थं, किं जगत्कारणस्य जगत्सालक्षण्यानुमितिः अनैकान्तिकः ? न ? इति ।

यदा न अनैकान्तिकः तदा, चेतनाद्ब्रह्मणः अचेतनजगदुत्पत्तेरसम्भवात्, ब्रह्मकारणवादः चाल्यः । यदा तु—अनैकान्तिकः तदा, ब्रह्मणः विलक्षणजगदुत्पत्तिसम्भवात्, ब्रह्मकारणत्वम् अविचाल्यम्—इति [पूर्वपक्षे उत्तरपक्षे च फल-फलिभावः ।]]

यदिति, सौत्रं 'ने'ति पदं व्याचष्टे । 'अस्ये'ति, व्याख्येयं [पदम्] । तद्व्याचष्टे ; प्रत्यक्षादिभिरिति । 'अस्ये'तिपदं लौकिकप्रमाणसिद्धाकारविशिष्टपरामर्शीतिभावः । [सौत्रं] विलक्षणत्वादिति पदं व्याचष्टे ; भवदभ्युपेतादिति । 'अचेतनत्वेन' इत्यादिविशेषणचतुष्टय-प्रतियोगित्वेन 'सर्वज्ञात्' इत्यादिविशेषणचतुष्टयमुक्तम् । [प्रत्यक्षादिभिः इत्यस्य, 'उपलभ्य-मानस्य' इत्यनेनाऽन्वयः । उपलम्भविषयतावच्छेदकरूपाणि अचेतनत्वादीनि चत्वारि । 'भवदभ्युपेतात्' इत्यस्य, 'ब्रह्मणः' इत्यत्राऽन्वयः । विलक्षणत्वं मिथः अचेतनत्व-सर्वज्ञत्व-अशुद्धत्व-हेयप्रत्यनीकत्व-अनीश्वरत्व-सर्वेश्वरत्व-दुःखात्मकत्वानन्दैकतानत्वैः ।]

---

[1] त्वेन—थ,प. [2] च जगतः—न. [3] शब्दाच्च—थ, द. [4] प्रज्ञामात्रास्वर्पिताः—थ.

अतः, ब्रह्मविलक्षणस्य अस्य जगतः, तत्कार्यत्वं न सम्भवतीति, साङ्ख्यस्मृत्यनुरोधेन, कार्यसलक्षणं प्रधानमेव, कारणं भवितुमर्हति ॥

[प्रमाणानां तर्कानुग्रहापेक्षाविशदीकरणम्]

अवश्यं च शास्त्रस्य अनन्यापेक्षस्य अतीन्द्रियार्थगोचर[1]त्वेऽपि[1], तर्कः अनुसरणीयः; यतः सर्वेषां प्रमाणानां, क्वचित्क्वचिद्विषये तर्कानुगृहीतानामेव अर्थनिश्चयहेतुत्वम्। तर्को हि! नाम—अर्थस्वभावविषयेण [2]वा सामग्री[2]विषयेण वा निरूपणेन, अर्थविशेषे प्रमाणं व्यवस्थापयत् तदितिकर्तव्यतारूपं ऊहापरपर्यायं ज्ञानम्। तदपेक्षा च, सर्वेषां प्रमाणानां समाना ॥

[प्रत्यक्षविलक्षणस्य शास्त्रस्य तर्कानुग्रहापेक्षानियमः]

शास्त्रस्य तु, विशेषेण आकाङ्क्षा-सन्निधि-योग्यताज्ञानाधीनप्रमाणभावस्य, सर्वत्रैव तर्कानुग्रहापेक्षा। उक्तं च मनुना—

'यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः' (म. स्मृ. 12-106)

इति। [3]तदेव[3] हि! तर्कानुगृहीतशास्त्रार्थप्रतिष्ठापनं श्रुत्या च,

'मन्तव्यः' (बृ. उ. 6-5-6)

इत्युच्यते ॥

अपौरुषेयस्य शास्त्रस्य मानान्तरागोचरार्थविषयत्वात्, प्रत्यक्षादिदृष्टव्याप्तिमूलस्तर्कः, शास्त्रसिद्धमर्थं न गोचरयति इत्यत्राह **अवश्यं चेति**। **अनन्यापेक्षस्य**—प्रमाणान्तरानपेक्षस्य। प्रमाणान्तरनैरपेक्ष्येऽपि, प्रमाणाङ्गभूतस्तर्कः अनुसरणीयः, इत्यर्थः। **क्वचित् क्वचिद्विषये**—स्वत एवाऽस्पष्टार्थे। प्रामाण्यस्य परानपेक्षत्वं नाम-समानविषयप्रमित्यन्तरनैरपेक्ष्यम्; न तु इतिकर्तव्यतानैरपेक्ष्यम् इत्यभिप्रायः। **अर्थेति**। यत् नभसः नी(ल)रूपत्वात् अचाक्षुषत्वमुच्यते; तत् अर्थस्वभावविषयेण निरूपणेन अर्थविशेषे प्रमाणव्यवस्थापनम्। वैधहिंसायाः श्रेयस्करत्वप्रमितिजनकवाक्यनिरूपणेन, 'नहिंस्यात्' इति वाक्यस्य वैधहिंसाव्यतिरिक्तविषयत्वं यदुच्यते; तत् सामग्रींविषयनिरूपणेन अर्थविशेषे प्रमाणव्यवस्थापनम्; प्रत्यक्षस्य ज्वालैक्यविषयत्वं विना ज्वालोत्पत्तिनिरूपणेन तत्स्वरूपमात्रविषयत्वनिर्णयश्च ॥

शास्त्रस्य तु इति 'तु' शब्दः, साध्यवैषम्यं द्योतयति। **'विशेषेण'** इति शब्दः, साधनवैषम्यम्। आकाङ्क्षा-संनिधि-योग्यतापेक्षत्वं साधनवैषम्यम्। तेन सर्वत्र तर्कसापेक्षत्वं साध्यवैषम्यमित्यभिप्रायः।

---

[1] स्यापि—च. [2] सामग्री—वा, वासमान—थ. [3] तदेवं—न.

[जगति अनुद्भूतचैतन्याभ्युपगमेन ब्रह्मसालक्षण्याशङ्का-परिहारौ]

अथोच्येत—[1]श्रुत्या[1] जगतो ब्रह्मैककारणत्वे निश्चिते सति, तत्कार्यस्याऽपि जगतः, चैतन्यानुवृत्तिः अभ्युपगम्यते । यथा चेतनस्य सुषुप्ति-मूर्च्छादिषु चैतन्यानुपलम्भः ; तथा घटादिष्वपि सदेव चैतन्यम् अनुद्भूतम् । अत एव चेतनाचेतनविभागः—इति ;

नैतदुपपद्यते ; यतो नित्यानुपलब्धिः असद्भावमेव साधयति । अत एव—चैतन्यशक्तियोगोऽपि तेषु निरस्तः । यस्य हि ! [2]क्वचित्[2] कदाचिदपि [3]यत्कार्यानु[3]पलब्धिः, तस्य तत्कार्यशक्तिं ब्रुवाणः ; वन्ध्यासुतसमितिषु तज्जननीनां प्रजननशक्तिं ब्रूताम् ॥

किञ्च—वेदान्तैः जगतो ब्रह्मोपादानताप्रतिपादननिश्चये सति ; घटादीनां चैतन्य[4]शक्तेः[4] चैतन्यस्य वा अनुद्भूतस्य सद्भावनिश्चयः ; तन्निश्चये सति, वेदान्तैः जगतो ब्रह्मोपादनताप्रतिपादननिश्चय इति, इतरेतराश्रयत्वम् । विलक्षणयोर्हि ! कार्यकारणभावः प्रतिपादयितुमेव न शक्यते ॥

[प्रसक्तसालक्षण्यविवेचनतः ब्रह्मण उपादानत्व-तन्निषेधौ]

किं पुनः प्रकृति-विकारयोः सालक्षण्यम् अभिप्रेतम् ; यदभावात्, जगतो ब्रह्मोपा[5]दानताप्रतिपादना[5]संभवं ब्रूषे ?

न तावत्-सर्वधर्मसारूप्यम् ; कार्य-कारणभावानुपपत्तेः । [6]न हि ![6] मृत्पिण्डकार्येषु घटशरावादिषु पिण्डत्वाद्यनुवृत्तिर्दृश्यते । अथ—येन केनचिद्धर्मेण सारूप्यम् ;

यथेति । वेदान्तिभिः, नित्यस्य आत्मस्वरूपावभासरूपस्य चैतन्यस्य विद्यमानस्याऽपि सुषुप्तौ स्फुटतरोपलम्भाभावाभ्युपगमात्, तं प्रतिबन्दीकृत्य परिहार उक्तः ॥

इतरवादिभिः, सुषुप्तौ चैतन्योत्पत्तिशक्तियोगस्य अभ्युपगतत्वात्, तत्प्रतिबन्दीकारेण, घटादीनां चैतन्यानुपलम्भेऽपि चैतन्यशक्तियोगात्, कारणसालक्षण्यसिद्धिः—इत्याशङ्क्य आह **अत एव चैतन्येति** । ब्रह्मोपादानताप्रतिपादनस्य कथं घटादिषु चैतन्यानिश्चयसापेक्षत्वमित्यत्राह—**विलक्षणयोर्हीति** । न हि 'आदित्यो यूपः' इत्यादिवाक्यम्, अयोग्यार्थप्रतिपादनक्षमम् । तस्मात्, योग्यत्वनिश्चये सति ब्रह्मोपादनताप्रतिपादनसम्भव इति अन्योन्याश्रयः इत्यर्थः ।

---

[1] श्रुत्या च—थ. द. न. [2] न क्वचित्—आ. इ. द. [3] यत्कार्योप—आ. इ. द.
[4] शक्तिः—त. [5] दानत्व प्रतिपादना—थ. दानता—त. [6] न च—न.

तत् दगद्ब्रह्मणोरपि, सत्तादिलक्षणं सम्भवति।

तदुच्यते—येन स्वभावेन कारणभूतं वस्तु वस्त्वन्तराद्व्यावृत्तम्, तस्य स्वभावस्य तत्कार्येऽप्यनुवृत्तिः, [1]कार्यस्य कारण[1]सालक्षण्यम्। येन ह्याकारेण मृदादिभ्यो हिरण्यं [2]व्यावर्तते[2], तदाकारानुवृत्तिः, तत्कार्येषु कुण्डलादिषु दृश्यते। ब्रह्म च हेय-प्रत्यनीकज्ञानानन्दैश्वर्यस्वभावम्; जगच्च तत्प्रत्यनीकस्वभावमिति, न तदुपादानम्॥

[कार्य-कारणसालक्षण्यनियमे अनैकान्त्य-तत्परिहारौ]

न च—वैलक्षण्येऽपि कार्य-कारणभावो दृश्यते। यथा चेतनात् पुरुषात्, अचेतनानि केश-[3]नख-दन्त[3]-लोमानि जायन्ते, यथा [4]च[4] अचेतनाद्गोमयात्, चेतनो वृश्चिको जायते; चेतनाच्च ऊर्णनाभेः, अचेतनस्तन्तुः।

नैतदेवम्; यतः तत्राऽपि अचेतनांशे एव कार्य-कारणभावः ॥४॥

[पृथिव्यादावपि चैतन्यस्य श्रुत्याद्यभिमतत्वोक्तितः सालक्षण्यशङ्का]

अथ स्यात्—अचेतनत्वेनाऽभिमतानामपि चैतन्ययोगः, श्रुतिषु [5]श्राव्यते[5];

'तं पृथिव्यब्रवीत्' (तै.सं. 5-5-2)

'आपो वा अकामयन्त' (तै.ब्रा. 3-1-5)

'ते हेमे प्राणा अहं श्रेयसे विवदमानाः [6]ब्रह्माणं जग्मुः[6]' (बृ.उ. 8-1-7)

इति। नदी-समुद्र-पर्वतादीनामपि चेतनत्वं, पौराणिका आतिष्ठन्ते। अतो न वैलक्षण्यम्—इति॥

अतः उत्तरं पठति—

सत्तादीति, 'आदि'शब्देन, द्रव्यत्वं विवक्षितम्।

ब्रह्म चेति। ब्रह्मणो जगतश्च द्रव्यत्वावान्तरजातिविशेषः सालक्षण्यमिति फलितम्। तच्चाऽत्र चेतनत्वम्। तेन च सालक्षण्यं नास्तीत्यर्थः। एवं वैलक्षण्यस्याऽसिद्धिः आशङ्क्य परिहृता।

ननु चेति, अनैकान्त्यमाशङ्क्य परिहरति।

---

[1] कार्यकारण—ग. [2] व्यावर्त्तते—थ, द. [3] दन्त-नख—त, थ. [4] वा—त, थ.
[5] श्रूयते—न. [6] ब्रह्माणमाजग्मुः—त, थ. ब्रह्म जग्मुः—वा.

[श्रौतव्यपदेशानामभिमानिदेवतापरत्वेन, सर्वथा सालक्षण्याभावः]

१४३. अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ २-१-५ ॥

'तु' शब्दः, चोदिताशङ्कानिवृत्त्यर्थः। पृथिव्याद्यभिमानिन्यो देवताः,

'तं पृथिव्यब्रवीत्' (तै.सं. 5-5-2)

इत्यादिषु, पृथिव्यादिशब्दैः व्यपदिश्यन्ते ।

कुतः ?—विशेषानुगतिभ्याम्—। विशेषः—विशेषणम्। 'देवता' शब्देन विशेष्य, पृथिव्यादयः अभिधीयन्ते ।

'हन्ताऽहमिमास्तिस्रो देवताः' (छां.उ. 6-3-2)

इति, तेजोऽबन्नानि 'देवता'शब्देन विशेष्यन्ते।

'सर्वा ह वै देवता अहं श्रेयसे विवदमानाः' (कौषी.उ. 2-14)

'ते देवाः प्राणे निश्श्रेयसं विदित्वा' (कौषी.उ. 2-14)

इति च। अनुगतिः—अनुप्रवेशः ।

'अग्निर्वाग्भूत्वा मुखं प्राविशत्, आदित्यश्चक्षुर्भूत्वाऽक्षिणी[1]प्राविशत्,
वायुः प्राणो भूत्वा नासिके प्राविशत्' (ऐत.उ. 2-4)

इत्यादिना, वागाद्यभिमानित्वेन अग्न्यादीनामनुप्रवेशः श्रूयते ॥

'तु'शब्द इति, तुशब्दस्य पूर्वपक्षव्यावृत्त्यर्थता माभूदिति।

'हन्ताऽहमिमाः' इत्यादिवाक्ये पृथिव्यादीनाम् अस्पष्टत्वात्, तेजोऽबन्नानीति। [अहं श्रेयसे—स्वोत्कर्षाय। विवदमानाः—मिथो विप्रतिपत्तिहेतु वाग्व्यवहारंकुर्वाणाः निश्रेयसम्—नितरां श्रैष्ठ्यम्। वाग् भूत्वा—वागभिमानी भूत्वा ॥] (उपलभ्यमानेषूपनिषत्पुस्तकेषु 'सर्वा' इत्येतत्स्थाने, 'एताः' इति, 'ते देवाः' इत्येतत्स्थाने, 'ता वा एताः सर्वा देवताः' इति च दृश्यते] ॥ ५ ॥

[सूत्रार्थः ; विशेषानुगतिभ्याम्—(पृथिव्यप्तेजसां) तेजोऽबन्नानां त्रयाणामपि 'तिस्रो देवताः' इति देवतापदेन विशेषणात्, (तथा) वागादिषु अग्न्यादीनां देवतानाम् अनुप्रवेशवचनाच्च ज्ञापकात्, (अग्निर्वाग्भूत्वा मुखं प्राविशत्), अभिमानिव्यपदेशस्तु—'तं पृथिव्यब्रवीत्' इत्यादिः, तत्तदभिमानिदेवतागोचरो व्यवहार एव ; न केवलपृथिव्यादिगोचरः।]

अभिमानिविवक्षातस्तं पृथिव्यब्रवीदिति।
देवतास्तिस्र इत्यादिविशेषाच्चानुवेशतः॥ (ब्र.प. १४३)

---

[1] चाक्षिणी—थ, न.

अतः—जगतः अचेतनत्वेन विलक्षणत्वात्, ब्रह्मकार्यत्वानुपपत्तेः, तर्कानुगृहीत-स्मृत्यनुरोधेन जगतः प्रधानोपादानत्वं, वेदान्तैः प्रतिपाद्यते—इति ॥ ५ ॥

[सिद्धान्तार्थनिरूपणम्]

एवं (इति) प्राप्ते, 'अभिधीयते'[1]—

१४४. दृश्यते तु ॥ २-१-६ ॥

'तु'शब्दात्, पक्षो विपरिवर्तते ।

[विलक्षणयोरप्युपादानोपादेयता]

यदुक्तम्—जगतो ब्रह्मविलक्षणत्वेन, ब्रह्मोपादानत्वं न सम्भवति—इति,

तदयुक्तम्; विलक्षणयोरपि कार्य-कारणभावदर्शनात् । दृश्यते हि ! माक्षिकादेर्विलक्षणस्य क्रिम्यादेः, तस्मादुत्पत्तिः ।

ननु—उक्तम्, अचेतनांशे एव कार्य-कारणभावात् तत्र सालक्षण्यम् !

सत्यमुक्तम्; न तावता कार्य-कारणयोः भवदभिमतसालक्षण्यसिद्धिः । यथा-कथञ्चित् सालक्षण्ये, सर्वस्य सर्वसालक्षण्येन, सर्वस्मात् सर्वोत्पत्ति'प्रसङ्गभयात्[2], वस्तुनः वस्त्वन्तराद्व्यावृत्तिहेतुभूतस्य आकारस्य अनुवृत्तिः—सालक्षण्यम्, भवताऽभ्युपेतम् । स तु नियमः माक्षिकादिभ्यः क्रिम्याद्युत्पत्तौ न दृश्यत इति, ब्रह्मविलक्षणस्याऽपि जगतः, ब्रह्मकार्यत्वं न अनुपपन्नम् । न हि ! मृद्धिरण्य घट-मकुटादिष्विव वस्त्वन्तर-व्यावृत्तिहेतुभूतासाधारणाकारानुवृत्तिः माक्षिक-गोमय-क्रिमिवृश्चिकादिषु दृश्यते ॥६॥

दृश्यते त्विति । किं येन केनचिदाकारेण कार्य-कारणयोः सालक्षण्यम्?; तत् अस्मत्पक्षेऽप्यस्ति । सर्वधर्मसादृश्यं चेत्; मृद्घटादिष्वपि नास्ति । द्रव्यत्वावान्तरचेतनत्व-जात्यनुवृत्तिश्चेत्; ब्रह्मकारणत्ववादिबहुश्रुति-स्मृतिविरोधात, बाह्यस्तर्क इति, 'तर्काप्रतिष्ठानात्' इति सूत्रेण परिहरिष्यते । 'चेतनत्वानुवृत्तिरप्यस्ति; विशिष्टस्य कारणत्वात् । कार्येऽपि अचिदंशे अचेतनत्वानुवृत्तिवत्, चिदंशे चेतनत्वानुवृत्तिरपि विद्यते' इति साक्षात्परिहारः उपरितनाधिकरणेषु वक्ष्यते । कारणं येनाऽऽकारेण वस्त्वन्तराद्व्यावृत्तम्; तेनाऽऽकारेण कार्यस्य सालक्षण्यं चेत्; तस्य व्यभिचारः अस्मिन् सूत्रे विवक्षितः । माक्षिकस्य वस्त्वन्तराद्व्यावृत्ताकारो माक्षिकत्वम् । तत्तु क्रिम्यादौ नास्तीत्यर्थः ॥

[सूत्रार्थः; दृश्यते तु—(स्वकारणाद्विलक्षणस्याप्यर्थस्य कार्यत्वं) लोके उपलभ्यत एव ।]

'कृम्यादेर्माक्षिकादिभ्यो यथोत्पत्तिः समञ्जसा ।
जगतोऽपि तथोत्पत्तिर्ब्रह्मणोऽपि विलक्षणात् ॥' (ब्र.र. १४४)

---

[1] अभिधीयतेऽपि—आ.   [2] प्रसङ्गात्—द.

[असदुत्पत्तिपर्यवसानप्रसक्तिशङ्का-परिहारौ]

१४५. असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ २-१-७ ॥

यदि—कार्यभूताज्जगतः, कारणभूतं ब्रह्म विलक्षणम्!, तर्हि कार्य-कारणयोः द्रव्यान्तरत्वेन, कारणे परस्मिन् ब्रह्मणि कार्यं जगत् न विद्यत इति ; असत एव जगत उत्पत्तिः प्रसज्यते—इति चेत्,

नैतदेवम् ; कार्य-कारणयोः सालक्षण्यनियम[1]प्रतिषेध[1]मात्रमेव [2]हि ! पूर्वसूत्रे अभिप्रेतं[2] ; न तु कारणात् कार्यस्य द्रव्यान्तरत्वम् । 'कारणभूतं ब्रह्मैव, स्वस्माद्वि-लक्षणजगदाकारेण परिणमते' इत्येतत्तु न [3]परित्यक्तम्[3] । क्रिमि-माक्षिकयोरपि हि ! [4]सति च[4] वैलक्षण्ये, कुण्डल हिरण्ययोरिव द्रव्यैक्यमस्त्येव ॥ ७ ॥

[ब्रह्मणो जगत्कारणत्वे, प्रलयाद्यवस्थासु, ब्रह्मणः जगद्गतदोषापत्त्युद्भावनम्]

[5]अत्र[5]चोदयति—

१४६. अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ २-१-८ ॥

'अपीतौ' इति, अपीतिपूर्वक[6]सृष्ट्यादेः प्र[6]दर्शनार्थम् ;

असदितीति । आरम्भणाधिकरणार्थः, प्रसङ्गादनेन सूत्रेण स्मारितः । **यदीति** । विलक्षत्वकथनेन द्रव्यान्तरत्वमुक्तं भवति । ततोऽसत्कार्यवादः स्यादिति पूर्वपक्षिणोऽभिप्रायः ।

नैतदिति । कार्य-कारणयोः सजातीयत्वमेव-'अस्येदम्' इति प्रत्यभिज्ञानार्हावान्तर-

---

[सूत्रार्थः ; **असदिति चेत्**—(कार्यस्य कारणाद्विलक्षणद्रव्यत्वाभ्युपगमे) असत्कार्यवाद एव अभ्युपगतः स्यात्—इति शङ्कनं तु, **न**—न युज्यते, **प्रतिषेधमात्रत्वात्**—कार्यस्य कारण-सालक्षण्यनियमाभावप्रतिपादनमात्रे एव तात्पर्यात् ॥]

'नन्वसत्कार्यवादः स्यात् इति चेन्नाऽत्रचोभयोः ।
सालक्षण्यस्य नियमः केवलं प्रतिषिध्यते ॥' (ब्र. प. 145)

[सूत्रार्थः ; (ब्रह्मण एव जगदवस्थाप्राप्त्यभ्युपगमे) **अपीतौ**—प्रळये, (सृष्टि स्थित्योश्च) **तद्वत् प्रसङ्गात्**—जगत इव कार्यस्य, कारणतया तदभिन्नस्य ब्रह्मणोऽपि तद्गतविकारादिदोषा-णामाश्रयत्वापत्तेः ; **असमञ्जसम्**—वेदान्तवाक्यं सर्वम् अनुचितार्थप्रतिपादकमापद्येत ॥]

'प्रलये सृष्टिकाले च जगद्भावात् परात्मनः ।
जगद्दोषा ब्रह्मणोऽतो वाक्यं स्या दसमञ्जसम् ॥' (ब्र. प. 146)

---

[1] प्रतिषिद्ध—थ. [2] पूर्वसूत्रेऽभिप्रेतं—थ. पूर्वसूत्राभिहितं—इ, वा. [3] त्यक्तम्—न.
[4] सति—त, थ. [5] तत्र—न. [6] सृष्ट्यादिप्र—प

'सदेव सोम्येदमग्र आसीत्, (छां.उ. 6-2-1)

आत्मा वा इदमेक एवाऽग्र आसीत्' (ऐत.उ. 1-1)

इत्यादिषु, अप्ययावस्थोपदेश[1]पूर्वकत्व[1]दर्शनात् सृष्ट्यादेः ।

[सूत्राभिप्रायवर्णनम्]

यदि कार्य-कारणयोः द्रव्यैक्यमभ्युपेतम्; तदा कार्यस्य जगतः, ब्रह्मणि अप्ययसृष्ट्यादिषु सत्सु, ब्रह्मण एव तत्तदवस्थान्वय इति; [2]कार्यगताः सर्वे एव अपुरुषार्थाः[2], ब्रह्मणि प्रसज्येरन्; सुवर्ण इव कुण्डलगता विशेषाः । ततश्च वेदान्तवाक्यं सर्वम्, असमञ्जसं स्यात्;

'यः सर्वज्ञः सर्ववित्' (मुण्ड. उ. 1-1-10)

'अपहतपाप्मा विजरो विमृत्युः' (छां. उ. 8-1-5)

'न तस्य कार्यं करणं च विद्यते न तत्समश्चाऽभ्यधिकश्च दृश्यते' (श्वे.उ. 6-8)

'तयोरन्यः पिप्पलं स्वाद्वत्ति' (मुण्ड. उ. 3-1-1)

'अनीशश्चाऽऽत्मा बध्यते भोक्तृभावात्' (श्वे. उ. 1-8)

'अनीशया शोचति मुह्यमानः' (मुण्ड. उ. 3-1-2)

इति, एकस्मिन्नेव वस्तुनि, एषां [3]परस्पर[3]विरुद्धानां प्रसक्तेः ॥

[जगद्-ब्रह्मणोः शरीर-शरीरिभावासम्भवप्रदर्शनाय शङ्का]

अथोच्येत—चिदचिद्वस्तुशरी[4]रकस्य परस्यैव[4] ब्रह्मणः कार्यकारण[5]भावात्[5], शरीरभूतचिदचिद्वस्तुगतत्वाच्च दोषाणाम्, न [6]शरीरिणि ब्रह्मणि[6], कार्यावस्थे कारणावस्थे च प्रसङ्गः—इति ।

जात्या सालक्षण्यनियमः प्रतिषिद्धः; नत्वेकद्रव्यत्वमित्यर्थः । **सृष्ट्यादेरिति** आदिशब्देन स्थितिरुच्यते ॥

सुवर्ण इवेति । सुवर्ण-कुण्डलादिदृष्टान्तस्य बुद्धिस्थत्वात् [सूत्रे] 'तद्वत्' इत्युक्तम् । यद्वा ब्रह्मणि जगद्वत् अपुरुषार्थादिप्रसङ्गादित्यर्थः । यद्वा—'तद्वत्' इति मत्वर्थीयप्रत्ययः । जगद्वता पुरुषार्थादिमत्त्वप्रसङ्ग इत्यर्थः । **परस्परविरुद्धानाम्**—विरुद्धार्थानां वाक्यानामित्यर्थः ।

---

[1] पूर्वस्व—द. [2] कार्यगतापुरुषार्थाः सर्वे एव—द कार्यगतपुरुषार्थाः सर्वएव—थ. सर्वएवापुरुषार्थाः—आ. [3] परस्परं—न. [4] रस्यैव—त, थ. [5] भावाच्च—द. [6] शरीरिणि—द.

तदयुक्तम् ; जगद्-ब्रह्मणोः शरीर-शरीरि[1]भावस्यैवा[1]ऽसम्भवात् ; सम्भवे च, ब्रह्मणि शरीरसम्बन्धनिबन्धनदोषाणाम् अनिवार्यत्वात् । नहि ! चिदचिद्वस्तुनोः, ब्रह्मणश्शरीरत्वं सम्भवति ॥

[जगतः शरीरत्वाभावसमर्थनम्]

शरीरं हि नाम—कर्मफलरूपसुख-दुःखभोगसाधनभूतेन्द्रियाश्रयः, पञ्चवृत्ति-प्राणाधीनधारणः, पृथिव्यादिभूतसङ्घातविशेषः ; तथाविधस्यैव लोक-वेदयोः शरीरत्व-प्रसिद्धेः । परमात्मनश्च—

'अपहतपाप्मा विजरः' (छां. उ. 8–1–5)

'अनश्नन्नन्यो अभिचाकशीति' (मुण्ड. उ. 3–1–1)

'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' (श्वे. उ. 3-19)

'अप्राणो ह्यमनाः' (मुण्ड. उ. 2–1–2)

इत्यादिभिः, कर्म-तत्फलभोगयोरभावात् , इन्द्रियाधीन[2]भोगत्वा[2]भावात् , प्राणवत्त्वा-भावाच्च, [3]न[3] तं प्रति चेतनाचेतनयोः शरीरत्वम् ।

न च, अचेतनव्यष्टिरूपतृणकाष्ठादीनां, समष्टिरूपस्य भूतसूक्ष्मस्य च, इन्द्रियाश्र-यत्वादि सम्भवति । भूतसूक्ष्मस्य पृथिव्यादिसङ्घातत्वं च न विद्यते । चेतनस्य तु ज्ञानैकाकारस्य, सर्वमेतन्न[4]सम्भवतीति[4] ; [5]नतरां[5] शरीर[6]त्वसम्भवः[6] ॥

शरीरसम्बन्धनिन्धनेति। क्रमागतवस्त्वन्तराणां लवणत्वापत्तिर्दृश्यते ; 'तत्संयोगी च पञ्चमः' इत्युच्यते चेत्यभिप्रायः ।

शरीरस्वभावमाह । **शरीरंहीति,** व्यापकनिवृत्त्या व्याप्यशशरीरत्वनिवृत्तिं दर्शयितुं, **कर्मफलेति** शरीरत्वव्यापकाकारान् दर्शयति । **सुख-दुःखेति** भोगाश्रयत्वोक्तिः । **कर्मफल भोगसाधनत्वं,** मुक्तेश्वरशरीरस्थेन्द्रियव्यावर्तकम् । **पञ्चवृत्तीति,** चेष्टाश्रयत्वोक्तिः । **परमात्मन-श्चेति** । [अनेन] शरीरितयाऽभिमतपरमात्मस्वभावपर्यालोचनया शरीरत्वासम्भवमाह । **अपहतेति** कर्मसम्बन्धरराहित्यम् ; **अनश्नन् इति,** तत्फलाभावम् ; **अपाणीति,** इन्द्रियानपेक्षताम् ; **अप्राण इति,** चेष्टाश्रयत्वाभावं चाह ।

न च.........सम्भवः इति, शरीरतयाऽभिमतानां शरीरलक्षणविरुद्धस्वभावतां दर्शयति ।

---

[1] भावस्यचाऽ—त,थ. [2] भोक्तृत्वाभावात्—थ. [3] न वा—त, थ. [4] भवतीति—ब. [5] नितरां—त, थ. [6] त्वासंभवः—त, थ.

[अन्यत् शरीरलक्षणमनुरुध्य, जगतो ब्रह्मशरीरत्वशङ्का-परिहारौ]

न च 'भोगायतनत्वं-शरीरत्वम्' इति शरीरत्वसम्भवः ; भोगायतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः ।

'यत्र वर्तमानस्यैव सुख-दुःखोपभोगः, [1]तदेव[1] भोगायतनम्' इति चेत्, न ; परकायप्रवेश[2]जन्म[2]सुख-दुःखोपभोगायतनस्य परकायस्य, प्रविष्टशरीरत्वाप्रसिद्धेः । ईश्वरस्य तु स्वतस्सिद्धनित्यनिरतिशयानन्दस्यभोगं प्रति, चिदचितोः आयतनत्व नियमो न सम्भवति ॥

एतेन — भोगसाधनमात्रस्य शरीरत्वं—प्रत्युक्तम् ॥

[सिद्धान्त्यभिमतशरीरलक्षणस्याऽपि दूषणम्]

अथ मतम्—'यदिच्छाधीनस्वरूप-स्थिति-प्रवृत्ति यत् ; तत् तस्य शरीरम्' इति ; सर्वस्य [3]ईश्वरेच्छा[3]धीनस्वरूप-स्थिति-प्रवृत्तित्वेन, ईश्वरशरीरत्वं सम्भवति—इति ।

तदपि न साधीयः ; शरीरतया प्रसिद्धेषु, तत्तच्चेतनेच्छायत्तस्वरूपत्वाभावात्, रुग्णशरीरस्य तदिच्छाधीनप्रवृत्तित्वाभावात्, मृतशरीरस्य [4]तदायत्तस्थितित्वा[4]भावाच्च । सालभञ्जिकादिषु [5]चेतनेच्छा[5]धीनस्वरूप-[6]स्थिति-प्रवृत्तिषु[6], तच्छरीरत्वाप्रसिद्धेश्च । चेतनस्य नित्यस्य ईश्वरेच्छायत्तस्वरूपत्वाभावाच्च, न तच्छरीरत्व सम्भवः ।

न च—यत् यदेकनियाम्यं यदेकधार्यं [7]यस्यैव[7]शेषभूतं, तत् तस्य शरीरम्—इति वाच्यम् ; क्रियादिषु व्यभिचारात् ॥

न च....त्वाप्रसिद्धेः इति, भोगायतनत्वं पृथक् दूषयति । चेष्टाश्रयत्वेन्द्रियाश्रयत्वयोः पूर्वोक्तं दूषणमेव । भोगायतनम्—भोगसाधनविशेषः । अत एव हि ! 'भोगसाधनमात्रस्य' इत्युक्तम् । [प्रत्युक्तम्—प्रतिवचनप्रदानेन समाहितम्] ॥

शरीरतयेति, अव्याप्तिं, सालभञ्जिकादिष्विति, अतिव्याप्तिं, चेतस्येति, असंभवं चाह । [असंभवमाहेति । चेतनेषु शरीरतयाऽभिमतेषु लक्षणस्याऽभावमाहेत्यर्थः ; न तु अव्याप्त्यतिव्याप्तिसमभिव्याहृतं असम्भवरूपं लक्षणदूषणमितिमन्तव्यम् । (भा.प्र.)]

क्रियादिष्विति, 'आदि'शब्देन गुणो विवक्षितः । तद्द्वैविध्यात् बहुवचनात् । एवं परमात्मनः, चिदचितोश्च स्वभावपर्यालोचनया चिदचितोः शरीरत्वं प्रतिक्षिप्तम् ।

---

[1] तदेव हि—थ. [2] जन्य—द. [3] इच्छा—त. [4] तदात्मायत्तस्थितित्वा—च. तदायत्त-प्रवृत्तित्वा—इ, त, थ. [5] चेतना—थ. [6] प्रवृत्तिषु—त, थ. [7] यस्यैक—च.

[ईश्वरस्याऽशरीरतायाः श्रौतता ; सूत्रार्थनिगमनं च]

[5]'अशरीरं शरीरेषु' (कठ. उ. 2-22)

'अपाणिपादो जवनो गृहीता ' (श्वे. उ. 3-19)

इत्यादिभिश्च, ईश्वरस्य शरीराभावः प्रतिपाद्यते ॥ [1]अतः[1], [2]जगद्-ब्रह्मणोः[2] शरीर-शरीरिभावस्याऽसम्भवात् ; तत्संभवे च, ब्रह्मणि दोषप्रसङ्गात् , ब्रह्मकारणवादे वेदान्त-वाक्यानाम् असामञ्जस्यम् इति ॥ ८ ॥

[पूर्वोक्तासामञ्जस्यपरिहारः]

अत्रोत्तरम्—

१४७. न तु दृष्टान्तभावात् ॥ २-१-९ ॥

नैवमसामञ्जस्यम् ; एकस्यैव अवस्थाद्वयान्वयेऽपि, गुण-दोषव्यवस्थितेः दृष्टान्तस्य विद्यमानत्वात् । [3]'तु' शब्दोऽत्र[3], हेयसम्बन्धगन्धस्य असम्भवनीयतां द्योतयति ॥

[सौत्रार्थनिष्कृष्टांशः आवश्यकदृष्टान्तयुक्तः]

एतदुक्तं भवति—चिदचिद्वस्तुशरीरतया तदात्मभूतस्य परस्य ब्रह्मणः, सङ्कोच-विकासात्मककार्य-कारणभावावस्थाद्वयान्वयेऽपि, न कश्चिद्विरोधः । यतः सङ्कोच-विकासौ, परब्रह्मशरीरभूतचिदचिद्वस्तुगतौ। शरीरगतास्तु दोषाः, नाऽऽत्मनि प्रसज्यन्ते। आत्मगता[1]श्च[1]गुणाः, न शरीरे । यथा देव-मनुष्यादीनां सशरीराणां क्षेत्रज्ञानां,

---

अशरीरमिति । अथ परस्य शरीरप्रतिषेधाच्च तं प्रति कस्यचित् शरीरत्वासंभवमाह । 'अपाणी'त्यादिवाक्यम् इन्द्रियाभावज्ञापनाय पूर्वमुपात्तम् । इदानीम् इन्द्रियाधिष्ठानावयवनिषेध-मुखेन शरीराभावज्ञापनार्थम् ॥ ८ ॥

नत्विति । 'ने'तिपदेनैव पूर्वपक्षे व्यावर्तितेऽपि, 'तु' शब्दः, शरीर-शरीरिभाव-संभवज्ञापनार्थः ॥

'यथा देवे' त्यादिः, हेयसम्बन्धस्य असम्भावनीयत्वे दृष्टान्तः । [सङ्कोच-विकासौ—

[सूत्रार्थः ; न तु—उक्तरीत्या ब्रह्मणि अज्ञत्वादिप्रसक्तिसंभावनाऽपि नाऽस्ति ; अतः असामञ्जस्यं च नाऽस्ति, दृष्टान्तभावात्—एकस्यैव अवस्थाद्वयसम्बन्धेऽपि गुणदोषव्यवस्थायां दृष्टान्तस्य सद्भावात् ।]

'व्यवस्थितागुणास्तावत् आत्मनश्च तनोर्यथा ।
जगत्तनोर्ब्रह्मणश्च तथेति च समञ्जसम् ॥' (ब्र. प. 147)

---

[1] तु शब्दः—त. [2] अतः—द. [3] जगतो ब्रह्मणश्च—थ.

शरीर[2]गताः[2] बालत्व युवत्व-स्थविरत्वादयः, न आत्मनि सम्बध्यन्ते। आत्मगताश्च ज्ञान सुखादयो न शरीरे। [3]अथ च[3]—'देवो जातः' 'मनुष्यो जातः' तथा, 'स एव बालो युवा स्थविरश्च' इति व्यपदेशश्च मुख्यः। भूतसूक्ष्मशरीरस्यैव क्षेत्रज्ञस्य, देव-मनुष्यादिभावः—इति,

'तदन्तरप्रतिपत्तौ (ब्र. सू. 3-1-1)

इति [4]वक्ष्यते[4]—इति ॥

[पूर्वोक्तायाः शरीरत्वासम्भवशङ्कायाः अनूद्य निरासः]

यत् पुनः उक्तम्—चिदचिदात्मकस्य जगतः स्थूलस्य सूक्ष्मस्य च, परमात्मानं प्रति शरीरभावो नोपपद्यते—इति ;

तत्, अनाकलितसम्यङ्न्यायानुगृहीतवेदान्तवाक्यगणस्य, स्वमतिपरिकल्पित-कुतर्कविजृम्भितम्। सर्व एव हि! वेदान्ताः, [5]स्थूलस्य[5] सूक्ष्मस्य चेतनस्याऽचेतनस्य च [6]समस्तस्य,[6] परमात्मानं प्रति शरीरत्वं श्रावयन्ति।

[जगद्-ब्रह्मणोः शरीर-शरीरिभावबोधिकाः श्रुतयः]

वाजसनेयके तावत्, काण्वशाखायां [7]माध्यन्दिनशाखायां च,[7] अन्तर्यामि ब्राह्मणे—

'यः पृथिव्यां तिष्ठन्....यस्य पृथिवी शरीरम्' (बृ. उ. 5-7-7)

इत्यारभ्य, पृथिव्यादि [8]समस्तमचिद्वस्तु,[8]

'यो विज्ञाने तिष्ठन्....यस्य विज्ञानं शरीरम्' (बृ. उ. 5-7-26)

'य आत्मनि तिष्ठन् ...यस्याऽऽत्मा शरीरम्' (बृ. उ. मा. पा 5-7-26)

इति च [9]चेतनं,[9] पृथक् [10]पृथक् निर्दिश्य,[10] तस्य तस्य परमात्मशरीरत्वमभिधीयते ॥

सूक्ष्मत्व-स्थूलत्वे।] भूतसूक्ष्मेति। 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'ति ; अपामेव देवत्वादिधर्माः न पुरुषस्य, [पूर्वोक्तशङ्कायाः समाधानमिदम्।]

सम्यङ्न्यायः—प्रमाणानुगुणन्यायः। कुतर्कः—प्रमाणविरुद्धस्तर्कः। सर्व एवहीति। [अनेन] सर्वत्र व्याप्त[शरीर]लक्षणं विवक्षुः, चिदचितोः ब्रह्मशरीरत्वेन वेदे प्रयोगं दर्शयति।

---

1 स्तु—द. 2 गत—द. 3 यथा च—त. 4 वक्ष्यति—त, थ. 5 स्थूल—थ. 6 समस्तस्य च—च. समस्तस्य—ङ. 7 च—च. 8 समस्ताचिद्वस्तु—त, थ. 9 चेतनं च—इ. चेतनमचेतनं च—च. 10 निर्दिश्य—इ.

सुबालोपनिषदि[1] च—

'यः[1] पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरम्' (सुबा. उ. 7)
इत्यारभ्य, तद्वदेव चिदचितोः सर्वावस्थयोः, परमात्मशरीरत्वमभिधाय,

'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (सुबा. उ. 7)
इति, तस्य सर्वभूतानि प्रति, आत्मत्वमभिधीयते ॥ स्मरन्ति च—

[स्मृतिभिः परमात्मनः सर्वशरीरकत्वम्]

'जगत् सर्वं शरीरं ते' (वा. रा. यु. 120–26)
'यदम्बु वैष्णवः कायः' (वि. पु. 2–12–37)
'तत्सर्वं वै हरेस्तनुः' (वि. पु. 1–22–38)
'तानि सर्वाणि तद्वपुः' (वि. पु. 1–22–86)
'सोऽभि[2]ध्याय[2] शरीरात् स्वात्' (म. स्मृ. 1–8)
इत्यादि । भूतसूक्ष्मात् स्वात् शरीरादित्यर्थः ॥

लोके च 'शरीर' शब्दः घटादिशब्दवत्, एकाकारद्रव्यनियतवृत्तिमनासा[3]दितः, क्रिमि[3]-कीट-पतङ्ग-सर्प-नर-पशुप्रभृतिषु अत्यन्त'विलक्षणाकारेषु[4] द्रव्येषु, अगौणः प्रयुज्यमानो दृश्यते । तेन, तस्य प्रवृत्तिनिमित्तव्यवस्थापनं, सर्वप्रयोगानुगुण्यैनैव

'सोऽभिध्याये'त्यत्र, चिदचितोः शरीरत्वमस्पष्टमिति, 'भूतसूक्ष्मात्' इति तद्व्याचष्टे । 'आसीदिदंतमोभूतम्' इति प्रकृतमेव, शरीरत्वेनोच्यते, इत्यर्थः ।

घटादीति । यथा घटादिशब्दाः एकाकारवस्तुषु मुख्याः प्रयुज्यन्ते ; न तथा 'शरीर'शब्दः ; अपि तु अनेकाकारवस्तुषु मुख्यः प्रयुक्तः । अतः अनुगतत्वाय हि क्रिमिकीटादि-व्यापकं लक्षणमुक्तम् । तस्याप्यव्याप्तत्वात्, सार्वत्रिकं लक्षणान्तरं स्वीकार्यमिति भावः । अगौण इति । द्विपात्त्वं मनुष्यत्वं वा, शरीरलक्षणत्वेन किमिति नोच्यते ; अन्यत्रापि मुख्य-प्रयोगदर्शनात् । [अतः] लोक-वेदयोः यत्र यत्र [शरीरशब्द] प्रयोगो दृश्यते, तदनुयायि लक्षणं वाच्यम् । न तु अननुयायि लक्षणमुक्त्वा अन्यत्र गौणत्वं कल्पनीयम् इत्यभिप्रायः । प्रवृत्तिनिमित्तलक्षणम्—वाच्यभूतं समुदायशक्तिनिमित्तम् । तच्च तत् लक्षणं च । तेन

---

[1] यः—थ. [2] ध्याय—त, थ. [3] सादितक्रिमि—न. [4] विलक्षणकार्येषु—थ.

कार्यम् । [1]त्वदुक्तं[1] च 'कर्म[2]फल[2]भोगहेतुः' इत्यादिकं प्रवृत्तिनिमित्तलक्षणं, न सर्वप्रयोगानुगुणम् ; यथोक्तेषु ईश्वरशरीरतयाऽभिहितेषु पृथिव्यादिषु अव्याप्तेः ॥

किं च—ईश्वरस्य इच्छाविग्रहेषु, मुक्तानां च,

'स एकधा भवति' (छां. उ. 7-26-2)

इत्यादि वाक्यावगतेषु विग्रहेषु, तत् लक्षणम् अव्याप्तम् ; कर्मफलभोगनिमित्तत्वाभावात् तेषाम् । परमपुरुषेच्छाविग्रहाश्च, न पृथिव्यादिभूतसङ्घातविशेषाः ;

'न भूत[3]सङ्घसंस्थानो[3] देहोऽस्य परमात्मनः' (म. भा. शां. 206-60)

इति स्मृतेः । अतः, भूतसंघातरूपत्वं च शरीरस्य, अव्याप्तम् ।

पञ्चवृत्तिप्राणाधीनधारणत्वं च, स्थावरशरीरेषु अव्याप्तम् । स्थावरेषु हि ! प्राणसद्भावेऽपि, तस्य पञ्चधा अवस्थाय, शरीरस्य[4]धारकत्वेना[4]ऽवस्थानं नाऽस्ति ।

अहल्यादीनां कर्मनिमित्तशिलाकाष्ठादिशरीरेषु, इन्द्रियाश्रय[5]त्वं,[5] सुखदुःखहेतुत्वं चाऽव्याप्तम् ॥

[सिद्धान्त्यभिमतं निर्दुष्टं शरीरलक्षणम्]

अतः, 'यस्य चेतनस्य, यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं,

---

व्युत्पत्तिनिमित्तस्य उपलक्षणस्य च, व्यावृत्तिः । [अतः] गोशब्दस्य गमिधात्वर्थः, पृथिवीशब्दवाच्यस्य पृथिवीत्वस्योपलक्षणभूतं गन्धवत्त्वम् । तदुभयमपि न प्रवृत्तिनिमित्तम् । व्युत्पत्तिनिमित्तम् ॥

तत् लक्षणम्—कर्मफलोपभोगहेतुत्वम् । पञ्चवृत्तीति । प्राणसद्भावमात्रविवक्षायां, चेतनेषु अव्यक्तादिषु च ईश्वरशरीरभूतेषु अव्याप्तिरभिप्रेता । इन्द्रियाश्रयत्वम्—ज्ञानप्रवृत्तिजननपटुतरेन्द्रियाश्रयत्वम् । इन्द्रियसद्भावमात्रविवक्षायां पूर्ववदव्याप्तिरभिप्रेता ॥

अतः—अनुयायिनो लक्षणत्वात् त्वदुक्तस्याननुयायित्वात् । [लक्षणे] 'यस्ये'तिपदेन, शरीरस्य पितृ-पुत्रादिवत् सप्रतियोगिकपदार्थत्वम् ; न घटादिवत् अप्रतियोगिकपदार्थत्वमिति दर्शितम् । 'सर्वात्मना स्वार्थेनियन्तुं शक्यम्' 'सर्वात्मना स्वार्थे धारयितुं शक्यम्' 'शेषतैकस्वरूपम् तत्तस्य शरीरम्' [इत्येवं पृथक्पृथग्योजनात्] लक्षणत्रयम् । [अन्तिमे] 'एक'शब्दप्रयोगः 'सर्वात्मना' इति पदस्य स्थाने । यावद्द्रव्यभावित्वं विवक्षितम् । 'द्रव्य' मिति, क्रिया-गुणादिव्यावृत्त्यर्थम् । स्वार्थे—स्वविषये । 'स्व'शब्दः शरीरपरः । तत्तच्छरीर-

---

[1] तदुक्तं—द. [2] फलोप—त, थ. [3] सृष्टिसंस्थान—पा. [4] आधारकतया—वा. [5] त्वं च—थ, न.

तच्छेषतैकस्वरूपं च ; तत् तस्य शरीरम्' इति, शरीरलक्षणमास्थेयम् ॥ रुग्णशरीरादिषु नियमनाद्यदर्शनं, विद्यमानाया एव नियमनशक्तेः प्रतिबन्धकृतम् ; अग्न्यादेः शक्तिप्रतिबन्धात् औष्ण्याद्यदर्शनवत् । मृत[1]शरीरं च,[1] चेतनवियोगसमये एव विशरितुमारब्धम् ; क्षणान्तरे च विशीर्यते । [2]पूर्व[2] शरीरतया [3]परि[3]क्लृप्तसङ्घातैकदेशत्वेन च, तत्र शरीरत्वव्यवहारः ॥

अतः, सर्वं परमपुरुषेण सर्वात्मना स्वार्थे नियाम्यं धार्यं तच्छेषतैकस्वरूपमिति सर्वं चेतनाचेतनं, तस्य शरीरम् ॥

[परब्रह्मणः शरीरनिषेधकश्रुत्याशयः]

'अशरीरं शरीरेषु' (कठ. उ. 2-22)

इत्यादि च, कर्मनिमित्तशरीरप्रतिषेधपरम् ; यथोक्तसर्वशरीरत्वश्रवणात् । उपरितनाधिकरणेषु च, एतदुपपादयिष्यते ।

'अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्' 'न तु दृष्टान्तभावात्' इति सूत्रद्वयेन,

'इतरव्यप'देशात्[4]' (ब्र. सू. 2-1-21)

इत्यधिकरणसिद्धोऽर्थः स्मारितः ॥ ९ ॥

[सांख्यसमयगतो दोषोऽपि तत्परित्यागे हेतुः]

१४८. स्वपक्षदोषाच्च ॥ २-१-१० ॥

न केवलं ब्रह्मकारणवादस्य निर्दोषतया एतत्समाश्रयणम् ; प्रधानकारणवादस्य दुष्टत्वाच्च तत्परित्यज्य, एतदेव समाश्रयणीयम् ।

सम्यग्येषु कर्मस्विति यावत् । 'चेतनस्ये'ति ज्ञानव्यवृत्त्यर्थम् । न हि ज्ञानं ज्ञानविशिष्टेन-नियाम्यम् ; अपितु स्वाश्रयेण । तस्मात् चेतननियाम्यत्वाभावेन न तत्रानैकान्त्यम् ॥

एवं लक्षणान्तरद्वयेऽपि व्यावर्त्यमुच्यते—'यस्य, सर्वात्मना, द्रव्यं, शक्यम्' इति पदानां पूर्ववत् व्यावृत्तिः । [प्रयोजनम्] 'चेतनस्ये' तिपदेन प्रभाव्यावृत्तिः ॥ ९ ॥

स्वपक्षेति । यातु परेण पूर्वं निर्दोषत्व-जगदुपादानत्वादिव्याहतिरुक्ता, सैव व्याहतिः

[सूत्रार्थः ; स्वपक्षे—स्वाभ्युपगते प्रधानकारणवादे, दोषाच्च—असामञ्जस्यादपि, सपक्षः त्याज्यः, ब्रह्मकारणतावाद एव स्वीकरणीयः]

'स्वपक्षे दोषभूयस्त्वात्परित्यज्य स्वकं मतम् ।
ब्रह्मकारणवादस्तु स्वीकार्यो भवताऽनघः ॥' (ब्र. प. 148)

---

[1] शरीरं—त, थ. [2] पूर्व—त,थ. [3] अव—त, थ. [4] देशाद्धिताकरणादि—थ.

प्रधानकारणवादे हि ! जगत्प्रवृत्ति[1]र्नोपपद्यते[1] । तत्र हि ! निर्विकारस्य चिन्मात्रैकरसस्य पुरुषस्य, प्रकृतिसंनिधानेन प्रकृतिधर्माध्यासनिबन्धना जगत्प्रवृत्तिः । [2]निर्विकारस्य[2] चिन्मात्ररूपस्य प्रकृतिधर्माध्यास[3]हेतुभूतं[3] प्रकृतिसंनिधानं [4]किंरूपम्[4]? — इति विवेचनीयम् ।

किं [5]प्रकृतेः[5] सद्भाव एव ? उत तद्गतः कश्चिद्विकारः ? अथ पुरुषगत एव कश्चिद्विकारः ?

न तावत् पुरुषगतः ; अनभ्युपगमात् ।

नाऽपि प्रकृतेर्विकारः ; तस्य अध्यासकार्यतयाऽ[6]भ्युपेतस्य[6], अध्यासहेतुत्वासंभवात् ।

सद्भावमात्रस्य संनिधानत्वे, [7]मुक्तस्याप्य[7]ध्यासप्रसङ्ग इति, [8]त्वत्पक्षे[8] जगत्प्रवृत्तिः नोपपद्यते । अयमर्थः, साङ्ख्यपक्षप्रतिक्षेपसमये,

'अभ्युपगमेऽप्यर्थाभावात्' (ब्र. सू. 2-2-8)

इत्यादिना प्रपञ्चयिष्यते ॥ १० ॥

[केवलतर्काश्रितसिद्धान्तस्यानाश्रयणीयता]

१४९. तर्काप्रतिष्ठानादपि ॥ २-१-११ ॥

तर्कस्य अप्रतिष्ठितत्वादपि, श्रुतिमूलो ब्रह्मकारणवाद एव समाश्रयणीयः ; न प्रधानकारणवादः । शाक्यौलूक्याक्षपादक्षपणककपिलपतञ्जलितर्काणाम् अन्योन्यव्याघातात्, तर्कस्य अप्रतिष्ठितत्वं गम्यते ॥ ११ ॥

अनेन सूत्रेण परस्याऽऽपादिता । अनभ्युपगमादिति । नित्यनिर्विकारत्वादिति भावः ॥ १० ॥

सूत्रार्थः ; तर्काप्रतिष्ठानादपि—शाक्यादितर्कैः प्रतिघातेन, केवलस्य तर्कस्य प्रतिष्ठाशून्यत्वादपि, (तर्कमूलः प्रधानकारणवादस्त्याज्यः) ।]

'कुतर्कस्याऽप्रतिष्ठानात् प्रधानं तु नकारणम् ।
ब्रह्मानधिष्ठितं यस्मात्त्वया वादात्प्रकल्पितम् ॥ (ब्र.प. १४९)

---

1 नोत्पद्यते—थ. 2 निराकारस्य—थ. 3 भूतं—थ. 4 किं स्वरूपम् ?—थ.
5 प्रकृति—त, थ. 6 ऽभ्युपगतस्य—वा. 7 मुक्तस्य—थ. 8 तत्पक्षे—वा.

[विलक्षणतर्काश्रयणेऽप्युक्तदोषादनिस्तारः]

१५०. अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥२-१-१२॥

इदानीं विद्यमानानां शाक्यादीनां तर्कान् उद्दूष्य, अन्यथा—[1]प्रधान[1]कारणवादम् अतिक्रान्ततदुपदर्शितदूषणत्वेन, अनुमास्यामहे—इति चेत् !

एवमपि, पुरुषबुद्धिमूलतर्कैकावलम्बिनस्य, [2]तथैव[2] देशान्तर-कालान्तरेषु त्वदधिक[3]कुतर्क[3]कुशलपुरुषोत्प्रेक्षिततर्कदूष्यत्वसम्भावनया, तर्काप्रतिष्ठान[4]दोषाद[4]निर्मोक्षो दुर्वारः। अतः अतीन्द्रियेऽर्थे, शास्त्रमेव प्रमाणम्। तदुपबृंहणायैव तर्क उपादेयः। तथा चाऽऽह—

'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः ॥ (म. स्मृ. 12-106)

इति। वेदाख्यशास्त्राविरोधिना इत्यर्थः। अतः वेदविरोधित्वेन, वेदार्थविशदीकरण-रूपवेदोपबृंहणतर्कोपादानाय साङ्ख्यस्मृतिः [5]न आदरणीया[5] ॥ ३ ॥

इति विलक्षणत्वाधिकरणम् ॥ ३ ॥

इदानीमित्यादि। भूततर्कस्य भूततर्कान्तरप्रतिहतिवत्, भावितर्कस्याऽपि भावितर्कान्तर-प्रतिहतिः सम्भवतीत्यर्थः।

वेदाख्येति, 'वेद-शास्त्र'शब्दयोः वैयधिकरण्ये साङ्ख्यशास्त्रस्याऽप्यनुरोधः स्यादिति तद्व्यावृत्त्यर्थम्। यथा—'पितृ-देव-मनुष्याणां वेदश्चक्षुः सनातनम्। अतर्क्यं चाऽप्रमेयं च वेदशास्त्रमिति स्थितिः' ॥ अतर्क्यम्—बाधकागोचरभूतम्। अप्रमेयम्—साधकाविषयभूतम्॥१२॥

[सूत्राणि १) न. विल. २) अभि. ३) दृश्य. ४) अस. ५) अपी. ६) नमु. ७) स्वप. ८) तर्का. ९) अन्यः]

इति विलक्षणत्वाधिकरणम् ॥ ३ ॥

सूत्रार्थः ; **अन्यथा**—उक्ततर्कैः प्रतिहतिः यथा न भवेत् तथा, **अनुमेयम्**—प्रधानम् अनुमानतो साधनीयम्, **इतिचेत्**—इति यद्युच्यते, **एवमपि**—अथापि, **अनिर्मोक्षप्रसङ्गः**—तर्काप्रतिष्ठानदोषान्नैव विमोक्षः स्यात् ॥]

'प्रबलात् तर्कसंवादात्प्रधानं सिध्यतीति चेत् ।
ततोपि बलवत्तर्कबाधान्मुच्येत नो भवान् ॥ (अ. प्र. १५०)

---

[1] अत्रप्रधान—न. [2] तवैतत्—थ. [3] तर्क—द. [4] दर्शनाद—थ अनादरणीया—न.

(39) शिष्टापरिग्रहाधिकरणम् ॥ २-१-४ ॥

[अधि-अर्थः ; वेदापरिगृहीतसर्वपक्षप्रतिक्षेपः]

१५१. एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ २-१-१२ ॥

[सूत्रार्थविवरणम्]

शिष्टाः—परिशिष्टाः । 'न विद्यते वेदपरिग्रहो येषाम्' इति अपरिग्रहाः । शिष्टाश्च अपरिग्रहाश्च शिष्टापरिग्रहाः । एतेन—वेदापरिगृहीतसाङ्ख्यपक्षक्षपणेन, परिशिष्टाश्च वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः, क्षपिता वेदितव्याः ॥

[अधिकाशङ्का-परिहारयोः स्फुटीकरणम्]

परमाणुकारणवादे अमीषां सर्वेषां संवादात्, कारणवस्तुविषयस्य तर्कस्य अप्रतिष्ठित्वं न शक्यते वक्तुम्—इत्यधिकाशङ्का ।

एतेनेत्यादि । किं ब्रह्मकारणत्वं विचाल्यम्? उत न? इति किं वेदान्तवाक्यानां कणादाक्षपादादितर्कविरोधः, अन्यपरत्वमापादयति? न? इति । किं बहुवादिसंमतपरमाणुकारणवादनिरसने, तर्काप्रतिष्ठानहेतुः प्रभवति? न? इति ।

यदा न प्रभवति तदा, कणादाद्युक्ततर्कविरोधेन श्रुतीनामन्यपरत्वात्, ब्रह्मकारणत्वं विचाल्यं भवति ॥ यदा प्रभवति तदा, तदुक्तविरोधस्य श्रुतिनामन्यपरताहेतुत्वाभावात् ब्रह्मकारणत्वम् अविचाल्यं भवति ॥ [इति पूर्वोत्तरपक्षयोः फल-फलिभावः]

ननु—मोक्षधर्मादिषु परिगृहीतस्य साङ्ख्यस्य, धर्मशास्त्रपरिगृहीतस्य न्याय-वैशेषिकादिपक्षस्य च कथं शिष्टापरिगृहीतत्वम्?; तत्प्रणीता प्रमाण-प्रमेयव्यवहारमर्यादा सर्वाङ्गीकार्या । वेदप्रामाण्यं, ईश्वरः, तदुपासनान्मोक्षः इति च तैरभ्युपेतम्—इति चेत्, कारणतत्वस्य प्रधानप्रतिपाद्यत्वात्, वैशेषिकादीनां परमाणुकारणवादस्य, सांख्यपक्षस्य स्वतन्त्रप्रधानकारणवादस्याऽपि च औपनिषदब्रह्मकारणवादविरुद्धत्वात्, विरुद्धांशस्य अपरिगृहीतत्वात्, एकदेशाविरोधेऽपि प्रधानप्रतिपाद्यांशविरोधात् शिष्टापरिग्रहव्यपदेशः ॥

' वेदापरिग्रहाः शिष्टा निरस्ताः साङ्ख्यपक्षवत् ।
कुतर्कहेतुमूलत्वादन्योन्यव्याहतेः पुनः ॥' (ब्र. प. 151)

तावन्मात्रसंवादेऽपि, [1]तर्कमूल[1]त्वाविशेषात् परमाणुस्वरूपेऽपि [2]शून्यात्मकत्वा-शून्यात्मकत्व[2]-ज्ञानात्मकत्वार्थात्मकत्व-क्षणिकत्वनित्यत्वै-कान्तत्वानेकान्तत्व-सत्यासत्यात्मकत्वादिविसंवाददर्शनाच्च, अप्रतिष्ठितत्वमेव—इति परिहारः ॥ १३ ॥

परमाण्विति । माध्यमिकमतं शून्यात्मकत्वं, योगाचारमतं ज्ञानात्मकत्वं, बौद्धत्रयाभिमतं क्षणिकत्वं, आर्हतव्यतिरिक्तानां एकान्तत्वं, वैशेषिकादिमतं सत्यत्वं, योगाचारमतं असत्यत्वम् । 'आदि'शब्देनैकविधत्वचतुर्विधत्वं, आर्हतमते एकविधत्वम् ॥ १३ ॥ शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

—o—

---

[1] तन्मूल—इ. [2] शून्यात्मकत्व—त, थ.

(40) भोक्त्रापत्त्यधिकरणम् ।। २–१–५ ।।

अधि–अर्थः ; परस्य ब्रह्मणः शरीरसम्बन्धाशङ्कितभोक्तृतानिरासः]

१५२. भोक्त्रापत्तेरविभागश्चेत्; स्याल्लोकवत् ।। २-१-१४ ।।

[सङ्गतिः सूत्रार्थविवरणं]

पुनरपि साङ्ख्यः प्रत्यवतिष्ठते । यदुक्तम्—स्थूल-सूक्ष्मचिदचिद्वस्तु[1]शरीरस्य[1] परस्य ब्रह्मणः कार्य-कारणरूपत्वात्, जीव-ब्रह्मणोः स्वभावविभाग उपपद्यते—इति ।

स तु विभागो न सम्भवति ; ब्रह्मणः सशरीरत्वे, तस्य भोक्तृत्वापत्तेः—सशरीरत्वे जीवस्येव ईश्वरस्याऽपि सशरीरत्वप्रयुक्तसुख-दुःखयोर्भोक्तृत्वस्य अवर्जनीयत्वात् ।

[अधिकरणारम्भाक्षेपपरिहारौ]

ननु च—

'सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्' ब्र. सू. 1-2-8)

इत्यत्र, ईश्वरस्य भोगप्रसङ्गपरिहारः–उक्तः !

पुनरपीति । 'न तु दृष्टान्तभावात्' इत्यत्र शरीरगतबालत्व-युवत्वादिधर्माणां, शरीरिणि अप्रसङ्गं दृष्टान्तीकृत्य, परमात्मनि शरीरभूतचिदचिद्गतदोषाप्रसक्तिः—उक्ता । अत्र—शरीर-संसर्गप्रयुक्तभोक्तृत्वप्रसङ्गः परिह्रियते ॥

पूर्ववदेव प्रथमो विचारः । तदर्थं, किं भोक्तृजीवशरीरकस्य ब्रह्मणः, स्वशरीरभूताज्जीवात् निरतिशयानन्दस्वभावतया विलक्षणत्वमस्ति ? न ?—इति । तदर्थं, किं ब्रह्मणः सशरीरत्वे, जीववत् सुख-दुःखभोक्तृत्वं प्रसज्यते ? उत न ?—इति । दुःखादिभोक्तृत्वं किं शरीरप्रयुक्तम् ? उत अन्यप्रयुक्तम् ?—इति । 'न ह वै सशरीरस्य' इति श्रुतौ 'शरीर' शब्दः, किं शरीर-

---

[सूत्रार्थः ; (ब्रह्मणः सशरीरत्वे) **भोक्त्रापत्तेः**—(भोगायतनभूत) शरीरसंसर्गकृतसुख-दुःखभोक्तृत्वस्य ब्रह्मण्यप्यापत्तेः, **अविभागः**—जीव-ब्रह्मणोर्वैलक्षण्याभावः प्रसज्यते—इत्याक्षेपे प्राप्ते, **लोकवत्**—लोकपरिदृष्टयोः शास्य-शासकयोरिव विभागः, **स्यात्**—सिध्यत्येव ॥]

'ब्रह्मणोऽखिलदेहत्वे भोक्तृत्वं जीववद्भवेत् ।
नाऽतो विभाग इति चेत् देहित्वेऽपि न भोक्तृता ॥ (ब्र. प. 152)

---

[1] शरीरकस्य—थ.

नैवम् ; तत्र हि !—उपास्यतया हृदयायतने संनिहितस्य, शरीरान्तर्वर्तित्वमात्रेण भोगप्रसङ्गो न विद्यते—इत्युक्तम् । इह तु—जीववत् ब्रह्मणोऽपि [1]सशरीरत्वे[1], तद्वदेव सुख-दुःखयोर्भोक्तृत्वप्रसङ्गो दुर्वारः—इत्युच्यते ॥ दृश्यते हि ! सशरीराणां जीवानां, शरीरगत[2]बालत्व[2]-स्थविरत्वादिविकारासम्भवेऽपि, शरीरधातुसाम्य-वैषम्य-निमित्तसुख-दुःखयोगः ॥ श्रुतिश्च—

'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति ; अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां. उ. 8-12-1)

इति ॥

[पूर्वपक्षार्थः]

अतः—सशरीरब्रह्मकारणवादे जीवेश्वरस्वभावविभागा[3]सम्भवात्[3], केवलब्रह्मकारण-[4]वादे[4]मृत्-सुवर्णादिवत् जगद्गतापुरुषार्थादिसर्वविशेषाश्रयत्वप्रसङ्गाच्च, प्रधानकारणवाद एव ज्यायान्—इति चेत् !

मात्रपरः ? उत पुण्यापुण्यनिमित्तशरीरपरः ?—इति । अत्र चरमो विचारः प्रस्तुतोपयोगेन बुद्धिस्थतया कृतः ; न तु असाधारणतया कर्तव्यत्वात् ॥

यदा शरीरमात्रपरः तदा, दुःखादिभोगस्य शरीरित्वप्रयुक्तत्वात्, ब्रह्मणोऽपि तद्भोग प्रसङ्गेन शरीरभूताज्जीवात् निरतिशयानन्दतया विलक्षणत्वं नास्तीति स्यात् ॥ यदा तस्मिन् वाक्ये 'शरीर' शब्दः कर्मकृतशरीरपरः ; तदा दुःखादिभोगस्य शरीरित्वप्रयुक्तत्वाभावात्, ब्रह्मणः तद्भोगाप्रसङ्गेन शरीरभूताज्जीवात्....वैलक्षण्यमस्तीति सिध्यति ॥

'शरीरान्तर्वर्तित्वमात्रेणे'ति 'मात्र' शब्देन, शरीरं प्रति स्वाम्यनिवृत्तिः । जीववत्.... सशरीरत्वे इत्यनेन शरीरस्वाम्यमभिप्रेतम् । यथा कार्यवशात् परगृहं प्रविष्टस्य गृहसंनिधि-मात्रेण गृहपतित्वप्रयुक्तानर्थाभ्युदयभाक्त्वं न भवति ; तथा उपास्यत्वाय हृदयस्थस्य शरीर-संनिधिमात्रेण शरीरित्वप्रयुक्तभोक्तृत्वापत्तिर्नास्तीति, 'सम्भोगप्राप्तिरिति चेत्' इत्यत्रोक्तम् । अत्र तु शरीरस्वामित्वप्रयुक्तभोक्तृत्वमाशङ्क्यमिति शङ्काया मुखभेदः इत्यर्थः ॥ सूत्रभेदस्तु भोक्तृत्वा-शङ्काद्वारभेदनिबन्धनः ॥ 'असम्भवेऽपी'त्यनेन, 'न तु दृष्टान्तभावात्' इत्यत्र परिहृतांश उक्तः ।

अत इति, अपरिहृतांशमाह ।

---

[1] सशरीरत्वेऽपि—थ. [2] बालत्व-युवत्व—त्रा. [3] भावात्—वा. [4] वादेऽपि—वा.

[सिद्धान्तार्थः]

अत्रोत्तरम्—स्याल्लोकवत्'—इति । स्यादेव विभागो जीवश्वरस्वभावयोः । न हि ! जीवस्य शरीरधातुसाम्य-वैषम्यनिमित्तं सुख-दुःखयोर्भोक्तृत्वं, सशरीरत्वकृतम् ; अपि तु पुण्य-पापरूपकर्मकृतम् ।

'न ह वै सशरीरस्य' (छां. उ. 8-12-1)

इत्यपि, कर्मारब्धदेहविषयम् ।

'स एकधा भवति त्रिधा भवति' (छ. उ. 7-26-2)

'स यदि पितृलोककामो भवति' (छां. उ. 8-2-1)

'स तत्र पर्येति जक्षत् क्रीडन् रममाणः' (छ. उ. ८-12-3)

इति [1]कर्मबन्ध[1]विनिर्मुक्तस्य आविर्भूतस्वरूपस्य, सशरीरस्यैव अपुरुषार्थगन्धाभावात् ।। अपहतपाप्मनस्तु परमात्मनः, स्थूल-सूक्ष्मरूपकृत्स्न[2]जगच्छरीरत्वेऽपि[2], कर्मसम्बन्ध-गन्धो नास्तीति, [3]नतराम्[3] अपुरुषार्थगन्धप्रसङ्गः ।।

[सूत्रोक्त दृष्टान्तार्थविशदीकरणम्]

लोकवत्—यथा लोके राजशासनानुवर्तिनां तदतिवर्तिनां च, राजानुग्रह-निग्रहकृतसुखदुःखयोगेऽपि, न [4]शरीरित्व[4]मात्रेण शासके राज्यपि, शासनानुवृत्त्यति-वृत्तिनिमित्तसुखदुःखयोर्भोक्तृत्वप्रसङ्गः । यथाऽऽह [5]द्रमिड[5]भाष्यकारः—

'यथा लोके राजा, प्रचुरदन्दशूके घोरे अनर्थसङ्कटे[6]ऽपि प्रदेशे[6] वर्त[7]मानः[7], व्यजनाद्यवधूतदेहो दोषैर्नस्पृश्यते, अभिप्रेतांश्चलोकान् [8]परिपालयति[8], भोगांश्च

अपित्विति, अत्र व्युत्पाद्यं न्यायं दर्शयति । न ह वै इति, मुक्तिपादे वक्ष्यमाणमर्थ-मुपजीव्य निर्वाहःकृतः ; न तु अत्रैव निर्वाह्यत्वाच्छ्रुतेः ।। [सशरीरस्यैवेति । मुक्तात्मन एवातथात्वे किमुत परमात्मन इति]

व्यजनादीति, 'आदि'शब्देन तत्तदनिष्टनिवारणसाधनानि विवक्षितानि । [दन्द-शूकः—दंशमशकादिः । 'दन्दश्यते' इति व्युत्पत्तिः]

---

[1] कर्मसम्बन्ध—थ. [2] जगत्सशरीरत्वेऽपि—थ. [3] नितराम्—त, थ. [4] सशरीरत्व—अ. [5] द्रविड—अ. [6] प्रदेशेऽपि—थ. [7] मानोऽपि—त, थ. [8] परिपिपालयिषति—आ. ज. त. थ. द. पुनरपि पालयिष्यति—वा.

गन्धादीन् अविश्वजनोपभोग्यान् [1]धारयति[1]; तथाऽसौ लोकेश्वरः अमरत्वसामर्थ्य-चामरः दोषैर्नस्पृश्यते, रक्षति च लोकान् [2]ब्रह्मलोकादीन्[2], भोगांश्च अविश्व-जनोपभोग्यान् धारयति—इति'॥

मृत्-सुवर्णादिवत् ब्रह्मस्वरूपपरिणामस्तु, नैवाऽभ्युपगम्यते; अविकारत्व-निर्दोष-त्वादिश्रुतेः।

[अन्यथाव्याख्यानानुवादः, तद्दूषणं च]

यत्तु परैः—ब्रह्मकारणवादे भोक्तृ-भोग्यविभागाभावमाशङ्क्य, [3]समुद्र-फेन[3]-तरङ्ग-दृष्टान्तेन विभागप्रतिपादनपरं सूत्रं व्याख्यातम्;

तदयुक्तम्; अन्तर्भावितशक्त्यविद्योपाधिकात् ब्रह्मणः सृष्टिमभ्युपगच्छताम्, एवमाक्षेप-परिहारयोः असङ्गतत्वात्, कारणान्तर्गतशक्त्यविद्योपाध्युपहितस्य भोक्तृत्वात्, उपाधेश्च भोग्यत्वात्; विलक्षणयोस्तयोः परस्परभावापत्तिर्हि! न सम्भवति॥

[स्वरूपपरिणामनिबन्धनतयाऽपि शङ्का-परिहारयोरनुपपत्तिः]

स्वरूपपरिणामस्तु, तैरपि नाऽभ्युपेयते;

'न कर्माऽविभागादिति चेन्नाऽनादित्वात्' (ब्र. सू. 2-1-35)

इति, क्षेत्रज्ञानां तद्गतकर्मणां चानादित्वप्रतिपादनात्।

अत्र **चामर**ग्रहणम्, अनिष्टनिवारणानुरूपवस्तूनामुपलक्षणम्।

सशरीरब्रह्मकारणत्वे, जीवेश्वरविभागाभावः परिहृतः। केवलब्रह्मकारणवादे, पूर्वोक्त-जगद्गतापुरुषार्थादिप्रसङ्गमनभ्युपगमेन, **'मृत्-सुवर्णादिवत्'** [इति ग्रन्थेन] परिहरति।

यत्त्विति। 'भोक्तृ' शब्दो भोक्तृत्वपरः—इति तैरप्युक्तम्। परैः भोग्यस्य भोक्तृत्वापत्तिं, भोक्तुः भोग्यत्वापत्तिं चाशङ्क्य परिहृतम्। तत्, **तदयुक्तम्** इति दूषयति। **कारणान्तर्गतेति,** आक्षेपपरिहारयोः असङ्गतत्वमुपपादयति। **'उपाधेश्चे'**त्यत्र उपाधिशब्दः, शक्त्यविद्योपाधीनां त्रयाणामपि वाचकः। यथा 'वाद'शब्दः, कथासामान्यवाची कथाविशेष-वाची च तद्वत्। यद्वा 'उपाधि'शब्देन अचिदंशो विवक्षितः। **विलक्षणयोरिति**। उपहितब्रह्मणो भोक्तृत्वम्, उपाधेर्भोग्यत्वं चाऽस्तु; तथापि तयोः उपाधि-ब्रह्मणोः अविभागः आशङ्क्य परिह्रियते-[इत्यस्याशयस्य दूषणमिदम्।]

न कर्मेति। क्षेत्रज्ञानादित्वाभ्युपगमे, उपहितस्य ब्रह्मणः क्षेत्रज्ञत्वेन, उपाधेश्च भोग्यत्व-रूपेण नित्यत्वाभ्युपगमात्, नित्यत्वेनाऽभ्युपगतयोस्तयोः, अविभागाभावः सिद्ध एवेत्यर्थः।

---

[1] धारयते—त, थ. [2] ब्रह्मलोकान्—न. [3] फेन—आ, इ, द.

स्वरूपपरिणामाभ्युपगमेऽपि भोक्तृ-भोग्या[1]विभागा[1]शङ्का कस्यचिदपि न जायते ; मृत्-सुवर्णादिपरिणामरूपघटशराव-कटकमकुटादिविभागवत् , भोक्तृ-भोग्यविभागोपपत्तेः । स्वरूपपरिणामे [2]च[2], ब्रह्मण एव भोक्तृ-[3]भोग्यत्वा[3]पत्तिरिति, पुनरपि असामञ्जस्यमेव ॥ १४ ॥

इति भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

स्वरूपपरिणामाभ्युपगमेऽपीति, अभ्युपगम्य दूषणम् ॥ **मृत्सुवर्णादीति,** दृष्टान्तमाह ! कटक-मकुटादीनां कालभेदेन अविभाग उपपद्यते—इति चेत्, तत् फेन-तरङ्गदृष्टान्तेऽपि समानम् । यस्तु विभागः फेन-तरङ्गदृष्टान्तेन साध्यते ; स स्वरूपपरिणामाभ्युपगमेऽपि स्वयमेव सिध्यतीति भावः । **स्वरूपपरिणामे चेति ।** स्वरूपपरिणामाभ्युपगमे, 'अपीतौ तद्वत्' 'न तु दृष्टान्तभावात्' इति, विकारापुरुषार्थापातात् निर्विकारत्वादिश्रुतीनाम् असामञ्जस्यमुक्तं परिहृतम् ; तच्च दूषणमपरिहृतं स्यादिति ॥ १४ ॥

॥ इति भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

—o—

[1] विभाग—वा. [2] पि—वा. [3] भोगत्वा—द.

(41) आरम्भणाधिकरणम् ॥ २-१-६ ॥ (सू. 15-20)

[अधि-अर्थः ; कार्य-कारणभावकृतं जगद्-ब्रह्मणोः अनन्यत्वम्]

१५३. तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ २-१-१५ ॥

[सङ्गतिप्रतिपादनम्]

'असदिति चेन्न प्रतिषेधमात्रत्वात्' (ब्र. सू. 2-1-7) इत्यादिषु, कारण[1]भूताद्ब्रह्मणः[1] कार्यभूतस्य जगतः अनन्यत्वमभ्युपगम्य, ब्रह्मणो जगत्कारणत्वम्—उपपादितम् । इदानीं—तदेवाऽनन्यत्वम् , आक्षिप्य समाधीयते ॥

[कार्य-कारणयोरनन्यत्वे आक्षेपः]

[तत्रादौ वैशेषिकाक्षेपः]

तत्र काणादाः प्राहुः—न कारणात् कार्यस्य अनन्यत्वं सम्भवति ; (१) विलक्षणबुद्धिबोध्यत्वात्—न खलु! तन्तुपट-मृत्पिण्डघटादिषु कार्य-कारण-विषया बुद्धिः, एकरूपा ।

इत्यादिषु—सूत्रेष्वित्यर्थः । ब्रह्मणः जगत्कारणत्वं संभवति ? न ? इति । किं ब्रह्म-कार्यत्वे जगतः श्रुतिसिद्धं ब्रह्मणोऽनन्यत्वं सम्भवति ? न ? इति । किं'वाचारम्भण'मित्यादि-वाक्यानि, कारणस्यैव अवस्थान्तरापत्त्या कार्यत्वं बोधयितुं प्रभवन्ति ? न ? इति । किं बुद्धि-शब्दान्तरादयः, अवस्थाभेदनिबन्धनाः ? उत द्रव्यभेदनिबन्धनाः ? इति । [विचाराः]

यदा बुद्धिभेदादयः स्वरूपान्यत्वनिबन्धनाः तदा, कार्यस्य कारणादन्यतया जगतो ब्रह्मान्यत्वापत्तेः तदनन्यतया व्यपदिश्यमानं ब्रह्म, न कारणं भवतीति स्यात् ॥ यदा बुद्धि-भेदादीनामवस्थान्तरनिबन्धनत्वं तदा, कार्यस्य कारणादनन्यत्वेन जगतो ब्रह्मानन्यत्वसिद्धेः, तदनन्यतया व्यपदिश्यमानस्य ब्रह्मणः, जगत्कारणत्वं सम्भवतीति सिध्यति ॥ [इति पूर्वोत्तर-पक्षयोः फल-फलिभावः] ॥

[सूत्रार्थः ; तदनन्यत्वम्—(कार्यस्य चेतनाचेतनात्मकस्य जगतः) परमकारणात् परस्माद्ब्रह्मणः सकाशादन्यत्वाभावः, आरम्भणशब्दादिभ्यः—(सयुक्तिकम् अनन्यत्वप्रतिपाद-केभ्यः) 'आरम्भण'शब्दघटितवाक्यप्रभृतिभ्यो ज्ञापकेभ्योऽवगम्यते ॥]

'अनन्यत्वं तु जगतो ब्रह्मणः कारणादिह ।
वाचारम्भणमित्यादेर्मृत्पिण्डाद्घटवद्भवेत् ॥' (ब्र. प. 153)

---

[1] भूतात् परब्रह्मणः —थ.

(२) शब्द[1]भेदाच्च[1] — नहि! तन्तवः पट इत्युच्यन्ते; पटो वा तन्तव इति।

(३) कार्यभेदाच्च — न हि! मृत्पिण्डेन उदकमाह्रियते; घटेन वा कुड्यं निर्मीयते।

(४) कालभेदाच्च — पूर्वकालं च कारणम्; अपरकालं च कार्यम्।

(५) आकारभेदाच्च — पिण्डाकारं कारणम्; कार्यं च पृथुबुध्नोदराकारम्। तथा, सत्या[2]मेव[2]मृदि, 'घटो नष्टः' इति व्यवह्रियते।

(६) सङ्ख्याभेदश्च दृश्यते — बहवस्तन्तवः; एकश्च पटः।

(७) कारकव्यापारवैयर्थ्यं च — कारणमेव चेत् कार्यं; किं कारकव्यापारसाध्यं स्यात्?

सत्यपि कार्ये कार्योपयोगितया कारकव्यापारेण भवितव्यं [3]चेत्[3]; सर्वदा कारकव्यापारेण नोपरन्तव्यम्।

(८) सर्वस्य सर्वदा सत्त्वेन, नित्यानित्यविभागश्च न स्यात्॥

[वैशेषिकान्प्रति, सत्कार्यवादिनां सांख्यानां प्रत्यवस्थानम्]

अथ — कार्यं सदेव पूर्वमनभिव्यक्तं, कारकव्यापारेणाभिव्यज्यते। अतः, कारकव्यापारार्थवत्त्वं, नित्यानित्यविभागश्च — [4]उच्यते![4]

[उक्तार्थस्य अनवस्थादिदोषदूषितत्वम्]

तदसत्; अभिव्यक्तेः अभिव्यक्त्यन्तरापेक्षत्वे, अनवस्थानात्। अनपेक्षत्वे, कार्यस्य [5]नित्यो[5]पलब्धिप्रसङ्गात्। तदुत्पत्त्यभ्युपगमे च, असत्कार्यवादप्रसङ्गात्॥

न स्यादिति। [कारणात् कार्यानन्यत्वे] विलक्षणबुद्धिबोध्यत्वं, शब्दभेदः, कार्यभेदः, कालभेदः, आकारभेदः—[एष एव] परिणाम(माण)भेदः, भावाभावविरोधश्चेति[नेय इति भाति] सङ्ख्याभेदः; कारकव्यापारवैयर्थ्यम्, नित्यानित्यविभागानुपपत्तिश्चेति। [दोषाः, तेषां] हेतवः, हेत्वसिद्धिशङ्काव्यावृत्तिश्च [उक्ताः]

तदसत्....प्रसङ्गादिति। [अनेन] किम् अभिव्यक्तिः उत्पद्यते? उत अभिव्यज्यते? उत अभिव्यक्त्यनपेक्षा नित्या? इति विकल्पाभिप्रायेण दूषयति।

---

[1] भेदात् — द.　[2] मपि — थ.　[3] इति चेत् — न.　[4] उच्येत — त, थ. इत्युच्यते — ङ.
[5] नित्यत्वो — थ.

[अभिव्यक्तिपक्षासिद्ध्या सत्कार्यवादासिद्धिः]

किं च—कारकव्यापारस्य अभिव्यञ्जकत्वे, घटार्थेन कारकव्यापारेण करकादेरभिव्यक्तिः [1]प्रसज्यते[1]; संप्रतिपन्नाभिव्यञ्जकभावेषु दीपादिषु, अभिव्यङ्ग्यविशेषनियमादर्शनात्। न हि! घटार्थमारोपितः प्रदीपः, करकादीन् न अभिव्यनक्ति। अतः, असतः कार्यस्य उत्पत्तिहेतुत्वेनैव, कारकव्यापारार्थवत्त्वम्। अतश्च सत्कार्यवादासिद्धिः॥

न च-नियतकारणोपादानं, सत एव कार्यत्वं साधयति; कारणशक्तिनियमादेव तदुपपत्तेः॥

[असत्कार्यवादिनं प्रति कारकव्यापारानुपपत्तिचोदना-परिहारौ]

ननु—असत्कार्यवादिनोऽपि, [2]कारक[2]व्यापारो नोपपद्यते; प्रागुत्पत्तेः, कार्यस्य असत्त्वात्, कार्यादन्यत्र कारकव्यापारेण भवितव्यम्। तत्र अन्यत्वाविशेषात्, तन्तुगतकारकव्यापारेण घटोत्पत्तिरपि प्रसज्यते!

नैवम्; यत्कार्योत्पादनशक्तं यत् कारणम्, तद्गतकारकव्यापारेण तत्कार्योत्पत्ति सिद्धेः।

[अद्वैति संमत कार्य-कारणानन्यत्वरीत्या उत्तरम्]

अत्राहुः—कारणादनन्यत्, कार्यम्। न हि! परमार्थतः कारणव्यतिरिक्तं कार्यं नाम वस्त्वस्ति; अविद्यानिबन्धनत्वात् सकलकार्य-तद्व्यवहारयोः। अतः, यथा कारणभूतात् मृद्द्रव्यात् घटादिषु विकारेषूपलभ्यमानात् व्यतिरिक्तं घट-शरावादिकार्यं,

---

न च नियतेति। मृत्पिंडे घटो न विद्यते चेत्!, असत्त्वाविशेषात् तन्तुरपि घटचिकीर्षुणा उपादीयेत। नच तथा क्रियते। अतः कारणविशेषोपादाननियमानुपपत्त्या, कार्यं सदेवेत्यर्थः। कारणेति। 'घटो मृत्पिण्डे एव विद्यते; न तन्तुषु' इति नियमः कथम्?; तदेव तत्सद्भावयोग्यम्—इति चेत्!, तदुत्पादनयोग्यं तदेवेति, तस्यैवोपादाननियमो युक्तः—इत्यर्थः। एवम् उपादानकारणनियमानुपपत्तिरूपं चोद्यं परिहृतम्॥

नैवमिति। अनन्यत्वश्रुतीनाम् अमुख्यत्वमभिमतम्॥

अतः यथेति। 'वाचारम्भण' मित्यादिवाक्यस्याऽर्थमभिप्रेत्य। विकारेषूपलभ्यमानात्

---

[1] प्रसज्येत—थ, द. [2] कारण—न.

व्यवहारमात्रालम्बनं मिथ्या ; कारणभूतं मृद्द्रव्यमेव सत्यम् ; तथा निर्विशेषसन्मात्रात् कारणभूतात् ब्रह्मणोऽन्यः ; अहङ्कारादिव्यवहारालम्बनः कृत्स्नः प्रपञ्चो मिथ्या ; कारण[1]भूतं सन्मात्रं[1] ब्रह्मैव सत्यम् । तस्मात्, कारणव्यतिरिक्तं कार्यं नास्तीति, कारणादनन्यत् कार्यम् ॥

[उक्तदृष्टान्ते साध्यवैकल्यशङ्का-तत्परिहारौ]

न च वाच्यम्—शुक्तिका-रजतादीनामिव, घटादिकार्याणाम् असत्यत्वाप्रसिद्धेः, [2]दृष्टान्ता[2]नुपपत्तिः—इति ; यतः, तत्रापि युक्त्या मृद्द्रव्यमात्रमेव सत्यतया व्यवस्थाप्यते ; तदतिरिक्तं तु युक्त्या बाध्यते ॥

का पुनरत्र युक्तिः ?

मृद्द्रव्यमात्रस्य अनुवर्तमानत्वं ; [3]तदतिरिक्तस्य च[3] व्यावर्तमानत्वम् । रज्जु-सर्पादिषु हि ! अनुवर्तमानस्य अधिष्ठानभूतस्य रज्ज्वादेः [4]सत्यता[4] ; व्यावर्तमानस्य च सर्पभूदलनाम्बुधारादेः असत्यता [5]दृष्टा[5] । तथा अनुवर्तमानमधिष्ठानभूतं मृद्द्रव्यमेव सत्यम् ; व्यावर्तमानास्तु घट-शरावादयः असत्यभूताः ॥

[कार्यस्यानिर्वचनीयत्वं, तस्मान्मिथ्यात्वं च]

किं च—सत आत्मनः विनाशाभावात्, असतश्च शशविषाणादेः उपलब्ध्यभावात्, 'उपलब्धि विनाशयोगि कार्यं, [6]सदसद्भ्याम्[6] अनिर्वच[7]नीयम्[7]' इति गम्यते । अनिर्वचनीयं च, शुक्तिका-रजतादिवत् मृषैव । तस्य च अनिर्वचनीयत्वं, प्रतीति-बाधाभ्यां सिद्धम् ॥

इत्यनेन अनुवर्तमानत्वहेतुर्विवक्षितः । **तथेति,** 'एकमेवाद्वितीयम्' इत्यस्यार्थमाह । **अहङ्कारादिव्यवहारालम्बनः** । 'अहमिति प्रथमोऽध्यासः' इति हि ! तेषां ग्रन्थः । 'आदि'शब्देन ज्ञेयमुच्यते । ब्रह्मव्यतिरिक्तपरमार्थभूतकार्याभावः 'तदनन्यत्व' शब्दार्थ इति भावः ॥

यत इति । यथा 'ज्वालावत् क्षणिकम्' इत्युक्ते, ज्वालाभेदस्य अप्रत्यक्षत्वेन, न साध्यवैकल्यं तद्वदित्यर्थः ॥

किं चेत्यादिना, सदसद्विलक्षणत्वं नाम मिथ्यात्वे हेत्वन्तरमाह । **सत आत्मनः इति,** कार्यस्य सदसद्विलक्षणत्वे व्यतिरेकिणं हेतुमाह । **अनिर्वचनीयं चेत्यादिना,** मिथ्यात्वे सदसद्विलक्षणत्वम् अन्वयिहेतुरिति दर्शयति । **तस्य चेति,** सपक्षस्य शुक्तिरजतादेः अनिर्वचनीयत्वं दर्शयति ।

---

[1] भूतसन्मात्रं—उ. भूतसन्मात्र—च.　[2] दृष्टान्तत्वा—थ.　[3] तदतिरिक्त—स्य—द
[4] सत्यतया—द.　[5] सत्यताऽदृष्टा—द　[6] सदसद्भ्यावर्तनीयम्—थ.　[7] नीयत्वम्—द.

[कार्यस्य दुर्निरूपत्वात् असत्यत्वम्]

किं च—कार्यमुत्पादयत् मृदादिकारणद्रव्यं, किम् अविकृतमेव [1]कार्यमुत्पादयति[1] ? उत कञ्चन विशेषमापन्नम् ?—

न तावत् अविकृतम्, उत्पादयति; सर्वदोत्पादकत्वप्रसङ्गात्। नाऽपि विशेषान्तरमापन्नम्; विशेषान्तरापत्तेरपि विशेषान्तरापत्ति[2]पूर्वकत्वेन[2] भवितव्यम्, तस्या अपि तथेति, अनवस्थानात्।

अविकृतमेव, देश-काल-[3]निमित्तविशेषसम्बद्धं[3], कार्यमुत्पादयति—इति चेत्,

न; देशादिविशेषसम्बन्धोऽपि हि! अविकृतस्य विशेषान्तरमापन्नस्य च, पूर्ववत् न सम्भवति॥

[कारणात् कार्योत्पत्तेः निर्बाधप्रतीतितः सिद्धिः, तन्निरासश्च]

न च वाच्यम्—मृत् सुवर्ण-दुग्धादिभ्यः, घट-रूचक-दध्यादीनाम् उत्पत्तिर्दृश्यते। शुक्तिकारजतादिवत् देश कालादिप्रतिपन्नोपाधौ बाधश्च न दृश्यते। अतः, प्रतीतिशरणानां, कारणात्कार्योत्पत्तिः अवश्याश्रयणीया—इति; विकल्पासहत्वात्।

किं हेमादिमात्रमेव स्वस्तिकादेरारम्भकम्? उत [4]रूचकादि[4]? अथ रूचकाद्याश्रयो [5]हेमादिः[5]?

[विकल्पीयाद्यकल्पस्य द्रव्यमात्रकारणत्वस्य निरासः]

न तावत्, हेमादिमात्रमारम्भकम्; हेमव्यतिरिक्तस्य कार्यस्य अभावात्, स्वात्मानं प्रति आत्मनः आरम्भकत्वासम्भवाच्च।

किं चेत्यादिना, व्यावर्तमानत्वहेतोः उपाधिशङ्कापरिहाराय, कार्यस्य दुर्निरूपताम्, अनुग्राहकतर्करूपेणाऽऽह। सत्यं चेत्! सुनिरूपं स्यात् इत्यर्थः।

अविकृतमेवेत्यादि। 'विशेष' शब्दः देश-काल-निमित्तैः प्रत्येकं संबध्यते। अविकृतस्य चेत्! सर्वदा देशकालादिसमवधानं स्यात्। विकृतस्य चेत्! अनवस्थेत्यर्थः।

न च वाच्यमित्यादि। उक्ततर्कस्य प्रत्यक्षविरोधमाशङ्क्य। विकल्पेति। किं द्रव्यमात्रं कारणम्? उत आकारमात्रम्? उत आकारविशिष्टं द्रव्यम्? इति विकल्पाः।

---

[1] कार्यम्—त, थ. [2] पूर्वत्वेन—न. [3] निमित्तविशेषसम्बन्धम्—त, थ. विशेषसम्बन्धम्—द.
[4] रूचकादिः—व. [5] हेमादि—न.

हेमव्यतिरिक्तं स्वस्तिकं दृश्यते—इति चेत्! न हेमव्यतिरिक्तं तत्; हेमप्रत्यभिज्ञानात्, तदतिरिक्तवस्त्वन्तरानुपलब्धेश्च।

बुद्धि-शब्दान्तरादिभिः, वस्त्वन्तरत्वं साधितम्—इति [1]चेत्! न[1]; अनिरूपित-वस्त्ववलम्बनानां [2]बुद्धि-शब्दान्तरादीनां[2], शुक्तिकारजत[3]बुद्धि-शब्दादिवत्[3] भ्रान्ति मूलत्वेन वस्त्वन्तर[4]सद्भावस्य असाध[4]कत्वात्॥

[द्वितीय-तृतीयकल्पयोः आकारमात्र-आकारविशिष्टद्रव्यकारणत्वयोर्दूषणम्]

नाऽपि-रूचकादि स्वस्तिकादेरारम्भकम्; स्वस्तिके हि! रूचकं, पटे इव तन्तवः, भवताऽपि नोप[5]लभ्यते[5]।

नाऽपि रूचकाश्रयभूतं हेम; रूचकाश्रयाकारेण हेम्नः स्वस्तिके अनुपलब्धेः।

[ब्रह्मातिरिक्तमिथ्यात्वदृढीकरणम्]

अतः मृदादिकारणातिरिक्तस्य कार्यस्य असत्यत्वदर्शनात्, ब्रह्मव्यतिरिक्तं कृत्स्नं जगत्, [6]कार्यत्वेन[6]मिथ्याभूतम्। तदिदं ब्रह्मव्यतिरिक्तमिथ्यात्वसुखप्रतिपत्तये, काल्पनिकमृदादिसत्यत्वमाश्रित्य, कार्यस्याऽसत्यत्वं प्रतिपादितम्। परमार्थतस्तु, मृत्सुवर्णादि कारणमपि, घट-रूचकादिकार्यवत् मिथ्याभूतम्; ब्रह्मकार्यत्वाविशेषात्॥

[उक्तार्थस्य श्रुतिकण्ठोक्तितः सिद्धिः]

'ऐतदात्म्यमिदं सर्वं तत्सत्यम्' (छां. उ. 6-8-7)

तदतिरिक्तेति, हेमप्रत्यभिज्ञानं समवायिकारणांशविषयमित्याशङ्क्य। तर्हि [समवायि-कारणविषयत्वे] व्यक्तिद्वयमुपलभ्येत; न तथोपलब्धिरित्यर्थः।

नोपलभ्यत इति। कार्ये समवायिकारणानुवृत्त्या तदुपलब्धिः, परेणाऽभ्युपगम्यते। तत्र पटे तन्तव इव, स्वस्तिके रुचकमुपलभ्येतेत्यर्थः।

अनुपलब्धेरिति। रुचकाकारविशिष्टं कारणं चेत्! स्वस्तिके रुचकाकारविशिष्ट-हेमोपलम्भप्रसङ्ग इत्यर्थः। एवमत्र—केवलप्रमाणात् तर्कानुगृहीतं प्रमाणं प्रबलमिति, प्रत्यक्ष-विरोधपरिहारः'—इत्युक्तं भवति।

अत इति। कारणातिरिक्तवस्त्वनुपलब्ध्या न प्रत्यक्षबाधः। तत एव न सोपाधिकत्वम्; पक्षेऽपि साधितत्वेन उपाधित्वाभावादिति भावः। **तदिदमिति।** न मृत्तिकासत्यत्वे तात्पर्यम्; अपि तु ब्रह्मव्यतिरिक्तमिथ्यात्वे एवेत्यर्थः।

---

[1] चेत्—द. [2] शब्द-बुद्ध्यन्तरादीनां—त. थ. [3] शब्द-बुद्ध्यादिवत्—अ.
[4] सद्भावासाध—वा. [5] लभ्यन्ते—वा. [6] तत्कार्यत्वेन—वा.

'नेह नानाऽस्ति किञ्चन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. उ. 6-4-19)

'यत्र हि द्वैतमिव भवति, तदितर इतरं पश्यति' (बृ. उ. 6-5-15)

'यत्र त्वस्य सर्वमात्मैवाऽभूत्, तत् केन कं पश्येत्' (बृ. उ. 6-5-15)

'इन्द्रो मायाभिः पुरु[1]रूप ईयते[1]' (बृ. उ. 4-5-19)

इत्येवमादिभिः श्रुतिभिश्च, ब्रह्मव्यतिरिक्तस्य मिथ्यात्वमवगम्यते ॥

[ब्रह्मातिरिक्तस्य मिथ्यात्वे प्रत्यक्षविरोधाशङ्का-परिहारौ]

न च—आगमावगतार्थस्य प्रत्यक्षविरोधः शङ्कनीयः; यथोक्तप्रकारेण कार्यस्य सर्वस्य मिथ्यात्वावगमात्, प्रत्यक्षस्य सन्मात्रविषयत्वाच्च। विरोधे सत्यपि, असम्भावितदोषस्य चरमभाविनः, स्वरूपसद्भावादौ प्रत्यक्षाद्यपेक्षत्वेऽपि, प्रमितौ निराकाङ्क्षस्य निरवकाशस्य शास्त्रस्य बलीयस्त्वात्। अतः, कारणभूताद्ब्रह्मणोऽन्यत् सर्वं मिथ्या॥

[जीवमिथ्यात्वशङ्का-परिहारौ]

न च-[2]प्रपञ्च[2]मिथ्यावेन जीवमिथ्यात्वमाशङ्कनीयम्; ब्रह्मण एव जीवभावात्। ब्रह्मैव हि! सर्वशरीरेषु जीवभावमनुभवति;

'अनेन जीवेनाऽऽत्मनानुप्रविश्य' (छां. उ. 6-2-2)

'एको देवः सर्वभूतेषु गूढः' (श्वे. उ. 6-11)

'एको देवो बहुधा[3]निविष्टः[3]' (तै. आर. 3-14-1)

श्रुतिभिश्चेति। 'ऐतदात्म्यमिदं सर्वम्' इति बाधार्थे सामानाधिकरण्यमिति भावः।

यथोक्तेति। 'आदित्यो यूपः' इत्यादिवाक्यमन्यपरम्। अत्र तु उपक्रमोपसंहारादिलिङ्गैः, तात्पर्यमस्त्येवेति, न प्रत्यक्षेण बाधः इत्यभिप्रायः। **सम्भावितदोषत्वम्**—भेदवासनामूलत्वम्। **चरमभाविनः** इति, अपच्छेदन्यायाभिप्रायेण। **स्वरूपसद्भावादौ** इति 'आदि' शब्देन, व्युत्पत्तिरभिप्रेता। **प्रमितौ**—प्रमितिहेतुत्वे, अर्थनिश्चायकत्वे इत्यर्थः। शास्त्रस्य शब्दस्वरूपग्रहण-व्युत्पत्त्यादिषु प्रत्यक्षाद्यपेक्षा अस्ति। तथापि शास्त्रज्ञानं, स्मृतिज्ञानवत् स्वार्थविषयज्ञानान्तरानुभूतत्वेन न स्वविषयं दर्शयति; अपि तु अनन्यगोचरमेव दर्शयतीत्यर्थः॥

---

[1] रूपः—द. [2] प्रपञ्चस्य – त, थ. [3] संनिविष्टः—थ.

'एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते' (कठ. उ. 3-12)

'नाऽन्योऽतोऽस्ति द्रष्टा' (बृ. उ. 5-7-27)

इत्येवमादिभ्यः ॥

[व्यवस्थानुपपत्तिः]

ननु—एकमेव ब्रह्म, सर्वशरीरेषु जीवभावमनुभवति [1]चेत्[1]! '[2]पादे मे[2]वेदना' शिरसि[3]मे सुखम्[3]' इतिवत्; सर्वशरीरेषु' सुख-दुःखप्रतिसन्धानं स्यात्। जीवेश्वर-बद्धमुक्त शिष्याचार्य-ज्ञत्वाज्ञत्वादिव्यवस्था च न स्यात् ॥

[व्यवस्थासिद्ध्यौपयिकतया जीवाज्ञानवादोपन्यासः]

अत्र केचित् अद्वितीयत्वं '[4]ब्रह्मणोऽभ्युपयन्त एव[4], [5]एवं[5] समादधते—एकस्यैव ब्रह्मणः प्रतिबिम्बभूतानां जीवानां, सुखित्वादयः; एकस्यैव मुखस्य प्रतिबिम्बानां मणि-कृपाण-दर्पणादिषूपलभ्यमानानाम्, अल्पत्व-महत्त्व-मलिनत्वविमलत्वादिवत्, तत्त-दुपाधिवशात् [6]व्यवस्थाप्यन्ते[6]।

ननु—

'अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य' (छां. उ. 6-3-2)

इत्यादिश्रुतेः, 'न जीवाः ब्रह्मणो भिद्यन्ते—इत्युक्तम्!

सत्यं [7]परमार्थतः[7]। काल्पनिकं तु भेदमाश्रित्य, इयं व्यवस्थोच्यते।

कस्य पुनः कल्पना? न तावद्ब्रह्मणः; तस्य परिशुद्धज्ञानात्मनः, कल्पनाशून्य-त्वात्। नापि जीवानाम्; इतरेतराश्रयत्वप्रसङ्गात्—कल्पनाधीनो हि! जीवभावः; जीवाश्रया च कल्पनेति।

नैतदेवम्; अविद्या-जीवभावयोः बीजाङ्कुरन्यायेन अनादित्वात्।

न स्यात् [इत्यन्तेन] लौकिक-वैदिकव्यवस्थानुपपत्तिरुक्ता।

सत्यं परमार्थतः—परमार्थतो न भिद्यन्ते इति सत्यम्; वयं तु औपाधिकभेदमाश्रित्य ब्रूमः इत्यर्थः। कस्य—किमाश्रया।

नैतदेवमिति, अन्योन्याश्रयं परिहरति।

---

[1] इति चेत्!—थ, द.　[2] पादे—त, थ.　[3] मे वेदना—द. सुखम्—वा.
[4] ब्रह्मण एवाभ्युपयन्तः—थ.　[5] एनं—च, ड.　[6] व्यवस्थास्यन्ते—श्र.　[7] न परमार्थतः—त, थ, द.

किंच—प्रासादनिगरणादिवत् अनुपप[1]न्नतैक[1]वेषायाम् अवस्तुभूतायाम् अविद्यायाम्, न इतरेतराश्र[2]यत्वादयो[2] वस्तुदोषाः अनवक्लृप्तिमावहन्ति; वस्तुतो ब्रह्माव्यतिरिक्तानां जीवानां स्वतो [3]विशुद्धत्वेऽपि[3], कृपाणादिगतमुखप्रतिबिम्बश्यामतादिवत् औपाधिकाशुद्धिसंभवात्, अविद्याश्रयत्वोपपत्तेः, काल्पनिकत्वोपपत्तिः। प्रतिबिम्बगतश्यामतादिवत्, जीवगताशुद्धिरपि भ्रान्तिरेव; अन्यथा [4]अनिर्मोक्ष[4]प्रसङ्गात्। जीवानां भ्रमस्य प्रवाहानादित्वात् न तद्धेतुरन्वेषणीयः—इति॥

[उक्तस्य वादस्य, मुख्याद्वैतिनां दूषणम्]

तदेतत्, अविदिताद्वैतयाथात्म्यानां, भेदवादश्रद्धालुजन[5]सवहु[6]माना[6]वलोकनलिप्सा[6]विजृम्भितम्। तथाहि!

[जीवगताकारविकल्पतो दूषणम्]

जीवस्य अकल्पितस्वाभाविकरूपेण अविद्याश्रयत्वे, ब्रह्मण एव अविद्याश्रयत्वमुक्तं स्यात्। तदतिरिक्तेन तस्मिन् कल्पितेनाऽऽकारेण अविद्याश्रयत्वे, जडस्य अविद्याश्रयत्वमुक्तं स्यात्। न खलु! अद्वैतवादिनः, तदुभयव्यतिरिक्तम् आकारम् अभ्युपगच्छन्ति॥

अवस्तुभूतायाम्—अपरमार्थभूतायाम्। **अनवक्लृप्तिः**—असिद्धिः। **वस्तुतो ब्रह्मेति**। यथा औपाधिकाशुद्धिः वस्तुतो मुखाव्यतिरिक्तत्वेऽपि मुखप्रतिबिम्बे संभवति; तथा वस्तुतो ब्रह्माव्यतिरिक्तत्वेन [जीवस्य] स्वतः शुद्धत्वे सत्यपि, औपाधिकाशुद्धिसम्भवादविद्याश्रयत्वेन काल्पनिकत्वमित्यर्थः। **अशुद्धिर्नाम**—स्वतः शुद्धत्वप्रतियोग्याकारः, अविद्यासम्बन्धयोग्यतेत्यर्थः। **काल्पनिकत्वोपपत्तिः**, जन्म-जरा-मरणादेरित्यर्थः। **प्रवाहेति**। [अतः] 'अशुद्धिभ्रमेण उत्तरोत्तराविद्याश्रयत्वम्; अविद्याश्रयत्वेन च भ्रमः' इत्यन्योन्याश्रयत्वं[नेत्यर्थः]।

अविदिताद्वैतयाथात्म्यानाम्—अद्वैतानिपुणानाम्। **श्रद्धालुशब्देन** भेदवादेऽपि अकौशलं विवक्षितम्। उभयतोभ्रष्टैः एवमुक्तमिति भावः। **न खल्विति**। ब्रह्म चिद्रूपम्। कल्पितं तु जडम्। तदुभयातिरिक्तानभ्युपगमात्, कल्पिताकारेणाऽविद्याश्रयत्वे, जडस्यैव अविद्याश्रयत्वमुक्तं स्यादित्यर्थः।

---

[1] तयैक—थ. [2] यादयः—त, थ, द. [3] विशुद्धत्वे—त, थ. [4] अनिर्मोक्षत्व—थ.
[5] बहु—द. [6] वलोकनेप्सा—द.

कल्पिताकारविशिष्टेन स्वरूपे[1]णैव अविद्या[1]श्रयत्वम्—इति चेत् ! [2]तन्न[2] ; स्वरूपस्य अखण्डैकरसस्य, अविद्यामन्तरेण विशिष्टरूपत्वासिद्धेः। अविद्याश्रयाकार एव हि ! निरूप्यते।

[अविद्याविनाशाविनाशकल्पतो दूषणम्]

किं च बन्ध-मोक्षादिव्यवस्थासिद्ध्यर्थं हि ! जीवा[3]ज्ञानवादा[3]श्रयणम्। सा तु व्यवस्था, जीवाज्ञानपक्षेऽपि न सिध्यति। अविद्याविनाश एव हि मोक्षः। तत्र एकस्मिन् मुक्ते अविद्याविनाशात्, इतरेऽपि [4]विमुच्येरन्[4]।

अन्यस्य अमुक्तत्वात्, अविद्या तिष्ठति—इति चेत् ! तर्हि एकस्याऽपि अमुक्तिः स्यात् ; अविद्यायाः अविनष्टत्वात्।

[अविद्याबहुत्वपक्षानुवादतो दूषणम्]

प्रतिजीवम् अविद्याभेदः कल्प्यते। तत्र यस्याऽविद्या [5]विनष्टा[5], स मोक्ष्यते ; यस्य तु अविनष्टा, सः [6]भन्त्स्यते[6]—इति चेत् ! [7]तन्न[7] ; 'प्रतिजीवम्' इति, जीवभेदमाश्रित्य ब्रूषे। स जीवभेदः, किं स्वाभाविकः ? उत अविद्याकल्पितः ?

न तावत् स्वाभाविकः ; अनभ्युपगमात्। भेदसिद्ध्यर्थस्य [8]च[8] अविद्याकल्पनस्य व्यर्थत्वात्।

[अविद्यायाः ब्रह्म-जीवगतत्वविकल्पतो दूषणम्]

अथ अविद्याकल्पितः ! तत्र इयं जीवभेदकल्पिका अविद्या, किं ब्रह्मणः ? उत जीवानाम् ?

तन्नेति। अविद्याश्रयत्वे विशिष्टत्वम् ; विशिष्टाकार एव अविद्याश्रय इति, आत्माश्रयणमित्यर्थः।

किं चेत्यादि। अविद्या किम् एका ? उत बह्वी ? इति विकल्पमभिप्रेत्य, एकत्वपक्षे दूषणं, तत्र एकस्मिन् मुक्ते इति। (तथा) तत्राऽपि किम् अविद्या नश्यति ! उत न नश्यति ? इति विकल्पमभिप्रेत्य नाशपक्षे च दूषणम्।

अन्यस्येति, अविनाशपक्षं दूषयति।

प्रतिजीवमिति, अविद्या बहुत्वपक्षमनुवदति। भन्त्स्यते—बद्धो भविष्यति।

अनभ्युपगमात्—अद्वैतहानिप्रसङ्गात्॥

---

[1] णाविद्या द. [2] न—इ,त, थ. [3] ज्ञानस्यवादा-त. ज्ञानवादसभा—श. [4] मुच्येरन्—न. [5] नष्टा—त, न. [6] भत्स्यते—श. [7] न—न. [8] अस्य च—वा.

ब्रह्मणः—इति चेत् ! आगतोऽसि मदीयं मार्गम् ।
अथ जीवानाम् ! किम्-अस्याः जीवभेदकल्पनसिद्ध्यर्थतां विस्मरसि ? ॥

[जीवाश्रयाविद्यातः बद्ध-मुक्तादिव्यवस्थासिद्धिदूषणम्]

अथ-प्रतिजीवं बद्धमुक्तव्यवस्थासिद्ध्यर्थं याः अविद्याः कल्प्यन्ते ; ताभिरेव जीवभेदोऽपि—इति मनुषे ! ; जीवभेदसिद्धौ, ताः सिद्ध्यन्ति ; तासु सिद्धासु जीवभेद-सिद्धिरिति, इतरेतराश्रयत्वम् ।

नचाऽत्र बीजाङ्कुरन्यायः सिध्यति ; बीजाङ्कुरेषु हि ! अन्यदन्यद्बीजम् अन्यस्याऽन्यस्याङ्कुरस्योत्पादकम् । इह तु याभिरविद्याभिः ये जीवाः कल्प्यन्ते ; तानेवाऽऽश्रित्य तासां सिद्धिरिति, [1]अशकनीयता[1] ।

[प्रवाहानादित्वतः दोषनिवारणशङ्का-तन्निरासौ]

अथ—बीजाङ्कुरन्यायेन पूर्वपूर्वजीवाश्रयाभिरविद्याभिः, उत्तरोत्तरजीवकल्पनां मन्यसे ; तथा सति, जीवानां भङ्गुरत्वम् , अकृताभ्यागम-कृत[2]विप्रणाशादि[2]प्रसङ्गश्च ।

अत एव—ब्रह्मणः पूर्वपूर्वजीव(भावा)श्रयाभिरविद्याभिः, [3]उत्तरोत्तरजीवभाव[3]कल्पनम्-इत्यपि निरस्तम् ॥ अविद्याप्रवाहे अभ्युपगम्यमाने, त(त्त)त्कल्पित[4]जीवभाव[4]स्याऽपि

[मदीयं मार्गम्—ब्राह्माज्ञानवादम् ।]

किमस्याः....विस्मरसीति । जीवभेदकल्पकाविद्या, जीवकल्पनात् प्रागेव, न जीवा-नाश्रयितुं क्षमा ; जीवासिद्धेः, इत्यर्थः ॥

न चेति । बीजाङ्कुरेषु उत्पादकबीजस्य उत्पाद्याङ्कुरापेक्षा नास्ति । उत्पादकाङ्कुरमन्यत् ; उत्पाद्यं चान्यत् । अत्र तु जीवभेदकल्पकाविद्यायाः, कल्पनीयजीवाश्रयापेक्षाऽस्ति । कल्पकाविद्याश्रयो जीवः ; स एव कल्प्यश्चेति वैषम्यम् ॥ **अशकनीयता**—साधयितुमशक्यता ।

'कृतविप्रणाशादि' इति । 'आदि' शब्देन, जीवस्वरूपनित्यत्वादिश्रुतिविरोधो विवक्षितः' एवं जीवाख्यधर्मिणः प्रवाहानादित्वकल्पने, दूषणमुक्तम् । **अत एवेति,** जीवत्वधर्म तत्कल्पका-विद्ययोः प्रवाहानादित्वेपि, उक्तं दूषणमतिदिशति। **पूर्वपूर्व....जीवभावकल्पनम्**—तत्तदाश्रयाविद्यया

---

[1] शाङ्कनीयता — क्ष. [2] प्रहाणादि—वा. [3] उत्तरोत्तरजीव—द. तत्तत्कल्पितजीव-भाव — ङ. [4] जीव — त, द, न.

तद्वत् प्रवाहानादिता स्यात्; न ध्रुवरूपता। [1]आमोक्षाच्च[1] जीवस्य ध्रुवत्वम् इष्टं न सिध्येत्॥

[दुर्घटत्वतः सर्वदोषाप्रसक्तिशङ्का—तन्निरासौ]

यच्चोक्तम्—अविद्यायाः अवस्तु[2]रूपत्वेन[2] अनुपपन्नतैक[3]वेषायाः[3], न इतरेतराश्रयत्वादयो वस्तुदोषाः अनवक्लृप्तिमावहन्ति—इति। तथा सति, मुक्तान् [4]परं च ब्रह्म[4] आश्रयेद् विद्या।

शुद्धविद्यास्वरूपत्वात्, अशुद्धिरूपा न तत्र[5]प्रसजति[5]—इति चेत्! किम् उपपत्त्यनु[6]वर्तिनी[6] अविद्या? एवं तर्हि, उक्ताभि[7]रूपपत्तिभिः[7], जीवानपि नाऽऽश्रयेत्॥

[मोक्षानुपपत्त्या दूषणम्]

किं च—जीवाश्रयाया अविद्यायाः, तत्त्वज्ञानोदयात् नाशे सति, जीवो नश्येद्वा? न वा?

यदि नश्येत्; स्वरूपोच्छित्तिलक्षणो मोक्षः स्यात्। नो चेत्; अविद्यानाशेऽपि अनिर्मोक्षः; ब्रह्मस्वरूपव्यतिरिक्तजीवत्वावस्थानात्॥

[व्यवस्थोपपत्त्यै निदर्शितानां दृष्टान्तानामालोचनतो दूषणम्]

यच्चोक्तम्—मणि-कृपाण-दर्पणादिषूपलभ्यमानमुखमलिनत्वविमलत्वादिवत्, शुद्ध्यशुद्ध्यादिव्यवस्थोपपत्तिः—इति।

तत्रेदं विमर्शनीयम्—अल्पत्व-मलिनत्वादयः [8]औपाधिकाः दोषाः[8], कदा नश्येयुः?—इति। कृपाणाद्युपाध्यपगमे—इति चेत्!; किं तदा अल्पत्वाद्याश्रयः प्रतिबिम्बं तिष्ठति वा? न वा?। [9]तिष्ठतीति[9] चेत्!;

तदुत्तरोत्तरजीवभावकल्पनमित्यर्थः। **आमोक्षाच्चेति,** धर्म-धर्मिकल्पनपक्षयोरुभयोरपि तुल्यं दूषणम्। **जीवस्य**—जीवभावविशिष्टस्य॥

शुद्धविद्यास्वरूपत्वात्—शुद्धज्ञप्तिरूपत्वात्। **उपपत्तिभिः**—अन्योन्याश्रयादिभिः॥

नो चेत्....मोक्ष इति। अविद्याकार्यस्य जीवत्वस्य अवस्थानात् अनिर्मोक्ष इत्यर्थः। [एवं] दार्ष्टान्तिकपर्यालोचनया दूषणमुक्तम्।

---

1 आमोक्षं च—न. 2 स्वरूपत्वेन—आ. 3 वेषायां—त, द, न. 4 ब्रह्म च—द. 5 प्रसज्जति—थ. 6 वर्तिन्यपि ते—आ. 7 रनुपपत्तिभिः—त, द, न. 8 औपाधिकदोषाः—द 9 तिष्ठति—च, ङ.

तत्स्थानीयस्य जीवस्याऽपि स्थितत्वात्, अनिर्मोक्षप्रसङ्गः। [1]नश्यति[1] चेत्!; तद्वदेव जीवनाशात्, स्वरूपोच्छित्तिलक्षणो मोक्षः स्यात्।

[दोषोच्छेदार्थं दोषप्रतिभासस्यावश्यकतया, दृष्टान्तानुपपत्तिः]

किंच—यस्य हि अपुरुषार्थरूपदोषप्रतिभासः, तस्य तदुच्छेदः पुरुषार्थः। तत्र किम् औपाधिकदोषप्रतिभासः, बिम्बस्थानीयस्य ब्रह्मणः? उत प्रतिबिम्बस्थानीयस्य [2]जीवस्य[2]? उत अन्यस्य कस्यचित्?

आद्ययोः कल्पयोः, दृष्टान्तोऽयं न सङ्गच्छते; मुखस्य मुखप्रतिबिम्बस्य च, अल्पत्वादिदोषप्रतिभासशून्यत्वात्। न हि! मुखं तत्प्रतिबिम्बं वा चेतयते।

ब्रह्मणो दोषप्रतिभासे, [3]ब्रह्माविद्या[3]प्रसङ्गश्च॥
तृतीयोऽपि कल्पो न कल्पते; जीव-ब्रह्मव्यति[4]रिक्तस्य[4]द्रष्टुः अभावात्।

[अविद्याकार्यस्य भ्रमस्य आश्रयचिन्ता]

किं च—अविद्याकल्प्यस्य जीवस्य कल्पकः कः?—इति [5]निरूपणीयम्[5]।

न तावत् अविद्या; अचेतनत्वात्। नाऽपि जीवः; आत्माश्रयदोषप्रसङ्गात्। शुक्तिकारजतादिवत् अविद्याकल्प्यत्वाच्च जीवभावस्य।

किञ्च यस्येति। अपुरुषार्थप्रतिभासस्य निरसनीयत्वात्, तन्निरासाय हि वेदान्तारम्भः। बिम्ब-प्रतिबिम्बस्थानीययोः जीव-ब्रह्मणोः दोषप्रतिभासायोगात्, तन्निरासार्थो वेदान्तः अनारभ्यः [स्यात्] इति दूषणम्॥ **उताऽन्यस्येति**, दृष्टान्ते मुख-तत्प्रतिबिम्ब-तद्व्यतिरिक्त चेतनसद्भावात्, तदभिप्रायेण। **न हीति**। रूपवदचेतनविशेषस्यैव प्रतिबिम्बं दृष्टम्। तस्मात् ब्रह्म-जीवयोः बिम्ब-प्रतिबिम्बभावाभ्युपगमे तयोः अचेतनत्वमापततीति भावः॥

किञ्चेति। पूर्वमविद्याश्रयानुपपत्तिरुक्ता। इदानीं अविद्याकार्यभ्रमाश्रयो निरूप्यते। **कः कल्पकः?**—को भ्रमाश्रयः? **आत्माश्रयेति**। कल्पकत्वात् सिद्धिः; कल्प्यत्वात् असिद्धिश्चेति, स्वसिद्धेः स्वापेक्षा। जीवविषयभ्रमाश्रये सिद्धे हि! जीवक्लृप्तिः। जीवसिद्धेः स्वविषयभ्रमाश्रयभूतेन स्वेनैव सापेक्षत्वात् इत्यर्थः। **कल्प्यत्वादिति**। कल्प्यत्वाच्च भ्रमाश्रयत्वमनुपपन्नम्। न हि! दोषकल्प्यं रजतं, अर्थान्तरविषयभ्रमाश्रयः, इत्यर्थः॥

---

[1] नश्यतीति—श्रा. [2] ब्रह्मणो जीवस्य—द. [3] ब्रह्मणोऽविद्याश्रयत्व—वा. [4] रिक्त—द.
[5]विवेचनीयम्—श्रा.

ब्रह्मैव कल्पकम्—इति चेत्! ; [1]ब्रह्मा[1]ज्ञानमेवाऽऽयातम् ।

[2]किंच[2]-ब्रह्माज्ञानानभ्युपगमे, किं ब्रह्म जीवान् पश्यति वा? न वा?

न पश्यति [3]चेत्[3]! 'ईक्षापूर्विका विचित्रसृष्टिः नाम-रूपव्याकरणम्' इत्यादि न स्यात् ।

अथ पश्यति! अखण्डैकरसं ब्रह्म, न अविद्यामन्तरेण जीवान् पश्यतीति, ब्रह्माज्ञानप्रसङ्गः ॥

मायाऽविद्ययोः विभागवादस्य निरासः]

अत एव, मायाऽविद्या[4]विभाग[4]वादोऽपि निरस्तः। अज्ञानमन्तरेण हि! मायिनोऽपि ब्रह्मणः, जीवदर्शित्वं न स्यात्। न च-मायावी परानदृष्ट्वा, मोहयितुमलम्। नाऽपि माया, मायाविनो दर्शनसाधनम् ;! दृष्टेषु परेषु, तन्मोहन[5]साधनमात्र[5]त्वात् तस्याः ।

अथ— ब्रह्मणो माया तस्य जीव[6]दर्शित्वं[6] कुर्वती, जीव[7]मोहनस्य[7] हेतुः—इति मन्यसे! ; तर्हि परिशुद्धस्य अखण्डैक[8]रसस्वप्रकाश[8]स्य ब्रह्मणः, परदर्शनं कुर्वती माया, मायापरपर्याया अविद्यैव स्यात् ।

[विपरीतदर्शन-मिथ्यात्वदर्शनहेतुत्वाभ्यां तद्विभागशङ्का-परिहारौ]

अथ मतम्—विपरितदर्शनहेतुः अविद्या ; माया तु मिथ्याभूतं ब्रह्मव्यतिरिक्तं [9]मिथ्यात्वेनैव[9] दर्शयन्ती, न ब्रह्मणो विपरीतदर्शनहेतुः। अतः तस्याः न अविद्यात्वम्-इति।

अविद्यामन्तरेणेति । अपरमार्थजीवप्रतीतिः, अविद्यया बिना न संभवतीत्यर्थः ।

अत एव । ईक्षापूर्वकसृष्ट्याद्यर्थं ब्रह्मणः अपरमार्थजीवदर्शनार्थं च अविद्यान्वयाभ्युपगमादेव । 'माया परभ्रमहेतुः ; अविद्या स्वभ्रमहेतुः' इति तन्मतम् । 'मायिनं तु महेश्वरम्' इति श्रुतिः, एतद्विभागहेतुः । ब्रह्मणो मायेति । अस्यास्तु मायाया अयं विशेष इति । तर्हीति । नामनि विवाद आवयोरित्यर्थः ।

---

[1] ब्रह्म—द. [2] किं—आ. [3] इति चेत्—आ, थ. [4] प्रविभाग—न. [5] मात्र—इ. [6] दर्शनत्वं—द. [7] मोहस्य—द. [8] रसस्य स्वप्रकाश—इ, रसप्रकाश—थ. [9] मिथ्यात्वेन—च.

नैवम्; चन्द्रैकत्वे ज्ञायमाने, द्विचन्द्रदर्शनहेतोरपि अविद्यात्वात्। यदि च ब्रह्म, मिथ्यात्वेनैव स्वव्यतिरिक्तं जानाति; न तर्हि तन्मोहयति। न हि! अनुन्मत्तः, मिथ्यात्वेन ज्ञातान् [1]मोहयितुमीहते[1] ॥

[विधान्तरेण मायाऽविद्ययोर्वैषम्यं, तन्निरासश्च]

अथ—अपुरुषा[2]र्थापरमार्थ[2]दर्शनहेतुः अविद्या। माया तु ब्रह्मणः न अपुरुषार्थ-[3]दर्शनहेतुः[3]। अतः अस्या न अविद्यात्वम्—इति मतम्!

तन्न; द्विचन्द्रज्ञानस्य दुःखहेतुत्वाभावेन अपुरुषार्थत्वा[4]भावेऽपि[4], तद्धेतुः अविद्यैव। तन्निरसने च [5]प्रयस्यन्ति[5]। यदि च न अपुरुषार्थदर्शनकरी माया; तर्हि! अनुच्छेद्यतया नित्या ब्रह्म[6]स्वरूपा[6]नुबन्धिनी स्यात्।

अस्तु; को दोषः?—इति चेत्!; द्वैतदर्शनमेव दोषः।

'यत्र हि द्वैतमिव भवति.........।

यत्रत्वस्य सर्वमात्मैवाऽभूत्; तत् केन कं पश्येत्' (बृ. उ. 6–5–15)

इत्याद्यद्वैतश्रुतयः प्रकुप्येयुः।

परमार्थविषयाः अद्वैतश्रुतयः; मायायास्तु अपरमार्थत्वात् अविरोधः—इति चेत्?

अपरिच्छिन्नानन्दैकस्वरूपस्य ब्रह्मणः, अपरमार्थभूतमायादर्शनं तद्वत्ता [7]च[7], अविद्यामन्तरेण नोपपद्यते ॥

[मायया ब्रह्मणः प्रयोजनाभावः]

किं च-अपरमार्थभूतया नित्यया मायया, किं प्रयोजनं ब्रह्मणः?

चन्द्रैकत्व इति। न केवलं सत्यत्वेन दर्शनहेतुरेव दोषः; अपरमार्थप्रतिभासमात्र-हेतुर्दोषः इत्यभिप्रायः।

अथेति, अपुरुषार्थदर्शनहेतुत्व-तदभावरूपवैषम्यशङ्का।

अपरिच्छिन्नेति। स्वरूपस्यैव अपरिच्छिन्नानन्दत्वात्, इच्छया मायादर्शनमनुपपन्नम्। तस्याश्च अपरमार्थत्वात्, अविद्याकृतमेव तद्दर्शनमित्यर्थः। तद्वत्ता—तत्सम्बन्धः।

नित्यया माययेति, निरसनीयत्वाभावाभिप्रायेण।

---

[1] मोहयते—त, थ. [2] र्थाविद्या—द. [3] हेतुः—त, थ. [4] भावे—त, थ.
[5] प्रयास्यन्ति—द प्रयत्स्यन्ति—थ. [6] रूपा—थ. [7] वा—थ.

जीवमोहनम्—इति चेत्! अपुरुषार्थेन मोहनेन किं प्रयोजनम्! क्रीडेति—चेत्! अपरिच्छिन्नानन्दस्य किं क्रीडया? परिपूर्णभोगानामेव क्रीडा, पुरुषार्थत्वेन लोके दृष्टा—इति चेत्!

नैवमिहोपपद्यते ; न हि! अपरमार्थभूतैः क्रीडोपकरणैः अपरमार्थतया भासमानैः निष्पन्नया अपरमार्थभूतया क्रीडया, अपरमार्थभूतेन च तत्प्रतिभासेन, अनुन्मत्तानां क्रीडारसो निष्पद्यते ।

[आश्रयविभागानुपपत्त्या मायाऽविद्ययोर्विभागाभावः,]

[ब्रह्मण एवाविद्याश्रयता च]

मायाश्रयतयाऽभिमतब्रह्मव्यतिरेकेण अविद्याश्रयस्य जीवस्य कल्पनाऽसम्भवश्च, पूर्ववदेव द्रष्टव्यः। अतः ब्रह्मैव अनाद्यविद्याशबलं, स्वगतनानात्वं पश्यतीति, अद्वितीयत्वं ब्रह्मणोऽभ्युपयद्भिः, [1]अभ्युपेत्यम्[1] ॥

[व्यवस्थानुपपत्तेः अभ्युपगमपूर्वकं परिहारः]

यत्तु— बन्धमोक्षव्यवस्था नोपपद्यते—इति ; न तत् [2]ब्रह्माज्ञान[2]वादिनश्चोद्यम्। एकस्यैव ब्रह्मणः अज्ञस्य, स्वाज्ञाननिवृत्त्या मो(क्ष)क्ष्यमाणत्वात्, बद्ध-मुक्तादिव्यवस्थाया एव अभावात्। व्यवह्रियमाणायाश्च बद्ध-मुक्त-[3]शिष्याचार्यादि[3]व्यवस्थायाः, काल्पनिकत्वात्, स्वप्नदर्शिन इव च, एकस्यैव अविद्यया सर्वकल्पनोपपत्तेः। स्वप्नदशा हि! एकेन दृष्टा शिष्याचार्यादयः तदविद्याकल्पिता एव ।

अत एव-बह्वविद्याकल्पनमपि, न युक्तिमत्। पारमार्थिकी बन्धमोक्षव्यवस्था

पूर्ववदेवेति । अन्योन्याश्रयादिभिर्दूषणैरित्यर्थः ।

यत्त्विति । नेदं चोद्यमनिष्टमित्यर्थः । **काल्पनिकत्वादिति** । स्वाप्नव्यवस्थाः यथा काल्पनिकत्वात् एकाविद्यया उपपद्यन्ते ; तथा सर्वासां व्यवस्थानां काल्पनिकत्वात्, एकाविद्ययैव तत्कल्पनोपपत्तिः इत्यर्थः । **सर्वकल्पनोपपत्तेरिति** । अन्यथाऽनुपपन्नं हि कल्पकम्। अन्यथोपपन्नत्वात्, न अविद्याभेदक्लृप्तिः न्याय्या इत्यर्थः ।

अत एवेति । आश्रयैकत्वेऽपि सर्वव्यवस्थोपपत्तिः येन हेतुना सिद्धा, तेनैव काल्पनिकत्वेन हेतुना अविद्याबहुत्वकल्पनमपि न युक्तमित्यर्थः । **पारमार्थिकीत्यादि** । परमार्थकार्याणां हि! बहुहेत्वपेक्षा । अपरमार्थानां तु एकेनैवाऽलम् इत्यभिप्रायः ।

---

[1] अभ्युपेतव्यम्—न. [2] ब्रह्मज्ञान—द. [3] शिष्याचार्य—त, थ.

स्वपरव्यवस्था च, जीवाज्ञानवादिनाऽपि नाऽभ्युपेयते। अपारमार्थिकी तु, एकस्यैव अविद्यया [1]उप[1]पद्यते ॥

[उक्तार्थस्य अनुमानप्रयोगतो दृढीकरणम्]

[2]प्रयोगश्च[2]—१) बन्ध-मोक्षव्यवस्थाः स्व-परव्यवस्थाश्च, स्वाविद्याकल्पिताः ; अपारमार्थिकत्वात् ; स्वप्नदृष्टव्यवस्थावत्—इति। २) शरीरान्तराण्यपि, मयैवाऽऽत्मवन्ति ; शरीरत्वात् ; एतच्छरीरवत्। ३) शरीरान्तराण्यपि, मदविद्याकल्पितानि ; शरीरत्वात्, कार्यत्वात्, जडत्वात्, कल्पितत्वाद्वा ; एतच्छरीरवत्। ४) विवादाध्यासितं चेतनजातम्, अहमेव ; चेतनत्वात्, यत् अनहम् तत् अचेतनं दृष्टम् ; यथा घटः, अतः स्व-परविभागः बद्धमुक्त-शिष्याचार्यादिव्यवस्थाश्च एकस्याऽविद्याकल्पिताः ॥

[काणादपक्षेऽपि बद्ध-मुक्तव्यवस्थादौर्घट्यम्]

द्वैतवादिनाऽपि, बद्ध-मुक्तव्यवस्था दुरुपपादा ; अतीतानां कल्पानामानन्त्यात्, एकैकस्मिन् कल्पे एकैकमुक्तावपि सर्वेषां मोक्षसम्भवात्, अमुक्तानुपपत्तेः।

अनन्तत्वात् आत्मनाम्, अमुक्ताश्च सन्ति—इति चेत्! किमिदम् अनन्तत्वम्? असङ्ख्येयत्वम्—इति चेत्! न ; भूयस्त्वात् अल्पज्ञैः असङ्ख्येयत्वेऽपि, ईश्वरस्य सर्वज्ञस्य सङ्ख्येया एव। [3]तस्याऽप्य[3]शक्यत्वे, सर्वज्ञत्वं न स्यात्।

आत्मनां निःसंख्यत्वात्, ईश्वरस्य अविद्यमानसङ्ख्यावेदनाभावः, न असार्वज्ञ्यमावहति— इति[4]चेत्[4]! भिन्नत्वे, संख्याविधुरत्वं नोपपद्यते।

आत्मानः संख्यावन्तः ; भिन्नत्वात्, माष-सर्षप-[5]घटपटा॥दि[5]वत्। भिन्नत्वेचाऽऽत्मनाम्, घटादिवत् जडत्वम्, अनात्मत्वं, क्षयित्वं च प्रसज्यते ; ब्रह्मणश्च

प्रयोगश्चेति। जीवाज्ञानवादिनं प्रति प्रथम-तृतीये अनुमाने। तं च भेदवादिनं च प्रति द्वितीयहेतुः प्रयुज्यते। तृतीयः प्रत्येक निरपेक्षहेतुचतुष्टयगर्भः। तुरीयं व्यतिरेक्यनुमानम्।

असङ्ख्येयत्वमिति, 'अनन्त' शब्देन देश-कालाद्यपरिच्छेदस्य विवक्षितत्वव्यावृत्त्यर्थमुक्तम्।

माषेति। संख्यावत्तारतम्येऽपि संख्यावत्त्वमविशिष्टमिति भावः। **भिन्नत्वे चेति**। अत्र व्यतिरेकित्रयं विवक्षितम्—आत्मा न भिन्नः ; आत्मत्वात्। यत् भिन्नं ; न तदात्मा।

---

[1] सर्वकल्पना उप—अ. [2] प्रयोगाश्च—वा. [3] तस्याऽ—द. [4] चेत्! न—वा.
[5] पट-घटादि—द.

अनन्तत्वं न स्यात्। अनन्तत्वं नाम—परिच्छेदरहितत्वम्। भेदवादे च, वस्त्वन्तराद्विलक्षणत्वेन ब्रह्मणः, वस्तुतः परिच्छेदरहितत्वं न शक्यते वक्तुम्। [1]वस्त्वन्तर[1]भाव एव हि! वस्तुतः परिच्छेदः। वस्तुतः परिच्छिन्नस्य, देशतः कालतश्च अपरिच्छिन्न[2]त्वं च न[2] युज्यते। वस्त्वन्तराद्विलक्ष[3]णत्वेन[3] वस्तुतः परिच्छिन्ना [4]एव[4] घटादयः, देशतः कालतश्च परिच्छिन्ना हि! दृष्टाः। तथा सर्वे[5]चेतनाः[5] ब्रह्म च, वस्तुतः परिच्छिन्नाः; देश कालाभ्यामपि परिच्छिद्यन्ते। एवं च,

'सत्यं ज्ञानमनन्तम्' (तै. उ. आन. 1-1)

इत्यादिभिः सर्वप्रकारपरिच्छेदरहितत्वं वदद्भिर्विरोधः। उत्पत्ति-विनाशादयश्च, जीवानां ब्रह्मणश्च प्रसज्येरन्। कालपरिच्छेद [6]एव हि![6] उत्पत्ति-विनाशभागित्वम्॥

[एकस्याऽविद्यया सर्वव्यवस्थोपपत्तेः, ब्रह्माज्ञानपक्षस्य च उपसंहारः]

अतः, [7]एकस्यैव[7] अपरिच्छिन्नस्य ब्रह्मणः, अविद्याविजृम्भितं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत्। सुख-दुःखप्रतिसन्धानव्यवस्थादयोऽपि, स्वाप्नव्यवस्थावत् अविद्यास्वाभाव्यात् उपपद्यन्ते। तस्मात्, एकमेव नित्यमुक्तस्वप्रकाशस्वभावम्, अनाद्यविद्यावशात् जगदाकारेण विवर्तत इति, परमार्थतो ब्रह्मव्यतिरिक्ताभावात्, तदनन्यत्वं [8]जगतः[8]—इति॥

[वैशेषिकैः कृतः ब्रह्माज्ञानवादिनिरासः]

अत्रोच्यते—'निर्विशेष[9]स्वप्रकाश[9]मात्रं ब्रह्म, अनाद्यविद्यातिरोहितस्वस्वरूपं,

---

यथा घटादिः आत्मा न भिन्नः; अजडत्वात्, यत् भिन्नं; न तत् अजडम्। यथा घटादिः। आत्मा न भिन्नः; अक्षयित्वात्। यत् भिन्नं; न तदक्षयि, यथा घटादिः इति। **वस्त्वन्तरभाव इति**। वस्त्वन्तरवत्त्वं वस्तुतः परिच्छेद इत्यर्थः। **एवं चेति**। निरूपपदम् अनन्तपदम् असङ्कुचितवृत्ति त्रिविधपरिच्छेदराहित्यमाहेति भावः। एवम् अपरिच्छिन्नस्य परिच्छिन्नत्वप्रसङ्ग उक्तः। अथ अविकारस्य सविकारत्वप्रसङ्गमाह—**उत्पत्तीति**। अविकारत्वश्रुतिविरोधश्चेत्यर्थः।

विवर्तते—अध्यासाधिष्ठानं भवति; न तु परिणमतीत्यर्थः। **तदनन्यत्वमिति**। जगत्, ब्रह्मणः परमार्थभूतमन्यन्न इत्यर्थः।

---

[1] वस्त्वन्तरा—थ, द. [2] त्वं न—वा. [3] णत्वे—द. [4] एव हि—वा. [5] अचेतनाः—थ. [6] एव—च. [7] एकस्यापि—द. [8] जगति—त, थ. [9] प्रकाश—आ.

स्वगतनानात्वं पश्यति' इत्येतत्, 'प्रकाशस्वरूपस्य निरंशस्य प्रकाशनिवृत्तिरूपतिरोधाने, स्वरूपनाशप्रसङ्गेन, तिरोधानासम्भवा[1]दिभ्यः[1] सकलप्रमाणविरुद्धं [2]स्ववचनविरुद्धं च[2]'- इति, पूर्वमेवोक्तम् ।

[तत्र, कारणमात्रसत्यतानिरासः]

[3]यत् पुनरुक्तम्—कारण[3]व्यतिरिक्तं कार्यं, युक्तिबाधितत्वेन [4]शुक्तिका[4]रजतादिवत् भ्रमः—इति । तदयुक्तम्; युक्तेरभावात् ।

यत्तु—अनुवर्तमानस्य कारणमात्रस्य सत्यत्वम्; व्यावर्तमानानां घट-शरावादि-कार्याणाम् असत्यत्वम्—इति; तदपि, 'अन्यत्र दृष्टस्य अन्यत्र व्यावर्तमानता, न बाधिका' इत्यादिभिः पूर्वमेव परिहृतम् ।

[मिथ्यात्वानित्यत्वयोर्भेदः, कार्यसत्यत्वानुमानं च]

यच्च—उपलभ्यमानत्व-विनाशित्वाभ्यां सदसदनिर्वचनीयत्वेन, कार्यस्य मृषात्वम् —इति; तदसत्; उपलब्धि-विनाशयोगो हि! न मिथ्यात्वं साधयति; किन्तु अनित्यत्वम् । यद्देश-[5]काल[5]सम्बन्धितया यदुपलब्धम्; तद्देश-[6]काल[6]सम्बन्धितया बाधितत्वमेव हि! तस्य मिथ्यात्वे हेतुः । देशान्तर-कालान्तरसम्बन्धितया उपलब्धस्य अन्यदेशकालसम्बन्धित्वेन बाधितत्वं, देशान्तर-कालान्तराव्याप्तिमात्रं साधयति;

निरंशस्येति । तिरोधानेऽपि तद्रहितांशास्तिष्ठन्ति, इति न वक्तुं युक्तम्; निरंशत्वा-दित्यभिप्रायः । **स्वरूपनाशेति** । तिरोधानं नाम प्रकाशनिवृत्तिः । तत्र जडस्य प्रकाश-व्यतिरिक्तत्वात्, प्रकाशनिवृत्तावपि तस्य स्थितिः उपपद्यते । प्रकाशैकरूपस्य ब्रह्मणः, प्रकाश-निवृत्तिरूपतिरोधानं नाम स्वरूपनिवृत्तिरेवेत्यर्थः । **विरुद्धमिति** । नित्यत्वादिसाधकवचन-विरुद्धं निर्विशेषत्वम् । ज्ञप्तित्वविरुद्धम् असत्प्रत्ययगोचरत्वम् इत्यर्थः । **पूर्वमेवोक्तम्**— अस्मिन् प्रबन्धे सिद्धान्तिनोक्तमित्यर्थः । **इत्यादिभिरिति** । सोपाधिकत्व-कालात्ययापदिष्टत्व-वचनव्याहतिभिः पूर्वमेव परिहृतमित्यर्थः । **यद्देशेति** । यदि अनित्यत्वमेव मिथ्यात्वम्; तर्हि सिद्धसाधनं मिथ्यात्वानुमानम् । यदि अनित्यत्वविलक्षणं; तर्हि सोपाधिकत्वादि स्यात् ॥

---

[1] दित्यादिभ्यः—त, थ. [2] च—थ. [3] कारण—इ. [4] शुक्ति—आ. [5] कालादि—आ. [6] कालादि—आ.

न तु मिथ्यात्वम् ॥ प्रतिप्रयोगश्च —

घटादिकार्यं सत्यम् ; देश-कालादिप्रतिपन्नोपाधौ अबाधितत्वात् , आत्मवत् ॥

[कारणात् कार्योत्पत्तिः, कारणस्य सहकारिसमवधानं असम्भवीत्यंशस्य निरासः]

यच्चोक्तम् —कारणस्वरूपात् अविकृताद्विकृताच्च कार्योत्पत्तिर्न सम्भवति—इति ; तदसत् ; देश-कालादिसहकारिसमवहितात् कारणात् , कार्योत्पत्तिसम्भवात् ।

तत्समवधानं च विकृतस्य अविकृतस्य [1]च न[1] सम्भवति —इति, यदुक्तम् ; [2]तदयुक्तम्[2] ; पूर्वमविकृतस्यैव कालादिसमवधानसम्भवात् ॥

अविकृतत्वाविशेषात् , पूर्वमपि देशकालादिसमवधानं प्रसज्यते—इति चेत् ! न ; देश-कालादिसमवधानस्य कारणान्तरायत्तस्य एतदायत्तत्वाभावात् ।

[स्वमते तर्कानुगृहीतं प्रमाणम्]

अतः, देश-कालादिसमवधानरूपविशेषमापन्नं कारणं, कार्यमुत्पादयतीति न किञ्चि[3]दवहीनम्[3] । कारणस्य च कार्यं प्रति आरम्भकत्वम् अबाधितं दृश्यमानं, न केनाऽपि प्रकारेण अपह्नोतुं शक्यते ॥

प्रतिप्रयोगः—प्रत्यनुमानम् । देशकालादीति । देश-कालादिप्रतिपन्नोपाधौ बाधार्हत्वं मिथ्यात्वम् । तत्कार्यभूतः प्रतिपन्नोपाधौ बाधः, मिथ्यात्वसाधकः । यथा अग्नेर्दाहार्हस्य दाहकार्यं दाहार्हत्वे लिङ्गम् ; तद्वत् । अतः साध्याविशिष्टत्वचोद्यम् अपास्तम् । देश-कालभ्रमेष्वपि प्रतिपन्नोपाधौ बाधोऽस्ति । न हि ! देश-कालावेव सर्वत्रोपाधिः । तौ तु देश-कालव्यतिरिक्त विषयभ्रमेषु । देश-कालभ्रमेषु अन्ये उपाधयः । किं च देशभ्रमे काल उपाधिः स्यात् । कालभ्रमे देश उपाधिः स्यात् । न चाऽन्योन्याश्रयः ; भ्रमव्यक्तिभेदात् । तस्मात् प्रतिपन्नोपाधौ बाधस्य साध्यसमव्याप्तिरस्त्येव । इममर्थमभिप्रेत्य 'आदि' शब्दः ।

समवहितात्—समन्वितात् ।

कारणान्तरम्—कर्म, ईश्वरसङ्कल्पः इत्यादि । एतदायत्तत्वाभावात्—विकारायत्तत्वाभावात् ।

अतः....अपह्नोतुं शक्यत इति । पूर्वपक्षिणा कार्य-कारणभावमिथ्यात्वग्राहिप्रमाणानुग्राहकत्वेन हि ! तर्क उक्तः । तथा अत्राऽपि अनुग्राहकतर्कपूर्वकं प्रमाणमुक्तम् । एवं कार्य-कारणभावस्य प्रामाणिकत्वात् , तद्विरुद्धबाह्यतर्कानुदय एवेति ॥

---

[1] न—थ, द.　[2] तदप्ययुक्तम्—न. तदप्यसत्—श.　[3] दपहीनम्—त, थ.

[हेमादेः कारणस्य स्वातिरिक्तकार्यारम्भकता]

यत्तु—हेमादिमात्रस्य, रुचकादिकार्यस्य एतदाश्रयस्य वा हेमादेः आरम्भकत्वं न संभवति—इति ; तदयुक्तम् ; हेमादिमात्रस्यैव यथोक्तपरिकरयुक्तस्य, आरम्भक[1]त्व-संभवात्[1] । न च—आरम्भक[2]हेम[2]व्यतिरिक्तं कार्यं न दृश्यते—इति वक्तुं शक्यम् ; हेमातिरिक्तस्य स्वस्तिकस्य दर्शनात्, बुद्धि-शब्दान्तरादिभिः वस्त्वन्तरस्य साधितत्वाच्च ।

न च—अयं शुक्तिकारजतादिवत् भ्रमः ; उत्पत्ति-विनाशयोरन्तराले उपलभ्यमानस्य, तद्देशकालसम्बन्धितया बाधादर्शनात् । न च—अस्या उपलब्धेः बाधिका, काचिदपि युक्तिर्दृश्यते । प्रागनुप[3]लब्ध[3]स्वस्तिकोपलब्धिवेलायामपि हेमप्रत्यभिज्ञा, स्वस्तिकाश्रयतया हेम्नोऽप्यनुवृत्तेः अविरुद्धा ।

श्रुतिभिस्तु प्रपञ्चमिथ्यात्वसाधनं ; पूर्वमेव निरस्तम् । यच्चाऽन्यदत्र प्रत्यक्षाविरोधादि प्रतिवक्तव्यम् ; तदपि सर्वं, पूर्वमेव 'सूक्तम्[4]' ॥

[मृषावाद्युक्तानुमानगणदूषणम् ; तत्र एकात्मवाददूषणम्]

यच्चोक्तम्—एकेनाऽऽत्मना सर्वाणि शरीराणि आत्मवन्ति—इति ; तदसत् ; एकस्यैव सर्वशरीरप्रयुक्तसुख-दुःखप्रतिसन्धानप्रसङ्गात् । सौभरिप्रभृतिषु हि !

यत्त्विति । हेममात्रस्य, रुचकादिकार्यमात्रस्य कार्याश्रितद्रव्यमात्रस्य चाऽऽरम्भकत्वं न सम्भवतीत्युक्तम् !—इत्यर्थः । **यथोक्तपरिकरः**—देश-कालादिः ।

न चायमिति । [अनेन] पूर्वपक्षिणोक्तं अनिरूपितवस्त्ववलम्बनबुद्धिशब्दादीनाम् असाधकत्वं प्रतिक्षिपति । **उत्पत्ति....धादर्शनात् इति** । अनित्यत्वे साध्ये, सिद्धसाधनत्वम् । प्रतिपन्नोपाधौ बाधश्चे[त्येत]त्, तदनुपलम्भादेव निरस्तमिति भावः ।

निरस्तमिति । सिद्धान्तिनेत्यर्थः । **यच्चाऽन्यदिति** । 'प्रत्यक्षं सन्मात्रग्राहि ; विरोधे सत्यपि शास्त्रं बलीयः' इत्यादिकं त्वदुक्तं, पूर्वमेव अनेन ग्रन्थकारेण निरस्तमित्यर्थः ।

एकस्यैवेति, व्याप्तिविरोधमाह । यत् सम्प्रतिपन्नैकात्मकं शरीरम्, तत्र हि ! सुखादिप्रतिसन्धानं दृष्टमिति भावः । **सौभरीति** । प्रतिसन्धानाभावः शरीरभेदनिबन्धनः इत्यत्र

---

[1] स्वासम्भवात्—द. [2] हेतु—थ. [3] लब्धेः—द. [4] सुष्ठूक्तम्—च.

[1]आत्मैकत्वेन[1], अनेकशरीरप्रयुक्तसुखादिप्रतिसन्धानम् एकस्य दृश्यते ।

न च—अहमर्थस्य ज्ञातृत्वात्, तद्भेदात् प्रतिसन्धानाभावः ; न आत्मभेदात्—इति वक्तुं शक्यम् ; 'आत्मा ज्ञातैव ; स च अहमर्थ एव । अन्तःकरणभूतस्तु अहङ्कारः, जडत्वात् करणत्वाच्च शरीरेन्द्रियादिवत् न ज्ञाता' इत्युपपादितत्वात् ।

[सर्वशरीराणाम् एकस्याऽविद्याकल्पितत्वादिनिरासः]

यच्च—शरीरत्व-जडत्व-कार्यत्व-कल्पितत्वैः सर्वशरीराणाम् एकस्याऽविद्याकल्पितत्वमुक्तम् ; तदपि—सर्वशरीराणामविद्याकल्पितत्वस्यैवाऽभावात्—अयुक्तम् । तदभावश्च, अबाधि [2]तस्य सत्य[2]त्वोपपादनात् ।

यच्च—चेतनादन्यस्य जडत्वदर्शनात्, सर्वचेतनानाम् अनन्यत्वमुक्तम् ; तदपि—सुख-दुःखव्यवस्थया भेदोपपादनादेव—निरस्तम् ।

यत्तु—'मयैवाऽऽत्मवन्ति, मदविद्याकल्पितानि ; अहमेव सर्वं चेतनजातम्' इति अहमर्थस्य ऐक्यमुपपादितम् ; तत्, अज्ञातस्वसिद्धान्तस्य भ्रान्तिजल्पितम् । अहंत्वमाद्यर्थविलक्षणं चिन्मात्रं हि ! आत्मा त्वन्मते ।

[उत्तरम्] प्रभृतिशब्दस्य, विलक्षणज्ञानानां केषांचित् शरीरभेदेऽपि पूर्वजन्मसुखादिप्रत्यभिज्ञानादिति भावः । आत्मैकत्व इति । एकशरीरवर्त्यात्मनः एकत्वं साध्यते [चेत्] सिद्धसाधनत्वम् । अनेकशरीरवर्तिनः [चेत्] धर्मिग्राहकप्रमाणबाधः । परशरीरतच्चेष्टादिभिः आत्मा ह्यनुमीयते । तच्च अनुमानं स्वस्मादन्यत्वेनैव एनं दर्शयति । स्वात्मा हि ! 'अहम्' इति अपरोक्षमवभासते । न हि परशरीरगतः आत्मा अपरोक्षः इति ॥

आत्मेति । अन्तःकरणस्य ज्ञातृत्वमेव नास्ति ; तत्तु आत्मनः इत्यर्थः । ज्ञातृत्वेऽपि तस्य, पूर्वपूर्वकल्पेषु उत्पन्नविनष्टान्तःकरणानामपि सनकादीनां तत्प्रतिसन्धानसम्भवात्, न अन्तः भेदः प्रतिसन्धानाभावहेतुः ॥

तदपि....अयुक्तम् इति, दृष्टान्तस्य साध्यविकलत्वमुक्तं भवति । शरीराणामविद्याकल्पितत्वे सिद्धे हि !, एकस्याऽविद्याकल्पितत्वसिद्धिः । तदेव नाऽस्तीति, सपक्षभूतशरीरस्य अविद्याकल्पितत्वाभावात् । तदपि....निरस्तम् इति, कालात्ययापदिष्टत्वं दूषणमुक्तं भवति ॥

यत्त्विति । बद्धमुक्तादिव्यवस्थानाम् एकाविद्याकल्पितत्वं यदुक्तम् ; तत्राऽपि अपारमार्थिकत्वहेतोरसिद्धिः, सोपाधिकत्वं चाऽनुसन्धेयम् ।

---

[1] आत्मैकत्वे—थ, द. [2] तसत्य—द.

[जगन्मिथ्यात्ववादिनां मोक्षार्थयत्नवैयर्थ्यम्]

किं च—'निर्विशेषचिन्मात्रातिरेकि सर्वं मिथ्या' इति वदतः, मोक्षार्थश्रवणादिप्रयत्नो निष्फलः ; अविद्याकार्यत्वात् , शुक्तिकारजतादिषु रजताद्युपादानादिप्रयत्नवत् । १) मोक्षार्थ[1]प्रयत्नः[1] व्यर्थः ; कल्पिताचार्यायत्तज्ञानकार्यत्वात् , शुक-प्रह्लाद-वामदेवादि प्रयत्नवत् । २) तत्त्वमस्यादिवाक्य[2]जन्य[2]ज्ञानं न बन्धनिवर्तकम् ; अविद्याकल्पितवाक्यजन्यत्वात् , स्वयमविद्यात्मकत्वात् , अविद्याकल्पितज्ञात्राश्रयत्वात् , कल्पिताचार्यायत्तश्रवण[3]जन्यत्वाद्वा[3] ; स्वाप्नबन्ध[4]निवर्तन[4]वाक्यजन्यज्ञानवत् ।

[ब्रह्मणः स्वरूपपरवाक्यप्रतिपाद्यतापक्षे अनिष्टप्रसञ्जनम्]

किंच—निर्विशेषचिन्मात्रं ब्रह्म मिथ्या ; अविद्याकार्यज्ञानगम्यत्वात् अविद्याकल्पितज्ञा[5]त्राश्रय[5]ज्ञानगम्यत्वात् , [6]अविद्यात्मक[6]ज्ञानगम्यत्वाद्वा। यदेवं तत् तथा; यथा स्वाप्नगन्धर्वनगरादिः । न च निर्विशेषचिन्मात्रं ब्रह्म स्वयं प्रकाशते ; येन न प्रमाणान्तरमपेक्षते । यत्तु, आत्मसाक्षिकं स्वप्रकाशज्ञानं दृश्यते ; तत्तु ज्ञेयविशेषसिद्धिरूपं, ज्ञातृगतमेव दृश्यते—इति पूर्वमेवोक्तम् ।

यानि च तस्य निर्विशेषत्व[7]साधकानि[7] यौक्तिकानि ज्ञानान्युपन्यस्तानि ; तानि च अनन्तरोक्तैः 'अविद्याकार्यत्वात्' इत्यादिभिः अनुमानैः निरस्तानि ॥

[चिन्मात्रस्य ब्रह्मणः साक्षित्व-स्वयंप्रकाशत्वाद्यपोहः]

न च—निर्विशेषस्य चिन्मात्रस्य, अज्ञानसाक्षित्वम् अहङ्कारादिजगद्भ्रमश्च उपपद्यते ।

अविद्याकार्यत्वात् इत्यादिहेतुगणैः अनिष्टप्रसङ्गमाह । **तत्त्वमस्यादीति** । अविद्यामूलत्वाश्रयणे तत्त्वमस्यादिवाक्यजन्यज्ञानस्य अनिवर्तकत्वप्रसङ्गः इत्यर्थः ॥

किंचेति । 'वेदान्तैः ब्रह्म न प्रतिपाद्यते ; अपि तु भेदनिषेध एव क्रियते' इति, [ब्रह्म वेदान्तेषु] 'स्वरूपपरवाक्यैः प्रतिपाद्यते' इति च द्विधा मृषावादिनां प्रक्रिया। तत्र [ब्रह्मणः] स्वरूपपरवाक्यप्रतिपाद्यत्वपक्षे अनिष्टं प्रसञ्जयति [अनेन ग्रन्थेन] । **सिद्धिरूपम्**—व्यवहारानुरूपम् ।

अनुमानैः—तर्कैः । तर्कस्य 'अनुमान' शब्दवाच्यत्वं व्याप्तिसापेक्षत्वात् ।

उपपद्यत इति । 'स्वसम्बन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वात्' इति हेतोरित्यर्थः ।

---

[1] प्रयत्नोऽपि—न. [2] जन्यं—वा. [3] जन्यत्वात्—त, थ. [4] निवर्तक—इ, वा. [5] त्राश्रितम्—इ, वा. [6] अविद्याकल्पित—न. [7] साधनानि—इ.

साक्षित्वभ्रमादयोऽपि हि ! ज्ञातृविशेषगता दृष्टाः ; न ज्ञप्तिमात्रगताः । न च-तस्य [1]प्रकाशत्वं[1], स्वायत्तप्रकाशता वा सिध्यति । प्रकाशो[2]हि ![2] कस्यचित् पुरुषस्य कंचन अर्थविशेषं प्रति [3]सिद्धि[3]रूपो दृश्यते । [4]तत[4] एव हि ! तस्य स्वयंप्रकाशता उपपाद्यते भवद्भिरपि । न च [5]अतादृशस्य[5] निर्विशेषस्य [6]प्रकाशता[6] सम्भवति ॥

[अपरमार्थादपि परमार्थकार्योत्पत्तिशङ्का—तन्निरासौ]

यः पुनः—स्वगोष्ठीषु, 'अपरमार्थादपि परमार्थकार्यं दृश्यते' इत्युद्घोषः ; सोऽपि, 'तानि कार्याणि सर्वाणि, अबाधितकल्पानि व्यावहारिकसत्यानि, वस्तुतस्तु अविद्यात्मकान्येव' इति । स्वाभ्युपगमादेव निरस्तः । अस्माभिरपि—सर्वत्र परमार्थादेव कारणात् सर्वकार्योत्पत्तिम् उपपादयद्भिः, पूर्वमेव—निरस्तः ।

न च—त्वया एषामनु[7]मानानां[7] श्रुतिविरोधो वक्तुं शक्यते ; [8]श्रुतेरपि अविद्याकार्यत्वेन[8] अविद्यात्मकत्वेन च, उक्तदृष्टान्तेभ्यो विशेषाभावात् ॥

[शून्यवाददृष्टान्ततः ब्रह्मवादस्याऽपि अकिंचित्करता]

यत्तु—ब्रह्मणः अपारमार्थिकज्ञानगम्यत्वेऽपि, पश्चात्तनबाधादर्शनात् ब्रह्म सत्यमेव—इति ;

तदसत् ; दुष्टकारणजन्यज्ञानगम्यत्वे निश्चिते सति, पश्चात्तनबाधादर्शनस्य अकिञ्चित्करत्वात् । यथा 'शून्यमेव तत्वम्' इति वाक्यजन्यज्ञानस्य पश्चात्तनबाधादर्शनेऽपि दोषमूलत्वनिश्चयादेव तदर्थस्य असत्यत्वम् । किं च—

अतादृशस्य—निर्विशेषत्वात् कर्म-कर्तृरहितस्येत्यर्थः । **तादृशस्य** इति पाठे, कर्म-कर्तृसहितो यः प्रकाशते, तस्य निर्विशेषत्वे अभिमते सा न सिध्यतीत्यर्थः ।

यः पुनरिति । अपरमार्थहेतोः शुक्तिरजताद्युपादानादिवत् निष्फलत्वं पूर्वमुक्तम् ; तन्न [युक्तम्] अपरमार्थादपि परमार्थोत्पत्तेः—इति [शङ्कार्थः] विशेषाभावादिति । प्रबलविरोधे हि! दौर्बल्यमिति भावः ।

किं चेति । प्रत्यक्षादिप्रमाणं, वेदेऽपि सविशेषपरवाक्यजातं च विहाय, निषेधपरवाक्य प्राबल्यं हि ! त्वदुक्तम् । तत्र विधिरूपत्वात् पूर्वेषां दौर्बल्यम् ; निषेधरूपत्वाच्च पश्चात्तनस्य प्राबल्यम् । तच्च सर्वशून्यवादिन एवेत्यर्थः ।

---

[1] प्रकाशकत्वं—इ. [2] ह्विनाम—इ. [3] प्रकाश—द. [4] अत—त, थ. [5] तादृशस्य—त थ. [6] स्वप्रकाशता—वा. [7] भूयमानानां—न. [8] श्रुतेरपि—ज.

'नेह नानाऽस्ति किञ्चन' (बृ. उ. 6-4-19)

'विज्ञानमानन्दं ब्रह्म' (बृ. उ. 5-9-28)

इति, विज्ञानमात्रातिरिक्तस्य कृत्स्नस्य वस्तुजातस्य निषेधकत्वेन [1]सर्वस्मात्परत्वात्[1], पश्चात्तनबाधादर्शनमुच्यते। 'शून्यमेव तत्त्वम्' इति तस्याऽप्यभावं वदतः, तस्मात्परत्वेन पश्चात्तनबाधो दृश्यते। सर्वशून्यत्वातिरेकिनिषेधासम्भवात्, तस्यैव पश्चात्तनबाधादर्शनम्। दोषमूलत्वं तु, प्रत्यक्षादीनां वेदान्तजन्मनः सर्वशून्यज्ञानस्याऽपि, अविशिष्टम्॥

[ज्ञातृ-ज्ञान-ज्ञेयपारमार्थ्यस्यैव व्यवहारव्यवस्थाहेतुता]

'अतः—सर्वं विज्ञानजातं पारमार्थिकज्ञातृगतम्, स्वयं च परमार्थभूतम् अर्थविशेषसिद्धिरूपम्। तत्र किंचित् ज्ञानं दोषमूलम्; दोषश्च परमार्थः। किंचिच्च [2]निर्दोषं[2], [3]पारमार्थिक[3]सामग्रीजन्यम्—इति, यावत् न अभ्युपेयते; न तावत् सत्य-मिथ्यार्थव्यवस्था, लोकव्यवहारश्च—सेत्स्यति।

लोकव्यवहा[4]रो हि[4]! [5]पारमार्थिको[5] भ्रान्तिरूपश्च, पारमार्थिकज्ञातृगतार्थविशेषसिद्धिरूपप्रकाशपूर्वकः। निर्विशेषसन्मात्रस्य तु, पारमार्थिकस्य च प्रतिभासादेर्हेतुत्वासंभवात्, लोकव्यवहारो न सम्भवति॥

[अध्यासस्य अधिष्ठानपारमार्थ्यं विनाऽपि सिद्धिः]

यच्च तैः—निरधिष्ठानभ्रमासंभवात्, सर्वाध्यासाधिष्ठानस्य सन्मात्र[7]स्य[7] पारमार्थिकत्वम्—उक्तम्; तदपि-दोष-दोषाश्रयत्व-ज्ञातृत्व-ज्ञानानाम् अपारमार्थ्येऽपि भ्रमोपपत्तिवत्, अधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः—निरस्तम्।

अतः इत्यस्य न सेत्स्यति इत्यन्वयः। निर्विशेषेति। निर्विशेषज्ञानस्य ज्ञातृत्वाभावात्, प्रतिभासस्य आश्रयतया हेतुत्वं नास्ति। निर्विशेषत्वादेव कारणतया हेतुत्वमपि नास्तीत्यर्थः। पारमार्थिकापारमार्थिकशब्दौ परमार्थापरमार्थविषयत्वपरौ। प्रतिभासादेरिति आदिशब्दः व्यवहारपरः॥

---

[1] सर्वस्मात्—द. [2] निर्दोषमपि—इ. [3] पारमार्थिकं—द. [4] रोपि—त, थ.
[5] पारमार्थिकश्च—श्रा. [6] स्य च—द. [7] स्य तु—न.

अथ—[1]अधिष्ठानापारमार्थ्येऽपि[1] न क्वचित् भ्रमो दृष्ट इति, सन्मात्रस्य पारमार्थिकत्वम् अवश्याश्रयणीयम्—इति [2]मन्यसे[2] ! हन्त तर्हि, दोष-दोषाश्रयत्व-[3]ज्ञातृत्व-ज्ञानानाम्[3] अपारमार्थ्येऽपि, न क्वचिद्भ्रमो दृष्ट इति, दर्शनानुगुण्येन तेषामपि पारमार्थ्यम् अवश्याश्रयणीयमिति ; न [4]कश्चिद्विशेषः[4] ; अन्यत्र तत्संरम्भात् ॥

[भेदपक्षेऽपि व्यवस्थानुपपत्त्यादेः आपत्ति-परिहारौ]

यत्तु—भेद[5]पक्षेऽपि[5], अतीतकल्पानामानन्त्यात्, सर्वेषामात्मनां [6]मुक्तत्वेन बद्धासंभवात्[6], बद्धमुक्तव्यवस्था न संभवति—इति ; तत्, आत्मानन्त्येन परिहृतम् ।

यत्तु—आत्मनां भिन्नत्वे, माष-सर्षप-[7]घट-पटादि[7]वत् सङ्ख्यावत्त्वम् अवर्जनीयम्—इति, तत्र घटादीनामपि अनन्तत्वात्, दृष्टान्तः साध्यविकलः स्यात् ।

'दश घटाः' 'सहस्रं माषाः' इति संख्यावत्त्वं दृश्यते—इति चेत् ! सत्यम् ; तत्तु न घटादि[8]स्वरूपगतम्[8] । अपि तु, देश-कालाद्युपाधिमद्घटादिगतम् । तादृशं तु सङ्ख्यावत्त्वम्, आत्मनामभ्युपगच्छामः ।

न च—तावता सर्वमुक्तिप्रसङ्गः ; आत्मस्वरूपानन्त्यात् ।

न कश्चिद्विशेष इति । अधिष्ठानस्य अपारमार्थ्ये, तस्याऽपि अधिष्ठानान्तरापेक्षया अनवस्था—इति चेत् ! दोषस्य अपारमार्थ्येऽपि अनवस्था स्यात् । तत्र स्वरूपानादित्वेन, प्रवाहानादित्वेन, दुर्घटत्वेन[वा] परिहारश्चेत् ! सः [अत्राऽपि] तुल्यः, इत्यभिप्रायः ।

आत्मानन्त्येनेति । यथा माष-सर्षपादिषु एकैकजातीया एवाऽनन्ताः, समुदिताश्चानन्ताः ; तथा, बद्धाश्चाऽनन्ताः ; मुक्ताश्चाऽनन्ताः ; समुदिताश्च सर्वे चेतना अनन्ताः । सर्वेषामात्मनां प्रत्येकमेकत्वसंख्या अस्त्येव । अतः न संख्यावत्त्वमात्रं निषिध्यते । द्वित्वसंख्याया अवधिरेव निषिध्यते इत्यर्थः । **दृष्टान्त इति** । अतीतकल्पानामानन्त्यात्, एकस्मिन् कल्पे एकघटसद्भावेऽपि घटानामानन्त्यं सिद्धमिति साध्यविकलता दृष्टान्तस्य । **अभ्युपगच्छाम इति** । प्रमाणं च शास्त्रम् । तच्च तान् [आत्मनः] अनन्तत्वेन प्रतिपादयतीति, (सावधिक) सङ्ख्यावत्त्वहेतोः शास्त्रबाधात्, चेतनानन्त्यमभ्युपगन्तव्यमित्यर्थः । **देशकालादीति**, 'आदि' शब्देन कर्ता विवक्षितः ; 'एतत्कुलालनिर्मिता घटाः दश' इत्यपि वक्तुं शक्यत्वात् ।

आनन्त्यादिति । देशाद्युपाधिराहित्ये आत्मस्वरूपमात्रस्य असङ्ख्येयत्वादित्यर्थः ।

---

[1] अधिष्ठानापारमार्थ्ये—ङ, ग. [2] मन्यते—द. [3] ज्ञानानाम्—इ. [4] कश्चिद्विशेषः—त, थ. [5] पक्षे—इ. [6] मुक्तत्वेन—थ. [7] पट-घटादि—वा. [8] स्वरूपम्—इ.

[आत्मसु भिन्नत्वस्य जडत्वादिप्रसञ्जकत्व-तत्परिहारौ]

यत्तु—आत्मनां भिन्नत्वे, घटादिवत् जडत्वानात्मत्वक्षयित्वप्रसङ्गः—इति ; तदयुक्तम् ; एकजातीयानां भेदस्य, तज्जातीयानां जात्यन्त[1]रीयत्वानापादकत्वात्[1]। न हि ! [2]घटादीनां[2] भेदः, तेषां पटत्वमापादयति ॥

[ब्रह्मणि भिन्नत्वम् आनन्त्यविघटकमिति शङ्का, तत्परिहारश्च]

यत्तु—भिन्नत्वे, वस्तुतः परिच्छेदात्, देशकालाभ्यामपि परिच्छेदो ब्रह्मणः प्रसज्यत इति, अनन्तत्वं ब्रह्मणो न सिध्यति—इति ; तदयुक्तम् ; वस्तुतः परिच्छिन्नानामपि देशकालपरिच्छेदस्य न्यूनाधिकभावेन अनियमदर्शनात्, देशकालसम्बन्धेयत्तायाः प्रमाणान्तरायत्त[3]निर्णयत्वेन[3], ब्रह्मणः सर्वदेशकालसम्बन्धस्याऽपि प्रमाणान्तरादापततः, विरोधाभावात् ।

[आनन्त्यश्रुतिसङ्कोचशङ्का-परिहारौ]

वस्तुतः परिच्छेदमात्रादपि, सर्वप्रकारपरिच्छेदरहितत्वाभावात्, आनन्त्यासिद्धिः

नहीति । 'घटो न भिन्नः ; घटत्वात्, यद्भिन्नं न तद्घटः ; यथा पटः' इत्युक्ते, यथा कालात्ययापदिष्टत्वम् ; तथा त्वदुक्तव्यतिरेकिणामपि कालात्ययापदिष्टत्वमित्यर्थः ॥

परिच्छेदादिति । 'इदम् इदं न भवति' इति सामानाधिकरण्यानर्हत्वं वस्तुतः परिच्छेद इति मृषावाद्यभिमतमिति ज्ञापितम् । सिद्धान्त्यभिमतः प्रकारान्तरेण वस्तुपरिच्छेदस्तु, मृषावाद्यनभिमतः ; तद्विपरीतरूपस्य अपरिच्छेदस्य, निर्विशेषत्वविरोधात् । अतः मृषावादिना स्वाभिमतवस्तुपरिच्छेदस्य देश-कालपरिच्छेदप्रयोजकत्वाभिमानेन तौ प्रसञ्जितौ । तदयुक्तमिति । प्रयोज्याकारतारतम्यं, प्रयोजकाकारतारतम्यनिबन्धनं दृष्टम् । यथा पतनतारतम्यं गुरुत्वतारतम्यनिबन्धनम् । अतः वस्तुपरिच्छेदस्य देश-कालपरिच्छेदप्रयोजकत्वे सति, न्यूनाधिकभाववत्त्वप्रसङ्गः । न च स तथा दृश्यते । तस्मात् तत्प्रयोजकत्वं तस्य अनुपपन्नम् । अतः वस्तुतः परिच्छिन्नस्याऽपि ब्रह्मणः, देशकालपरिच्छेदाभाव उपपन्नः इत्यर्थः । प्रमाणान्तरेति । वस्तुपरिच्छेदः अप्रयोजक इति भावः ।

वस्तुतः परिच्छेदमात्रादपि इति, आनन्त्यश्रुतेः सङ्कोचं शङ्कते ।

---

[1] रीयत्वानापादनात्—ध, न. रीयानापादकत्वात्—थ, द. त्वानापादनात्—आ, इ. त्वानापादकत्वात्—च. [2] घटानां—च. [3] निर्णयत्वेन—ना.

—इति चेत्! ; तत् भवतोऽपि अविद्याविलक्षणत्वं ब्रह्मणोऽभ्युपयतः, समानम्। अतः, सतः अविद्याविलक्षणत्वाभ्युपगमात्, ब्रह्मणोऽपि भिन्नत्वेन, भेदप्रयुक्ता दोषाः सर्वे तत्राऽपि प्रसज्येरन्।

यदि—अविद्याविलक्षणत्वं नाऽभ्युपेयते! तर्हि, अविद्यात्म[1]कमेव ब्रह्म[1]स्यात्।

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ. आन. 1–1)

इति लक्षणवाक्यमपि, तत एव अपार्थकं स्यात्॥

[सामान्यतो भेदतत्त्वाभ्युपगमस्य अवर्जनीयता।]

भेदतत्त्वानभ्युपगमे हि! स्वपक्ष-परपक्षसाधन-दूषणादिविवेकाभावात्, सर्वम् असमञ्जसं स्यात्। आनन्त्यप्रसिद्धिश्च, देश-कालपरिच्छेदरहितत्वमात्रेण, [2]न वस्तुतोऽपि[2] परिच्छेदरहित[3]त्वेन[3] ; तथाविधस्य शशविषाणाय[4]मानस्य[4] अनुपलब्धेः।

भेदवादिनस्तु, सर्वचिदचिद्वस्तुशरीरत्वेन ब्रह्मणः सर्वप्रकारत्वात्, स्वतः परतोऽपि परिच्छेदो न विद्यते॥

यदीत्यादिना प्रसङ्गदार्ढ्याय प्रसञ्जकस्य विपर्यये अनिष्टमाह। **सत्यं ज्ञानमिति**। 'परमार्थादन्यत्वं वस्तुपरिच्छेदः' इत्युक्तम्; तच्च बाध्यत्वम्। बाधफलं च कदाचिन्निवृत्तिरिति, तस्य कालपरिच्छेदान्तर्भावात्। अतः विलक्षणत्वमात्रं वस्तुपरिच्छेद इति, अविद्याविलक्षणब्रह्मणः वस्तुपरिच्छेदप्रसङ्गो दुर्वारः॥

भेदतत्त्वेति। स्वपक्षो निर्दूषणः प्रबलः; परपक्षः सदूषणो दुर्बलः, इति भेदाङ्गीकारः। भेदः अपरमार्थ इति चेत्! परपक्ष एव प्रबलः स्यात्। स एवाऽभ्युपगतः स्यादित्यर्थः।

भेदवादिनस्त्विति। साक्षात्सिद्धान्तिपक्षे वस्त्वपरिच्छेदः उपपन्नः इत्यर्थः। **ब्रह्मणः सर्वप्रकारत्वादिति**। 'इदम् इदं न भवति' इति हि! वस्तुपरिच्छेदः। 'इदम् इदं भवति' इति निर्देशयोग्यत्वं—सर्ववस्तुसामानाधिकरण्यार्हत्वं वस्त्वपरिच्छेदः इत्यर्थः। अनेकविशेषणानाम् एकविशेष्यपर्यन्ताभिधानं हि! सामानाधिकरण्यकृत्यम्। तच्च वस्तुनस्तथाविधत्वात्॥ यद्वा ब्रह्मणोऽपि वस्त्वपरिच्छेदो नाम स्वभावतोऽपरिच्छेदः, गुणानन्त्यमिति फलितम्। **स्वतः** इति घटादिव्यावृत्तिः। घटादयो हि! स्वतः परिच्छिन्नाः। **परतः** इति। धर्मभूतज्ञानव्यावृत्तिः। तद्धि पराधीनसङ्कोचम्। एवं देश-कालपरिच्छेदाभाव उक्तः॥

---

[1] कत्वमेव ब्रह्मणः—न. कमेव—थ. [2] वस्तुतोऽपि—वा. [3] त्वे—आ, इ, वा.
[4] मानस्याऽपि—थ.

[वैशेषिकमतोपसंहारतः सिद्धान्तसूत्रावतारणम्]

तदेवं कारणाद्भिन्नस्य कार्यस्य सत्यत्वात्, ब्रह्मकार्यं कृत्स्नं जगत् ब्रह्मणोऽन्यदेव—इति प्राप्ते, प्रचक्ष्महे—तदनन्यत्वमारम्भणशब्दादिभ्यः— ॥

[सूत्रार्थविवरणम्]

तस्मात्—परमकारणात् ब्रह्मणः, अनन्यत्वं जगतः आरम्भणशब्दादिभ्यः, तत् उपपादयद्भ्यः अवगम्यते। 'आरम्भण' शब्दः आदिः येषां वाक्यानां, तानि आरम्भणशब्दादीनि—

'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. उ. 6-1-4)
'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्' (छां. उ. 6-2-1)
'तदैक्षत बहुस्यां प्रजायेयेति, तत्तेजोऽसृजत' (छां. उ. 6-2-3)
'अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य' (छां. उ. 6-3-3)
'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः (छां. उ. 6-8-6)
....ऐतदात्म्यमिदं सर्वं, तत् सत्यं, स आत्मा तत् त्वमसि श्वेतकेतो'
(छां. उ. 6-8-7)

इत्येतानि। प्रकरणान्तरस्थान्यपि एवंजातीयकानि, अत्राऽभिप्रेतानि ॥

[एषां वाक्यानां, जगतो ब्रह्मानन्यत्वबोधकत्वोपपादनम्]

एतानि हि! वाक्यानि, चिदचिदात्मकस्य जगतः, परस्माद् ब्रह्मणोऽनन्यत्वमुपपादयन्ति ॥ तथाहि!

'स्तब्धोऽसि! उत तमादेशमप्राक्ष्यः? येनाश्रुतं श्रुतं भवति ;
अमतं मतमविज्ञातं विज्ञातम्' (छां. उ. 6-1-3)

आरम्भणेत्यादि। पूर्ववाक्ये एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्। तत्र दृष्टान्तश्चोक्तः। उक्तदृष्टान्तेऽपि वैशेषिकमतेन कारणात् कार्यस्याऽन्यत्वात्, एकविज्ञानेन सर्वविज्ञानानुपपत्तिमाशङ्क्य, तदुपपादयति; 'वाचारम्भण'मित्यादिवाक्यम्। अतः इदं सूत्रेणोपात्तमित्यर्थः। **वाचा** इति **आरम्भणम्** इत्यपि पदान्तरम्; नतु वाचारम्भणमित्येकं पदम्, इति दर्शयितुं, **'आरम्भणशब्दादिभ्यः'** इत्युक्तम्; न तु, 'वाचादिभ्यः' इति। **येषां वाक्यानां तानि** इति, समासस्य षष्ठीतत्पुरुषत्वव्यावृत्त्यर्थम्।

शब्दादिभ्यः इति, आदिशब्दोपात्तानि वाक्यानि, **सदेवेत्यादीनि**।

इति, कृत्स्नस्य जगतः ब्रह्मैककारणत्वम्, कारणात् कार्यस्य अनन्यत्वं च हृदि निधाय, कारणभूतब्रह्मविज्ञानेन कार्यभूतस्य सर्वस्य विज्ञाने प्रतिज्ञाते सति, कृत्स्नस्य ब्रह्मैक-कारणताम् अजानता शिष्येण,

'कथं नु भगवः स आदेशः ?' (छां. उ. 6–1–3)

इति, अन्यज्ञानेन अन्य[1]ज्ञातताऽ[1]सम्भवं चोदितः, जगतो ब्रह्मैककारणताम् उपदेक्ष्यन्, लौकिकप्रतीतिसिद्धं कारणात् कार्यस्य अनन्यत्वं तावत्,

'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्' (छां. उ. 6–1–4)

इति दर्शयति । यथा एकमृत्पिण्डारब्धानां घट-शरावादीनां, तस्मादनतिरिक्तद्रव्यतया तज्ज्ञानेन ज्ञातता; इत्यर्थः ।

[वाचारम्भणवाक्यस्य, कार्ये कारणानन्यतायाः लोकसिद्धत्वोपपादनपरता]

अत्र काणादवादेन कारणात् कार्यस्य द्रव्यान्तरत्वमाशङ्क्य, लोकप्रतीत्यैव कारणात्—कार्यस्य, [2]अनन्यता[2]मुपपादयति ;

'वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. उ. 6–1–4)

इति । 'आरभ्यते—आलभ्यते स्पृश्यते' इति आरम्भणम्' ।

'कृत्यल्युटो बहुलम्' (पा. सू. 3–3–113)

कृत्स्नस्येत्यादिना, एकविज्ञानेन सर्वविज्ञानं प्रतिजानतोऽभिप्रायः [उच्यते] । एकमृत्पिण्डारब्धानामिति, [श्रुतिस्थं] 'मृन्मय'पदं व्याचष्टे । तस्मादन....तज्ज्ञानेनेति, वाक्याभिप्रेतार्थमाह । 'कस्मिन्नु....विज्ञातं भवति' 'आत्मनि खल्वरे....इदं सर्वं विदितम्' इत्यादिश्रुत्यन्तरानुगुण्यात्, दृष्टान्त-दार्ष्टान्तिकसामर्थ्याच्च, 'तज्ज्ञानेन' इति व्याख्यातम् । न हि मृत्पिण्डसत्तया घट-शरावादि ज्ञातं भवति । न हि ! परब्रह्मसद्भावात् सर्वं जगत् विज्ञातं च भवति ॥

आरभ्यत इति । 'आरम्भण'शब्दस्य उपादानार्थत्वमयुक्तम्; कार्यमिथ्यात्वपक्षे— प्रतीतिमात्रेण सतः कार्यस्य वागारब्धत्वाभावात्, वाचः पूर्वमपि प्रतीयमानत्वात्; परिणामपक्षे च—ब्रह्मकार्यस्य जगतः शब्दपरिणामत्वाभावाच्च । 'आलम्भः स्पर्श-हिंसयोः' इति निघण्टु-

---

[1] ज्ञाना—वा. [2] अनन्यत्व—द, न.

इति, कर्मणि ल्युट् । वाचा—वाक्पूर्वकेण व्यवहारेण हेतुना, इत्यर्थः । 'घटेन उदकमाहर' इत्यादिवाक्पूर्वको हि! उदकाहरणादिव्यवहारः। तस्य व्यवहारस्य सिद्धये, तेनैव मृद्द्रव्येण, पृथु [1]बुध्नोदर[1]त्वादिलक्षणो विकारः-संस्थानविशेषः, तत्प्रयुक्तं च 'घटः' इत्यादिनामधेयम्, स्पृश्यते—उदकाहरणादिव्यवहारविशेषसिद्ध्यर्थं मृद्द्रव्यमेव संस्थानान्तर—[2]नामधेयान्तर[2] भाग् भवति । अतः 'घटाद्यपि मृत्तिका' इत्येव [3]सत्यम्—मृत्तिकाद्रव्यमित्येव सत्यम्[3]—प्रमाणेनोपलभ्यते, इत्यर्थः; न तु द्रव्यान्तरत्वेन ।

अतः तस्यैव मृद्धिरण्यादेः द्रव्यस्य, संस्थानान्तरभाक्त्व'मात्रेण[4] बुद्धि-शब्दान्तरा[5]दयः[5] उपपद्यन्ते ; यथा एकस्यैव देवदत्तस्य, अवस्थाभेदैः 'बालः, युवा, स्थविरः' इति बुद्धि[6]शब्दान्तरा[6]दयः, कार्यविशेषाश्च दृश्यन्ते ॥

कार्यस्य कारणादनन्यत्वे उत्पत्ति-विनाशात्मक-भावाभावयोर्विरोधशङ्का-तत्परिहारौ]

यदुक्तम्—सत्यामेव मृदि, 'घटो नष्टः' इति व्यवहारात्, कारणादन्यत् कार्यम्—इति ; तत् उत्पत्ति-विनाशादीनां, कारणभूतस्यैव द्रव्यस्य अवस्था[7]विशेषत्वा[7]भ्युपगमादेव परिहृतम्। [8]तत्तदवस्थस्य तस्यैव[8] (एकस्यैव) द्रव्यस्य, ते ते शब्दाः तानि तानि च कार्याणीति युक्तम् ।

कारः । नामधेयस्य मृदारब्धत्वाभावात्, विकार-नामधेययोरुभयोरपि, 'आरम्भण' शब्द-वाच्यत्वसिद्धये स्पर्शार्थत्वेन व्याख्यातम् । 'सरिरस्य' इत्यत्र 'सरिर'शब्देन यथा सलिलमुच्यते तद्वत् र-लयोः अभेदो विवक्षितः इति भावः । **हेतुनेति** । हेतुत्वं च प्रयोजनतया ; न तु साधनतया इत्यर्थः । **अतः घटादीति** । 'आस्ते, शेते' इत्यादिषु अवस्थान्तरेणाऽपि बुद्धि-शब्दान्तरादयो दृश्यन्ते ; 'घटः, पटः' इत्यादिषु वस्त्वन्तरत्वेन बुद्धि-शब्दान्तरादयो दृश्यन्ते अत्र तु अवस्थान्तरनिबन्धनत्वे प्रत्यभिज्ञा प्रत्यक्षमेव निश्चायकमिति श्रुतिराह [इत्याशयः] । **प्रमाणेनोपलभ्यते इति,** सत्यशब्दं व्याचष्टे । **न तु इति** एवकारं व्याचष्टे । विकारासत्यत्वं विवक्षितं चेत्! इति करणवैयर्थ्यं स्यात् ।

यथा एकस्यैवेति । बाल-युवादिशब्दाः शरीरद्वारा शरीरिणमभिदधते । तस्य च नश्वरत्वाभावात्, चेतनपर्यन्तबुद्धि-शब्दान्तरादयः अवस्थानिबन्धना एवेति ॥

तत्तदवस्थस्येति, कार्यभेदं परिहरति । **अवस्था**—अनित्यधर्मः ।

---

[1] बुध्नोदराकार—न. [2] नामधेय—त, थ. [3] सत्यम्—थ. [4] मात्रेणैव—न.
[5] दय एव—न. [6] शब्दा—थ. [7] विशेषा—त, थ. [8] तत्तदवस्थस्यैव—थ.

द्रव्यस्य तत्तदवस्थत्वं, कारकव्यापारायत्तमिति, तस्य अर्थवत्त्वम्। अभिव्यक्त्यनुबन्धीनि चोद्यानि, तस्या अनभ्युपगमादेव परिहृतानि। उत्पत्त्यभ्युपगमेऽपि सत्कार्यवादो न विरुध्यते ; सत एव उत्पत्तेः।

[उत्पत्ति-सत्कार्यवादयोर्व्याघातशङ्का-तन्निरासौ]

विप्रतिषिद्धमिदमभिधीयते ! पूर्वमेव सत् ; तदुत्पद्यते चेति।

अज्ञातोत्पत्ति-[1]विनाशयाथात्म्यस्य[1], इदं चोद्यम्। द्रव्यस्य उत्तरोत्तरसंस्थानसंयोगः [2]पूर्वपूर्व[2]संस्थानसंस्थितस्य विनाशः ; स्वावस्थस्य तु, उत्पत्तिः। अतः सर्वावस्थस्य द्रव्यस्य सत्त्वात्, सत्कार्यवादो न विरुध्यते।

संस्थानस्य असतः उत्पत्तौ, असत्कार्यवादप्रसङ्गः—इति चेत् ! ; असत्कार्यवादिनोऽपि ; उत्पत्तेः अनुत्पत्तिमत्त्वे, सत्कार्यवादप्रसङ्गः। उत्पत्तिमत्त्वे च, अनवस्था।

[स्वमते सर्वसामरस्यस्पष्टीकरणम्]

अस्माकं तु अवस्थानां पृथक्प्रतिपत्ति[3]कार्ययोगा[3]नर्हत्वात्, अवस्थावत एव उत्पत्त्यादिकं सर्वमिति—निरवद्यम्। कपालत्व-चूर्णत्व-पिण्डत्वावस्थाप्रहाणेन घटत्वावस्थावत्, एकत्वावस्थाप्रहाणेन बहुत्वावस्था ; तत्प्रहाणेन एकत्वावस्था चेति, न कश्चिद्विरोधः॥

[अर्थवत्त्वम्—वैफल्याभावः।] उत्पत्तीति। अभिव्यक्तिः अनभ्युपेता चेत् ! उत्पत्तिः स्वीकृता स्यात्। तदानीम् असत्कार्यवादः स्यात् ! इत्यत्र [उत्तरमिदम्]। असत्कार्येति। यथा उत्पत्तेः उत्पत्तिचोद्यं, नित्यसमात्वात् जात्युक्तिर्हि ! भवति ; तथा अवस्थायाम् उत्पत्तिचोद्यमपि जात्युक्तिः ; 'अवस्थैव उत्पत्तिः' इत्यभ्युपगमात्, अवस्थायाः उत्पत्तिमत्त्वचोदनम्, उत्पत्तेः उत्पत्तिमत्त्वचोदनमेवेति॥

अस्माकंत्विति। पृथक्प्रतिपत्तिकार्यानर्हधर्माः, पृथगुत्पत्तिनिरपेक्षाः। अत एव हि ! उत्पत्तेः उत्पत्त्यादिनैरपेक्ष्यम्। अपृथक्सिद्धधर्मास्तु स्वयं धर्मिणः उत्पत्त्याद्यवस्थाभूताः। 'तु' शब्दः, स्वपक्षवैषम्यद्योतनार्थः। कपालत्वेत्यादिना संख्याभेदं परिहरति। सद्वारकत्वादविरोधः। कालभेदाच्च अविरोधः इत्यर्थः। एवं 'वाचारम्भणम्' इत्यादिवाक्यस्याऽर्थ उक्तः।

---

[1] याथात्म्यस्य—द. [2] पूर्व—द. [3] योगा—द.

['सदेवे'ति कारणवाक्यैः कारणात् कार्यस्य अनन्यत्वोपपादनम्]

तथा,

'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्' (छां. उ. 6-2-1)

इति। सदेवेदम्—इदानीं विभक्तनाम-रूपत्वेन नानारूपं जगत्, [1]अग्रे[1], नाम-रूपविभागाभावेन एकमेवाऽऽसीत्; सर्वशक्तित्वेन अधिष्ठात्रन्तरासहतया अद्वितीयं चेति, अनन्यत्वमेव उपपादितम्। तथा,

'तदैक्षत बहु स्यां प्रजायेय' (छां. उ. 6-2-3)

इति, वक्ष्यमाणतेजःप्रभृति[2]विविधविचित्र[2]स्थिरत्रसरूपजगत्त्वेन आत्मनो बहुभवनं सङ्कल्प्य जगत्सर्गाभिधानात्, कार्यभूतस्य जगतः, परमकारणात् परस्माद्ब्रह्मणोऽनन्यत्वम्। अवसीयते।

[सेयं देवतेत्यादिवाक्यस्य उक्तकारणवाक्यार्थोपपादकता]

सच्छब्दवाच्यस्य [3]परस्य ब्रह्मणः, सर्वज्ञस्य[3] सत्यसङ्कल्पस्य निरवद्यस्यैव, 'सदेवेदम्' इति निर्देशार्हजगत्त्वम्, सच्छब्दवाच्य[4]स्यैव[4] [5]जगतः[5] नाम-रूपविभागा-

---

तथा....अनन्यत्वमेवोपपादितम् इत्यन्वयः। 'सत्' शब्दः, प्रमाणसम्बन्धार्हतां वदति। 'सदेव' इत्यवधारणेन, कदाचिदसत्यत्वं व्यावर्तितम्। 'एकमेव' इति नाम-रूप विभागाभाव उक्तः। 'अद्वितीय' पदेन अधिष्ठात्रन्तरनिषेधः इत्यर्थः। विभक्त....जगत् इति, वाक्यस्थमिदंशब्दं व्याचष्टे। उपपादितमिति। एषां पदानाम्। उक्तार्थपरत्वम्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनार्थत्वादेव अवगम्यते। न हि! सजातीय-विजातीयादिव्यावृत्या, प्रतिज्ञोपपादनोपयोगः। तथेत्यादिना, एषां पदानामुक्तार्थैकपरत्वम्। तेजःप्रभृतीति। सङ्कल्पानन्तरंतेजः प्रभृतिसृष्टिप्रतिपादनात्, 'बहुस्याम्' इति 'बहु' शब्दः, तेजः प्रभृतिरूपेण बहुत्वपरः। अवसीयत इति। कारणभूतस्यैव ब्रह्मणः बहुभवनसङ्कल्पाभिधानात्, कार्य-कारणयोरनन्यत्वं लब्धमित्याशयः।

सच्छब्देत्यादिना, व्यष्टिसृष्टिसङ्कल्पवाक्यव्युदसनीयः शङ्काविशेषः [उच्यते]। सच्छब्दस्य ब्रह्मपरत्वे, 'इदं' शब्दवाच्यजगत्सामानाधिकरण्यमनुपपन्नम् इति शङ्काभिप्रायः। सच्छब्द-वाच्यस्यैवेति। सच्छब्दवाच्यस्य जगत्परत्वे, 'तदैक्षते' त्यादिभिः विरोधः इत्यभिप्रायेण। नामरूपेति; चेतनांशस्यैक्यानुपपत्तिमभिप्रेत्य।

---

[1] एकं—न. [2] विचित्र—द. [3] सर्वज्ञस्य—त.द. [4] स च—वा. [5] जगतश्च—थ.

भावेन एकत्वम्, अधिष्ठात्रन्त[1]रनिरपेक्षत्वम्[1], पुनरपि तस्यैव विचित्रस्थिरत्रसरूप-जगत्वेन बहुभवनसङ्कल्परूपेक्षणम्, यथासङ्कल्पं सर्गश्च कथमुपपद्यते ?—इत्याशङ्क्याह—

'सेयं देवतैक्षत ; हन्ताऽहमिमास्तिस्रो देवताः अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नाम-रूपे व्याकरवाणीति (छां. उ. 6-3-2)

'तासां त्रिवृतं त्रिवृतम्' (छां. उ. 6-3-3)

इत्यादि । 'तिस्रो देवताः । [2]इति,[2] कृत्स्नम् अचिद्वस्तु निर्दिश्य, स्वात्मकजीवानुप्रवेशेन एतत् विचित्रनाम-रूपभाक् करवाणि' इत्युक्तम् । 'अनेन जीवेनाऽऽत्मना—[3]मदात्मक[3]जीवेन, आत्मतया अनुप्रविश्य, एतत्, विचित्रनाम-रूपभाक् करवाणि' इत्यर्थः । स्वात्मनः [4]जीवस्य च[4] आत्मतया अनुप्रवेशकृतं नाम-रूपभाक्त्वम्—इत्युक्तं भवति ।

'तत् सृष्ट्वा । तदेवाऽनुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाऽभवत्'

(तै. उ. आन. 6-2)

इति श्रुत्यन्तरेण स्पष्टम्—'सजीवं जगत्, परेण ब्रह्मणा आत्मतया अनुप्रविष्टम्'—इति ।

[सतः एकस्यैव सतः, अनुप्रवेशानुपपत्ति शङ्का-तत्परिहारौ]

तदेतत्—कार्यावस्थस्य च कारणावस्थ[5]स्य च[5] चिदचिद्वस्तुनः, [6]सकलस्य स्थूलस्य[6] सूक्ष्म[7]स्य च[7] परब्रह्मशरीरत्वम्, परस्य च ब्रह्मणः आत्मत्वम्, अन्तर्यामि ब्राह्मणादिषु सिद्धं,—स्मारितम् । अनेन पूर्वोक्ताशङ्का निरस्ता ॥

[सदेवेति वाक्यस्य सर्वांशेन उपपन्नता ; ब्रह्मणि विकाराद्यसंसर्गश्च]

अचिद्वस्तुनि, [8]सजीवे[8] ब्रह्मणि आत्मतया अवस्थिते, नाम-रूप व्याकरण वचनात्, चिदचिद्वस्तुशरीरकं ब्रह्मैव जगच्छब्दवाच्यमिति, '[9]सदेवेदम्[9] अग्रे एक-मेवाऽऽसीत्' इत्यादि सर्वम्, उपपन्नतरम् । शरीरभूतचिदचिद्वस्तुगताः, सर्वे विकाराश्च

आत्मतया—नियन्तृतया । [अनेन] गगनादिव्यावृत्तिः । स्वात्मनः जीवस्य चेति । 'सिंहेन भूत्वा मयाऽऽत्ताः' इतिवत् 'जीवेनात्मने'त्यस्याऽर्थः इति भावः । [अतः] 'मदात्मक-जीवेने'त्युक्ते, 'मृदात्मको घटः' इतिवत् स्यादिति[न]शङ्का । आत्मतया अनुप्रविष्टमिति श्रुत्यन्तरेण स्पष्टमित्यन्वयः । पूर्वोक्ताशङ्का—'इदं' शब्दसामानाधिकरण्येन ब्रह्मणि जगद्गत-दोषाशङ्का । उपपन्नतरम्—मुख्यमेव इति भावः ॥

---

[1] रानपेक्षत्वम्—न.　[2] इत्यादि—द.　[3] स्वात्मक—थ.　[4] जीवस्य—त, थ.　[5] स्य—त, न.
[6] स्थूलस्य—च.　[7] स्य—थ. द.　[8] जीवे—द.　[9] सदेव सोम्येदम्—वा.

अपुरुषार्थाश्चेति, ब्रह्मणो निरवद्यत्वं, कल्याण[1]गुणाकरत्वं[1] च सुस्थितम् । तदेतत्—

'अधिकं तु भेदनिर्देशात्' (ब्र. सू. 2-1-22)

इति अनन्तरमेव वक्ष्यति । तथा—

'ऐतदात्म्यमिदं सर्वम्' (छां. उ. 6-8-7)

इति, कृत्स्नस्य चेतनाचेतनस्य ब्रह्मतादात्म्यमुपदिशति । तदेव च,

'तत्त्वमसि' (छां. उ. 6-8-7)

इति निगमयति ॥

[श्रुत्यन्तरगतवाक्यानामपि जगतो ब्रह्मानन्यत्वप्रतिपादकता]

तथा प्रकरणान्तरस्थेष्वपि वाक्येषु—

'सर्वं खल्विदं ब्रह्म' (छां. उ. 3-14-1)

'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्' (बृ. उ. 6-5-6)

'इदं सर्वं यदयमात्मा' (बृ. उ. 6-5-7)

'ब्रह्मैवेदं सर्वम्' (नृ. उ. ता. उ. 3-7-3)

'आत्मैवेदं सर्वम्' (छां. उ. 7-25-2)

इति अनन्यत्वं प्रतीयते । तथा, अन्यत्वं च निषिध्यते ;

'सर्वं तं परादाद् योऽन्यत्राऽऽत्मनः सर्वं वेद' (बृ. उ. 6-5-7)

'नेह नानाऽस्ति किंचन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. उ. 6-4-19)

इति । तथा,

'यत्र हि द्वैतमिव भवति, तदितर इतरं पश्यति ; यत्रत्वस्य सर्वमात्मैवाऽभूत्, तत् केन कं पश्येत् ?' (बृ. उ. 6-5-15)

इति अविदुषो द्वैतदर्शनं, विदुषश्च अद्वैतदर्शनं प्रतिपादयत्, अनन्यत्वमेव तात्त्विकमिति प्रतिपादयति । तदेवम्-आरम्भण शब्दादिभ्यः, जगतः परमकारणात् परस्माद् ब्रह्मणः अनन्यत्वम् [2]उपपाद्यते[2] ॥

तथेति । प्रकरणान्तरस्थवाक्यानामपि एतत्सूत्राभिप्रेतत्वात् [इति भावः] । यत्रत्विति । द्वैतदर्शनस्य अतात्त्विकत्वं, कदाचिन्निवृत्तिवचनेनाऽपि सिद्धमित्याशयः ।

---

[1] गुणात्मकत्वम्—त. थ. [2] उपपद्यते—न.

[कार्यकारणावस्थावत्त्वं ब्रह्मण एवेत्यंशस्य विशदीकरणम्]

अत्रेदं तत्त्वम्—चिदचिद्वस्तुशरीरतया [1]तत्प्रकारं ब्रह्मैव[1], सर्वदा सर्वशब्दाभिधेयम्। तत् कदाचित्, स्वस्मात् स्वशरीरतयाऽपि पृथग्व्यपदेशानर्हसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरम्; तत् कारणावस्थं ब्रह्म। कदाचिच्च विभक्तनाम-रूपव्यवहारार्ह-[2]स्थूलदशा[2]पन्नचिदचिद्वस्तुशरीरम्। तच्च कार्यावस्थमिति, कारणात् परस्माद्ब्रह्मणः कार्यरूपं जगत् [3]अनन्यत्[3]॥

[शरीरात्मभावशङ्कितदोषपरिहारः]

शरीरभूतचिदचिद्वस्तुनः, शरीरिणो ब्रह्मणश्च, कारणावस्थायां कार्यावस्थायां च, श्रुतिशतसिद्धया स्वभावव्यवस्थया गुणदोष[4]व्यवस्था च[4],

'न तु दृष्टान्तभावात्' (ब्र. सू. 2-1-9)

इत्यत्रोक्ता॥

[ब्रह्माज्ञानवाद्युक्तैतत्सूत्रार्थानौचित्यप्रकटनम्]

ये तु—कार्य-कारणयोरनन्यत्वं, कार्यस्य मिथ्यात्वाश्रयणेन वर्णयन्ति; न तेषां कार्य-कारणयोरनन्यत्वं सिध्यति; सत्य-मिथ्यार्थयोः ऐक्यानुपपत्तेः। तथा सति, ब्रह्मणो मिथ्यात्वं, जगतः सत्यत्वं वा स्यात्॥

[भास्करीयसंमते एतत्सूत्रार्थे वैघट्यम्]

ये च—कार्यमपि पारमार्थिकम् अभ्युपयन्त एव, जीव-ब्रह्मणोः औपाधिकमन्यत्वम्। स्वाभाविकं च अनन्यत्वम्, अचिद्ब्रह्मणोस्तु द्वयमपि स्वाभाविकम्—इति वदन्ति;

तेषाम् उपाधि ब्रह्म-व्यतिरिक्तवस्त्वन्तराभावात्, निरवयवस्य अखण्डितस्य ब्रह्मण एव उपाधिसम्बन्धात्, ब्रह्मस्वरूपस्यैव हेयाकारपरि[5]णामात्[5];

अत्रेदमिति। विशिष्टात् कारणात् विशिष्टं कार्यं जायत इति, शरीर-शरीरिभावादिरुपपद्यते इत्यर्थः। [अनेन] 'ब्रह्मणः, चिदचितोरुत्पत्ति-प्रलयश्रवणात्, कारणात् कार्यस्यानन्यत्वात्, कारणावस्थायां बहुत्वाभावात्, शरीर-शरीरिभावस्य अनुपपन्नत्वेन, स्वभावव्यवस्था न स्यात्' [इमि शङ्काया नाऽवकाशः]॥

येचेति। ब्रह्मणि दोषसम्बन्धज्ञापनाय निरवयवत्वादिविशेषणम्।

---

[1] ब्रह्मैव तत्प्रकारं—द. [2] दशा—द. [3] अन्यत्—द. [4] व्यवस्थया—थ. [5] णामाच्च—वा.

शक्तिपरिणामाभ्युपगमे—[1]शक्ति-ब्रह्मणोः अनन्यत्वाच्च[1], जीव-ब्रह्मणोः कर्मवश्यत्वापहतपाप्मत्वादिव्यवस्थावादिन्यः, अचिद्ब्रह्मणोश्च [2]परिणामापरिणाम[2]वादिन्यः श्रुतयः, व्याकुलीभवेयुः (व्याकुप्येयुः) ॥

[यादवप्रकाशीयसंमतानन्यत्वे दोषप्रकटनम्]

ये पुनः—निरस्तनिखिलभोक्तृत्वादि[3]विकल्प[3]विप्लवं, सर्वशक्तियुक्तं, सन्मात्रद्रव्यमेव, कारणं ब्रह्म । तच्च प्रलयवेलायां, शान्ताशेषसुख-दुःखानुभवविशेषं, स्वप्रकाशमपि [4]सुषुप्तात्मवत् अचिदविलक्षणम[4]वस्थितम् । सृष्टिवेलायां, मृत्तिकाद्रव्यमिव घटशरावादिरूपम्, समुद्र [5]इव च[5] फेन-तरङ्ग-बुद्बुदादिरूपः, [6]भोक्तृ-भोग्य[6]-नियन्तृरूपेण अंशत्रयावस्थम् अवतिष्ठते । अतः भोक्तृ-भोग्य-नियन्तृत्वानि, तत्प्रयुक्ताश्च गुणदोषाः, शरावत्व-घटत्व-मणिकत्ववत् तद्गतकार्यभेदवच्च व्यवतिष्ठन्ते । [7]भोक्तृ-भोग्य[7]-नियन्तॄणां [8]सदात्मना एकत्वं[8] च घट-शराव-मणिकादीनां मृदात्मना एकत्ववत् उपपद्यते । अतः [9]सन्मात्रद्रव्यमेव[9] सर्वावस्थावस्थितम्—इति ब्रह्मणोऽनन्यत् जगदातिष्ठन्ते ;

तेषां, सकलश्रुति-स्मृतीतिहास-पुराण-न्यायविरोधः । सर्वा हि ! श्रुतयः सस्मृतीतिहासपुराणाः, सर्वेश्वरेश्वरं सदैव सर्वज्ञं सर्वश(क्तिं)क्ति, सत्यसङ्कल्पं निरवद्यं देशकालानवच्छिन्नानवधिकातिशयानन्दं परमकारणं ब्रह्म प्रतिपादयन्ति ; न पुनः ईश्वरादपि परम्, [10]ईश्वरांशि[10] सन्मात्रम् । तथा हि ;

'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम् ; (छां. उ. 6-2-1)

....तदैक्षत बहु स्यां प्रजायेयेति' (छां. उ. 6-2-3)

शक्तिपरिणामेति । शक्तेः ब्रह्मानन्यत्वाभ्युपगमात्, तेनाऽपि व्याकुलमेवेत्यर्थः ।

विप्लवः—विकारः ।

सदैव सर्वज्ञमिति । अनेन कारणावस्थायामपि सर्वज्ञत्वादिकं विवक्षितम् । 'यः सर्वज्ञः सर्ववित्' इति हि श्रुतिः ।

---

[1] शक्तेः ब्रह्मणोऽनन्यत्वाच्च—द, न. [2] परिणाम—च. [3] समस्त—न. [4] सुप्तात्मवत् अचिद्विलक्षण—च, सुषुप्तावात्मवत् अचिद्विलक्षण—वा, सुषुप्तावात्मवत्—अविलक्षण—द. [5] इव—द. [6] भोक्तृत्व-भोग्यत्व—वा [7] भोग्य-भोक्तृ—थ. [8] सदात्मकत्वम्—वा. [9] सन्मात्रमेव द्रव्यम्—द. [10] ईश्वरांशे—द.

'ब्रह्म वा इदमग्र आसीदेकमेव ; तदेकं सन्न व्यभवत् ।
तच्छ्रेयोरूप[1]मत्यसृजत[1]क्षत्रम् ; यान्येतानि[2]देवत्रा[2]क्षत्राणि ।
इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति ॥ (बृ. उ. 3-4-11)
'आत्मा वा इदमेक एवाग्र आसीत् । नाऽन्यत् किंचन मिषत् ।
स ऐक्षत लोकान् नु सृजा इति ।' (ऐत.उ. 1-1)
'एको ह वै नारायण आसीत् ; न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि, नापो नाऽग्निर्न सोमो न सूर्यः । स एकाकी न र(मेत)मते ; तस्य ध्यानान्तःस्थस्य' (महो. 1-1)

इत्यादिभिः, 'परमकारणं, सर्वेश्वरेश्वरो नारायण एव' इत्यवगम्यते ।

[सामान्यशब्दानां विशेषपर्यवसानम्]

[नारायणस्यैव जगत्कारणता च]

सद्-ब्रह्म-ऽऽत्मशब्दा हि ! [3]तुल्य[3]प्रकरणस्थाः, तत्तुल्यप्रकरणस्थेन 'नारायण'-शब्देन विशेषिताः, तमेव अवगमयन्ति ।

'तमीश्वराणां परमं महेश्व[4]रम्[4] (श्वे. उ. 6-7)
'स कारणं करणाधिपाधिपो नचाऽस्य कश्चिज्जनिता न चाऽधिपः' (श्वे.उ. 6-9)

इति, ईश्वरस्यैव कारणत्वं श्रूयते । स्मृतिरपि मानवी—

'ततः स्वयम्भूर्भगवान्' (म.स्मृ. 1-6) इति प्रकृत्य,
'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जाऽऽदौ तासु[5]वीर्यमपा[5]सृजत् ॥' (म.स्मृ. 1-8)

इति ।

इतिहास-पुराणान्यपि, पुरुषोत्तममेव परमकारणमभिदधति
'नारायणो जगन्मूर्तिः अनन्तात्मा सनातनः । (म.भा.शां. 180-11)

सद्-ब्रह्मशब्दौ दृष्टान्तार्थौ । यथा सामान्य-विशेष शब्दावेतौ एकार्थतया स्वीकृतौ ; तद्वदिति भावः । ईश्वरस्यैवेति 'एव' कारेण 'न चाऽस्य कश्चित्' इत्युक्तनिषेधो विवक्षितः । ततः स्वयम्भूरिति । भगवच्छब्दः ईश्वरवाचीति भावः ॥

---

[1] मत्यसृजत्—द.　[2] देव—च.　[3] समान—द.　[4] रम् । तद्दैवतानां परमं च दैवतम्—इ.वा.　[5] वीर्यमवा—न.

स सिसृक्षुः सहस्रांशादसृजत् पुरुषान् द्विधा ॥' (म.भ.शां. 180-12)

'विष्णोः सकाशादुद्भूतं जगत् तत्रैव च स्थितम्' (वि. पु. 1-1-32)

इत्यादिषु ।

[ईश्वरस्य सन्मात्रताभ्युपगमे अनौचित्यम्]

नच—ईश्वरः सन्मात्रमेव – इति वक्तुं शक्यम् ; तस्य तदंशत्वाभ्युपगमात्, सविशेषत्वाच्च ।

न च—तस्य ज्ञानानन्दाद्यनन्तकल्याणगुणयोगः कादाचित्कः—इति वक्तुं शक्यते ; तेषां स्वाभाविकत्वेन सदातनत्वात् ;

'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे.उ. 6-8)

'यः सर्वज्ञः सर्ववित्' (मुण्ड. उ. 1-1-10)

इत्यादिभ्यः ।

'ज्ञानानन्दादिशक्तियोग एव अस्य स्वाभाविकः'—इति मा वोचः ; 'शक्तिः स्वाभाविकी, ज्ञानबलक्रिया च स्वाभाविकी' इति पृथङ्निर्देशात्, लक्षणाप्रसङ्गाच्च ।

नच—पाचकादिवत् 'सर्वज्ञः' इत्यादिषु शक्तिमात्रे कृत्प्रत्ययः—इति वक्तुं शक्यम् ; कृत्प्रत्ययमात्रस्य शक्तौ अस्मरणात् ।

'शक्तौ हस्ति-[1]कवाटयोः[1]' (पा.सू. 3-2-54)

इत्यादिषु, केषांचिदेव कृत्प्रत्ययानां शक्तिविषयत्वस्मरणात् । पाचकादिषु तु, अगत्या लक्षणा समाश्रीयते ।

[एकस्यैव अंशांशित्वयोर्विरोधः]

किंच—ईश्वरस्य [2]तदंश[2]विशेषत्वात्, तस्य च अंशित्वे, तरङ्गात् समुद्रस्येव [3]अंशात् अंशिनः[3] अधिकत्वात्,

---

सविशेषत्वाच्च—नियन्तृत्वरूपविशेषवत्त्वाच्च । सन्मात्रं हि । नियन्तृत्वादिविशेषरहितम् । शक्तिशब्दः अघटितघटनासामर्थ्यरूपे शक्तिविशेषे, ज्ञानादिकार्यकरत्वे च । लक्षणाप्रसङ्गाच्चेति । ज्ञानादिशब्दैः तत्तच्छक्तिः प्रतिपाद्या चेत् ! लक्षणा ; 'शक्ति' शब्दस्य सङ्कोचोऽप्यस्वरसः । असङ्कोचे पृथङ्निर्देशवैयर्थ्यमित्यर्थः !

इत्यादिषु इति आदिशब्देन 'शकि लिङ् च' (पा. सू. 3-3-172) इत्यादि विवक्षितम् । [अत्र . च' शब्दात् कृत्प्रत्ययान्तराणामपि शक्तौ विधानं सूचितम् ॥

---

[1] कपाठयोः—(का.पा.) [2] सदंश—द. [3] अंशिनः—श.

'तमीश्वराणां परमं महेश्वरम्' (श्वे.उ. 6-7)

'न तत्समश्चाऽभ्यधिकश्च दृश्यते' (श्वे.उ. 6-8)

इत्यादीनि, ईश्वरविषयाणि परःशतानि वचांसि बाध्येरन् ।

किं च—सन्मात्रस्य सर्वात्मकत्वे अंशित्वे च, ईश्वरस्य तदंशविशेषत्वात्, तस्य सर्वात्मकत्वांशित्वोपदेशाः व्याहन्येरन् । न हि ! मणिकात्मकत्वं तदंशत्वं वा घट-शरावादेः ॥

स्वांशेषु सर्वेषु सन्मात्रस्य पूर्णत्वेन, ईश्वरांशेऽपि तस्य पूर्णत्वात्, तदात्मकानि तदंशाश्च इतराणि वस्तूनि-[1]इति चेत्! न[1]; [2]घटेऽपि[2] सन्मात्रस्य पूर्णत्वात्, ईश्वरस्याऽपि घटात्मकत्व-तदंशत्वप्रसङ्गात् । नच-सन्मात्रस्य 'घटोऽस्ति' [3]इति[3], वस्तुधर्मतया अवगतस्य, द्रव्यत्वं कारणत्वं[4]वा[4] उपपद्यते । व्यवहारयोग्यता हि ! सत्वम् । विरोधि-व्यवहार[5]योग्यता,[5] तद्व्यवहारयोग्यस्य असत्वम् । 'द्रव्यमेव सत्' इत्यभ्युपगमे, क्रियादीनाम् असत्वप्रसङ्गः । क्रियादिषु काश-कुशावल[6]म्बनेनाऽपि,[6] सर्वत्रैकरूपा सत्ता दुरुपपादा । सदात्मना च सर्वस्याऽभिन्नत्वे, सर्वज्ञत्वेन सर्वस्वभावप्रतिसन्धानात्, सर्वगुण-दोषसङ्करप्रसङ्गश्च पूर्वमेवोक्तः ॥

अतः यथोक्तप्रकारमेव अनन्यत्वम् ॥ १५ ॥

[बुद्धि-शब्दान्तरादीनां अवस्थानिबन्धनत्वनैयत्याभावशङ्का—परिहारौ]

अथोच्येत — एकस्यैव अवस्थान्तरयोगेऽपि बुद्धि-शब्दान्तरादयः, बालत्व-युवत्वादिषु दृश्यन्ते । मृद्-दारु-हिरण्यादिषु, द्रव्यान्तरत्वेऽपि दृश्यन्ते । तत्र[7]मृद्-घटादिषु[7] कार्य-कारणेषु बुद्धि-शब्दान्तरादयः अवस्थानिबन्धना एवेति कुतो निर्णीयते ?—इति ; तत्रोत्तरम् ;

न च सन्मात्रस्येति, अनुवर्तमानं सन्मात्रं किं वस्तुधर्मः ? उत द्रव्यम् ? इति विकल्प्य, धर्मपक्षे दूषणम् । द्रव्यमेव ....प्रसङ्गः इति द्रव्यपक्षे दूषणम् । कुश-काशावलम्बनम्—कुशस्थाने काशस्य कुशत्वेनाऽवलम्बनम् । अमुख्यमित्यर्थः । क्रियादेःसत्वम—द्रव्यसम्बन्धः, इतिचेत् ! एकं प्रयोजकं न स्यात् इत्यर्थः ॥ १५ ॥

---

[1] चेत्—थ. [2] घटादिषु—थ. [3] घटोऽस्तीति—च. [4] च—वा. [5] योग्यता च—द.
[6] नेऽपि—श्रा. इ. च. [7] मृद्द्रव्यादिषु—इ.

१५४. भावे चोपलब्धेः ॥ २-१-१६ ॥

कुण्डलादिकार्यसद्भावे च कारण[1]भूत[1]हिरण्यस्योपलब्धेः, 'इदं कुण्डलं हिरण्यम्' इति हिरण्यत्वेन प्रत्यभिज्ञानादित्यर्थः। नचैवं हिरण्यादिषु द्रव्यान्तरेषु मृदादयः उपलभ्यन्ते। अतः[2]बाल[2]-युवादिवत् कारणभूतमेव द्रव्यम् अवस्थान्तरापन्नं, कार्यमिति [3]गीयते[3]। द्रव्यान्तरवादिनाऽपि अभ्युपेतेन अवस्थान्तरयोगेन, बुद्धि-शब्दान्तरादिषु उपपन्नेषु, अनुपलब्ध[4]द्रव्यान्तर[4]कल्पनानुपपत्तेश्च ॥

[प्रत्यभिज्ञा जात्यैक्यत एव ; न व्यक्त्यैक्यात् इति शङ्का-तत्परिहारौ]

न च जातिनिबन्धना, इयं प्रत्यभिज्ञा ; जात्याश्रयभूतद्रव्यान्तरानुपलब्धेः। [5]एकमेव[5] हेमजातीयं द्रव्यं, कार्य-कारणोभयावस्थं दृश्यते। न च-द्रव्यभेदे समवायिकारणानुवृत्त्या, कार्ये प्रतिसन्धानम्—इति वक्तुं शक्यम्; द्रव्यान्तरत्वे सति आश्रयानुवृत्तिमात्रेण [6]तदाश्रित[6]द्रव्यान्तरे प्रतिसन्धाना[7]नुपपत्तेः[7]।

प्रत्यभिज्ञानादिति। 'इदं कुण्डलं हिरण्यम्' इति सामानाधिकरण्येन प्रत्यभिज्ञानम् अत्राभिप्रेतम्। समवायिकारणानुवृत्तिं वदतः असत्कार्यवादिनोऽप्यभिमतायाः, वैयधिकरण्येन प्रत्यभिज्ञायाः स्वपक्षासाधकत्वात्।

अभ्युपेतेन—असमवायिकारणत्वेनाऽभ्युपेतेन। अनन्यथासिद्धं हि! कल्पकम्। बुद्धि-शब्दान्तरादीनामन्यथासिद्धत्वात् न कल्पकत्वमित्यर्थः।

जातीति। 'सोऽयं गौः' इतिवदित्यर्थः। **जात्याश्रयेति**। तत्र हि! व्यक्तिद्वयोपलब्धिरस्ति ; अत्र तु न तथा व्यक्त्यन्तरमुपलभ्यते इत्यर्थः **द्रव्यान्तरत्वे इति**। नहि! घटस्थे जले 'घटो जलम्' इति सामानाधिकरण्येन प्रत्यभिज्ञानं भवतीत्यर्थः।

[सूत्रार्थः ;–**भावेच**-घटादिकार्यत्वावस्थायामपि, **उपलब्धेः**— कारणभूतस्य मृद्द्रव्यादेः 'तदेवेदं मृद्द्रव्यम्' इति प्रत्यभिज्ञानरूपाद् दर्शनात्, **तदनन्यत्वम्**–कार्यस्य कारणादनन्यत्वम् ॥]

कुण्डलादिषु कार्येषु हिरण्याद्युपलब्धितः।
कार्यं कारणतोऽनन्यदिति वेदविदां मतम् ॥ (ब्र. प. 154)

---

[1] भूतस्य—न. [2] बालत्व—द. [3] निश्चीयते—श्रा. [4] द्रव्यत्वं तत्—थ. [5] एकमेव हि—वा. [6] तदाश्रिते—ति.थ. [7] नुपलब्धेः—इ.

गोमयादिकार्ये वृश्चिकादौ, गोमयादिप्रतिसन्धानं न दृश्यते— इति चेत् ! न ; तत्रापि [1]आद्य[1]कारणभूतपृथिवीद्रव्यप्रत्यभिज्ञानात् ॥ अग्निकार्ये धूमे, अग्निप्रत्यभिज्ञानं न दृश्यते—इति चेत् ! भवतु न तत्र प्रत्यभिज्ञानम् ; तथाऽपि न दोषः ; अग्नेः निमित्तकारणमात्रत्वात् । अग्निसंयुक्तार्द्रेन्धनाद्धि ! धूमो जायते । गन्धैक्याच्च आर्द्रेन्धनकार्यमेव धूमः । अतः, कार्यभावे च 'तदेवेदम्' इत्युपलब्धेः, 'बुद्धिशब्दान्तरादयः अवस्थाभेदमात्रनिबन्धनाः' इत्यवगम्यते । तस्मात्, कारणादनन्यत् कार्यम् ॥ १६ ॥

[सत्कार्यवादतः, कारणात् कार्यस्यानन्यता]

इतश्च—

१५५. सत्त्वाच्चाऽपरस्य ॥ २-१-१७ ॥

अपरस्य—कार्यस्य, कारणे सत्त्वाच्च, कारणात् कार्यस्य अनन्यत्वम् । लोकवेदयोर्हि ! कार्यमेव कारणतया व्यपदिश्यते । यथा लोके, 'सर्वमिदं घट-शरावादिकं पूर्वाह्णे मृत्तिकैवाऽऽसीत्' इति । वेदे च 'सदेव सोम्येदमग्र आसीत् (छां. उ. 6-2-1) इति ॥

न ; तत्राऽपीति । समवायिकारणानुवृत्तिं वदताऽपि प्रतिसंधानाभावचोद्यं परिहरणीयम् । तदस्माकमपि तुल्यमिति । भवत्विति । निमित्तकारणाऽप्रत्यभिज्ञानं न दोषः । उपादानमेव प्रत्यभिज्ञातव्यम् । तच्च धूमे गन्धवत्त्वात् पृथिवीत्वं प्रत्यभिज्ञायत एवेत्यर्थः ॥ १६ ॥

कारणे सत्वात्—कारणावस्थायां सत्वात् ।

[सूत्रार्थः ; अपरस्य—उत्तरकालभाविनो घटादेः कार्यस्य, सत्वाच्च पूर्वकालिके मृदादौ कारणद्रव्ये सूक्ष्मरूपेण विद्यमानत्वादपि हेतोः, तदनन्यत्वम्—कार्यस्य कारणानन्यत्वम् ॥]

अपरस्य तु कार्यस्य सत्वात् सूक्ष्मस्य कारणे ।
अनन्यत् कारणात् कार्यं मृदि सूक्ष्मो घटोऽस्ति हि ॥ (ब्र.प. 155)

---

[1] आदि—बा.

[सत्कार्यवादस्य श्रुतिविरोधशङ्का, तत्परिहारश्च]

१५६. असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च ॥ २-१-१८ ॥

यदुक्तम्—कारणे कार्यस्य सत्त्वं, लोक-वेदाभ्यामवगम्यते—इति ; तदयुक्तम् ; असद्व्यपदेशात्—

'असदेवेदमग्र [1]आसीत्' (छां. उ. 3–19–1)

'असद्वा इदमग्र आसीत्' (तै. उ. आन. 7–1)

'इदं वा[1] अग्रे नैव किंचनासीत्' (तै. ब्रा. 2–2–9–1)

इति, लोके च—

'सर्वमिदं घट-शरावादिकं पूर्वाह्णे नाऽऽसीत्' इति । अतः, यथोक्तं नोपपद्यते—इति चेत्! तन्न ; धर्मान्तरेण तथा व्यपदेशात् । स खलु ! असद्व्यपदेशः, तस्यैव कार्यद्रव्यस्य, पूर्वकाले, धर्मान्तरेण—संस्थानान्तरेण ; न भवदभिप्रेतेन तुच्छत्वेन ॥

यदुक्तमिति । सत्वासत्वेहि ! द्रव्यधर्मौ इत्युक्तमिति । व्यवहारयोग्यता—सत्वम् । विरोधिव्यवहारयोग्यता—तद्व्यवहारयोग्यस्य असत्वम् इत्युक्तमित्यर्थः ।

[सूत्रार्थः ; असद्व्यपदेशात्–'असदेवेदम्' 'इदं वा अग्रे नैव' इति श्रुत्या, सृष्टेः प्राक् जगदसत्वस्यैवोक्तेः, नेति चेत्–कारणे कार्यस्य सत्वं न युज्यत इति शङ्कनम्, न न साधु ; धर्मान्तरेण—नाम-रूपविभागानर्हत्वरूपं धर्मभेदमादायैव असत्तायाः श्रुतावुक्तेः, वाक्यशेषात्–उक्तश्रुतिवाक्यशेषभूतात् 'असदेव सन्मनोऽकुरुत' इति वाक्यात् असत एव मनस्कारकर्तृत्वोक्तेः, युक्तेः–भावि-भूतावस्थासम्बन्धस्यैव उत्पत्ति-विनाशात्मकतायाः युक्तिसिद्धत्वात्, शब्दान्तराच्च-सृष्टेः पूर्वम् असत्वेनोक्तेऽर्थे एव सद्रूपताबोधकात् 'सदेव सोम्येदमग्र आसीत्' इत्येवंरूपश्रुत्यन्तरादपि ज्ञापकात्, (सृष्टेः प्राक् असत्ताबोधनं न श्रुतावस्ति) ॥

व्यपदेशादसदिति नेति चेन्न तदा जगत् ।
सूक्ष्मेणाऽऽसीद्वाक्यशेषाद्युक्तेः शब्दान्तरात्तथा ॥ (श्र.प. 156)

---

[1] आसीत् ' 'इदं वा—त.थ.न.

[सत्त्वासत्त्वयोः स्वरूपविवेकः]

'सत्त्वासत्त्वे हि! द्रव्यधर्मौ' इत्युक्तम्। तत्र सत्त्वधर्मात् धर्मान्तरम्, असत्त्वम्। 'इदं'शब्दनिर्दिष्टस्य जगतः, सत्त्वधर्मः नाम-रूपे। असत्त्वधर्मस्तु, तद्विरोधिनी सूक्ष्मावस्था। अतः जगतो नाम-रूपयुक्तस्य, तद्विरोधिसूक्ष्मदशापत्तिः-असत्त्वम्॥

[वाक्यशेषादेः उक्तार्थगमकता]

कथमिदमवगम्यते?—वाक्यशेषात्, युक्तेः, शब्दान्तराच्च। वाक्यशेषस्तावत्।

'इदं वा अग्रे नैव किंचनाऽऽसीत्' (तै. ब्रा. 2-2-9-1)

इत्यत्र,

'तदसदेव [1]सन्मनोऽ[1]कुरुत स्यामिति' (तै. ब्रा. 2-2-9-1)

इति। अनेन वाक्यशेषगतेन मनस्कारलिङ्गेन, असच्छब्दार्थे तुच्छातिरिक्ते निश्चिते, तदैकार्थ्यात्, 'असदेवेदम्' इत्यादिष्वपि, असच्छब्दस्य अयमेवाऽर्थः इति निश्चीयते।

युक्तेश्च, असत्वस्य धर्मान्तरत्वमवगम्यते। युक्तिर्हि!, सत्त्वासत्वे पदार्थधर्मावव-गमयति। मृद्द्रव्यस्य पृथुबुध्नोदरा[2]कारयोगः,[2] 'घटोऽस्ति' इति व्यवहारहेतुः। तस्यैव तद्विरोध्यवस्थान्तरयोगः, 'घटो नास्ति' इति व्यवहारहेतुः। तत्र कपालाद्यवस्थायाः तद्विरोधित्वेन, सैव घटावस्थस्य नास्तीति व्यवहारहेतुः। न च-तद्व्यतिरिक्तः घटाभावो नाम कश्चित् उपलभ्यते। न च[3]कल्प्यते;[3] तावतैव अभावव्यवहारोपपत्तेः।

तथा शब्दान्तराच्च, पूर्वकाले धर्मान्तरयोग एव अवगम्यते। शब्दान्तरं च पूर्वोदाहृतम्

'सदेव सोम्येदमग्र आसीत्' (छां. उ. 6-2-1)

इत्यादिकम्। तत्र हि!

तत्रेति, धर्मान्तरेण इत्यत्र 'अन्तर' शब्दस्यार्थमाह। **इदंशब्द....असत्वम् इति,** सत्वासत्वयोः आपेक्षिकत्वमभिप्रेत्याह। **वाक्यशेष इति।** 'असद्वा' इत्यस्य 'तदात्मानं स्वयमकुरुत' इति।

न च तद्व्यतिरिक्त इति। अभावान्तरवादिनाऽपि, अभावाभावो भाव इत्यभ्युपगतः। अन्यथा अनवस्थाप्रसङ्गात्। तद्वत् सर्वत्र अभावव्यवहारस्य विरोध्यवस्थान्तरेणैव उपपन्नत्वात्, न तद्व्यतिरिक्तस्य कल्पनमित्यर्थः। पिण्डत्व-कपालत्वे, घटस्य प्राक्-प्रध्वंसाभावौ। घटत्वमेव

---

[1] मनो—न. [2] कारः—द. [3] तत् कल्प्यते—न. कल्पते—थ.

'कुतस्तु खलु सौम्यैवं स्यात्' (छां. उ. 6-2-2)

इति तुच्छत्वमाक्षिप्य,

'[1]सत्त्वेव[1] सौम्येदमग्र आसीत्' (छां. उ. 6-2-2)

इति[2]स्थापितम् ;[2] ।

'तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नामरूपाभ्यां व्याक्रियत' (बृ उ. 3-4-7)

इति सुस्पष्टमुक्तम् ॥ १८ ॥

[पट-प्राणदृष्टान्ताभ्यां कार्यस्य कारणादनन्यता]

इदानीं कार्यस्य कारणादनन्यत्वे निदर्शनद्वयं, द्वाभ्यां सूत्राभ्यां दर्शयति—

१५७. पटवच्च ॥ १-२-१९ ॥

यथा तन्तव एव व्यतिषङ्गविशेषभाजः, 'पटः' इति नाम-रूपकार्यान्तरादिकं [3]भजन्ते ;[3] तद्वत् ब्रह्माऽपि ॥ १९ ॥

पटान्योन्याभावः । कालविशेष-देशविशेषत्वं संसर्गाभावः । यथा मध्याह्नविशेषित-प्राङ्गणत्वम् ॥ १८ ॥

निदर्शनद्वयमिति । लौकिकं वैदिकमिति निदर्शनयोर्विभागः । बहूनामेकावस्थत्वे लौकिकदृष्टान्तः उक्तः । व्यतिषङ्ग :—मिथःसंसर्गः ॥ १९ ॥

[सूत्रार्थः ; पटवत् च—पटात्मकं कार्यं मिथः संसर्गितन्तुभ्यो यथाऽनन्यत् ; तथा कार्यं कारणादनन्यत्]

'व्यतिषङ्गविशेषेण नाम-रूपान्तरस्पृशः ।
उच्यन्ते पट इत्येव यथा जगति तन्तवः ॥ (ब्र. प. 157)

---

[1] सदेव—अ. क. ग. ङ. [2] व्यवस्थापितम्—न. [3] भजन्ति—त. थ.

१५८. यथा च प्राणादिः ॥२-१-२०॥

[1]यथा च[1] वायुरेक एव, शरीरे वृत्तिविशेषं भजमानः, प्राणापानादिनाम[2]रूप[2]-कार्यान्तराणि भजते ; तद्वत्, ब्रह्म एकमेव विचित्रस्थिर-त्रसरूपं जगद्भवतीति, परम-कारणात् परस्माद्ब्रह्मणः अनन्यत्वं जगतः सिद्धम् ॥ २० ॥

इति आरम्भणाधिकरणम् ॥ ६ ॥

यथा चेत्यादि । एकस्य बहुत्वावस्थत्वे वैदिकदृष्टान्तः अत्र प्रदर्श्यते ।

['प्राणोऽपानो व्यान उदानोऽनः समानोऽन इत्येतत् सर्वं प्राण एव' (बृ.उ. 3-5-3) इति वैदिकत्वम् ॥ 'पञ्चवृत्तिर्मनोवद् व्यपदिश्यते' (ब्र. सू. 2-4-11) इति सूत्रम्]

[सूत्राणि—१. तदनन्यत्व, २. भावे चो, ३. सत्त्वाच्च, ४. असद्व्यप, ५. पटव, ६. यथा च प्रा.]

इति आरम्भणाधिकरणम् ॥ ६ ॥

[सूत्रार्थः ; (शरीरे वर्तमानो वायुः एक एव सन्नपि) **प्राणादिश्च यथा**—वृत्तिभेदभिन्न-प्राणादिनामपञ्चकवान् कार्यभूतः कारणाद्वायोरभिन्नः ; तथा चिदचिद्विशिष्टं ब्रह्मापीति, कारणादनन्यत् कार्यमिति ॥

प्राणादिस्तु स्थानभेदाद्वायोर्नाऽन्यो यथा भवेत् ।
जगच्चाऽपि तथा नाऽन्यद् ब्रह्मणो निजकारणात् ॥' (ब्र. प. 158)

—o—

---

[1] यथा. बा.—थ. द.   [2] रूपादि—न.

(42) इतरव्यपदेशाधिकरणम् ॥ १-२-७ ॥

[अधि—अर्थः ; जगत्स्रष्टुर्ब्रह्मणः स्वहिताकरणादिदोषप्रसङ्गनिवारणम्] सू. 21-23

१५९. इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २-१-२१ ॥ हिता

[अवान्तरसङ्गतिः]

जगतः ब्रह्मानन्यत्वं प्रतिपादयद्भिः,
'तत् त्वमसि' (छां. उ. 6-8-7)
'अयमात्मा ब्रह्म' (बृ. उ. 6-4-5)
इत्यादिभिः, जीवस्याऽपि ब्रह्मानन्यत्वं व्यपदिश्यते—इत्युक्तम् ।

[सूत्राशयविशदीकरणम्]

तत्रेदं चोद्यते—यदि इतरस्य-जीवस्य ब्रह्मभावः, अमीभिर्वाक्यैः व्यपदिश्यते ! तदा, ब्रह्मणः सार्वज्ञ्य सत्यसङ्कल्पत्वादियुक्तस्य, 'आत्मनो हितरूपजगदकरणम्, अहितरूपजगत्करणम्' इत्यादयो दोषाः प्रसज्येरन् । आध्यात्मिकाधिदैविकाधि भौतिकानन्त-दुःखाकरं च, इदं जगत् । न च ईदृशे स्वानर्थे, स्वाधीनो बुद्धिमान् प्रवर्तते ।

इतरेत्यादि । किं ब्रह्मणो जगत्कारणत्वं सम्भवति? उत न ?—इति । किं ब्रह्मणो जगत्स्रष्टृत्वे, हिताकरणादिदोषः प्रसज्यते ? न ? इति । किं ब्रह्मणः तत्त्वमसीत्यादिसामानाधिकरण्यावगतं तादात्म्यम्, ऐक्यलक्षणम् ? उत आत्म-शरीरभावलक्षणम् ?—इति । किं भेदश्रुतिसामञ्जस्यम्, आत्म-शरीररूपतादात्म्ये एव ? उत ऐक्यलक्षणेऽपि–इति ॥ [विचाराः]

यदा स्वरूपैक्यलक्षणतादात्म्येऽपि, भेदश्रुतिसामञ्जस्यम् ; तदा तत्वमस्यादिवाक्यानां स्वरूपैक्यपरत्वेन, हिताकरणादिदोषप्रसङ्गात्, ब्रह्मकारणत्वासम्भवः-- इति फलितम् । यदा आत्म-शरीरभाव एव सामञ्जस्यम् ; तदा उक्तवाक्यानां शरीरात्मभावपरतया हिताकरणादि-दोषप्रसङ्गाभावात्, ब्रह्मकारणत्वसंभवः- इति सिध्यति ।

सार्वज्ञ्येति । सर्वज्ञत्वात् [हितज्ञोऽपीति] सत्यसङ्कल्पत्वाच्च, अहितजगत्कारणत्वं नोपपद्यते इति भावः ।

[सूत्रार्थः ; इतरव्यपदेशात्—ब्रह्मणः जीवतया श्रुतावुक्तेः, हिता....प्रसक्तिः—दुःखबहुलं जगत् सृजतः, स्वहितस्य अकरणम्, स्वाहितस्य करणं चेत्यादीनां दोषाणां प्रसङ्गः ॥ अतो ब्रह्म न जगत्कारणम् ॥]

'जीवत्वव्यपदेशस्तु हिताकृत्यादिदोषतः ।
ब्रह्मणः कारणत्वं च न सिध्येदिति चोद्यते ॥ (ब्र.प. 159)

जीवाद् ब्रह्मणो भेदवादिन्यः श्रुतयः, जगद्-ब्रह्मणोरनन्यत्त्वं वदता त्वयैव परित्यक्ताः ; भेदे सति, अनन्यत्वासिद्धेः ॥

[भास्करमतानुवाद-तद्दूषणे]

औपाधिकभेदविषयाः ; भेदश्रुतयः ; स्वाभाविकाभेदविषयाश्च, अभेदश्रुतयः इति चेत् !

तत्रेदं वक्तव्यम्—स्वभावतः[1]स्वस्मादभिन्नं, जीवम्[1], किम् अनुपहितं जगत्कारणं ब्रह्म[2]जानाति वा ? न वा ?[2]

न जानाति चेत् ! सर्वज्ञत्वहानिः । जानाति चेत् ! स्वस्मादभिन्नस्य जीवस्य दुःखं, स्वदुःखमिति जानतो ब्रह्मणः, हिताकरणाहितकरणादिदोषप्रसक्तिः, अनिवार्या ।

[ब्रह्माज्ञानवादिनः अस्मिन् अधिकरणेऽनवकाशः]

जीव-ब्रह्मणोः अज्ञानकृतो भेदः ; तद्विषया भेदश्रुतिः—इति चेत् ।

[3]तत्राऽपि[3]जीवाज्ञानपक्षे, पूर्वोक्तो विकल्पः, तत्फलं च तदवस्थम् । [4]ब्रह्माज्ञान[4]पक्षे, स्वप्रकाशस्वरूपस्य ब्रह्मणः; अज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च, न संभवति ।

अज्ञानेन प्रकाशः तिरोहितश्चेत् ! तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन, प्रकाशस्यैव स्वरूपत्वात् स्वरूपनिवृत्तिरेवेति, स्वरूपनाशादिदोषसहस्रं प्रागेव उदीरितम् ।

अतः—इदमसङ्गतं ब्रह्मणो जगत्कारणत्वम् ॥ २१ ॥

[श्रुतिभिः ब्रह्मणो जीवार्थान्तरत्वसमर्थनम्]

इति प्राप्ते, अभिधीयते—

१६०. अधिकं तु भेदनिर्देशात् ॥ २-१-२२ ॥

'तु' शब्दः, पक्षं व्यावर्तयति । आध्यात्मिकादि[5]दुःखयोगार्हात्[5] प्रत्यगात्मनः, अधिकम्—अर्थान्तरभूतं ब्रह्म ।

दुःखयोगार्हादित्यत्र 'अर्ह' शब्दः मुक्तव्यावृत्तिपरः ॥

[सूत्रार्थः ; अधिकं तु-ब्रह्म, जीवात् अर्थान्तरमेव ; भेदनिर्देशात्-'करणाधिपाधिपः' इति भेदस्य स्फुटोक्तेः]

'भेदेनाऽस्यैव 'करणाधिपाधिप' इति श्रुतौ ।
निर्देशादधिकं ब्रह्म जीवात्तोऽत्र दुःस्थता ।। (ब्र. प. 160)

---

[1] स्वस्मादभिन्नजीवः—द. [2] जानाति न वा ?—द. [3] अत्राऽपि—इ.न.
[4] ब्रह्मज्ञान—थ. [5] योगार्थत्वात्—श्रा.

कुतः ? भेदनिर्देशात्—प्रत्यगात्मनो हि ! भेदेन निर्दिश्यते परं ब्रह्म ;
'य आत्मनि तिष्ठन् आत्मनोऽन्तरः, यमात्मा न वेद, यस्याऽऽत्मा शरीरं,
य आत्मानमन्तरो यमयति, स त आत्माऽन्तर्याम्यमृतः' (बृ.उ.मा.पा. 5-7-26)
'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनाऽमृतत्वमेति' (श्वे. उ. 1-6)
'सकारणं करणाधिपाधिपः' (श्वे.उ. 6-9)
'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' (श्वे.उ. 4-6)
'ज्ञाज्ञौ द्वावजावीशनीशौ' (श्वे.उ. 1-9)
'प्राज्ञेनाऽऽत्मना सम्परिष्वक्तः' (बृ.उ. 6-3-51)
'प्राज्ञेनाऽऽत्मनाऽन्वारूढः' (बृ.उ. 6-3-35)
'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चाऽन्यो मायया संनिरुद्धः' (श्वे.उ. 4-9)
'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे.उ. 6-16)
'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' (श्वे.उ. 6-13)
'योऽव्यक्तमन्तरे सञ्चरन्, यस्याऽव्यक्तं शरीरम्, यमव्यक्तं न वेद'
'योऽक्षरमन्तरे सञ्चरन्, यस्याऽक्षरं शरीरं, यमक्षरं न वेद'
'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (सु.बा. 7)
इत्यादिभिः ॥ २२ ॥

[चेतनस्य ब्रह्मभावासाङ्गत्यं वस्तुविरोधात्]

१६१. अश्मादिवच्च तदनुपपत्तिः ॥ २-१-२३ ॥

अश्म-काष्ठ-लोष्ठ-तृणादीनाम् अत्यन्तहेयानां, सततविकारास्पदानाम्, अचिद्विशेषाणाम्, निरवद्य-निर्विकार-निखिलहेयप्रत्यनीक-कल्याणैकतान-स्वेतरसमस्तवस्तु-

---

अश्मादिवदिति, श्रुत्यर्थापत्तिरुच्यते । अश्म-काष्ठेति । चिदचिद्वाचकशब्दैः सामानाधिकरण्ये तुल्येऽपि, यथा ब्रह्मणो जडस्य च स्वरूपैक्यासंभवात्, व्यावृत्तिरभ्युपेता

[सूत्रार्थः ; अश्मादिवच्च—शिला-काष्ठ-लोष्ठादीनामिव, जीवस्यापि, तदनुपपत्तिः—निरतिशयानन्दगुणसागरब्रह्मभावासाङ्गत्यम् ॥]

'अश्मादीनां ब्रह्मभावो यथा नैवोपपद्यते ।
तथैवाऽऽौघपूर्णस्य जीवस्याऽपि न युज्यते' ॥ (ब्र.प.—161)

विलक्षणानन्तज्ञानानन्दैक[1]स्वरूप[1]-नानाविधानन्तमहाविभूतिब्रह्मस्वरूपैक्यं यथा नोपपद्यते, तथा चेतनस्याऽपि अनन्तदुःखयोगार्हस्य खद्योतकल्पस्य, 'अपहतपाप्मे'त्यादिवाक्यावगतसकलहेयप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरब्रह्मभावानुपपत्तिः।

[जीव-ब्रह्मणोर्भेदेपि सामानाधिकरण्यादिनिर्वाहप्रकारः]

सामानाधिकरण्य निर्देशः—

'यस्याऽऽत्मा शरीरम्' (बृ. उ. म. पा. 5–7–26)

इत्यादिश्रुतेः, जीवस्य ब्रह्मशरीरत्वात्, ब्रह्मणः जीवशरीरतया तदात्मत्वेन अवस्थितेः, जीवप्रकारब्रह्मप्रतिपादनपरश्च, एतदविरोधी; प्रत्युत एतस्यार्थस्य उपपादकश्च—इति,

'अवस्थितेरिति काशकृत्स्नः' (ब्र. सू. 1–4–22)

इत्यादिभिः, असकृदुपपादितम्॥

अतः सर्वावस्थं ब्रह्म चिदचिद्वस्तुशरीरमिति, 'सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म, कारणम्; तदेव ब्रह्म स्थूलचिदचिद्वस्तुशरीरं जगदाख्यं कार्यम्' इति, जगद्-ब्रह्मणोः सामानाधिकरण्योपपत्तिः, जगतो ब्रह्मकार्यत्वं, ब्रह्मणोऽनन्यत्वम्, अचिद्वस्तुनो जीवस्य च ब्रह्मणश्च परिणामित्व-दुःखित्व-कल्याणगुणाकरत्वस्वभावासङ्करः, सर्वश्रुत्यविरोधश्च भवति।

'सदेव सोम्येदमग्र आसीदेकमेव' (छां.उ. 6–2–1)

इति, अविभागा[2]वस्थायामपि[2], अचिद्युक्तजीवस्य ब्रह्मशरीरतया सूक्ष्मरूपेणावस्थानम्, अवश्याभ्युपगन्तव्यम्;

ब्रह्माज्ञानवादिना तथा चेतनस्याऽपीत्यभिप्रायः। **अवस्थितेरिति**। इदं सूत्रम्, एतदधिकरणशेषमित्यभिप्रायः। **इत्यादिभिरिति** 'आदि' शब्देन, 'न तु दृष्टान्तभावात्' 'उभयेऽपि हि भेदेनैनमधीयते' इत्यादिकं विवक्षितम्। उभयेऽपीत्यादिसूत्रं भेदज्ञापनार्थमपि, घठकवाक्यविषयम्। इत्थं चेतनसामानाधिकरण्यनिर्वाहः कृतः॥

अतः सर्वेत्यादिना चिदाचिदात्मकजगत्सामानाधिकरण्यनिर्वाहमाह।

सदेवेत्यादि। ['एकमेव' इति] कारणावस्थायाम् एकत्वावधारणात्, चिदचिच्छरीरकत्वाभावेन गुण-दोषव्यवस्था नोपपद्यते—इति [शङ्कानिरासार्थम्]।

---

[1] स्वस्वरूप—द. [2] वस्थायाम्—वा.

'वैषम्य-नैर्घृण्ये न सापेक्षत्वात्' (ब्र. सू. 2-1-34)

'न कर्माऽविभागादिति चेन्नाऽनादित्वादुपपद्यते चाऽप्युपलभ्यते च'

(ब्र. सू. 2-1-35)

इति सूत्रद्वयोदितत्वात्, तदानीमपि सूक्ष्मरूपेणाऽवस्थानस्य। अविभागस्तु, नाम-रूप-विभागाभावात् उपपद्यते। अतः ब्रह्मकारणत्वं सम्भवत्येव ॥

[उक्तसूत्रद्वयस्य परोक्तेऽर्थे असाङ्गत्यम्]

[1]ये पुनः[1] —अस्यैव जीवस्य अविद्याविमुक्तावस्थामभिप्रेत्य, [2]इमं भेदं[2]-वर्णयन्ति, तेषाम्, इदं सर्वमसङ्गतं स्यात्! न हि! तदवस्थस्य [3]सर्वज्ञत्वं सर्वेश्वरत्वं[3] समस्तकारणत्वं सर्वात्मत्वं सर्वनियन्तृत्वम्-इत्यादीनि सन्ति। अनेनैव रूपेण हि! आभिः श्रुतिभिः, प्रत्यगात्मनो भेदः प्रतिपाद्यते। [तस्य सर्वस्य अविद्यापरिकल्पितत्वात्] तत् सर्वं हि! अविद्यापरिकल्पितं त्वन्मते।

न च-अविद्यापरिकल्पितस्य अविद्यावस्थायां, शुक्तिकारजतादिभेदवत् परस्पर भेदः, अत्र सूत्रकारेण—

'अधिकं तु भेदनिर्देशात्' (ब्र. सू. 2-1-22)

इत्यादिषु—प्रतिपाद्यते; 'ब्रह्मजिज्ञासा कर्तव्या' इति, जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणो जगज्जन्मादिकारणस्य, वेदान्तवेद्यत्वं; तस्य च स्मृति-न्यायविरोधपरिहारश्च क्रियते ॥

[अस्मिन्नधिकरणे अधिकंत्विति सूत्रस्य पौनरुक्त्यपरिहारः]

'अपीतौ तद्वत् प्रसङ्गादसमञ्जसम्' (ब्र.सू. 2-1-8)

[इमं भेदम् – जीवेश्वरभेदम्। असङ्गतमिति। नित्य–शुद्ध–मुक्त स्वभावे ब्रह्मणि निर्गुणे, सर्वज्ञत्व–सर्वशक्तित्वादेरभावात्, तदा जीवस्यैवाऽभावाच्च, तन्मुखेन जीवाद्भेदवर्णनं न युज्यते–इत्याशयः।

न च-प्रतिपाद्यत इति। अविद्यापरिकल्पिताकारविशिष्टस्य मुमुक्षुजिज्ञास्यत्वायोगात्, मुमुक्षुजिज्ञास्ये जीवादाधिक्यस्यैव अत्र समर्थनात् इति भावः।] प्रक्रान्तस्येति। अकल्पित-जीवस्वरूपज्ञानस्य प्रक्रान्तत्वात्, कल्पितभेदो न प्रतिपाद्यते इत्यर्थः। वेदान्तेति, समन्वया-ध्यायार्थः. स्मृतीति, द्वितीयाध्यायार्थश्च ॥

अपीताविति। अपीतावित्यादि सूत्रद्वयं न तत्र सङ्गतम्। अपीताविति अस्मिन्नधिक-रणे पूर्वपक्षसूत्रेण सङ्गतम्; परिहारसूत्रं च सिद्धान्तसूत्रेण। अपीतावित्यादि सूत्रद्वये,

---

[1] ये तु पुनः—वा. येन तु पुनः—थ. न ये पुनः—द. [2] एवं भेदं—आ. इ. ख. च. ड.
[3] सर्वज्ञत्वं—त. थ.

'न तु दृष्टान्तभावात्' (ब्र.सू. 2-1-9)

इति सूत्रद्वयम्, एतदधिकरणसिद्धम् अनुवदति । तत्र हि !, विलक्षणयोः [1]कार्य-कारणभावसम्भव[1] एव, अधिकरणार्थः ।

'असदिति चेन्न प्रतिषेधमात्रत्वात्' (ब्र. सू. 2-1-7)

इति च, पूर्वाधिकरणस्थम् अनुवदति ॥ २३ ॥

इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

ब्रह्मणि अचिद्गतदोषशङ्कापरिहारः । इतरव्यपदेशादित्यादौ, चिद्गतदोषशङ्कापरिहारः । एवं विलक्षणत्वे सिद्धे सामानाधिकरण्यनिर्वाहार्थम्, 'अवस्थितेरिति' इति सूत्रम् अत्रैव सङ्गतम् । एवं सूत्रद्वयम् एतदधिकरणशेषमित्यर्थः । **अधिकरणसिद्धमनुवदति**–तस्य शेषत्वेन वदतीत्यर्थः । **तत्र हीति** । प्रसङ्गात् आरम्भणाधिकरणार्थानुवादः तस्मिन्नधिकरणे । अभेदश्रुत्यविरोधेन भेद-श्रुतीनां मुख्यार्थप्रतिपादनम् अत्रैव क्रियते इत्यर्थः ।

[सूत्राणि—१ इतर. २ अधिकं तु ३ अश्मादि.]

इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

—o—

[1] कार्य-कारणभावासम्भवः—द, कार्य-कारणभावः—थ.

(43) उपसंहारदर्शनाधिकरणम् ॥ २-१ ८ ॥ [सू. 24–25]

[अधि–अर्थः ; अत्यद्भुतसर्वशक्तेर्ब्रह्मणः, इतरानपेक्षं सङ्कल्पमात्रतो जगत्सृष्टियोगः]

१६२. उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २-१-२४ ॥

[अवान्तरसङ्गतिप्रदर्शनम्]

परस्य ब्रह्मणः सर्वज्ञस्य सत्यसङ्कल्पस्य, स्थूल-सूक्ष्मावस्थसर्वचेतनाचेतनवस्तुशरीरतया सर्वप्रकारत्वेन, [1]सर्वात्मत्वं[1] सकलेतरविलक्षणत्वं च अविरुद्धम्—इति स्थापितम् ।

इदानीं—[2]सत्य[2]सङ्कल्पस्य परस्य ब्रह्मणः, सङ्कल्पमात्रेण विचित्रजगत्सृष्टियोगः, अविरुद्धः—इति स्थाप्यते ॥

[एतदधिकरणोत्थापकशङ्कानुदयाक्षेपः, तत्परिहारश्च]

ननु च—परिमितशक्तीनां कारककलापोपसंहारसापेक्षत्व[3]दर्शनेन,[3] सर्वशक्तेर्ब्रह्मणः कारककलापानुपसंहारेण जगत्कारणत्वविरोधः—कथमाशङ्क्यते ?

उच्यतेः लोके तत्तत्कार्यजननशक्तियुक्तस्याऽपि तत्तदुपकरणा[4]पेक्षित्व[4]दर्शनात्,

---

परस्येति । सत्यसङ्कल्पत्वादिभिः वैलक्षण्यं प्रतिपादितम् । तत्र सत्यसङ्कल्पमात्रपरिकरत्वम् अनुपपन्नमिति, तस्य सत्यसङ्कल्पत्वस्य सङ्कुचितवृत्तित्वशङ्काया उत्थानात् सङ्गतिरित्यर्थः । **सर्वात्मत्वम्**—सर्वभावः । किं ब्रह्मणो जगत्कारणत्वं संभवति ? न ? इति । किं कार्यजननसमर्थस्य कार्यजनकत्वं, नियमेन सहकार्यन्तरापेक्षम् ? उत न ?—इति विचारः ।

यदा अपेक्षानियमः ; तदा सहकारिशून्यस्य कारणत्वासंभवः । यदा न अपेक्षानियमः तदा कारणत्वसंभवः इति सिद्धम् । [इति पूर्वोत्तरपक्षयोः फल-फलिभावः]

[**सर्वशक्तेरिति** हेतुगर्भं विशेषणम् । सर्वशक्तित्वादिति । **उपसंहारः**—सम्पादनम् ।] **उच्यत इति** । ब्रह्मणः सङ्कल्पमात्रपरिकरत्वमयुक्तमिति, अनुत्थानचोद्यपरिहारसङ्ग्रहः ।

सूत्रार्थः ; **उपसंहारदर्शनात्**—कार्यजननप्रवृत्तेषु, सामग्रीसंपादनस्य लोके दृष्टत्वात्, **नेति चेत्**—केवलस्य ब्रह्मणः स्रष्टृत्वं न युज्यते इति शङ्कनम्, **न**—न साधु, **क्षीरवत् हि**—दध्यात्मना परिणामे केवलस्य क्षीरस्येव, ब्रह्मणः तत्संभवात् ॥

'समर्थेऽपि हि सामग्रीदर्शनेन न कर्तृता ।
अद्वितीये ब्रह्मणि स्यान्मैवं क्षीरे यथा दधि । (ब्र. प. 162)

---

[1] सर्वात्मकत्वं—वा. [2] सर्वज्ञस्य सत्य—वा [3] दर्शनेनैव—द. [4] णापेक्षत्व—च.

सर्वशक्तियुक्तस्य परस्य ब्रह्मणोऽपि, तत्तदुपकरणविरहिणः स्रष्टृत्वं नोपपद्यते-इति, कस्यचिन्मन्दधियः, शङ्का जायत इति, सा निराक्रियते ।

[एतदधिकरणीयः पूर्वः पक्षः]

घट-पटादिकारणभूतानां कुलाल-कुविन्दादीनां, तज्जननसामर्थ्ये सत्यपि, कानिचिदुपकरणान्युपसंहृत्यैव जनयितृत्वं दृश्यते । 'तज्जननाशक्ताः, कारककलापोपसंहारेऽपि जनयितुं न शक्नुवन्ति ; [1]शक्ताः पुनः[1], कारककलापोपसंहारे जनयन्ति' इत्येतावानेव विशेषः । ब्रह्मणोऽपि सर्वशक्तेः, सर्वस्य जनयितृत्वं, तदुपकरणानामनुपसंहारेण नोपपद्यते ।

[पूर्वपक्षहेतोः उपकरणानुपसंहारस्य श्रुतिप्रतिपन्नता]

प्राक् सृष्टेश्च असहायत्वम्,

'सदेव सोम्येदमग्र आसीत्' (छां. उ. 6-2-1)

'एको ह वै नारायण आसीत्' (महो. 1-1)

इत्यादिषु प्रतीयते । अतः स्रष्टृत्वं नोपपद्यते—इत्येवं प्राप्तम् । तदिदमाशङ्कते—उपसंहारदर्शनान्नेति चेत्—इति ॥

[सिद्धान्तप्रदर्शनम्]

परिहरति—न [2]क्षीरवद्धि—इति[2] । न सर्वेषां कार्यजननशक्तानाम्, उपसंहारसापेक्षत्वमस्ति ; यथा क्षीर-जलादेः दधि-हिमजननशक्तस्य, तज्जनने । एवं ब्रह्मणोऽपि स्वयमेव सर्वजननशक्तेः, सर्वस्य जनयितृत्वम् उपपद्यते । 'हि' इति प्रसिद्धवन्निर्देशः, चोद्यस्य मन्दताख्यापनाय ।

क्षीरादिषु आतञ्चनाद्यपेक्षा, [3]न[3] दध्यादिभावाय ; अपि तु शैघ्र्यार्थं रसविशेषा[4]र्थं च[4] ॥ २४ ॥

न क्षीरवद्धीति । जलं स्वयमेव हिमरूपेण परिणमति ; रविकिरणास्तु तदुत्सर्गमात्रहेतवः इति भावः ! क्षीरस्य आतञ्चन-कार्थौ, शैघ्र्य-रसविशेषार्थौ ॥ २४ ॥

---

[1] शक्ताः—त, थ. [2] क्षीरवद्धि—त, थ, द. [3] सा न—न. [4] र्थं वा—च.

१६३. देवादिवदपि लोके ॥ २-१-२५ ॥

यथा देवादयः, स्वे स्वे लोके [1]सङ्कल्प[1]मात्रेण स्वापेक्षितानि सृजन्ति ; तथा असौ पुरुषोत्तमः, कृत्स्नं जगत् सङ्कल्पमात्रेण सृजति । देवादीनां वेदावगतशक्तीनां दृष्टान्ततया उपादानं, ब्रह्मणो वेदावगतशक्तेः सुखग्रहणायेति प्रतिपत्तव्यम् ॥ २५ ॥

इति उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

देवादिवदिति वैदिकं दृष्टान्तमाह । देवादीनामित्यादि दृष्टान्तान्तरोपादानफलम् ॥२५॥

[सूत्रे—१. उपसंहार. २. देवादि]

इति उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

[सूत्रार्थः ; लोके—स्वीये स्वीये लोकविशेषे, देवादिवत् — देव-गन्धर्वादीनां स्वस्वसङ्कल्पेन स्वस्वापेक्षिततत्तदर्थविशेषस्रष्टृत्वमिव, ब्रह्मणोऽपि स्वसङ्कल्पात् सर्वस्रष्टृत्वम् उपपद्यते ॥]

देवादयः स्वस्वलोके सृजन्ति विविधं यथा ।
ब्रह्माऽऽपि निजसङ्कल्पात् तनोति निखिलं तथा ॥ (ब्र.प. 163)

—o—

---

[1] स्वसङ्कल्प—द.

(44) कृत्स्नप्रसक्त्यधिकरणम् ॥ २-१-९ ॥ [सू. 26–31]

[अधि-अर्थः ; ब्रह्मणो निरवयवस्याऽपि जगत्कारणतायाः श्रुतिप्रतिपन्नतया, नाऽसाङ्गत्यम्]

१६४ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २-१-२६ ॥

[श्रुतिभिः ब्रह्मणि निरवयवत्वरूपैकत्वप्रतिपादनम्]

'सदेव सोम्येदमग्र आसीत्' (छां. उ. 6–2–1)
'इदं वा अग्रे नैव किञ्चनाऽऽसीत्' (तै. ब्रा. 2–2–9–1)
'आत्मा वा इदमेक एवाऽग्र आसीत्' (ऐन. उ. 1–1)

इत्यादिषु, 'कारणावस्थायां ब्रह्म, एकमेव-निरवयवमासीत्' इति,—'कारणावस्थायां

कृत्स्नेति। दृष्टान्ततया उपन्यस्तस्य क्षीर-जलादेः सावयवत्वं दृष्टम् ; तद्वत् ब्रह्मणोऽपि सावयवत्वम्। निरवयवत्वे कृत्स्नप्रसक्तिर्वा स्यात्—इति शङ्कया सङ्गतिः।

किं ब्रह्मणो जगत्कारणत्वं संभवति ? न ? इति। तदर्थं किं ब्रह्मणो जगदाकारेण कार्यत्वे, निरवयवत्वश्रुतिः बाध्यते ? न ? इति। तदर्थं किं सर्वशक्तियोगो युज्यते ? न ?— इति [विचाराः]।

यदा न युज्यते ; तदा निरवयवत्वश्रुतिबाधप्रसङ्गात्, कारणत्वासंभवः। यदा युज्यते ; निरवयवत्वश्रुत्यबाधात्, कारणत्वसम्भवः—इति [पूर्वोत्तरपक्षयोः फल-फलिभावः]।

सदेवेत्यादि। 'एकमेवाद्वितीयम्' इति अनन्तरवाक्यम् अर्थत उपात्तम्। तत्र 'एक'-पदमसङ्कुचितम् अवयवतोऽपि विभागासहम् इति भावः। **'इदंवा अग्रे'** इत्यत्र नैव किंचनासीदिति, द्यु-पृथिव्यादिजगदवयवाभावकथनात्, निरवयवत्वसिद्धिरिति भावः। **'आत्मा वा इदम्'** इत्यत्रापि'एक'शब्दः, अवयवतोऽपि विभागासहः। **इत्यादिष्विति**, 'आदि'शब्दात् 'निष्कलं निष्क्रियम्' इत्यादिर्गृह्यते। **एकमेव** इति व्याख्येयपदम्। **निरवयवमिति** व्याख्यानम्। निरवयवत्वस्य कारणवाक्यप्रतिपन्नत्वात्, **कारणावस्थायां** चिदचिद्विभागाभावसिद्धिरिति भावः।

[सूत्रार्थः ; **कृत्स्नप्रसक्तिः**—(निरवयवस्यापि ब्रह्मणो जगत्कारणत्वे) सर्वात्मना जगदाकारपरिणामापत्तिः, (सावयवत्वे) **निरवयवत्वशब्दकोपो वा**—तस्य निरवयवताबोधकश्रुतिव्याकोपापत्तिर्वा स्यात् ॥]

'बहुस्यामिति सङ्कल्पाद्ब्रह्म कृत्स्नं जगद्भवेत् ।
निरंशबोधकैर्वाक्यैर्विरोधाद्वा न कारणम्' ॥ (ब्र. प. १६४)

निरस्तचिदचिद्विभागतया निरवयवं ब्रह्मैवासीत्'—इत्युक्तम्। तत् अविभागम् एकं निरवयवमेव ब्रह्म, 'बहु स्याम्' इति सङ्कल्प्य, आकाश-वाय्वादिविभागं ब्रह्मादिस्तम्ब[1]पर्यन्त[1]क्षेत्रज्ञविभागं चाऽभवत्—इति चोक्तम्।

[कृत्स्नैकदेशविकल्पतः, ब्रह्मणो जगत्कारणत्वानुपपत्तिशङ्का]

एवं सति, तदेव परं ब्रह्म कृत्स्नं, कार्यत्त्वेनोपयुक्तम्—इत्यभ्युपगन्तव्यम्॥

अथ चिदंशः, क्षेत्रज्ञविभागविभक्तः; अचिदंशश्च, आकाशादिविभागविभक्तः-इत्युच्यते; तदा,

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. उ. 6-2-1)

'ब्रह्मैकमेव' 'आत्मैक एव' इत्येवमादयः, कारणभूतस्य ब्रह्मणो निरवयवत्ववादिनः शब्दाः, कुप्येयुः—बाधिता भवेयुः।

यद्यपि—सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म, कारणम्; स्थूलचिदचिद्वस्तुशरीरं[2]ब्रह्म,[2] कार्यम्—इत्यभ्युपगम्यते; तथापि, शरीरांशस्याऽपि कार्यत्वाभ्युपगमात्, उक्तदोषो दुर्वारः। तस्य निरवयवस्य बहुभवनं च नोपपद्यते; कार्यत्वानुपयुक्तांशस्थितिश्च नोपपद्यते। तस्मात् असमञ्जस[3]मिवा[3]ऽऽभाति। अतः ब्रह्मकारणत्वं नोपपद्यते॥२६॥

[श्रुत्येकगम्यस्यार्थस्य तर्केणाप्रधृष्यता]

इत्याक्षिप्त [4]समाधत्ते[4]—

१६५. श्रुतेस्तु शब्दमूलत्वात् ॥२-१-२७॥

एकं निरवयवम् अविभागम् इत्यन्वयक्रमः।

एवं सतीति सिद्धान्तिना अनभ्युपगतेऽपि आपातप्रतीते स्वरूपैक्यपक्षे दूषणम्।

कुप्येयुरिति। मुख्यार्थायोगात् 'बाधिता भवेयुः' इति। बाधफलभूतकोपशब्देन बाध उपचरितः इति भावः।

यद्यपीति। एकशरीरे शरीरांशः परिसमाप्त इति, नान्यत्र स्यात् इत्यर्थः।

शब्दमूलत्वादिति। 'अग्निना सिञ्चेत्' इत्यादिषु, सेचनसाधनतानर्हत्वं धर्मिणः

सूत्रार्थः; श्रुतेस्तु—(निरवयवस्याऽपि ब्रह्मणो जगदात्मना परिणतिः) श्रुतिप्रमाणत एव सिद्धा, शब्दमूलत्वात्—परस्य ब्रह्मणः कारणतायाश्च आगमैकगम्यत्वात्, तत्र युक्तितः अकारणत्वाक्षेपो न साधुः।]

'शब्दमात्रेण वेद्यत्वाच्छ्रुत्युक्तं ब्रह्मणो भवेत्।
कारणत्वमतः सर्वं श्रुतिमूलं समञ्जसम्'॥ (ब्र. प. १६५)

---

[1] पर्यन्त—द [2] ब्रह्मणः—थ. [3] मेवा—वा. [4] समादधते—ह.

'तु' शब्दः उक्तदोषं व्यावर्तयति । नैवमसामञ्जस्यम् ।

कुतः ? श्रुतेः —श्रुतिस्तावत्, निरवयवत्वं ब्रह्मणः, ततो विचित्रसर्गं चाऽऽह । श्रौतेऽर्थे यथाश्रुति प्रतिपत्तव्यमित्यर्थः ।

ननु च —श्रुतिरपि, 'अग्निना सिञ्चेत्' इतिवत्, परस्परान्वयायोग्यमर्थं प्रतिपादयितुं न समर्था ; [1]अत[1]आह—शब्दमूलत्वात्—इति । शब्दैकप्रमाणकत्वेन सकलेतरवस्तुविसजातीयत्वात्, अस्याऽर्थस्य विचित्रशक्तियोगो[2]न विरुध्यत[2]इति, न सामान्यतो दृष्टं साधनं [3]दूषणं वा[3] अर्हति ब्रह्म ॥ २७ ॥

१६६. आत्मनि चैवं विचित्राश्च हि ॥ २-१-२८ ॥

[सामान्यतः अन्यत्र दृष्टस्य धर्मस्य अन्यत्र तद्विसजातीये अनारोपणीयता]

किं च—एवम्-वस्त्वन्तरसम्बन्धिनो धर्मस्य वस्त्वन्तरे च आरोपणे सति, अचेतने [4]घटादौ[4] दृष्टा धर्माः, तद्विसजातीये चेतने नित्ये आत्मन्यपि प्रसज्यन्ते । तदप्रसक्तिश्च, भावस्वभाववैचित्र्यात् इत्याह—'विचित्राश्च हि' —इति । यथा अग्नि-जलादीनाम् अन्योन्य-विसजातीयानाम्, औष्ण्यादिशक्तयश्च विसजातीया दृश्यन्ते ; तद्वत् लोकदृष्टविसजातीये परे ब्रह्मणि, [5]तत्र तत्राऽ[5]दृष्टाः सहस्रशः शक्तयः सन्तीति, न किंचिदनुपपन्नम् ।

प्रत्यक्षसिद्धम् । अतः न तदर्हत्वं वाक्यं प्रतिपादयति । प्रमाणान्तरागोचरस्य तु धर्मिणः, विलक्षणत्वं शास्त्रेण प्रतिपन्नमिति, विलक्षणधर्मिणो विलक्षणधर्मयोगः, न विरुद्धः इत्यर्थः । **सामान्यतो दृष्टमिति** । लोके, 'द्रव्यत्वात् अग्निः अनुष्णः' इतिवत्, येन केनचिदाकारेण यस्य कस्यचित् साहचर्यमात्रदर्शनेन तत्सामान्यात् यत् साधनं दूषणं वा क्रियते ; न तदर्हतीत्यर्थः ॥ २७ ॥

तदप्रसक्तिश्च इति अध्याहारेण व्याख्यातम् ।

[सूत्रार्थः ; **आत्मनि च**—जीवेऽपि अचेतनधर्माणामप्रसङ्गः, **एवम्**—अचेतन-विसजातीयत्वादेव युक्ता । **हि**—यतः, **विचित्राश्च**—अचेतनगता अपि शक्तयः मिथो विलक्षणा-एव । अतो ब्रह्मणि सर्वमिदं युक्तमेव ।]

अचिद्धर्माप्रसक्तिश्च जीवात्मनि यथा तथा ।
जलादौ न यथौष्ण्यादिशक्तयश्च तथापरे ॥ (अ. प. १६६)

---

[1] अत्र—आ. [2] विरुध्यते—थ. न विरुद्धः—द. [3] दूषणं चेति—इ
[4] पटादौ—द. [5] तत्राऽ—द.

[उक्तेऽर्थे पुराणाम्नायवचनोपष्टम्भः]

यथोक्तं भगवता पराशरेण—

'निर्गुणस्याऽप्रमेयस्य शुद्धस्याऽप्यमलात्मनः ।

कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते ?' (वि. पु. 1-3-1)

इति सामान्यदृष्ट्या परिचोद्य,

'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।

यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥ (वि. पु. 1-3-2)

भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता ॥' (वि. पु. 1-3-3)

इति । श्रुतिश्च—

'किं स्विद् वनं क उ स वृक्ष आसीद्, यतो द्यावापृथिवी निष्टतक्षुः ।

मनीषिणो मनसा पृच्छतेदु तद्, यदध्यतिष्ठद्भुवनानि धारयन् ॥

(तै. ब्रां. 2-8-9-15)

ब्रह्मवनं ब्रह्म स वृक्ष आसीद्, यतो द्यावापृथिवी निष्टतक्षुः ।

मनीषिणो मनसा विब्रवीमि वो, ब्रह्माऽध्यतिष्ठद्भुवनानि धारयन् ॥'

(तै. ब्रां. 2-8-9-16)

इति । सामान्यतो दृष्टं चोद्यं, सर्ववस्तुविलक्षणे परे ब्रह्मणि नाऽवतरतीत्यर्थः ॥ २८ ॥

[प्रधानादिकारणतावादेऽपि निर्वाहदौस्स्थ्यम्]

इतश्च,

१६७. स्वपक्षदोषाच्च ॥ २-१-२९ ॥

स्वपक्षे — प्रधानादिकारणवादे, लौकिकवस्तुविसजातीयत्वाभावेन प्रधानादेः,

---

यथोक्तमित्यादि उक्तस्फुटीकरणाय । पुराणवचनस्य स्फुटार्थत्वात् पूर्वोपादानम् । वचनद्वयमध्यगतस्य 'परिचोद्ये'तिपदस्य यथोक्तमिति पूर्वेणान्वयः । सामान्यतः इति, पुराण-श्रुतिवचनयोः अर्थमाह ॥ २८ ॥

प्रधानादेरिति । दर्शनानुगुणम् अनुमीयमानस्यैव लोकदृष्टप्रसङ्ग इत्यर्थः ।

[सूत्रार्थः ; स्वपक्षे—औपनिषदेतरपक्षेऽपि, दोषाच्च—ब्रह्मणि शङ्कितानां सावयवत्व-निरवयवत्वादिकल्पायत्तदोषप्रसङ्गादपि, ब्रह्मकारणतावाद एव श्रेयान्]

'स्वपक्षे हि निरंशस्य प्रधानस्य भवेत् कथम् ।

कारणत्वं, तदा दोषादस्तु ब्रह्मैव कारणम्' ॥ (१६७)

लोकदृष्टाः दोषाः तत्र भवेयुरिति, सकलेतरविलक्षणं ब्रह्मैव कारणमभ्युपगन्तव्यम्। प्रधानं च निरवयवम्। तस्य 'निरवयवस्य'[1] कथमिव महदादिविचित्रजगदारम्भः उपपद्यते?

'सत्वं रजः तमः' इति तस्य अवयवा विद्यन्ते—इति चेत्!

तत्रेदं विवेचनीयम्....किं सत्व-रजस्-तमसां समूहः, प्रधानम्? उत सत्व-रजस्-तमोभिः आरब्धं, प्रधानम्?

अनन्तरे कल्पे, प्रधानं कारणमिति स्वाभ्युपगमविरोधः; स्वाभ्युपेतसंख्याविरोधश्च। तेषामपि निरवयवानां कार्यारम्भविरोधश्च।

समूहपक्षे च, तेषां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानां, न स्थूलद्रव्यारम्भकत्वसिद्धिः।

परमाणुकारणवादेऽपि, तथैव अणवो निरंशाः, प्रदेशभेदमनपेक्ष्य परस्परं संयुज्यमाना अपि, न स्थूलकार्यारम्भाय [2]प्रभवेयुः[2] ॥ २९ ॥

[परमात्मनः स्वेतरसमस्तवैजात्येन सर्वशक्तिमत्वेन च श्रुतितः सिद्धिः]

१६८. सर्वोपेता च तद्दर्शनात् ॥ २-१-३० ॥

स्वाभ्युपगमविरोधः, प्रधानस्य परमकारणत्वासिद्धेः। **संख्याविरोधः**, चतुर्विंशतितत्त्वाधिक्यात्। **प्रदेश....मानानाम्**—असंयुक्तप्रदेशभेदरहितसंयोगवताम्। लोके हि इष्टकादयः पूर्वपूर्वासंयुक्तैः प्रदेशैः संयुज्यमानाः, पृथुकार्यारम्भका दृष्टाः इत्यर्थः ॥ २९ ॥

सर्वेति। श्रुत्या निरवयवत्वकार्यत्वप्रतिपादनात् तदनुगुणशक्तियोगः, धर्मि वैजात्यं च कल्प्यम् इत्युक्तम्। इदानीं धर्मि वैलक्षण्यविलक्षणधर्मयोः कण्ठोक्तिः प्रदर्शितेति भेदः ॥

[सूत्रार्थः; **सर्वोपेता च**—परमात्मरूपा देवता सर्वविजातीया सर्वशक्तिमती च, **तद्दर्शनात्**—तस्यार्थस्य, 'पराऽस्य शक्तिः' इति श्रुतौ परदेवतागततया दर्शनात् ॥]

विचित्रसर्वशक्त्या च ह्युपेता देवता परा।
उपास्या श्रुतिसिद्धेति जगत्कारणमुच्यते ॥ (१६८)

---

[1] निरवयवस्य प्रधानस्य—न.   [2] भवेयुः—आ.

सकलेतरवस्तुविसजातीया परा देवता, सर्वशक्त्युपेता च । तथैव परां देवतां [1]दर्शयन्ति हि ![1] श्रुतयः —

'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञान-बल-क्रिया च' (श्वे.उ. 6-8) तथा,

'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः' (छां. उ. 8-1-5) इति सकलेतरविसजातीयतां परस्या देवतायाः प्रतिपाद्य,

'सत्यकामः सत्यसङ्कल्पः' (छां.उ. 8-1-5)

इति सर्वशक्तियोगं प्रतिपादयन्ति । तथा,

'मनोमयः प्राणशरीरो[2]भारूपः[2] सत्यसङ्कल्पः आकाशात्मा

सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः' (छां.उ. 3-14-2)

[3]इति च[3] ॥ ३० ॥

[देहेन्द्रियादिविरहिणोऽपि ब्रह्मणः श्रुतिसिद्धकारणत्वाविरोधः]

१६९. विकरणत्वान्नेतिचेत् तदुक्तम् ॥२-१-३१॥

यद्यपि एकमेव ब्रह्म, सकलेतरविलक्षणं सर्वशक्ति ; तथापि,

सर्वशक्तियोगमिति । सर्वशक्तित्वकार्येण सत्यसङ्कल्पत्वेन विलक्षणशक्तिप्रतीतिरासन्नेत्यभिप्रायः ॥ ३० ॥

विकरणत्वादिति । परिकराभावेऽपि सङ्कल्पमात्रेण सृष्टिः उक्ता । अत्र करणकलेबरापेक्षा

[सूत्रार्थः ; विकरणत्वात्—देहेन्द्रियादिराहित्यात्, नेति चेत्—ब्रह्म न कारणमित्याक्षेपे, तत् उक्तम्—अत्र वक्तव्यं समाधानं, पूर्वसूत्रयोरुक्तम् ।]

निरिन्द्रियत्वान्नो हेतुरिति चेत्तत् कृतोत्तरम् ।
न तस्य कार्यं करणमिति वाक्यात् परात्मनः ॥ (अ. प. १६९)

---

[1] दर्शयन्ति—द. दर्शयन्तीह—वा. [2] भारूपः सत्यकामः—इ, घ, ङ, त, थ.
[3] इति—द.

'न तस्य कार्यं करणं च विद्यते' (श्वे. उ. 6–8)

इति करणविरहिणः तस्य, न[1]कार्यारम्भः संभवति[1]—इति चेत् !

[2]तत्रोत्त[2]रम् ; 'शब्दमूलत्वात् (ब्र.सू. 2–1–27) 'विचित्राश्च हि' (ब्र.सू. 2-1-28) इत्युक्तम् । शब्दैक[3]प्रमाणकं[3]सकलेतरविलक्षणं, तत्तत्करणविरहेणाऽपि तत्तत्कार्यसमर्थमित्यर्थः । तथाच श्रुतिः—

'पश्यत्यचक्षुः स श्रृणोत्यकर्णः । अपाणिपादो जवनो ग्रहीता' (श्वे.उ. 3–19) इत्येवमाद्या ॥ ३१ ॥

इति कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

परिच्छियत इति विशेषः । कार्यम्—शरीरम् । करणम्—इन्द्रियम् ॥ ३१ ॥

सूत्राणि—१. कृत्स्नप्रस, २. श्रुतेस्तु,, ३. आत्मनि चैवं, ४. स्वपक्ष,
५. सर्वोपेता, ६. विकरण.]

इति कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

—o—

---

[1] कार्यारम्भसम्भवः—द्र. [2] अत्रो— [3] प्रमाणम्—च, ठ.

(45) प्रयोजनवत्त्वाधिकरणम् ॥२–१–१०॥ [सू. 32–36]

[अधि-अर्थः ; ब्रह्मणः अवाप्तसमस्तकामस्याऽपि, लीलार्थं सर्वजगत्स्रष्टृत्वोपपत्तिः]

[आप्तकामस्य भगवतः जगत्सृष्टेः प्रयोजनाभावः]

[अतश्च जगत्कारणत्वानुपपत्तिः]

१७०. न प्रयोजनवत्त्वात् ॥ २–१–३२ ॥

यद्यपि—ईश्वरः प्राक्सृष्टेः एक एव सन्, सकलेतरविलक्षणत्वेन सर्वार्थशक्तियुक्तः, [1]स्वयमेव विचित्रं[1]जगत् स्रष्टुं शक्नोति ; तथापि ईश्वरकारणत्वं न सम्भवति प्रयोजनत्वात् विचित्रसृष्टेः ; ईश्वरस्य च प्रयोजनाभावात्।

बुद्धिपूर्वकारिणामारम्भे, द्विविधं हि ! प्रयोजनम्—स्वार्थः परार्थो वा। नहि ! परस्य ब्रह्मणः स्वभावत एव[2]अवाप्त[2]समस्तकामस्य, जगत्सर्गेण किंचन प्रयोजनम्, अनवाप्तम् अवाप्यते । नाऽपि परार्थः ; अवाप्तकामस्य परार्थता हि ! परानुग्रहेण भवति ।

न च— ईदृशगर्भ-जन्म-जरा-मरण-नरकादि नानाविधानन्तदुःखबहुलं जगत्, [3]करुणावान्[3] सृजति ; प्रत्युत सुखैकतानमेव जनयेत्, जगत् करुणया सृजन्। अतः प्रयोजनाभावात्, ब्रह्मणः कारणत्वं नोपपद्यते—इति ॥ ३२ ॥

न प्रयोजनेति। संङ्गतिः स्पष्टा। कारणत्वं संभवति ? न ? इति विचारः। तदर्थम् अवाप्तसमस्तकामस्य लीला प्रयोजनं ? न ? इति ; लीलायां वैषम्यनैर्घृण्ये प्रसज्येते ? न ? इति च।

यदा प्रसज्यते, यदा च लीला न प्रयोजनम् ; तदा लीलारूपप्रयोजनासंभवात्, कारणत्वासंभवः। यदा च लीला प्रयोजनम् ; तदा अवाप्तसमस्तकामस्य लीलारूपव्यापारसंभवात्, कारणत्वसंभवः—इति सिध्यति ॥ ३२ ॥

सूत्रार्थः ; प्रयोजनवत्त्वात्—सृष्टेः सप्रयोजनत्वावश्यंभावात्, न—अवाप्तनिखिलकामं ब्रह्म, न स्रष्टृ ।]

'सृष्टेः प्रयोजनव्याप्त्या तदभावात् परात्मनः ।
स्रष्टृत्वं परिपूर्णस्य न भवेदिति चोद्यते ॥' (ब्र॰ प. १७०)

---

[1] स्वयमेवं विचित्रं—न. स्वयमेव चित्रं—द. [2] आप्त—त. थ. [3] करुणया—भा, च, ट, द.

[लीलारूपं प्रयोजनं निमित्तीकृत्य ब्रह्मणो जगत्कारणत्वसिद्धान्तः]

एवं प्राप्ते, प्रचक्ष्महे—

१७१. लोकवत्तु लीलाकैवल्यम् ॥ २-१-३३ ॥

अवाप्तसमस्तकामस्य परिपूर्णस्य स्वसङ्कल्पविकार्य[1]विविधविचित्र[1]चिदचिन्मिश्र-जगत्सर्गे, लीलैव[2]केवला[2]प्रयोजनम् । लोकवत् —यथा लोके सप्त[3]द्वीपामेव[3]मेदिनीमधितिष्ठतः, संपूर्ण[4]शौर्य-वीर्य-[4]पराक्रमस्यापि महाराजस्य, केवललीलैकप्रयोजनाः कन्दुकाद्यारम्भा दृश्यन्ते ; तथैव परस्याऽपि ब्रह्मणः स्वसङ्कल्पमात्रावक्लृप्तजगज्जन्म-स्थिति-ध्वंसादेः, लीलैव प्रयोजनमिति, निरवद्यम् ॥ ३३ ॥

[परमात्मनः सृष्टि वैविध्यनिबन्धनपक्षपातित्व-निर्दयत्वयोः शङ्का-परिहारौ]

१७२. वैषम्य-नैर्घृण्ये न सापेक्षत्वात् तथा हि ! दर्शयति ॥ २-१-३४ ॥

यद्यपि—परमपुरुषस्य सकलेतरचिदचिद्वस्तुविलक्षणस्य अचिन्त्यशक्तियोगात्, प्राक् सृष्टेः एकस्य निरवयवस्याऽपि, विचित्रचिदचिन्मिश्रजगत्सृष्टिः-संभाव्येत ; तथापि—देव-तिर्यङ्-मनुष्य-स्थावरात्मना उत्कृष्ट-मध्यमा-ऽपकृष्टसृष्ट्या, पक्षपातः प्रसज्येत ;

लीलैव केवलेति । पणबन्धपूर्वकद्यूतादिव्यावृत्त्यर्थः 'केवल' शब्दः । एवकारः, प्रयोजनोद्देशेन प्रवृत्तत्वेऽपि, यदृच्छोपनतप्रयोजनस्य अर्थात्सिद्धिव्युदासार्थः ।

स्वसंकल्पेति । कन्दुकाद्यारम्भस्य यत्नगौरवाभावात् लीलात्वं युक्तं ; न तु जगद्व्यापारस्य ; महायासरूपत्वादिति शङ्कानिवृत्त्यर्थमिदम् ॥ ३३ ॥

वैषम्य शब्दः पक्षपात शब्देन व्याख्यातः ।

[सूत्रार्थः ; लीलाकैवल्यम्—लीलैकप्रयोजनत्वं, सृष्टौ ब्रह्मणो युज्यते, लोकवत्तु—लोके राज्ञः कन्दुकक्रीडावदेव ।]

'लोके तु परिपूर्णानां कन्दुकादिविहारवत् ।
ब्रह्मणः परिपूर्णस्य सृष्टेर्लीला प्रयोजनम्' ॥ (ब्र. प. १७१)

सूत्रार्थः ; वैषम्य-नैर्घृण्ये न—(विषमसृष्टिं कुर्वतो ब्रह्मणः) पक्षपातो निर्दयत्वं च न भवतः, सापेक्षत्वात्—वैषम्यस्य क्षेत्रज्ञकर्मनिबन्धनत्वात्, तथाहि ! दर्शयति—श्रुतिः तथैव खलु स्पष्टं बोधयति ।]

न वैषम्यं न नैर्घृण्यं देवादीन् सृजतः प्रभोः ।
कर्मानुरूपं स्रष्टृत्वात् तथा दर्शयति श्रुतिः ॥ (ब्र. प. १७२)

---

[1] विविध—बा. [2] केवलं—न. [3] द्वीपां—च. [4] वीर्य-शौर्य—द.

अतिघोरदुःखयोगकरणात् नैर्घृण्यं च अवर्जनीयम्—इति ।

तत्रोत्तरम्—'न सापेक्षत्वात्'—इति । न प्रसज्येयातां वैषम्य-नैर्घृण्ये ।

कुतः ? सापेक्षत्वात्—सृज्यमानदेवादिक्षेत्रज्ञकर्मसापेक्षत्वात् विषमसृष्टेः । देवादीनां क्षेत्रज्ञानां [1]देवादिशरीरयोगं[1], तत्तत्कर्म[2]सापेक्षं[2] दर्शयन्ति हि ! श्रुति-स्मृतयः—

'साधुकारी साधुर्भवति । पापकारी पापो भवति ।

पुण्यः पुण्येन कर्मणा भवति । पापः पापेन । ' (बृ. उ. 6-4-5)

तथा भगवता पराशरेणाऽपि—देवादिवैचित्र्यहेतुः सृज्यमानानां क्षेत्रज्ञानां प्राचीनकर्म-[3]शक्तिरेव[3]—इत्युक्तम् ;

'निमित्तमात्रमेवाऽसौ सृज्यानां सर्गकर्मणि ।

प्रधानकारणीभूता यतो वै सृज्यशक्तयः ।। (वि. पु. 1-4-51)

निमित्त[4]मात्रं मुक्त्वैव[4] नान्यत् किंचिदपेक्षते ।

नीयते तपतां श्रेष्ठ ! स्वशक्त्या वस्तु वस्तुताम् ।।' (वि.पु. 1-4-52)

इति । स्वशक्त्या—स्वकर्मणैव, देवादिवस्तुताप्राप्तिरिति ।। ३४ ।।

['सृष्टेः पूर्वं जीवानामेवाभावात् सृष्टिवैषम्यप्रयोजककर्माभावशङ्का-परिहारौ]

१७३. न कर्माऽविभागादिति चेन्नाऽनादित्वादुपपद्यते चाऽप्युपलभ्यते च ।। २-१-३५ ।।

विषमसृष्टेरिति अध्याहृतम् । ईश्वरः सृष्टौ न कर्मसापेक्षः ; वैषम्यांशे एव तदपेक्षेति ।

प्रधानेति । प्राधान्यं च—असाधारणकारणत्वम् । अप्राधान्यम्-साधारणकरणत्वम् । यथा क्षेत्र-सलिलादिकं सर्वसस्यसाधारणकारणम् ; तत्तद्बीजशक्तिविशेषाः अङ्कुरविशेषोत्पत्तौ असाधारणकारणं, तथा ईश्वरस्य साधारणकारणत्वात् निमित्तमात्रत्वम् । कर्मणां विषमसृष्ट्य-साधारणकारणत्वात् प्राधान्यमित्यर्थः ।।

[सूत्रार्थः ; न कर्म—सृष्टेः प्राक् विषमसृष्टेर्हेतुभूतं कर्म नाऽस्ति, अविभागात्—'सदेवैकम्' इति ब्रह्मणः सकाशाद्विभागस्यैवाभावश्रवणात् (क्षेत्रज्ञ-तत्कर्मणामभावात्) इति चेन्न—एवं शङ्कनमनुचितम्, अनादित्वात्—क्षेत्रज्ञतत्कर्मणां कदापि इदंप्रथमताया अभावात्, उपपद्यतेऽपि च—अनादित्वेपि ब्रह्मणः अविभागो युज्यत एव, उपलभ्यते च—जीवानामनादित्वं श्रुत्यादिषु 'न जायते' इत्यादिना स्फुटं श्रूयते च ।।]

जीवा भावेनाऽविभागान्नास्ति कर्म तदेति चेत् ।
जीवस्यानादिता श्रुत्याऽविभागोऽप्युपपद्यते ।। (अ. प. १७३)

---

[1] देवादियोगं—ध. [2] सापेक्षत्वं—न. [3] शक्तिः—इ. [4] मात्रमुक्त्वैव—त.

प्राक् सृष्टेः [1]क्षेत्रज्ञा नाम[1] न सन्ति ।

कुतः ?, अविभागश्रवणात्;

'सदेव सोम्येदमग्र आसीत्' (छां. उ. 6-2-1)

इति । अतः तदानीं तदभावात्, तत्कर्म न विद्यते; कथं 'तदपेक्षं सृष्टिवैषम्यम्' इत्युच्यते ?—इति चेत्!

न;—अनादित्वात् क्षेत्रज्ञानां तत्कर्मप्रवाहाणां च। तदनादित्वेऽपि अविभागः उपपद्यते च; [2]यतः तत्[2]क्षेत्रज्ञवस्तु परित्यक्त[3]नाम-रूपं, ब्रह्म[3]शरीरतयाऽपि पृथग्व्यपदेशानर्हम्, अति[4]सूक्ष्मम्[4] ।

तथा अनभ्युपगमे, अकृताभ्यागम-कृतविप्रणाशप्रसङ्गश्च। उपलभ्यते च तेषाम् अनादित्वम्;

'न जायते म्रियते वा विपश्चित्' (कठ.उ. 2-18)

इति । सृष्टिप्रवाहानादित्वं च—

'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' (तै. ना. उ. 1-44)

इत्यादौ ।

'तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नाम-रूपाभ्यां व्याक्रियत' (बृ.उ. 3-4-7)

इति नाम-रूपव्याकरणमात्रश्रवणात्, क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम् । स्मृतावपि,

'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' (भ. गी. 13-19)

इति । अतः सर्वविलक्षणत्वात्, सर्वशक्तित्वात्, लीलैकप्रयोजनत्वात्, क्षेत्रज्ञकर्मानुगुण्येन विचित्रसृष्टियोगात्, ब्रह्मैव जगत्कारणम् ॥ ३५ ॥

तदनादित्वेऽपि इति, [सूत्रगतम्] 'अपि'शब्दं व्याचष्टे ।

अकृताभ्यागमेति । [अनेन] उपपद्यते च इति 'च'शब्दाभिप्रेतार्थमाह । स्वरूपानादित्वे सत्यपि, सृष्टिप्रवाहानादित्वे सति हि ! कर्मप्रवाहानादित्वसिद्धिः। अतः सूर्याचन्द्रमासौ इति च सृष्टिप्रवाहानादित्वं दर्शयति। प्रतिकल्पमधीतस्यास्य वाक्यस्य अर्थवत्त्वात्, सृष्टेः अनादित्वसिद्धिः ।

अतः इति। [अनेन] तत्तत्सूत्रोक्तानर्थान् यथाक्रमं वदन् अधिकरणार्थमुपसंहरति ॥३५॥

---

[1] क्षेत्रज्ञाः—ठ,त,थ. [2] तत्—त, थ. [3] नाम-रूपब्रह्म—द. [4] सूक्ष्ममवतिष्ठते—ब, वा.

[ब्रह्मणो जगत्कारणत्वे निर्दुष्टतया सर्वार्थोपपन्नता]

१७४. सर्वधर्मोपपत्तेश्च ॥ २-१-३६ ॥

प्रधानपरमाण्वादीनां [1]'कारणत्वे' यद्धर्मवैकल्यम्, उक्तं वक्ष्यमाणं च, तस्य सर्वस्य धर्मजातस्य कारणत्वोपपादिनः ब्रह्मण्युपपत्तेश्च, ब्रह्मैव जगत्कारणम्—इति स्थितम् ॥ ३६ ॥

इति प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

सर्वधर्मोपपत्तेश्चेति। इदं सूत्रं सर्वाधिकरणशेषम्। **ब्रह्मैवेति**। [सूत्रस्य] पञ्चम्याः अन्वयं दर्शयति। परमप्रकृतसाध्येनान्वय इत्यर्थः ॥ ३६ ॥

[सूत्राणि—१. न प्रयोजन २. लोकवत्तु ३. वैषम्य ४. न कर्माऽवि
५. सर्वधर्मो]

इति प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥
इति द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

[सूत्रार्थः ; **सर्वधर्माणां**—(जगत्स्रष्टृत्वौपयिकानां) सर्वेषां सर्वज्ञत्वादिधर्माणाम्, **उपपत्तेश्च**—परब्रह्मण्येव उपपन्नत्वाद्धेतोः ब्रह्मैव जगतः कारणम् ॥]

'प्रधान-परमाण्वादि हेतुत्वे यच्च दूषणम्।
न ब्रह्महेतुतायां तत् सर्वधर्मोपपत्तितः ॥ (अ. प. १७४)

—o—

---

[1] यत्कारणत्वे—द.

श्रीभाष्ये द्वितीयस्याऽध्यायस्य

द्वितीयः पादः

अधिकरणार्थसूचनी

—o—

सं.	अधिकरणनामानि	अर्थाः
(1)	रचनानुपपत्त्यधिकरणम्	ब्रह्मानधिष्ठितस्य साङ्ख्योक्तप्रधानस्य जगत्कारणत्वायोगः ।
(2)	महद्दीर्घाधिकरणम्	तार्किकाभिमतपरमाणुकारणतावादनिरासः ।
(3)	समुदायाधिकरणम्	बौद्ध-वैभाषिक-सौत्रान्तिकपक्षयोः निरसनम् ।
(4)	उपलब्ध्यधिकरणम्	विज्ञानमात्रास्तित्ववादियोगाचारपक्षप्रतिक्षेपः ।
(5)	सर्वथाऽनुपपत्त्यधिकरणम्	माध्यमिकाभिमतसर्वशून्यवादप्रतिक्षेपः ।
(6)	एकस्मिन्नसम्भवाधिकरणम्	आर्हताभ्युपगतानेकान्तवादनिरासः ।
(7)	पशुपत्यधिकरणम्	वेदविरुद्धाभिप्रायकपाशुपतमतनिरासः ।
(8)	उत्पत्त्यसम्भवाधिकरणम्	जीवोत्पत्तिवादशङ्कितपाञ्चरात्राप्रामाण्यनिरासः ।

—o—

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ॥

श्री भगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये

द्वितीयस्याध्यायस्य द्वितीयः (तर्क) पादः

[पादार्थः —साङ्ख्यादिपक्षाणां, तर्कतः प्रतिक्षेपः ; पाञ्चरात्रतन्त्रप्रामाण्यस्थापनं च]

(अधिकरणानि—८. सूत्राणि—४२)

(46) रचनानुपपत्त्यधिकरणम् ॥ २–२–१ ॥

[अधि-अर्थः—ब्रह्मानधिष्ठितस्य साङ्ख्योक्तप्रधानस्य जगत्कारणत्वायोगः]

१७५. रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥ २-२-१॥

[आदितः एतावदन्तं शारीरके निरूपिता अर्थाः ; सङ्गतिः, द्वितीयपादप्रयोजनं च]

उक्तं—'जगज्जन्मादिकारणं परं ब्रह्म'—इति । तत्र परैरुद्भाविताश्च दोषाः परिहृताः ।

इदानीं—स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्ते : इतरथा, कस्यचिन्मन्दधियः, तेषां पक्षाणां युक्त्याभासमूलतामजानतः, प्रामाणिकत्वशङ्कया [1]वैदिक[1]पक्षे किंचित् श्रद्धावैकल्यं जायेताऽपि । अतः परपक्ष प्रतिक्षेपाय [2]अनन्तरः पादः[2] प्रवर्तते ॥

तत्र—कारणविषये। **इदानीमिति** । परपक्षोक्तकारणविषयं दूषणं क्रियत इत्यर्थः । अनेन, तृतीयपादस्य पूर्वभावित्वशङ्का निरस्ता । तत्र कार्यविषये परोक्तदूषणपरिहारो हि क्रियते । अतः कारणविषये स्वमतस्थापनं परपक्षदूषणं च सङ्गतम् ।

[सूत्रार्थः ; **अनुमानम्**—(चेतनाधिष्ठानरहितं) सांख्योक्तं प्रधानम् , **रचनानुपपत्तेश्च**—कार्यजनकत्वायोगादेव, **न**—जगत्कारणं न भवितुमर्हति, **प्रवृत्तेश्च**—अचेतनस्य चेतनाधिष्ठानवत एव कार्यजनकत्वदर्शनादपि ।]

सृष्ट्याद्यनुपपत्तेश्च नाऽनुमानं तु कारणम् ।
ब्रह्मणाऽधिष्ठितस्यास्य जगत्सृष्टौ प्रवृत्तितः ॥ (ब्र. प. १७५)

---

[1] वैदिके—द. [2] अनन्तरपादः—त, थ.

[कपिलमतनिरासप्राथम्ये हेतुः ; पौनरुक्त्यनिरासश्च]

तत्र प्रथमं तावत्, कापिलमतं निरस्यते ; वैदिकानुमतसत्कार्यवादाद्यर्थसंग्रहेण एतस्य सत्पक्षनिक्षेपसंभावनाभ्रमहेतुत्वातिरेकात् ।

'ईक्षतेर्नाऽशब्दम्' (ब्र.सू. 1-1-5)

इत्यादिभिः, वैदिकवाक्यानाम् अतत्परत्वमात्रमुक्तम् । अत्रैव तत्पक्षस्वरूपप्रतिक्षेपः क्रियत इति, न पौनरुक्त्याशङ्का ॥

[सांख्यमतप्रक्रियाप्रदर्शनम्]

[1]एषा हि ![1] सांख्यानां दर्शनस्थितिः—

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।

षोडश[2]कश्च[2]विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥' (सां. का. 3)

इति तत्त्वसंग्रहः । मूलप्रकृतिर्नाम, सुख-दुःख-मोहात्मकानि लाघवप्रकाश-[3]चलनोपष्टम्भन[3]-गौरवावरणकार्याणि, अत्यन्तातीन्द्रियाणि कार्यैक[4]निरूपण[4]विवेकानि, अन्यूनानतिरेकाणि समतामुपेतानि, सत्त्व-रजस्-तमांसि द्रव्याणि । सा च सत्त्व-रजस्-तमसां

सत्कार्यवादादीत्यादिशब्देन चतुर्विंशतितत्त्वस्वीकारो विवक्षितः ॥

किं ब्रह्मकारणवादः एकान्ततः श्रद्धेयः ? उत न ? इति । तदर्थं प्रधानं जगत्कारणं ? न ? इति । किं प्रधानस्य पुरुषसंनिधानात् पङ्गुसंनिधानात् अन्धस्येव प्रवृत्तिः संभवति ? न ? इति । किं अन्धस्य पङ्गुसंनिधानात् मार्गावलोकनव्यापारवत्, पुरुषसंनिधानात् तच्छायापत्त्या वा [प्रधानस्य] ज्ञातृत्वं संभवति ? न ? इति ।

यदा ज्ञातृत्वसंभवः, तदा प्रवृत्तिसंभवात् प्रधानकारणत्वम् उपपन्नमिति ; न एकान्ततो ब्रह्मकारणवादः श्रद्धेयः । यदा ज्ञातृत्वासंभवः, तदा प्रवृत्त्यसंभवात् प्रधानकारणवादानुपपत्तेः, ब्रह्मकारणवादः एकान्ततः श्रद्धेय इति सिध्यति ॥ [इति पूर्वोत्तरपक्षयोः फलम्]

[सम्भावना—उत्कटैककोटिकः संशयः । भ्रमः—विपरीतनिर्णयः । तदुभयम् इत्यर्थः । अतिरेकः—अतिशयः (भा. द.)]

लाघवम्—अनलपवनादीनाम् ऊर्ध्वज्वलन-तिर्यग्गमनादिहेतुर्धर्मः । चलनम्—सक्रियतया, अक्रिययोः सत्त्व-तमसोः कार्योन्मुखावस्थापादनम् (भा. प्र.) । उपष्टम्भनम्—धारणम् । [गौरवम्—पतनहेतुर्धर्मः । आवरणम्—अप्रकाशः (भा. द.) । अत्यन्तातीन्द्रियाणि—नित्यानुमेयानि । अन्यूनानतिरेकाणीति 'सम'शब्दव्याख्यानायोक्तम् ।

---

[1] एषा—च. [2] कस्तु—पा. [3] चलनावष्टम्भन—थ, द. [4] निरूपणीय—त,थ,द,न.

साम्यरूपा प्रकृतिः, एका स्वयमचेतना, अनेकचेतनभोगापवर्गार्था नित्या सर्वगता सतत-विक्रिया ; न कस्यचिद्विकृतिः ; अपि तु परमकारणमेव ।

महदाद्याः, तद्विकृतयः ; अन्येषां च प्रकृतयः सप्त—महान्, अहङ्कारः, शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रम्—इति ।

तत्र अहङ्कारः, त्रिधा—वैकारिकः तैजसः भूतादिश्च ; क्रमात्—सात्विकः राजसः तामसश्च । तत्र वैकारिकः—सात्विकः इन्द्रियादिः । भूतादिः—तामसः, महाभूतहेतुभूततन्मात्रहेतुः । तैजसः—राजसस्तु, उभयोः अनुग्राहकः ।

आकाशादीनि पञ्च, महाभूतानि ; श्रोत्रादीनि पञ्च, ज्ञानेन्द्रियाणि ; वागादीनि पञ्च, कर्मेन्द्रियाणि ; मनः—इति केवल विकाराः षोडश ॥

पुरुषस्तु, निष्परिणामित्वेन न कस्यचित् प्रकृतिः ; न कस्यचित् विकृतिः । तत एव, निर्धर्मकः चैतन्यमात्रवपुः नित्यः निष्क्रियः सर्वगतः प्रतिशरीरं भिन्नश्च । निर्विकारत्वात् निष्क्रियत्वाच्च, तस्य कर्तृत्वं भोक्तृत्वं च न संभवति ।

एवम्भूतेऽपि तत्वे, मूढाः प्रकृति-पुरुष संनिधिमात्रेण पुरुषस्य चैतन्यं प्रकृतौ अध्यस्य, प्रकृतेश्च कर्तृत्वं, स्फटिकमणाविव जपाकुसुमस्य अरुणिमानं, पुरुषे अध्यस्य, 'अहं कर्ता, भोक्ता' इति मन्यन्ते । एवम् अज्ञानाद्भोगः, तत्वज्ञानाच्च अपवर्गः ॥ तदेतत्, प्रत्यक्षानुमानागमैः साधयन्ति ।

[सम्प्रतिपन्नोंऽशः निरसनीयोंऽशश्च]

तत्र प्रत्यक्षसिद्धेषु पदार्थेषु, नातीव[1]विवादपद[1]मस्ति । 'आगमोऽपि कपिलादि-सर्वज्ञज्ञानमूलः' इति, सोऽपि प्रथमे काण्डे प्रमाणलक्षणे निरस्तप्रायः ।

[अन्यथा] येन केनचिदाकारेण साम्यं स्यादिति । सत्त्व-रजस्-तमस्समूहः प्रकृतिरित्यर्थः । विकृतिः—कार्यम् ।

महदाद्या इति । स्वकारणापेक्षया विकृतयः ; स्वकार्यापेक्षया प्रकृतयः इत्यर्थः ।

षोडशकश्चेति चकारः, एवकारार्थः । षोडशको विकार एवेत्यर्थः ॥

निर्धर्मकः—ज्ञातृत्वरहितः । तद्धि ! अन्तःकरणस्येति तन्मतम् ।

तत्त्वम्—अर्थस्थितिः । **नातीवेति** । सत्कार्यवाद-समवायानभ्युपगमादिभिः न विवादः इत्यर्थः । अभिव्यक्त्यवस्थावैषम्यादिकमभिप्रेत्य **'नातीव'** इत्युक्तम् । **निरस्तप्राय इति** ।

---

[1] विवादास्पद—अा.

यदिदं–'प्रधानमेव जगत्कारणम्' इत्यनुमानम्; तन्निरसनेन[1]तन्मतं सर्वं[1]निरस्तं भवतीति, तदेव निरस्यते ॥

[तदीयानुमाननिरासार्थं तदीयप्रक्रियाशोधनम्]

ते च, एवं वर्णयन्ति—कृत्स्नस्य जगतः, एकमूलत्वम् अवश्याभ्युपगमनीयम्; अनेकेभ्यः कार्योत्पत्त्यभ्युपगमे कारणानवस्थानात्। तन्तुप्रभृतयो हि! अवयवाः, स्वांशभूतैः षड्भिः पार्श्वैः परस्परं संयुज्यमानाः, अवयविनमुत्पादयन्ति। ते च तन्त्वादयः स्वावयवैः [2]तथाभूतैः उत्पाद्यन्ते। ते च तथाभूतैः [2]स्वावयवैः, इति, परमाणुभिरपि स्वकीयैः [3]षड्भिः पार्श्वैः [3]संयुज्यमानैरेव, स्वकार्योत्पादनम् [4]अभ्युपेतव्यम्[4]; अन्यथा प्रथिमानुपपत्तेः। परमाणवोऽपि, अंशित्वेन स्वांशैः तथैवोत्पाद्यन्ते, ते च स्वांशैः इति, न क्वचित् कारणव्यवस्थितिः ॥

[5]अतः[5] कारणव्यवस्थासिद्ध्यर्थम्, [6]एकं द्रव्यम्[6] विविधविचित्रपरिणामशक्तियुक्तम्, स्वयम् अप्रच्युतस्वरूपमेव, महदाद्यनन्तावस्था[7]श्रयः[7], कारणमाश्रयणीयम्। तच्च एकं कारणम्, गुणत्रयसाम्यरूपं प्रधानमिति, तत्कल्पने हेतूनुपन्यस्यन्ति—

वेदस्य प्रधानादिपरत्वव्यावृत्तिः प्रथमाध्याये दर्शिता। कपिलागमस्य तु निरासः, धर्मविचारारम्भे फलितः इत्यर्थः। **यदिदमिति**। अनुमानमेकं स्थितम्। तस्मिन् निरस्ते सर्वं निरस्तं भवतीत्यर्थः।

तन्तुप्रभृतय इति। असंयुक्तप्रदेशेन संयुक्तैरेव पृथ्वादिकार्योत्पादनं दृश्यते। यदि असंयुक्तप्रदेशभेदमनपेक्ष्य, एकत्र सर्वे संयुज्यन्ते; तर्हि एकस्मात् परमाणोः अनतिरिक्तप्रदेशतया, पृथ्वादिकार्यं नोत्पद्यते ॥ प्रदेशभेदः परमाणोरस्ति चेत्!, सांशत्वात् तस्याप्यारंभकापेक्षया, अनवस्थेत्यर्थः ॥ [**प्रथिमा**—स्थूलता। **अंशित्वेन**—सावयवत्वेन।]

स्वयम् अप्रच्युतेति, एकस्मिन् कार्ये कृत्स्नस्य निरवशेषान्वयव्यावृत्त्यर्थम्। एवं परमाणुव्यावृत्तिः सिद्धा। **तच्चैकम् इति**, ब्रह्मव्यावृत्त्यर्थम्।

---

[1] तन्मतं—वा. [2] तथाभूतैः—थ. [3] षड्भिः—इ. [4] अभ्युपेत्यम्—द.
[5] ततः—त, थ. [6] एकद्रव्यम्—च. [7] श्रयम्—द, न.

[अव्यक्तापरपर्यायप्रधानकल्पने हेतवः]

'भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।
कारण-कार्यविभागादविभागाद् वैश्वरूप्यस्य ॥
कारणमस्त्यव्यक्तम्' (सां. का. 15, 16)

इति । अयमर्थः—विश्वरूपमेव वैश्वरूप्यम्; विचित्रसंनिवेशं तनु-भुवनादि कृत्स्नं जगत् । तच्च जगत्, विचित्रसंनिवेशत्वेन कार्यभूतं, तत्सरूपाव्यक्तकारणकम् ।

कुतः?; कार्यत्वात् । कार्यस्य हि! सर्वस्य, [1]तत्सरूपात्[1] कारणविशेषात् विभागः; तस्मिन्नेव अविभागश्च दृश्यते । यथा घट-मकुटादेः कार्यस्य, तत्सरूपात् मृत्-सुवर्णादेः कारणात् विभागः; तस्मिन्नेव च अविभागः ।

अतः विश्वरूपस्य—जगतः, तत्सरूपात् प्रधानादुत्पत्तिः, तस्मिन्नेव लयश्चेति, प्रधान[2]कारणकमेव[2] जगत् । गुणत्रयसाम्यरूपं प्रधानमेव, जग[3]त्सरूपं[3] कारणम्; सत्त्व-रजस्-तमोमय-सुख-दुःख-मोहात्मकत्वात् जगतः । [4]यथा[4] मृदात्मनो घटस्य मृद्द्रव्यमेव कारणम् ॥ तदेव हि! तदुत्पत्त्याख्य[5]प्रवृत्तिशक्तिमत्[5]; तथा दर्शनात् ॥

अव्यक्तस्य गुणसाम्यरूपस्य, देशतः कालतश्च अपरिमितस्यैव कारणत्वम्; भेदानां—महदहङ्कारतन्मात्रादीनां परिमितत्वात्, अवगम्यते । महदादीनि च घटादिवत् परिमितानि, कृत्स्नजगदुत्पत्तौ न प्रभवन्ति । अतः त्रिगुणं जगत्, गुणत्रयसाम्यरूपप्रधानैक[6]कारणकम्[6]—इति निश्चीयते ॥

कार्यस्य हीति, व्याप्तिप्रदर्शनम् ।

अतो विश्वरूपस्येति, पक्षधर्मताबलात् सिद्धमर्थमाह ।

अतः त्रिगुणमिति । जगत्, विचित्रसंनिवेशत्वात् कार्यम्; रथादिवत् । जगत्, स्वसमानरूपकारणकम्; कार्यत्वात्, यत् कार्यं तत्, स्वसमानरूपकारणकं दृष्टम् । यथा घटादि-इत्यनुमानशरीरम् । अत्र सत्त्वरजस्तमोमयसुखदुःखमोहानां कार्ये अन्वयदर्शनात्, तदुत्पादनशक्तं सत्त्वरजस्तमोमयमेव कारणम् । तस्य परिमितत्वे कृत्स्नकारणत्वानुपपत्त्या, तस्याऽपि कारणापेक्षया अनवस्थानाच्च, अपरिच्छिन्नं वस्तु कारणं भवतीति, पक्षधर्मताबलात् सिद्धम् ।

---

[1] तत्स्वरूपात्—न. [2] कारणमेव—द. [3] त्स्वरूप—ज. [4] यथा च—वा.
[5] शक्तिप्रवृत्तिमत्—न. [6] कारणम्—द.

[चेतनानधिष्ठितप्रधानकारणतावादनिरासरूपः सिद्धान्तः]

अत्रोच्यते—रचनानुपपत्तेश्च नाऽनुमानं प्रवृत्तेश्च—। अनुमीयत इति अनुमानम्। न भवदुक्तं प्रधानं, विचित्रजगद्रचनासमर्थम्; अचेतनत्वे सति, [1]तत्स्वभावाभिज्ञा[1]-नधिष्ठितत्वात्। यदेवं, तत् तथा; यथा रथ-प्रासादादिनिर्माणे केवलदार्वादिकम्।

दार्वादेः अचेतनस्य तज्ज्ञानधिष्ठितस्य, कार्यारंभानुपपत्तेर्दर्शनात्; तज्ज्ञाधिष्ठितस्य, कार्यारंभप्रवृत्तेर्दर्शनाच्च, 'न प्राज्ञानधिष्ठितं प्रधानं कारणम्' इत्युक्तं भवति। चकारात्, अन्वयस्य अनैकान्त्यं समुच्चिनोति। न हि! अन्वितं [2]शौक्ल्य-गोत्वादि[2]-कारणत्वव्याप्तम्॥

[कार्ये अन्वयवतः कारणत्वमिति व्याप्तेः द्रव्यविश्रान्तता, सत्त्वादीनां गुणता च]

न च वाच्यम्—माभूत्, अन्वितानामपि शौक्ल्यादिधर्माणां कारणत्वम्। द्रव्यस्य [3]तु हेमादेः[3], [4]कार्ये अन्वितस्य,[4] कारणत्वव्याप्तिरस्त्येव। सत्त्वादीन्यपि द्रव्याणि, [5]कार्ये अन्वितानि,[5] कारणत्वव्याप्तानि—इति;

यतः सत्त्वादयः द्रव्यधर्माः; न तु द्रव्यस्वरूपम्। सत्त्वादयो हि! पृथिव्यादिद्रव्यगतलघुत्व-प्रकाशादिहेतुभूताः, तत्स्वभावविशेषा एव। न तु

अनुमीयत इति। 'अनुमान' शब्दस्य अनुमितिपरत्वे, कस्येत्यपेक्षायां, 'प्रधानस्य' इति धर्मिवाचिषष्ठ्यन्तपदाध्याहारप्रसङ्गात्। न भवदुक्तमित्यादिना, प्रत्यनुमानोपयोगिनीं व्याप्तिं शिक्षयति। अनुपपत्तेर्दर्शनात्, प्रवृत्तेर्दर्शनाच्च इति, दृष्टान्ते अन्वय-व्यतिरेकौ। चकारादिति। कार्येऽन्वितस्य मृदादेः कारणत्वं दृश्यते; तथा सत्त्वादिमयसुख-दुःखादेः कार्येऽन्वयात्, कार्ये सत्त्वाद्यन्वयः सिद्ध इति, सत्त्वादीनां कारणत्वम् इति ह्युक्तम्। तस्य शौक्ल्यादिषु अनैकान्त्यमित्यर्थः।

माभूदिति। 'कार्ये समन्वितद्रव्यत्वात्' इति [हेतूकरणे] द्रव्यत्वमसिद्धमित्यर्थः।

सत्त्वादयो हीति। लघुत्वादिकार्यद्वारा सत्त्वादीनां सुख-दुःखादिहेतुत्वमिति मन्तव्यम्। गुणा इत्येव चेति। सत्त्वादीनां द्रव्यत्वस्य अप्रामाणिकतया, 'गुण' शब्दस्य अस्वारस्यमयुक्तम् इति भावः। जगत् प्राज्ञानधिष्ठिताचेतनकारणकं न भवति; कार्यत्वात्। यत् कार्यं, तत्

---

[1] तत्स्वभावाविज्ञा—द. [2] गोत्वादि—इ. [3] हेमादेः—त, थ. [4] कार्यान्वितस्य—वा.
[5] कार्यान्वितानि—वा.

[1]मृद्धिरण्यादिवत्[1] द्रव्यतया कार्यान्विता उपलभ्यन्ते। गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः ॥

[सांख्यमते तदीप्सितकारणव्यवस्थाया अनुपपत्तिः]

यच्च—कारणव्यवस्थासिद्धये जगतः एकमूलत्वमुक्तम्;

तदपि, सत्त्वादीनाम् अनेकत्वात्, नोपपद्यते। अत एव कारणव्यवस्था च न सिध्यति। साम्यावस्थाः सत्त्वादय एव हि! प्रधानमिति, [2]त्वन्मतम्[2]। अतः कारण-बहुत्वात् अनवस्था तदवस्थैव।

न च—तेषाम् अपरिमितत्वेन व्यवस्थासिद्धिः; अपरिमितत्वे हि!, त्रयाणामपि सर्वगतत्वेन न्यूनाधिकभावाभावात् वैषम्यासिद्धेः, कार्यारम्भासंभवात्, कार्यारंभायैव परिमितत्वम् अवश्याश्रयणीयम् ॥ १ ॥

[सर्वस्याऽपि पक्षतया, प्राज्ञानधिष्ठिताचेतनप्रवृत्तौ दृष्टान्तासिद्धिः]

यत्र रथादिषु स्पष्टं चेतनाधिष्ठितत्वं दृष्टम्; तद्व्यतिरिक्तं सर्वं पक्षीकृतम् इत्याह—

स्वाभिज्ञानधिष्ठिताचेतनोपादानकं न भवति। यथा घटादिकं चेतनाधिष्ठितकारणकं दृष्टम्। यत् प्राज्ञाधिष्ठिताचेतनोपादानकं न भवति, तत् कार्यमपि न भवति; यथा नित्यं तुच्छं वा—इति प्रत्यनुमानम्।

अत एवेति। अनेकत्वादेव कारणव्यवस्था च नास्तीत्यर्थः।

अतः कारणेति। बहूनां कारणानां विषमावस्थत्वेनैव कारणत्वदर्शनात्, परिमितानामेव वैषम्यदर्शनाच्च, विषमावस्थानां परिमितानां पार्श्वविशेषैः संयुक्तानामेव, पृथुकार्यारम्भकत्वं स्यात्। तेषामपि विषमत्वात् परिमितत्वाच्च, कार्यत्वात् कारणान्तरापेक्षत्वं स्यात्। तेषामपि [तथैवेति] अनवस्थेत्यर्थः। **परिमितत्वमिति**। कार्यारंभसिद्ध्यर्थंवैषम्यसिद्ध्यर्थं परिमितत्वमाश्रयणीय-मित्यर्थः।

तत् पक्षीकृतम्—तत्रापि प्राज्ञाधिष्ठितत्वं सिषाधयिषितम्।

---

[1] मृद्धिरण्यादि—ध. [2] तन्मतम्—न.

१७६. पयोऽम्बुवच्चेत् तत्राऽपि ॥ २-२-२ ॥

यदुक्तम्—प्रधानस्य प्राज्ञानधिष्ठितस्य विचित्रजगद्रचनानुपपत्तिः—इति,

तन्न ; यतः पयोऽम्बुवत् प्रवृत्तिरुप[1]पद्यते[1] । पयसस्तावत् दधिभावेन परिणममानस्य अनन्यापेक्षस्य, आद्यपरि[2]स्पन्द[2]प्रभृतिपरिणामपरम्परा स्वत एवोपलभ्यते । यथा च वारिदविमुक्तस्य अम्बुनः एकरसस्य, नारिकेल-ताल-चूत-कपित्थ-निम्ब-तिन्त्रिण्यादिविचित्ररसरूपेण परिणामप्रवृत्तिः, स्वत एव [3]दृश्यते[3] ; तथा प्रधानस्याऽपि परिणामस्वभावस्य, अन्यानधिष्ठितस्यैव प्रतिसर्गावस्थायां सदृशपरिणामेनाऽवस्थितस्य, सर्गावस्थायां गुणवैषम्य[4]निमित्त[4]विचित्रपरिणामः उपपद्यते । यथोक्तम्—

'परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्' (सां. का. 16)

इति । तदेवम् , अव्यक्तम् [5]अनन्यापेक्षं[5] प्रवर्तते—इति चेत् !

अत उत्तरम्—'तत्रापि'—इति । यत् क्षीरजलादि दृष्टान्ततया निदर्शितम् ; तत्राऽपि प्राज्ञानधिष्ठाने प्रवृत्तिर्नोपपद्यते । तदपि पूर्वत्र पक्षीकृतम्—इत्यभिप्रायः ।

'आद्य'शब्दः, चक्रभ्रमपरिणामादिव्यावृत्त्यर्थम् । 'परिस्पन्द' शब्देन अन्यथाभावोद्योगो विवक्षितः ; न तु चलनम् । **प्रतिप्रतीति** । वस्तुषु प्रत्येकगुणानाम् अङ्गाङ्गिभावेनावस्थानरूपवैषम्यात्, सलिलवत् स्वत एव परिणामात , जगत्प्रवृत्तिः चेतननिरपेक्षा उपपद्यत इत्यर्थः ॥

नोपपद्यत इति। 'रचनानुपपत्तेः' इति पूर्वसूत्रनिर्देशसामर्थ्यानुरोधात्, इहापि 'अनुपपत्तेः' इत्यध्याहार उपपन्नः इत्यभिप्रायः ।

[सूत्रार्थः ; **पयोऽम्बुवत् चेत् !**—(चेतनानधिष्ठितयोः) क्षीर-नीरयोरिव, प्रधानस्याऽपि प्राज्ञानधिष्ठितस्याऽपि प्रवृत्तिर्युज्यते इति शङ्कनं न युज्यते, **तत्राऽपि**—क्षीर-नीरयोरपि (चेतनानधिष्ठानानिश्चयात् ॥]

क्षीराम्बुनोर्दधित्वाम्ररसाभ्यां तु यथा जनिः ।
तथाऽत्राऽपि भवेन्नैवं तत्राऽपि प्राज्ञसंयुतेः ॥ (ब्र. प. १७६)

---

[1] लभ्यते—क, ञ.　[2] स्पन्द—द.　[3] उपदृश्यते—द.　[4] निमित्तः—द.
[5] अन्यानपेक्षं—वा.

[पूर्वोक्तविरोधाशङ्का-तत्परिहारौ]

'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि' (ब्र. सू. 2-1-24)

इत्यत्र, दृष्टपरिकरान्तररहितस्याऽपि स्वासाधारणपरिणाम उपपद्यते—[1]इत्येतावदुक्तम्[1] ; न[2]प्राज्ञाधिष्ठितत्वं[2] पराकृतम् ;

'योऽप्सु तिष्ठन्' (बृ. उ. 5-7-8)

इत्यादिश्रुतेः ॥ २ ॥

१७७. व्यतिरेकानवास्थितेश्चाऽनपेक्षत्वात् ॥ २–२–३ ॥

[प्राज्ञाधिष्ठानानपेक्षत्वे सर्ग-प्रतिसर्गव्यवस्थालोपः]

इतश्च, सत्यसङ्कल्पेश्वराधिष्ठानानपेक्षपरिणामित्वे, सर्ग[3]व्यतिरेकेण[3]—प्रतिसर्गावस्थया, अनवस्थितिप्रसङ्गाच्च, न प्राज्ञानधिष्ठितं प्रधानं कारणम् । प्राज्ञाधिष्ठितत्वे, तस्य सत्यसङ्कल्पत्वेन सर्ग प्रतिसर्ग [4]विचित्र[4] सृष्टिव्यवस्थासिद्धिः ।

[प्राज्ञाधिष्ठानेऽपि व्यवस्थालोपशंका-तत्परिहारौ]

न च वाच्यम्—प्राज्ञाधिष्ठितत्वेऽपि, तस्य अवाप्तसमस्तकामस्य परिपूर्णस्य अनवधिकातिशयानन्दस्य निरवद्यस्य निरञ्जनस्य सर्ग-प्रतिसर्गव्यवस्थाहेत्वभावात्,

---

न प्राज्ञेत्यादि । शरीरव्यतिरिक्तदण्ड-चक्रादिस्थानीयाचिद्रूपपरिकारन्तरनैरपेक्ष्यमुक्तमिति, अविरोध इत्यर्थः ॥ २ ॥

इतश्च इति वाक्यभेदः । प्रसङ्गाच्चेति । प्रतिसर्गावस्थोपलक्षितावस्थानाभावप्रसङ्गाच्चेत्यर्थः ।

अवाप्तेति । अवधारणगर्भमिदम् ; अब्भक्ष इतिवत् । अवाप्ता एव समस्ताः कामाः येन सः । अवाप्तव्यं नास्तीत्यर्थः । कुतः ? गुण-विभूतिभिः परिपूर्णत्वात् । अनवधिकेत्यादि । तिष्ठन्तु गुणाः विभूतयश्च । तथापि [भगवतः] स्वेनैवावाप्तसमस्तकामत्वम् [इत्याशयः] ।

[सूत्रार्थः ; (प्राज्ञानधिष्ठितप्रधानस्य कारणत्वे) व्यतिरेकेण—प्रलयावस्थया, अनवस्थितेश्च—अवस्थानस्याभावप्रसङ्गादपि, (कुत इति चेत् !) अनपेक्षत्वात्—चेतनाधिष्ठानापेक्षत्वाभावात् । (प्रधानकारणत्वानुपपत्तेः)]

अनपेक्षप्रवृत्तित्वे सर्वदा सृष्टिरेव हि ।
प्रलयादेरभावाच्च व्यवस्था च न सिध्यति ॥ (ब्र. प. १७७)

---

[1] इति—त, थ. [2] प्राज्ञानधिष्ठितत्वं—द. [3] व्यतिरेके—द. [4] चित्र—द.

विषमसृष्टौ निर्दयत्वप्रसङ्गाच्च, समानोऽयं दोषः—इति ; परिपूर्णस्यापि [1]लीलार्थ[1]-प्रवृत्तिसंभवात्, सर्वज्ञस्य तस्य परिणामविशेषापन्नप्रकृतिदर्शनरूप [2]सर्ग-प्रतिसर्गविशेष[2]-हेतोः सम्भवात्; क्षेत्रज्ञकर्मणामेव विषम[3]सृष्टि[3]व्यवस्थापकत्वाच्च ।

[सृष्टि-प्रलयादिव्यवस्थायाः जीवीयकर्मानुगुणप्रकृतिपरिणामायत्तता]

नन्वेवं—क्षेत्रज्ञपुण्यापुण्यरूपकर्मभिरेव, सर्वाः व्यवस्थाः सिध्यन्तीति ; कृतम् ईश्वरेणाऽधिष्ठात्रा । पुण्यापुण्यरूपानुष्ठितकर्मसंस्कृता प्रकृतिरेव, पुरुषार्थानुरूपं [4]तथा-तथा[4] व्यवस्थया परिणंस्यते । [5]यथा[5] विषादिदूषितानाम् अन्नपानादीनाम्, [6]औषध[6]-विशेषाप्यायितानां च, सुख-दुःखहेतुभूतः परिणामविशेषः, देश-कालव्यवस्थया दृश्यते ।

अतः सर्ग-प्रतिसर्गव्यवस्था, देवादिविषमसृष्टिः, कैवल्यव्यवस्था च सर्वप्रकार-परिणामशक्तियुक्तस्य प्रधानस्यैवोप[7]पद्यते—इति[7] ।

[जीवीयकर्मणः वेदैकगम्यत्वं, परमपुरुषप्रीत्यप्रीतिरूपत्वं च]

अनभिज्ञो [8]भवान्[8] पुण्यापुण्यकर्म[9]स्वरूपयोः[9] । पुण्यापुण्यस्वरूपे हि ! शास्त्रैक-समधिगम्ये । शास्त्रं च, अनादिनिधनाविच्छिन्न[10]पाठसंप्र[10]दायानाघ्रातप्रमादादिदोष-गन्धवेदाख्याक्षरराशिः । तच्च—'परमपुरुषाराधन-तद्विपर्ययरूपे कर्मणी पुण्यापुण्ये । तदनुग्रह-[11]निग्रहायत्ते[11] च तत्फले सुख-दुःखे'—इति वदति । तथाऽऽह [12]द्रमिडा[12]-चार्यः—

निरवद्यस्य—अकर्मवश्यस्य । **निरञ्जनस्य**—अगुणवश्यस्य । अकर्मवश्यस्य ईश्वरस्य गुणवश्यत्वा-भावात्, गुणानुगुणेच्छया सर्गादिव्यापारो न संभवतीति भावः ॥

सर्वज्ञस्येति । सर्ग-प्रतिसर्गव्यवस्थाहेतुः, ईश्वरेणाऽनुसन्धीयमाना प्रकृतेः परिणाम-विशेषापत्तिः । न च तया स्वातन्त्र्यहानिः ; प्रत्युत स्वातन्त्र्यपूर्तिरेव । परिणामविशेषापत्तौ सत्यामेव, सर्गादिव्यापारस्य तत्सङ्कल्पायत्तत्वात् । यथासङ्कल्पमनुष्ठानं हि स्वातन्त्र्यमितिभावः ।

देशव्यवस्था—उष्णवर्जिते वा शीतवर्जिते वा [देशे] वर्तमानस्य पथ्यापथ्यविभागः ।

---

[1] लीलार्थं—न. [2] सर्गविशेष—न. [3] सृष्टेः—वा [4] तथा—त. थ. [5] तथा—थ. द. [6] औषधि—वा. [7] पद्यते—थ. द. [8] हि भवान्—द. [9] रूपयोः—थ. [10] संप्र—त, थ. [11] निग्रहापन्न—थ. [12] द्रविडा—द.

'फल[1]सम्बिभन्त्सया[1] हि! कर्मभिः आत्मानं पिप्रीषन्ति ।
स प्रीतः अलं फलाय — इति शास्त्रमर्यादा' (द्र. भा.)

इति । तथा च श्रुतिः —

'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः' (तै.ना.उ. 1-6)

इति । तथा च भगवता स्वयमेवोक्तम्—

'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥'

इति,

'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु' ॥ (भ. गी. 16-19)

[1]इति च[1] । स भगवान् पुरुषोत्तमः, अवाप्तसमस्तकामः, [2]सर्वज्ञः सर्वेश्वरः[2] सत्यसङ्कल्पः, स्वमाहात्म्यानुगुणलीलाप्रवृत्तः, 'एतानि कर्माणि समीचीनानि, एतानि असमीचीनानि' इति कर्मद्वैविध्यं संविधाय, तदुपादानोचितदेहेन्द्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन [3]प्रदिश्य[3], स्वशासनावबोधि शास्त्रं च प्रदर्श्य, तदुपसंहारार्थं च अन्तरात्मतया अनुप्रविश्य, अनुमन्तृतया च नियच्छंस्तिष्ठति ।

कैवल्यव्यवस्था — मोक्षव्यवस्था । **इष्टापूर्ते**—श्रौत-स्मार्ते कर्मणी । बाहुविध्यं—देवता-फलादि-भेदेन । **भुवनस्य नाभिः**—'तद्यथा रथस्याऽरेषु नेमिरर्पिता' इत्यादि श्रुतिप्रक्रियया, अन्तर्यामि-रूपेण सर्वाधारभूतः इत्यर्थः । **बिभर्ति**—आराधनतया स्वीकरोति । **यतः प्रवृत्तिरित्यादि** भगवद्गीतावचनं, पापस्य तदपराधरूपत्वज्ञापनार्थम् । 'तेषां सततयुक्तानाम्' इति वचनस्य वक्ष्यमाणत्वात् , अत्र नोपात्तम् ॥

भगवानिति । निर्दोषत्वं मङ्गलगुणत्वं च भगवच्छब्दार्थः । ताभ्यां वैलक्षण्यं— **पुरुषोत्तम**शब्दार्थः । **सर्वज्ञ**त्वादीनि विविधफलप्रदान-सर्गाद्युपयोगीनि । **एतानीति** । अनादिपुण्य-पापव्यवस्था तदीयानादिस्वातन्त्र्यनिबन्धनेत्यर्थः । **तदुपादानेति** । यथा पितृ-भ्यामुत्पाद्य वर्धितः पुत्रः, शिक्षितः, अर्थ-गृह-क्षेत्रदानादिना उपकृतः, तैरेवाऽर्थादिभिः यज्ञादिकं वा करोति ; विषयचापलं वा अनुवर्तते । न तत्र पित्रोर्दोषः । तदधीनवैभवत्वं च पुत्रस्य न हीयते ; तद्वदिति भावः । **सामान्येन प्रदिश्येति** । देहेन्द्रियादिकं सर्वेषां ददाति । वैषम्यं तु कर्मकृतम् , इत्यभिप्रायः । **अनुमन्तृत्वम्**—प्रवृत्तस्य प्रवर्तकत्वम् ।

---

[1] संविभत्सया—च [2] इति—त, द, म. [3] सर्वेश्वरः—द. [4] प्रदर्श्य—बा.

क्षेत्रज्ञास्तु, तदाहितशक्तयः तत्प्रदिष्टकरण-कलेबरादिकाः, तदाधाराश्च स्वयमेव स्वेच्छानुगुण्येन पुण्यापुण्यरूपे कर्मणी उपाददते। ततश्च पुण्यरूपकर्मकारिणं स्वशासनानु[1]वर्तिनं[1] ज्ञात्वा, धर्मार्थ-काम-मोक्षैः वर्धयते। शासनातिवर्तिनं च, तद्विपर्ययैः योजयति। अतः स्वातन्त्र्यादिवैकल्यचोद्यानि, न अवकाशं लभन्ते॥

[भगवतो दयायाः स्वरूपस्य तद्विषयस्य च शोधनम्]

दया हि ! नाम, स्वार्थनिरपेक्षा परदुःखासहिष्णुता। सा च स्वशासनातिवृत्ति-व्यवसायिन्यपि वर्तमाना, न गुणायाऽवकल्पते। प्रत्युत [2]अपुंस्त्व[2]मेवाऽवहति। तन्निग्रह एव, तत्र गुणः। अन्यथा, शत्रुनिग्रहादीनाम् अगुणत्वप्रसङ्गात्। [3]स्वशासना[3]तिवृत्ति-[4]व्यवसाय[4]निवृत्तिमात्रेण अनाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण, निरतिशयसुखसंवृद्धये स्वयमेव प्रयतते। यथोक्तम्—

'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते'॥ (भ. गी. 10-10)
'तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता'॥ (भ. गी 10-11)

इति। अतः प्राज्ञानधिष्ठितं [5]प्रधानं न कारणम्[5] ॥ ३ ॥

तदाहितेति। अनुमन्तृतया नियन्तृत्वात्, धारकत्वात्, सामान्येन देहेन्द्रियादि-प्रदत्वाच्च सर्वं तदधीनमित्यभिप्रायः। **स्वयमेवेति**। भगवतः उपेक्षकत्वात्। उपेक्षकत्वमपि स्वातन्त्र्यविशेष एवेत्यभिप्रायः। **स्वातन्त्र्यादी**त्यादिशब्देन, दया-सर्वसमत्ववैकल्यं जीवानां फलान्वयराहित्यं च विवक्षितम्। एतत्कर्मकारिणे एतत् फलं दास्यामीति तस्य सङ्कल्पः। यथासङ्कल्पं कुर्वतः स्वातन्त्र्यपौष्कल्यमेव।

स्वार्थनिरपेक्षेति, उपजीविनाम् उपजीव्यापदि यत् दुःखासहिष्णुत्वं, तद्व्यावृत्त्यर्थम्॥ **प्रीतिपूर्वकं ददामी**त्यन्वयः। **सततयुक्तानाम्** इति आशंसायां क्तेन उपासकप्रीतेः उक्तत्वात्। [अन्यथा] भजताम् इति पौनरुक्त्यम्। अनपेक्षितकथनम् अपेक्षिताकथनं च स्याताम्। **अत इति**। ईश्वरस्य स्वातन्त्र्यवैकल्यादिप्रसङ्गाभावेन, कर्मणां तदाराधनरूपतयैव फलप्रदत्वात्। सर्गादिव्यवस्थासिद्ध्यर्थं ब्रह्मैककारणत्वं सिद्धमित्यर्थः॥ ३ ॥

---

1 वर्तिनां—द. 2 नृशंसत्व—त, थ. 3 शासना—द. 4 व्यवसायि—न.
5 प्रधानकारणम्—द. प्रधानं न जगत्कारणम्—इ.

[अनपेक्षाया अपि प्रकृतेः परिणामप्रवृत्तिशंका-परिहारौ]

अथ स्यात्—यद्यपि, 'प्राज्ञानधिष्ठितायाः प्रकृतेः, परि[2]स्पन्द[2]प्रवृत्तिरपि न संभवति, इत्युक्तम्; तथापि, [3]अनपेक्षाया[3] एव परिणामप्रवृत्तिः संभवति, तथा दर्शनात्। धेन्वादिना [4]'उपयुक्तं'[4] हि! तृणोदकादि, स्वयमेव क्षीराद्याकारेण परिणममानं दृश्यते। अतः प्रकृतिरपि स्वयमेव जगदाकारेण परिणंस्यते—[5]इति[5]। तत्राह—

१७८. अन्यत्राभावाच्च न तृणादिवत् ॥२-२-४॥

नैतदुपपद्यते; तृणादेः प्राज्ञानधिष्ठितस्य, परिणामाभावात् दृष्टान्तासिद्धेः।

कथमसिद्धिः?—अन्यत्राऽभावात्। यदि हि तृणोदकादिकम् [6]'अनडुदाद्युपयुक्तम्[6], प्रहीणं वा क्षीराकारेण पर्यणंस्यत; [7]ततः[7] 'प्राज्ञानधिष्ठितमेव परिणमते' इति वक्तुमशक्ष्यत। न चैतदस्ति। अतः धेन्वाद्युपयुक्तं प्राज्ञ एव क्षीरीकरोति।

'पयोऽम्बुवच्चेत् तत्राऽपि' (ब्र. सू. 2-2-2)
इत्युक्तमेव, अत्र प्रपञ्चितं; तत्रैव व्यभिचारप्रदर्शनाय ॥४॥

धेन्विति। केवलदार्वादिव्यावृत्त्यर्थं चित्संनिधिमात्रमेवोपगन्तव्यम्; न तु सङ्कल्पविशेषवत्पुरुषाधिष्ठितत्वम्। गवि सुप्तायामपि तदुपयुक्ततृणादेः क्षीरादिभावदर्शनात्।

प्रहीणं वेति। केवलाचिन्मात्रस्य परिणामे दृष्टान्तत्वं दूषितम्। **अनडुदिति,** चित्संनिधिमात्रेण परिणामो दूषितः। **प्राज्ञेति।** संकल्पविशेषान्वितचेतनविशेषाधिष्ठानेन परिणामित्वं तु परस्याऽनिष्टमित्यभिप्रायः॥ **प्रपञ्चितम्**—उक्तशङ्काविशेषपरिहाररूपं प्रपञ्चनम्। **तत्रैव**—पयोदृष्टान्त एव व्यभिचारपरिहारप्रदर्शनायेत्यर्थः (भा.प्र) ॥४॥

[सूत्रार्थः; **न तृणादिवत्**—'प्राज्ञानधिष्ठितस्याऽपि परिणामः' इत्यस्मिन् विषये दृष्टान्तता न भवति तृणादेः। **अन्यत्र**—अनडुदाद्युपयुक्ते प्रहीणे वा तृणे, **अभावाच्च**—तृणजलादेः क्षीरात्मना परिणामाभावात्।]

तृणादिकं यथा क्षीरं प्रकृतिश्च तथेति चेत्।
वृषभेणोपयुक्तं तत् तृणं नैव भवेत् पयः॥ (ब्र. प. १७८)

---

[1] स्पन्दन—आ. [2] अनपेक्षया—थ. [3] उपभुक्तं—वा. [4] इति चेत्—वा.
[5] अनडुहाद्युपयुक्तम्—च. द्युपभुक्तम्—वा. [6] तदा—वा.

[पुरुषस्य स्वसांनिध्यमात्रेण प्रधाने प्रवृत्तिजनकत्वशङ्का-परिहारौ]

१७९. पुरुषाश्मवदिति चेत् तथाऽपि ॥ २-२-५ ॥

[1]अथोच्येत[1]—यद्यपि, चैतन्यमात्रवपुः पुरुषः, निष्क्रियः; प्रधानमपि दृक्छक्ति-विकलम्; तथाऽपि, पुरुषसंनिधानात्, अचेतनं प्रधानं प्रवर्तते; तथा दर्शनात्। गमनशक्तिविकलदृक्छक्तियुक्तपङ्गुसंनिधानात्, तच्चैतन्योपकृतः दृक्छक्तिविकलः प्रवृत्ति-शक्तः अन्धः प्रवर्तते। अयस्कान्ताश्मसंनिधानाच्च, अयः प्रवर्तते। एवं प्रकृति-पुरुषसंयोगकृतः जगत्सर्गः प्रवर्तते। यथोक्तम्—

'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥' (सां. का. 21)

इति। पुरुषस्य प्रधानोपभोगार्थं कैवल्यार्थं च पुरुषसंनिधानात् प्रधानं सर्गादौ प्रवर्तते—इत्यर्थः।

अत्रोत्तरम्—'तथापि'—इति। एवमपि, प्रधानस्य प्रवृत्त्यसम्भवः, तदवस्थ एव। पङ्गोः गमनशक्तिविकलस्याऽपि, मार्गदर्शन-तदुपदेशादयः कादाचित्काः विशेषाः, सहस्रशः सन्ति। अन्धोऽपि चेतनः सन्, तदुपदेशा[2]द्यवगमेन[2] प्रवर्तते। तथा अयस्कान्तमणेरपि, अयः [3]समीपागमना[3]दयः सन्ति। पुरुषस्य तु निष्क्रियस्य, न तादृशविकाराः सम्भवन्ति। संनिधानमात्रस्य, नित्यत्वेन नित्यसर्गप्रसङ्गः, नित्यमुक्तत्वेन बन्धाभावः, अपवर्गाभावश्च ॥ ५ ॥

'उपभोग' शब्देन 'दर्शन' शब्दो व्याख्यातः प्रधानस्य दर्शनापेक्षया कर्मत्वात् कर्मणि षष्ठीति भावः (भा. प्र.)। प्रवृत्त्यसंभव इति। पूर्वापरसूत्रस्थानुपपत्तिशब्दानुरोधेन अध्याहारः कृतः। नित्यनिर्विकारस्य पुरुषस्य, पङ्गोः मार्गदर्शनोपदेशादिवत् न कादाचित्कविशेषोऽस्ति। अन्धस्य तदुपदेशावगतिवत्, न प्रकृतेर्विशेषोऽस्ति। अयस्कान्तस्य समीपागमनादिवत्, पुरुषस्य न विकारसंभवः। विभुत्वात् समीपागमनापेक्षा न चेत्! नित्यसर्गप्रसंगः इत्यर्थः ॥५॥

[सूत्रार्थः; पुरुषाश्मवत्—(पङ्गोः दृष्टिमतः पुरुषस्य) अन्धपुरुषप्रवर्तकत्ववत्, अय-स्कान्तस्य अयः प्रवर्तकत्ववच्च (पुरुषस्य प्रधानप्रवर्तकत्वम्,) इति चेत्—एवं शङ्कनमसाधु, तथापि—तत्सादृश्येनापि प्रवृत्त्ययोगात् ॥]

पङ्गुरन्धमयस्कान्तोऽयः प्रयुङ्क्ते यथा तथा।
प्रधानं पुरुषश्चेति मैवं स्यात् स्रष्टृता सदा॥ (ब्र. प. १७९)

---

[1] अथोच्यते—द.　[2] द्यवगमे—द.　[3] समीपगमना—थ.

[प्रलयानन्तरं पुनः सृष्ट्यनुपपत्तितः, अनपेक्षप्रधानकारणत्वाभावः]

१८०. अङ्गित्वानुपपत्तेश्च ॥ २-२-६ ॥

गुणानाम् उत्कर्ष-निकर्षनिबन्धनाङ्गाङ्गिभावाद्धि ! जगत्प्रवृत्तिः, 'प्रतिप्रति-गुणाश्रयविशेषात्' (सां. का. 16) इति वदद्भिर्भवद्भिः, अभ्युपगम्यते । प्रतिसर्गावस्थायां तु, साम्यावस्थानां सत्त्व-रजस्-तमसाम्, अन्योन्याधिक्य-[1]न्यूनत्वा[1]भावात्, अङ्गाङ्गि-भावानुपपत्तेः न जगत्सर्ग उपपद्यते ।

[2]तदाऽपि[2] वैषम्याभ्युपगमे, नित्यसर्गप्रसङ्गः । अतश्च न प्राज्ञानधिष्ठितं प्रधानं कारणम् ॥ ६ ॥

[कालविशेषनियतशक्तिमत्प्रधानानुमानेऽपि दोषः]

१८१. अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ २-२-७ ॥

दूषितप्रकारातिरिक्तप्रकारान्तरेण प्रधानानुमितौ च, प्रधानस्य ज्ञातृत्वशक्तिवियोगात्,

---

गुणानामित्यादि । एवं परोक्तानुमानस्य प्राज्ञाधिष्ठितत्वप्रसङ्गमुखेन विषमावस्थत्व-प्रसङ्गमुखेन च विशेषविरोध उक्तः ॥ ६ ॥

अन्यथा....वियोगादिति । [अनेन] अनुमानान्तरेऽपि उक्तदूषणमतिदिशति । ज्ञातृत्वे सति हि ! सङ्कल्पात् अधिष्ठात्रन्तरनिरपेक्षप्रवृत्त्युपपत्तिः । तच्च नास्ति । तस्मात्, नित्यसर्गादिप्रसङ्ग

[सूत्रार्थः ; अङ्गित्वस्य—(प्रलयावस्थे प्रधाने) उत्कर्षकृतप्राधान्यस्य, अनुपपत्तेश्च—अयोगादपि हेतोः सृष्ट्यनुपपत्तेः प्रधानं न जगत्कारणम् ॥]

सत्त्वादीनां गुणानां तु प्रलये समता भवेत् ।
गुणस्य चैकस्याऽङ्गित्वानुपपत्तेरसम्भवः ॥ (ब्र. प. १८०)

[सूत्रार्थः ; अन्यथा—प्रलयादिकालविशेषनियतशक्तिविशेषवत्तया, अनुमितौ च—प्रधानस्यानुमानेऽपि, ज्ञशक्तिवियोगात्—प्रधाने ज्ञातृत्वशक्तेरभावात्, (प्राज्ञानधिष्ठितप्रधान-कारणता दुःस्थैव) ॥

प्रधानानुमितौ चाऽत्र ह्यन्यथा यदि तत्र च ।
ज्ञातृत्वशक्तिविरहाद्रचनादेरसम्भवः ॥ (ब्र. प. १८१)

---

[1] न्यूनता—इ, द. [2] तथापि—च.

ते एव दोषाः प्रादुःष्युः । अतः, न कथञ्चिदपि, अनुमानेन प्रधानसिद्धिः ॥ ७ ॥

[प्रधानानुमानस्य अनुपयोगितया वैयर्थ्यम्]

१८२. अभ्युपगमेऽप्यर्थाभावात् ॥ २-२-८ ॥

अनुमानेन प्रधानसिद्ध्यभ्युपगमेऽपि, प्रधानेन प्रयोजनाभावात्, न तत् अनुमातव्यम् ।

'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य' (सां. का. 21)

इति, प्रधानस्य प्रयोजनं, [1]पुरुषभोगा[1]पवर्गौ अभिमतौ । तौ च न संभवतः । पुरुषस्य चैतन्यमात्रवपुषो निष्क्रियस्य निर्विकारस्य निर्मलस्य, तत एव नित्यमुक्तस्वरूपस्य, प्रकृतिदर्शनरूपो भोगः, तद्वियोगरूपोऽपवर्गश्च न संभवति ।

एवंरूपस्यैव प्रकृतिसंनिधानात् तत्परिणामविशेषसुख-दुःखदर्शनरूपभोगसंभावनायाम्, प्रकृतिसंनिधानस्य नित्यत्वेन, कदाचिदपि अपवर्गो न सेत्स्यति ॥ ८ ॥

[मिथो व्याहतार्थकत्वतः सांख्यदर्शने अनौचित्यपूर्णता]

१८३. विप्रतिषेधाच्चाऽसमञ्जसम् ॥ २-२-९ ॥

इत्यर्थः । अचेतनत्वादेव प्राज्ञाधिष्ठितत्वं प्रसजेदिति भावः । इदं विषमावस्थत्वप्रसङ्गस्यापि प्रदर्शनार्थमुक्तम् ॥ ७ ॥

अनुमानेनेति । [सूत्रे] अभ्युपगमः कस्य ? इत्यपेक्षायां पूर्वसूत्रप्रत्यासत्त्या अनुमितिरेव अर्थतो बुद्धिस्थेत्यभिप्रायः । प्रवृत्तिस्तु अनेकसूत्रव्यवहितत्वात् अनुबन्धं नार्हतीति ॥ ८॥

नित्यनिर्विकारस्याऽपि भोगापवर्गाभ्युपगमशङ्कायाम् अनन्तरसूत्रम्— **विप्रतिषेधादिति** ।

[सूत्रार्थः ; **अभ्युपगमेऽपि**—अनुमानतः प्रधानाङ्गीकारेऽपि, **अर्थाभावात्**—तेन पुरुषप्रयोजनासिद्धेः, तद्वैयर्थ्यम् ।]

प्रधानसाधनेऽप्यत्र फलाभावाद्विपर्ययः ।
भोग-मोक्षौ च न स्यातां प्रधानेन सदा स्थितेः ॥ (ब्र. प. १८२)

[सूत्रार्थः ; **विप्रतिषेधाच्च**—परस्परव्याहतार्थगर्भत्वादपि, **असमञ्जसम्**—असाध्वेवेदं दर्शनम् ॥]

पूर्वापरविरोधाच्च कापिलं त्वसमंजसम् ।
निर्लेपस्याऽविकारस्य द्रष्टृत्वाद्युपपादनात् ॥ (ब्र. प. १८३)

---

[1] पुरुषोपभोगा—द.

विप्रतिषिद्धं चेदं साङ्ख्यानां दर्शनम्। तथाहि !

प्रकृतेः परार्थत्वेन दृश्यत्वेन भोग्यत्वेन च, प्रकृतेः भोक्तारम् अधिष्ठातारं द्रष्टारं साक्षिणं च पुरुषम् अभ्युपगम्य, प्रकृत्यैव साधनभूतया, तस्य कैवल्यमपि प्राप्यं वदन्त एव, तस्य नित्यनिर्विकारचैतन्यमात्रस्वरूपतया अकर्तृत्वं कैवल्यं च स्वरूप-[1]मेवाऽऽहुः[1]। तत एव, बन्धमोक्षसाधनानुष्ठानं [2]मोक्षश्च[2] प्रकृतेरेव—इत्याहुः। एवम्भूतनिर्विकारोदासीनपुरुषसंनिधानात् प्रकृतेः, इतरेतराध्यासेन सर्गादिप्रवृत्तिं पुरुष-भोगापवर्गार्थत्वं चाऽऽहुः।

'सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥ (सां. का. 17)
तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च' ॥ (सां. का. 19)

इति।

'पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य' (सां. का. 57)

इत्युक्त्वा, एवमाहुः—

'तस्मान्न बाध्यतेऽद्धा न मुच्यते नाऽपि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः' ॥ (सां. का. 62)

इति। तथा,

'तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ (सां. का. 20)
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः' ॥ (सां. का. 21)

इति।

अधिष्ठातारमिति, परार्थत्वप्रतियोगित्वेनाह। **अधिष्ठाता**—स्वतन्त्रः। **साक्षी**—स्वरूपेणानुसन्धाता ; इन्द्रियादिभिर्द्रष्टा। **त्रिगुणादीति** आदिशब्दः, कार्यपरः। त्रिगुण-तत्कार्यं जडम्। जडस्य अधिष्ठातृत्वायोगात्, तदन्यः अधिष्ठातेत्यर्थः। **अधिष्ठानादिति**। अधिष्ठेयात् त्रिगुणादेः अधिष्ठातुः विलक्षणत्वात् ; कर्म-कर्तृविरोधादित्यर्थः। **कैवल्यार्थप्रवृत्तेश्च**। न हि ! त्याज्यमेव त्यागकर्ता इत्यर्थः ॥

---

[1] मेवेत्याहुः—द.   [2] मोक्षं च, घ.

[सूत्रोक्तविप्रतिषेधोपपादनम्]

साक्षित्व-द्रष्टृत्व-भोक्तृत्वादयः, नित्यनिर्विकारस्य अकर्तुः उदासीनस्य कैवल्यैक-[1]स्वरूपस्य[1] न सम्भवन्ति। एवंरूपस्य तस्य, अध्यासमू(लो)लभ्रमोऽपि न संभवति; अध्यास-भ्रमयोरपि विकारत्वात्। प्रकृतेश्च तौ न सम्भवतः; तयोः चेतनधर्मत्वात्।

अध्यासो हि नाम—चेतनस्य अन्यस्मिन् अन्यधर्मानुसन्धानम्। [2]स च[2] चेतनधर्मः, विकारश्च। न च—पुरुषस्य प्रकृतिसंनिधिमात्रेण, अध्यासादयः सम्भवन्ति; निर्विकारत्वादेव। सम्भवन्ति चेत्! नित्यं प्रसज्येरन्। संनिधेः अकिञ्चित्करत्वं च,

'न विलक्षणत्वात्' (ब्र. सू. 2-1-4)

इत्यत्र प्रतिपादितम्।

प्रकृतिरेव संसरति बध्यते मुच्यते चेत्!; कथं 'नित्यमुक्तस्य पुरुषस्य उपकारिणी सा' इत्युच्यते? वदन्ति हि!

[प्रकृतेः निःस्पृहतया पुरुषोपकारिता]

'नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतः तस्यार्थमपार्थकं चरति॥' (सां. का. 60)

इति। तथा—प्रकृतिः येन पुरुषेण यथास्वभावा दृष्टा; तस्मात् पुरुषात् तदानीमेव निवर्तते—इति चाऽऽहुः—

'रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात्।
पुरुषस्य तथाऽऽत्मानं प्रकाशस्य विनिवर्तते प्रकृतिः॥ (सां. का. 59)
प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य॥' (सां. का. 61)

—इति।

[साङ्ख्योक्तेऽर्थे असाङ्गत्योपपादनम्]

तदपि, असङ्गतम्; पुरुषो हि! नित्यमुक्तत्वात् निर्विकारत्वात्, न तां

चेतनधर्म इति। चेतनधर्मत्वात्, न प्रधानस्य संभवति। विकाररूपत्वात्, न आत्मनः संभवतीत्यर्थः। प्रथमभ्रमः अध्यासः। तन्मूला अन्ये 'भ्रम'शब्दवाच्याः।

पुरुषो हीति। पुरुषकर्तृकं स्वात्मकर्तृकं च प्रकृतिदर्शनम्, अनुपपन्नमित्याशयः।

---

[1] रूपस्य—द.   [2] स—द.

कदाचिदपि पश्यति, न अध्यस्यति च। स्वयं च स्वात्मानं न पश्यति ; अचेतनत्वात्। पुरुषस्य स्वात्मदर्शनं, स्वदर्शनमिति नाऽध्यस्यति च ; [1]स्वयम[1]चेतनत्वात्। पुरुषस्य च, दर्शनरूपविकारासम्भवात्।

अथ—'संनिधिमात्रमेव दर्शनम्'—इत्युच्यते ! ; संनिधेः नित्यत्वेन, नित्यदर्शनप्रसङ्गः इत्युक्तम्।

स्वरूपातिरिक्तकादाचित्कसंनिधिरपि ; नित्यनिर्विकारस्य नोपपद्यते।

किं च—मोक्षहेतुस्तु स्व[2]संनिधानरूपमेव[2] दर्शनं चेत् ! ; बन्धहेतुरपि तदेवेति [3]नित्यवत् बन्धो[3]मोक्षश्च स्याताम्।

अयथादर्शनं बन्धहेतुः ; यथावत्स्वरूपदर्शनं मोक्षहेतुः—इति चेत् ! ; उभयविधस्याऽपि दर्शनस्य, संनिधानरूपतानतिरेकात् सदा उभयप्रसङ्ग एव।

संनिधेः अनित्यत्वे ; तस्य हेतुरन्वेषणीयः, तस्याऽपीति अनवस्था।

अथ—एतद्दोषपरिजिहीर्षया स्वरूपसद्भाव एव संनिधिरिति ! ; तदा स्वरूपस्य नित्यत्वेन, नित्यवत् [4]बन्ध-मोक्षौ[4]।

अतः एवमादेर्विप्रतिषेधात्, सांख्यानां दर्शनम् असमञ्जसम्॥

[मायावादिपक्षगतासामञ्जस्यप्रदर्शनम्]

येऽपि—'कूटस्थनित्यनिर्विशेषस्वप्रकाशचिन्मात्रं ब्रह्म, अविद्यासाक्षित्वेन अपारमार्थिकबन्ध-मोक्षभाक्—इति वदन्ति ; तेषामपि, उक्तनीत्या अविद्यासाक्षित्वाध्यासा[5]द्यसम्भवात्[5], असामञ्जस्यमेव।

इयांस्तु विशेषः—'साङ्ख्याः जनन-[6]मरण[6]प्रतिनियमादिव्यवस्थासिद्ध्यर्थं, पुरुषबहुत्वमिच्छन्ति। ते तु तदपि नेच्छन्ति'—इति, सुतराम् असामञ्जस्यम्॥

अथेत्यादिना, सन्निधेः स्वरूपानतिरिक्तत्वे, स्वरूपातिरिक्तत्वे च दूषणम्।

येऽपीत्यादिना, अस्मिन् साङ्ख्यपक्षनिरासे मायावादिनामनवकाशत्वमाह। **उक्तनीत्येति।** निर्विकारस्य अविद्यानुभवाध्यासायोगादित्यर्थः।

इयांस्तु इति, अधिकं दूषणम्।

---

1 स्वयमेवा—श्रा. 2 संनिधिमात्रमेव—द. 3 नित्यं तद्बन्धो—द. 4 बन्धमोक्षः—इ. 5 भावात्—द. 6 मरणं—थ.

[प्रकृतौ वैषम्यकल्पनानौचित्यम्]

यत्तु—प्रकृतेः पारमर्थ्यापारमार्थ्यविभागेन वैषम्यमुक्तम् ;

तदयुक्तम् ; [1]पारमार्थिकत्वेऽपि अपारमर्थिकत्वेऽपि[1], नित्य[2]निर्विकारस्व[2]प्रकाशैकरसचिन्मात्रस्य स्वव्यतिरिक्तसाक्षित्वाद्यनुपपत्तेः। अपारमार्थिकत्वे तु, तस्याः दृश्यत्वबाध्यत्वाभ्युपगमात्, सुतराम् असङ्गतम्।

औपाधिक[3]भेद[3]वादेऽपि, उपाधिसम्बन्धिनो ब्रह्मणः, अयमेव स्वभाव इति, उपाधिसम्बन्धाद्यनुपपत्तेः, असामञ्जस्यं पूर्वमेवोक्तम् ॥ ९ ॥

इति रचनानुपपत्त्यधिकरणम् ॥ १ ॥

दृश्यत्वेति। 'यत् अविद्याविरोधि तदेव तत्साक्षि' इति वचनम् असङ्गतमित्यर्थः। यद्वा—अविद्यानुभवरूपदर्शनं, तद्बाधकदर्शनमपि विकारः। स तु निर्विकारस्य नोपपद्यते इत्यर्थः।

अयमेव स्वभाव इति। नित्यनिर्विकारत्व-निर्दोषत्वादिः स्वभाव इत्यर्थः। हेयप्रत्यनीकत्व-कल्याणैकतानत्वश्रुतिविरोधोऽभिप्रेतः ॥ ९ ॥

[सूत्राणि—१. रचनानु २. पयोम्बु ३. व्यतिरेका ४. अन्यत्रा ५. पुरुषाश्म.
६. अङ्गित्वा ७. अन्यथा ८. अभ्युपगमे ९. विप्रति]

इति रचनानुपपत्त्यधिकरणम् ॥ १ ॥

—o—

[1] परमार्थिकत्वेऽपि—वा. [2] निर्विकारस्य—वा. [3] भेदाभेद—आ, इ, ख, घ, ङ.

(47) महद्दीर्घाधिकरणम् ॥२-२-२॥ [सू. १०-१६]

[अधि-अर्थः ; तार्किकाभिमतपरमाणुकारणतावादनिरासः]

१८४. महद्दीर्घवद्वा ह्रस्व-परिमण्डलाभ्याम् ॥ २-२-१० ॥

[सङ्गतिप्रदर्शनम्]

प्रधानकारणवादस्य-युक्त्याभासमूलतया, विप्रतिषिद्धत्वाच्च-असामञ्जस्यमुक्तम् ।

सम्प्रति—परमाणुकारणवादस्याऽपि, असामञ्जस्यं प्रतिपाद्यते—'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्'—इति ।

प्रधानेति । प्रधानकारणवादस्य आसन्नत्वेन धीस्थत्वात् , तद्दूषितम् । आनुमानिक-प्रधानकारणत्वे निरस्ते, 'आनुमानिकपरमाणुकारणत्वं स्यात् !' इति प्रस्तावात् सङ्गतिरित्यर्थः । प्रधानकारणवादसाम्येऽपि, शैवमतस्य पश्चान्निरासस्तु, बाह्यत्वाधिक्यात् , वेदबाह्यमतानन्तर्यस्य युक्तत्वात् ॥

[विचारः]—किं विपक्वादृष्टसचिवाः परमाणवः, जगत्कारणम् ? उत न ? । परमाणूनां संयोगद्वारा अवयव्यारम्भकत्वे, कारणानवस्थिति-कार्यप्रथिमासिद्ध्योः अन्यतरप्रसक्तिः अवर्जनीया ? न ? इति ॥

यदा न प्रसक्तिः ; तदा परमाणूनां जगदारम्भकत्वोपपत्तेः, ब्रह्मकारणवादस्य श्रद्धेयत-मत्वहानिः । यदा प्रसक्तिरवर्जनीया ; तदा परमाणुकारणवादानुपपत्तेः, ब्रह्मकारणवादस्य श्रद्धेयतमत्वम् । [इति पूर्वोत्तरपक्षयोः फल-फलिभावः

[सूत्रार्थः ; **ह्रस्व-परिमण्डलाभ्याम्**—(समवायिकारणभूताभ्यां) द्व्यणुक-परमाणुभ्यां, **महद्दीर्घवद्वा**—त्र्यणुक-द्व्यणुकोत्पत्तिर्यथा, असमञ्जसा तथा, तार्किकाभ्युपगतम् अन्यदपि सर्वम् , **असमञ्जसम्**—युक्तिहीनमेव ॥]

द्व्यणुकं परमाणुभ्यां भवतीत्यसमञ्जसम् ।
त्र्यणुकैश्च महद्दीर्घमित्येतच्चासमञ्जसम् ॥ (अ. प. १८४)

[सूत्राक्षरार्थप्रतिपादनम्]

'असमञ्जसम्' इति वर्तते। 'वा' शब्दः, चाऽर्थे। ह्रस्व-परिमण्डलाभ्याम्—द्व्यणुकपरमाणुभ्याम्, महद्दीर्घवत्—[1]त्र्यणुको[1]त्पत्तिवादवत्, अन्यच्च तदभ्युपगतं सर्वम्, असमञ्जसम्। परमाणुभ्यः द्व्यणुकादिक्रमेण जगदुत्पत्तिवादवत्, अन्यदपि असमञ्जसमित्यर्थः।

[उक्तस्य असामञ्जस्यस्य विवरणम्]

तथा हि— तन्तुप्रभृतयो हि! अवयवाः, स्वांशैः षड्भिः पार्श्वैः संयुज्यमानाः, अवयविनमुत्पादयन्ति। परमाणवोऽपि स्वकीयैः षड्भिः पार्श्वैः संयुज्यमाना एव, द्व्यणुकादीनामुत्पादका भवेयुः। अन्यथा परमाणूनां प्रदेशभेदाभावे सति, सहस्र-परमाणुसंयोगेऽपि, एकस्मात्परमाणोः अनतिरिक्तपरिमाणतया, अणुत्व-ह्रस्वत्व-महत्त्व-दीर्घत्वाद्यसिद्धिः स्यात्।

प्रदेशभेदाभ्युपगमे—परमाणवोऽपि सांशाः स्वकीयैरंशैः, ते च [2]स्वकीयै[2]-रंशैरिति—अनवस्था।

चार्थ इति। समुच्चये इत्यर्थः। दूष्यसमुच्चयोऽभिप्रेतः। ह्रस्वम्—द्व्यणुकम्। परिमण्डलम्—परमाणुः। महद्दीर्घम्—त्र्यणुकम्। तच्च द्व्यणुकत्रयारब्धम्। [तथात्वेऽपि] सूत्रे द्व्यणुकेन परमाणुना चारब्धत्वं प्रतीयत इवेति, तद्व्यावृत्त्यर्थम्, 'अन्यच्च तदभ्युपगतम्' इत्युक्तस्य घटादिकार्यान्तरव्यावृत्त्यर्थं च, परमाणुभ्य इत्यादि। भाष्यस्थः 'त्र्यणुक'शब्द एव कार्यान्तरस्योपलक्षणम्। परमाणुभ्यो द्व्यणुकादिकार्योत्पत्तिवादवत्, गगननित्यत्वादिकमन्यत् तदभ्युपगतम् असमञ्जसमित्यर्थः। सूत्रे'ह्रस्व-परिमण्डल'शब्दाभ्यां कारणद्वयमुक्तम्। महद्दीर्घ-शब्दः अणुह्रस्वस्य द्व्युणकस्याप्युपलक्षणम्। महद्-दीर्घ शब्दौ भावप्रधानौ। महत्वं दीर्घत्वं च। अतः सामानाधिकरण्याभावात्, 'आन्महतः' (पा. सू. 6-3-46) इत्यादिना महच्छब्दस्य आत्त्वाभावः। एवं भावप्रधानाभ्यां महद्-दीर्घशब्दाभ्यां तद्गुणकं त्र्यणुकं लक्ष्यते ॥

अणुत्व-ह्रस्वत्वे, द्व्यणुकस्य धर्मौ। महत्त्व-दीर्घत्वे, त्र्यणुकस्य।

---

[1] त्र्यणुक-द्व्यणुको—वा. [2] स्वीयै—न.

न च वाच्यम्—अवयवाल्पत्व-महत्त्वाभ्यां हि ! सर्षप-महीधरयोर्वैषम्यम् ; परमाणोरपि अनन्तावयवत्वे, अवयवानन्त्यसाम्यात् सर्षप-महीधरयोः वैषम्यासिद्धेः, अवयवापकर्षकाष्ठा अवश्याभ्युपगमनीया—इति ; परमाणूनां प्रदेशभेदाभावे सति, एकपरमाणुपरिमाणा[1]तिरेकी[1] प्रथिमा न जायेतेति, सर्षप-महीधरयोरेव असिद्धेः ॥

किं कुर्मः ? इति चेत् ! ; [2]वैदिकः[2] पक्षः परिगृह्यताम् ॥

[एतत्सूत्रविषये परोक्तनिर्वाहानुवादपूर्वकं दूषणम्]

यत्तु परैः—ब्रह्मकारणवाददूषणपरिहारपरम्—इदं सूत्रं व्याख्यातम् ;

तत्, असङ्गतं पुनरुक्तं च । ब्रह्मकारणवादे परोक्तान् दोषान्, पूर्वस्मिन् पादे परिहृत्य, परपक्षप्रतिक्षेपो हि ! अस्मिन् पादे क्रियते । चेतनाद्ब्रह्मणो जगदुत्पत्तिसम्भवश्च, 'न विलक्षणत्वात्' (ब्र. सू. 2-1-4) इत्यत्रैव प्रपञ्चितः । अतः ह्रस्व-परि-

---

न चेत्यादि । सर्षप-महीधरवैषम्यसिद्ध्यर्थं, परमाणूनां निरवयवत्वमास्थेयम् । अन्यथा अवयवानन्त्यसाम्यात्, तयोर्वैषम्यासिद्धेरित्यर्थः । **परमाणूनामिति** । निरवयवत्वे, सहस्र-परमाणुसंयोगेऽपि एकपरमाण्वनतिरिक्तपरिमाणतया, सर्षप-महीधराख्यधर्म्यसिद्धेः, परमाणूनां सांशत्वमास्थेयमित्यर्थः ।

एवं वैषम्याख्यधर्मसिद्ध्यर्थं निरवयत्वमुक्तम् । सर्षप-महीधराख्यधर्मिसिद्ध्यर्थं सावयवत्वमुक्तम् ।

किं कुर्म इति । सावयवत्वे, वैषम्यासिद्धिः । निरवयवत्वे, धर्म्यसिद्धिरिति, किमवलम्बनीयमित्यर्थः । **वैदिक इत्यादि** । युक्तिबाधागोचरशास्त्रैकसमधिगम्यार्थः परिगृह्यताम् । तत्र हि ! न ह्यल्पेन विपुलस्योत्पत्तिः । दशगुणं बृहतो ब्रह्मणः कारणात्, अल्पस्य कार्यत्वं हि ! प्रतिपाद्यते । तत्तु न युक्तिबाधगोचर इत्यर्थः ॥

असङ्गतम्—पादसङ्गतिर्नास्ति । **पुनरुक्तं च**—अनपेक्षितं च । **ब्रह्मकारणेति**, असङ्गतिमुपपादयति । **चेतनादिति**, पुनरुक्तिमुपपादयति । 'यथा विलक्षणाभ्यां परमाणु-द्व्यणुकाभ्यां विलक्षणं द्व्यणुकादिकार्यमुत्पद्यते ; तथा विलक्षणाद्ब्रह्मणः विलक्षणं जगदुत्पद्यते' इत्येवं हि परैर्व्याख्यातम् । तदिदम् असङ्गति-पुनरुक्तिभ्याम् अनुपपन्नमित्यर्थः । **अत इति** ।

---

[1] तिरेकि—न. तिरेक—द. [2] वैदिक—त, थ.

मण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवत्, अन्यच्च तदभ्युपगतं सर्वम् असमञ्जसम्—इत्येव सूत्रार्थः ॥ १० ॥

[पूर्वसूत्रे 'वा'शब्दसमुच्चितस्य असमञ्जसस्य प्रदर्शनम्]

[1]किमत्र[1] अन्यदसमञ्जसम्? [2]इत्यत्राह[2]—

१८५. उभयथाऽपि न कर्माऽतस्तदभावः ॥ २-२-११ ॥

परमाणुकारणवादे हि; परमाणुगतकर्मजनिततत्संयोगपूर्वकद्व्यणुकादिक्रमेण, जगदुत्पत्तिरिष्यते। तत्र—निखिलजगदुत्पत्तिकारणभूतपरमाणुगतम् आद्यं कर्म, अदृष्टकारितम्—[3]इत्यभ्युपगम्यते[3];

'अग्नेरूर्ध्वज्वलनं, वायोस्तिर्यग्गमनं, अणु-मनसोश्चाद्यं कर्म इत्यदृष्टकारितानि' (वै. द. 5-2-13)

इति। तदिदं परमाणुगतं कर्म, स्वगतादृष्टकारितम्? आत्मगतादृष्टकारितं वा?

उभयथाऽपि न संभवति; क्षेत्रज्ञपुण्यपापानुष्ठानजनितस्य अदृष्टस्य, परमाणुगतत्वासम्भवात्। संभवे च, [4]सदो[4]त्पादकत्वप्रसङ्गः। आत्म[5]गतस्य च[5] अदृष्टस्य, परमाणु[6]गत[6]कर्मोत्पत्तिहेतुत्वं न संभवति ॥

अत्र'ह्रस्व-परिमण्डलाभ्यां 'महद्दीर्घाणुह्रस्वोत्पत्तिवत्' इत्युक्तेः, कारणद्वयोपादानं, कार्यद्वयोपादानं च स्पष्टमुक्तम्। द्व्यणुकात् त्र्यणुकोत्पत्तिः परमाणोः द्व्यणुकोत्पत्तिरिवेत्यर्थः ॥ १० ॥

आत्मगतस्य चेति। व्यधिकरणत्वादित्यर्थः।

[सूत्रार्थः; **उभयथाऽपि**—अदृष्टस्य जीवगतत्वे, अणुगतत्वेऽपि च, **कर्म**—अणुस्पन्दरूपम् कर्म, **न**—अदृष्टकारितं न भवितुमर्हम्, **अतः**—उक्ताद्धेतोः **तदभावः**—जगतः अदृष्टकारितकर्मपूर्वकत्वाभावः ॥]

कादाचित्कं च कर्मैव परिमण्डल-जीवयोः।
न सम्भवति तन्मूलं महद्दीर्घं न सिध्यति ॥ (ब्र. प. १८५)

---

1 किम्—च. 2 इत्याह—श्रा, ई, क, ख. इत्यत आह—श्र. 3 अभ्युपगम्यते—द.
4 सर्वदो न 5 गतस्य—त, थ. 6 स्थ—द.

अथ अदृष्टवदात्मसंयोगात् अणुषु कर्मोत्पत्तिः ; तदा तस्य अदृष्टप्रवाहस्य नित्यत्वेन, नित्यसर्गप्रसङ्गः ॥

[अदृष्टस्य विपाकापेक्षत्वेन सदोत्पादकत्वाभावशङ्का-परिहारौ]

ननु—अदृष्टं विपाकापेक्षं फलायाऽलम्। कानिचित् अदृष्टानि तदानीमेव [1]विपच्यन्ते[1]। कानिचित् जन्मान्तरे। कानिचित् कल्पान्तरे। अतः विपाकापेक्षत्वात्, न सर्वदोत्पादकत्वप्रसङ्गः—इति।

नैतत्; अनन्तैः [2]आत्मभिः, असङ्केत[2]पूर्वकम् अयुगपदनुष्ठितानेक[3]विध[3]कर्म-जनितानाम् अदृष्टानाम्, एकस्मिन् काले [4]एकरूप[4]विपाकस्य, अप्रामाणिकत्वात्। अत एव युगपत् सर्वसंहारः, द्विपरार्धकालम् अविपाकेनाऽवस्थानं च न सङ्गच्छते।

न च—ईश्वरेच्छाहितविशेषादृष्टसंयोगात् अणुषु कर्म; आनुमानिकेश्वरासिद्धेः, 'शास्त्रयोनित्वात्' (ब्र. सू. 1-1-3) इत्यत्र उपपादितत्वात्। अतः जगदुत्पत्तेः अणुगत-कर्मपूर्वकत्वाभावः ॥ ११ ॥

[समवायाख्यसम्बन्धाभ्युपगमकृतम् असामञ्जस्यम्]

१८६. समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ २-२-१२ ॥

समवायाभ्युपगमाच्च असमञ्जसम्।

विपाकः—फलार्हदशा।

न चेति। संयोगशब्दः परम्परया सम्बन्धपरः। अदृष्टवदात्मसंयोगादित्यर्थः। आनुमानिकेति। सिद्धेऽपीश्वरे तस्य नित्येच्छायाः पराभ्युपगमात् नित्यसर्गप्रसङ्गस्य, पूर्वोक्तया दिशा स्फुटत्वात् तदनुक्तिः ॥ ११ ॥

[सूत्रार्थः; **समवायाभ्युपगमाच्च**—(जात्यादिविशिष्टबुद्धिनिर्वाहार्थं) समवायाख्य-सम्बन्धस्वीकारादपि, **साम्यात्**—'समवेतः' इति समवायविशिष्टप्रतीतिनिर्वाहकापेक्षायाः समानत्वात्, **अनवस्थितेः**—अनवस्थाप्रसंगात् असमञ्जसमेवेदं मतम् ॥]

समवायाभ्युपगमात् तस्य चाप्यपृथक्स्थितेः।
हेत्वपेक्षानवस्थानादसमञ्जसमेव तत् ॥ (ब्र. प. १८६)

---

[1] पच्यन्ते—द. [2] अस्माभिः सङ्केत—द, आत्मभिः सङ्केत—घ. [3] विविध—वा.
[4] एकरूपस्य—द.

कुतः ? साम्यादनवस्थितेः । समवायस्याऽपि [1]अवयवि[1]जातिगुणवत्, उपपादकान्तरापेक्षासाम्यात्, उपपादकान्तरस्याऽपि तथेति, अनवस्थितेः असमञ्जसमेव ।

[सूत्राभिप्रायनिष्कर्षणम्]

एतदुक्तं भवति—'अयुतसिद्धानाम् [2]आधाराधेय[2]भूतानाम् इह प्रत्ययहेतुः यः सम्बन्धः, सः समवायः' इति, समवायः अभ्युपगम्यते । अपृथक्स्थित्युपलब्धीनां जात्यादीनां तथाभावस्य निर्वाहकत्वेन चेत्, समवायः अभ्युपगम्यते ! ; समवायस्याऽपि तत्साम्यात्, तथाभावहेतुः अन्वेषणीयः, तस्याऽपि तथेति, अनवस्थितिः ।

समवायस्य तदपृथक्सिद्धत्वं स्वभावः—इति परिकल्प्यते चेत् ! जाति-[3]गुणानामेव[3], एष स्वभावः परिकल्पनीयः ; न पुनः अदृष्टचरं समवायमभ्युपगम्य, तस्य 'एष स्वभावः'—इति [4]कल्पयितुं[4] युक्तम्—इति ॥ १२ ॥

[वैशेषिकसंमते समवाये विशिष्टो दोषः]

समवायस्य नित्यत्वे अनित्यत्वे च, अयं दोषः समानः । नित्यत्वे [5]दोषान्तरं[5] चाऽऽह—

कुत इति । समवायाभ्युपगमस्य असामञ्जस्यहेतुत्वोपपादिका अनवस्थितिः इत्यभिप्रायः । **साम्यादनवस्थितेरिति**, अनवस्थित्युपपादकं 'साम्य'पदम् इत्यभिप्रायेण ॥

[तच्च] साम्यम्, इह प्रत्ययविशेषस्य निर्वाहकान्तरसापेक्षत्वम् इत्यर्थः ॥

एतदुक्तमिति । **अयुतसिद्धिः**—अपृथक्सिद्धिः । पृथक्सिद्धानाम् आधाराधेयभावोपपादकः संयोगः । अपृथक्सिद्धानां तु तदुपपादकः, समवायः इत्यर्थः । **तथाभावस्य**—अपृथक्स्थित्युपलब्धित्वस्य । संयोगस्तु प्रत्यक्षसिद्धः । अपृथक्सिद्धं समवायं कल्पयित्वा, तस्य उपपादकान्तरनैरपेक्ष्यकल्पनादपि प्रत्यक्षसिद्धस्य अपृथक्सिद्धवस्त्वाधाराधेयभावस्यैव सम्बन्धस्य उपपादकान्तरनैरपेक्ष्यकल्पनं युक्तम् । 'धर्मिकल्पनातो वरं धर्मकल्पना' इति न्यायात् इत्यर्थः ॥ १२ ॥

---

[1] अवयव—थ. [2] आधार्याधार—द. [3] गुणादीनामेव—इ. [4] परिकल्पयितुं—द.
[5] दोषान्तरमाह—आ. द. दोषान्तरमप्याह—इ.

१८७. नित्यमेव च भावात् ॥ २-२-१३ ॥

समवायस्य सम्बन्धत्वात्, सम्बन्धस्य नित्यत्वे, सम्बन्धिनो जगतश्च नित्यमेव भावात्, असमञ्जसम् ॥ १३ ॥

[कार्यसरूपाणामेव कार्यानुमेयत्वेन, परमाणूनाम् अनित्यत्वाद्यापत्तिः]

१८८. रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ २-२-१४ ॥

परमाणूनां पार्थिवाप्यतैजसवायवीयानां चतुर्विधानां, रूप-रस-गन्ध-स्पर्शवत्त्वा-

---

नित्यमेवेति । समवायस्य अनित्यत्वं बहुत्वं च प्राभाकराभ्युपेतम् । वैशेषिकैः एकत्वं नित्यत्वं चाऽभ्युपेतमिति, तत्पक्षे सूत्रमिदम् ॥

सम्बन्धत्वादिति । सम्बन्धिविनाशविनाशित्वं संयोगे दृष्टमिति, समवायस्याऽपि सम्बन्धत्वादेव सम्बन्धिविनाशविनाशित्वोपपत्तेः, तन्नित्यत्वाय सम्बन्धिजगन्नित्यत्वं स्यात् । ततश्च जगत्कारणतया परमाण्वीश्वरक्लृप्तिः अयुक्तेत्यर्थः ॥ १३ ॥

[सूत्रार्थः ; **नित्यमेव**—सार्वकालिकतयैव, **भावाच्च**—नित्यसम्बन्धाख्यसमवायस्य सत्वादपि हेतोः, सम्बन्धिनोरपि नित्यत्वप्रसङ्गेन जगन्नित्यत्वापत्त्या वैशेषिकमतम् असमञ्जसमेव ॥]

सम्बन्धस्य च नित्यत्वे सम्बन्धिजगतस्तथा ।
नित्यत्वं सम्भवत्येवेत्यसमञ्जसमेव तत् ॥ (ब्र. प. १८७)

[सूत्रार्थः ; **रूपादिमत्त्वात्**—(पार्थिवादिपरमाणूनां) रूपादिगुणवत्त्वाभ्युपगमात्, **विपर्ययश्च**—तेष्वभ्युपगतनित्यत्वादिविपरीतस्यानित्यत्वादेः प्रसङ्गः, **दर्शनात्**—घटादिषु तथोपलब्धेः ॥]

रूपादिमत्त्वनियमात् परमाणोरनित्यता ।
घटादीनां रूपवत्त्वादनित्यत्वस्य दर्शनात् ॥ (ब्र. प. १८८)

भ्युपगमात्, अभिमतनित्यत्व-सूक्ष्मत्व-निरवयत्वादिविपर्ययेण अनित्यत्व-स्थूलत्व-सावयवत्वादि [1]प्रसज्यते[1]; रूपादिमतां घटादीनाम् अनित्यत्व-तथाविधकारणान्तरारब्धत्वादिदर्शनात्। न हि! दर्शनानुगुण्येन अदृष्टोऽर्थः कल्प्यमानः, स्वाभिमत[2]विशेषे[2] व्यवस्थापयितुं शक्यः। दर्शनानुगुण्येन हि! परमाणूनां रूपादिमत्त्वं [3]त्वया[3]कल्प्यते। अतोऽपि असमञ्जसम् ॥ १४ ॥

[परमाणुषु रूपाद्यभ्युपगम-तदभावपक्षयोः असामञ्जस्यापादकता]

अथ—एतद्दोषपरिजिहीर्षया, परमाणूनां रूपादि[4]मत्त्वं[4] नाऽभ्युपगम्यते; तत्राह—

१८९. उभयथा च दोषात् ॥ २-२-१५ ॥

न केवलं परमाणूनां रूपादिमत्त्वाभ्युपगम एव दोषः; रूपादिविरहेऽपि कारणगुणपूर्वकत्वात् कार्यगुणानां, पृथिव्यादयो रूपादिशून्याः स्युः। [5]तत्परि[5]-जिहीर्षया रूपादिमत्त्वाभ्युपगमे, पूर्वोक्तदोष इति, उभयथा च दोषात्, असमञ्जसम् ॥ १५ ॥

अभिमतेति। [सूत्रस्थ] 'विपर्यय' शब्दस्य, पराभ्युपगतार्थविपर्ययपरत्वात्, तद्वैशद्याय, पराभ्युपगमप्रकारं दर्शयति [अनेन] ॥ **रूपादिमतामिति**। [अनेन] सौत्रं 'दर्शनात्' इति पदं विवृणोति ॥ परमाणूनाम् अयं विशेषः; यत् घटादिवैधर्म्येण नित्यत्वम्। तद्धि धर्मिग्राहकप्रमाणसिद्धम्! इत्यपेक्षायाम्, दर्शनादिति सौत्रपदाभिप्रेतं विवृणोति—**न हीति** ॥ १४ ॥

[सूत्रार्थः; **उभयथा च**—परमाणूनां रूपादिमत्त्वे तदभावे वा अभ्युपगतेऽपि, **दोषात्**—कार्येषु रूपादिशून्यत्व-परमाण्वनित्यत्वादेर्दोषस्य अनिवार्यत्वापातात् ॥]

कार्यनिष्ठगुणानां तु कारणस्थगुणात् परः।
हेतुर्नेति च तद्वत्त्वे तदभावे च दोषतः ॥ (अ. प. १८९)

---

[1] प्रसज्येत—आ. इ. [2] विशेषं—वा. [3] च त्वया—द. [4] मत्त्वं च—इ.
[5] एतद्दोषपरि—इ.

[वैदिकापरिग्रहतःवैशेषिकस्य असामञ्जस्यम्]

१९०. अपरिग्रहाच्चाऽत्यन्तमनपेक्षा ॥ २-२-१६ ॥

कापिलपक्षस्य श्रुतिन्यायविरोधपरित्यक्तस्याऽपि, सत्कार्यवादिना क्वचिदंशे वैदिकैः परिग्रहोऽस्ति। अस्य तु काणादपक्षस्य, केनाऽप्यंशेन अपरिग्रहात् , अनुपपन्नत्वाच्च अत्यन्तमनपेक्षैव, निःश्रेयसार्थिभिः कार्या ॥ १६ ॥

इति महद्दीर्घाधिकरणम् ॥ २ ॥

[सूत्राणि—१. महद्दीर्घ, २. उभयथा, ३. समवाया, ४. नित्यमेव, ५. रूपादि, ६. उभयथा, ७. अपरिग्रहाच्च.]

इति महद्दीर्घाधिकरणम् ॥ २ ॥

[सूत्रार्थः ; अत्यन्तम् अपरिग्रहाच्च—वैशेषिकमतस्य कस्मिन्नप्यंशे वैदिकैः अस्वीकारादपि, अत्यन्तमनपेक्षा—अस्य मतस्य निःश्रेयसार्थिभिः सर्वथा अनपेक्षणीयतैव ॥]

काणादस्य मतस्यास्य सर्वांशेप्यपरिग्रहात् ।
मुमुक्षुभिश्च कर्तव्या ह्यनपेक्षा सदा बुधैः ॥ (ब्र. प. १९०)

—o—

(48) **समुदायाधिकरणम्** ॥ २-२-३ ॥ (सू. 17-26)

[अधि अर्थः — बौद्ध-वैभाषिक-सौत्रान्तिकपक्षयोः निरसनम्]

१९१. समुदाय उभयहेतुकेऽपि[1] तदप्राप्तिः ॥ २-२-१७ ॥

[सङ्गतिप्रदर्शनम्]

परमाणुकारणवादिनो वैशेषिकाः-निरस्ताः ।

सौगताश्च, जगतः परमाणुकारणत्वम् अभ्युपगच्छन्तीति, अनन्तरं तन्मतेऽपि जगदुत्पत्ति-तद्व्यवहारादिकं नोपपद्यते—इत्युच्यते ।

[बौद्धप्रभेद-तन्मतानां सामान्यतः प्रदर्शनम्]

ते चतुर्विधाः—(१) केचित्, पार्थिवाप्यतैजसवायवीयपरमाणुसङ्घातरूपान् भूत भौतिकान् बाह्यान्, चित्त-चैत्तरूपांश्च आभ्यन्तरान् अर्थान्, प्रत्यक्षानुमानसिद्धान् अभ्युप[2]यन्ति[2] । (२) अन्येतु, [3]बाह्यार्थान् सर्वान्[3] पृथिव्यादीन्, विज्ञानानुमेयान् वदन्ति । (३) अपरे तु, 'अर्थशून्यं विज्ञानमेव [4]परमार्थसत्[4], बाह्यार्थास्तु स्वाप्नार्थ-

---

परमाण्विति । परमाणूनाम् एकान्तत्व-चातुर्विध्याभ्युपगमसाम्यात् धीस्थतया बौद्धमत-निरास इति सङ्गतिः । आर्हतमते, स्थिरत्वास्थिरत्वादिभिः अनैकान्त्यम्, ऐकविध्यं च परमाणूनां हि स्वीकृतम् ।

ते इति । वैभाषिक-सौत्रान्तिकयोः परमाणुकारणवादाभ्युपगमेन प्रस्तावे सति, बौद्धत्वसाजात्यात्, योगाचार-माध्यमिकयोरपि निरासः क्रियते इत्यर्थः ।

[विचाराः] किं क्षणिकाः परमाणवः, जगदारम्भकाः ? न ? इति । क्षणिकानां तेषां, सङ्घातकारणत्वं संभवति ? न ? इति । अस्थिरादिषु स्थिरत्वादिधीरूपा अविद्या परमाणूनां पृथिव्यादिसङ्घातहेतुत्वमुपपादयति ? न ? इति ॥

[सूत्रार्थः ; **उभयहेतुकेऽपि**—अणुहेतुकत्वेनाऽभिमते, भूतहेतुकत्वेनाऽभिमतेऽपि च, **समुदाये**—भूतसमुदाये शरीरेन्द्रियादिसमुदायेऽपि, **तदप्राप्तिः**—समुदायत्वस्य असिद्धिः ॥]

सर्वेषां क्षणिकत्वोक्त्या समुदायोऽणुमूलकः ।
भूताद्यारब्धतन्वादिसमुदायश्च नो भवेत् ॥ (ब्र. प. १९१)

---

[1] हेतुके—द. [2] गच्छन्ति—द. [3] बाह्यार्थान्—आ. [4] परमार्थ सत्—त. न.

कल्पाः' इत्याहुः । त्रयोप्येते, स्वाभ्युप[1]गतं वस्तु[1], क्षणिकमाचक्षते । उक्तभूत-भौतिक-चित्त-चैत्तव्यतिरिक्तम् आत्माकाशादिकं, स्वरूपेणैव नाऽनु[2]मन्वते[2] । (४) अन्ये तु, सर्वशून्यत्वमेव [3]सङ्गिरन्ते[3] ॥

[वैभाषिक-सौत्रान्तिकबौद्धयोर्निरासः]

[तदभिप्रायानुवादभागः]

तत्र ये बाह्यार्थास्तित्ववादिनः; ते तावत्, निरस्यन्ते । ते च, एवं मन्यन्ते—'रूप-रस-स्पर्श-गन्धस्वभावाः पार्थिवाः परमाणवः; रूप-रस-स्पर्शस्वभावाश्च आप्याः; रूप-स्पर्श[4]स्वभावाश्च[4], तैजसाः; स्पर्श [5]स्वभावाश्च[5] वायवीयाः; पृथिव्यप्तेजोवायुरूपेण संहन्यन्ते । तेभ्यश्च पृथिव्यादिभ्यः, शरीरेन्द्रियविषयरूपसङ्घाताः भवन्ति । [6]तत्र च[6], शरीरान्तर्वर्ती ग्राहकाभि[7]मानारूढः[7] विज्ञानसन्तान एव, आत्मत्वेनाऽवतिष्ठते । तत एव [8]सर्वो[8] लौकिको व्यवहारः प्रवर्तते—इति ।

[निरासभागः सिद्धान्ते]

तत्राभिधीयते—'समुदाय उभयहेतुकेऽपि तदप्राप्तिः'— । योऽयम् अणुहेतुकः पृथिव्यादिभूतात्मकः समुदायः, यश्च पृथिव्यादिहेतुकः शरीरेन्द्रियविषयरूपः समुदायः; तस्मिन् उभयहेतुकेऽपि समुदाये, तत्प्राप्तिः नोपपद्यते; जगदात्मकसमुदायोत्पत्तिः नोपपद्यते इत्यर्थः ।

यदा उपपादयति; तदा संघातहेतुत्वोपपत्तेः, परमाणूनां क्षणिकानां कारणत्वं स्यात् । यदा नोपपादयति; तदा संघातहेतुत्वानुपपत्तेः, क्षणिकानां परमाणूनां जगदारम्भकत्वं न स्यात् । [इति फल-फलिभावः]

चित्तम्—ज्ञानसन्तानः । **चैत्तम्**—रागादिकम् । [तैः] रूप-विज्ञान-वेदना-संज्ञा-संस्काराख्याः पञ्चस्कन्धाः [अभ्युपगताः । तेषु यथायथं चित्त-चैत्तानामन्तर्भावः ।]

ग्राहकत्वेन अभिमानः—**ग्राहकाभिमानः** । तमारूढः इत्यर्थः । **तत्प्राप्तिः**—समुदायत्वप्राप्तिः ।

[1] गतं—वा. [2] मन्यन्ते—इ. [3] सङ्गिरन्ति—द. [4] स्वभावः—वा. [5] स्वभावाः—द. [6] तत्र—द. [7] मानरूपः—ध. [8] सर्वं—द.

परमाणूनां पृथिव्यादिभूतानां च, क्षणिकत्वाभ्युपगमात्, क्षण[1]ध्वंसिनः[1] परमाणवः, भूतानि च, कदा संहतौ व्याप्रियन्ते? [2]कदा वा[2] संहन्यन्ते? [3]कदा[3] विज्ञान[4]विषय[4]भूताः? कदा च हानोपादानादिव्यवहारास्पदतां भजन्ते? को वा [5]विज्ञानात्मा[5], कं च विषयं स्पृशति? कश्च विज्ञानात्मा, कमर्थं कदा वेदयते? कं वा विदितमर्थं कश्च कदा उपादत्ते? स्प्रष्टा हि नष्टः। स्पृष्टश्च नष्टः। तथा वेदिता विदितश्च नष्टः। [6]कथं च[6] अन्येन स्पृष्टम् अन्यो वेदयते? कथं च अन्येन विदितमर्थम् अन्य उपादत्ते? सन्तानानामेकत्वेऽपि, सन्तानिभ्यः तेषां वस्तुतो वस्त्वन्तरत्वानभ्युपगमात्, न तन्निबन्धनं व्यवहारादिकमुपपद्यते।

अहमर्थ एव आत्मा; स च ज्ञातैव—इति च, उपपादितं पुरस्तात्॥ १७॥

[अविद्यादीनां मिथः कार्य-कारणभावेन सङ्घातभावोपपत्तिशङ्का-तत्परिहारौ]

१९२. इतरेतरप्रत्ययत्वादुपपन्नामिति [7]चेन्न[7] सङ्घात-[8]भावा[8]निमित्तत्वात्॥ २-२-१८॥

अविद्यादीनाम् इतरेतरहेतुत्वेन, उपपन्नं सङ्घातभावादिकम्—इति चेत्!

व्याप्रियन्त इति। व्यापारः-चलनम्। **किं** शब्दः क्षेपे। **विषयं स्पृशति**—इन्द्रियेण सम्बद्धं करोति। इन्द्रियव्यापारः ज्ञानं हानोपादानादि च नोपपद्यते इत्यर्थः। **कदा**—न कदाचित् इति भावः। **सन्तानानामिति**। स्थिरत्वेन अनुयायित्वेन सन्तानस्य वस्त्वन्तरत्वानभ्युपगमात् इत्यर्थः।

अहमर्थ एवेति। विज्ञानस्य च आत्मत्वमयुक्तमित्याशयः॥ १७॥

प्रत्ययशब्दः हेतुवाची। **सङ्घातभावादिकम्** इति 'आदि'शब्देन, विज्ञानविषयत्वं व्यवहारास्पदत्वं च विवक्षितम्।

[सूत्रार्थः; **इतरेतरप्रत्ययत्वात्**—(अविद्या-रागद्वेषाद्योः) मिथः कार्य-कारणभावापन्नत्वात्, **उपपन्नम्**—(जगद्व्यवहारोपयोग्यणुसङ्घातभावादिकं सर्वम्) युक्तिमद्भवति, **इति चेत्**; **न**—एवं शङ्कनमनुचितम्, **सङ्घातभावानिमित्तत्वात्**—अविद्यादेः अणूनां समुदायत्वापत्तौ कारणत्वायोगात्॥]

इतरेतरहेतुत्वादविद्यादेर्जगद्भवेत्।
इति चेन्न तथाऽप्यस्याः सङ्घातत्वे न हेतुता॥ (ब्र· प १९२)

---

[1] विनाशिनः—इ. [2] कदा—घ. [3] कदा च—आ, द. [4] विषयी—आ.
[5] ज्ञानात्मा—थ. [6] कथं वा—इ. [8] चेत्—द. [8] भाना—द.

एतदुक्तं भवति—यद्यपि, क्षणिकाः सर्वे भावाः ; तथापि, अविद्य[1]या ए[1]तत्सर्वम् उपपद्यते। अविद्या हि नाम विपरीतबुद्धिः, क्षणिकादिषु स्थिरत्वादि[2]गोचरा। तया[2], संस्काराख्याः राग-द्वेषादयो जायन्ते। ततः, चित्ताभिज्वलनरूपं विज्ञानम् ततश्च, नामा[3]ख्याः चित्त[3]-चैत्ताः। [4]ततश्च[4] पृथिव्यादिकं च रूपिद्रव्यम्। ततः षडायतनाख्यम् इन्द्रियषट्कम्। ततः स्पर्शाख्यः कायः। ततो वेदनादयः। ततश्च पुनरपि अविद्यादयो यथोक्ताः इति, अनादिरियम् अविद्यादिका अन्योन्यमूला चक्रपरिवृत्तिः। एतच्च सर्वं पृथिव्यादिभूत-भौतिकसङ्घातमन्तरेण नोपपद्यते। अतः सङ्घातभावादिकमुपपन्नम्—इति ॥

तत्रोत्तरम्—न सङ्घातभावानिमित्तत्वात्—इति।

नैतदुपपद्यते; [5]एषाम्[5] अविद्यादीनाम्, पृथिव्यादिभूत-भौतिकसङ्घातभावं प्रति, अनिमित्तत्वात्। न खलु! अस्थिरादिषु स्थिरत्वादिबुद्ध्यात्मिका अविद्या, तन्निमित्ताः राग-द्वेषादयो वा, अर्थान्तरस्य क्षणिकस्य संहतिहेतुतां प्रतिपद्यन्ते।

क्षणिका....गोचरा—क्षणिक-कार्य-दुःख शून्यस्वभावेषु पदार्थेषु स्थायि-नित्य-सुख-वस्तुत्वबुद्धिरित्यर्थः। तस्या रागादिहेतुत्वं स्फुटम् ; रागादयः संस्काराः। ते च ग्राहकाभिमानारूढस्य सूक्ष्मचित्तसन्तानस्य, प्रदेशान्तरं नीयमानस्य प्रतिक्षणमुपजायमानस्य दीपसन्तानस्येव, मातृकुक्षिप्रवेशहेतवः गर्भगतस्य तदनन्तरभाविनी विषयज्ञप्तिः—विज्ञानम्। तदिदं, **चित्ताभिज्वलनरूपमिति**। **चित्तम्**—तदुत्तरोत्तरविषयविज्ञप्तिः। तेन सह जन्म-विनाशभाजः, स्पर्श-वेदना-संज्ञा-चेतना-वितर्क-विचार-प्रीत्येकाग्रता-श्रद्धा-वीर्य-स्मृति-प्रज्ञादयः कुशलाकुशलरूपाः धर्माः। एते, **चित्त-चैत्ताः नामाख्याः**। ततश्च पृथिव्यादिकं रूपिद्रव्यमिति कललादिक्रमेण पुञ्जीभावसिद्धिरित्यर्थः। अत्र **स्पर्श**शब्दः, चैत्तकुशलधर्मान्तर्गतस्पर्शात् अर्थान्तरपरः ; कायवाचित्वात्। **वेदना**—सुख-दुःखादिबुद्धिः। **'आदि'**शब्देन तृष्णोपादानभवजातिजरामरणशोकपरिदेवनदौर्मनस्यानि, उपक्लेशरूपमदमानादयः उपवासाश्च गृह्यन्ते। **एतच्चेति**। 'अविद्यादिभिः सङ्घातः ; सङ्घातात् अविद्यादिकम्' इत्युपलभ्यमानं चक्रकम्, अविद्याहेतुभूतसंघातानभ्युपगमे नोपपद्यते इत्यर्थः ॥

---

[1] यैव—द. [2] गोचरतया—थ. [3] ख्यचित्त—द. [4] ततः—श्रा. [5] तेषाम्—द.

शुक्तिकारजतादिबुद्धिर्हि ! न शुक्त्याद्यर्थसंहतिहेतुर्भवति ।

किं च—यस्य क्षणिके स्थिरत्वबुद्धिः, सः तदैव नष्ट इति, कस्य रागादयः उत्पद्यन्ते ? संस्कारा[1]श्रयं[1], स्थिरम् एकं द्रव्यम् अनभ्युपगच्छताम्, संस्कारानुवृत्तिरपि न शक्या कल्पयितुम् ॥ १८ ॥

[क्षणिकत्वपक्षे जगदुत्पत्तेः अनुपपत्त्या दूषणम्]

१९३. उत्तरोत्पादे च पूर्वनिरोधात् ॥ २-२-१९ ॥

इतश्च, क्षणिकत्वपक्षे जगदुत्पत्तिः नोपपद्यते ; उत्तरक्षणोत्पत्तिवेलायां पूर्वक्षणस्य विनष्टत्वात्, तस्य उत्तरक्षणं प्रति हेतुत्वानुपपत्तेः ।

अभावस्य हेतुत्वे, सर्वं सर्वदा उत्पद्येत ।

अथ-पूर्वक्षणवर्तित्वमेव हेतुत्वं—इत्युच्यते ; एवं तर्हि कश्चिदेव घटक्षणः, तदुत्तरकालभाविनां सर्वेषामेव गो-महिषाश्व-कुड्य-पाषाणादीनां त्रैलोक्यवर्तिनां हेतुः स्यात् ।

अथ—एकजातीयस्यैव पूर्वक्षणवर्तिनः हेतुत्वमिष्यते ! तथाऽपि, सर्वदेशवर्तिनां उत्तरक्षणभाविनां घटानाम्, एक एव पूर्वक्षणवर्तिघटः हेतुः स्यात् ।

अथ—'एकस्यैव हेतुः एकः'—इति मनुषे ! तथाऽपि, कस्यैकस्य को हेतुः ? इति न ज्ञायते ।

अथ—'यस्मिन् देशे यो घटक्षणः स्थितः, तद्देशसम्बन्धिन एव [2]उत्तरघट[2]-क्षणस्य स हेतुः'—इति ! किं देशस्य स्थिरत्वं मनुषे ?

किं च—चक्षुरादि[3]संप्रयुक्त[3]स्यार्थस्य ज्ञानोत्पत्तिकाले अनवस्थितत्वात्, न कस्यचिदर्थस्य ज्ञानविषयत्वं सम्भवति ॥ १९ ॥

शुक्तिकेति । न हि ! शुक्तिकादौ रजतादिभ्रमे सति, शुक्तिकाद्वयं संहतं भवतीत्यर्थः ॥ १८ ॥

क्षणशब्दः, क्षणिकपदार्थवाची ।

किं चेति । उक्तं दूषणं न वस्तुन्येव ; ज्ञानेऽपि तुल्यमित्यभिप्रायः ॥ १९ ॥

[सूत्रार्थः ; **उत्तरोत्पादे च**—पश्चात्कालिकघटादिक्षणोत्पत्तिकाले एव, **पूर्वनिरोधात्**—प्राक्तनस्य क्षणस्य विनाशभागित्वादपि हेतोः, कार्य-कारणभावानुपपत्त्या बौद्धमतमसमञ्जसम् ।]

कार्योत्पत्तौ कारणस्य नष्टत्वात् कारणं न हि ।
कारणत्वे ह्यभावस्य सर्वं स्यात् सर्वदा जगत् ॥ (ब्र. प. १९३)

---

[1] श्रय—द. [2] उत्तर—च. [3] संयुक्त—इ. थ.

[हेतोरभावेऽपि कार्योत्पादः इति वर्णनायोगः]

१९४. असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २-२-२० ॥

असत्यपि हेतौ कार्यमुत्पद्यते—चेत् ! ; सर्वं सर्वत्र सर्वदा उत्पद्येत—इत्युक्तम् । न केवलम् उत्पत्तिविरोध एव ; प्रतिज्ञा च भवताम् उप[1]रुध्येत[1]

'अधिपतिसहकार्या[2]लम्बन[2]समनन्तरप्रत्ययाः चत्वारो विज्ञानोत्पत्तौ हेतवः' इति, वः प्रतिज्ञा । अधिपतिः -- इन्द्रियम् ।

अथ—प्रतिज्ञानुपरोधाय, घटक्षणे स्थिते एव घटक्षणान्तरोत्पत्तिरिष्यते ! ; [3]तथाच सति[3], द्वयोः कार्य-कारणयोः घटक्षणयोः, यौगपद्येनोपलब्धिः प्रसज्येत । न च तथोपलभ्यते । क्षणिकत्वप्रतिज्ञा च एवं [4]हीयेत[4] ।

क्षणिकत्वं स्थितमेव—इति चेत् ! ; इन्द्रिय[5]संप्रयोग[5]-ज्ञानयोः यौगपद्यं प्रसज्येत ॥ २० ॥

सहकारी—आलोकादिः । **आलम्बनम्**—विषयः । **समनन्तरप्रत्ययः**—अनन्तर-पूर्वक्षणप्रत्ययः ।

तथाचेति । पूर्वक्षणस्य उत्तरक्षणानुवृत्तौ, युगपदुपलब्धिप्रसङ्गः, क्षणिकत्वहानिश्चेति दूषणद्वयमित्यर्थः ॥

क्षणिकत्वं....चेदिति । उत्तरक्षणः पूर्वक्षणवर्ती चेत् ! इत्यर्थः । **प्रसज्येतेति** । ततः कार्य-कारणभावाभावप्रसङ्गः इत्यर्थः । युगपदुपलब्धिश्च अर्थसिद्धः । कार्यकारण-यौगपद्यप्रसङ्गः प्रदर्शनार्थः । अर्थेष्वपि कारणभूतघटक्षण-कार्यभूतघटक्षणयोः यौगपद्यप्रसङ्गः इत्यभिप्रायः ॥ २० ॥

[सूत्रार्थः ; **असति**—हेतावविद्यमानेऽपि कार्योत्पत्त्यभ्युगमे, **प्रतिज्ञोपरोधः**—'चत्वारो हेतवः' इति सौगतप्रतिज्ञायाः भङ्ग आपद्यते, **अन्यथा**—कार्य-कारणयोरेकक्षणवर्तित्वे, **यौगपद्यम्**—क्षणद्वयसाहित्यं स्यात् ।]

हेतावसति कार्यं चेत् प्रतिज्ञा चोपरुध्यते ।
चत्वारो हेतव इति, यौगपद्यं तदन्यथा ॥ (ब्र. प. १९४)

---

[1] रुध्यते—थ. [2] वलम्बन—इ. [3] तथा सति—आ. [4] हीयते—द. [5] संयोग—थ.

[सतोऽर्थस्य निरन्वयविनाशायोगेन क्षणिकत्वायोगः]

१९५. प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात्॥२-२-२१॥

एवं तावत्, असत उत्पत्तिः निरस्ता। सतः निरन्वयविनाशोऽपि नोपपद्यते—इत्युच्यते।

क्षणिकत्ववादिभिः—मुद्गराभिघाताद्यनन्तरभावितया उपलब्धियोग्यः सदृशसन्तानावसानरूपः स्थूलो यः; सदृशसन्ताने प्रतिक्षणभावी च उपलब्ध्यनर्हः सूक्ष्मश्च यः निरन्वयो विनाशः, '[1]प्रतिसङ्ख्यानिरोधा[1]प्रतिसङ्ख्यानिरोध'शब्दाभ्याम्-अभिधी[2]येते[2] तौ न संभवतः—इत्यर्थः।

कुतः ? ; अविच्छेदात्—सतः निरन्वयविच्छेदासंभवात्। असम्भवश्च—

'सतः उत्पत्ति-विनाशौ नाम, अवस्थान्तरापत्तिरेव। अवस्थायोगि तु द्रव्यम् एकमेव स्थिरम्' इति कारणादनन्यत्वं कार्यस्य उपपाद[3]यद्भिः अस्माभिः[3], 'तदनन्यत्वम्' (ब्र.सू. 2-1-15) इत्यत्र [4]प्रतिपादितः[4]।

निर्वाणस्य दीपस्य निरन्वयविनाशदर्शनात्, अन्यत्राऽपि विनाशः, निरन्वयोऽनुमीयते—इति चेत्! न; घट-शरावादौ मृदादिद्रव्यानुवृत्त्युपलब्ध्या, 'सतो द्रव्यस्य अवस्थापत्तिरेव विनाशः' इति निश्चिते सति, प्रदीपादौ सूक्ष्मदशापत्त्याऽपि अनुपलम्भोपपत्तेः तत्रापि अवस्थान्तरापत्तिकल्पनस्यैव युक्तत्वात् ॥२१॥

[प्रतिसंख्येति। बौद्धैः संस्कृतासंस्कृतभेदेन कंचन विभागं कृत्वा, असंस्कृते (त्रयः) प्रतिसङ्ख्यानिरोधादयः उक्ताः] (भा. द.)

तदनन्यत्वमित्यत्रेति। वस्त्वन्तरानुपलब्धेः, बुद्धि-शब्दान्तरादीनामन्यथोपपत्तेश्चेत्यर्थः। निर्वाणस्येति। अबाधितप्रत्यभिज्ञया मृदनुवृत्तौ सत्यां, न तदपह्नवो युक्तः। दृष्टेनादृष्टकल्पनं हि युक्तम्। न तु दृष्टहानमित्यर्थः ॥२१॥

[सूत्रार्थः ; प्रतिसंख्यानिरोधस्य—उपलब्धियोग्यस्य स्थूलस्य विनाशस्य अप्रतिसंख्यानिरोधस्य—युक्त्येकसाध्यस्य सूक्ष्मविनाशस्य च, अप्राप्तिः—असिद्धिरेव, अविच्छेदात्—निरन्वयविनाशस्यानुपलम्भात् ॥]

निरन्वयौ स्थूल-सूक्ष्मौ विनाशाविति चेन्न हि।
अवस्थान्तरसद्भावान्न विनाशो निरन्वयः॥ (ब्र. प. १९५)

---

[1] प्रतिसङ्ख्या—अ. [2] यते—त, थ, न. [3] यद्भिः—त, थ, न.
[4] प्रतिपादितम्—च.

[बौद्धाभिमतयोः उत्पत्ति-विनाशयोः दुष्टता]

१९६. [1]उभयथा[1] च दोषात् ॥ २-२-२२ ॥

क्षणिकत्ववादिभिः अभ्युपेता तुच्छादुत्पत्तिः; उत्पन्नस्य तुच्छतापत्तिश्च न सम्भवति—इत्युक्तम्। तदुभयप्रकाराभ्युपगतौ दोषश्च भवति; तुच्छादुत्पत्तौ तुच्छात्मकमेव कार्यं स्यात्। यद्धि यस्मादुत्पद्यते, तदात्मकं दृष्टम्; यथा मृत्-सुवर्णादेरुत्पन्नं [2]मणिक[2]-मुकुटादि, मृत् सुवर्णाद्यात्मकं दृष्टम्।

न च-जगत्, तुच्छात्मकं [3]भवद्भि[3]रभ्युपगम्यते; न च प्रतीयते। सतो निरन्वयविनाशे सति, एकक्षणादूर्ध्वं कृत्स्नस्य जगतः तुच्छतापत्तिरेव स्यात्। पश्चात् तुच्छात् जगदुत्पत्तौ, अनन्तरोक्त [4]तुच्छात्मकत्व[4]मेव स्यात्। अतः, उभयथाऽपि दोषात्, न भवदुक्तप्रकारौ उत्पत्ति-निरोधौ ॥ २२ ॥

[सौगतसंमताकाशतुच्छताप्रतिक्षेपः]

१९७. आकाशे चाऽविशेषात् ॥ २-२-२३ ॥

[अभ्युपेतेति। उत्पत्तिदशायामपीत्यर्थः। उत्तरक्षणे तु निरन्वयविनाशेन तुच्छतापत्तेरभ्युपगतत्वादिति द्रष्टव्यम् (भा.प्र.)] न च प्रतीयत इति। न तुच्छत्वेन प्रतीयत इत्यर्थः।

सूत्रार्थः; **उभयथा च**—तुच्छादुत्पत्तिरिति, उत्पन्नस्य तुच्छत्वमिति प्रकारद्वयेऽपि, **दोषात्**—असम्भाविताभ्युपगमदोषात्।

उत्पन्नस्य च तुच्छत्वं तुच्छादेवोद्भवोऽपि च।
वदतां भवतां नूनं तुच्छं स्यादखिलं जगत् ॥ (ब्र. प. १९६)

[सूत्रार्थः; **आकाशे च**—आकाशविषये तुच्छत्वकल्पनमप्ययुक्तम्, **अविशेषात्**—'आकाशे खगः' इति प्रतीतिविषयत्वांशे विशेषाभावात्]

जगत्प्रतीतितुल्यत्वान्नाऽऽकाशस्याऽपि तुच्छता।
पतत्यत्र श्येन इति प्रतीतिर्हि न बाध्यते ॥ (ब्र. प. १९७)

---

[1] उभयधा—च. [2] मणि—ग. [3] दृष्टं भवद्भि—त. [4] जगत् तुच्छात्मक—आ.

[1]बाह्याभ्यन्तर[1]वस्तुनः स्थिरत्वप्रतिपादनाय, प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधयोः तुच्छरूपता निराकृता। तत्प्रसङ्गेन, ताभ्यां सह तुच्छत्वेन सौगतैः परिगणितस्य आकाशस्याऽपि तुच्छता प्रतिक्षिप्यते।

आकाशे च निरुपाख्यता न युक्ता। भावरूपत्वेनाऽभ्युपगतपृथिव्यादिवत्, आकाश[2]स्याऽपि[2] अबाधितप्रतीतिसिद्धत्वाविशेषात्। प्रतीयते हि! आकाशः, 'अत्र श्येनः पतति, अत्र गृध्रः' इति श्येनादिपतनदेशत्वेन।

[आकाशस्य अभावान्तर्भावप्रतिक्षेपः]

न च—'पृथिव्याद्यभावमात्रम् आकाशः'—इति वक्तुं शक्यम्; विकल्पासहत्वात्। [3]पृथिव्यादेः[3] प्रागभावः? प्रध्वंसाभावः? इतरेतराभावः? अत्यन्ताभावो वा? आकाशः। सर्वथाऽपि आकाशप्रतीत्यनुपपत्तिः स्यात्।

प्रागभाव—प्रध्वंसाभावयोः आकाशत्वे, पृथिव्यादिषु वर्तमानेषु आकाशप्रतीत्य-योगात्, निराकाशं जगत् स्यात्।

इतरेतराभावस्य आकाशत्वेऽपि, इतरेतराभावस्य तत्तद्वस्तुगतत्वेन, तेषामन्तराले आकाशप्रतीतिर्न स्यात्।

अत्यन्ताभावस्तु पृथिव्यादीनां न सम्भवति।

[**प्रतिसङ्ख्यानिरोधः**—सङ्ख्या—विषयः। तस्य प्रतिकूला, तदसत्त्वग्राहिणी लौकिकानां बुद्धिः—प्रतिसङ्ख्या। तया विषयीक्रियमाणो निरोधः। तद्विपरीतो निरोधः—**अप्रतिसङ्ख्यानिरोधः**। भा. प्र.] **तत्प्रसङ्गेनेति**। क्षणिकत्वदूषणोपयुक्तत्वाभावात्, प्रसङ्गात् सङ्गतिरित्यर्थः (श्रु. प्र.)। **ताभ्यां सहेति**। 'आकाशं द्वौ निरोधौ च नित्यं नियम-संस्कृतम्' इति सह परिगणितस्येत्यर्थः।

श्येनादीति। 'अत्र' इति श्येनपतनाधारतया प्रतीयमानस्तु, न आलोकाभावः; 'अत्राऽऽलोकः' 'अत्राऽन्धकारः' इति आलोकान्धकाराधारतया प्रतीयमानस्य, आलोकाभाव-रूपत्वासम्भवादिति भावः।

न च....शक्यमिति। निबिडद्रव्याभावरूपावकाश एव 'आकाश'शब्दार्थ इति न वक्तुं शक्यमित्यर्थः। **अत्यन्ताभावस्त्विति**। केषांचिदुत्पत्स्यमानानां प्रागभावस्य, केषांचिदुत्पन्नानां ध्वंसस्य च सत्वेन, सर्वेषामत्यन्ताभावासम्भवादिति भावः (भा.प्र.)]

---

[1] बाह्यान्तर—द.　[2] स्य—द.　[3] न च पृथिव्यादेः—त, थ.

अभावस्य विद्यमानपदार्थावस्थाविशेषत्वोपपादनाच्च, आकाशस्य अभावरूपत्वेऽपि, न निरुपाख्यत्वम्। अण्डान्तर्वर्तिनश्च आकाशस्य, त्रिवृत्करणोपदेशप्रदर्शितपञ्चीकरणेन रूपवत्त्वात्, चाक्षुषत्वेऽपि अविरोधः ॥ २३ ॥

१९८. अनुस्मृतेश्च ॥ २-२-२४ ॥

[प्रत्यभिज्ञाबलेन वस्तुस्थिरत्वोपपादनम्]

पूर्वप्रस्तुतं, वस्तुनः स्थिरत्वमेव उपपाद्यते। अनुस्मरणम्—पूर्वानुभूतवस्तुविषयं ज्ञानम्; प्रत्यभिज्ञानमित्यर्थः। 'तदेवेदम्' इति, सर्वं वस्तुजातम् अतीतकालानुभूतं प्रत्यभिज्ञायते। न च भवद्भिः—ज्वालादिष्विव सादृश्यनिबन्धनः, अयम् एकत्वव्यामोहः—इति वक्तुं शक्यम्; व्यामुह्यतः ज्ञातुरेकस्य अनभ्युपगमात्। नहि! [1]अन्या[1]नुभूतेन एकत्वं सादृश्यं वा स्वानुभूतस्य, अन्यः अनुसन्धत्ते। अतः, भिन्नकालवस्त्वाश्रयसादृश्यानुभवनिबन्धनम् एकत्वव्यामोहं वदद्भिः, ज्ञातुरेकत्वम् अवश्याश्रयणीयम्।

न च-ज्ञेयेष्वपि घटादिषु, ज्वालादिष्विव भेदसाधनप्रमाणम् उपलभामहे; येन सादृश्यनिबन्धनां प्रत्यभिज्ञां कल्पयेम ॥

[प्रत्यक्षानुमानाभ्यां वस्तुक्षणिकत्वसिद्ध्याशङ्का-निरासौ]

यदपि चेदमुच्यते—प्रत्यक्षानुमानाभ्यां घटादेः क्षणिकत्वं सिध्यति।

प्रत्यक्षं तावत् वर्तमानार्थविषयम्, अवर्तमानाद्वस्तुनो व्यावृत्तं स्वविषयमवगमयति; नीलमिव पीतात्। एवं च, भूत-भविष्य[2]द्भ्यां वर्त[2]मानस्य वस्त्वन्तरत्वम्, अवगतं भवति।

चाक्षुषत्वेऽपीति। अनेन अनुमेयत्वमप्यनुमतमित्यवगम्यते (श्रु. प्र.) ॥ २३ ॥

'अनुस्मृति'शब्देनाऽभिधानं, स्मृतिसादृश्यात्। ज्वालादिष्विवेति। उत्पत्ति-

---

[सूत्रार्थः ; अनुस्मृतेश्च—प्रत्यभिज्ञाबलादपि वस्तुस्थिरत्वसिद्ध्या, क्षणिकत्वं बौद्धोक्तमसाधु ॥]

स एवाऽयं घट इति प्रत्यभिज्ञा च जायते।
अतो घटादिकार्याणां क्षणिकत्वं न सिध्यति ॥ (ब्र. प. १९८)

---

[1] अस्या—अ. [2] द्भयावर्त—वा.

अनुमानमपि—अर्थक्रियाकारित्वात् सत्त्वाच्च, [1]घटादिः क्षणिकः[1]। यत् अक्षणिकं शशविषाणादि, तत् अनर्थक्रियाकारि असच्च। तथा अन्त्यघटक्षणसत्त्वात् पूर्वघटक्षणसत्त्वानि, विनाशीनि; घटक्षणसत्त्वात्, अन्त्यघटक्षणसत्त्ववत्—इति;

तच्च, कार्यकारणभावानुपपत्त्यादिभिः पूर्वमेव निरस्तम्।

किं च—प्रत्यक्षगम्या वर्तमानस्य अवर्तमानाद्व्यावृत्तिः, [2]न वर्तमानस्य[2] वस्त्वन्तरत्वमवगमयति; अपि तु वर्तमानकालयोगितामात्रम्। न च तावता वस्त्वन्त-, रत्वं सिध्यति; तस्यैव कालान्तरयोगसम्भवात्॥

[क्षणिकत्वसाधकहेतुदूषणम्]

यत्तु—'सत्त्वात् अर्थक्रिया[3]कारित्वाच्च[3]' इति, क्षणिकत्वे हेतुद्वयम्—उक्तम्, [4]तत् अभिमत[4]विपरीतसाधनत्वात् विरुद्धम्। सत्त्वात् अर्थक्रियाकारित्वाद्वा, घटादि स्थास्नु। यत् अस्थास्नु, तत् असत् अनर्थक्रियाकारि च; यथा शशविषाणम्—[5]इत्यपि हि[5]! वक्तुं शक्यम्।

किं च—अर्थक्रियाकारित्वम्, अक्षणिकत्वमेव साधयेत्। क्षणध्वंसिनो हि! व्यापारासम्भवात्, अर्थक्रियाकारित्वं न सम्भवति—इत्युक्तम्।

विनाशसामग्र्यनुवृत्त्यभावादित्यर्थः (श्रु. प्र.) [अन्त्यघटक्षणेति। अन्त्यघटक्षणात् पूर्वघट-क्षणाः, विनाशिनः; घटक्षणत्वात्, अन्त्यघटक्षणवत् इति। घटक्षण-तत्सत्त्वयोरभेदात् सत्त्वमिति व्यवहृतम्। (भा. प्र.)

निरस्तमिति। तर्कानुगृहीतप्रत्यभिज्ञाप्रत्यक्षेण तर्कविरुद्धमनुमानं बाधितमित्यर्थः। **तस्यैवेति**। यथा वस्तुनो नीलत्वोत्पलत्वयोगो न वस्त्वन्तरत्वसाधकः; तथा कालद्वययोगोऽपि संभवतीत्यर्थः॥

तदित्यादि। विपर्ययेणाऽपि व्याप्तिसद्भावात्, विपरीतस्याऽपि साधकमित्यर्थः। **सत्त्वादिति**, प्रकरणसमत्वमुक्तम्।

व्यापारासम्भवादिति। व्यापारस्य हेतुत्वम् आश्रयत्वं च न संभवति; उत्पत्त्यनन्तर-क्षण एव विनष्टत्वात्। अतो न अभिमतकार्यकरत्वमित्यर्थः। समीहितविपर्ययसाधनो-विरुद्धः' इति तल्लक्षणम्।

---

[1] घटादि क्षणिकम् वा. [2] न—त, थ. [3] कारित्वात्—वा. [4] त्वदभिमत—त.
[5] इत्यपि—वा.

तथा, अन्त्यघटक्षणस्य हेतुतो [1]नाश[1]दर्शनात्, इतरेऽपि घटक्षणाः हेत्वपेक्ष-विनाशाः स्युरिति, आ-मुद्गरादिहेतूपनिपातात् स्थास्नुत्वमेव ।

न च—वाच्यम्; न मुद्गरादयो विनाशहेतवः; अपि तु कपालादिविसदृश-सन्तानोत्पत्तिहेतवः—इति; 'कपालत्वावस्था[2]पत्तिरेव[2] घटादीनां विनाशः'—इत्युप-पादितत्वात्। कपालोत्पत्तिव्यतिरिक्तत्वाभ्युपगमेऽपि विनाशस्य, विनाशहेतुत्वमेव मुद्गरादेः, आनन्तर्यात् युक्तम् ।

[प्रत्यभिज्ञायाः स्थिरत्वावगमकतादृढीकरणम्]

अतः [3]प्रत्यभिज्ञया[3]स्थिरत्वम् अवगम्यमानम्, न केनाऽपि [4]प्रकारेण अपह्नोतुं[4] शक्यम्। पूर्वापरकालसम्बन्ध्यर्थैक्यविषयायाः प्रत्यभिज्ञायाः [5]अन्य[5]विषयत्वं ब्रुवन्, नीलादिज्ञानानामपि नीलादेरर्थान्तरविषयत्वं ब्रूयात् ।

किं च—प्रमातृ-प्रमेययोः क्षणिकत्वं वदद्भिः, व्याप्त्यवधारण-तत्स्मरणपूर्वकानु-मानाभ्युपगमोऽपि दुश्शकः। [6]तथा 'इदं[6] क्षणिकम्' इत्यादि प्रतिज्ञापूर्वकहेतूपन्या-सादिकमपि नोपपद्यते भवताम्; प्रतिज्ञोपक्रमक्षण एव वक्तुः विनष्टत्वात्। न हि! अन्येनोपक्रान्तम्, अजानद्भिरन्यैः समापयितुं शक्यम् ॥ २४ ॥

आनन्तर्यादिति। न हि घटे तिष्ठति कपालोत्पत्तिः; अपि तु विनाशानन्तरमेव। मुद्गराभिघाताद्यनन्तरभावी विनाश इति, अनन्तरभाविनं प्रति हेतुत्वं युक्तं; न तु व्यवहितं प्रतीत्यभिप्रायः।

पूर्वेति। ज्ञानं स्वविषयं यथा दर्शयति, तस्य तथात्वमेव। अन्यथा अतिप्रसङ्ग इत्यर्थः।

किञ्चेति। प्रमात्रित्यादिना स्वार्थानुमानस्य दुर्वचत्वम्। तथेत्यादिना परार्थानुमानानुपपत्तिः।

---

[1] विनाश—द. [2] विशेष एव—द. [3] प्रत्यभिज्ञायाः—वा. प्रत्यभिज्ञा—द
[4] प्रमाणेन अपह्नोतुं—इ. प्रमाणेन आस्थातुं—द. [5] अनन्य—थ. [6] तदिदं—थ.

१९९. नाऽसतोऽदृष्टत्वात् ॥ २-२-२५ ॥

एवं तावत्—वैभाषिक-सौत्रान्तिकयोः बाह्यार्थास्तित्ववादिनोः, साधारणानि दूषणानि—उक्तानि। [1]तत्र यदुक्तम्[1]—[2]सम्प्रयुक्त[2]स्याऽर्थस्य ज्ञानोत्पत्तिकाले अनवस्थितत्वात्, न कस्यचिदर्थस्य ज्ञानविषयत्वं सम्भवति—इति ; तत्र सौत्रान्तिकः प्रत्यवतिष्ठते—

[ज्ञेयार्थस्य ज्ञानसमकालवर्तिताया अनुपयोगिता, सौत्रान्तिकोक्ता]

न ज्ञानकाले [3]अनव[3]स्थानमर्थस्य, [4]ज्ञानाविषयत्व[4]हेतुः ; ज्ञानोत्पत्तिहेतुत्वमेव हि ! ज्ञानविषयत्वम्। न च, एतावता चक्षुरादेः ज्ञानविषयत्वप्रसङ्गः ; स्वाकारसमर्पणेन ज्ञानहेतोरेव ज्ञानविषयत्वाभ्युपगमात्। ज्ञाने स्वाकारं समर्प्य विनष्टोऽप्यर्थः, ज्ञानगतेन नीलाद्याकारेण अनुमीयते। न च [5]पूर्व-पूर्व[5]ज्ञानेन [6]उत्तरोत्तर[6]ज्ञानाकारसिद्धिः ; नीलज्ञानसन्ततौ पीतज्ञानानुत्पत्तिप्रसङ्गात्। अतः अर्थकृतमेव ज्ञानवैचित्र्यम्—इति।

[सौत्रान्तिकोक्तस्यार्थस्य, सूत्रार्थवर्णनतो निरासः]

अत्रोच्यते–'नाऽसतोऽदृष्टत्वात्'—इति। योऽयं ज्ञाने नीलादिराकारः उपलभ्यते ; सः विनष्टस्य असतोऽर्थस्य, आकारो भवितुं नार्हति।

कुतः ? अदृष्टत्वात्। न खलु ! धर्मिणि विनष्टे, तद्धर्मस्य अर्थान्तरे सङ्क्रमणं

तत्र यदुक्तमित्यादि। 'उत्तरोत्पादे च' इत्यादि सूत्रषट्कम्, दृष्टमुखेन दूषणपरम् ; अतः दृष्टानुबन्धिदूषणानन्तरम्, सौत्रान्तिकावसरः दृष्टानुबन्धिदूषणपरिहारार्थः।

[सूत्रार्थः ; असतः—अविद्यमानस्य धर्मिणो(धर्मस्य) न—(अन्यत्र सङ्क्रमो) न सम्भवति। अदृष्टत्वात्—लोके तस्य क्वचिदपि अनुपलब्धत्वात् ॥]

विनष्टेषु पदार्थेषु तद्गुणस्याऽन्यवस्तुनि।
न दृष्टः सङ्क्रम इति क्षणिकत्वं न युज्यते ॥ (ब्र. प. १९९)

---

[1] यदुक्तम्—त. थ.	[2] संयुक्त—थ.	[3] अनव—त. थ.	[4] ज्ञानाविषयत्वे—द. ज्ञानविषयत्व—त. थ.	[5] पूर्व—द.	[6] उत्तर—त, थ, न.

दृष्टम्। प्रतिबिम्बादिकमपि स्थिरस्यैव भवति। तत्राऽपि न धर्ममात्रस्य। अतः अर्थवैचित्र्यकृतं ज्ञानवैचित्र्यम्, अर्थस्य ज्ञानकाले अवस्थानादेव [1]भवति[1] ॥ २५॥

[अनुद्योगिनामपि सर्वार्थसिद्धिप्रसङ्गेन क्षणिकत्वादेर्दुष्टता]

[2]पुनरपि[2] साधारणं दूषणमाह—

२००. उदासीनानामपि चैवं सिद्धिः ॥ २-२-२६ ॥

एवं—क्षणिकत्वासदुत्पत्त्यहेतुकविनाशाद्यभ्युपगमे, उदासीनानाम्—अनुद्युञ्जानानामपि सर्वार्थसिद्धिः स्यात्। इष्टप्राप्तिः अनिष्टनिवृत्तिर्वा प्रयत्नादिभिः साध्यते। क्षणध्वंसे हि! सर्वेषां भावानां पूर्व[3]पूर्वं वस्तु तद्गतो[3] वा [4]विशेषः, सं[4]स्कारादिको विद्यादिर्वा उत्तरत्र न कश्चिदनुवर्तत इति, [5]प्रयत्नादिभिः[5] साध्यं न किञ्चिदस्ति। एवं सति, अहेतुसाध्यत्वात्सर्वसिद्धीनाम्, उदासीनानामपि ऐहिका[6]मुष्मिक[6]फलं मोक्षश्च सिध्येत् ॥ २६ ॥

इति समुदायाधिकरणम् ॥ ३ ॥

प्रति-बिम्बादिकमिति। 'आदि' शब्देन, स्फटिके जपाकुसुमस्य छायापत्तिर्विवक्षिता। तत्रापीति। न केवलं धर्ममात्रस्य प्रतिबिम्बो दृष्टः; धर्मिण एव तु दृष्टः इत्यर्थः ॥ २५ ॥

संस्कारादिः—स्वर्गादिहेतुभूतो विशेषः। विद्यादिः—मोक्षहेतुर्विशेषः ॥ २६ ॥

[सूत्रार्थः; एवम्—सर्वेषामपि भावानां क्षणिकत्वे स्वीक्रियमाणे सति, उदासीनानामपि—निरुद्यमानामपि पुरुषाणाम्, सिद्धिः—ऐहिकस्य पारत्रिकस्यापि च सर्वस्यापि फलस्य स्वयं सिद्धिः भवेत् ॥]

यतमानविनाशेऽपि फलं भवति यन्मते।
निष्प्रयत्नजनानां च तत्र मोक्षादिकं भवेत् ॥ (ब्र. प २००)

[सूत्राणि—१. समुदायः २. इतरेतर ३. उत्तरो ४. असति
५. प्रतिसङ्ख्या ६. उभयथा ७. आकाशे च ८. अनुस्मृ
९. नासतो १०. उदासी।]

इति समुदायाधिकरणम् ॥ ३ ॥

—o—

[1] संभवति—न. [2] पुनर्हि—थ. [3] पूर्ववस्तु-तद्गतः—वा. पूर्ववस्तुगतः—द.
[4] विशेषसं—द. [5] प्रयत्नादि—ब. [6] मुष्मिकं—द.

(49) उपलब्ध्यधिकरणम् ॥ २-२-४ ॥ सू. 27-29

[अधि-अर्थः—विज्ञानमात्रास्तित्ववादियोगाचारपक्षप्रतिक्षेपः]

२०१. नाऽभाव उपलब्धेः ॥ २-२-२७ ॥

[योगाचारबौद्धानां प्रत्यवस्थानम्]

विज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रत्यवतिष्ठन्ते ।

यदुक्तम्—अर्थवैचित्र्यकृतं ज्ञानवैचित्र्यम्—इति ; तन्नोपपद्यते ; अर्थवत् ज्ञानानामेव [1]साकाराणां,[1] स्वयमेव विचित्रत्वात् । तच्च स्वरूपवैचित्र्यं, वासनावशादेव उपपद्यते । वासना च—विलक्षणप्रत्ययप्रवाह एव । 'यद्[2]घटाकार[2]ज्ञानं कपालाकारज्ञानस्य उत्पादकं, तस्य तथाविधस्योत्पादकं, तत्पूर्वघटज्ञानम् । तस्य च तथाविध[3]स्यो[3]त्पादकं, ततः पूर्वघटज्ञानम्' इत्येवंरूपः प्रवाह एव, वासनेत्युच्यते ।

नाभाव इति । किम् अर्थशून्यज्ञानवादे जगदुत्पत्तिः संभवति ? न ? इति । स पक्षः समीचीनयुक्तिमूलः ? न ? इति । घटाद्याकारः, ज्ञानाकारः ? उत अर्थाकारः ? इति । किम् अर्थासाधारण्यं नाम, तत्तदर्थसारूप्यम् ? उत अर्थसम्बन्धः ? इति । किं घटाद्याकारातिरेकेण अर्थव्यवहारानुगुण्यं नाम ज्ञानाकारः, भासते ? न वा ? इति [विचाराः] ।

यदा आकारान्तरं न भासते ; यदा च अर्थसारूप्यलक्षणम् अर्थासाधारण्यम् ; सदा घटाद्याकारः, विज्ञानाकार इति, विज्ञानमात्रवादस्य सम्यग्युक्तिमूलत्वात् , तत्र जगदुदयसम्भवः । यदा ज्ञानस्य तत्तदर्थव्यवहारानुगुण्यम् आकारान्तरं भासते ; यदा च अर्थासाधारण्यं तत्सम्बन्धलक्षणम् ; तदा घटाद्याकारस्य ज्ञानाकारत्वाभावात् योगाचारमतस्य युक्तिशून्यतया, तत्पक्षे न जगदुत्पत्तिसम्भवः । [इति पूर्वोत्तरपक्षयोः फल-फलिभावौ]

यद् घटाकारेति । विजातीयज्ञानसन्तानेषु चरमज्ञानं विजातीयोत्पादनशक्तमित्यर्थः । यथा अर्थाभ्युपगमेऽपि विजातीयघटादेः विजातीयकपालाद्युत्पादकत्वम् ; तथेति भावः ।

[सूत्रार्थः ; अभावः—ज्ञानेतरेषां सर्वेषामर्थानामसत्त्वमित्ययमंशः, न—नैव सम्भवति, उपलब्धेः—ज्ञेयस्य घटादेरर्थस्य 'घटमहं जानामि' इति प्रत्यक्षादितः सिद्धेः अनपलपनीयत्वात्॥]

ज्ञानादन्यपदार्थानामभावोक्तिर्न सिध्यति ।
सर्वेषां तु पदार्थानामुपलब्धेः प्रमाणतः ॥ (ब्र. प. २०१)

---

[1] संस्काराणां—इ. [2] घटाकारं—बा. [3] स ज्ञानस्यो—बा.

[अर्थगतस्याकारस्य ज्ञानगताकारत्वोपपादनम्]

कथं–बहिष्ठसर्षप–महीधरा(दि)देराकारः, आन्तरस्य ज्ञान[1]स्यैवेत्युच्यते[1] ?

इत्थम्; अर्थस्याऽपि व्यवहारयोग्यत्वं, ज्ञानप्रकाशायत्तम्; अन्यथा, स्वपर-वेद्ययोः अनतिशयप्रसङ्गात्। प्रकाशमानस्य च ज्ञानस्य, साकारत्वम् अवश्याश्रय-णीयम्; निराकारस्य प्रकाशायोगात्। एकश्च अयमाकार उपलभ्यमानः, ज्ञानस्यैव। तस्य च बहिर्वदवभासोऽपि, भ्रमकृतः। ज्ञानार्थयोः सहोपलम्भनियमाच्च, ज्ञानाद्व्यति-रिक्तः अर्थः।

[बाह्यानामर्थानामभावः]

किं च—बाह्यमर्थम् अभ्युपयद्भिरपि, घट-पटादिविज्ञानेषु ज्ञानस्य तत्तदर्था-साधारण्यं, तत्तदर्थसारूप्यमन्तरेण नोपपद्यते—इति, अवश्यं ज्ञाने [2]अर्थसरूपं[2] रूपमा-स्थेयम्॥ तावतैव सर्वव्यवहारोपपत्तेः तद्व्यतिरिक्तार्थकल्पना निष्प्रामाणिका। अतः विज्ञानमात्रमेव तत्त्वम्; न बाह्यार्थोऽस्ति—इति।

[वेदान्तिनां सिद्धान्तः, ज्ञानेतरार्थसत्यता]

एवं प्राप्ते, प्रचक्ष्महे—'नाऽभाव उपलब्धेः'—इति।

[3]ज्ञानाति[3]रिक्तस्य अर्थस्य, अभावो वक्तुं न शक्यते।

कुतः? उपलब्धेः—ज्ञातुरात्मनः अर्थविशेषव्यवहारयोग्यतापादनरूपेण ज्ञानस्योप-लब्धेः। एव(मि)मेव हि! सर्वे लौकिकाः '[4]प्रतियन्ति[4]; 'घटमहं जानामि' इति।

ज्ञानार्थयोरिति। द्विचन्द्रज्ञाने चन्द्रद्वयसहोपलम्भनियमाद्धि! द्वितीयचन्द्रस्य चन्द्राद्-व्यतिरिक्तत्वम्; तद्वदिति भावः।

किं चेत्यादि। ज्ञानानामेव वासनावशात् वैचित्र्योपपत्तेः, चरमज्ञानस्यैव अर्थवत् विजातीयोत्पादनशक्तत्वाच्च, ज्ञानानां साकारतयैव प्रकाशमानत्वेन आकारद्वयानुपलब्ध्या ज्ञानस्यैव तत्तदाकारभाक्त्वाच्च, सहोपलम्भनियमाच्च, बाह्यार्थाभ्युपगमेऽपि ज्ञानस्य तत्तदर्था-साधारण्यस्य तत्तदर्थसारूप्यनिबन्धनत्वाच्च, तावतैव सर्वव्यवहारोपपत्तेश्च ज्ञानमात्रमेव तत्त्वम्—इत्यर्थः।

ज्ञातुरा....रूपेणेति। अनेन 'निराकारस्य प्रकाशायोगात्' इति हेतुः प्रत्युक्तः; 'न नीलादिः ज्ञानाकारः। तत्तन्नीलाद्यर्थव्यवहारानुगुण्यमेव ज्ञानस्याकारः' इत्यस्यार्थस्य उक्तत्वात्॥

---

[1] स्येत्युच्यते—च. स्यैवोच्यते—वा. [2] अर्थस्य—द. [3] ज्ञानव्यति—वा. [4] प्रतीयन्ते—इ.

एवंरूपेण सकर्मकेण सकर्तृकेण ज्ञाधात्वर्थेन, सर्वलोकसाक्षिकम् अपरोक्षमवभासमानेनैव, 'ज्ञानमात्रमेव परमार्थः' इति साधयन्तः, सर्वलोकोपहासोपकरणं [1]भवन्तीति[1], वेदवादच्छद्मप्रच्छन्नबौद्धनिराकरणे निपुणतरं प्रपञ्चितम् ॥

[ग्राह्य-ग्राहकयोरभेदवचनस्य स्वव्याघातः]

यत्तु—'सहोपलम्भनियमादभेदो नील-तद्धियोः' (वि. प्र. सं. 75)—इति ; तत् स्ववचनविरुद्धम् ; साहित्यस्य अर्थभेदहेतुकत्वात् । तदर्थव्यवहार[2]योग्यतैक[2]स्वरूपस्य [3]ज्ञानस्य, 'तेन [3]सहोलम्भनियमः, तस्मादवैलक्षण्यसाधनम्' इति च हास्यम् ।

[वासनाया असिद्धिः]

निरन्वयविनाशिनां ज्ञानानाम् अनुवर्तमानस्थिराकारविरहात्, वासना च दुरुपपादा । विनष्टेन पूर्वज्ञानेन, अनुत्पन्नम् उत्तरज्ञानं कथं वास्यते ? अतः ज्ञानवैचित्र्यमपि अर्थवैचित्र्यकृतमेव ।

[ज्ञाने अर्थासाधारण्यस्य अर्थसम्बन्धायत्तता]

[4]तत्तदर्थ[4]व्यवहारयोग्यतापादनरूपतया साक्षात्प्रतीय[5]मानस्य ज्ञानस्य[5], तत्तदर्थसम्बन्धायत्तं तत्तदसाधारण्यम् । सम्बन्धश्च संयोगलक्षणः । ज्ञानमपि हि ! द्रव्यमेव । प्रभाद्रव्यस्य प्रदीपगुणभूतस्येव ; ज्ञानस्याऽपि आत्मगुणभूतस्य, द्रव्यत्वमविरुद्धम्—इत्युक्तम् । अतः न बाह्यार्थाभावः ॥ २७ ॥

[ज्ञानानां निरालम्बनत्ववादनिरासः]

यत् परैः—स्वप्नज्ञानदृष्टान्तेन, जागरितज्ञानानामपि निरालम्बनत्वमुक्तम् ; तत्राऽऽह—

एवं रूपेणेति । ज्ञाने सकर्मके सकर्तृके च अपरोक्षं भासमाने, तत्र कस्यचिदंशस्य अपारमार्थ्ये, तदन्यस्याप्यपारमार्थ्यप्रसङ्गात्, अपरोक्षसिद्धौ सर्वं ज्ञानवत् सत्यमित्यर्थः ।

यत्त्विति । साहित्यं द्वयोरेवेति, तत् भेदसाधकम् । उपलम्भनियमः भिन्नेष्वभिन्नेष्वपि नास्तीति, असाधारणानैकान्तिकत्वम् ।

तत्तदर्थेत्यादिना तत्तदसाधारण्यस्य तत्तत्सारूप्यनिबन्धनत्वं परिहरति । प्रदीपदृष्टान्तेन द्रव्यस्य [ज्ञानस्य] द्रव्यान्तर(आत्म) धर्मतैकस्वरूपत्वम् ।

---

[1] भवतीति—त. थ. [2] योग्यतापादनैक—त. थ. [3] तेन—आ. [4] तदर्थ—द.
[5] मानस्य—द.

२०२. वैधर्म्याच्च न स्वप्नादिवत् ॥ २-२-२८ ॥

स्वप्नज्ञानवैधर्म्यात्, जागरितज्ञानानाम् अर्थशून्यत्वं न युज्यते वक्तुम्। स्वप्नज्ञानानि हि!, [1]निद्रादिदोषदुष्ट[1]करणजन्यानि, बाधितानि च। जागरितज्ञानानि तु, तद्विपरीतानीति, तेषां न तत्साम्यम्।

सर्वेषां च ज्ञानानाम् अर्थशून्यत्वे, भवद्भिः साध्योऽप्यर्थो न सिध्यति; निरालम्ब[2]नानुमान[2]स्याऽपि अर्थशून्यत्वात्। तस्याऽर्थवत्त्वे, ज्ञानत्वस्य अनैकान्त्यात्, सुतराम् अर्थशून्यत्वा[3]सिद्धिः[3] ॥ २८ ॥

२०३. न भावोऽनुपलब्धेः ॥ २-२-२९ ॥

[4]न केवलस्य[4] अर्थशून्यस्य ज्ञानस्य भावः सम्भवति;

कुतः? क्वचिदप्यनुपलब्धेः। न हि! अकर्तृकस्य अकर्मकस्य वा ज्ञानस्य [5]क्वचिदुपलब्धिः[5]। स्वप्न[6]ज्ञानादिष्वपि[6] न अर्थशून्यत्वमिति, ख्यातिनिरूपणे प्रतिपादितम् ॥ २९ ॥

इति उपलब्ध्यधिकरणम् ॥ ४ ॥

क्वचिदपीति। सुषुप्तौ केवलधर्मिस्फुरणमेव; न धर्मभूतज्ञानस्येत्यभिप्रायः ॥ २९ ॥

[सूत्रार्थः; **स्वप्नादिवत्**—स्वाप्न-मृगतृष्णिकादिज्ञानसादृश्येन (जागरितज्ञानानां मिथ्यार्थत्वम्) **न**—नैव सम्भवति, **वैधर्म्याच्च**—जागरितज्ञानस्य स्वप्नज्ञानतो वैषम्यात्। स्वाप्नमपि न मिथ्यार्थम्]

> स्वप्नादिवज्जागरितज्ञानस्याऽपि न युज्यते।
> मिथ्यात्वं, दोषराहित्यवैधर्म्यादेव सिध्यति॥ (ब्र॰ प॰ २०२)

[सूत्रार्थः; **भावः**—ज्ञानस्य अर्थशून्यतया सत्त्वम्, **न**—न सम्भवति, **अनुपलब्धेः**—तस्यानुभवागोचरत्वात् ॥]

> ज्ञानस्य चाऽर्थशून्यस्य सद्भावो नैव विद्यते।
> कर्मकर्तृवियुक्तस्य ज्ञानस्याऽनुपलब्धितः॥ (ब्र॰ प॰ २०३)

[सूत्राणि—१. नाऽभावः, २. वैधर्म्याच्च, ३. न भावो.]

इति उपलब्ध्यधिकरणम् ॥ ४ ॥

—o—

---

[1] दुष्ट—इ. [2] न ज्ञान—आ,इ,ग,ङ. [3] सिद्धेः—आ [4] न केवलं—द.
[5] क्वचिदप्युपलब्धिः—द. [6] ज्ञानस्य—द.

(50) सर्वथानुपपत्त्यधिकरणम् ॥ २-२-५ ॥

[अधि-अर्थः—माध्यमिकाभिमतसर्वशून्यवादप्रतिक्षेपः]

२०४. सर्वथाऽनुपपत्तेश्च ॥ २-२-३० ॥

[पूर्वपक्षतया माध्यमिकपक्षसङ्क्षिप्तानुवादः]

अत्र [1]सर्वशून्य[1]वादी माध्यमिकः प्रत्यवतिष्ठते । शून्यवाद एव हि! सुगतमतकाष्ठा । शिष्यबुद्धियोग्यतानुगुण्येन अर्थाभ्युपगमादिना क्षणिकत्वादय उक्ताः ।

विज्ञानं, बाह्यार्थाश्च [2]सर्वे न[2] सन्ति । शून्यमेव तत्त्वम् । अभावापत्तिरेव च मोक्षः—इत्येव बुद्धस्याऽभिप्रायः । तदेव हि! युक्तम्; शून्यस्य अहेतुसाध्यतया, स्वतः सिद्धेः । सत एव हि! हेतुरन्वेषणीयः । तच्च सत्, भावात् अभावाच्च [3]नोत्पद्यते[3] ।

भावात् तावत्, न कस्यचित् उत्पत्तिर्दृष्टा । न हि! घटादिः, अनुपमृदिते पिण्डादिके जायते ।

नाऽपि, अभावादुत्पत्तिः सम्भवति । नष्टे पिण्डादिके हि! अभावादु[4]त्पद्यमानं[4] घटादिकम्, अभावात्मकमेव स्यात् ।

तथा, स्वतः परतश्च उत्पत्तिर्न सम्भवति; स्वतः स्वोत्पत्तौ, आत्माश्रयदोषप्रसङ्गात्, प्रयोजनाभावाच्च । परतः परोत्पत्तौ, परत्वाविशेषात् सर्वेषां सर्वेभ्य उत्पत्तिप्रसङ्गः ।

सर्वथेति । किं माध्यमिकेनोक्तः सर्वशून्यवादः, संभवति? न? इति । किं सर्वं कार्यं भावरूपम्? उत अभावरूपम्? इति । किं सर्वकार्येष्वपि भाव एव कारणम्? उत अभावः? इति । किं भावान्तरम्, अभावरूपम्? उत तुच्छं नाम अर्थान्तरम्?।

यदा तुच्छं नाम अर्थान्तरम् अभावः; तदा सर्वकार्येष्वभाव एव कारणमिति, कार्यस्याऽप्यभावात्मकतया, शून्यवाद उपपन्नः स्यात् । यदा भावान्तरम् अभावः, तदा सर्वकार्येषु भाव एव कारणमिति, कार्यस्यापि भावरूपत्वात्, सर्वशून्यवादः अनुपपन्नः स्यात् । अहेत्विति । सतो हेत्वभावादेव शून्यसिद्धिः; न तु साधकहेत्वन्तरापेक्षयेत्यर्थः । न हीति । विनाशादेव जायते इत्यर्थः । प्रयोजनाभावः—स्वयं विद्यमानत्वात् उत्पत्तिनैरपेक्ष्यम् ॥

[सूत्रार्थः; सर्वथा—सत्त्वेन, असत्त्वेन प्रकारान्तरेण वा प्रतिज्ञाय, अनुपपत्तेश्च—सर्वशून्यत्वसाधनायोगादपि, इदं मतमसाधु ।

सर्वशून्यत्ववादश्च न सिध्यति भवन्मते ।
सर्वथाऽनुपपत्तेश्च प्रमाणादिविरोधतः ॥ (ब्र. प. २०४)

---

[1] सर्वशून्यत्व—आ,इ,ग,व. [2] न—थ. [3] नोपपद्यते—ग,द. [4] त्पाद्यमानं—त, थ.

जन्माभावादेव, विनाशस्याऽप्यभावः । अतः शून्यमेव तत्वम् ॥ अतः जन्म-विनाश-सदसदादयः, भ्रान्तिमात्रम् ।

[ब्रह्माज्ञानवादिचोद्यनिराकरणम्]

न च—निरधिष्ठानभ्रमासम्भवात्, भ्रमाधिष्ठानं किंचित् पारमार्थिकं तत्त्वम् आश्रयितव्यम्; दोष-दोषाश्रयत्व-ज्ञातृत्वाद्यपारमार्थ्येऽपि भ्रमोत्पत्तिवत्, अधिष्ठाना-पारमार्थ्येऽपि भ्रमोपपत्तेः । अतः शून्यमेव तत्त्वम् ॥

[वेदान्तिसिद्धान्तेन सर्वशून्यवादनिरासः]

इति प्राप्ते, उच्यते—'सर्वथाऽनुपपत्तेश्च'—इति । सर्वथा अनुपपत्तेः, सर्व-शून्यत्वं च भवदभिप्रेतं न संभवति ।

किं भवान्, 'सर्वं सत्' इति वा प्रतिजानीते? असदिति वा? अन्यथा वा? सर्वथा, तत्राऽभिप्रेतं तुच्छत्वं न संभवति; लोके भावाभावशब्दयोः तत्प्रतीत्योश्च, विद्यमानस्यैव वस्तुनः अवस्थाविशेषगोचरत्वस्य प्रतिपादितत्वात् । अतः 'सर्वं शून्यम्' इति प्रतिजानता, 'सर्वं सत्' इति प्रतिजानतेव, सर्वस्य विद्यमानस्य अवस्थाविशेष-[1]योगितैव[1] प्रतिज्ञाता भवतीति, भवदभिमता तुच्छता, न कुतश्चिदपि सिध्यति ।

[2]किं च—कुतश्चित्[2] प्रमा[3]णात्[3] शून्यत्वमुपलभ्य, [4]शून्यत्वं सिषा[4]धयिषता, तस्य प्रमाणस्य [5]सत्यत्वम्[5] अभ्युपेत्यम् । तस्य [6]असत्यत्वे,[6] सर्वं सत्यं स्यादिति, सर्वथा सर्वशून्यत्वं च अनुपपन्नम् ॥ ३० ॥

इति सर्वथाऽनुपपत्त्यधिकरणम् ॥ ५ ॥

सर्वथा शब्देन, प्रमाणविकल्पानुपपत्तिः प्रमेयविकल्पानुपपत्तिश्च विवक्षिता ।

किं भवान् इति प्रमेयं विकल्पयति । **अन्यथा वा?**—किम् उभयात्मकत्वेन? उत अनुभयात्मकत्वेन? इत्यर्थः । उभयात्मकत्वे अनुभयात्मकत्वे च अवस्थान्तरापत्तिरेवोक्ता स्यात्; लोकप्रतीत्या पराभ्युपगमप्रकारेण वा, सत्त्वासत्त्वयोः अवस्थाविशेषरूपत्वात् । न हि! शून्यवादिनः, उभयप्रकारातिरेकेण साधन-दूषणव्यवहारसम्भवः । घटत्वं स्वापेक्षया सत्; कपालापेक्षया असदिति, उभयात्मकम् । घटः स्वापेक्षया न असन्; कपालापेक्षया असन् । अतः अनुभयात्मकत्वमपि अवस्थाविशेष इति ॥

किंचेति प्रमाणानुपपत्तिमाह । 'प्रमाण'शब्दः प्रमितेरप्युपलक्षणार्थः । किं 'सर्वं शून्यम्' इति प्रमितिः तत्कारणं वा सत्यम्? उत न सत्यम्? सत्यं चेत्! न सर्वशून्यत्वम् । असत्यं चेत्! नितरामित्यर्थः ॥ ३० ॥

इति सर्वथाऽनुपपत्त्यधिकरणम् ॥ ५ ॥

---

[1] योगितयैव—द. [2] कुतश्चित्—आ. [3] णतः—आ. [4] सिषा—आ. [5] सत्त्वम्—द. [6] असत्त्वे—द.

(51) एकस्मिन्नसम्भवाधिकरणम् ॥ २-२-६ ॥ (सू. 31-34)

[अधि-अर्थः—आर्हताभ्युपगतानेकान्तवादनिरासः]

जै

२०५. एकस्मिन्नसम्भवात् ॥ २-२-३१ ॥

[सङ्गतिप्रदर्शनम्]

निरस्ताः सौगताः। जैना अपि, परमाणुकारणत्वादिकं[1] जगतो वदन्तीति, अनन्तरं जैनपक्षः प्रतिक्षिप्यते।

[आर्हतमतस्य सङ्ग्रहेणाऽनुवादः]

ते किल मन्यन्ते—जीवाजीवात्मकं जगदेतत्, निरीश्वरम्। तच्च षड्द्रव्यात्मकम्। तानि च द्रव्याणि—जीवधर्माधर्मपुद्गलकालाकाशाख्यानि।

१) तत्र जीवाः—बद्धाः योगसिद्धाः मुक्ताश्चेति—त्रिविधाः। २) धर्मो नाम—गतिमतां गतिहेतुभूतः, द्रव्यविशेषो जगद्व्यापी। ३) अधर्मश्च—स्थितिहेतुभूतः

निरस्ता इति। वैशेषिक-बौद्धयोः परमाणुकारणवादिनोः, एकान्तत्व-परमाणुचातुर्विध्य-साम्यात्, तन्निरासौ सङ्गतौ। बौद्धानन्तरम् आर्हतमतनिरासः प्राप्तः।

[विचाराः—] किम् एकान्तब्रह्मकारणवादो विचाल्यः? उत न? इति। किं जैनमतं समीचीनयुक्तिमूलम्? उत न? इति। किम् एकस्य वस्तुनः सत्त्वासत्त्व-भिन्नत्वाभिन्नत्व-नित्यत्वानित्यत्वाद्यनेकस्वभावत्वं सम्भवति? न? इति। किं पर्याय-स्वभावाभ्याम् एकस्य वस्तुनः अनेकस्वभावत्वम् आपादयितुं शक्यते? न? इति॥

यदा शक्यते; तदा एकस्य वस्तुनः अनेकस्वभावत्वसंभवात्, जैनमतस्य समीचीन-युक्तिमूलतया, ब्रह्मकारणवादस्य अश्रद्धेयता स्यात्। यदा तु न शक्यते; तदा वस्तुनः अनेकस्वभावत्वासम्भवेन, जैनमतस्य कुतर्कमूलतया, ब्रह्मकारणवादस्य श्रद्धेयतमत्वम्॥

[सूत्रार्थः; **एकस्मिन्**—अभिन्ने धर्मिणि, **असम्भवात्**—(एकदैव सत्त्वाऽसत्त्वादीनां मिथोविरुद्धानां धर्माणां समावेशस्य) असम्भावितत्वात्, (तदभ्युपगन्तृ आर्हतं मतम् असमञ्जसम्॥)]

एकस्मिन्नेव युगपदस्ति-नास्त्यादिशंसनम्।
भिन्नाभिन्नत्ववादश्चाऽसम्भवात्तु निरस्यते॥ (ब्र. प. २०५)

---

[1] कारणत्वं—न.

व्यापी। ४) पुद्गलो नाम—वर्ण-गन्ध-रस-स्पर्शवत् द्रव्यम्। तच्च द्विविधम्—परमाणुरूपम्, तत्सङ्घातरूपं च; पवन-ज्वलन-सलिल-धरणी-तनु-[1]भुवनादि[1]कम्। ५) कालस्तु—'अभूत्, अस्ति, भविष्यति' इति व्यवहारहेतुः अणुरूपो द्रव्यविशेषः। ६) आकाशोऽपि—एकः अनन्तप्रदेशश्च।

तेषु च, अणुव्यति[2]रिक्तानि[2]द्रव्याणि 'पञ्च अस्तिकायाः' [3]इति च[3] सङ्गृह्यन्ते। जीवास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः पुद्गलास्तिकायः आकाशास्तिकायः—इति। अनेकदेशवर्तिनि द्रव्ये 'अस्तिकाय' [4]शब्दः प्रयुज्यते[4] ॥

[तत्रैव जीवमोक्षौपयिकार्थसङ्ग्रहः]

जीवानां मोक्षोपयोगिनम्, अपरमपि सङ्ग्रहं कुर्वन्ति;

'जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षाः' (जै. द.)

इति। मोक्षसङ्ग्रहेण मोक्षोपायश्च [5]गृहीतः[5]। स च—सम्यग्ज्ञान-दर्शन-चारित्ररूपः। तत्र (१) जीवस्तु; ज्ञान-दर्शन-सुख-वीर्यगुणः। (२) अजीवश्च, जीवभोग्यवस्तुजातम्। (३) आस्रवः, [6]तदुपभोगोपकरणभूतम्[6] इन्द्रियादिकम्। (४) बन्धश्च, अष्टविधः। घातिकर्मचतुष्टयम्, अघातिकर्मचतुष्टयं चेति। (१) तत्राऽऽद्यम्, जीवगुणानां

स्थितिहेतुः—स्थावरत्वादिहेतुः अप्रवृत्तिहेतुरित्यर्थः।

[**पञ्चाऽस्तिकाया इति**। 'अस्तीति कार्यन्ते—शब्द्यन्ते' इति अस्तिकायव्युत्पत्तेरिति भावः।

मोक्षोपायश्चेति। यद्यपि 'संवर'शब्देनैव मोक्षसाधनमप्युक्तमेव; 'आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम्' इति; तथापि, संवरशब्दविवक्षितमोक्षकारणविशेषातिरिक्तस्योपायस्याऽपि सङ्ग्रहार्थम् इदमुक्तमिति द्रष्टव्यम्। **तदुपभोगेति**। 'आस्रवः कर्मणा बन्धः निर्जरस्तद्विमोचनम्' इति जिनदत्तवचनं मतान्तराभिप्रायेणेति द्रष्टव्यम्। **घातिकर्माणि**—ज्ञानावरणीयम्, दर्शनावरणीयम, मोहनीयम्, आन्तरायिकं च चत्वारि। **अघातिकर्माणि**—वेदनीयं, नामिकं, गोत्रिकं, आयुष्कं चेति चत्वारि। तत्र **ज्ञानावरणीयम्**—सम्यग्ज्ञानं न मोक्षसाधनम्' इति विपर्ययः। **दर्शनावरणीयम्**—'आर्हतदर्शनाभ्यासात् न मोक्षः' इति ज्ञानम्। **मोहनीयम्**—तीर्थकरैरुपदर्शितेषु विप्रतिषिद्धेषु बहुषु मोक्षमार्गेषु विशेषानवधारणम्। **आन्तरायिकम्**—मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानम्। तानीमानि श्रेयोहन्तृत्वात् घातिकर्माणि।

---

[1] भवनादि—त,थ,न. [2] रिक्त—ष. [3] इति—द. [4] शब्दः—भा,इ. [5] संगृहीतः—इ.
[6] तद्योगोपकरणभूतम्—च. तद्भोगोपकरण—भा, द

स्वाभाविकानां ज्ञान-दर्शन-वीर्य-सुखानां, प्रतिघातकरम्। (२) अपरम्, शरीरसंस्थान-तदभिमान-तत्स्थिति—तत्प्रयुक्तसुख[1]दुःखोपेक्षा[1]हेतुभूतम्। (५) निर्जरम्, मोक्ष-साधनम् अर्हदुपदेशावगतं तपः। (६) संवरो नाम, इन्द्रियनिरोधः समाधिरूपः। (७) मोक्षस्तु, निवृत्तरागादिक्लेशस्य स्वाभाविकात्मस्वरूपाविर्भावः॥

[असाधारणभूतो जैनप्रक्रियाविशेषः]

पृथिव्यादिहेतुभूताश्च अणवः, वैशेषिकादीनामिव न चतुर्विधाः; अपि तु एकस्वभावः। पृथिव्यादिभेदस्तु परिणामकृतः। सर्वं च वस्तुजातम्, सत्त्वासत्त्व-नित्यत्वानित्यत्व-भिन्नत्वाभिन्नत्वादिभिः अनैकान्तिकमिच्छन्ति—

'स्यादस्ति, स्यान्नाऽस्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यम्, स्यादस्ति चावक्तव्यं च, स्यान्नास्ति चावक्तव्यं च, स्यादस्ति च नास्ति चावक्तव्यं च' (जै. द.)

इति सर्वत्र सप्तभङ्गीनयावतारात्।

सर्वं वस्तुजातं द्रव्यपर्यायात्मकमिति, द्रव्यात्मना सत्त्वैकत्व[2]नित्यत्वादि[2] उपपादयन्ति; पर्यायात्मना च तद्विपरीतम्। पर्यायाश्च द्रव्यस्य अवस्थाविशेषाः तेषां च भावाभावरूपत्वात्, सत्त्वासत्त्वादिकं सर्वमुपपन्नम्—इति॥

वेदनीयम्—धर्त्रीयबीजस्य तेजः पाकवत् ईषद्घनीभावतः शरीराकारपरिणामहेतुः। नामिकम्—शक्तौ सिद्धायां तस्मिन् बीजे कलल-बुद्बुदात्मतारम्भकक्रियाविशेषः। गोत्रिकम्—(शुक्र-शोणितोभयस्य मिलितस्य) देहाकारपरिणामशक्तिः। आयुष्कम्—आयुः कायति-कथयति उत्पादनद्वारेणेति मिलितं शुक्र-शोणितोभयम्। अघातीनि श्रेयोहन्तृत्वाभावात्। तपः—तप्तशिलारोहणादिकम्। संवरः—संवृणोति इन्द्रियप्रवृत्तिमिति मोक्षसाधनं गुप्ति-समित्यादिकम्। आत्मस्वरूपाविर्भाव इति। निवृत्तसमस्तक्लेशस्य लोकाकाशावस्थानं मोक्ष-इत्येके। पञ्जरमुक्तशुकस्येव जलनिमज्जनप्रक्षीणपङ्कालाबुफलस्येव धर्माधर्मास्तिकायबन्धविनिर्मुक्तस्य सततोर्ध्वगमनं मोक्षः इति केचिदाचक्षते (भा. प्र.)॥]

[स्यादस्तीति। स्याच्छब्दः तिङन्तप्रतिरूपकः अनैकान्त्यद्योतकः। सत्त्व-असत्त्व-सदसत्त्व-सदसद्विलक्षणत्वरूपाः चत्वारः पक्षाः। तत्र च सदसद्विलक्षणत्वे सत्त्व-असत्त्व-सदसत्त्व-मेलनैः त्रयः पक्षाः इत्येवं सप्त पक्षाः, वादिभिः उत्प्रेक्षितुं शक्याः। ते सर्वेऽपि पक्षाः जैनैः स्वाङ्गीकृतसर्वपदार्थेषु ईषदीषदङ्गीक्रियन्ते (भा.प्र.)।] पर्यायः—अवस्था। अवस्था-विशेषाणां भावाभावरूपत्वात्, द्रव्यस्य सत्वादिकमुपपन्नमित्यर्थः (श्रु. प्र.)।

---

[1] दुःखापेक्षा—द.   [2] नित्यत्वानि—अ.

[स्वसिद्धान्तप्रतिपादनाय जैनमतदूषणम्]

अत्राऽभिधीयते—'नैकस्मिन्नसम्भवात्'—इति ।

नैतदुपपद्यते ;

कुतः ? ; एकस्मिन्नसम्भवात् । एकस्मिन् वस्तुनि, अस्तित्व-नास्तित्वादेः विरुद्धस्य, छायातपवत् युगपदसम्भवात् ।

एतदुक्तं भवति—द्रव्यस्य, [1]तत्तद्विशेषण[1]भूतपर्यायशब्दाभिधेयावस्थाविशेषस्य च, पृथक्पदार्थत्वात् ; न एकस्मिन् विरुद्धधर्म[2]समावेशः सम्भवति[2]—इति ।

[असम्भवोपपादनम्]

तथाहि—एकेन अस्तित्वादिना अवस्थाविशेषेण विशिष्टस्य, तदानीमेव न तद्विपरीतनास्तित्वादिविशिष्टत्वं [3]सम्भवति[3] । उत्पत्ति-विनाशाख्यपरिणाम-विशेषास्पदत्वं च द्रव्यस्य अनित्यत्वम्; तद्विपरीतं च नित्यत्वं, तस्मिन् कथं समवैति ? विरोधिधर्माश्रयत्वं च भिन्नत्वम् ; तद्विपरीतं च अभिन्नत्वं, कथं वा तस्मिन् समवैति ? यथा अश्वत्व-महिषत्वयोः युगपत् एकस्मिन् असम्भवः । अयमर्थः, पूर्वमेव भेदा-भेद[4]वादि[4]निरसनसमये,

'तत्तु समन्वयात्' (ब्र. सू. 1-1-4) इत्यत्र प्रपञ्चितः ।

[कालाणुत्वनिराकरणे तात्पर्यम्]

कालस्य पदार्थविशेषणतयैव प्रतीतेः, तस्य पृथ[5]गस्तित्व-नास्तित्वादयो[5] न वक्तव्याः ; न च परिहर्तव्याः । 'कालः अस्ति, नाऽस्ति' इति व्यवहारः, व्यवहर्तॄणां जात्याद्यस्तित्व-नास्तित्वव्यवहारतुल्यः । जात्यादयो हि ! द्रव्यविशेषणतयैव प्रतीयन्त इति, पूर्वमेवोक्तम् ॥

[वेदान्तवादेऽपि अनैकान्त्याभ्युपगमशङ्का-परिहारौ]

[6]कथं पुनः[6]—एकमेव ब्रह्म सर्वात्मकमिति—श्रोत्रियैरुच्यते ?

कालस्येति । अनेन, कालस्य अणुत्वनिराकरणं फलितम् । अनेककालकल्पनमयुक्तम् ; 'एकस्मिन् काले अनेकपदार्थाः सन्ति' इत्येव प्रतीतेः, कालस्य द्रव्यविशेषणतया अस्तित्वं प्रतिपन्नम् । ततः तस्य नास्तित्वशङ्का निरवकाशेत्यर्थः

---

[1] तद्विशेषण—च. [2] समावेशसम्भवः—अ. [3] भवति—द. [4] वाद—द.
[5] गस्तित्वादयो—द, [6] कथं—द.

सर्वचेतनाचेतनशरीरत्वात्, सर्वज्ञस्य सर्वशक्तेः सत्यसङ्कल्पस्य पुरुषोत्तमस्येत्युक्तम्। शरीर-शरीरिणोः तद्धर्माणां च, अत्यन्तवैलक्षण्यमप्युक्तम्।

[उक्तानैकान्त्यस्य व्यभिचरितत्वम्]

किं च—जीवादीनां षण्णां द्रव्याणाम्, एकद्रव्यपर्यायत्वाभावात्, तेषु द्रव्यैकत्वेन पर्यायात्मना च एकत्वानेकत्वादयो दुरुपपादाः।

अथोच्येत—षडेतानि द्रव्याणि, स्वकीयैः पर्यायैः स्वेन स्वेन चाऽऽत्मना तथा [1]भवन्ति[1]-इति,

एवमपि, 'सर्वमनैकान्तिकम्' इत्यभ्युपगमविरोधः; अन्योन्यतादात्म्याभावात्।

अतः न युक्तमिदं जैनमतम्। ईश्वरानधिष्ठितपरमाणुकारणवादे, पूर्वोक्तदोषाः तथैव अवतिष्ठन्ते॥ ३१॥

[जैनमते आत्मनो देहसमपरिमाणत्वाभ्युगमतो दोषः]

२०६. एवं चाऽऽत्माकार्त्स्न्यम्॥ २-२-३२॥

एवं—भवदभ्युपगमे सति, आत्मनश्च अकार्त्स्न्यं प्रसज्यते। 'जीवः असङ्ख्यातप्रदेशः, [2]देह[2]परिमाणः' [3]इति हि[3]! भवतां स्थितिः। तत्र हस्त्यादिशरीरे

सर्वचेतनेति। शरीराणामन्योन्यम्, ब्रह्मणश्च भेदः। शरीरिणो ब्रह्मणः एकत्वमित्यर्थः। एकस्य सर्वचिदचिन्नियन्तृत्वाद्यसंभावितत्वशङ्काव्यावृत्त्यर्थं, सर्वज्ञत्वादिविशेषणम्। शरीर-शरीरिणोरिति, शरीरदोषाणां शरीरिणि अस्पर्शमुपपादयति (श्रु. प्र.) [तथैव—साङ्ख्य-दूषणावसरोक्त बौद्धमत इव जैनमतेऽपीति भावः (भा. द.)]॥ ३१॥

भवदिति, सूत्रस्थम् 'एवं' शब्दं व्याचष्टे। बुद्धिस्थतदभ्युपगमाकारः 'एवं' शब्दार्थः इत्यर्थः। असङ्ख्यातदेशः—एकरूपसङ्ख्याहीनप्रदेशः। अनियतप्रदेश इत्यर्थः। [हस्त्यादीति। हस्त्यादिशरीरात् पिपीलिकादिशरीरं प्रविशतः, तत्र अमान्तमंशं विहाय

[सूत्रार्थः; एवम्—जैनाभ्युपगतरीत्या आत्मनो देहसमपरिणामत्वाङ्गीकारे सति, आत्माकार्त्स्न्यं च—अल्पपरिमाणात् शरीरात्, शरीरान्तरं बृहत्परिमाणं प्रविशतः आत्मनः, अपरिपूर्णपरिमाणत्वापत्तिरपि॥]

तद्देहपरिमाणत्वे ह्यात्मनोऽपूर्णता भवेत्।
गजदेहस्थितस्याऽजतनुं प्रविशतस्तदा॥ (ब्र. प. २०६)

---

[1] सम्भवन्ति—द.　[2] देहानुरूप—आ.　[3] इति—थ.

[1]अवस्थितस्य[1] आत्मनः, ततो न्यूनपरिमाणे पिपीलिका[2]दिशरीरे[2] प्रविशतः, अल्पदेशव्यापित्वेन अकात्स्न्यं [3]प्रसज्यते—अपरिपूर्णता प्रसज्यत इत्यर्थः[3] ॥ ३२ ॥

[आत्मस्वरूपे सङ्कोचविकासाभ्युपगमेन विरोधाभावशङ्का-तत्परिहारौ]

अथ—सङ्कोच विकासधर्मतया आत्मनः, 'पर्याय'शब्दाभिधेयावस्थान्तरापत्त्याविरोधः परिह्रियते—[4]इत्युच्यते[4] ; तत्राऽऽह—

२०७. न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ २-२-३३ ॥

न च—सङ्कोच-विकासरूपावस्थान्तरा[5]पत्त्याऽपि[6],—विरोधः परिहर्तुं शक्यते ; विकारतत्प्रयुक्तानित्यत्वादिदोषप्रसक्तेः, घटादि[6]तुल्यत्व[6]प्रसङ्गात् ॥ ३३ ॥

२०८. अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ २-२-३४ ॥

जीवस्य यत् अन्त्यं परिमाणं मोक्षा[7]वस्थागतं[7], तस्य पश्चाद्देहान्तर[8]परिग्रहाभावात्[8] अवस्थितत्वात्, आत्मनश्च मोक्षावस्थस्य तत्परिमाणस्य च उभयोर्नित्यत्वात्, तदेव आत्मनः स्वाभाविकं परिमाणमिति, पूर्वमपि तस्मादविशेषः स्यात् । अतः देहपरिमाणत्वम् आत्मनो न स्यादिति, असङ्गतमेवेदम् [9]आर्हतमतम्[9] ॥ ३४ ॥

एकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

....

प्रवेशः स्यादिति, जीवस्य पूर्वावस्थातो विकलत्वरूपम् अकात्स्र्यं प्रसज्येतेत्यर्थः] ॥ ३२ ॥

सङ्कोच-विकासरूपेति अवस्था विशेषिता । तेन वृक्षादिगतवृद्धिक्षयादिव्यावृत्तिः । **विकारः**—उत्पत्तिर्विनाशश्च । **अनित्यत्वम्**—परिमितकालवर्तित्वम् ॥ ३३ ॥

[सूत्रार्थः ; **पर्यायादपि**—आत्मनः अवस्थावैविध्याभ्युपगमादपि, **अविरोधः**—परिमाणद्वयसमावेशः, **न च**—नैव सङ्गमनीयः, **विकारादिभ्यः**—स्वरूपपरिणाम-तदायत्तदोषाणामवर्जनात्॥]

> अवस्थान्तरयोगेऽपि ह्यविरोधो न सिध्यति ।
> आत्मनोऽपि विकारित्वे घटादेस्तुल्यता भवेत् ॥ (ब्र. प. २०७)

[सूत्रार्थः ; **अन्त्यावस्थितेः**—जीवीयस्य मोक्षावस्थाकालिकस्य परिमाणस्य अविनाशेन अवस्थानात्, **उभयनित्यत्वाच्च**—जीव-तत्परिमाणयोर्द्वयोरपि अविनाशादपि, **अविशेषः**—सर्वदा परिमाणावैलक्षण्यम् ॥]

> मुक्तात्मपरिमाणस्य मुक्तस्याप्यात्मनस्तथा ।
> नित्यत्वादुभयोर्जीवः न देहपरिमाणवान् ॥ (ब्र. प. २०८)

[सूत्राणि—१. नैकस्मिन् २. एवं चाऽऽत्मा ३. न च पर्या ४. अन्त्याव.]

इति एकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

---

[1] स्थितस्य—इ. [2] शरीरे—वा. [3] प्रसज्यते—आ. [4] इत्युच्येत—च. [5] पत्त्या—च.
[6] तुल्यत्वादि—वा. [7] वस्थावगतं—आ. [8] परिग्रहात्— . [9] आर्हतं मतम्—द.

(52) पशुपत्यधिकरणम् ॥ २-२-७॥ (सू. 35-38)

[अधि-अर्थः ; वेदविरुद्धाभिप्रायकपाशुपतमतनिरासः]

२०९. पत्युरसामञ्जस्यात् ॥ २-२-३५ ॥

[सङ्गतिप्रदर्शनम्]

कपिल-कणाद-सुगताऽऽर्हतमतानाम् असामञ्जस्यात्, वेदबाह्यत्वाच्च, निःश्रेयसार्थिभिः अनादरणीयत्वमुक्तम्।

इदानीं—पशुपतिमतस्य वेदविरोधात्, असामञ्जस्याच्च अनादरणीयता—उच्यते॥

[पाशुपतमतप्रक्रियानुवादः]

तन्मतानुसारिणः चतुर्विधाः—१. [1]कापालाः[1], २. कालमुखाः, ३. पाशुपताः, ४. शैवाश्च—इति। सर्वे चैते—वेदविरुद्धां तत्त्वप्रक्रियाम्, ऐहिकामुष्मिक-[2]निःश्रेयस[2]साधन[3]कल्पनाश्च[3]-कल्पयन्ति॥ निमित्तोपादानयोः भेदम्, निमित्तकारणं च पशुपतिम्—आचक्षते। तथा—निःश्रेयससाधनमपि, मुद्रिकाषट्कधारणादिकम्। यथाऽऽहुः कापालाः---

---

कपिलेति। प्रधानकारणत्वाभ्युपगमसाम्यात्, पाशुपतमतनिरासस्य साङ्ख्यनिरासानन्तरभावित्वे प्राप्तेऽपि, सौगतार्हतमतनिरासानन्तरं तत्प्रतिक्षेपः, तस्य अत्यन्तवेदबाह्यत्वज्ञापनाय कृतः॥

[विचाराः] पशुपतिमतं, निःश्रेयसार्थिभिः उपादेयं? न? इति। किमस्य श्रुतिविरोधः अस्ति? न? इति॥

यदा न श्रुतिविरोधः; तदानीम् उपादेयता। यदा तु विरोधः; तदा अनुपादेयता। **निमित्तेति,** तत्त्वविपर्ययमाह। **तथेति,** अनुष्ठानविपर्ययमाह।

[सूत्रार्थः; **पत्युः(मतम्)**—पशुपतेर्मतम्, अनादरणीयम्; **असामञ्जस्यात्**—वेदविरोधादितः असमीचीनत्वात्।]

मतं पशुपतेश्चाऽपि त्याज्यमेव विवेकिभिः।
वेदाचारविरुद्धत्वादुपादानादिभेदतः॥ (ब्र. प २०९)

---

[1] कापालिकाः—आ, इ, द. [2] निश्रेयः—वा. [3] कल्पनां च—आ, इ.

'मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः ।
भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति ।।
[1]कण्ठिका[1] रुचकं चैव कुण्डलं च शिखामणिः ।
भस्म यज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ।।
आभिर्मुद्रितदेहस्तु न भूय इह जायते ।।' (शैव. आ.)

[2]इत्यादिकम्[2] ।

तथा कालामुखा अपि—[3]कपालपात्र[3]भोजन-शवभस्मस्नान-तत्प्राशन-लगुडधारण-सुराकुम्भस्थापन-तदाधारदेवपूजादिकम्, ऐहिकामुष्मिक[4]सकलफल[4]साधनम्—अभि[5]दधति[5] ।

'रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके ।
कपालं भस्मना स्नानम्' (शैव. आ.)

इत्यादि च प्रसिद्धं शैवागमेषु ।

तथा—केनचित् क्रियाविशेषेण विजातीयानामपि ब्राह्मण्यप्राप्तिम् उत्तमाश्रमप्राप्तिं च—आहुः ;

'दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात् ।
कापालं व्रतमास्थाय यतिर्भवति मानवः ॥' (शै. आ.)

इति ॥

[पाशुपतस्य अनौचित्योपपादनतः स्वसिद्धान्तः]

तत्रेदमुच्यते—'पत्युरसामञ्जस्यात्'—इति। 'नैकस्मिन्नसंभवात्' (ब्र.सू. 2-2-31) इत्यतः, 'न' इत्यनुवर्तते । पत्युः—पशुपतेः मतम्, न आदरणीयम् ;

कुतः? असामञ्जस्यात् । असामञ्जस्यं च, अन्योन्यव्याघातात् वेदविरोधाच्च ।

मुद्रिकाषट्कधारण—भगासनस्थात्मध्यान—सुराकुम्भस्थापन—तत्स्थ[6]देवतार्चन[6]—गूढाचार—[7]श्मशान[7]भस्मस्नान—[8]प्रणवपूर्वा[8]भिध्यानानि, अन्योन्यविरुद्धानि ।

मुद्रिकेति । एकतन्त्रोक्तार्थः तन्त्रान्तरेण दूषित इति, अन्योन्यव्याघातादुपहतम् ; न केवलं वेदविरोधादित्यर्थः । मुद्रिकाषट्कधारणादयः बहुषु तन्त्रेषूक्ताः, क्रमेण परिगणिताः

---

[1] कर्णिका—अ. [2] इत्यादि—वा. [3] पात्र—द. [4] फल—आ. [5] दधतीति—न.
[6] देवतावन्दन—द. [7] स्मशान—द. [8] पूर्वा—थ.

[वेदविरोधायत्तानौचित्योपपादनम्]

वेदविरुद्धं चेदं—तत्त्वपरिकल्पनम्, उपासनम्, आचारश्च। वेदाः खलु!—परं ब्रह्म नारायणमेव, जगन्निमित्तम् उपादानं च-वदन्ति।

'नारायण परं ब्रह्म तत्त्वं नारायणः परः।

[1]नारायणपरो[1]ज्योतिरात्मा नारायणः परः॥' (तै. ना. उ. 11-6)

'तदैक्षत बहु स्यां प्रजायेयेति' (छां. उ. 6-2-3)

'सोऽकामयत। बहु स्यां प्रजायेयेति' (तै.उ.आन. 6-2)

'तदात्मानं स्वयमकुरुत' (तै.उ.आन. 7-1)

[2]इत्यादयः[2]। परब्रह्मभूतपरमपुरुषवेदनमेव च, मोक्षसाधनम् उपासनं वदन्ति;

'वेदाऽहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे' (तै.आर. 3-12-)

'तमेवं विद्वानमृत इह भवति। नाऽन्यः पन्था अयनाय विद्यते' (तै आर. 3-12-)

इत्यादिना एकतां गताः सर्वे वेदान्ताः।

[श्रुतिभिः मोक्षसाधनभूतोपासनाङ्गोपदेशः]

तदितिकर्तव्यताभूतं कर्म च, वेदविहितवर्णाश्रमसम्बन्धि यज्ञादिकमेव वदन्ति—

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन....

....एतमेव [3]प्रव्राजिनो लोकमिच्छन्तः[3] प्रव्रजन्ति' (बृ. उ. 6-4-22)

इत्यादयः।

[शम्भुशिवादिशब्दानां नारायणपरत्वनिर्वाहः]

केवलपरतत्त्वप्रतिपादनपरनारायणानुवाकसिद्धतत्त्वपराः, केषुचित् [4]उपासनादि[4] विधिपरेषु वाक्येषु श्रुताः, प्रजापतिशिवेन्द्राकाशप्राणादिशब्दाः इति,

'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र. सू. 1-1-31)

इत्यत्र प्रतिपादितम्। तथा,

नन्वेकत्र। **वेदाः खल्विति,** वैदिकपक्षस्य पाशुपताद्वैषम्यमाह। **एकतां गताः**—सर्वशाखा-प्रत्ययनयादिति भावः।

केवलेत्यादि। यथा, 'जुह्वा जुहोति' इति वाक्यस्य होमसाधनत्वमात्रपरत्वेन, द्रव्यविशेषनिर्णये न तात्पर्यम्; 'यस्य पर्णमयी जुहूः' इत्येतद्वाक्यस्य द्रव्यविशेषनिर्णयपरत्वेन, तदनुगुणार्थत्वं 'जुह्वा जुहोति' इति वाक्यस्य भवति; तथा, 'शम्भुराकाशमध्ये ध्येयः' इत्यादीनां वाक्यानाम् उपासनविधिपरत्वात्, न उपास्यविशेषनिर्णयपरत्वम्। नारायणानु-

---

[1] नारायणः परो—न. [2] इत्येवमादयः आ. [3] लोकमिच्छन्तः प्रव्राजिनः—च. लोकमिच्छतः प्रव्राजिनः—आ. [4] उपासना – थ.

'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' (महो. 1-1)
इत्यारभ्य,

'स एकाकी न रमेत' (महो. 1-1)

इति सृष्टिवाक्योदितं स्रष्टारं नारायणमेव, [1]समान[1]प्रकरणस्थाः,

'सदेव सोम्येद[2]मग्र आसीत्[2]' (छां. उ. 6-2-1)

इत्यादिषु, साधारणाः सद्-ब्रह्माऽऽत्मादिशब्दाः प्रतिपादयन्तीति,

'जन्माद्यस्य यतः' (ब्र. सू. 1-1-2)

इत्यत्र प्रतिपादितम्। अतः वेदविरुद्धतत्त्वोपासनानुष्ठानाभिधानात्, पशुपतिमतम् अनादरणीयमेव ॥ ३५ ॥

[पशुपतेरीश्वरस्य निमित्तमात्रत्वानौचित्यम्]

२१०. अधिष्ठानानुपपत्तेश्च ॥ २-२-३६ ॥

वेदबाह्यानाम्, अनुमानाद्धि ! केवलनिमित्तेश्वरकल्पना। तथा सति, दृष्टानु-

---

वाक्यस्य तु, उपासनविध्याद्यन्यपरत्वाभावात् उपास्यविशेषैकनिर्णयपरत्वमस्ति। अतः तदनुगुणार्थत्वं, शम्भुराकाशेत्यादिवाक्यानामभ्युपगन्तव्यमित्यर्थः। **एको ह वा इति**। सद्ब्रह्माऽऽत्मशब्देषु पूर्वपूर्वे सामान्यशब्दाः; उत्तरोत्तरे विशेषशब्दाः। एवं नारायणशब्दं प्रति शम्भुशिवादयः सामान्यशब्दाः। तस्मात् 'पशुना यजेते'त्यत्र 'छागो वा मन्त्रवर्णात्' (पू. मी.) इति न्यायात् विशेषपर्यवसानवत्, सद्-ब्रह्माऽऽत्मादिशब्दानां नारायणरूपविशेषपर्यवसायित्वं युक्तमित्यर्थः॥ **प्रतिपादितमिति**। 'यतो वा इमानी'त्यादिवाक्ये अस्यार्थस्याऽभिप्रेतत्वात्, सूत्रकारेणाऽपि तथाऽभिप्रेतमित्यर्थः। जन्मादिसूत्रभाष्येण 'परस्मात् पुंसः' इत्यन्तेन अयमर्थः सूचितः ॥ ३५ ॥

अधीति। पौरुषेयवाक्यस्य प्रमाणमूलत्वे बुभुत्सिते सति, अतीन्द्रियार्थे श्रुतिमूलत्वम् अनुमानमूलत्वं वा संभवेत्। तत्र श्रुतिमूलत्वं, श्रुतिविरुद्धपरावरतत्त्वप्रतिपादनप्रदर्शनात् अपास्तमिति, अनुमानमूलत्वनिरासपरं सूत्रत्रयम्। **वेदबाह्यानामिति,**

[सूत्रार्थः। **अधिष्ठानस्य**—उपादानभूतप्रधानाधिष्ठानस्य, **अनुपपत्तेश्च**—अशरीरे ईश्वरे अयोगादपि नेदं मतं साधु ॥]

अशरीरस्येश्वरस्य जगत्सृष्टिर्न सिध्यति।
कुलालवदधिष्ठानानुपपत्तेर्विरोधतः॥ (ब्र. प. २१०)

---

[1] समानात्मादि—क. च. [2] मग्रे—च.

सारेण कुलालादिवत् अधिष्ठानं कर्तव्यम् । [1]न च[1]—कुलालादेः मृदाद्यधिष्ठानवत्, पशुपतेः निमित्तभूतस्य प्रधानाधिष्ठानमुपपद्यते ; अशरीरत्वात् । सशरीराणामेव हि ! कुलाला[2]दीनाम्,[2] अधिष्ठानशक्तिर्दृष्टा ।

न च—ईश्वरस्य सशरीरत्वम् अभ्युपगन्तव्यम् ; तच्छरीरस्य सावयवस्य नित्यत्वे अनित्यत्वे च,

'शास्त्रयोनित्वात्' (ब्र. सू. 1-1-3)

इत्यत्र दोषस्य उक्तत्वात् ॥ ३६ ॥

[अशरीरस्यैव चेश्वरस्य प्रधानाधिष्ठातृत्वायोगः]

२११. करणवच्चेन्न भोगादिभ्यः ॥ २-२-३७ ॥

यथा, भोक्तुर्जीवस्य करण-कलेबराद्यधिष्ठानम्, अशरीरस्यैव दृश्यते ; तद्वत्, महेश्वरस्याऽपि अशरी[3]रस्य च[3] प्रधानाधिष्ठानम् उपपद्यते—इति चेत् !

न ; भोगादिभ्यः । पुण्य-पापरूपकर्मफलभोगार्थं पुण्य-पापरूपादृष्टकारितं हि ! तदधिष्ठानम् । तद्वत् पशुपतेरपि पुण्य-पापरूपादृष्टवत्तया, तत्फलभोगादि सर्वं प्रसज्येत । अतः [4]न अधि[4]ष्ठानसम्भवः ॥ ३७ ॥

वक्ष्यमाणदूषणस्य स्वास्पर्शित्वाय ॥ ३६ ॥

करणवदित्यादि । किम् [ईश्वरः] जगत् शरीरत्वेन अधितिष्ठति ! उत तद्व्यतिरिक्तत्वेन? शरीरत्वेन चेत् ! भोगादिप्रसङ्गः । नो चेत् ! शरीरान्तरसापेक्षत्वं स्यात् इत्यर्थः । शरीरनिरपेक्षाधिष्ठानं शरीरे दृष्टमिति चेत् ! न ; शरीरत्वप्रयुक्तं तत् इत्युक्तं भवति । तदा जगतः शरीरत्वे भोगादिप्रसङ्ग इति । अयम् अशरीरत्वाभ्युपगमेन परिहारः ॥ ३७ ॥

[सूत्रार्थः । **करणवत्**—जीवात्मनः इन्द्रियाद्यधिष्ठातृत्वमिव पशुपतेरपि प्रधानाधिष्ठातृत्वं युज्यते इति शङ्कनं, **न**—नोचितम्, **भोगादिभ्यः**—अदृष्टायत्तसुख-दुःखानुभवादेः ईश्वरेऽपि प्रसङ्गात् ॥]

जीवः स्वकरणं यद्वदधितिष्ठत्यजस्तथा ।
इति चेत् कर्मभोगादि जीवस्येव प्रसज्यते ॥ (ब्र. प. २११)

---

[1] न—आ. [2] दीनामेव—आ. [3] रस्या—वा. [4] अनधि—द.

[ईश्वरस्य पुण्य-पापाभ्युपगमे दोषः]

२१२. अन्तवत्त्वमसर्वज्ञता वा ॥ २-२-३८ ॥

'वा' शब्दः, चाऽर्थे। पशुपतेः पुण्य-पापरूपादृष्टवत्त्वे, जीववत् अन्तवत्त्वं सृष्टि-संहाराद्यास्पदत्वम्, असर्वज्ञता च स्यादिति, अनादरणीयमेव इदं मतम्।

[अस्याधिकरणस्य जैमिनीयविरोधाधिकरणतः अगतार्थता]

'विरोधेत्वनपेक्षं स्यात्' (पू. मी. सू. 1-3-3)

इत्यादिना, वेदविरुद्धस्य अनादरणीयत्वे सिद्धेऽपि, पशुपतिमतस्य वेदविरुद्धताख्यापनार्थं 'पत्युरसामञ्जस्यात्' (ब्र. सू. 2-2-35) इति पुनरारम्भः।

यद्यपि, पाशुपत—शैवयोः, वेदाविरोधिन इव केचन धर्माः प्रतीयन्ते; तथाऽपि, वेदविरुद्धनिमित्तोपादानभेदकल्पना-[1]परावरतत्त्व[1]व्यत्ययकल्पनामूलत्वात्, सर्वम् असमञ्जसमेवेति, 'असामञ्जस्यात्' इत्युक्तम् ॥ ३८ ॥

इति पशुपत्यधिकरणम् ॥ ७ ॥

'वेदाविरोधिन इवे'त्यत्र 'इव'शब्दो विप्रलम्भकत्वद्योतकः।

[सूत्रार्थः ; अन्तवत्त्वम्—(ईश्वरस्याऽपि पशुपतेः पुण्यापुण्यात्मकादृष्टाभ्युपगमे) अनन्तत्वविरोधि परिच्छिन्नत्वम्, उत्पत्ति-विनाशभाक्त्वं, असर्वज्ञता वा—'यः सर्वज्ञः' इत्युक्त-सर्वज्ञत्वस्याभावश्च प्रसज्येयाताम् ॥]

तस्याऽप्यदृष्टवत्त्वे तु सृज्यत्वादि ततो भवेत्।
सर्वज्ञताया हानिश्च तस्मात्तन्न समञ्जसम् ॥ (ब्र. प. २१२)

[सूत्राणि—१. पत्युरसा, २. अधिष्ठाना, ३. करण, ४. अन्तवत्त्व.]

इति पशुपत्यधिकरणम् ॥ ७ ॥

—o—

---

[1] परावरत्व—द.

(53) उत्पत्त्यसम्भवाधिकरणम् ॥ २-२-८ ॥ (सू. ३९-४२)

[अधि-अर्थः—जीवोत्पत्तिवादशङ्कितपाञ्चरात्राप्रामाण्यनिरासः]

२१३. उत्पत्त्यसम्भवात् ॥ २-२-३९ ॥

[अवान्तरसङ्गतिः]

कपिलादितन्त्रसामान्यात्, भगवदभिहितपरमनिःश्रेयससाधनावबोधिनि पञ्चरात्र-तन्त्रेऽपि, अप्रामाण्यम्, आशङ्क्य निराक्रियते ।

[प्रकृताधिकरणारम्भोपयोगिनी आशङ्का]

तत्र, एवमाशङ्क्यते—

'परमकारणात् परमब्रह्मभूतात् वासुदेवात्, सङ्कर्षणो नाम जीवो जायते । सङ्कर्षणात् प्रद्युम्नसंज्ञं मनो जायते । तस्मात् अनिरुद्धसंज्ञः अहङ्कारो जायते' (पा. प. सं.)

'आशङ्क्य' इति, पूर्वपक्षसूत्रद्वयार्थः । निराक्रियते इति, सिद्धान्तसूत्रद्वयार्थः—विभागः । पञ्चरात्रं, किं साङ्ख्यादिवत् क्वचित् प्रमाणम्? उत कार्त्स्न्येन प्रमाणम्? । किम् अस्य क्वचित् श्रुतिविरोधः अस्ति? उत क्वचिदपि नास्ति? ।—इति । किमत्र जीवोत्पत्त्यादिकं विवक्षितम्? उत न? इति । सङ्कर्षण-प्रद्युम्नादिशब्दाः किं जीवादिशब्दविशेषणतया निर्दिष्टाः? उत न? इति । उत जीवादिशब्दाः सङ्कर्षणादिशब्दविशेषणतया निर्दिष्टाः? इति । [विचाराः] ।

सङ्कर्षणादिशब्दानां जीवादिशब्दविशेषणत्वे, जीवोत्पत्त्यादिकं विवक्षितमिति, श्रुति-विरोधसद्भावात्, अविरुद्धांशे प्रामाण्यात्, तदेकदेशस्योपादेयत्वम् । जीवादिशब्दानां सङ्कर्षणादिशब्दविशेषणत्वे, जीवोत्पत्त्यादेः अविवक्षितत्वेन क्वचिदपि श्रुतिविरोधो नास्तीति, कार्त्स्न्येन प्रमाणत्वात्, कार्त्स्न्येन निःश्रेयसार्थिभिः उपादेयत्वं सिद्ध्येत् ॥ [इति फल-फलिभावः]

[सूत्रार्थः ; **उत्पत्तेः**—जीवानां (निर्विकारतया श्रुतिसिद्धानां) विकाररूपस्य जन्मनः, **असम्भवात्**—अयोगात्, (विकार(स्वरूपान्यथाभाव) रूप जन्मावेदकं पाञ्चरात्रतन्त्रम् अप्रमाणम्) ॥]

जीवोत्पत्त्यादिवादश्च पाञ्चरात्रे तु दृश्यते ।
उत्पत्त्यसम्भवश्रुत्या विरोधादसमञ्जसः ॥ (ब्र. प. २१६)

इति हि! भागवतप्रक्रिया । अत्र जीवस्योत्पत्तिः श्रुतिविरुद्धा प्रतीयते । श्रुतयो हि! जीवस्य अनादित्वं वदन्ति ;

'न जायते म्रियते वा विपश्चित्' (कठ. उ. 2–18)

इत्याद्याः ॥ ३९ ॥

२१४. न च कर्तुः करणम् ॥ २-२-४० ॥

[जीवात् मनस उत्पत्तिवादस्य असाधुता]

'सङ्कर्षणात् 'प्रद्युम्न'सञ्ज्ञं मनो जायते' (पा. प. सं.)

इति कर्तुर्जीवात् करणस्य मनसः उत्पत्तिः, न सम्भवति ;

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुण्ड. उ. 2–1–3)

इति, परस्मादेव ब्रह्मणः मनसोऽपि उत्पत्तिश्रुतेः । अतः श्रुति[1]विरुद्धार्थ[1]-प्रतिपादनात्, अस्याऽपि तन्त्रस्य प्रामाण्यं प्रतिषिध्यते—इति ॥ ४० ॥

[जीवोत्पत्तिवादादितात्पर्यव्यक्तीकरणेन सिद्धान्तः]

एवं प्राप्ते, प्रचक्ष्महे—

२१५. विज्ञानादिभावे वा तदप्रतिषेधः ॥ २-२-४१ ॥

'वा' शब्दात्, पक्षो विपरिवर्तते । विज्ञानं च आदि च' इति, परब्रह्म—

परमकारणात्' इत्यादिः, पञ्चरात्रग्रन्थः ॥ ३९ ॥

'वा'शब्दादिति । 'अपि वा कर्तृसामान्यात्' (पू.मी.सू.) 'एकं वा संयोग-रूप-चोदनाख्याविशेषात् (पू.मी.सू.) इतिवदिति भावः । **विज्ञानं चादि चेति** । [अद-भक्षणे' इत्यस्मात्, अवश्यकार्ये णिनिप्रत्यये, **'आदि'** इति रूपं; तेन च निखिल-

---

[सूत्रार्थः ; **कर्तुः**—कर्तृभूताज्जीवात्, **करणम्**—ज्ञानादिकरणभूतं मनः, **न च**—नैव उत्पत्तुमर्हतीति, तद्वादि पाञ्चरात्रं न प्रमाणम् ॥]

कर्तुर्जीवाच्च करणं मनस्तु न हि जायते ।
सङ्कर्षणाद्धि जीवात्तु मनसो जन्मशंसनात् ॥ (ब्र. प. २१४)

[सूत्रार्थः ; **विज्ञानादिभावे**—सङ्कर्षणादिरूपाणां शुद्धज्ञानैकस्वरूपजगत्कारणभूतब्रह्म-भावे सिद्धे सति, **तदप्रतिषेधः**—(जीवतत्वाभिमानिभगवदवतारतात्पर्यकोत्पत्तिवचनतः) पाञ्चरात्र प्रामाण्यनिषेधायोगः ॥]

सङ्कर्षणादिकानां तु परमात्मत्वनिश्चयात् ।
जीवाभिमान्यवतारात् न प्रामाण्यं निषिध्यते ॥ (ब्र प. २१५)

---

[1] विरुद्ध—इ.

विज्ञानादि । सङ्कर्षण—प्रद्युम्नानिरुद्धानामपि परब्रह्मभावे सति, तत्प्रतिपादनपरस्य शास्त्रस्य प्रामाण्यं न प्रतिषिध्यते ।

एतदुक्तं भवति—भागवतप्रक्रियाम् अजानताम् इदं चोद्यम्; यत् 'जीवोत्पत्तिः विरुद्धा अभिहिता' इति । 'वासुदेवाख्यं परं ब्रह्मैव आश्रितवत्सलं, स्वाश्रितसमाश्रयणीयत्वाय, स्वेच्छया चतुर्धा अवतिष्ठते' इति हि! तत्प्रक्रिया ॥ यथा पौष्करसंहितायाम्—

'कर्तव्यत्वेन वै यत्र चातुरात्म्य[1]मुपास्यते[1] ।
क्रमागतैः स्वसंज्ञाभिर्ब्राह्मणैरागमं तु तत् ॥' (पौ.सं. 38-293, 294)

इत्यादि । तच्च चातुरात्म्योपासनं वासुदेवाख्यपरब्रह्मोपासनमिति, सात्वतसंहितायामुक्तम्—

'ब्राह्मणानां हि सद्ब्रह्मवासुदेवाख्ययाजिनाम् ।
विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत् ॥' (सा. सं. 2-4, 5)

जगत्संहर्तृत्वमुखेनैव कारणत्वं प्रतिपाद्यते (भा. प्र.)] 'चैतन्यस्वरूपिण' इति मन्त्रलिङ्गात्, 'भगवान् वासुदेवः परा प्रकृतिः' इति वचनाच्च, वासुदेवस्य ज्ञानस्वरूपत्व-परमकारणत्वे प्रतिपादिते । तस्माद्विज्ञानादिशब्देन भगवान् वासुदेवः स्मारितः 'सत्यं ज्ञानमनन्तं ब्रह्म' 'तस्माद्वा.... संभूतः' 'यतो वा....जायन्ते' इति ज्ञानस्वरूपस्य ब्रह्मणः, परमकारणत्वप्रतिपादकवेदान्तैककण्ठ्यद्योतनार्थं च **विज्ञानं च आदि च** इति व्याख्यातम् ।

एतदुक्तमिति । सङ्कर्षणेत्यादिना सूत्रस्य वाक्यार्थ उक्तः । के पुनः सङ्कर्षणादयः? तेषां परब्रह्मभावः कथम्? तथा ब्रह्मण उत्पत्तिर्वा कथम्? शास्त्रप्रामाण्यं वा कथम्? इत्यत्र [इदमुत्तरम् ।।]

'कर्तव्यत्वेन' इत्यादिवचनम्, 'आगम' शब्दनिर्वचनम् । **स्वसंज्ञाभिः**—'नमः' शब्दाद्युपेतैः तत्तन्नामभिः । **क्रमागतैः** उपास्यवस्तुप्रतिपादनात्, शास्त्रस्य आगमत्वम्—इति श्लोकार्थः । **'चातुरात्म्यमुपास्यते'** इत्यनेन, सङ्कर्षणादिचातुर्विध्यं समाश्रयणीयत्वायेति दर्शितम् । **चातुरात्म्येति** । चातुरात्म्योपासनपरशास्त्रस्य वासुदेवाख्यपरब्रह्मोपासनपरत्वदर्शनात्, चातुर्विध्यं वासुदेवस्येति सिद्धम् ।

---

[1] मुपासते – च.

इति। तद्धि! वासुदेवाख्यं परं ब्रह्म, सम्पूर्णषाड्गुण्यवपुः, सूक्ष्म-व्यूह-विभवभेदभिन्नं, यथाधिकारं भक्तैः ज्ञानपूर्वेण कर्मणा अभ्यर्चितं, सम्यक्प्राप्यते।

'विभवार्चनात् व्यूहं प्राप्य, व्यूहार्चनात् परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यते' (पां.आ) इति वदन्ति। विभवो हि नाम—रामकृष्णादिप्रादुर्भावगणः। [1]व्यूहः[1]—वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धरूपः चतुर्व्यूहः। सूक्ष्मं तु—केवलषाड्गुण्यविग्रहं वासुदेवाख्यं [2]परं ब्रह्म[2]। यथा पौष्करे—

'यस्मात् सम्यक् परं ब्रह्म वासुदेवाख्यमव्ययम्।

[3]अस्माद[3]वाप्यते शास्त्राज्ज्ञानपूर्वेण कर्मणा॥ (पौ. सं. 38-306)

[4]इत्यादि[4]। अतः सङ्कर्षणादीनामपि परस्यैव ब्रह्मणः स्वेच्छाविग्रहरूपत्वात्,

'अजायमानो बहुधा विजायते' (तै. आर. 3-12-)

इति श्रुतिसिद्धस्यैव आश्रितवात्सल्यनिमित्तस्वेच्छाविग्रहसङ्ग्रहरूपजन्मनः अभिधानात्, तदभिधायिशास्त्र[5]प्रामाण्यस्य अप्रति[5]षेधः—इति॥

तत्र-जीव-मनोऽहङ्कार[6]तत्त्वानाम्[6] अधिष्ठातारः, 'सङ्कर्षण-प्रद्युम्नानिरुद्धाः' इति, तेषामेव जीवादिशब्दैरभिधानम् अविरुद्धम्; यथा आकाश-प्राणादिशब्दैः ब्रह्मणोऽभिधानम्॥ ४१॥

तद्धीति। सङ्कर्षणाद्यर्चनं किमर्थम्? वासुदेवार्चनं हि! मोक्षप्रदम्। न केवलं चातुरात्म्योपासनमेव प्रतिपाद्यते; विभवार्चनादिकमपि प्रतिपाद्यते—इति शङ्कायाम्, अयोगव्यवच्छेदज्ञापनार्थं चातुरात्म्यविवरणार्थं च। 'सूक्ष्मं परम्' इति एकार्थं पदद्वयम्। चतुर्व्यूहः—चतुर्विभागः। 'यस्मा'दित्यादिवचनेन, परस्य ब्रह्मणो वासुदेवाख्यस्य प्राप्यत्वं दर्शितम्। आदिशब्दोपात्तेषु तत्तत्प्रकरणस्थवचनेषु व्यूहविभवार्चन-तत्फलादि द्रष्टव्यमित्यर्थः। अजायमान इत्यादि, श्रुत्यानुगुण्यमेवास्तीति दर्शयितुम्। तत्रेति, जीवादिसामानाधिकरण्यनिर्वाहमाह॥४१॥

---

[1] व्यूहोनाम—न. [2] परब्रह्म—च. [3] तस्माद—वा. [4] इति—द.
[5] प्रामाण्याप्रति—थ. [6] सत्त्वानां—न.

[जीवोत्पत्तिवादस्य उक्ततात्पर्यनिर्णये, एतत्तन्त्रोक्तस्य जीवोत्पत्तिनिषेधवादस्य उपष्टम्भकता]

२१६. विप्रतिषेधाच्च ॥ २-२-४२ ॥

विप्रतिषिद्धा हि! जीवोत्पत्तिः, [1]तस्मि[1]न्नपि तन्त्रे। यथोक्तं परमसंहितायाम्—

'अचेतना परार्था च नित्या सततविक्रिया।
त्रिगुणा कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते ॥
व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च।
सह्यनादिरनन्तश्च परमार्थेन निश्चितः ॥' (पां. प. सं.)

इति। एवं सर्वास्वपि संहितासु जीवस्य नित्यत्ववचनात्, जीवस्वरूपोत्पत्तिः पञ्चरात्र-[2]तन्त्रे[2] प्रतिषिद्धैव। जन्म-मरणादिव्यवहारस्तु लोक-वेदयोः, जीवस्य यथोपपद्यते; तथा,

'नाऽऽत्मा श्रुतेः' (ब्र. सू. 2-3-18)

इत्यत्र वक्ष्यते। अतः, जीवस्योत्पत्तिः तत्राऽपि [3]प्रतिषिद्धैवेति,[3] जीवोत्पत्तिवाद-निमित्ताप्रामाण्यशङ्का [4]दूरोत्सारिता[4] ॥

विप्रतिषेधाच्चेति। जीवादिशब्दैः सङ्कर्षणादीनां विशेष्यत्वे अनुकूललिङ्गमुक्तम्। [अत्र] सङ्कर्षणादिशब्दैः जीवानां विशेष्यत्वे, प्रतिकूललिङ्गमुच्यते। विशेषेण प्रतिषेधः—**विप्रतिषेधः**। विविधप्रतिषेधो वा। यथा 'श्रुतिविप्रतिपन्ना' (भ. गी. 2-53) इत्यत्र, अस्मत्तः श्रवणेन विशेषतः प्रतिपन्नेत्यर्थः; तद्वत्। यथा 'तच्छास्त्रैर्विप्रतिषिद्धम्' (आ.ध.सू.) इत्यत्र विप्रतिषेधशब्दः; तथा अयमपि निषेधपरः। व्याघात[परो वा]। **सर्वास्वपीत्यनेन** 'वि'शब्दार्थो विवक्षितः। **वक्ष्यत इति**। कारणाद्याश्रयशरीरसंयोगकृतज्ञानविकास-सङ्कोच-लक्षणौ उत्पत्ति-विनाशौ इति वक्ष्यते इत्यर्थः।

[सूत्रार्थः; **विप्रतिषेधाच्च**—पाञ्चरात्रेऽपि, जीवस्योत्पत्तेः विशेषतः निषिद्धत्वादपि, एतत्प्रामाण्यस्याप्रतिषेधः]

पाञ्चरात्रेऽपि तन्त्रेऽस्मिन् जीवोत्पत्तिनिषेधतः।
समीचीनं तन्त्रमिदं ग्राह्यं स्यान्मुक्तिमिच्छता ॥ (ब्र. प. २१६)

---

[1] अस्मि—वा.　[2] तन्त्र—थ.　[3] प्रतिषिद्धेति—वा.　[4] दूरत उत्सारिता—इ.

[शाण्डिल्यस्य वेदेषु निष्ठाया अलाभोक्तेस्तात्पर्यचिन्ता]

यश्चैषः केषाञ्चिदुद्घोषः—

'साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवान्' (पां. सं.) इति, 'साङ्गेषु वेदेषु पुरुषार्थनिष्ठा [1]न लब्धा[1]' इति वचनात्, वेद[2]विरुद्धं[2] तन्त्रम्—इति ;

सोऽपि, अनाघ्रातवेदवचसाम् अनाकलिततदुपबृंहण-न्यायकलापानाम्, श्रद्धामात्रविजृम्भितः । यथा—

'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्' (ऐत. ब्रा. 4-5)
इति अनुदितहोमनिन्दा, उदितहोमप्रशंसार्थेत्युक्तम् ; [3]यथा च[3] भूमविद्याप्रक्रमे नारदेन,

'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेद[4]माथर्वणं[4] चतुर्थम्,
इतिहासपुराणं पञ्चमम्' (छां. उ. 7-1-2)

इत्यारभ्य सर्वं विद्यास्थानमभिधाय,

'सोऽहं भगवो मन्त्रविदेवाऽस्मि, नाऽऽत्मवित्' (छां. उ. 7-1-3)

इति भूमविद्याव्यतिरिक्तासु सर्वासु विद्यासु [5]आत्मवेदना[5]लाभवचनं, वक्ष्यमाणभूमविद्याप्रशंसार्थं कृतम् ।

अथवा अस्य नारदस्य, साङ्गेषु वेदेषु यत् परतत्त्वं प्रतिपाद्यते ; तदलाभनिमित्तः अयं वादः । एवमेव शाण्डिल्यस्येति, पश्चात् वेदान्तवेद्यवासुदेवाख्यपरब्रह्मतत्त्वाभिधानात्, अवगम्यते ।

यश्चैष इति । यैः जीवोत्पत्त्यादिप्रतिपादनेन शास्त्रस्य अप्रामाण्यं सिद्धान्तितम् ; एतच्छास्त्राविवक्षितमर्थं विवक्षितत्वेनारोप्य अप्रामाण्यमुक्तं स्यात् । अतः अप्रामाण्यं पूर्वपक्षीकार्यम् । न सिद्धान्तीकर्तव्यम् । तस्मात परैरुक्तं सूत्रानभिमताप्रामाण्यहेतुं अनुवदति [अनेन] ॥

'निष्ठामलभमानः' इत्यस्य, परोक्ताभ्युपगमेन परिहारः, सोऽपि इत्यादिनोक्तः ।

अथवेति । [निष्ठामलभमानः] इत्यस्य अन्यथा अर्थं वक्ष्यन् तमर्थं दृष्टान्ते शिक्षयति । एवमिति, दार्ष्टान्तिकेऽपि तमेवाऽर्थमाह ।

---

[1] अलब्धा—थ. [2] विरुद्धमेवेदं—च. [3] यथा—द. [4] मथर्वणं—त, थ, न,
[5] आत्मनो वेदना—त.

[दुर्ज्ञानस्य वेदार्थस्य सुखावबोधाय पाञ्चरात्रारम्भः]

तथा वेदार्थस्य दुर्ज्ञानतया, सुखावबोधार्थः शास्त्रारम्भः परमसंहितायामुच्यते—

'अधी[1]ता भगवन्[1] वेदाः साङ्गोपाङ्गाः सविस्तराः ।

श्रुतानि च मयाऽङ्गानि वाकोवाक्ययुतानि च ॥ (पां. प. सं.)

न चैतेषु समस्तेषु संशयेन विना क्वचित् ।

श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति ॥' (पां. प. सं)

इति ;

'वेदान्तेषु यथासारं सङ्गृह्य भगवान् हरिः ।

भक्तानुकम्पया विद्वान् सञ्चिक्षेप यथासुखम् ॥' (पां. प. सं.)

इति च ॥

[पाञ्चरात्रतन्त्रप्रणयने भगवतस्तात्पर्यम्]

अतः-स भगवान् [2]वेदैक[2]वेद्यः, परब्रह्माभिधानो वासुदेवः, निखिलहेयप्रत्यनीक-कल्याणैकतानानन्तज्ञानानन्दाद्यपरिमितोदारगुणसागरः, सत्यसङ्कल्पः, चातुर्वर्ण्य-चातुराश्रम्यव्यवस्थया अवस्थितान्, धर्मार्थकाममोक्षाख्यपुरुषार्थाभिमुखान् भक्तान्

तथा—उक्तानुगुणमेवेत्यर्थः । संशयेनेति । संशयः—अनधीतशाखासु श्रुतार्थविरोधोऽस्ति न वा ? इत्येवं रूपः । यद्वा, 'प्रतिपन्नेष्वर्थेषु यत् श्रेयः, तन्न जानामि' इत्येवं रूपः ।

वेदान्तेष्विति । मोक्षधर्मे—'यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च । गृणन्ति सत्यधर्माणः सत्यं सत्येषु सामसु' इति । एकायनशाखाविषये पारमेश्वरं वचनम्—'महतो वेदवृक्षस्य मूलभूतो महानयम् । स्कन्धभूता ऋगाद्यास्ते शाखाभूतास्तथा मुने' ॥ इत्यादि द्रष्टव्यम् ।

अतः—वेदान्तस्य दुरवबोधार्थत्वात् । भगवान् इत्यादिविशेषणानि भ्रम-विप्रलम्भादि-संभवशङ्काव्यावृत्त्यर्थानि । भगवच्छब्देन हेयप्रत्यनीक-कल्याणैकतानत्वे विवक्षिते । वेदैकेति, 'एक'शब्दप्रयोगः, 'पुरुषत्वात् सदोषः' इत्याद्यनुमानस्य, धर्मिग्राहकप्रमाणबाधमभिप्रेत्य । निखिलहेयेति, भगवच्छब्दसमाख्याप्रमाणसिद्धमर्थमाह । सत्यसङ्कल्प इति, वक्ष्यमाण-व्यवस्थानुगुणविशेषणम् । भक्तानिति, 'शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्' इति

---

[1] ताः सकला—द.　　[2] वेदान्त—वा.

अवलोक्य, [1]अपारकारुण्य[1]सौशील्यवात्सल्यौदार्यमहोदधिः, स्वस्वरूप-[2]स्वविभूति[2]-स्वाराधन-तत्फलयाथात्म्यावबोधिनो वेदान्, ऋग्यजुःसामाथर्व[3]भेद[3]भिन्नान् अपरिमितशाखान् विध्यर्थवादमन्त्ररूपान्, स्वेतरसकलसुरनरदुरवगाहांश्च अवधार्य, तदर्थयाथात्म्यावबोधि पञ्चरात्रशास्त्रं स्वयमेव निरमिमीतेति,—निरवद्यम् ॥

[परकीये व्याख्याने सूत्राक्षराननुगुणता—तद्विरोधश्च]

यत्तु परैः—सूत्रचतुष्टयं कस्यचित् विरुद्धांशस्य प्रामाण्यनिषेधपरं—व्याख्यातम्,

तत् सूत्राक्षराननुगुणं; सूत्रकाराभिप्रायविरुद्धं च। तथा हि! सूत्रकारेण, वेदान्तन्यायाभिधायीनि सूत्राण्यभिधाय, वेदोप[4]बृंहणाय च[4] भारतसंहितां शतसहस्रिकां कुर्वता, मोक्षधर्मे ज्ञानकाण्डे अभिहितम्;

[पाञ्चरात्रप्रामाण्यस्थापकमहाभारतवचनादि]

'गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।

य इच्छेत् सिद्धिमास्थातुं देवतां कां यजेत सः?॥' (म. भा. शां. 342-1)

वचनात् भक्तिः सम्यक्छास्त्रज्ञानहेतुः सात्त्विकजनसंरक्षणाय। वेदापाश्रयेण तदुपमर्दनकारिणामसुराणां निरसनाय कृतं बुद्धादिशास्त्रमिति, तच्च न रक्षणोपयुक्तम्। अतः भक्तरक्षणार्थं कृतेऽस्मिन् प्रबन्धे न दोषगन्धः इति भावः॥ **अपारेति**, विप्रलम्भासम्भवार्थम्। **विध्यर्थवादेति**। तत्त्वविषयं यदत्रोच्यते, तत्सर्वम् अर्थवादादिषु प्रतिपादितमिति भावः। **निरवद्यम्**—पाशुपतादिषु यदवद्यं, तन्नास्त्यत्रेति भावः॥ एवं परोक्ताप्रामाण्यहेतुर्निराकृतः॥

सूत्रचतुष्टयमिति। न सूत्रद्वयमित्यर्थः। **सूत्राक्षराननुगुणम्**—'वा' शब्द-तदप्रतिषेधादिसूत्रपदाननुगुणम्। 'अपि वा कर्तृसामान्यात्' 'एकं वा संयोग....' इत्यादिषु वाशब्दः पक्षविपरिवृत्तिपरो दृष्टः। 'विप्रतिषेध'शब्दोऽपि, तदप्रतिषेध-वाशब्दसाहचर्यात् निषेधार्थ एवेति भावः। **न्यायः**—अधीतशाखार्थस्य संशय-विपर्ययादिनिरासकः। **उपबृंहणम्**—अनधीतशाखार्थैककण्ठ्येन अधीतशाखार्थज्ञापनम्॥

---

[1] कारुण्य—इ. [2] विभूति—द. [3] वेद—ध. [4] बृंहणाय—थ.

इत्यारभ्य, महता प्रबन्धेन पञ्चरात्रशास्त्रप्रक्रियां प्रतिपाद्य,

'इदं शतसहस्राद्धि भारताख्यानविस्तरात् ।
आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतं ॥' (म.भा.शां. 353-11)
'नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ।
आरण्यकं च वेदेभ्य ओषधीभ्यो यथाऽमृतम् ॥' (म.भा.शां. 353-12)
'इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
सांख्य-योग[1]कृतान्तेन[1] पञ्चरात्रानुशब्दितम् ॥' (म.भा.शां. 348-62)
'इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम्' (म.भा.शां. 343-33)
'ऋग्यजुःसामभिर्जुष्टमथर्वाङ्गिरसैस्तथा' (म.भा.शां. 343-41)
'भविष्यति प्रमाणं(वै)वा एतदेवाऽनुशासनम्' (म.भा.शां. 343-45)

इति । 'साङ्ख्य-योग'शब्दाभ्यां, ज्ञानयोग-कर्मयोगावभिहितौ । यथोक्तम्—

'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्' (भ.गी. 3-3)

इति । भीष्मपर्वण्यपि,

'ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः ।
अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः ॥ (म.भा.भी. 66-39)
'सात्वतं विधिमास्थाय गीतः सङ्कर्षणेन यः' (म.भा.भी. 66-40)

इति । कथम् एवं ब्रुवाणो बादरायणः, वेदविदग्रेसरः, वेदान्तवेद्यपरब्रह्मभूतवासुदेवो-[2]पासनार्चनादि[2]प्रतिपादनपरस्य सात्वतशास्त्रस्य, अप्रामाण्यं ब्रूयात् ? ॥

[महाभारतप्रशंसायाः अनैकान्त्यशङ्का-समाधाने]

ननु च—

'साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा' (म.भा.शां. 359-1)

महता प्रबन्धेन—विस्तरेण । इदं श्रेयः—एतच्छास्त्रोक्तमेव सांसारिकफलसाधनम् । इदं ब्रह्म—एतदुक्तमेव परमप्राप्यं ब्रह्म । इदम् अनुत्तमं हितम्—अपवर्गसाधनम् इत्यर्थः । अथर्वाङ्गिरसैः—अथर्वणा अङ्गिरसा च दृष्टैः अथर्ववेदप्रदेशैः । ऋगादिशब्दैः तत्तदर्थोऽभिप्रेतः । साङ्ख्येति । कर्म-ज्ञानयोगोपेतमित्यर्थः ॥

---

[1] कृतं तेन—थ. [2] पासनार्चन—द.

'किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने ?' (म.भा.शां. 359-2)
इत्यादिना, साङ्ख्यादीनामपि आदरणीयतोच्यते। 'शारीरके तु[1], सांख्यादीनि प्रतिषिध्यन्ते। अतः इदमपि तन्त्रं तत्तुल्यम् !

नेत्युच्यते ; यतः तत्राऽपि इममेव शारीरकोक्तन्यायमवतारयति।

'किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा ?' इति प्रश्नस्य, अयमर्थः—किं सांख्य-योग-पाशुपत-वेद-पञ्चरात्राणि, एकतत्त्वप्रतिपादनपराणि ? पृथक्तत्त्वप्रतिपादनपराणि वा ? [2]यदा[2] एकतत्त्वप्रतिपादनपराणि ; [3]किं तत्[3] एकं तत्त्वम् ? यदा तु पृथक्तत्त्वप्रतिपादन-पराणि ; तदा एषां परस्परविरुद्धार्थप्रति[4]पादनपरत्वात्[4], वस्तुनि विकल्पासम्भवाच्च, एकमेव प्रमाणमङ्गीकरणीयम् ; किं तदेकम् ?—इति ॥

अस्य उत्तरं ब्रुवन्,

'ज्ञानान्येतानि राजर्षे ! विद्धि नानामतानि वै
सांख्यस्य वक्ता कपिलः' (म. भा. शां. 359-64)

इत्यारभ्य, सांख्य-योग-पाशुपतानां कपिल-हिरण्यगर्भ-पशुपति[5]कृतत्वेन[5] पौरुषेयत्वं प्रतिपाद्य,

'अ(पा)वान्तर[6]तपा[6] नाम वेदाचार्यः स उच्यते' (म. भा. शां. 359-66)

इति, वेदानाम् अपौरुषेयत्वमभिधाय,

'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्' (म. भा. शां. 359-68)

इति, 'पञ्चरात्रतन्त्रस्य वक्ता, नारायणः स्वयमेव' इत्युक्तवान्।

यत इत्यादि। सांख्यादीनां वेदाविरुद्धांशे प्रामाण्यम्। कृत्स्नाविरुद्धस्य श्रीपाञ्चरात्रस्य कार्त्स्न्येन प्रामाण्यमिति न्यायमवतारयतीत्यर्थः।

किमेतानीति। एकतत्त्वप्रतिपादनपरत्वे प्रमेयविशेषबुभुत्सा ; पृथक्तत्त्वप्रतिपादनपरत्वे प्रमाणविशेषबुभुत्सा। 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोति' 'अनुदिते जुहोति' 'व्रीहिभिर्यजेत, यवैर्यजेत' इत्यादिषु अधिकारिभेदेन, कालभेदेन, फलभेदेन विकल्पः संभवति, अनुष्ठाने। सिद्धवस्तुनि तु विकल्पासंभवेन विरोधात् एकमेव प्रमाणं स्यादित्यर्थः। **ज्ञानान्येतानीति**। किं त्वया तत्तद्ग्रन्थकाराभिप्रायः पृष्टः ? उत अर्थस्थितिः पृष्टा ? तत्तदभिप्रायश्चेत्, पृथङ्निष्ठान्येव मतानीत्यर्थः।

---

[1] शारीरकेऽपि—न. [2] यथा—द. [3] किं तथा—द. [4] पादकत्वात्—द.
[5] प्रणीतत्वेन—द. [6] तमा—द.

[‘वक्ता नारायणः स्वयम्’ इत्यस्याशयाविष्कारः]

एवं वदतश्च, अयमाशयः—[1]‘पौरुषेयाणां’ तन्त्राणां परस्परविरुद्धवस्तुवादितया, अपौरुषेयत्वेन निरस्तप्रमादादिनिखिलदोषगन्धवेदवेद्यवस्तुविरुद्धाभिधायित्वाच्च, यथावस्थितवस्तुनि [2]प्रामाण्यं[2] दुर्लभम्। वेद[3]वेद्यश्च[3] परब्रह्मभूतो नारायणः। अतः तत्तन्त्राभिहितप्रधान-पुरुष-पशुपतिप्रभृतितत्त्वस्य वेदान्तवेद्यपरब्रह्मभूतनारायणात्मकतयैव वस्तुत्वम् अभ्युपगमनीयम्—इति। तदिद[4]माह च[4]—

‘सर्वेषु च नृपश्रेष्ठ! ज्ञानेष्वेतेषु दृश्यते’ (म. भा. शां. 359-68)

‘यथागमं यथान्यायं निष्ठा नारायणः प्रभुः॥’ (म. भा. शां. 359-69)

इति। ‘यथागमं यथान्यायम्’ इति न्यायानुगृहीततत्तदागमोक्तं वस्तु [5]परामृशतः[5], ‘नारायण एव सर्वस्य वस्तुनो निष्ठेति दृश्यते। अब्रह्मात्मकतया तत्तत्तन्त्राभिहितानां तत्त्वानाम्,

‘सर्वं खल्विदं ब्रह्म’ (छां. उ. 3-14-1)

‘विश्वं नारायणः’ (तै. ना. उ 11-2)

इत्यादिना सर्वस्य ब्रह्मात्मकतामनुसन्दधानस्य, नारायण एव निष्ठेति प्रतीयते इत्यर्थः॥

[उक्तार्थस्य वचनान्तरेण विशदीकरणम्]

अतः वेदान्तवेद्यः परब्रह्मभूतो नारायणः, स्वयमेव पञ्चरात्रस्य कृत्स्नस्य वक्तेति, तत्स्वरूप-तदुपासनाभिधायि तत् तन्त्रमिति च, तस्मिन् इतरतन्त्रसामान्यं, न केनचित् [6]उद्भावयितुं[6] शक्यम्। अतः तत्रैव इदमुच्यते—

‘एवमेकं साङ्ख्ययोगं [7]वेदारण्यकमेव[7] च।
परस्परा[8]ङ्गान्येतानि[8] पञ्चरात्रं तु कथ्यते॥’ (म.भा.शां. 358-81)

इति। साङ्ख्यं च योगश्च-साङ्ख्य-योगम्। वेदाश्च आरण्यकानि च वेदारण्यकम्। परस्पराङ्गानि एतानि, एकतत्त्वप्रतिपादनपरतया एकीभूतानि, ‘एकं पञ्चरात्रम्’ इति कथ्यते॥

एवं वदतः इति ; एभिः फलितमाह।

अब्रह्मात्मकतयेति, न्यायानुगृहीतवस्तुपरामर्शस्वरूपमाह।

एकं पञ्चरात्रम् इति आर्थम् एकत्वमुक्तम् ; एकवचनान्तत्वात्। यद्वा—एकीभूतानीत्यनेन अङ्गाङ्गिभावफलितार्थ उक्तः। एकं पञ्चरात्रम् इति एकपदव्याख्यानम्।

---

[1] पौरुषाणां—थ. [2] प्रमाणं—इ. [3] वेद्यः—इ. [4] माह—आ. इ. वा. [5] परामृशत—थ. [6] भावयितुं—वा. [7] वेदाश्चारण्यकानि—थ. [8] ज्ञान्वितानि—थ.

[सर्वस्य पञ्चरात्रस्य एकत्वोक्तिविशदीकारः]

एतदुक्तं भवति—सांख्योक्तानि पञ्चविंशतितत्त्वानि, योगोक्तं च यम-नियमाद्यात्मकं योगम्, वेदोदितकर्मस्वरूपाणि अङ्गीकृत्य तत्त्वानां ब्रह्मात्मकत्वम्, योगस्य च ब्रह्मोपासनप्रकारत्वम्, कर्मणां च तदाराधनरूपताम् अभिदधति, ब्रह्मस्वरूपं प्रतिपादयन्ति आरण्यकानि। एतदेव परेण ब्रह्मणा नारायणेन, स्वयमेव पञ्चरात्रतन्त्रे विशदीकृतम्—इति ॥

[शारीरके तन्त्रान्तरनिराकरणस्याशयः]

शारीरके च सांख्योक्ततत्त्वानाम्, अब्रह्मात्मकतामात्रं निराकृतम्; न स्वरूपम्। योगपाशुपतयोश्च; ईश्वरस्य केवलनिमित्तकारणता, [1]परावरतत्त्व[1]विपरीतकल्पना, वेद-[2]बहिष्कृता[2]चारो निराकृतः; न योगस्वरूपं पशुपतिस्वरूपं च। अतः,

'सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।
आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ॥ (म.भा.शां.)

इति, 'तत्तदभिहिततत्तत्स्वरूपमात्रमङ्गीकार्यम्; जिन-सुगताभिहिततत्त्ववत् सर्वं न बहिष्कार्यम्'– इत्युच्यते;

'यथागमं यथान्यायं निष्ठा नारायणः प्रभुः' (म.भा.शां. 359-69)
इत्यनेनैकार्थ्यात् ॥ ४२ ॥

इति उत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥
(पञ्चरात्राधिकरणम्)

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
द्वितीयस्याऽध्यायस्य द्वितीयः पादः ॥ २ ॥

यथान्यायमिति। न केवलं तत्तदागममात्रपरामर्शः; न्यायपरामर्शोऽपि हि अत्रोक्तः [इत्यर्थः]। 'सांख्यं योगः' इत्यादिवचनस्य अन्यथाऽर्थश्चेत्, वेदविरुद्धांशेऽपि प्रामाण्याभिधायि इदं वचनम्, 'विरोधेत्वनपेक्षं स्यात्' इति न्यायात् अप्रमाणं स्यात्। अग्नीषोमीयहिंसादीनामधर्मत्वस्य सांख्ये प्रतिपादनादिति भावः

ऐकार्थ्यात् इति, उक्तार्थे हेतुमाह ॥ ४२ ॥

[सूत्राणि—१. उत्पत्त्यसं, २. न च कर्तुः, ३. विज्ञानादि, ४. विप्रति]

इति उत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥
इति द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

---

[1] परावरत्व—द. [2] बहिष्कृतश्चा—द.

श्रीभाष्ये द्वितीयस्याऽध्यायस्य

तृतीयः पादः

अधिकरणार्थसूचनी

—o—

सं.	अधिकरणनामानि	सू. सं.	अर्थाः
(1)	वियदधिकरणम्	1 – 9	आकाशस्य ब्रह्मकार्यत्वचिन्ता ।
(2)	तेजोऽधिकरणम्	10–17	तेज आदिशरीरकात् ब्रह्मण एव अबादिसृष्टिः ; न केवलात् तेज आदेः ।
(3)	आत्माधिकरणम्	18	जीवानां उत्पत्तिविनाशराहित्येन नित्यता ।
(4)	ज्ञाधिकरणम्	19–32	ज्ञानाश्रयत्वस्य जीवस्वरूपतानिरूपणम् ।
(5)	कर्त्रधिकरणम्	33–39	आत्मन एव कर्तृत्वम्, न गुणानाम् ।
(6)	परायत्ताधिकरणम्	40–41	जीवात्मगतं विहितनिषिद्धक्रियाकर्तृत्वं परमात्माधीनम् ।
(7)	अंशाधिकरणम्	42–52	जीवात्मानः परमात्मनः अंशभूताः ।

—o—

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ॥

श्रीशारीरकमीमांसाभाष्ये द्वितीये अविरोधाध्याये

तृतीयः (वियत्) पादः

[अधिकरणानि—७. सूत्राणि—५२.]

[पादार्थः—वियदादेः प्रपञ्चस्य ब्रह्मकार्यत्वचिन्ता]

(54) वियदधिकरणम् ॥ २–३–१ ॥

[सूत्राणि — १–९]

[अधिकरणार्थः—आकाशस्य ब्रह्मकार्यत्वचिन्ता]

२१७. न वियदश्रुतेः ॥ २-३-१ ॥

[पादसङ्गतिप्रदर्शनम्]

साङ्ख्यादिवेदबाह्यतन्त्राणां न्यायाभासमूलतया, विप्रतिषेधाच्च असामञ्जस्यमुक्तम्। इदानीं, [1]स्वपक्षस्य[1] विप्रतिषेधादि[2]दोषगन्धाभाव[2]ख्यापनाय, ब्रह्मकार्यतयाऽभिमतचिदचिदात्मकप्रपञ्चस्य कार्यत्वप्रकारो विशोध्यते ।

सांख्यादीति । अयमर्थः—द्वितीयाध्यायस्य प्रथमे पादे, कारणविषये परोक्तदोषाः परिहृताः । अथ तृतीये कार्यविषये परोक्तदोषाः परिह्रियन्ते । तस्मात् तृतीयः पादः प्रथमेन सङ्गतः । द्वितीयस्तु परपक्षप्रतिक्षेपपरत्वात् चरमभावी—इति चेत् ! कारणविषये परोक्तदोषपरिहार-परपक्षप्रतिक्षेपौ सङ्गतौ । अनन्तरं कार्यविषयपरोक्तदोषपरिहारो युक्त इति, सङ्गतिः—इति । इममर्थमभिप्रेत्य, **ब्रह्मकार्यतयेति** । **चिदचिदात्मकेति**, तत्र चिदचिद्वस्तुनोः

[सूत्रार्थः ; **वियत्**—आकाशः, **न**—न जायते, **अश्रुतेः**—उत्पत्तिप्रतिपादिकायाः श्रुतेरभावात् ।]

उत्पत्तिवचनाभावान्नोत्पत्तिर्वियतो विभोः ।
नित्यत्वाच्चाऽऽत्मन इव निरंशस्येति शङ्कते ॥ (ब्र. प. २१७)

---

[1] स्वपक्ष—इ. [2] दोषाभाव—घ, च, ठ.

[संशयाकारः]

तत्र वियत् उत्पद्यते ? न वा ?—इति संशय्यते ।

[सयुक्तिकः पूर्वः पक्षः]

किं युक्तम् ?; न वियत् उत्पद्यते—इति ।

कुतः ?; अश्रुतेः । सम्भावितस्य हि ! श्रवणसम्भवः । असम्भावितस्य तु गगनकुसुमवियदुत्पत्त्यादेः, शब्दाभिधेयत्वं न संभवति । [1]न[1] खलु ! निरवयवस्य[2]सर्वगतस्याऽऽकाशस्य[2], आत्मन इव, उत्पत्तिर्निरूपयितुं शक्यते ॥

[पूर्वपक्षनिर्वाहः, उत्पत्तिश्रुतेरर्थविरोधश्च]

अत[3]एव च[3], उत्पत्त्यसम्भवात्, छान्दोग्ये सृष्टिप्रकरणे, तेजः प्रभृतीनामेवोत्पत्तिः आम्नायते ;

'तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत' (छां. उ. 6-2-3)

इति । [4]तैत्तिरीयकाथर्वणादिषु[4]—

कार्यत्वं, किमेकरूपम् ? उत भिन्नरूपम् ?—इति संशयिते सति, एकरूपमिति पूर्वःपक्षः, भिन्नरूपमिति सिद्धान्तश्च, पादद्वयेन क्रियते—इत्यभिप्रेत्योक्तम् ।

[विचाराः] किं वियत् उत्पद्यते ? न वा ? इति संशयः । तदर्थम् 'आत्मन आकाशः' इति वाक्यं, वियदुत्पत्तिं प्रतिपादयति ? न ? इति । 'सम्भूत'शब्दः, मुख्योत्पत्तिपरः ? उत गौणः ? इति । अन्यत्र निरवयवद्रव्यस्य उत्पत्त्यदर्शनम्, आकाशस्य उत्पत्त्यनर्हताम् अवगमयति ? न ? इति । यदा अवगमयति ; तदा 'सम्भूत'शब्दस्य गौणत्वात्, वाक्यस्य उत्पत्तिप्रतिपादनासामर्थ्यात्, न वियदुत्पद्यते इति भवति । यदा उत्पत्त्यनर्हतां नाऽवगमयति ; तदा 'सम्भूत'शब्दस्य मुख्यवृत्तितया, वाक्यस्य उत्पत्तिप्रतिपादकत्वात्, वियदुत्पद्यते इति सिध्यति । [इति फल-फलिभावः]

श्रुतिः—श्रवणम् । श्रवणं—शब्दजन्यप्रमितिः । यथा—'श्रोतव्यः' इत्यादिषु । शब्दजन्यप्रमितिविषयत्वासम्भवात्-इत्यर्थः । न हि ! शब्दः अयोग्यार्थप्रमितिजननशक्तः ; 'आदित्यो यूपः' इत्यादिष्वदर्शनादिति भावः । **गगनकुसुमोपादानं**, दृष्टान्तत्वेन कृतम् । **निरवयवद्रव्यत्वात्, सर्वगतत्वाच्चेति** हेतुद्वयं विवक्षितम् ।

अत एव चेति । तेजः सृष्टिप्राथम्यं श्रुत्यर्थापत्तिः । **तैत्तिरीयकेति** । तर्कविरुद्धश्रुतेरपि, तर्कानुगृहीतश्रुतिः प्रबलेति भावः ॥ १ ॥

---

[1] न च—इ. [2] सर्वगतस्य—थ. [3] एव—ग, च, ठ. [4] तैत्तिरीयाथर्वणकादिषु—इ, वा.

'तस्माद्वा एतस्मादात्मन आकाशः संम्भूतः' (तै. उ. आन. 1–2)

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।

खं वायुर्ज्योतिरापः' (मुण्ड. उ. 2–1–3)

इत्यादिषु [1]श्रूयमाणा वियदुत्पत्तिः,[1] अर्थविरोधात् बाध्यते– इति ॥ १ ॥

[श्रुत्या वियदुत्पत्तेः सिद्धान्तः]

एवं प्राप्ते, अभिधीयते–

२१८. अस्ति तु ॥ २-३-२ ॥

अस्ति तु आकाशस्योत्पत्तिः । अतीन्द्रियार्थविषया हि! श्रुतिः, प्रमाणान्तरा-[2]प्रतीतामपि[2] वियदुत्पत्तिं प्रतिपादयितुं समर्थैव ।

न च - श्रुतिप्रतिपन्नेऽर्थे, तद्विरोधिनिरवयवत्वादिहेतुकम् अनुत्पत्त्यनुमानम् उदेतुमलम् । [3]आत्मनोऽपि[3] अनुत्पत्तिः, न निरवयवत्वप्रयुक्तेति[4]वक्ष्यते[4] ॥ २ ॥

[आकाशोत्पत्तिश्रुतेः गौणत्वशङ्का]

पुनश्चोदयति—

२१९. गौण्यसम्भवाच्छब्दाच्च ॥ २-३-३ ॥

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै. उ. आन. 1–2)

अतीन्द्रियेति, 'तु'शब्दाभिप्रेतं हेतुमाह । श्रुतिरिति । एतत्सूत्रान्यथासिद्धिपरे अनन्तरसूत्रे, 'गौणी' इति स्त्रीलिङ्गनिर्देशेन, अस्तीति, श्रुतिः साधकतया विवक्षितेति भावः ॥

न च....उदेतुमलमिति । अत्र कालात्ययापदेशोऽभिप्रेतः ॥ २ ॥

तस्मादिति । गौणवृत्तेः शब्दधर्मत्वात्, तत्राऽपि स्त्रीलिङ्गान्तत्वाच्च, श्रुतिर्विशेष्या ।

[सूत्रार्थः ; **अस्ति तु**—आकाशोत्पत्तिप्रतिपादिका 'आत्मन आकाशः' इति श्रुतिरस्त्येव ॥]

श्रुत्या चाऽऽत्मन आकाशः सम्भूत इति शंसनात् ।
उत्पत्तिर्विद्यते तस्य त्वाकाशस्येति निश्चितम् ॥ (ब्र. प. २१८)

[सूत्रार्थः ; **गौणी**—आकाशे संभूतत्वश्रुतिः औपचारिकी, **असंभवात्**—निरवयवे उत्पत्तेर्बाधात्, **शब्दाच्च**—नित्यत्वार्थकस्य अमृतशब्दस्य प्रयोगादपि ।]

स्यात् सम्भूतिश्रुतिर्गौणी व्योम्न उत्पत्त्यसम्भवात् ।
तेजः प्राथम्ययोगाच्च ह्यमृतत्वश्रुतेरपि ॥ (ब्र. प. २१९)

---

[1] श्रूयमाणवियदुत्पत्तिः—द. [2] प्रसिद्धामपि—ब्ब, प्राप्तमपि—न. [3] आत्मनः – घ, ङ, च, ठ.
[4] वक्ष्यति—न.

इत्यादिवियदुत्पत्तिश्रुतिः गौणी—इति कल्पयितुं युक्तम् ;

'तत्तेजोऽसृजत' (छां. उ. 6-2-3)

इति, सिसृक्षोर्ब्रह्मणः, प्रथमं तेज उत्पद्यत इति, [1]तेज[1]उत्पत्तिप्राथम्येन वियदुत्पत्तिप्रतिपादनासम्भवात् ।

'वायुश्चान्तरिक्षं चैतदमृतम्' (बृ. उ. 4-3-3)

इति, वियतः अमृतत्वशब्दाच्च ॥ ३ ॥

['सम्भूत' शब्दस्यैकस्य आकाशांशे गौणत्वस्य अग्न्यंशे मुख्यतायाश्चानुपपत्तिः]

कथम् एकस्य [2]'सम्भूत' शब्दस्य[2] आकाशापेक्षया गौणत्वम्, अग्न्याद्यपेक्षया मुख्यत्वम् ?—इति चेत्—

२२०. स्याच्चैकस्य ब्रह्मशब्दवत् ॥ २-३-४ ॥

एकस्यैव 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै. उ. आन. 1-2) इति आकाशे मुख्यत्वासंभवात्, गौणतया प्रयुक्तस्य 'सम्भूत' शब्दस्य,

'वायोरग्निः' (तै. उ. आन. 1-2)

[3]इत्यादिषु[3] अनुषक्तस्य मुख्यत्वं स्यादेव । [4]ब्रह्मशब्दवत् —यथा[4] 'ब्रह्म' शब्दः,

---

प्रस्तुतार्थवशात्, श्रुतिविशेषावगमः इत्यभिप्रायः । **तेज उत्पत्तीति** । तेजः प्रभृतेः पश्चात् न वियदुत्पत्तिः संभवति । पूर्वमपि न ; तेजः प्राथम्यादित्यर्थः । पूर्वपक्षे अवान्तरसाध्यविषयहेतुद्वयरूपत्वात्, असंभव-शब्दयोः एकसूत्रप्रतिपाद्यता । अतो न सूत्रभेदो युक्तः ॥ ३ ॥

स्याचेति । 'तपसा ब्रह्म' 'तपो ब्रह्म' इत्यादिप्रयोगोऽनुसन्धेयः । 'अन्नं ब्रह्म' आनन्दो ब्रह्म' इति प्रयोगानुदाहरणं, तस्य मुख्यामुख्यविषयत्वाभावात् । अन्नादिष्वपि ब्रह्मबुद्ध्या हि ! 'ब्रह्म'शब्दप्रयोगः ।

[सूत्रार्थः ; **एकस्य**—श्रुतौ सकृदेव प्रयुक्तस्यापि सम्भूतशब्दस्य, **ब्रह्मशब्दवत्**—एकदैव प्रयुक्ते ब्रह्मशब्दे इव मुख्यत्वं गौणत्वं च, **स्याच**—युज्येतैव ॥

सम्भूतशब्दस्यैकस्य गौणत्वं मुख्यताऽपि च ।
ब्रह्मशब्दस्येव चाऽग्न्याऽप्यनुषक्तस्य मुख्यता ॥ (ब्र. प. २२०)

---

[1] तेजसः—इ, ग.　[2] सम्भूतस्य—अ.　[3] इत्यग्न्यादिषु —इ.　[4] यथा—क.

'तस्माद्एतद् ब्रह्म नामरूपमन्नं च जायते' (मुण्ड.उ. 1-1-10)

इत्यत्र प्रधाने गौणतया प्रयुक्तः ; तस्मिन्नेव प्रकरणे,

'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते' (मुण्ड.उ. 1-1-9)

इति, ब्रह्मणि मुख्यतया प्रयुज्यते ; तद्वत्। अनुषङ्गे च, श्रवणावृत्ताविव अभिधानावृत्तिः, विद्यत एवेत्यर्थः ॥ ४ ॥

[वियदनुत्पत्तिशङ्कायाः परिहारः]

परिहरति –

२२१. प्रतिज्ञाऽहानिरव्यतिरेकात् ॥ २-३-५ ॥

छान्दोग्यश्रुत्यनुसारेण, अन्यासां वियदुत्पत्तिवादिनीनां श्रुतीनां गौणत्वं कल्पयितुं न युज्यते। यतः छान्दोग्यश्रुत्यैव वियदुत्पत्तिरङ्गीकृता ;

'येनाऽश्रुतं श्रुतम्' (छां.उ. 6-1-3)

इत्यादिना, ब्रह्म[1]विज्ञानेन[1] सर्व[2]विज्ञान[2]प्रतिज्ञानात् ! तस्या हि ! प्रतिज्ञायाः अहानिः, आकाशस्याऽपि ब्रह्मकार्यत्वेन तदव्यतिरेकादेव भवति ॥ ५ ॥

अनुषङ्गे चेति। 'अभिधान' शब्देनाऽत्र मुख्यामुख्यसाधारणशब्दव्यापारमात्रं विवक्षितम्। बोधनार्थं हि ! अनुषङ्गो वाक्यान्तरे। बोधनव्यापारभेदात्, वाक्यान्तरस्थस्य शब्दस्य गौणत्वं च युक्तम्। सकृत्प्रयुक्तस्य हि ! व्यापारैक्यात् मुख्यत्व-गौणत्वविरोधः ॥ ४ ॥

ब्रह्मकार्यत्वेनेति। कार्य-कारणभावाभावेऽपि नित्यसिद्धमुक्तानाम् अव्यतिरेकः ब्रह्मशरीरत्वेन भवतीति, तद्व्यावृत्त्यर्थम्। मृत्पिण्डकार्यादिदृष्टान्तवशात् कार्यतयैव अव्यतिरेको विवक्षितः इति भावः ॥ ५ ॥

[सूत्रार्थः ; प्रतिज्ञाऽहानिः—एकविज्ञानतः सर्वविज्ञानप्रतिज्ञायाः अभङ्गः, अव्यतिरेकात्—(कार्यत्वकृतात्) ब्रह्मानन्यत्वादेव सिध्यति ॥]

प्रतिज्ञाया अहानिः स्यात् कार्यत्वाद्वियतश्च हि।
छान्दोग्येऽपि वियत्सृष्टिरभिप्रेतेति गम्यते ॥ (ब्र. प. २२१)

---

[1] ज्ञानेन – इ, घ. [2] ज्ञान—इ, घ.

[छान्दोग्यश्रुतितः आकाशोत्पत्तिप्रतीतिः]

२२२. शब्देभ्यः ॥ २-३-६ ॥

इतश्च वियदुत्पत्तिः, छान्दोग्ये प्रतीयते ;

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. उ. 6-2-1)

इति, प्राक् सृष्टेः एकत्वावधारणशब्दात् ।

'ऐतदात्म्यमिदं सर्वम्' छां. उ. 6-8-7)

इत्येवमादिशब्देभ्यश्च, कार्यत्वेन 'ब्रह्मणोऽव्यतिरेकप्रतीतेः'[1] । न च—

'तत्तेजोऽसृजत' (छां. उ. 6-2-3)

इति तेजस उत्पत्तिश्रुतिः, वियदुत्पत्तिं वारयति । वियदुत्पत्त्यवचनमात्रेण तेजसः प्रतीय[2]मानं प्राथम्यं[2], श्रुत्यन्तर[3]प्रतिपन्नां[3] वियदुत्पत्तिं न निवारयितुमलम् ॥ ६ ॥

ऐतदात्म्यमिति वाक्यं, 'कार्यभूतं कृत्स्नं कारणभूतब्रह्मात्मकम्' इत्येतदर्थपरत्वादुपात्तम् । 'आत्म' शब्दः अन्तर्यामिणमाह । 'एत'च्छब्देन पूर्वप्रस्तुतं कारणत्वं विवक्षितम् । यः कारणावस्थस्यात्मा ; स एव कार्यावस्थस्याऽपि जगत आत्मेत्यर्थः । **'आदि'** शब्देन 'सन्मूलाः सोम्येमाः' 'सर्वं खल्विदं ब्रह्म' इत्यादि विवक्षितम् । **न चेति** । न हि घटोत्पत्तिवचनं पटोत्पत्तिं वारयतीत्यर्थः । **तेजस इति** । तेजस उत्पत्तिमात्रं हि श्रुतम् ; न अन्यानुत्पत्तिः । अतः प्राथम्यं न श्रुतम् । अश्रुतेन श्रुतप्रहाणमयुक्तम् । श्रुतेन अश्रुतकल्पनं हि युक्तम् ॥ ६ ॥

[सूत्रार्थः ; **शब्देभ्यः**—सृष्टेः प्राक् ब्रह्मणः एकस्यैव अस्तित्वबोधकेभ्यः श्रुतिशब्देभ्यो ज्ञापकेभ्यः, आकाशोत्पत्तिः निश्चीयते ॥]

'सदेव सोम्यैतदात्म्यमिदमित्यादिशब्दतः ।
ब्रह्म प्रति शरीरत्वाद्वियतो ब्रह्मकार्यता' ॥ (ब्र. प. २२२)

---

[1] ब्रह्मणः व्यतिरेकः प्रतीयते—आ. [2] मानप्राधान्यं—थ. [3] प्रतीयमानां—इ.

[सर्वस्याऽपि कार्यताश्रुत्या आकाशस्यापि कार्यत्वावश्यंभावः]

२२३. यावद्विकारं तु विभागो लोकवत् ॥ २-३-७ ॥

'तु' शब्दः चार्थे ।

'ऐतदात्म्यमिदं सर्वम्' (छां. उ. 6-8-7)

इत्यादिभिः आकाशस्य विकारत्ववचनेन, तस्य आकाशस्य[1]ब्रह्मणो[1]विभागः— उत्पत्तिरपि, उक्तैव । लोकवत्–यथालोके 'एते सर्वे देवदत्तपुत्राः' इत्यभिधाय, तेषु केषांचित् तत उत्पत्तिवचनेन, सर्वेषामुत्पत्तिरुक्ता स्यात्; तद्वत् । एवं च सति,

'वायुश्चाऽन्तरिक्षं चैतदमृतम्' (बृ.उ. 4-3-3)

इति, सुराणामिव चिरकालस्थायित्वाभि[2]प्रायम्[2] ॥ ७ ॥

[आकाशोत्पत्तिसिद्धया वायूत्पत्तेरुक्तप्रायता]

२२४. एतेन मातरिश्वा व्याख्यातः ॥ २-३-८ ॥

अनेनैव हेतुना मातरिश्वनः–वायोरपि उत्पत्तिर्व्याख्याता । वियन्मातरिश्वनोः पृथग्योगकरणम्, 'तेजोऽतस्तथा ह्याह' (ब्र. सू. 2-3-10) [3]इति[3] [4]मातरिश्व[4]-परामर्शार्थम् ॥ ८ ॥

विकारत्वम्—कार्यत्वम् । इत्यादिभिरिति 'आदि' शब्देन एकत्वावधारणादि-विवक्षितम् । एवं च सतीति । असङ्कुचितार्थत्वे वायोरपि अनुत्पत्तिप्रसङ्ग इति भावः ॥ ७ ॥

परामर्शार्थमिति । एकसूत्रेण वक्तुं शक्येऽपि, सूत्रपृथक्करणम् उत्तरत्र परामर्शार्थ-मित्यर्थः । योगः सूत्रम ॥ ८ ॥

[सूत्रार्थः ; यावद्विकारम्—सर्वेषामपि कार्याणाम्, विभागस्तु—ब्रह्मण उत्पत्तिरपि उक्तैवेति गम्यते । लोकवत्—लोकव्यवहारगतवाक्यादिव]

ऐतदात्म्यमिदं सर्वमिति श्रुत्या विकारता ।
सर्वस्याऽपि तथोत्पत्तिः ब्रह्मणो लोकवद्भवेत् ॥ (ब्र. प. २२३)

[सूत्रार्थः ; एतेन—आकाशस्य ब्रह्मकार्यत्वसाधकहेतुना, मातरिश्वा—वायुरपि, व्याख्यातः—कार्यत्वेन साधितप्रायः]

तथाऽमृतस्याऽपि वायोराकाशाद्वायुरित्यतः ।
शब्दात्तु ब्रह्मकार्यत्वं व्याख्यातमिति निश्चितम् ॥ (ब्र. प. २२४)

---

[1] ब्रह्मणोऽपि—इ, घ. [2] प्रायः—आ. [3] इत्यत्र—वा. [4] मातरिश्वनः—त.

[उत्पत्तेरभावः ब्रह्ममात्रवृत्तिता]

२२५. असम्भवस्तु सतोऽनुपपत्तेः ॥ २-३-९ ॥

'तु' शब्दः अवधारणार्थः। असम्भवः— अनुत्पत्तिः, सतः—ब्रह्मण एव ; तद्व्यतिरिक्तस्य कस्यचिदपि अनुत्पत्तिः न सम्भवति ; अनुपपत्तेः।

एतदुक्तं भवति— वियन्मातरिश्वनोः उत्पत्तिप्रतिपादनम् ; उदाहरणार्थम्। उत्पत्त्यसंभवस्तु, सतः— परमकारणस्य परस्यैव ब्रह्मणः। तद्व्यतिरिक्तस्य कृत्स्नस्य अव्यक्तमहदहङ्कार[1]तन्मात्रेन्द्रिय[1]वियत्पवनादिकस्य प्रपञ्चस्य, एकविज्ञानेन सर्वविज्ञान-प्रतिज्ञादिभिः अवगतकार्यभावस्य, 'अनुत्पत्तिः[2]' नोपपद्यते—इति ॥ ९ ॥

इति वियदधिकरणम् ॥ १ ॥

एतदुक्तमिति। महदादीनाम् अनुत्पत्तिर्निषिध्यते। अनुपपत्तिः, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाहानेरित्यर्थः। 'आदि' शब्देन एकत्वावधारणादिर्विवक्षितः ॥ ९ ॥

[सूत्राणि— १. न वियद   २. अस्ति   ३. गौण्यसं   ४. स्याच्चैक
५. प्रतिज्ञा   ६. शब्दे   ७. यावद्वि   ८. एतेन   ९. असम्भ.]

[सूत्रार्थः ; **असम्भवः**—(उत्पत्तिसम्भावनाराहित्यम्) अनुत्पत्तिः, **सतस्तु**—सच्छब्दाभिधेयस्य ब्रह्मण एव, **अनुपपत्तेः**—ब्रह्मविज्ञानेन सर्वविज्ञानप्रतिज्ञान्यथानुपपत्तेः ॥]

सर्वहेतोः परस्यैव नोत्पत्तिः सम्भवेत् क्वचित्।
प्रतिज्ञानुपपत्तेश्च तदन्यज्जायतेऽखिलम् ॥ (ब्र. प. २२५)

इति वियदधिकरणम् ॥१॥

—o—

[1] तन्मात्र—द.   [2] अनुपपत्तिः—इ.

(८५) तेजोऽधिकरणम् ॥ २-३-२ ॥ (सू. १०-१७)

[अधि-अर्थः—तेज आदिशरीरकात् ब्रह्मण एव अबादिसृष्टिः ; न केवलात् तेज आदेः]

२२६. तेजोऽतस्तथा ह्याह ॥ २-३-१० ॥

[अवान्तरसङ्गतिः, प्रकृताधिकरणीयो विचारश्च]

ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य [1]ब्रह्मकार्यत्व[1]मुक्तम्।

इदानीं—व्यवहितकार्याणां, किं केवलात् [2]तत्तदनन्तरकारणभूतात् वस्तुनः,[2] उत्पत्तिः ? आहोस्वित् तत्तद्रूपात् ब्रह्मणः ?—इति चिन्त्यते ।

[पूर्वः पक्षः सहेतुकः]

किं युक्तम् ? केवलात् तत्तद्वस्तुनः—इति ।

कुतः ? तेजस्तावत् अतः – मातरिश्वन एव, उत्पद्यते ।

'वायोरग्निः' (तै. उ. आन. 1-1)

[3]इति हि ! आह[3] ॥ १० ॥

चिन्त्यत इति । महदादीनां तत्त्वानां किं केवलात् पूर्वपूर्वतत्त्वमात्रादुत्पत्तिः ? उत तत्तद्रूपाद्ब्रह्मण ? इति । किं 'आकाशाद्वायुः' इत्यादिष्वकाशादिशब्दाः, आकाशादि-मात्रपराः ? उत तदवस्थब्रह्मपराः ? इति । किं 'तेज ऐक्षत' इत्यादिषु अभिध्यानलिङ्गं तेज आदिशब्दानां तदवस्थब्रह्मपरताम् अवगमयति ? न ? इति । [तेषां] किं तदवस्थपरत्वे लक्षणा स्यात् ? न ? इति । किं [तेषाम्] अपर्यवसानवृत्त्या ब्रह्माभिधाने व्युत्पत्तिविरोधादिदोषो भवति ? न ? इति ।

यदा भवति ; तदानीम् अपर्यवसानेन ब्रह्माभिधानासंभवेन, लक्षणाप्रसङ्गात् अभिध्यान-लिङ्गस्य ब्रह्मपरतावगमकत्वाभावात्, शब्दानाम् आकाशादिमात्रपरत्वेन, केवलाकाशादेरेव

[सूत्रार्थः ; **तेजः**—अग्निः, **अतः**—केवलाद्वायोः, (जायते), **तथाहि**—वायोः उत्पत्तिमेव खलु, **आह**—श्रुतिर्ब्रवीति]

तेजश्च वायोः सम्भूतं तस्य न ब्रह्मकार्यता ।
वायोरग्निरिति श्रुत्या शङ्कते वायुकार्यताम् ॥ (ब्र. प. २२६)

---

[1] कार्यत्व—द. [2] तत्तद्वस्तुनः—वा. [3] इत्याह—घ, वा.

[अपां तेजस एव केवलात् सृष्टिशङ्का]

२२७. आपः ॥ २-३-११ ॥

आपोऽपि, अतः—तेजस एव उत्पद्यन्ते ।
'अग्नेरापः' (तै.उ.आन. 1-2)
'तदपोऽसृजत' (छां.उ. 6-2-3)
[1]इति हि! आह[1] ॥ ११ ॥

[पृथिव्या अपि केवलायाः, अप्सृष्टिशङ्का]

२२८. पृथिवी ॥ २-३-१२ ॥

पृथिवी, अद्भ्यः उत्पद्यते ;
'अद्भ्यः पृथिवी' (तै.उ.आन. 1-1)
'ता अन्नमसृजन्त' (छां. उ. 6-2-4)
इति हि! आह ॥ १२ ॥

वाय्वाद्युत्पत्तिरिति भवति । यदा व्युत्पत्तिभङ्गादिदोषो न भवति ; तदानीम् अपर्यवसानेन ब्रह्माभिधानसम्भवेन लक्षणाप्रसङ्गाभावात्, अभिध्यानलिङ्गस्य तेजःप्रभृतिशब्दानां ब्रह्मपरताव-गमकत्वात, आकाशादिशब्दास्तदवस्थब्रह्मपरा इति आकाशावस्थाद्ब्रह्मण एव वाय्वाद्युत्पत्तिरिति सिध्यति ॥ [फल-फलित्वे] ॥ १२ ॥

[सूत्रार्थः ; आपः—जलान्यपि, अतः—तेजस एव, (उत्पद्यन्ते) तथाहि—तेजस-उत्पत्तिमेव खलु, आह—श्रुतिर्वक्ति ॥]

आपश्च तेजसा सृष्टाः ब्रह्मकार्यं कथं च ताः ।
अग्नेराप इति श्रुत्या निश्चिता इति शङ्कते ॥ (ब्र. प. २२७)

[सूत्रार्थः ; पृथिवी—पृथिवीभूतमपि, अतः—केवलाभ्योऽद्भ्यः, (जायते) तथाहि आह—श्रुतिस्तथैव खलु ब्रवीति ॥]

अद्भ्यश्च पृथिवी जाता तस्मान्न ब्रह्मजा हि सा ।
यदद्भ्यः पृथिवीत्येवं श्रुतिराहेति शङ्कते ॥ (ब्र. प. २२८)

---

[1] इत्याह—आ, इ, घ, वा.

['अन्न' शब्दस्य पृथिव्यभिधायकत्वम्]

ननु—'अन्न' शब्देन, कथं पृथिवी अभिधीयते ? 'अत[1] आह—

२२९. अधिकार-रूप-शब्दान्तरेभ्यः ॥ २–३–१३ ॥

महाभूतसृष्ट्यधिकारात्, पृथिव्येव अन्नशब्देनोक्तेति प्रतीयते। अदनीयस्य सर्वस्य पृथिवीविकारत्वात् कारणे कार्यशब्दः। तथा [2]वाक्यशेषे भूतानां[2] रूपसंशब्दने,

'यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं, तदन्नस्य'

(छां. उ. 6–4–1)

इति अप्तेजसोः सजातीयमेव अन्नशब्दवाच्यं प्रतीयते। शब्दान्तरं च समानप्रकरणे,

'अग्नेरापः। अद्भ्यः पृथिवी।' (तै.उ.आन 1–1)

इति श्रूयते। अतः पृथिव्येव 'अन्न' शब्देनोच्यत इति, अद्भ्य एव पृथिवी जायते।

[सर्वाऽपि ब्रह्मणः सकाशादुत्पत्तिः पारम्परिकैव]

उदाहृताः तेजःप्रभृतयः प्रदर्शनार्थाः। महदा[3]दयोऽपि[3] स्वानन्तरवस्तुन एवोत्पद्यन्ते; यथाश्रुत्यभ्युपगमाविरोधात्।

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥' (मुण्ड.उ. 2–1–3)
'तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते' (मुण्ड.उ. 1–1–9)
'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै.उ आन. 1–1)
'तत्तेजोऽसृजत' (छां उ. 6–2–3)

इत्यादयः, ब्रह्मणः परम्परया कारणत्वेऽपि, उपपद्यन्ते—इति ॥ १३ ॥

अधिकारः—प्रस्तावः। अदनीयस्येति। कारणे कार्योपचार इत्यर्थः ॥ १३ ॥

[सूत्रार्थः ; अधिकारात्—महाभूतसृष्टिप्रस्तावात्, रूपात्—कृष्णरूपात्, शब्दान्तरात्—अन्नशब्दस्थाने पृथिवीशब्दस्य समानप्रकरणे श्रुतेश्च अन्नपदार्थः पृथिव्येव ॥]

ता अन्नमसृजन्तेति पृथिव्याः सृष्टिरुच्यते।
भूताधिकाररूपान्यशब्देभ्योऽन्नं धरेति च॥ (ब्र. प. २२९)

---

[1] तत्र—न. [2] वाक्यशेषभूतानां—द. [3] दयोऽपि हि—इ.

[सिद्धान्तप्रतिपादनम्]

एवं प्राप्ते, प्रचक्ष्महे—

२३०. तदभिध्यानादेव तु तल्लिंगात् सः ॥ २–३–१४ ॥

'तु' शब्दात् पक्षो व्यावृत्तः। महदादिकार्याणामपि, तत्तदनन्तरवस्तुशरीरकः स एव पुरुषोत्तमः कारणम्।

कुतः ? ; तदभिध्यानरूपात् तल्लिङ्गात्। अभिध्यानम्— 'बहु स्याम्' इति सङ्कल्पः।

'तत्तेज ऐक्षत। बहु स्यां प्रजायेयेति (छां. उ. 6–2–3)

'ता आप ऐक्षन्त। बह्वयः स्याम प्रजायेमहि' (छां. उ. 6-2–4)

इति, आत्मनः बहुभवनसङ्कल्परूपेक्षणश्रवणात्, महदहङ्काराकाशादीनामपि कारणानां, तथाविधेक्षापूर्विकैव स्वकार्यसृष्टिरिति गम्यते।

[सृष्टिसङ्कल्पात्मकेक्षणस्य परब्रह्मासाधारणता]

तथाविधं च ईक्षणम्, तत्तच्छरीरकस्य परस्यैव ब्रह्मणः उपपद्यते। श्रूयते च सर्वशरीरकत्वेन सर्वात्मत्वं परस्य ब्रह्मणः, अन्तर्यामिब्राह्मणे—

'यः पृथिव्यां तिष्ठन्' (बृ. उ. 5–7–7) 'योऽप्सु तिष्ठन्' (बृ. उ. 5–7–8)

'यस्तेजसि तिष्ठन्' (बृ.उ. 5–7–18) 'यो वायौ तिष्ठन्' (बृ.उ. 5–7–11)

'य आकाशे तिष्ठन्' (बृ.उ. 5·7–16)

तदभिध्यानम्—बहुभवनविषयाभिध्यानम्। तल्लिङ्गम्—परमात्मलिङ्गम्। तेजःप्रभृतिषु ईक्षणवशात्, सर्वशाखाप्रत्ययन्यायेन महदादीनामपि परमात्मशरीरतया तुल्यन्यायतया तेष्वपि ईक्षापूर्विका सृष्टिरित्यर्थः। श्रूयते चेति। तत्तच्छरीरकस्य परमात्मनः कारणत्वं,

---

[सूत्रार्थः ; तल्लिङ्गात्—अविनाभावतः परमात्मत्वज्ञापकात्, तदभिध्यानात्—तादृशात् सृष्टिविषयकात् सङ्कल्पात्, स तु—परमात्मैव (तत्तच्छरीरकः सन् तत्तदनन्तरस्य सृज्यस्य स्रष्टा ; न तेज आदिरेव ॥]

बहु स्यामिति सङ्कल्पान्निजसृष्ट्यादिलिङ्गतः।
पूर्वपूर्वशरीरः सन् सृजतीशः परं परम् ॥ (ब्र.प. २३०)

इत्यादि । सुबालोपनिषदि च —

'यस्य पृथिवी शरीरम्' (सुबा. उ. 7)

इत्यारभ्य,

'यस्याहङ्कारः शरीरम्' 'यस्य बुद्धिः शरीरम्' यस्याव्यक्तं शरीरम्' (सुब. उ. 7)

इत्यादि ॥ १४ ॥

[श्रुतायाः प्राणादिसृष्टेः पारम्परिकत्वतात्पर्याभावः]

यच्चोक्तम् —

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुण्ड. उ. 2-1-3)

इत्यादिषु श्रूयमाणा ब्रह्मणः प्राणादिसृष्टिः, परम्परयाऽप्युपपद्यते—इति ;

अत्रोच्यते —

२३१. विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १-३-१५ ॥

'तु' शब्दः, अवधारणार्थः । अव्यक्तमहदहङ्काराकाशादिक्रमात् विपर्ययेण, यः सर्वेषां कार्याणां ब्रह्मानन्तर्य[1]रूपः क्रमः[1], 'एतस्माज्जायते प्राणः' इत्यादिषु प्रतीयते ; स च क्रमः, तत्तद्रूपाद्ब्रह्मणः तत्तत्कार्योत्पत्तेरेव उपपद्यते । परम्परया कारणत्वे हि ! आनन्तर्यश्रवणम्[2]उपरुध्येत[2] । अतः 'एतस्माज्जायते' इत्यादिकमपि, सर्वस्य, ब्रह्मणः साक्षा[3]त्सम्भवोत्तम्भनम्[3] ॥ १५ ॥

न केवलम् ईक्षापूर्विकसृष्ट्या गम्यते ; अपि श्रौतमित्यर्थः । **सुबालेति** । महदादीनामपि ईक्षापूर्वकसृष्टिसिद्धये तत्कारणानामपि परमपुरुषशरीरत्वमाह [अनेन] ॥ १४ ॥

अव्यक्तेति । परोक्तक्रमविपर्ययेणेत्यर्थः । **स चेति** । 'एतस्माज्जायते' इत्यत्र ब्रह्मानन्तर्यप्रतीतिः स्वारस्यसिद्धा । एवं वाक्यस्वारस्येन ब्रह्मानन्तर्यरूपक्रमप्रतिपत्तेः ब्रह्मण एव तत्तत्कार्योत्पत्तिरित्यर्थः **उत्तम्भनम्**—ज्ञापकम् ॥ 'एतस्मात्प्राणो जायते' 'एतस्मान्मनो जायते' इति अन्वयाभिप्रायेणैवमुक्तम् ॥ १५ ॥

[सूत्रार्थः ; **अतस्तु**—तत्तद्भूतशरीरकस्य परमात्मन एवोपादानत्वादेव, **विपर्ययेण**—एतस्मादित्युक्तक्रमवैपरीत्येन, **क्रमः**—ब्रह्मानन्तर्यरूपः क्रमः, **उपपद्यते**—सङ्गतो भवति ॥]

आनन्तर्यक्रमादत्र पारम्पर्यविपर्ययात् ।
तत्तच्छरीरात् सृष्ट्यादि ब्रह्मणस्तूपपद्यते ॥ (ब्र. प. २३१)

---

[1] रूपक्रमः—द. [2] उपरुध्यते—इ, ङ, थ. [3] त्सम्भवस्योत्तम्भनम्—च.

२३२. अन्तरा विज्ञान-मनसी क्रमेण तल्लिङ्गादिति चेन्नाऽविशेषात् ॥ २-३-१५ ॥

['एतस्मा'दित्यादेः ब्रह्मणः साक्षात्सम्भवपरत्वोत्तम्भकत्वाभावशङ्का-तत्परिहारौ]

विज्ञानसाधनत्वात्, इन्द्रियाणि विज्ञानमित्युच्यन्ते। यदुक्तम्—'एतस्माज्जायते' इत्यादिना, सर्वस्य, ब्रह्मणोऽनन्तरकार्यत्वं श्राव्यते। अतश्च अनेन वाक्येन, सर्वस्य साक्षाद्ब्रह्मण उत्पत्तिः अभिध्यानलिङ्गावगता [1]उत्तभ्यते[1]—इति। तन्नोपपद्यते; क्रमविशेषपरत्वादस्य वाक्यस्य, अत्रापि सर्वेषां क्रमप्रतीतेः। खादिषु तावत् श्रुत्यन्तरसिद्धः क्रमः, अत्राऽपि प्रतीयते। तैः सहपाठलिङ्गात्, भूत-प्राणयोरन्तराले विज्ञान-मनसी अपि क्रमेणोत्पद्येते इति प्रतीयते। अतः सर्वस्य साक्षाद्ब्रह्मण एव सम्भवस्य [2]उत्तम्भकम्[2] इदं वाक्यं न भवति—इति चेत्!

[3]तन्न[3]; अविशेषात्—'एतस्माज्जायते प्राणः' इत्यनेन अविशेषात्, विज्ञान-मनसोः खादीनां च। 'एतस्माज्जायते' इत्यनेन साक्षात्संभवरूपसम्बन्धस्य अभिधेयस्य, सर्वेषां प्राणादिपृथिव्यन्तानाम् अविशिष्टत्वात्, स एव विधेयः; न क्रमः।

अत्रापीति। न केवलं श्रुत्यन्तरेष्वेवेति भावः। तैः सहेत्यादि। अन्यप्रायन्यायादिति भावः॥

इत्यनेनाविशेषात्—इति वाक्यप्रतिपन्नान्वयाविशेषात्। एतस्मात्–ष्टत्वात्—एतस्मादित्यादिवाक्याभिधेयस्य साक्षात्सम्भवरूपस्य सम्बन्धस्य प्राणादिपृथिव्यन्तानामविशिष्टत्वादित्यर्थः।

[सूत्रार्थः; अन्तरा—प्राणादनन्तरं भूतेभ्यः पूर्वं च अन्तराले, विज्ञान-मनसी—श्रोत्रादीनि मनश्चेतीत्येतानि, क्रमेण—व्यवधानसहेन श्रुत्यन्तरावगतेन ब्रह्मणः पौर्वापर्येण (जायन्ते), तल्लिङ्गात्—अत्राऽपि तथैव तैः सहपाठरूपात् लिङ्गात्, इति चेन्न—एवं शङ्कनमनुचितम्, अविशेषात्—प्राणादिषु ब्रह्माव्यवहितोत्पत्तिवर्णने विशेषाभावात्॥

तन्मात्र-भूतयोर्मध्ये चेन्द्रियाणीति लिङ्गतः।
क्रमोत्पत्तिश्चेति चेन्न साक्षादेवाऽविशेषतः॥ (ब्र प. २३२)

---

[1] उत्तम्भते-आ. उत्तम्भने—इ, द. [2] उत्तम्भनम्—च. [3] न—न.

श्रुत्यन्तरसिद्धक्रमविरोधाच्च, नेदं क्रमपरम् ;

'पृथिव्यप्सु प्रलीयते' (सुबा. उ. 2)

इत्यारभ्य,

'तमः परे देव एकी भवति' (सुबा. उ. 2)

इत्यन्तेन क्रमान्तरप्रतीतेः। अतः अव्यक्तादि[1]शरीरकात्[1] परस्माद् [2]ब्रह्मण एव[2] सर्वकार्याणामुत्पत्तिः। तेजः प्रभृतयश्च शब्दाः तदात्मभूतं ब्रह्मैव अभिदधति ॥ १६ ॥

[सर्वशब्दानां ब्रह्मवाचित्वे व्युत्पत्तिविरोधशङ्कापरिहारः]

नन्वेवं—सर्वशब्दानां ब्रह्मवाचित्वे सति, तैस्तैः शब्दैः तत्तद्वस्तुव्यपदेशः व्युत्पत्तिसिद्धः उपरुध्येत ; तत्राह—

२३३. चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ २-३-१७ ॥

'तु'शब्दः चोदिताशङ्कानिवृत्त्यर्थः। निखिलजङ्गमस्थावरव्यपाश्रयः तत्तच्छब्द-व्यपदेशः, भाक्तः—वाच्यैकदेशे भज्यते-इत्यर्थः। समस्तवस्तुप्रकारिणो ब्रह्मणः, प्रकारभूतवस्तुग्राहिप्रत्यक्षादिप्रमाणाविषयत्वात्, वेदान्तश्रवणात् प्राक् प्रकार्यप्रतीतेः,

---

श्रुत्यन्तरेति। प्राणो हि! वायुकार्यः। स हि स्वस्याऽनन्तरमुत्पन्नः। न भूतेभ्यः प्रागुत्पन्नः इत्यर्थः ॥ १६ ॥

नन्विति। यत्र शब्दस्य वाचकत्वशक्तिः, तत्र व्युत्पत्तिरस्ति। अतः ब्रह्मवाचकत्वेन व्युत्पत्त्यभावात्, न शब्दस्य तद्वाचकत्वशक्तिरित्यर्थः।

समस्तेति। [अनेन सूत्रस्य] हेतुखण्डं विवृण्वन् वाक्यार्थं योजयति। व्युत्पत्त्यभावः

[सूत्रार्थः ; चराः ....श्रयः—जङ्गमस्थावरात्मकवस्त्वभिधेयकः, तद्व्यपदेशः—ब्रह्माभि-धायिशब्दप्रयोगः, भाक्तः स्यात्—वाच्यार्थस्यैकदेशे एव वाच्यत्वबुद्ध्या प्रयुक्तो भवति ; तद्भावभावित्वात्—पूर्णे प्रकारिणि वाच्यत्वबुद्धेः तस्मिन् व्युत्पत्तिप्राप्त्यनन्तरभावित्वात् ॥]

चराचराश्रयाः शब्दा वाचकाः परमात्मनः।
सर्ववस्तुप्रविष्टत्वान्मुख्याः सर्वशरीरिणि ॥ (ब्र. प. २३३)

---

[1] शरीरात् — इ. [2] ब्रह्मणः — द.

प्रकारिप्रतीतिभावभावित्वाच्च तत्पर्यवसानस्य, लोके तत्तद्वस्तुमात्रे वाच्यैकदेशे ते ते शब्दाः, [1]भङ्क्त्वा भङ्क्त्वा[1] व्यपदिश्यन्ते ॥

[सूत्रस्य योजनाभेदेन अर्थबोधनम्]

अथवा—तेजः प्रभृतिभिः शब्दैः तत्तद्वस्तुमात्रवाचितया व्युत्पन्नैः ब्रह्मणो व्यपदेशः भाक्तः स्यात्—अमुख्यः स्यात् इत्याशंक्य, 'चराचर[2]व्यपाश्रयस्तु[2]' [3]इत्युच्यते[3]। चराचरव्यपाश्रयः तद्व्यपदेशः—तद्वाचिशब्दः, चराचरवाचिशब्दः, ब्रह्मणि अभाक्तः—मुख्य एव।

कुतः? ब्रह्मभाव[4]भावित्वात्[4] सर्वशब्दानां वाचकभावस्य। नाम-रूपव्याकरण-श्रुत्या हि! तथाऽवगतम् ॥१७॥

इति तेजोऽधिकरणम् ॥ २ ॥

न वाचकत्वाभावप्रयुक्तः। अपि तु प्रमाणान्तरागोचरत्वप्रयुक्त इति, व्युत्पत्त्यभावस्य अन्यथा-सिद्धिरुक्ता भवति। अस्यां योजनायां, द्वितीययोजनार्थः आर्थः सिध्यति ॥

चराचरव्यपाश्रयस्तद्व्यपदेशः—चराचरमात्रविषयपर्यवसायित्वेन व्युत्पन्नः तद्वाचिशब्दः इत्यर्थः। ब्रह्मभावशब्देन ब्रह्मानुप्रवेशः उच्यते। ब्रह्मणः तत्र भावो हि! अनुप्रवेशः। अस्यां योजनायां—सर्वशब्दानां ब्रह्मवाचित्वे प्रमाणोपन्यासः श्रौतः स्यात्। व्युत्पत्तिशङ्का-विरोधस्तु आर्थः सिध्यति ॥

एवं विशेषणभूतपृथिव्यादिषु क्रमनिर्देशो मुख्यः। ब्रह्मणः तत्तद्वस्तुविशिष्टत्वात् सर्वस्य ब्रह्मप्रसूतत्वश्रवणं मुख्यम्। सर्वतत्त्वानां यावद्द्रव्यसत्ताकविशेषणतया ब्रह्मशरीरत्वं मुख्यम्। अभिध्यानं च अत एव मुख्यम्। अतः सर्वश्रुतिमुख्यत्वं सिद्धान्ते उक्तं भवति ॥ १७ ॥

[सूत्राणि—१. तेजोऽत २. आपः ३. पृथि ४. अधिका ५. तदभिध्या ६. विपर्यये ७. अन्तरा ८. चराचर]

इति तेजोऽधिकरणम् ॥ २ ॥

—o—

---

[1] विभज्य—इ. [2] व्यपाश्रयः—न. [3] इत्याद्युच्यते—अ. [4] भावितत्वात्—न.

(56) आत्माधिकरणम् ॥ २-३-३ ॥

[अधिकरणार्थः—जीवानाम् उत्पत्ति-विनाशराहित्येन नित्यता]

२३४. नाऽऽत्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ २-३-१८ ॥

[अवान्तरसङ्गतिः : अधिकरणे विचारणीयोंऽशश्च]

वियदादेः कृत्स्नस्य, परस्माद् ब्रह्मणः उत्पत्तिरुक्ता ।
इदानीं—[1]जीवस्याऽपि[1] उत्पत्तिरस्ति ? न ?—इति संशय्यते ॥

[पूर्वः पक्षः सयुक्तिकः]

किं युक्तम् ? अस्ति—इति ।

उत्पत्तिरस्ति नेति । वियदादिवत् उत्पत्तिः अस्ति ? नास्ति ?—इति संशय्यते इत्यर्थः । किं जीवः उत्पद्यते ? न ? इति । 'तोयेन जीवान्' इत्यादिश्रुतिः, किम् उत्पत्तिं प्रतिपादयति ? उत भोक्तृत्वानुगुणज्ञानसङ्कोच-विकासम् ? इति । 'न जायते म्रियते' इत्यादिकं, जीवोत्पत्ति-वचनस्य ज्ञानसङ्कोचविकासपरताम् अवगमयति ? न ? इति । किम् अत्र नित्यत्ववचनम्, आकाशामृतत्ववचनवत् गौणम् ? उत मुख्यं ? इति । मुख्यत्वाङ्गीकारे अकृताभ्यागमादिकं प्रसज्यते ? इति । [विचाराः]

यदा न प्रसज्यते ; तदा नित्यत्ववचनस्य गौणतया, 'न जायते' इत्यादेश्च जीवोत्पत्तेर्ज्ञान-विकासरूपतानवगमकत्वात्, तोयेन जीवान्' इत्यादिश्रुतेश्च जीवोत्पत्तिप्रतिपादकत्वात्, जीवः उत्पद्यते इति भवति । यदा तु अकृताभ्यागमादि प्रसज्यते ; तदा नित्यत्ववचनस्य मुख्यत्वात्, 'न जायते' इत्यादिश्रुतेश्च जीवोत्पत्तेः ज्ञानसङ्कोचविकासरूपत्वावगमकत्वात्,

---

[सूत्रार्थः ; **आत्मा**—जीवः, **न**—नोत्पद्यते, **श्रुतेः**—'न जायते' इति श्रुतेः, **ताभ्यः**—श्रुतिभ्य एव, **नित्यत्वाच्च**—नित्यत्वस्यैव 'अजो नित्यः' इति कण्ठोक्तेरपि ॥]

आत्मा नोत्पद्यते श्रुत्या नित्यत्वाच्चेति गम्यते ।
नित्यत्वं चात्मनो नित्यो नित्यानामिति च श्रुतेः ॥ (ब्र. प. २३४)

---

[1] जीवस्य—क, छ.

कुतः ? एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः ; प्राक् सृष्टेः एकत्वावधारणाच्च । वियदादेरिव, जीवस्याप्युत्पत्तिवादिन्यः श्रुतयश्च सन्ति—

'यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्' (तै.ना.उ. 1-1)

'प्रजापतिः प्रजा असृजत' (तै. सं. 2-1-2)

'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः [1]सत्प्रतिष्ठाः[1]' (छां. उ. 6-8-4)

'यतो वा इमानि भूतानि जायन्ते' (तै. भृ. 1-1)

इति । एवं सचेतनस्य जगतः उत्पत्तिवचनात्, जीवस्याऽपि उत्पत्तिः प्रतीयते ॥

[जीव-ब्रह्माभेदतः, जीवनित्यत्वशङ्का-परिहारौ]

न च वाच्यम्—ब्रह्मणो नित्यत्वात्, तत्त्वमस्या[2]दिभिश्च[2] जीवस्य ब्रह्मत्वावगमात्, जीवस्य नित्यत्वम्—इति ;

'ऐतदात्म्यमिदं सर्वम्' (छां. उ. 6-8-7)

'सर्वं खल्विदं ब्रह्म' (छां. उ. 3-14-1)

[3]इत्येवमादिभिः[3], वियदादेरपि ब्रह्मत्वावगमात्, तस्याऽपि नित्यत्वप्रसक्तेः । अतः जीवोऽपि वियदादिवत्, उत्पद्यते—इति ॥

[अधिकरणीयः सिद्धान्तः]

एवं प्राप्ते, अभिधीयते—'नाऽऽत्मा श्रुतेः'—इति । न आत्मा उत्पद्यते ।

कुतः ? श्रुतेः ।

'न जायते म्रियते वा विपश्चित्' (कठ. उ. 2-18)

'ज्ञाज्ञौ [4]द्वावजौ[4]' (श्वे. उ. 1-9)

इत्यादिभिः, जीवस्य उत्पत्तिप्रतिषेधो हि ! श्रूयते । आत्मनो नित्यत्वं च ताभ्यः—श्रुतिभ्य एव, अवगम्यते ।

'तोयेने'त्यादिश्रुतिरपि तादृगुत्पत्तिपरेति, जीवः वियदादिवन्नोत्पद्यते—इति सिध्यति ॥

एकविज्ञानेनेति, श्रुत्यर्थापत्तिमाह ।

आत्मनो नित्यत्वं चेति, श्रुत्यर्थापत्तिमाह । 'ताभ्यः—श्रुतिभ्यः अवगम्यमानात् नित्यत्वाच्च' इति सूत्रार्थः ।

---

[1] सत्प्रतिष्ठिताः—आ. [2] दिभिः—वा. [3] इत्यादिभिः—आ, द. [4] द्वावजावीशानीशौ—वा.

'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'
(श्वे. उ. 6-13)

'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' (कठ. उ. 2-18) इत्यादिभ्यः। अतश्च, न आत्मा उत्पद्यते ॥

[आत्मनो नित्यत्वे एकविज्ञानतः सर्वविज्ञानानुपपत्तिशङ्का-परिहारौ]

कथं तर्हि—एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा उपपद्यते ?

[1]इत्थमुपपद्यते[1] ; जीवस्याऽपि कार्यत्वात् , [2]कार्य-कारणयोः[2] अनन्यत्वाच्च।

एवं तर्हि ! वियदादिवत् उत्पत्तिमत्त्वम् , अङ्गीकृतं स्यात् !

नेत्युच्यते। कार्यत्वं हि ! नाम—एकस्य द्रव्यस्य अवस्थान्तरापत्तिः। तत् जीवस्याऽपि अस्त्येव। इयांस्तु विशेषः—वियदादेः अचेतनस्य यादृशः अन्यथाभावः ; न तादृशः जीवस्य। ज्ञानसङ्कोच-विकासलक्षणः, जीवस्य अन्यथाभावः। वियदादेस्तु, स्वरूपान्यथाभावलक्षणः। सेयं स्वरूपान्यथाभावलक्षणा उत्पत्तिः, जीवे प्रतिषिध्यते ॥

[जीव-वियदादिगतकार्यतास्वरूपवैलक्षण्यादौ नियामकादि]
(तत्त्वत्रयविवेकः)

एतदुक्तं भवति—भोग्य-भोक्तृ-नियन्तॄन् विविक्तस्वभावान् प्रतिपाद्य, भोग्यगतम् उत्पत्त्यादिकं भोक्तरि प्रतिषिध्य, तस्य नित्यतां च [3]प्रतिपाद्य,[3] भोग्यगतम् उत्पत्त्यादिकं भोक्तृगतं च अपुरुषार्थाश्रयत्वं नियन्तरि प्रतिषिध्य, तस्य नित्यत्वं, निरवद्यत्वं, सर्वदा सर्वज्ञत्वं, सत्यसङ्कल्पत्वं, करणाधिपाधिपत्वं, विश्वस्य पतित्वं च प्रतिपाद्य, सर्वावस्थयोश्चिदचितोः तं प्रति शरीरत्वं, तस्य [4]च आत्मत्वं[4] प्रतिपादितम् ॥

कार्यत्वं हि इति। [इदं] चिदचितोरनुयायि कार्यलक्षणम् ; 'जीवस्य कार्यत्वम् , वियदादिवदुत्पत्त्यनङ्गीकारश्च व्याहतौ' इति शङ्कायां [तद्वारणाय]।

भोग्य.... षिध्येति। भोग्यगतमुत्पत्त्यादिकं भोक्तरि प्रतिषिध्यते ; न तु स्वासाधारणमित्यर्थः। करणाधिपाधिपादिशब्दैः, श्रुतयः स्मारिताः। सर्गावस्थयोरिति, घटकश्रुत्यर्थमाह।

---

[1] इत्थम्—द. [2] कारणकार्ययो—थ.द. [3] प्रतिपेद्य—द. [4] आत्मत्वं च—द.

[ब्रह्मण एव कार्यत्व-कारणत्वयोर्विवेकः]

अतः सर्वदा चिदचिद्वस्तु[1]शरीरतया,[1] तत्प्रकारं ब्रह्म । [2]तत् कदाचित्,[2] स्वस्मा[3]द्विभक्त[3]व्यपदेशानर्हातिसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति । तत् कारणावस्थं ब्रह्म । कदाचिच्च विभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरम् । तच्च कार्यावस्थम् ॥

तत्र कारणावस्थस्य कार्यावस्थापत्तौ, अचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य, भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति । [4]चिदंशस्य च[4] कर्मफलविशेषभोक्तृत्वाय, तदनुरूपज्ञानविकासरूपविकारो भवति । उभयप्रकारविशिष्टे नियन्त्रंशे, [5]तदवस्थ[5]तदुभयविशिष्टतारूपविकारो भवति ।

[ब्रह्मणः कार्यत्वप्रकारविवेचनम्]

कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः, प्रकारद्वये प्रकारिणि च समानः । अत एव, एकस्य अवस्थान्तरापत्तिरूपविकारापेक्षया,

'येनाऽश्रुतं श्रुतम्' (छां.उ. 6-1-3)

इति, एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय, मृदादिदृष्टान्तः,

'यथा सोम्यैकेन' (छां. उ. 6-1-4)

इत्यादिना निदर्शितः ॥

अतः सर्वदेति, आकृत्यधिकरणन्यायं स्मारयति ।

भोग्यत्वायेति, अचितः स्वरूपान्यथाभावरूपपरिणामित्वे हेतुमाह । **भोक्तृत्वायेति,** चितः ज्ञानसङ्कोच-विकासरूपकार्यत्वे हेतुमाह । **उभयेति,** परमात्मनः तत्तदवस्थचिदचिन्नियमनरूपविकारास्पदत्वम् ।

अत एवेति । यथा मृत्पिण्डदृष्टान्ते पार्थिवत्वाचेतनत्वादिकं नाऽपेक्षितम् ; तथा चिदचिद्विशिष्टत्वं स्वरूपान्यथाभावलक्षणविकाराभावं च ब्रह्मणि न बाधते, मृत्पिण्ड-लोहमण्यादिदृष्टान्तः । अपि तु—अनेकविशेषणविशिष्टैकद्रव्यावस्थान्तरयोगमात्रे स दृष्टान्तः ; रूपादिमत्त्वात् मृत्पिण्डादेः इत्यर्थः ॥

---

[1] तया—च. ठ. [2] कदाचित्—घ. न. [3] द्विभक्तस्य—द. [4] चिदंशस्य—थ. [5] तत्तदवस्थ—वा.

[उत्पत्त्यनुत्पत्त्यादिपरश्रुतिविषयविभागः]

ईदृशज्ञानसङ्कोच-विकासकरतत्तद्देहसम्बन्धवियोगाभिप्रायाः, जीवस्य उत्पत्ति-मरणवादिन्यः,

'प्रजापतिः प्रजा असृजत' (तै. सं. 2-1-2)

इत्याद्याः श्रुतयः। अचिदंशवत् स्वरूपान्यथात्वाभावाभिप्रायाः, उत्पत्तिप्रतिषेधवादिन्यः नित्यत्ववादिन्यश्च,

'न जायते म्रियते[1]' (कठ. उ. 2-18)

इत्याद्याः;

'नित्यो नित्यानाम्' (श्वे. उ. 6-13)

इत्याद्याश्च श्रुतयः। स्वरूपान्यथात्व-ज्ञानसङ्कोचविकासरूपोभय[2]विधानिष्टविकाराभावाभिप्रायाः,[2]

'सवा एष महानज आत्माऽजरोऽमरोऽमृतो ब्रह्म' (बृ. उ. 6-4-25)

'नित्यो नित्यानाम्' (श्वे. उ. 6-13)

इत्याद्याः [3]परविषयाः श्रुतयः[3]।

[सदा विशिष्टस्याऽपि ब्रह्मणः, प्राक् सृष्टेरेकत्वोपपत्तिः]

एवं सर्वदा चिदचिद्वस्तुविशिष्टस्य ब्रह्मणः, प्राक् सृष्टेः एकत्वावधारणं च, नाम-रूप-विभागाभावात् उपपद्यते।

'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' (बृ. उ. 3-4-7)

इति हि! नामरूपविभागभावाभावाभ्यां नानात्वैकत्वे 'वदति[4]'—इति ॥

[अद्वैतप्रकारत्रयेऽपि एकत्वावधारणनिर्वाहस्य अविशिष्टता]

१) येतु—अविद्योपाधिकं जीवत्वं वदन्ति; २) ये च—पारमार्थिकोपाधि-कृतम्; ३) ये च—सन्मात्रस्वरूपं ब्रह्म, स्वयमेव भोक्तृ-भोग्य-नियन्तृरूपेण [5]त्रिधा[5]ऽव-स्थितं—वदन्ति; सर्वेऽप्येते, [6]अविद्याशक्तेः, उपाधिशक्तेः[6], भोक्तृ-भोग्य-नियन्तृ-

---

अनिष्टविकारेति, 'अनिष्ट'शब्देन 'सोऽकामयत बहुस्याम्' इत्याद्युक्तेष्टविकाराः व्यावृत्ताः। एवमिति। सर्वदा चिदचिद्विशिष्टं ब्रह्म चेत्! कथमेकत्वावधारणमिति(प्रश्ने), श्रुत्या नामरूप-विभागतदभावाभ्यां, नानात्वैकत्ववचनादित्यर्थः ॥

---

[1] म्रियते वा कदाचित्—थ. [2] विकाराभिप्रायः—द. [3] श्रुतयः—द. [4] वदन्ति—अ. च वदन्ति—न. [5] त्रिविधा—इ. [6] अविद्याशक्तेः—थ.

शक्तीनां च प्रलयकाले [1]अवस्थानेऽपि,[1] तदानीम् एकत्वावधारणम्, नाम-रूप-विभागाभावादेव उपपादयन्ति ।

'वैषम्य-नैर्घृण्ये न सापेक्षत्वात्' (ब्र. सू. 2-1-34)

'न कर्माऽविभागादिति चेन्नानादित्वादुपपद्यते चाऽप्युपलभ्यते च' (ब्र. सू. 2-1-35)

इति सूत्राभ्यां, जीवभेदस्य तत्कर्मप्रवाहस्य च अनादित्वाभ्युपगमाच्च ॥

[विशिष्टाद्वैतिनां त्रिविधाद्वैतिनां च विशेषः]

इयान् विशेषः—१) एकस्य, अनाद्यविद्यया ब्रह्म स्वयमेव मुह्यति । २) अन्यस्य, पारमार्थिकानाद्युपाधिना [2]ब्रह्म स्वयमेव[2] बध्यते; उपाधि-ब्रह्मव्यतिरिक्तवस्त्वन्तराभावात् । ३) अपरस्य, ब्रह्मैव विचित्राकारेण परिणमते; कर्मफलानि च अनिष्टानि भुङ्क्ते । नियन्त्रंशस्य भोक्तृत्वाभावेऽपि, सर्वज्ञत्वात् स्वस्मादभिन्नं भोक्तारम् अनुसन्दधातीति, स्वयमेव भुङ्क्ते ।

अस्माकं तु—स्थूल-सूक्ष्मावस्थचिदचिद्वस्तुशरीरं ब्रह्म, कार्य-कारणोभयावस्थावस्थितमपि, सर्वदा निरस्तनिखिलदोष[3]गन्धं, सत्यसङ्कल्प[3]त्वाद्यपरिमितोदारगुणसागरम् अवतिष्ठते । प्रकारभूतचिदचिद्वस्तुगताः, अपुरुषार्थाः स्वरूपान्यथा[4]भावाश्च[4]—इति सर्वं समञ्जसम् ॥ १८ ॥

इति आत्माधिकरणम् ॥ ३ ॥

येत्विति । 'सूत्रोक्तत्वात्, परैरपि तदभ्युपगमात्' इति हेतुद्वयमुक्तं भवति ॥

[सर्वं समञ्जसमिति । जीव-ब्रह्माद्वैतपक्षेषु च इदमधिकरणं व्यर्थम्; ब्रह्मणः उत्पद्यमानत्वस्य अनाशङ्क्यत्वात्, 'असम्भवस्तु सतः' इति सूत्रसिद्धत्वाच्च । 'अविद्यादिविशिष्टाकारेणाऽपि अनुत्पन्नत्वं स्थाप्यते'—इत्येतदशक्यम्; अन्तःकरणादिरूपोपाधेः, जीवात्मना परिणामस्य च कादाचित्कतया विशिष्टे अनुत्पन्नत्वायोगात् । अतः तन्मते सर्वम् असमञ्जसम् इत्याशयः (भा.द.)] ॥ १८ ॥

इति आत्माधिकरणम् ॥ ३ ॥

—o—

---

[1] अवस्थाने—द. [2] ब्रह्मस्वरूपमेव—च. ब्रह्मरूपमेव—च. [3] गन्धसत्यसङ्कल्प—द.
[4] भावश्च—वा.

(57) ज्ञाधिकरणम् ॥ २-३-४ ॥ (सू. 19-32)

[अधिकरणार्थः—ज्ञानाश्रयत्वस्य जीवस्वरूपतानिरूपणम्]

२३५. ज्ञोऽत एव ॥ २-३-१९ ॥

[अवान्तरसङ्गतिः, अधिकरणीयः संशयश्च]

वियदादिवत्, जीवो नोत्पद्यते—इत्युक्तम्। तत्प्रसङ्गेन जीवस्वरूपं निरूप्यते। किं सुगत-कपिलाभिमतचिन्मात्रमेव, आत्मनः स्वरूपम्? उत कणभुगभिमत-पाषाणकल्पस्वरूपम् [1]अचित्स्वभाव[1]मेव [2]आगन्तुक[2]चैतन्यगुणकम्? अथ ज्ञातृत्वमेव अस्य स्वरूपम्? —इति ॥

वियदिति। जीवस्वरूपस्य कार्यताप्रकारनिरूपणाभावात्, न पादेन साक्षात्सङ्गतिः। अतो वक्ष्यमाणाधिकरणचतुष्टयस्य प्रसङ्गात् सङ्गतिरित्यर्थः।

किमिति। किं जीवः चैतन्यमात्रवपुः? उत जडस्वरूप एव आगन्तुकचैतन्यः? उत स्वतो ज्ञाता?—इति। किं ज्ञानमात्रवपुष्ट्वे ज्ञानस्वरूपत्व-तद्धर्मकत्वपरसर्वश्रुतिसामञ्जस्यम्? उत आगन्तुकचैतन्यजडस्वरूपत्वे? उत स्वतो ज्ञातृत्वैकस्वरूपत्वे?—इति। ज्ञातृत्वस्य स्वरूपत्वे सर्वत्र उपलब्धिः प्रसज्यते? न? इति। तदर्थं किं जीवः सर्वगतः? उत अणुः? इति। अणुत्वे विप्रकृष्टार्थग्रहणाग्रहणे संभवतः? न? इति। एकजातीयद्रव्ययोः नियतधर्म-धर्मिभावः उपपद्यते? न? इति। [विचाराः]

यदा नोपपद्यते; तदा विप्रकृष्टार्थग्रहणासंभवेन, सर्वगतत्वात् सर्वत्रोपलब्धिप्रसङ्गेन, ज्ञातृत्वस्य स्वरूपत्वे सर्वश्रुतिसामञ्जस्याभावात्, पक्षान्तरयोरन्यतरम् स्वीकार्यं स्यात्। यदा उपपद्यते; तदा विप्रकृष्टार्थग्रहणाग्रहणसंभवेन अणुत्वे सिद्धे, सर्वत्रोपलम्भाप्रसङ्गात्, सर्वश्रुतिसामञ्जस्येन ज्ञातृत्वस्वरूप आत्मेति सिध्यति ॥ [इति फल-फलिभावः]

चिन्मात्रमिति, भावप्रधाननिर्देशः, ज्ञानत्वमित्यर्थः। मात्रचा ज्ञातृत्वादिव्यावृत्तिः। **ज्ञातृत्वम्**—स्वस्य परस्य च अवभासप्रतिसम्बन्धित्वम्। ज्ञातृत्वम्—अहंत्वमित्यर्थः। **स्वरूपम्**—स्वाभाविकाकारः।

[सूत्रार्थः; आत्मा—चेतनः, **ज्ञ एव**—अविनाभूतज्ञानधर्मक एव, **अतः**—'जानात्येवायं पुरुष' इत्युक्तत्वात् ॥]

> ज्ञानस्वरूपो ज्ञाता च ज्ञानमात्मेति निश्चितम्।
> पश्यन् स रमते ज्ञानघन इत्यादितः श्रुतेः ॥ (ब्र. प. २३५)

---

[1] अचित्स्वरूप—इ, घ, वा. अचिद्भाव—आ. [2] आगन्तुकं—इ, घ, वा.

[युक्तिसहितः पूर्वः पक्षः, चेतनस्य ज्ञानमात्रस्वरूपता]

किं युक्तम्? चिन्मात्रमिति।

कुतः? तथा श्रुतेः। अन्तर्यामि[1]ब्राह्मणे हि[1]।

'य आत्मनि तिष्ठन्' (बृ. उ. मा. पा. 5–7–26)

इति माध्यन्दिनीय[2]पर्यायस्य स्थाने[2],

'यो विज्ञाने तिष्ठन्' (बृ. उ. 5–7–26)

इति काण्वा [3]अधीयते। तथा[3],

'विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च' (तै. उ. आन. 5–1)

इति, कर्तुरात्मनः, विज्ञानमेव स्वरूपं श्रूयते। स्मृतिषु च,

'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः' (वि. पु. 1–2–6)

इत्यादिषु, आत्मनः ज्ञानस्वरूपत्वं प्रतीयते।

अपरस्तु—जीवात्मनः [4]ज्ञानत्वे ज्ञातृत्वे[4] च स्वाभाविके अभ्युपगम्यमाने, तस्य सर्वगतस्य सर्वदा सर्वत्रोपलब्धिप्रसङ्गात्, करणानां च वैयर्थ्यात्, सुषुप्ति-मूर्च्छादिषु सतोऽप्यात्मनः चैतन्यानुपलब्धेः, [5]जाग्रतः सामग्र्यां[5] सत्यां ज्ञानोत्पत्तिदर्शनात्, अस्य न ज्ञानं स्वरूपम्; नाऽपि ज्ञातृत्वम्। आगन्तुक[6]मेव[6] चैतन्यम्।

सर्वगतत्वं चाऽऽत्मनः, अवश्याभ्युपेत्यम्; सर्वत्र कार्योपलब्धेः, सर्वत्र आत्मनः संनिधानाभ्युगमात्। शरीरगमनेनैव [7]कार्यसंभवे सति[7], गतिकल्पनायां प्रमाणाभावाच्च। श्रुतिरपि सुषुप्तिवेलायां ज्ञानाभावं दर्शयति;

अपरस्तु — कणादमतानुसारीत्यर्थः।

सर्वत्र कार्योपलब्धेः—बुद्धिसुखदुःखाद्युपलब्धेः। देशान्तरे भोग्यवस्तूत्पत्तिश्च विभुत्वहेतुः। तदुत्पत्तिः अदृष्टसम्बन्धादेव भवति। निराश्रयस्य धर्मादेः तत्र सम्बन्धोऽनुपपन्न इति, विभुत्वमभ्युपेत्यम्। गति....भावाच्चेति। गतिकल्पनपक्षे अणुत्वं गतिश्चोभयं कल्प्यम्; इतरपक्षे विभुत्वमेव कल्प्यमिति, कल्पनालाघवात् विभुत्वमेवोपपन्नमिति, विभुत्वसम्भवात् अनन्यथासिद्धं गतेः कल्पकं नाऽस्तीति भावः॥

---

[1] ब्राह्मणेऽपि—इ. [2] पर्यायस्थाने—द. [3] अधीयन्ते—इ. [4] ज्ञातृत्वे—थ.
[5] जाग्रत्सामग्र्यां—न. [6] मेव तु—वा. [7] कार्यसम्भवे—द.

''[1]नाऽह[1] खल्वयमेवं संप्रत्यात्मानं [2]जानात्यय[2]महस्मीति, नो एवेमानि भूतानि' (छां. उ. 8-11-1)

इति। तथा मोक्षदशायां ज्ञानाभावं दर्शयति ;

'न प्रेत्य संज्ञाऽस्ति' (बृ. उ. 4-4-12)

इति। 'ज्ञानस्वरूपम्' इत्यादिप्रयोगस्तु, ज्ञानस्य तदसाधारणगुणत्वेन लाक्षणिकः—इति॥

[सिद्धान्तप्रदर्शनम् ; तत्र चेतनस्य ज्ञातृत्वस्वरूपता]

[3]एवं प्राप्ते[3], प्रचक्ष्महे—'ज्ञोत एव'—। ज्ञ एव—अयमात्मा ज्ञातृत्वस्वरूप एव ; न ज्ञानमात्रम्, नाऽपि जडस्वरूपः।

कुतः? अत एव—श्रुतेरेवेत्यर्थः। 'नाऽऽत्मा श्रुतेः' (ब्र. सू. 2-3-18) इति प्रकृता श्रुतिः, 'अतः' [4]शब्देन[4] परामृश्यते। तथा छान्दोग्ये प्रजापतिवाक्ये, [5]मुक्तामुक्तात्म[5]स्वरूपकथने—

'अथ यो वेदेदं जिघ्राणीति स आत्मा' (छां. उ. 8-12-4)

'[6]मनसैवैतान्[6] कामान् पश्यन् रमते, य एते ब्रह्मलोके' (छां. उ. 8-12-5)

'सत्यकामः सत्यसङ्कल्पः' (छां. उ. 8-1-5)

'नोपजनं स्मरन्निदं शरीरम्' (छां. 8-12-3)

अन्यत्राऽपि—

'न पश्यो मृत्युं पश्यति' (छां. उ. 7-26-2)

तथा वाजसनेयके—

'कतम आत्मा?' (बृ. उ. 6-3-7)

इति पृष्ट्वा,

'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' (बृ. उ. 6-3-7)

अतः शब्देनेति। श्रुतिव्यक्तिभेदेऽपि 'अतः'शब्दः अर्थवशादपेक्षितं वाक्यविशेषमुपस्थापयति। एतच्छब्दः प्रकृतजातीयपरामर्शीत्यर्थः॥

मनसैवेति। 'मनसैतान् कामान् पश्यन् रमते' 'न पश्यो मृत्युं पश्यति' इत्यादयः,

---

[1] नाऽहं—इ, ग, ठ. [2] जानाम्यय—इ, ग, ठ. [3] प्राप्ते—इ, [4] इति शब्देन—च.
[5] मुक्तात्म—थ, द. [6] मनसा तान्—द.

इति । तथा,

'विज्ञातारमरे केन विजानीयात् ?' (बृ. उ. 6-5-15)

'जानात्येवायं पुरुषः' (?)

तथा,

'एष हि! द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' (प्रश्न. उ. 4-9)

'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः' (प्रश्न. उ. 6-5)

इति ॥ १९ ॥

[आत्मनो विभुत्वे समुन्मिषतो दोषस्य अणुत्वतो निरासः]

यत्तूक्तम्—ज्ञातृत्वे स्वाभाविके सति, सर्वगतस्य [1]तस्य, सर्वदा[1] सर्वत्रोपलब्धिः [2]प्रसज्येत[2]—इति ;

[3]तत्रोच्यते[3]—

२३६. उत्क्रान्ति-गत्यागतीनाम् ॥ २-३-२० ॥

न अयं सर्वगतः ; अपि तु अणुरेव अयमात्मा ।

कुतः ? उत्क्रान्ति-गत्यागतीनां श्रुतेः । उत्क्रान्तिस्तावत् श्रूयते—

'तेन प्रद्योतेनैष आत्मा निष्क्रामति, चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः' (बृ. उ. 6-4-2)

मुक्तात्मविषयाः । 'अन्योऽन्तर आत्मा विज्ञानमयः' 'न विज्ञातुर्विज्ञातेर्विपरिलोपः' इत्याद्यनुसन्धेयम् ॥ १९ ॥

[सूत्रार्थः ; आत्मा—जीवः, अणुः—अणुपरिमाण एव ; न विभुः, उत्क्रान्ति-गति-आगतीनां श्रुतेः—'आत्मा निष्क्रामति' इति उत्क्रमणस्य, 'सर्वे गच्छन्ति' इति गमनस्य, 'पुनरेति' इति आगमनस्य च श्रुतितोऽवगमात् ॥]

उत्क्रान्तिवचनाच्चैव गतेरपि च कीर्तनात् ।
आगतेश्चाऽपि वचनादात्माऽणुरिति कथ्यते ॥ (ब्र. प. २३६)

---

[1] तस्य—न. [2] प्रसज्यते—च. [3] अत्रोच्यते—थ. द.

इति। गतिरपि—

'ये वै के चाऽस्माल्लोकात् प्रयन्ति ; चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौषी.उ. 1-9)

इति। आगतिरपि—

'तस्माल्लोकात् 'पुनरेत्यस्मै[1] लोकाय कर्मणे' (बृ. उ. 6-4-6)

इति। विभुत्वे हि !, एताः उत्क्रान्त्यादयः, नोपपद्येरन् ॥ २० ॥

[आत्मनो विभुत्वे, गत्यागत्योः सर्वथा असंभवः]

२३७. स्वात्मना चोत्तरयोः ॥ २-३-२१ ॥

'च' शब्दः अवधारणे। [2]यद्यपि[2] शरीरवियोगरूपत्वेन उत्क्रान्तिः, [3]स्थिरस्याऽऽत्मनः[3] कथंचिदुपपद्यते ; गत्यागती तु, न कथंचित् उपपद्येते। अतः ते स्वात्मनैव सम्पाद्ये ॥ २१ ॥

[श्रुतौ महत्त्वोक्तेः जीवविषयकत्वभ्रान्तिकृताणुत्वविरोधपरिहारः]

२३८. नाऽणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥२-३-२२॥

'योऽयं विज्ञानमयः प्राणेषु' (बृ. उ. 6-3-7)

ये वै के चेति। 'उत्क्रान्ति' शब्दानन्तरगतिशब्दः, उत्क्रान्त्यनन्तरभाविगतिपरः इति भावः। अस्मिन् सूत्रे श्रुत्यर्थापत्तिर्दर्शिता ॥ २० ॥

कथंचिच्छब्देन तत्राऽपि अस्वारस्यं सूचितम्। अणुत्व-गत्योः उभयोरपि कल्प्यत्वात्, परेण कल्पनागौरवमुक्तम्। तत्र गमनस्य श्रुतिसिद्धत्वेन कल्प्यत्वं नास्ति ॥ २१ ॥

[सूत्रार्थः ; **उत्तरयोः**—उत्क्रान्तेः पश्चाच्छ्रुतयोः, **स्वात्मना च**—आत्मना स्वेनैव निर्वाह्यत्वात्, नैव विभुरात्मा ॥]

गत्यागत्योः स्वात्मनैव सम्पाद्यत्वादिहाऽऽत्मनः।
अणुत्वं निश्चितमिति शङ्का नैवाऽऽत्र युज्यते ॥ (ब्र. प. २३८)

[सूत्रार्थः ; **आत्मा**—जीवः, **न अणुः**—अणुत्वपरिमितो न भवति, **अतच्छ्रुतेः**—अणुत्वेतरस्य महत्वस्य 'महानज आत्मा' इति श्रुत्या उक्तत्वात्, **इति चेत्**, **न**—एवं शङ्का नोचिता, **इतराधिकारात्**—महत्वोक्तौ परमात्मनः प्रस्तावात् ॥]

आत्मा महानिति श्रुत्या नाऽणुरात्मेति चेच्छ्रुतिः।
परमात्मपरा सेति जीवोऽणुरिति निश्चितम् ॥ (ब्र. प. ३८)

---

[1] पुनरेत्यास्मै—न. [2] यदपि—आ. [3] स्थितस्याप्यात्मनः—च स्थितस्यात्मनः—द.

इति जीवं प्रस्तुत्य,

'सवा एष महानज आत्मा' (बृ. उ. 6-4-22)

इति महत्त्वश्रुतेः, न अणुर्जीवः— इति चेत्!

न ; इतराधिकारात्—जीवादितरस्य प्राज्ञस्य तत्राऽधिकारात्। यद्यपि उपक्रमे जीवः प्रस्तुतः ; तथाऽपि,

'यस्याऽनुवित्तः प्रतिबुद्ध आत्मा' (बृ. उ. 6-4-13)

इति मध्ये परः प्रतिपाद्यते—इति, तत्सम्बन्धि इदं महत्त्वम् ; न जीवस्य ॥ २२ ॥

[आत्मनः अणुत्वस्य श्रौतता]

२३९. स्वशब्दोन्मानाभ्यां च ॥ २-३-२३ ॥

साक्षात् 'अणु' शब्द एव श्रूयते—

'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश'

(मुण्ड. उ. 3-1-9)

इति। उद्धृत्य मानम्—उन्मानम्। अणुसदृशं वस्तु उद्धृत्य, तन्मानत्वं जीवस्य श्रूयते—

'बालाग्रशतभागस्य शतधा कल्पितस्य च।

भागो जीवः स [1]विज्ञेयः[1]' (श्वे. उ. 5-9)

इति ;

'आराग्रमात्रो ह्यवरोऽपि दृष्टः' (श्वे. उ. 5-8)

अधिकारः—प्रस्तावः। यस्य—जीवस्य। अनुवित्तः—उपास्यः। प्रतिबुद्ध आत्मा—प्राज्ञ आत्मा ॥ २२ ॥

स्वशब्दः—'अणु'शब्दः ; न तु अणुत्वाक्षेपकशब्द इति भावः। अणुत्वं गतिश्च उभयं श्रौतम्। अतो न कल्पनागौरवम्। उत्क्रान्तीत्यादिना श्रुत्यर्थापत्तिः, स्वशब्देति श्रुतिश्च दर्शिता। 'बुद्धेरात्मा महान्' इत्यत्र महच्छब्दः प्राधान्यपरः।

[सूत्रार्थः ; स्वशब्दतः—'अणुरात्मा' इति अणुशब्दतः, उन्मानतः—'आराग्रमात्रः' इति अणूपमानभूतस्य दृष्टान्ततया उद्धरणतः तन्मानोक्तेश्च आत्मा अणुः ॥]

अणुरात्मेति वचनादणुत्वं चाऽऽत्मनो भवेत्।
आराग्रमात्रो ह्यवर इत्युन्मानाच्च निश्चितम् ॥ (ब्र. प. २३९)

---

[1] विज्ञेयः स चाऽऽनन्त्याय कल्पते—वा.

इति च। अतः अणुरेव अयमात्मा ॥ २३ ॥

[अणुत्वे सर्वावयवावच्छेदेन वेदनानुपपत्ति-तत्परिहारौ]

अथ स्यात्—आत्मनः अणुत्वे, सकलशरीरव्यापिनी वेदना नोपपद्यते—इति ; तत्र मतान्तरेण परिहारमाह—

२४०. अविरोधश्चन्दनवत् ॥ २-३-२४ ॥

यथा हरिचन्दनबिन्दुः देहैकदेशवर्त्यपि, सकलदेहव्यापिनम् आह्लादं जनयति ; तद्वत् आत्माऽपि देहैकदेशवर्ती, सकल[1]देशवर्तिनीं[1] वेदनामनुभवति ॥ २४ ॥

[अणोरात्मनः चन्दनबिन्दुदृष्टान्तासाङ्गत्य— तत्समाधाने]

२४१. अवस्थितिवैशेष्यादिति चेन्नाऽभ्युपगमाद्धृदि हि ॥२-३-२५॥

हरिचन्दनबिन्द्वादेः, देहदेशविशेषावस्थितिविशेषात् तथाभावः। आत्मनस्तु तन्न विद्यते—इति चेत्! न ; आत्मनोऽपि देहदेश[2]विशेषे[2] स्थित्यभ्युपगमात्। हृदय-देशे हि! आत्मनः स्थितिः श्रूयते—

वेदना—दुःखानुभवः। उपलक्षणमिदं सुखानुभवस्याऽपि।

'वेदनामनुभवति' इति 'ओदनपाकं पचति' इतिवत्। यद्वा दुःखमनुभवति इत्यर्थः ॥ २४ ॥

[सूत्रार्थः ; **चन्दनवत्**—देहैकदेशस्थेऽपि चन्दने सर्वाङ्गीणसुखकरत्वमस्येव, **अविरोधः**—आत्मनोऽपि सकलदेहव्यापिसुखादिभागित्वाविरोधः ॥]

अणुत्वेऽप्यात्मनो देहे सर्वत्र सुखभागिता।
एकदेशस्थितस्याऽपि चन्दनस्येव युज्यते ॥ (ब्र. प. २४०)

[सूत्रार्थः ; **अवस्थित्योः**—आत्म-हरिचन्दनगतयोः देहैकदेशावस्थानयोः, **वैशेष्यात्**—वैषम्यात् (साम्योक्तिर्न घटते) **इति चेत्! न**—एवं शङ्का नोचिता ; **हृदि हि**—'हृदि ह्ययमात्मा' इति, **अभ्युपगमात्**—जीवस्य स्थानविशेषावस्थितेः स्वीकारात् ॥]

अवस्थितेस्तु वैशेष्याच्चन्दनं तु तथा भवेत्।
इति चेन्नाऽऽत्मनोऽपि स्वे हृदये स्थितिरुच्यते ॥ (ब्र. प. २४१)

---

[1] देहव्यापिनीं—श्रा, वा. [2] विशेषेण—श्रा. द.

'हृदि ह्ययमात्मा तत्रैकशतं नाडीनाम्' (प्रश्न. उ. 3-6)

इति । तथा,

'कतम आत्मा ?' (बृ. उ. 6-3-7)

इति प्रकृत्य,

'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः' (बृ. उ. 6-3-7)

इति, [1]आत्मनः देश[1]विशेषस्थितिख्यापनाय, चन्दनदृष्टान्तः प्रदर्शितः ; न तु चन्दनस्य देशविशेषापेक्षा ॥ २५ ॥

[अस्मिन् विषये सूत्रकृतः स्वाभिप्रायप्रकटनम्]

एकदेशवर्तिनः सकलदेहव्यापिकार्यकरत्वप्रकारं, स्वमतेनाऽऽह—

२४२. गुणाद्वाऽऽलोकवत् ॥ २-३-२६ ॥

'वा' शब्दः मतान्तरव्यावृत्त्यर्थः । आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्य अवस्थितः ; आलोकवत् । यथा मणि द्युमणिप्रभृतीनाम् एकदेशवर्तिनाम् आलोकः, अनेकदेशव्यापी दृश्यते ; तद्वत् हृदयस्थस्यात्मनः ज्ञानं सकलदेहं व्याप्य [2]वर्तते[2] ।

तत्रैकशतमिति । अनेन एकदेशस्थस्य सकलशरीरव्यापिकार्यकरत्वप्रकारो दर्शितः । न तु चन्दनस्येति, 'हरिचन्दनस्य हृन्नासिकानयनश्रोत्रादिमर्मप्रदेशेषु स्थित्या कार्यकरत्वम् ; न तु हृन्मात्रे' इत्यभिप्रायेणोक्तम् ॥ २५ ॥

स्वमतेनेति । यद्यपि, एकस्मिन्नवयविनि देशविशेषस्थित्या सर्वत्र कार्यकरत्वम् ; तथापि, सौभर्यादीनां बहुषु देहावयविषु, अणोरात्मनः देशविशेषस्थित्या कार्यकरत्वं न सिध्यती-

---

[सूत्रार्थः ; आलोकवत्—सूर्यादीनां प्रकाशवत्, गुणाद्वा—स्वधर्मभूतात् ज्ञानरूपगुणादेव व्यापनस्वभावात्, आत्मा सर्वदेहव्याप्तिमान् भवति ॥]

आत्मा तु स्वगुणाज्ज्ञानाद्देहं व्याप्य सुखं भजेत् ।
आलोकादेव मण्यादिः कृत्स्नं व्याप्य प्रकाशयेत् ॥ (ब्र. प. २४२)

---

[1] आत्मनो हि देह देश—इ. न. आत्मनोऽपि हि देह देश—आ द. आत्मनोऽपि देश—ङ.
[2] आवर्तते—इ. न. वा.

ज्ञातुः प्रभास्थानीयस्य ज्ञानस्य, स्वाश्रयादन्यत्र वृत्तिः, मणिप्रभावदुपपद्यते—इति प्रथमसूत्रे स्थापितम् ॥ २६ ॥

[ज्ञानरूपस्याप्यात्मनः स्वातिरिक्तज्ञानगुणकत्वोपपत्तिः]

ननूक्तं—[1]ज्ञान[1]मात्रमेव आत्मेति । तत् कथं ज्ञानस्य स्वरूपव्यतिरिक्तगुणत्वमुच्यते ? तत्राऽऽह—

२४३. व्यतिरेको गन्धवत् तथा च दर्शयति ॥ २-३-२७ ॥

यथा पृथिव्याः [2]गन्धस्य[2] गुणत्वेनोपलभ्यमानस्य, ततो व्यतिरेकः, तथा 'जानामि' इति ज्ञातुर्गुणत्वेन प्रतीयमानस्य ज्ञानस्य आत्मनो व्यतिरेकः सिद्धः । दर्शयति [3]च श्रुतिः[3]—

'जानात्येवाऽयं पुरुषः' (?)

इति ॥ २७ ॥

[ज्ञान-तदाश्रययोः श्रुतिकण्ठोक्तिः]

२४४. पृथगुपदेशात् ॥ २-३-२८ ॥

स्वशब्देनैव, विज्ञानं विज्ञातुः पृथगुपदिश्यते—

त्यभिप्रायेण निर्वाहान्तरोक्तिरिति भावः । प्रभेति । [अतः] अयुतसिद्धविशेषणस्याऽपि देशान्तरे वृत्तिः ॥ २६ ॥

पृथगिति । पूर्वसूत्रे 'सुरभि कुसुमम्' इतिवत् विशिष्टवाचिना शब्देन, विशेष्यात्

[सूत्रार्थः ; व्यतिरेकः—धर्मभूते ज्ञाने धर्मिण आत्मनो भेदः, गन्धवत्—पृथिव्याः गन्धे इव ; तथा च—तमेव भेदम्, दर्शयति—श्रुतिः स्फुटयति 'जानात्येवायम्' इति ॥]

जानामीति प्रतीत्यैव ज्ञानं ज्ञातुः पृथग् भवेत् ।
गन्धवत्याः पृथिव्यास्तु यथागन्धस्तथा श्रुतेः ॥ (ब्र. प. २४३)

[सूत्रार्थः ; पृथक्—ज्ञान-ज्ञात्रोः पार्थक्येन, उपदेशात्—श्रुतौ 'विज्ञातुः विज्ञातेः' इति पदाभ्यां ज्ञापनात्, ज्ञानगुणक एवाऽऽत्मा ॥]

विज्ञातुर्न हि विज्ञातेरिति श्रुत्याऽत्र चाऽऽत्मनः ।
पृथज्ज्ञानस्य वचनाद् ज्ञानं तस्मात् पृथग्भवेत् ॥ (ब्र. प. २४४)

---

[1] विज्ञान—इ. न. [2] तद्गन्धस्य—आ. [3] श्रुतिः—आ.

'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' (बृ. उ. 6-3-9)
इति ॥ २८ ॥

[ज्ञातृत्वस्वरूपेऽप्यात्मनि ज्ञानशब्दप्रयोगौचित्यम्]

यत्तूक्तम्—

'यो विज्ञाने तिष्ठन्' (बृ. उ. 5-7-26)

'विज्ञानं यज्ञं तनुते' (तै. उ. आन. 5-1)

'ज्ञानस्वरूपमत्यन्त[1]निर्मलम्[1]' (वि. पु. 1-2-6)

इत्यादिषु, ज्ञानमेव आत्मेति व्यपदिश्यते—इति ; तत्राह—

२४५. तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २-३-२९ ॥

'तु'शब्दः चोद्यं व्यावर्तयति । तद्गुणसारत्वात्—विज्ञानगुणसारत्वात्, आत्मनः विज्ञानमिति व्यपदेशः । विज्ञानमेव, अस्य सारभूतो गुणः । यथा प्राज्ञस्य आनन्दः सारभूतो गुण इति, प्राज्ञः 'आनन्द' शब्देन व्यपदिश्यते—

'यदेष आकाश आनन्दो न स्यात्' (तै. उ. आन. 7-1)

'आनन्दो ब्रह्मेति व्यजानात्' (तै. उ. भृ. 6-1)

इति । प्राज्ञस्य हि ! आनन्दः सारभूतोगुणः ;

'स एको ब्रह्मण आनन्दः' (तै. उ. आन. 8-1)

'आनन्दं ब्रह्मणो विद्वान्, न बिभेति कुतश्चन' (तै. उ. आन. 1-1)

इति । यथा वा,

विशेषणतया व्यतिरेक उक्तः । अत्र तु, विशेष्य-विशेषणयोः पृथक् शब्देनाऽभिधानमिति भिदा ॥ २८ ॥

तद्गुणेत्यादि । 'सार'शब्देन प्रधानत्वं विवक्षितम् । तच्च यावदात्मभावित्वम् ।

[सूत्रार्थः ; **तद्गुणसारत्वात्**—ज्ञानाख्यगुणस्य प्राधान्येनाश्रयत्वात्, **तद्व्यपदेशः**—जीवे 'ज्ञान' पदव्यवहारः, **प्राज्ञवत्**—आनन्दाख्यगुणस्य प्राधान्येनाऽऽश्रये प्राज्ञाख्ये परमात्मनि 'आनन्दो ब्रह्म' इति व्यवहारवत् ॥]

तज्ज्ञानगुणसारत्वाज्ज्ञानमित्यात्मनो भवेत् ।
ब्रह्मवद्व्यपदेशोऽपि सत्यं ज्ञानमिति श्रुतेः ॥ (ब्र. प. २४५)

---

[1] निर्मलं परमार्थतः—न.

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ. आन. 1-1)

इति विपश्चितः प्राज्ञस्य, ज्ञानशब्देन व्यपदेशः।

'सह ब्रह्मणा विपश्चिता' (तै. उ. आन. 1-2)

'यः सर्वज्ञः' (मुण्ड. उ. 1-1-10)

इत्यादिषु, 'प्राज्ञस्य, ज्ञानं सारभूतो गुणः'—इति विज्ञायते ॥ २९ ॥

[ज्ञानस्य स्वरूपानुबन्धिधर्मत्वतः आत्मनि ताच्छब्द्यम्]

२४६. यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ २-३-३० ॥

विज्ञानस्य यावदात्मभावि[1]धर्मत्वात्[1], तेन तद्व्यपदेशो न दोषः। तथा च, खण्डादयः, यावत्स्वरूपभाविगोत्वादिधर्मशब्देन, गौरिति व्यपदिश्यमाना दृश्यन्ते; स्वरूप[2]निरूपण[2]धर्मत्वात् इत्यर्थः। [3]'च'[3]कारात् ज्ञानवत् आत्मनोऽपि स्वप्रकाशत्वेन, [4]विज्ञानमिति[4] व्यपदेशो न दोष इति समुच्चिनोति ॥ ३० ॥

आनन्द-ज्ञानयोः 'स एको ब्रह्मण आनन्दः' 'यः सर्वज्ञः' 'विपश्चिता' इत्यादि-श्रुतिरुदाहृता ॥ २९ ॥

विज्ञानस्य....न दोषः—गुणवाचिशब्देन गुण्यभिधानं [न दोषः]। **स्वरूपनिरूपणेति।** अणुत्वादयोपि हि यावदात्मभाविनः इति तद्व्यावृत्त्यर्थं, गोत्वादयो न यावदात्मभाविन इति [तत्सङ्ग्रहार्थं च]। **स्वरूपम्**—धर्मिस्वरूपम्। आत्मशब्दः स्वरूपपर इत्यर्थः ॥ ३० ॥

[सूत्रार्थः; **यावदात्मभावित्वात् च**—आत्मधर्मस्य ज्ञानस्य आत्मसत्तानियतस्वसत्ताकत्वात्, आत्मस्वरूपस्य च स्वप्रकाशत्वात्, **न दोषः**—आत्मनि ज्ञानपदव्यवहारे न दोषः **तद्दर्शनात्**—गोविशेषे गोत्वनिमित्तगोव्यवहारदर्शनात् ॥]

सर्वदाऽऽत्मगुणत्वाच्च न दोषो ज्ञानकीर्तने।
यथा तादृग्गोत्वयोगाद् व्यपदेशश्च गौरिति ॥ (ब्र. प. २४७)

---

[1] त्वात्—द. धर्मत्वेन—इ. छ. न. [2] निरूपक—न. [3] चकारः—घ. न.
[4] ज्ञानमिति—आ. इ. घ. ङ.

[ज्ञानस्य आत्मस्वरूपानुबन्धिधर्मत्वाभावशङ्का-परिहारौ]

यच्चोक्तम्—सुषुप्त्यादिषु ज्ञानाभावात्, न ज्ञानस्य स्वरूपानुबन्धिधर्मत्वम्—इति, तत्राह—

२४७. पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ २-३-३१ ॥

'तु'शब्दः चोदिताशङ्का[1]निवृत्त्यर्थः[1]। अस्य ज्ञानस्य, सुषुप्त्यादिष्वपि विद्यमानस्य जागर्यादिषु अभिव्यक्तेः सम्भवात्, स्वरूपानुबन्धिधर्मत्वोपपत्तिः, पुंस्त्वादिवत्, यथा—पुंस्त्वाद्यसाधारणस्य धातोः, [2]बाल्या[2]वस्थायां सतोऽपि अनभिव्यक्तस्य, युवत्वे अभिव्यक्तौ, पुंसः तद्वत्ता न कादाचित्की भवति। सप्तधातुमयत्वं हि! शरीरस्य स्वरूपानुबन्धि;

'तत् सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम्' (गर्भ. उ. 1)

इति शरीरस्वरूपव्यपदेशात्।

[आत्मप्रकाशस्य सार्वकालिकता]

सुषुप्त्यादिष्वपि अहमर्थः प्रकाशते' इति प्रागेवोक्तम्। तस्य विद्यमानस्य ज्ञानस्य विषयगोचरत्वं, जागर्यादौ उपलभ्यते। एते च आत्मनो ज्ञातृत्वादयो [3]धर्माः[3]

जागर्यादिष्विति, आदिशब्देन स्वप्नदशा विवक्षिता। पुंस्त्व शब्देन धातुर्लक्षितः। आदिशब्देन योषितोऽप्युपलक्षणमिति गम्यते ॥

पुंस्त्वादीति। ज्ञानस्योपलब्धिः विषयसम्बन्धसापेक्षेत्युक्तं भवति। विद्यमानस्य अनभिव्यक्तस्य, कदाचिदभिव्यक्तिमात्रे दृष्टान्तोऽयम्। विषयसम्बन्धार्हत्वं प्रकाशार्हत्वं च तदानीमप्यस्तीति, न स्वयंप्रकाशत्वहानिः।

तस्य....भ्यत इति। विषयसम्बन्धा उपलब्धिश्च जागर्यादावित्यर्थः। एते चेति।

[सूत्रार्थः; सतः आत्मनि सदा स्थास्नोरेव, अस्य तु—ज्ञानस्यैव धर्मभूतस्य, पुंस्त्वादिवत् तु—देहोत्पत्तिप्रभृतिसिद्धपुंभावादिवत्, अभिव्यक्तियोगात्—इन्द्रियसम्प्रयोगायत्तप्रकटतायाः युक्तत्वात् ॥]

सुषुप्तौ विद्यमानस्य ज्ञानस्यैवोद्भवस्त्विह।
बाल्ये तु विद्यमानस्य पुंस्त्वादेरिव यौवने ॥ (अ. प. २४७)

---

[1] व्यावृत्त्यर्थः—द. [2] अल्पा—इ. [3] अर्थाः—अ. द.

प्रागेवोपपादिताः । अतः ज्ञातृत्वमेव जीवात्मनः स्वरूपम् । सचाऽयमात्मा, अणुपरिमाणः ।

'न प्रेत्य संज्ञाऽस्ति' (बृ. उ. 4-4-12)

इत्यपि, न मुक्तस्य ज्ञानाभाव उच्यते ; अपि तु,

'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' (बृ. उ. 4-4-12)

इति संसारदशायां यत् भूतानुविधायित्व[1]प्रयुक्तं जन्म[1]-नाशादिदर्शनं ; तत् मुक्तस्य न विद्यते ;

'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् ।
सर्वं ह पश्यः पश्यति सर्वमाप्नोति [2]सर्वशः[2] ॥' (छां. उ. 7-26-2)

'नोपजनं स्मरन्निदं शरीरम्' (छां. उ. 8-12-3)

'[3]मनसैतान्[3] कामान् पश्यन् रमते' (छां. उ. 8-12-5)

इत्यादिश्रुत्यैकार्थ्यात् ॥ ३१ ॥

[आत्मनो ज्ञानत्व-जडत्वपक्षयोः विभुत्वे दूषणम्]

सम्प्रति—ज्ञानात्मवादे, तस्य सर्वगतत्वे दूषणमाह—

२४८. नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरानियमो वाऽन्यथा ॥ २-३-३२॥

अन्यथा—सर्वगतत्वपक्षे, तस्य ज्ञानमात्रत्वपक्षे च ; नित्यम् उपलब्ध्यनुपलब्धी

[आत्मनः] अहंप्रत्ययगोचरत्वे जडत्वादिप्रसङ्गो[नेत्यर्थः] । न प्रेत्येति । देहात्माभिमानभ्रमो नाऽस्तीत्यर्थः ॥ ३१ ॥

सम्प्रतीति । ज्ञानात्मवादे विभुत्वपक्षे दूषणम्, जडात्मवादे विभुत्वे च दूषणम्, उभयं सूत्रविवक्षितम् ; व्याख्यास्यते च । तत्र प्रथमे पक्षे दूषणमिदम् ॥

[सूत्रार्थः ; अन्यथा—आत्मनि ज्ञानमात्रत्व-सर्वगतत्वयोः स्वीकारे, नित्यो.... प्रसङ्गः—'अहम्' इति आत्मोपलम्भतदभावयोः सदा यौगपद्यापातः, अन्यतरनियमो वा—तयोरेकतरस्यैव वा नैयत्यापत्तिः ॥]

विभुत्वे चाऽऽत्मनो नित्यं ज्ञानत्वेऽपि च सर्वदा ।
उपलब्धिरभावश्च नियमोऽन्यतरस्य वा ॥ (अ. प. २४८)

---

[1] प्रयुक्तजन्म—द. [2] सर्वशः इति—त. थ. [3] मनसैवैतान्—त. थ.

सहैव प्रसज्येयाताम् । अन्यतरनियमो वा—उपलब्धिरेव वा नित्यं स्यात्, अनुपलब्धिरेव वा ॥

[उपलब्ध्यनुपलब्ध्योः उभयोर्वा प्रसङ्गप्रकारः]

एतदुक्तं भवति—लोके तावत् वर्तमानयोः आत्मोपलब्ध्यनुपलब्ध्योः, अयं ज्ञानात्मा सर्वगतो हेतुः स्यात्; [1]उपलब्धेरेव वा, अनुपलब्धेरेव वा[1] । उभयहेतुत्वे, सर्वदा सर्वत्र उभयं प्रसज्येत । यद्युपलब्धेरेव, [2]सर्वस्य सर्वदा[2] सर्वत्र अनुपलम्भो न स्यात् । अथ अनुपलब्धेरेव; सर्वदा सर्वत्र उपलब्धिर्न स्यात्—इति ॥

अस्माकं शरीरस्याऽ[3]न्तरेवाऽवस्थित[3]त्वादात्मनः, तत्रैवोपलब्धिः, नाऽन्यत्रेऽति व्यवस्थासिद्धिः ।

करणायत्तोपलब्धेरपि, सर्वेषामात्मनां सर्वगतत्वेन [4]सर्वैः करणैः[4] सर्वदा संयुक्तत्वात्, अदृष्टादेरपि अनियमात् उक्तदोषः समानः ॥ ३२ ॥

इति ज्ञाधिकरणम् ॥ ४ ॥

एतदुक्तमिति । विकल्पशिरस्त्रयाभिप्रायेण दूषणत्रयमुच्यते इत्यर्थः । **लोके तावदिति** । आत्मा कुत्रचिदुपलभ्यते; न गङ्गातीरादिषु उपलभ्यते । एवं विद्यमानयोः उपलब्ध्यनुपलब्ध्योरुभयोरपि हेतुः स्यात् एकं शिरः । **उप....रेव वेति** । अत्रापि हेतुः स्यादित्यनुवर्तते । एवं शिरस्त्रयं विवक्षितम् । किम् उपलब्धिरेव स्वरूपम्? उत अनुपलब्धिरेव? उत उभयम्? इत्यर्थः । 'हेतु' शब्दप्रयोगः, हेत्वन्तरनैरपेक्ष्यार्थः ।

अस्माकमिति, उक्तदूषणस्य स्वपक्षासंस्पर्शित्वमाह ।

करणायत्तेति, जडात्मपक्षे विभुत्वे दूषणम् । **अदृष्टादेरपीति** । तत्तत्कर्मानुष्ठानहेतुभूतशरीराणां सर्वात्मसाधारणत्वात् अदृष्टानियमः इत्यर्थः । **उक्तदोषः समान इति** । करणादिकं, किम् उपलब्धेर्हेतुः? उत अनुपलब्धेः? उत उभयोः? इति विकल्प्य पूर्ववद्दूषणं व्यक्तमिति भावः ॥ ३२ ॥

[सूत्राणि—१. ज्ञोतः, २. उत्क्रान्ति, ३. स्वात्मना, ४. नाणुर,
५. स्वशब्दो, ६. अविरोध, ७. अवस्थिति, ८. गुणाद्वा,
९. व्यतिरेको, १०. पृथगुप, ११. तद्गुण, १२. यावदात्म,
१३. पुंस्त्वादि, १४. नित्योप]

इति ज्ञाधिकरणम् ॥ ४ ॥

—o—

[1] उपलब्धेरेव वा–इ. [2] सर्वस्य–थ. सर्वदा–इ. [3] न्तरेव स्थित–त. थ. [4] सर्वकरणैः–थ.

(58) कर्त्रधिकरणम् ॥ २–३–५ ॥ (सू. 33–39)

[अधि–अर्थः—आत्मन एव कर्तृत्वम्; न गुणानाम् इति समर्थनम्]

२४९. कर्ता शास्त्रार्थवत्त्वात् ॥ २-३-३३ ॥

[अवान्तरसङ्गतिप्रदर्शनम्; अधिकरणीयो विचारश्च]

अयम् आत्मा ज्ञाता; स च अणुपरिमाणः—इत्युक्तम्।

इदानीं—किं स एव कर्ता? उत स्वयम् अकर्तैव सन्, अचेतनानां गुणानां कर्तृत्वम्, आत्मनि अध्यस्यति?—इति चिन्त्यते।

[पूर्वपक्षः सयुक्तिकः]

[1]किमत्र[1] युक्तम्?; 'अकर्तैव आत्मा'—इति।

कुतः?; आत्मनो हि! अकर्तृत्वं, गुणाना[2]मेव च[2] कर्तृत्वम्, अध्यात्मशास्त्रेषु श्रूयते। तथा हि! कठवल्लीषु जीवस्य,

'न जायते म्रियते' (कठ. उ. 2–18)

इत्यादिना, जन्म-जरा-मरणादिकं सर्वं प्रकृतिधर्मं प्रतिषिध्य, हननादिषु क्रियासु कर्तृत्वमपि प्रतिषिध्यते;

अयमिति। ज्ञातृत्वाद्धि! कर्तृत्वम्। अतः कर्तृत्वोपयुक्तज्ञातृत्वनिरूपणानन्तरं कर्तृत्वनिरूपणात् इह सङ्गतिरिति भावः॥

[विचाराः—]किम् आत्मैव कर्ता? उत प्रधानम्? इति। किम् आत्मनः कर्तृत्वे एव ज्योतिष्टोमादिशास्त्राणाम् अर्थवत्त्वम्? उत प्रधानस्य कर्तृत्वे? इति। कर्तृत्वनिषेधः, किम् आत्मनः कर्तृत्वे संभवति? न? इति च।

[सूत्रार्थः; आत्मा—जीव एव, कर्ता—कर्तृत्ववान्; (न गुणाः) शास्त्रार्थवत्वात्—स्वर्गापवर्गार्थयागोपासनविधायिनां शास्त्राणां सप्रयोजनत्वावश्यम्भावात्, जीवस्य शास्त्रफलभाक्त्वाच्च॥]

> अयमात्मा तु कर्तैव याग-ध्यानविधायिनाम्।
> शास्त्राणामर्थवत्त्वाय गुणानां तु न कर्तृता॥ (ब्र. प. २४९)

---

[1] किम्—अ. [2] मेव—इ. त. थ.

'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नाऽयं हन्ति न हन्यते ॥' (कठ. उ. 2-19)

इति । 'हन्तारम् आत्मानं जानन्, न जानात्यात्मानम्' इत्यर्थः । तथा च भगवता—स्वयमेव जीवस्य अकर्तृत्वं स्वरूपम्; कर्तृत्वाभिमानस्तु व्यामोहः—इत्युच्यते;

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥' (भ. गी. 3-27)

'नाऽन्यं गुणेभ्यः कर्तारं [1]यदा[1] द्रष्टाऽनुपश्यति' (भ. गी. 14-19)

'कार्य-कारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुख-दुःखानां भोक्तृत्वे हेतुरुच्यते ॥' (भ. गी. 13-20)

[2]इति च[2] । अतः पुरुषस्य भोक्तृत्वमेव; प्रकृतेरेव तु [3]कर्तृत्वम्—इति[3] ॥

[सिद्धान्तमुखेन सूत्रार्थः]

एवं प्राप्ते, प्रचक्ष्महे—'कर्ता शास्त्रार्थव[4]त्त्वात्'—इति[4] । आत्मैव कर्ता; न [5]गुणाः[5] ।

कस्मात्? शास्त्रार्थवत्त्वात् । [6]शास्त्राणि हि[6]!

'यजेत स्वर्गकामः' (?)

'मुमुक्षुः ब्रह्मोपासीत' (?)

इत्येवमादीनि, स्वर्ग-मोक्षादिफलस्य भोक्तारमेव, कर्तृत्वे [7]नियुञ्जते[7] । न हि! अचेतनस्य कर्तृत्वे, [8]अन्यो[8] नियुज्यते । [9]शासनाच्च[9] शास्त्रम् । शासनं च प्रवर्तनम् ।

यदा प्रधानस्य कर्तृत्वे शास्त्राणामर्थवत्त्वम्; यदा च आत्मनः कर्तृत्वनिषेधश्च न सम्भवति; तदा प्रधानं कर्तृ स्यात् ॥ यदा आत्मन एव कर्तृत्वे शास्त्राणामर्थवत्त्वम्; कर्तृत्वनिषेधश्च विषयवान् स्यात्; तदानीम् आत्मैव कर्ता स्यात् ॥

हन्तुमित्यत्र 'हन्तु'मिति पदम् उदन्तद्वितीयान्तम्; 'सेतुम्, जन्तुम्' इतिवत् ॥ हन्तारमित्यर्थः । **आत्मानमिति** अध्याहर्तव्यम् । **तथाचेति** । उपबृंहणवाक्ये सर्वक्रिया-कर्तृत्वनिषेधात्, 'हन्ता चेत्' इत्यत्रोक्तं हननम्, उपलक्षणार्थमित्यर्थः ॥

शास्त्रार्थत्त्वात्—शास्त्राणाम् अर्थवत्त्वाय । प्रयोजनतया हेतुत्वम् । **शासनाच्चेति** ।

---

[1] यथा—थ. [2] इति—अ,द,वा. [3] कर्तृत्वम्—अ, वा. [4] त्त्वात्—वा. [5] गुणः—थ. [6] शास्त्राणि—त, थ. [7] नियुज्यते—अ. [8] चेतनः—वा. [9] शासनात्—द.

शास्त्रस्य च प्रवर्तकत्वं, बोधजननद्वारेण । अचेतनं च प्रधानं, न बोधयितुं शक्यम् । अतः शास्त्राणामर्थवत्त्वं भोक्तुश्चेतनस्यैव कर्तृत्वे भवेत् । तदुक्तम्—

'शास्त्रफलं प्रयोक्तरि' (पू. मी सू 3-7-18) इति ॥

[अनुवादपूर्वकं पूर्वपक्षनिरासः]

यदुक्तम्—'हन्ता चेन्मन्यते' इत्यादिना हननक्रियायामकर्तृत्वम्, आत्मनः श्रूयते—इति ; तत्, आत्मनो नित्यत्वेन हन्तव्यत्वाभावादुच्यते ।

यच्च—'प्रकृतेः क्रियमाणानि' इत्यादिना, गुणानामेव कर्तृत्वं स्मर्यते—इति ; तत्, 'संसारिकप्रवृत्तिषु अस्य कर्तृता, सत्त्व-रजस्-तमोगुणसंसर्गकृता ; न स्वरूपप्रयुक्ता' इति प्राप्ताप्राप्तविवेकेन, गुणानामेव [1]कर्तृत्वमि[1]त्युच्यते । तथा च तत्रैवोच्यते—

'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु' (भ. गी. 13-21)

इति । तथा तत्रैव, आत्मनश्च कर्तृत्वमभ्युपेत्योच्यते—

'तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वात् न स पश्यति दुर्मतिः ॥' (भ. गी. 18-16)

इति ।

'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
[2]विविधा च[2] पृथक्चेष्टा दैवं चैवाऽत्र पञ्चमम् ॥' (भ. गी. 18-14)

इति अधिष्ठानादिदैवपर्यन्तसापेक्षे सति आत्मनः [3]कर्तृत्वे[3], यः आत्मानमेव केवलं कर्तारं मन्यते ; न स पश्यतीत्यर्थः ॥ ३३ ॥

भोक्तुरेव कर्तृत्वात्, चेतनस्यैव भोक्तृत्वात्, शास्त्रस्य बोधजननद्वारा प्रवर्तकत्वात्, अचेतने बोधजननायोगाच्च, चेतनः कर्तेत्यर्थः । **तदुक्तमिति** । कर्मविचारे इत्यर्थः । **उच्यत इति** । अस्य हन्तृत्वं नास्तीत्युच्यते इत्यर्थः । **गुणानामेवेति,** तस्मिन् वचने प्रतीयमानार्थानुवादः । **प्राप्ताप्राप्तविवेकेन**—अन्वय-व्यतिरेकनिरूपणेनेत्यर्थः । **सांसारिकप्रवृत्तिः**—संसारदशायां प्रवृत्तिः । सांसारिकप्रवृत्तिषु अस्य कर्तृत्वम्, अन्वय-व्यतिरेकवशात् सत्त्व-रजस्-तमः संसर्गकृतमिति तात्पर्यम् ॥

केवलम्—अधिष्ठानादिरहितम् । **अधिष्ठानमिति,** 'तत्रैव'मित्यादिवचनस्यापि आत्मनः कर्तृत्वनिषेधपरत्वभ्रमव्यावृत्त्यर्थम् । **अधिष्ठानम्**—शरीरम् । चेष्टाशब्देन पञ्चवृत्तिप्राणो लक्ष्यते । **'सापेक्षे सती'**त्यन्तेन, **'एवं सति'** इत्यस्य व्याख्यानम् ॥ ३३ ॥

---

[1] कर्तृता—च. [2] विविधाश्च—न. [3] कर्तृत्वेन—द.

[आत्मनः कर्तृत्वस्य श्रुत्युपदेशतो लाभः]

२५०. उपादानाद् विहारोपदेशाच्च ॥२-३-३४॥

'स यथा महाराजः' (बृ. उ. 4-1-18)

इति प्रकृत्य,

'एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते' (बृ.उ. 4-1-18) इति, प्राणानामुपादाने विहारे च कर्तृत्वमुपदिश्यते ॥ ३४ ॥

[आत्मनः कर्तृत्वव्यपदेशो लौकिक-वैदिकीषु क्रियासु]

२५१. व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ २-३-३५ ॥

'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' (तै. उ. आन. 5-1) इति लौकिक-वैदिकक्रियासु कर्तृत्वव्यपदेशाच्च, कर्ता ।

'विज्ञान' शब्देन न आत्मनो व्यपदेशः ; अपि तु अन्तःकरणस्य बुद्धेः—इति चेत् ! ; एवं सति, निर्देशविपर्ययः स्यात्—बुद्धेः करणत्वात् , 'विज्ञानेन' इति करण विभक्तिनिर्देशः स्यात् ॥ ३५ ॥

गृहीत्वेति, उपादानमुक्तम् । परिवर्तते इति, विहार उक्तः । इन्द्रियप्रेरणे शरीरप्रेरणे च कर्तृत्वमुक्तमित्यर्थः ॥ ३४ ॥

'यज्ञं तनुते, कर्माणि तनुते' इति लौकिक-वैदिकक्रियाकर्तृत्वमुक्तम् ।

विज्ञानेनेति । तत्राऽप्युपचरितत्वे स एव दोष इति भावः ॥ ३५ ॥

[सूत्रार्थः ; उपादानात्—इन्द्रियप्रेरणे कर्तृत्वोपदेशपूर्वकम् , विहारोपदेशाच्च—शरीर-प्रेरणे कर्तृत्वोपदेशात् ज्ञापकादपि आत्मा कर्ता ॥]

इन्द्रियाणामुपादानाद् विहारादिश्रुतेरयम् ।
कर्ता चाऽऽत्मेति कर्तृत्वं निश्चितं त्वात्मनस्त्विह ॥ (ब्र प. २५०)

[सूत्रार्थः ; क्रियायाम्—यज्ञक्रियां प्रति कर्तृत्वस्य, व्यपदेशाच्च—'विज्ञानं यज्ञं तनुते' इति श्रुतौ स्पष्टं कथनादपि हेतोः आत्मा कर्ता । न चेत् !—विज्ञानपदं आत्मपरतां विहाय बुद्धिपरं यदि, निर्देशविपर्ययः—'विज्ञानेन' इति निर्देशवैपरीत्यं श्रुतौ अद्रक्ष्यत ॥]

विज्ञानं यज्ञं तनुत इत्यादिव्यपदेशतः ।
क्रियायां कर्तृता तस्य न चेद् ! भाव्यं तृतीयया ॥ (ब्र. प. २५१)

[आत्मनः कर्तृत्वानभ्युपगमे दोषप्रदर्शनम्]

२५२. उपलब्धिवदनियमः ॥ २-३-३६ ॥

आत्मनः अकर्तृत्वे दोष उच्यते —

यथा-आत्मनो विभुत्वे 'नित्योपलब्ध्यनुपलब्धिप्रसङ्गः' (ब्र. सू. 2-3-32) इत्यादिना, उपलब्धेरनियम उक्तः ; तद्वत्—आत्मनः अकर्तृत्वे प्रकृतेश्च कर्तृत्वे, तस्याः सर्वपुरुषसाधारणत्वात् , सर्वाणि कर्माणि सर्वेषां भोगाय स्युः ; नैव वा कस्यचित् ।

'आत्मनां'[1] विभुत्वाभ्युपगमात्, संनिधानमपि सर्वेषामविशिष्टम् । अत [2]एव च,[2] अन्तःकरणा[3]दीनामपि[3] नियमो नोपपद्यते ; यदायत्ता व्यवस्था स्यात् ॥ ३६ ॥

[बुद्धेः कर्तृत्वाभ्युपगमे आत्मापलापापत्तिः]

२५३. शक्तिविपर्ययात् ॥ २–३–३७ ॥

बुद्धेः कर्तृत्वे, कर्तुरन्यस्य भोक्तृत्वानुपपत्तेः, भोक्तृत्वशक्तिरपि तस्या एव स्यादिति, आत्मनो भोक्तृत्वशक्तिः हीयेत । भोक्तृत्वं च बुद्धेरेव सम्पद्यत इति, आत्मसद्भावे प्रमाणाभावश्च स्यात् ।

'पुरुषोऽस्ति भोक्तृभावात्' (सां. का. 17)

इति हि ! तेषामभ्युपगमः ॥ ३७ ॥

अन्तःकरणादीनामपि नियमः—यः यदन्तःकरणः यत् कर्म चक्रे ; तदन्तःकरणेनैव तेनाऽनुभाव्यम् इति ॥ ३६ ॥

[सूत्रार्थः ; उपलब्धिवत्—आत्मनो विभुत्वे, तस्य अनियमेन, सर्वत्रोपलब्धिप्रसङ्गवत् , **अनियमः**—तस्य अकर्तृत्वे कर्मफलभोक्तुः नियमाभावप्रसङ्गः ॥]

प्रकृतेश्चैव कर्तृत्वेऽकर्तृत्वे ह्यात्मनोऽपि च ।
उपलम्भानियमवत्फलस्याऽनियमो भवेत् ॥ (ब्र. प. २५२)

[सूत्रार्थः ; (आत्मनः कर्तृत्ववैपरीत्येन बुद्धेः कर्तृत्वे,) **शक्तेः**—भोक्तृत्वशक्तेरपि, **विपर्ययात्**—आत्मवृत्तित्ववैपरीत्येन बुद्धिवृत्तित्वापातात् ॥]

तस्या एव तु कर्तृत्वे भोक्तृत्वं प्रकृतेर्भवेत् ।
अन्यस्य भोक्तृभावात्तु भोक्तृत्वं चाऽस्य हीयते ॥ (ब्र. प. २५३)

---

[1] आत्मनः—च. [2] एव—वा. [3] दिनाऽपि—द.

[प्रकृतौ, प्रकृत्यन्यथाख्यातिरूपसमाध्यनुपपत्तिः]

२५४. समाध्यभावाच्च ॥ २-३-३८ ॥

बुद्धेः कर्तृत्वे, मोक्षसाधनभूतसमाधावपि सैव कर्त्री स्यात्। स च समाधिः, 'प्रकृते[1]रन्योऽस्मि[1]' इत्येवंरूपः। न च 'प्रकृतेरन्योऽस्मि' इति, प्रकृतिः समाधातुमलम्। [2]अतोऽपि[2] आत्मैव कर्ता ॥ ३८ ॥

[आत्मनः कर्तृत्वे, तस्मिंस्तस्यानुपरतिशङ्का-तत्परिहारौ]

ननु--आत्मनः कर्तृत्वे अभ्युपगम्यमाने, सर्वदा [3]कर्तृत्वं[3] नोपरमेत! इत्यत्राऽऽह—

२५५. यथा च तक्षोभयथा ॥ २-३-३९ ॥

वागादिकरणसम्पन्नोऽप्यात्मा, यदा इच्छति; तदा करोति। यदा तु नेच्छति; तदा न करोति। यथा तक्षा, वास्यादिकरणसंनिधानेऽपि इच्छानुगुण्येन करोति, न करोति च। बुद्धेस्तु अचेतनायाः कर्तृत्वे, तस्याः भोगवाञ्छादिनियमकारणाभावात् सर्वदा कर्तृत्वमेव स्यात् ॥ ३९ ॥

इति कर्त्रधिकरणम् ॥ ५ ॥

न च प्रकृतेरिति। अचेतनत्वादपि प्रकृतेः, समाधिर्नोपपद्यते। प्रकृतेरन्योऽस्मीत्येवंरूपत्वाच्च नोपपद्यते इत्यर्थः ॥ ३८, ३९ ॥

[सूत्रार्थः; **समाधेः**—मोक्षसाधनभूतायाः प्रकृतेरन्योऽस्मीति विवेकख्यातेः, **अभावाच्च**—पुरुषगतत्वाभावप्रसङ्गादपि, आत्मैव कर्ता ॥]

मोक्षसाधनभूतस्य समाधेरप्यसम्भवात्।
प्रकृतेरन्य इत्यादेरात्मनस्त्वेव कर्तृता ॥ (ब्र. प. २५४)

[सूत्रार्थः; **तक्षा**—वर्धकिः, **यथा च**—यथैव-इच्छायां जातायां दारुतक्षणादिकं कर्म करोति; तदभावे न करोति च; तथैव, **उभयथा**—(कर्ता आत्माऽपि) करोति न करोति चेति; न कर्तृत्वानुपरमः ॥]

वास्यादि संनिधानेऽपि तक्षवत् कुरुते ह्ययम्।
कर्ता चैवमकर्ता च देहीच्छा-तदभावतः ॥ (ब्र. प. २५५)

[सूत्राणि—१. कर्ता शास्त्रा, २. उपादाना, ३. व्यपदेशा, ४. उपलब्धि. ५. शक्तिविप, ६. समाध्य, ७. यथा च]

इति कर्त्रधिकरणम् ॥ ५ ॥

—o—

---

[1] रन्योऽस्ति—इ. ङ.　[2] अतो हि—द.　[3] कर्तृत्वात्—च.

(59) परायत्ताधिकरणम् ॥ २–३–६ ॥ (सू. ४०–४१)

[अधि–अर्थः ; जीवात्मगतं विहित-निषिद्धक्रियाकर्तृत्वं परमात्माधीनम्]

२५६. परात्तु तच्छ्रुतेः ॥ २–३–४० ॥

[एतदधिकरणविचारणीयोऽर्थः]

इदं जीवस्य कर्तृत्वम्, किं स्वातन्त्र्येण ? उत परमात्मायत्तम् ?—इति ॥

[युक्तिसिद्धः पूर्वः पक्षः]

किं प्राप्तम् ? ; स्वातन्त्र्येण—इति । परमात्मायत्तत्वे हि ! विधि-निषेध-शास्त्रानर्थक्यं [1]प्रसज्येत[1] । यो हि ! स्वबुद्ध्या प्रवृत्ति-निवृत्त्यारम्भशक्तः ; स एव नियोज्यो भवति । अतः स्वातन्त्र्येण अस्य कर्तृत्वम्—

[सिद्धान्तः सूत्रार्थविवृत्या सह]

इति प्राप्ते, अभिधीयते—‘[2]परात्तु तच्छ्रुतेः[2]’—इति । ‘तु’ शब्दः पक्षं व्यावर्तयति । तत्—कर्तृत्वम् [3]अस्य जीवस्य,[3] परात्—परमात्मन एव हेतोर्भवति ।

कुतः ? ; श्रुतेः ;

‘अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा’ (तै. आर. 3-11-)

‘य आत्मनि तिष्ठन् आत्मनोऽन्तरो यमात्मा न वेद यस्याऽऽत्मा शरीरं, य आत्मानमन्तरो यमयति, स त आत्माऽन्तर्याम्यमृतः’

(बृ. उ. मा. पा. 5-7-26)

इति । स्मृतिरपि—

परात्त्विति । जीवस्य कर्तृत्वं किं परमात्मायत्तम् ? उत स्वायत्तम् ?—इति । किं परमात्मायत्तत्वे विधि-निषेधशास्त्रानर्थक्यं स्यात् ? न ? इति । [विचारः]

[सूत्रार्थः ; तत्—जीवात्मगतं विहित-निषिद्धक्रियाकर्तृत्वम्, परात् तु—सर्वेश्वरात् परस्माद् ब्रह्मण एव, (परमात्मायत्तमेव क्रियास्वातन्त्र्यम्) श्रुतेः—‘शास्ता जनानाम्’ इति असङ्कोचेन सर्वनियन्तृत्वश्रुतेः ॥]

परमात्मायत्तमेव कर्तृत्वं स्वात्मनो भवेत् ।
अन्तःप्रविष्टः शास्तेति वदतीयं श्रुतिस्तथा ॥ (ब्र. प. २५६)

---

[1] प्रसज्यते—च. [2] परात्तु—च. तच्छ्रूते—न. [3] अस्य—अ. वा.

'सर्वस्य चाऽहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च' (भ. गी. 15-15)

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ?

भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।' (भ. गी. 18-61)

इति ।। ४० ।।

[पूर्वपक्षोक्तायाः युक्तेः अनूद्य निरासः]

नन्वेवं—विधि निषेधशास्त्रानर्थक्यं प्रसज्येत—इत्युक्तम् ; तत्राऽऽह—

२५७. कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धा-वैयर्थ्यादिभ्यः ।। २-३-४१ ।।

सर्वासु क्रियासु पुरुषेण कृतं प्रयत्नम्—उद्योग[1]मपेक्ष्य[1], अन्तर्यामी परमात्मा, तदनुमतिदानेन [2]प्रवर्तयति[2] । परमात्मानुमतिमन्तरेण अस्य प्रवृत्तिः, नोपपद्यते इत्यर्थः ।

कुत एतत् ?; विहित-प्रतिषिद्धावैयर्थ्यादिभ्यः । 'आदि'शब्देन अनुग्रह-निग्रहादयो गृह्यन्ते । यथा—द्वयोः साधारणे धने, परस्वत्वापादनम्, [3]अन्यतरा[3]नुमति-मन्तरेण नोपपद्यते ; [4]अथापि[4], इतरानु[5]मतिः[5] स्वेनैव [6]कृतेति[6], तत्फलं तस्यैव भवति ।।

यदा स्यात् ; तदा स्वायत्तम् । यदा न स्यात् ; तदा परमात्मायत्तमिति सिध्यति । तत् इति व्याख्येयं पदम् । **कर्तृत्वम्** इति व्याख्यानम् ।। ४० ।।

उद्योगमपेक्ष्येत्यनेन प्रथमप्रवृत्तिदशायां परस्य उदासीनत्वं दर्शितम् । प्रवृत्तस्य प्रवर्तनं हि ! अनुमतिः । **परमात्मेति** । उत्तरप्रवृत्तिः, एतदनुमतिदानेनैव उपपद्यते इत्यर्थः ।

विहित-प्रतिषिद्धौ—विधि-निषेधौ । **निग्रहानुग्रहौ**—कोप-प्रसादौ । भाष्यस्थादि-शब्देन तत्तत्फलदानमभिप्रेतम् ।

[सूत्रार्थः ; **कृत....क्षस्तु**—परमात्मा जीवात्मना कृतं प्राथमिकप्रयत्नमपेक्ष्यैव द्विती-यादिप्रवृत्तिजनकः, **विहित....दिभ्यः**—विधि-निषेधशास्त्रयोः अवैफल्यावश्यंभावात्, भगव-तोऽनुग्राहकत्वादिसार्थक्याय च ।।]

निषेध-विध्योः सिध्यर्थं जीवोद्योगमपेक्ष्य सः ।
प्रवर्तयति तं चेति पराधीना हि कर्तृता ।। (ब्र. प. २५७)

---

[1] मवेक्ष्य—द. [2] प्रवर्तयते—त. [3] अन्यतमा—द. [4] तथापि—द.
[5] मतेः—च. [6] कृतमिति—च.

'पापकर्मसु निवर्तनशक्तस्याऽपि अनुमन्तृत्वं, न निर्दयत्वमावहति'—इति साङ्ख्यसमयनिरूपणे प्रतिपादितम् ॥

[परमात्मनः जीवीयप्रथमप्रवृत्तावौदासीन्ये, श्रुतिविरोध-तत्परिहारौ]

नन्वेवम्—

'एष [1]ह्येव[1] साधु कर्म कारयति तं, यम् एभ्यो लोकेभ्य उन्निनीषति ;

एष एवासाधुकर्म कारयति तं, यम् अधो निनीषति' (कौषी. उ. 3-64, 65) इति, 'उन्निनीषया अधोनिनीषया च, स्वयमेव साध्व[2]साधुनी कर्मणी[2] कारयति' [3]इत्येतत्[3]—नोपपद्यते ;

उच्यते—एतत् न सर्वसाधारणम् । यस्तु अतिमात्रपरम[4]पुरुषानु[4]कूल्ये [5]व्यवसितः[5] प्रवर्तते ; तम् अनुगृह्णन् भगवान् ; स्वयमेव स्वप्राप्त्युपायेषु अति-[6]कल्याणेषु कर्मस्वेव[6] रुचिं जनयति । यश्च अतिमात्रप्रातिकूल्ये व्यवसितः प्रवर्तते ; [7]तं निगृह्णन्[7], स्वप्राप्तिविरोधिषु अधोगतिसाधनेषु कर्मसु [8]रुचिं जनयति[8] । यथोक्तं भगवता स्वयमेव ;

यथेति । साधारणे द्रव्ये परानुमत्या स्वांशमादाय, राज्ञे उपायने दत्ते, तत्प्रसादहेतुकः फलान्वयः, प्रथमप्रवृत्तस्यैव दृश्यते, नत्वनुमन्तुः ; तथेदमित्यर्थः । अंशे पारतन्त्र्यात्, विधि-निषेधागोचरत्वम्—इति शङ्का । अंशे स्वातन्त्र्यात्, विधि-निषेधगोचरत्वोपपत्तिः—इति परिहारः । अन्यसापेक्षत्वेऽपि रथाकर्षणादिषु विधि-निषेधगोचरत्वं दृष्टम् ।

न निर्दयत्वमावहतीति । अन्यत्र दयायाः सविषयत्वादित्यर्थः ॥

नन्विति । कथमनुमन्तृत्वम् ? अप्रवृत्तप्रवर्तनरूपं प्रयोजयितृत्वं ह्यस्य दृश्यते । अनुमन्तृत्वे सति कथमिदमुपपद्यते ? इत्यर्थः ।

यथोक्तमिति । प्रथमप्रवृत्तस्य अनुमन्तृत्ववत् अत्यन्तानुकूल-प्रतिकूलयोः प्रयोजयितृत्वमपि फलदानकल्पम् । तत्र च हेतुः स्वातन्त्र्यम् । एवं प्रथमम् उपेक्षकत्वं, पश्चात् अनुमन्तृत्वं क्वचिद्विषये प्रयोजकत्वं च प्रतिपादितम् । एषां त्रयाणां दोषरूपत्वम्, आश्रयासिद्धि-धर्मिग्राहकबाधाभ्यां (पूर्वमेव) निरस्तम् ॥ **अनुमन्ता**—प्रवृत्तस्य प्रवर्तकः । **प्रयोजयिता**—अप्रवृत्तस्य प्रवर्तकः ।

---

[1] एव—वा. [2] साधुकर्मणी—छ. साधूनि कर्माणि—द. [3] इति तत्—वा.
[4] पुरुष-आनुकूल्ये—इ. वा. [5] व्यवस्थितः—च. [6] कल्याणेष्वेव कर्मसु—त.
[7] तं—अ. द [8] सञ्जयति—अ. द.

'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥' (भ. गी. 10-8)

इत्यारभ्य,

'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥' (भ. गी. 10-10)

'तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥' (भ. गी. 10-11)

इति । तथा,

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्' (भ. गी. 16-8)

इत्यादि,

औदासीन्यम्—तूष्णीम्भावः प्रथमप्रवृत्तौ । **जीवस्य स्वातन्त्र्यम्**—स्वेच्छानुगुणप्रवृत्तिसामर्थ्ये सति अनिवार्यत्वम् ॥ अत्रायं सङ्ग्रहः—

'वैयर्थ्यं यावता न स्याद् विधान-प्रतिषेधयोः ।
नियन्तृत्वश्रुतेस्तावान् सङ्कोचो नत्वतः परः ॥ १ ॥

बाह्यान्तःकरणव्याप्ति-तच्छक्त्याधान-धारणैः ।
साधारणोपकारैः स्यादिच्छादेः कारणं परः ॥ २ ॥

भोगादृष्टोपनीतार्थस्वभावाद्वासनान्वितात् ।
इच्छादेर्मनसोत्पत्तौ युक्तोदासीनता विभोः ॥ ३ ॥

अभिसन्ध्यन्तरप्राप्ते वस्तुन्यन्यत्र केनचित् ।
उपयुक्तेऽप्युदास्ते हि ! तस्य प्रापयिता पुमान् ॥ ४ ॥

सामर्थ्ये सत्यवार्यत्वात् स्वतन्त्रो जीव उच्यते ।
स ह्योदने विषज्ञानात् स्वेच्छामपि नियच्छति ॥ ५ ॥

सन्निधापकवैधुर्येऽप्यर्थं बुद्धिस्थतां नयन् ।
प्रयोजकोऽनुमन्ता च भवतीशस्तदा तदा ॥ ६ ॥

पूर्वप्रवृत्तेश्च फलमनुमत्यादिकं भवेत् ।
दयादीनां गुणानां च सुलभं विषयान्तरम् ॥ ७ ॥

'मामात्मपरदेहेषु प्रद्विषन्तो[1]ऽभ्यसूयकाः[1]' (भ. गी. 16-18)

इत्यन्तमुक्त्वा,

'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥' (भ. गी. 16-19)

[2]इत्युक्तम्[2] ॥

इति परायत्ताधिकरणम् ॥ ६ ॥

अमात्यस्य स्वतन्त्रत्वे राज्ञस्तन्नाऽपहीयते ।
एवमेव परस्याऽपि जीवस्वातन्त्र्यदायिनः ॥ ८ ॥

न स्वातन्त्र्यं पराधीनस्वरूपात् प्रच्युतं भवेत् ।
स्वातन्त्र्यदायिना पुंसा तत्प्रवृत्त्यनिवारणात् ॥ ९ ॥

अतः जीवानां स्वातन्त्र्यं, विधि-निषेधशास्त्रसाफल्यं, परमात्मनः सर्वकारणत्वं, सर्वफलप्रदत्वं, निरङ्कुशस्वातन्त्र्यं, अवस्थात्रयवैषम्यं, दयादिगुणानां विषयवत्त्वं, वैषम्य-नैर्घृण्यपरिहारश्चेति सर्वमुपपन्नम् ॥

[सूत्राणि—१ परात्तु २ कृतप्रयत्न]

इति परायत्ताधिकरणम् ॥ ६ ॥

—o—

[1] ह्यसूयकाः—द. [2] इति—द.

(60) अंशाधिकरणम् ॥ २-३-७॥ (सू. 42–52)

[अधिकरणार्थः—जीवात्मानः परमात्मनः अंशभूताः इति साधनम्]

२५८· अंशो नानाव्यपदेशादन्यथा चाऽपि दाश-कितवादित्वमधीयत एके ॥ २-३-४१ ॥

[अवान्तरसङ्गतिः अधिकरणीयः संशयश्च]

जीवस्य कर्तृत्वं परमपुरुषायत्तम्—इत्युक्तम् ।

इदानीं—किम् अयं जीवः, 'परस्मात्[1] अत्यन्तभिन्नः? उत '[2]परमेव ब्रह्म[2] उत ब्रह्मैव उपाध्यवच्छिन्नम्? अथ ब्रह्मांशः?—इति संशय्यते। श्रुतिविप्रतिपत्तेः संशयः ॥

जीवस्येति । स्वबुद्ध्या प्रवृत्ति-निवृत्त्यारम्भक्षमो जीवः, कृतप्रयत्नापेक्षेण परेण, अनुमतिदानेन प्रवर्त्यते—इत्युक्तम् । तर्हि राजभृत्यादिवत् अत्यन्तभेदो जीव-परयोः स्यात् । तस्मात् अभेदश्रुतयः 'नरपतिरेव सर्वलोकः' इतिवत् औपचारिक्यः—इति शङ्कया सङ्गतिः ॥

ब्रह्मांश इति । किं विशेष्यैकदेशरूपांशः? किं विशिष्टैकदेशरूपविशेषणांशः?—इति विकल्पो गर्भितः । स तु वक्ष्यते । जीवः किं परमात्मनोऽत्यन्तभिन्नः? उत अज्ञः परमात्मैव? उत औपाधिकभेदभिन्नः? उत स्वतो भिन्नाभिन्नः? उत परमात्मनो विशेषणतया अंशः? इति । तदर्थं कस्मिन् पक्षे भिन्नाभिन्नत्वादिविषयसर्वश्रुतिमुख्यत्वम् उपपद्यते? कस्मिन् न? इति ।

यदा पक्षान्तरेषु तदुपपत्तिः ; तदा तेष्वन्यतमः पक्षः परिग्राह्यः । यदा विशेषणतया अंशत्वे तदुपपत्तिः ; तदा तदेव परिग्राह्यमिति ॥ **श्रुतीति** । वादिविप्रतिपत्तेरपि श्रुतिविप्रतिपत्तिमूलत्वात् सैव अत्र हेतुतयोक्ता ॥

[सूत्रार्थः ; (आत्मा—जीवः, **परस्य**—परमात्मनः) **अंशः**—विशिष्टैकदेशभूतः, **नाना अन्यथाऽपि**—पृथक्त्वेन अपृथक्त्वेनाऽपि च, **व्यपदेशात्**—श्रुत्यादौ व्यवहारात्, **एके**—शाखाविशेषाश्रिताः, **दाश-त्वमपि**—(ब्रह्मणः) धीवर-धूर्तादिरूपतामपि, **अधीयते**—पठन्ति ॥]

> **जीवस्तु ब्रह्मणो ह्यंशः नानात्वव्यपदेशतः ।**
> **अभेदव्यपदेशाच्च ब्रह्म दाशा इति ह्यपि ॥ (ब्र.प २५८)**

---

[1] परमपुरुषात्— आ.   [2] परमेव – अ.

[अधिकरणस्य पौनरुक्त्यशङ्का—परिहारौ]

ननु—'तदनन्यत्वमारम्भण-शब्दादिभ्यः' (ब्र. सू. 2-1-15) 'अधिकं तु भेद-निर्देशात्' (ब्र. सू 2-1-22) इत्यत्रैव, अयमर्थो निर्णीतः !

सत्यम् ; स एव नानात्वैकत्वश्रुतिविप्रतिपत्त्या आक्षिप्य, जीवस्य ब्रह्मांशत्वोप-पादनेन विशेषतो निर्णीयते। यावद्धि जीवस्य ब्रह्मांशत्वं [1]न निर्णीतम्[1] ; तावत् जीवस्य ब्रह्मणोऽनन्यत्वं, ब्रह्मणः तस्मादधिकत्वं च न प्रतितिष्ठति ॥

[हेतूपन्यासपूर्वकः पूर्वपक्षः]

किं तावत् प्राप्तम् ? ; अत्यन्तभिन्नः— इति ।

कुतः ?

'ज्ञाज्ञौ [2]द्वावजावीश-नीशौ[2]' (श्वे. उ. 1-9)

[3]इत्यादिना[3] भेदनिर्देशात्। ज्ञाज्ञयोः अभेदश्रुतयस्तु, 'अग्निना सिञ्चेत्' इतिवत् विरुद्धार्थप्रतिपादनात्, औपचारिक्यः ॥

[उक्तार्थदार्ढ्याय ब्रह्मांशतापक्षनिरासः]

'ब्रह्मणोंऽशो जीवः'—इत्यपि न साधीयः ; एकवस्त्वेकदेशवाची हि ! 'अंश'-शब्दः। जीवस्य ब्रह्मैकदेशत्वे, तद्गताः दोषाः ब्रह्मणि भवेयुः ।

न च—'ब्रह्मखण्डो जीवः'—इति, अंशत्वोपपत्तिः ; खण्डनानर्हत्वात् ब्रह्मणः ; प्रागुक्तदोषप्रसङ्गाच्च। तस्मादत्यन्तभिन्नस्य च, तदंशत्वं दुरुपपादम् ॥

सत्यमिति। जगद्-ब्रह्मणोः शरीर-शरीरिभावेनोपपादितम् उभयव्यपदेशमुख्यत्वं, शरीरवाचिशब्दस्य शरीरिपर्यन्ताभिधायित्वसिद्धवत्कारेण। तदयुक्तम् ; आकृत्यधिकरण-(पू.मी.सू. 1-3-10) न्यायाविषयत्वादित्याक्षिप्य, अंशत्वोपपादनमुखेन तदुपपाद्य, उभय-व्यपदेशमुख्यत्वमिह निर्णीयते इत्यर्थः। **यावद्धीति**। अपृथक्सिद्धप्रकारत्वनिर्णयेन, उभय-व्यपदेशमुख्यत्वम्, प्रभा-प्रभावतोरिव अपृथक्सिद्धांशांशित्वनिर्णयेन जगद्-ब्रह्मणोः अनन्यत्व-सिद्धिः, विशेषणतया अंशत्वनिर्णयेन विलक्षणत्वसिद्धिरिति ॥

न साधीय इति, अत्यन्तभेदवादी अंशवादिनं दूषयति। विशेष्यैकदेशरूपांशपक्षे दूषणमिदम् ।

---

[1] निर्णीतम्—द. [2] द्वावजौ—वा. [3] इत्यादि—च.

[ब्रह्माज्ञानवादेन पूर्वः पक्षः सप्रमाणः]

यद्वा-भ्रान्तं ब्रह्मैव, जीवः ।

कुतः ?

'तत् त्वमसि' (छां. उ. 6-8-7)

'अयमात्मा ब्रह्म' (बृ. उ. 6-4-5)

इत्यादि[1]ब्रह्मात्म[1]भावोपदेशात् । नानात्ववादिन्यस्तु, प्रत्यक्षादिसिद्धार्थानुवादित्वात् अनन्यथा[2]सिद्धाद्वैतोपदेश[2]पराभिः [3]श्रुतिभिः, प्रत्यक्षादय[3] इव अविद्यान्तर्गताः ख्याप्यन्ते ॥

[उपहितब्रह्मणो जीवत्ववादेन पूर्वः पक्षः]

अथवा—ब्रह्मैव अनाद्युपाध्यवच्छिन्नं जीवः ।

कुतः ? ; तत एव ब्रह्मात्मभावोपदेशात् । न च—'अयमुपाधिः भ्रान्तिपरिकल्पितः'—इति [4]वक्तुं शक्यम्[4] ; बन्ध-मोक्षादिव्यवस्था[5]नुपपत्तेः[5]—इति ।

[सूत्रार्थवर्णनतः सिद्धान्तः]

एवं प्राप्ते, [6]अभिधीयते[6]—'ब्रह्मांशः'—इति ।

कुतः ? [7]नाना[7]व्यपदेशात्, अन्यथा च—एकत्वेन व्यपदेशात् । [8]उभयथा[8] हि ! व्यपदेशो दृश्यते । [9]नानात्व[9]व्यपदेशस्तावत् - स्रष्टृत्व-सृज्यत्व—नियन्तृत्व-नियाम्यत्व—[10]सर्वज्ञत्वाज्ञत्व[10]—स्वाधीनत्व-पराधीनत्व—[11]शुद्धत्वाशुद्धत्व[11]—कल्याणगुणाकरत्व-तद्विपरीतत्व—पतित्व-शेषत्वादिभिर्दृश्यते । अन्यथा च—[12]अभेदेन व्यप[12]देशोऽपि,

'तत् त्वमसि' (छां.उ 6-8-7)

'अयमात्मा ब्रह्म' (बृ.उ. 6-4-5)

यद्वेति । अद्वैते षड्विधतात्पर्यलिङ्गसम्भवात्, द्वैतान्यथासिद्धेश्च ब्रह्मैव जीवः इत्यर्थः ।

बन्धेति । प्रमाण-प्रमेयव्यवस्थानुपपत्तिश्च गर्भिता ।

एवमिति । सौत्रः 'अपि' शब्दः भेदतात्पर्यं द्योतयति ॥

---

[1] ब्रह्म—द. [2] सिद्धाद्वैत—द. [3] प्रत्यक्षादयः—आ. [4] शक्यं वक्तुं—आ. द.
[5] सिद्धेः—द. [6] प्रचक्ष्महे—त. थ. [7] नानात्व—वा. [8] उभयधा—च.
[9] नाना—थ. द. [10] सर्वज्ञत्व—थ. [11] शुद्धत्व—द. [12] अभेदव्यप—त.

इत्यादिभिर्दृश्यते। अपि दाशकितवादित्वम्, अधीयत एके—

'ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवाः' (सं. उ.)

इति आथर्वणिकाः, ब्रह्मणः दाश-कितवादित्वमपि अधीयते। ततश्च, सर्वजीवव्यापित्वेन अभेदो व्यपदिश्यत इत्यर्थः। एवम् उभयव्यपदेशमुख्यत्वसिद्धये, जीवोऽयं [1]ब्रह्मणोंऽश[1] इति अभ्युपगन्तव्यः॥

[भेदव्यपदेशानाम् अन्यथासिद्धत्वशङ्का-परिहारौ]

न च—भेदव्यपदेशानां प्रत्यक्षादि[2]प्रसिद्धा[2]र्थत्वेन, अन्यथासिद्धत्वम्; ब्रह्मसृज्यत्व-तन्नियाम्यत्व-तच्छरीरत्व-तच्छेषत्व-तदाधारत्व-तत्पाल्यत्व-तत्संहार्यत्व-तदुपासकत्व-तत्प्रसादलभ्यधर्मार्थकाममोक्षरूपपुरुषार्थ[3]भाक्त्वा[3]दयः, तत्कृतश्च जीव-ब्रह्मणोर्भेदः, प्रत्यक्षाद्यगोचरत्वेन [4]अनन्यथासिद्धः[4]। अतः, न जगत्सृष्ट्यादिवादिनीनां प्रमाणान्तरसिद्धभेदानुवादेन मिथ्यार्थोपदेशपरत्वम्॥

[शास्त्रस्य भेदभ्रमोपदेशपरत्वानुपपत्तिः]

न च—अखण्डैकरसचिन्मात्रस्वरूपेण ब्रह्मणा, [5]आत्मनः अतद्भावानु[5]सन्धानं, बहुभवनसङ्कल्पपूर्वकवियदादिसृष्टिं, जीवभावेन तत्प्रवेशं, विचित्रनाम-रूप[6]व्याकरणं[6], तत्कृतानन्तविषयानुभवनिमित्तसुखदुःखभागित्वम्, अभोक्तृत्वेन तत्र स्थित्वा तन्नियमनेन अन्तर्यामित्वं, जीवभूतस्य स्वस्य कारणब्रह्मात्मभावानुसन्धानं, संसारमोक्षं, तदुप[7]देशशास्त्रं[7] च कुर्वाणेन, भ्रमितव्यम्—इत्यु[8]पदिश्यते[8]; तथा सति, उन्मत्तप्रलपितत्वापातात्॥

ततश्चेति। उत्कृष्टैः सामानाधिकरण्ये, अभेदस्य औपचारिकत्वशङ्का स्यात्। इह तु दाश-कितवादिनिकृष्टसामानाधिकरण्यम्, अभेदस्य तात्त्विकत्वं द्योतयतीत्यर्थः।

ब्रह्मणा....भ्रमितव्यम् इति अन्वयार्थः। प्रमाणान्तरागोचरार्थोपदेशो हि! परस्य बोधनार्थः। अतः प्रमाणान्तरागोचरं वदन् हि वेदः, 'त्वम् एवं विद्धि' इति बोधयति। तस्मात् अपरमार्थभ्रममुपदिशता वेदेन 'ब्रह्मणा भ्रमितव्यम्' इत्युक्तं भवति। न च तद्युक्तमित्यर्थः। **तथा सतीति**। भ्रमनिवृत्त्या लोकोज्जीवनप्रवृत्तेन वेदेन, अधिकभ्रमान्तरापादनं व्याहतमित्यर्थः (श्रु. प्र.)। **कुर्वाणेन भ्रमितव्यमिति**। कुर्वाणत्वेन भ्रमितव्यम्; 'कुर्वाणमिव ब्रह्म भ्राम्यति' इति नोपदिश्यते—इति पर्यवसितोऽर्थः॥ (भा. प्र.)।

---

[1] ब्रह्मांशः—घ. [2] सिद्धा—द. [3] भोक्तृत्वा—इ, न. [4] अन्यथासिद्धिः—थ, घ. अन्यथासिद्धः—वा. [5] आत्मनो तद्भाव—वा. आत्मनोऽतद्भाव—त, थ. आत्मनां तद्भेदाभाव—द. [6] करणं—आ, इ, थ. [7] देशं—द. [8] च्यते—ग.

[उपहितब्रह्मजीववादस्य निरासः]

'उपाध्यवच्छिन्नं ब्रह्म जीवः'—इत्यपि, न साधीयः ; पूर्वनिर्दिष्ट[1]नियाम्यत्वा[1]दिव्यपदेश[2]बाधा[2]देव । न हि ! देवदत्तादेः एकस्यैव, गृहाद्युपाधिभेदात् नियन्तृ-नियाम्यभावादिसिद्धिः । अतः उभयव्यपदेशोपपत्तये, 'जीवोऽयं ब्रह्मणोंऽशः' इत्यभ्युपेत्यम् ॥ ४२ ॥

[जीवस्य ब्रह्मांशतायाः श्रुतिकण्ठोक्तिसिद्धता]

२५९. मन्त्रवर्णात् ॥ २-३-४३ ॥

'पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि' (तै. आर. 3–12–3) इति मन्त्रवर्णाच्च, [3]ब्रह्मणोंऽशः[3] जीवः । अंशवाची हि ! 'पाद'शब्दः । 'विश्वाभूतानि' इति, [4]जीवानां[4] बहुत्वात् बहुवचनं [5]मन्त्रे[5] । [6]सूत्रेऽपि, 'अंशः'[6] इत्येकवचनं जात्यभिप्रायम् । 'नात्मा श्रुतेः' (ब्र. सू. 2–3–18) इत्यत्रापि, [7]एकवचनं जात्यभि[7]प्रायम् ।

'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'
(श्वे. उ. 6–13)

इत्यादिश्रुतिभ्यः, [8]ईश्वराद्भेदस्य[8] आत्मनां बहुत्व नित्यत्वयोश्च, अभिधीयमानत्वात् ।

उपाधिः—सत्योपाधिः ।

मन्त्रवर्णादिति । उभयव्यपदेशमुख्यत्वसिद्धिरूपश्रुत्यर्थापत्त्या अंशत्वं कल्पितं पूर्वसूत्रे । अत्र अंशत्वं कण्ठोक्तमित्युच्यते । **अंशवाचीत्यादि** । 'नित्यो नित्यानाम्' इति श्रुतिः, 'यदाग्नेयोऽष्टाकपालः' इतिवत् विशिष्टविधिपरा ; 'तद्गुणास्तु विधीयेरन् अविभागाद्विधानार्थे

[सूत्रार्थः ; आत्मा परमात्मनोंऽशभूतः ; **मन्त्रवर्णात्**—अंशत्वबोधकपादशब्दघटितात् 'पादोऽस्य' इति मन्त्रात् ॥]

पादोऽस्य विश्वाभूतानीत्येवमादेश्च मन्त्रतः ।
अंशा ब्रह्मण एवैते ह्यात्मान इति निश्चितम् ॥ (ब्र प. २५९)

---

[1] नियन्तृ-नियाम्यत्वा—थ. न. नियन्तृत्व-नियाम्यत्वा—च [2] भावा—न [3] ब्रह्मांशः—च. [4] जीवानां च—त. थ. [5] अत्र मन्त्रे—द. [6] अंशः—आ इ. [7] जात्यभि—त. थ. एकवचनं जात्याभि—आ. [8] ईश्वरभेदस्य—इ.

[आत्मसु भेदकाकारावगन्तारः]

एवं नित्यानामात्मनां बहुत्वे प्रामाणिके सति, ज्ञानस्वरूपत्वेन सर्वेषामेकरूपत्वेऽपि, भेदकाकारः, 'आत्म[1]याथात्म्यवेदनक्षमैरेव अवगम्यते। 'असन्ततेश्चाऽव्यतिकरः' (ब्र. सू. 2-3-48) इति, अनन्तरमेव च आत्मबहुत्वं वक्ष्यति ॥ ४३ ॥

[उक्तार्थस्य स्मृतिकण्ठोक्तिसिद्धता]

२६०. अपि स्मर्यते ॥ २-३-४४ ॥

'ममैवांऽशो जीवलोके जीवभूतः सनातनः' (भ. गी. 15-7)
इति जीवस्य पुरुषोत्तमांशत्वं स्मर्यते। अतश्च, अयम् अंशः ॥ ४४ ॥

[ब्रह्मणि जीवांशित्वकृतजीवदोषाश्रयत्वप्रसक्तिवारणम्]

अंशत्वेऽपि जीवस्य, ब्रह्मैकदेशत्वेन जीवगताः दोषाः ब्रह्मण एव ; इत्याशङ्क्याह—

२६१. प्रकाशादिवत्तु नैवं परः ॥ २-३-४५ ॥

'तु' शब्दः चोद्यं व्यावर्तयति। प्रकाशादिवत् जीवः परमात्मनोंऽशः।

न चेदन्येन शिष्टाः' इति न्यायात्। **एकरूपत्वेऽपीति**। अनेन जीवाद्वैतपरवाक्यानाम् आकारैक्यपरत्वं दर्शितम्। **अवगम्यत इति**। प्रत्यक्त्वेन पराक्त्वेन च भेदो गृह्यते इत्यर्थः ॥ ४३ ॥ ४४ ॥

[सूत्रार्थः ; **स्मर्यतेऽपि**—आत्मा परमात्मनः अंशभूत इति, भगवद्गीतास्मृतावप्युच्यते 'ममैवांऽशः' इति ॥]

ममैवांऽशो जीवलोक इति स्मृत्याऽपि चोच्यते।
वासुदेवस्यांऽश इति तस्य ब्रह्मशरीरता (ब्र. प. २६०)

[सूत्रार्थः ; **परः**—परमात्मा, **एवं न**—जीववत् दोषाश्रयो न, **प्रकाशादिवत् तु**—जीवस्य ब्रह्मांशता प्रकाशादेः दीपाद्यंशतावदेव ; न तन्त्वादेः पटाद्यंशतावत् ॥]

ब्रह्मांशत्वेऽपि जीवस्य जीवभावः परे न हि।
प्रभादीनां स्वभावस्तु न मण्यादौ यथा भवेत् ॥ (ब्र. प. २६२)

---

[1] आत्मत्व— द.

यथा—अग्न्यादित्यादेः भास्वतः, [1]भारूपः प्रकाशः[1] अंशो भवति; [2]यथा[2]-गवाश्वशुक्ल-कृष्णादीनां गोत्वादिविशिष्टानां वस्तूनां, गोत्वादीनि विशेषणानि अंशाः; यथा वा—देहिनः देव-[3]मनुष्यादेः[3], [4]देहोंऽशः[4]; तद्वत्।

[परिष्कृतम् अंशत्वम्; प्रकृतोपयोगश्च]

एकवस्त्वेकदेशत्वं हि! अंशत्वम्। विशिष्टस्य [4a]एकस्य[4a] वस्तुनः, विशेषणम् अंश एव। तथा च विवेचकाः [5]विशिष्टे वस्तुनि[5], 'विशेषणांशोऽयम्, विशेष्यांशोयम्' इति व्यपदिशन्ति। विशेषण [6]विशेष्ययोः[6] अंशांशित्वेऽपि, स्वभाववैलक्षण्यं दृश्यते; एवं जीव-परयोः विशेषण-विशेष्ययोः अंशांशित्वं, स्वभावभेदश्च उपपद्यते। तदिदमुच्यते—'नैवं परः'—इति॥

यथाभूतो जीवः; [7]न तथाभूतः[7] परः। यथैव हि! प्रभायाः प्रभावान् अन्यथाभूतः; तथा प्रभास्थानीयात् स्वांशात् जीवात्, अंशी परोऽपि अर्थान्तरभूतः इत्यर्थः।

[भेदाभेदव्यपदेशयोः विषयविवेकः]

एवं जीव-परयोः विशेषण-विशेष्यत्वकृतं [8]स्वभाव[8] वैलक्षण्यमाश्रित्य, भेदनिर्देशाः प्रवर्तन्ते। अभेदनिर्देशास्तु, [9]पृथ[9]क्सिद्ध्यनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रित्य, मुख्यत्वेनोपपद्यन्ते।

गवाश्वेति, [सूत्रे] आदिशब्दोपात्तम्। यथा वा देहिन इति। द्रव्ययोः अपृथक्सिद्ध-विशेषणभूतयोः अंशांशित्वं वदता, द्रव्ययोः शरीरात्मनोरपि अंशांशित्वमुक्तं भवतीत्यभिप्रायः। विशेषणविशेष्ययोरिति। बहुलत्व-सङ्कुचितत्व-विरलत्व-विस्तृतत्वादिरूपस्वभाववैलक्षण्यं दृश्यते इत्यर्थः॥

यथाभूत इति, वाचकत्वप्रकारमाह।

विशेष्यपर्यन्ताभिधानं प्रकाशादिष्वपि दृश्यते। यथा—'भानुः-भानुमान्, ज्योतिः-

---

[1] भारूपप्रकाशः—त. थ. [2] यथा च—इ. [3] मनुष्यादिः—च. [4] देहांशः—इ. [4a] एकस्य च—द. [5] विशिष्टवस्तुनि—द. [6] विशेष्यांशयोः—द. [7] तथाभूतः न—इ. घ. न. [8] भाव—इ. [9] अपृथ—द.

'तत् त्वमसि' (छां. उ. 6-8-7)

'अयमात्मा ब्रह्म' (बृ. उ. 6-4-5)

इत्यादिषु, 'तच्छब्द-ब्रह्मशब्द'वत्, 'त्वम्, अयमात्मा' इति [1]शब्दा अपि[1]; जीव[2]शरीरक[2]ब्रह्मवाचकत्वेन [3]एकार्था[3]भिधायित्वात्—इत्ययमर्थः, प्रागेव प्रपञ्चितः ॥

[उक्तस्य अंशांशिभावस्य स्मृतितो लाभः]

२६२. स्मरन्ति च ॥ २-३-४६ ॥

एवं प्रभा-प्रभावद्रूपेण, शक्ति-शक्तिमद्रूपेण, शरीरात्मभावेन च अंशांशिभावं जगद्-ब्रह्मणोः, पराशरादयः स्मरन्ति—

'एकदेशस्थितस्याऽग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥' (वि. पु. 1-22-56)

'यत् किञ्चित् सृज्यते येन सत्त्वजातेन वै द्विज! ।
तस्य सृज्यस्य सम्भूतौ तत् सर्वं वै हरेस्तनुः ॥' (वि. पु. 1-22-38)

इत्यादिना । चकारात् श्रुतयोऽपि,

'यस्याऽऽत्मा शरीरम्' (बृ. उ. मा. पा. 5-7-26)

इत्यादिना आत्म-शरीरभावेन अंशांशित्वं वदन्तीत्युच्यते ॥ ४६ ॥

ज्योतिष्मान्, तेजः—तेजस्वी' इत्यादि । 'त्वम् अयम् आत्मा' इति शब्दा अपि तच्छब्द-ब्रह्मशब्दतुल्यार्थाः इत्यर्थः । तत् इत्यारभ्य, अपीत्यन्तं प्रतिज्ञावाक्यम् । **जीवशरीरकेति** हेतुरुच्यते । **प्रपञ्चित इति** । अत्रैव वक्तव्यं सूत्राभिप्रेतं सर्वं, पूर्वमुक्तमित्यर्थः ॥

स्मरन्ति चेति । 'अपि स्मर्यते' इति सूत्रे अंशत्वमात्रे स्मृतिवचनमुक्तम्; अस्मिन् सूत्रे विशिष्टैकदेशविशेषणरूपांशत्वेऽपि, स्मृतिवचनमुच्यत इति भिदा । **चकारादिति** । श्रुति-स्मृतिवचनयोः द्वयोरपि वक्तव्यत्वे सति, दृष्टान्तोपादानमुखेन विशदीकारातिशयात्, स्मृतिवचनं सूत्रे कण्ठोक्तम् ॥ ४६ ॥

[सूत्रार्थः ; **स्मरन्ति च**—जीवादेः ब्रह्मांशत्वमीदृशं श्रुत्युक्तं, पराशरादयो मुनयः पुराणेषु स्मरन्त्यपि ॥]

एकदेशस्थितस्याऽग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथैवेदमिति स्मृतेः ॥ (ब्र. प. २६२)

---

[1] शब्दोऽपि—त. थ. [2] शरीर—द. [3] ऐकार्थ्य—त. थ.

[ब्रह्मांशत्वाविशेषेऽपि अधिकारादितारतम्ये युक्तिः]

एवं ब्रह्मणोंऽशत्वे, ब्रह्मप्रवर्त्यत्वे, [1]ज्ञत्वे च[1] सर्वेषां समाने, केषांचित् वेदाध्ययन-तदर्थानुष्ठानाद्यनुज्ञा केषांचित् [2]तत्परिहारः[2], केषांचित् [3]दर्शन-स्पर्शना[3]द्यनुज्ञा, केषांचित् [4]तत्परिहारश्च[4] शास्त्रेषु कथमुपपद्यते ? ; इत्याशङ्क्याह—

२६३. अनुज्ञा-परिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥ २-३-४७ ॥

सर्वेषां ब्रह्मांशत्व-ज्ञत्वादिना एकरूपत्वे सत्यपि ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादि-रूपशुच्यशुचिदेहसम्बन्धनिबन्धनौ अनुज्ञा-परिहारौ उपपद्येते ; ज्योतिरादिवत्—यथा अग्नेः अग्नित्वेन एक[5]रूपत्वेऽपि[5], श्रोत्रियागारात् अग्निराह्रियते ; श्मशानादेस्तु परिह्रियते ; यथा [6]च[6] अन्नादि, श्रोत्रियादेः अनुज्ञायते ; अभिशस्तादेस्तु परिह्रियते ॥ ४७ ॥

[जीवेषु ब्रह्मांशत्वनिबन्धनभोगसाङ्कर्यानवकाशः]

२६४. असन्ततेश्चाऽव्यतिकरः ॥ २-३-४८ ॥

ब्रह्मांश[7]त्वादिना[7] एकरूपत्वे सत्यपि, जीवानाम् अन्योन्यभेदात्, अणुत्वेन प्रतिशरीरं भिन्नत्वाच्च, भोगव्यतिकरोऽपि न [8]भवति[8] ।

अंशत्वे इति, एतदधिकरणार्थः ; ब्रह्मप्रवर्त्यत्वे इति, पूर्वाधिकरणार्थः, ज्ञत्वे इति, तत्पूर्वाधिकरणार्थश्चोक्तः ॥ ४७ ॥

असन्ततेरिति । सन्ततिः—समन्तात् ततिः, विभुत्वम् । तदभावः—असन्ततिः । अणुत्वम् । अन्योन्यभेदात् इति चशब्दसमुच्चितो हेतुर्दर्शितः ।

[सूत्रार्थः ; अनु—हारौ—जीवेष्वेव अनुमति-तन्निषेधौ, देहसंबन्धात्—शरीरपरि-ग्रहाद्विशेषात्, ज्योति वत्—अग्न्याद्यानयने स्थानविशेषादिवत् ॥]

ब्रह्मांशत्वेऽपि जीवानामनुज्ञा-परिहारयोः ।
उपपत्तिर्देहभेदादग्न्यादेरिव युज्यते ॥ (ब्र. प. २६३)

[सूत्रार्थः ; असन्ततेश्च—जीवानां विभुत्वाभावात्—अणुत्वादपि, (मिथोभिन्नत्वेन) अव्यतिकरः—मिथोभोगसाङ्कर्याभावः ॥]

प्रतिदेहं च भिन्नत्वादणुत्वेन च तत्र तु ।
सुखदुःखाव्यतिकरो निश्चितो मुनिसत्तमैः ॥ (ब्र. प. २६४)

---

[1] च ज्ञत्वे च—त, थ, च, द. [2] परिहारः—ग. [3] दर्शना—द. [4] परिहारश्च—ग.
[5] रूपत्वे सत्यपि—द. [6] वा—त, थ. [7] त्वेन—द. [8] सम्भवति—इ. घ. न.

भ्रान्तब्रह्मजीववादे च उपहितब्रह्मजीववादे च, जीव-परयोः जीवानां च भोग-व्यतिकरा[1]दयः सर्वे[1] दोषाः सन्तीत्यभिप्रायेण, स्वपक्षे भोगव्यतिकराभाव उक्तः ॥४८॥

[ब्रह्माज्ञानवादे भोगव्यवस्थाया अभावः]

ननु—भ्रान्त[2]ब्रह्मजीव[2]वादेऽपि, अविद्याकृतोपाधिभेदात् भोगव्यवस्थादय उपपद्यन्ते ; [3]अत[3] आह—

२६५. आभा(सा)स एव च ॥ २–३–४९ ॥

अखण्डैकरसप्रकाशमात्रस्वरूपस्य, स्वरूपतिरोधान[4]पूर्वकोपाधि[4]भेदोपपादनहेतुः आभास एव ; प्रकाशैकस्वरूपस्य प्रकाशतिरोधानं, प्रकाशनाश एवेति, प्रागेवोपपादितम् ॥

'आभासा एव' इति वा पाठः । तथा सति, हेतवः आभासाः । चकारात्,

'पृथगात्मानं प्रेरितारं च मत्वा' (श्वे. उ. 1–6)

'ज्ञाज्ञौ [5]द्वौ[5]' (श्वे. उ. 1–9)

'तयोरन्यः पिप्पलं स्वाद्वत्ति' (श्वे. उ. 4–6)

इत्यादिश्रुतिविरोधश्च । अविद्यापरिकल्पितोपाधि[6]भेदे हि[6] !, सर्वोपाधिभिरुपहितस्वरूपस्य एकत्वाभ्युपगमात्, भोगव्यतिकरः तदवस्थ एव ॥ ४९ ॥

भ्रान्तेति । परपक्षे भोगव्यवस्थानुपपत्तिरभिप्रेतेत्यर्थः । अविद्यादेः आश्रयभेदाभावात् तदनुपपत्तिः । 'नानाऽऽत्मानो व्यवस्थातः' इति सूत्रम् किं सुखादीनां स्वरूपभेदो व्यवस्था ? उत आश्रयभेदः ? । न प्रथमः ; आश्रयभेदानापादकत्वात् । न द्वितीयः ; हेतोः साध्याविशिष्टत्वात् इति कैश्चिदुच्यते । तन्न ; प्रतिसन्धानाभावरूपा व्यवस्थेत्यभिप्रेतत्वात् । तिरस्कारकाभावे सति प्रतिसन्धानम् आत्मैक्यव्यापकम् । तिरस्कारकाभावेऽपि अप्रतिसन्धानात् आत्मैक्यनिवृत्तिरित्यर्थः ॥ ४८ ॥

तदवस्थ एवेति । तिरोधानाद्येव नोपपद्यते ; उपपन्नेऽपि व्यवस्था नोपपद्यते इत्यर्थः ॥४९॥

[सूत्रार्थः ; (ब्रह्मस्वरूपस्य अविद्यातिरोधान—तत्कृतजीवभावयोः साधकत्वाभिमताः हेतवः), **आभासा एव**—दुष्टा एव ; न हेतवः ॥]

आभासा हेतवः सर्वे भवेयुरिति निश्चितम् ।
ब्रह्माभेदे तु जीवस्य तिरोधानादिकल्पने ॥ (ब्र. प. २६५)

---

[1] दयश्च—इ. [2] ब्रह्म—भा. जीव—च. [3] तत्र —ज. [4] पूर्वकौपाधि—द.
[5] द्वावजावीशानीशौ—वा. [6] भेदेऽपि—च.

[सत्योपाध्युपहितब्रह्मजीववादेऽप्यव्यवस्था]

पारमार्थिकोपाध्युपहितब्रह्मजीव[1]वादेऽपि[1], उपाधिभेदहेतुभूतानाद्यदृष्टवशात्, व्यवस्था भविष्यति ; इत्याशङ्क्याऽऽह—

२६६. अदृष्टानियमात् ॥ २-३-५० ॥

उपाधिपरम्पराहेतुभूतस्य अदृष्टस्याऽपि ब्रह्मस्वरूपाश्रयत्वेन, नियम[2]हेत्व[2]भावात्, अव्यवस्थैव ; उपाधिभिः अदृष्टैश्च, स्वसम्बन्धेन ब्रह्मस्वरूपच्छेदासम्भवात् ॥ ५० ॥

[अदृष्टहेतुभूतसङ्कल्पव्यवस्थयाऽपि भोगव्यवस्थाया असिद्धिः]

२६७. अभिसन्ध्यादिष्वपि चैवम् ॥ २-३-५१ ॥

अदृष्टहेतुभूताभिसन्ध्यादिष्वपि, उक्तादेव हेतोः अनियम एव ॥ ५१ ॥

वादेपीति, अपिशब्दार्थः, 'इदमप्यशङ्क्याह' इति। **उपाधिभिरिति।** उपाध्याश्रयस्य एकत्वात्, तस्य च अच्छेद्यत्वात्, व्यवस्थानुपपत्तिरित्यर्थः ॥ ५० ॥

चैवमिति। च शब्दः अवधारणे। एवमेवेत्यर्थः। **अभिसन्धिः**—सङ्कल्पः। **आदिशब्दात्** उद्योगानुष्ठानादिकं विवक्षितम्। **उक्तादेवेति।** अच्छेद्यत्वात् सर्वप्रदेशानां ब्रह्मस्वरूपभूतप्रदेशत्वादेवेत्यर्थः ॥ ५१ ॥

[सूत्रार्थः ; **अदृष्टस्य**—भोगव्यवस्थाहेतुतया सम्भाव्यमानस्य अदृष्टस्य, **अनियमात्**—नियमहेतुताया (एकस्मिन् अखण्डे ब्रह्मणि) वक्तुमशक्यत्वात्, भोगसङ्करः प्रसज्येत ॥]

अदृष्टजोपाधिमूलब्रह्मजीवात्मकल्पनम्।
अदृष्टानियमात् तेषां न सिध्येदिति निश्चितम् ॥ (ब्र. प २६६)

[सूत्रार्थः ; **अभिसन्ध्यादिष्वपि च**—अदृष्टहेतुषु सङ्कल्पादिष्वपि, **एवम्**—अनियमादेवोक्तविधात्, सङ्करोऽनिवार्य एव ॥]

अभिसन्धेस्त्वदृष्टादि जायते चेति चेन्नहि।
नियमस्त्वभिसन्ध्यादौ वक्तुं नैव भवेद्यतः ॥ (ब्र. प. २६७)

---

[1] वादे—न. [2] हेतुत्व—त, थ.

[उपाधिप्रदेशकृतभोगव्यवस्थानिरासः]

२६८. प्रदेशभेदादिति चेन्नान्तर्भावात् ॥ २-३-५२ ॥

यद्यपि-एकमेव ब्रह्मस्वरूपम्, तत् [1]छेदानर्हं[1] नानाविधोपाधिभिः सम्बध्यते; तथाऽपि-उपाधिसम्बन्धिब्रह्मप्रदेशभेदात्, उपपद्यत एव भोगव्यवस्था—इति चेत्!

[2]तन्न[2]; उपाधीनां [3]तत्र तत्र[3] गमनात्, सर्वप्रदेशानां सर्वोपाध्यन्तर्भावात्, व्यतिकरः तदवस्थ एव। प्रदेशभेदेन सम्बन्धेऽपि, सर्वस्य ब्रह्मप्रदेशत्वात्, [4]तत्तत्प्रदेश[4]-सम्बन्धि दुःखं ब्रह्मण एव स्यात्। पूर्वत्र,

'नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा' (ब्र. सू.)

'उपलब्धिवदनियमः' (ब्र. सू.)

[5]इत्याभ्यां सूत्राभ्यां[5], वेदबाह्यानां सर्वगतजीववादिनां दोष उक्तः। अत्र तु 'आभास-एव च' इत्यादिभिः सूत्रैः, वेदावलम्बिनाम् आत्मैकत्ववादिनां [6]दोष उच्यते[6] ॥ ५१ ॥

इति अंशाधिकरणम् ॥ ७ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये द्वितीयस्याऽध्यायस्य तृतीयः पादः ॥ ३ ॥

उपाधीनामिति, जीवानामन्यान्यभोगव्यतिकरमाह। प्रदेशभेदेनेति। एतेषां भोगादयो ब्रह्मणि स्युरित्यर्थः। एवं जीवेश्वरव्यतिकरः उक्तो भवति ॥ ५२ ॥

[सूत्रार्थः; प्रदेशभेदात्—ब्रह्मणि उपहितानुपहितप्रदेशभेदाभ्युपगमात् (व्यवस्थोपपद्यते) इति चेत् न—एवं शङ्कनं न युज्यते, अन्तर्भावात्—उपाधीनां स्थानान्तरप्राप्तौ सर्वेषामपि प्रदेशानाम् उपहितप्रदेशान्तर्गतत्वात् ॥]

अविद्योपहितो भागो जीवश्चेन्नियमो भवेत्।
नाऽन्तर्भावादिहोपाधेर्गमेऽनुपहितस्य च ॥ (ब्र. प. २६८)

[सूत्राणि— १ अंशो. २ मन्त्र. ३ अपि स्म. ४ प्रकाशा. ५ स्मर. ६ अनुज्ञा. ७ असन्त. ८ आभास. ९ अदृष्टा. १० अभिसं. ११ प्रदेश.]

इति अंशाधिकरणम् ॥ ७ ॥

तृतीयः पादः ॥ ३ ॥

—o—

---

[1] छेदनानर्हं—द. [2] न इति—इ. [3] तत्र—द. [4] तत्प्रदेश—न.
[5] इति द्वाभ्यां—इ, वा. [6] दोषाः उच्यन्ते—द.

श्रीभाष्ये द्वितीयस्याऽध्यायस्य
चतुर्थः पादः

अधिकरणार्थसूचनी

—o—

सं.	अधिकरणनामानि	सू. सं.	अर्थाः
(1)	प्राणोत्पत्त्यधिकरणम्	1 – 3	प्राणशब्दवाच्यानां इन्द्रियाणामपि वियदादिवत् ब्रह्मकार्यता ।
(2)	सप्तगत्यधिकरणम्	4 – 5	इन्द्रियाणां एकादशसङ्ख्यतासमर्थनम् ।
(3)	प्राणाणुत्वाधिकरणम्	6 – 7	इन्द्रियाणां अणुपरिणामतास्थापनम् ।
(4)	वायुक्रियाधिकरणम्	8–11	श्रेष्ठः प्राणो न वायुसामान्यं, तत्क्रियावा, किन्तु विशिष्टो वायुः ।
(5)	श्रेष्ठाणुत्वाधिकरणम्	12	मुख्यप्राणस्यापि अणुत्वमेव, न विभुत्वम् ।
(6)	ज्योतिराद्यधिष्ठानाधिकरणम्	13–14	जीवात्मनः अग्न्यादिदेवतानां च प्राणेन्द्रियादि-प्रवर्तकत्वं परमात्मसङ्कल्पायत्तम् ।
(7)	इन्द्रियाधिकरणम्	15–16	श्रेष्ठप्राणं विहायैव प्राणानां इन्द्रियरूपता ।
(8)	संज्ञामूर्त्तिक्लृप्त्यधिकरणम्	17–19	नामरूपव्याकरणात्मकप्रपञ्चव्यष्टिसृष्टेः त्रिवृत्कर्तृ-समानकर्तृकता ।

—o—

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ॥

श्री भगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये

द्वितीयस्या(अविरोधा)ध्यायस्य

(8) चतुर्थः प्राणपादः ॥ २-४ ॥ (अधि. ८, सू. १९)

[पादार्थः—प्राणादीनां जीवोपकरणानां ब्रह्मकार्यत्वचिन्ता]

(61) प्राणोत्पत्त्यधिकरणम् ॥ २-४-१ ॥ सू. (१-३)

[अधि-अर्थः —'प्राण'शब्दवाच्यानामिन्द्रियाणामपि वियदादिवत् ब्रह्मकार्यता]

२६९. तथा प्राणाः ॥ २-४-१ ॥

[पादसङ्गतिप्रदर्शनम्]

ब्रह्मव्यतिरिक्तस्य वियदादेः कृत्स्नस्य कार्यत्वेन उत्पत्तौ उक्तायां, जीवस्य कार्यत्वेऽपि, स्वरूपान्यथाभाव[1]लक्षणा[1] उत्पत्तिः अपोदिता। तत्प्रसङ्गेन जीवस्वरूपं [2]शोधितम्[2] ॥

ब्रह्मेति । ज्ञातृत्वादिकं निरूपयत् अधिकरणं, प्रसङ्गात् सङ्गतम् । तस्मात् तत्पूर्वाधिकरणेन पादसङ्गतिरित्यर्थः । जीवोत्पत्तिनिरूपणानन्तरं जीवोपकरणानामुत्पत्तिप्रकारो विशोध्यते—इति सङ्गतिः ॥

[यद्यपि] अवधारण-प्रतिज्ञानादिभिः सिद्धान्तः ; [तथापि] न अनारम्भणीयता [अस्याधिकरणस्य] ; 'प्राणा वाव ऋषयः' इति श्रुतेः अकृतनिर्वाहत्वात् । अत एव हि ! सिद्धान्तन्यायं प्रागुक्तमभिप्रेत्य, तत्र पृथक्सूत्रमनिबध्नन् प्राणविषय-श्रुतिनिर्वाहमेव सूत्रकारो न्यबध्नात् ॥

[सूत्रार्थः ; प्राणाः—इन्द्रियाणि, तथा—जीवो यथा तथैव, न उत्पद्यन्ते (पूर्व) ॥ प्राणाः—इन्द्रियाणि, तथा—वियदादीनि यथा ब्रह्मण एवोत्पद्यन्ते , तथा ब्रह्मण एवोत्पद्यन्ते, न नित्यानि (सि) ॥]

खादिवच्च त्विन्द्रियाणि ह्युत्पद्यन्ते परात्मनः ।
सृष्टेः पूर्वं स्थिताः प्राणा इति ब्रह्म परं हि ! तत् (ब्र. प २६९)

---

[1] रूपा—द. [2] विशोधितम्—इ, घ.

सम्प्रति — जीवोपकरणाना[1]मिन्द्रियाणां[1] प्राणस्य च, उत्पत्त्यादिप्रकारः-विशोध्यते ॥

[विचाराङ्गसंशयस्वरूपम्]

तत्र—किम् इन्द्रियाणां कार्यत्वं जीववत्? उत वियदादिवत्?—इति चिन्त्यते ॥

[पूर्वः पक्षः]

किं युक्तम्?; 'जीववदेव' इत्याह पूर्वपक्षी—'तथा प्राणाः'—इति। प्राणाः—इन्द्रियाणि। यथा जीवो नोत्पद्यते; तथा इन्द्रियाण्यपि नोत्पद्यन्ते।

कुतः? श्रुतेः। यथा जीवस्य अनुत्पत्तिः, श्रुतेरवगम्यते; तथा प्राणानामपि अनुत्पत्तिः, श्रुतेरेव अवगम्यते। '[2]तथा प्राणाः' इति[2] प्रमाण[3]मप्यति[3]दिश्यते ॥

[अतिदेशतः सिद्धरूपं श्रुतिप्रमाणम्]

का पुनरत्र श्रुतिः!

'असद्वा इदमग्र आसीत्। तदाहुः; किं तदाऽऽसीत्? इति। ऋषयो वाव ते अग्रे सदासीत्। तदाहुः के ते ऋषयः? इति। प्राणा वाव ऋषयः'

(शत. ब्रा. 6-1-1)

किमिन्द्रियाणि जीववत् नोत्पद्यन्ते? उत वियदादिवत् उत्पद्यन्ते?—इति। किम् 'एतस्माज्जायते' इत्यादिवाक्यं, तेषामुत्पत्तिं प्रतिपादयति? न? इति ॥ 'असद्वा इदम्' इत्यादिवाक्यं सृष्टेः प्राक् इन्द्रियसद्भावम् अवगमयति? न? इति। किं 'प्राण'शब्दः इन्द्रियपरः? उत परमात्मपरः?। 'प्राणा वाव ऋषयः' इत्यृषिशब्दः, प्राणशब्दस्य परमात्मपरतामवगमयति? न?—इति ॥

यदा नाऽवगमयति; तदा प्राणशब्दस्येन्द्रियपरत्वेन, 'असद्वे'त्यादिवाक्यस्य प्रागिन्द्रिय-सद्भावावगमकत्वात्, 'एतस्मा'दित्यस्य तदुत्पत्तिप्रतिपादनासामर्थ्यात्, इंद्रियाणि जीववत् नोत्पद्यन्ते—इति पूर्वः पक्षः ॥ यदा अवगमयति; तदा प्राणशब्दस्य परमात्मपरत्वेन, 'असद्वे'त्यादेः सृष्टेः प्रागिन्द्रियसद्भावानवगमकत्वात्, एतस्मादिति वाक्यस्य तदुत्पत्तिप्रतिपादन-सामर्थ्येन वियदादिवत् इन्द्रियाण्युत्पद्यन्ते—इति सिद्धान्तः।

अतिदिश्यत इति। न हि! सूत्रे श्रुतेरिति पठ्यते। तत् कथं 'श्रुतेः' इत्युच्यते?

---

[1] मिन्द्रियादीनां—द.　[2] तथा—द.　[3] मपि हि अति—अ.

इति, जगदुत्पत्तेः प्राक्, इन्द्रियाणां सद्भावः श्रूयते। 'प्राण' [1]शब्दे बहुवचनात्[1], इन्द्रियाण्येवेति निश्चीयते।

[श्रुतेः अन्यथानेयत्वाशङ्का—परिहारौ]

न च—इयं श्रुतिः,

'वायुश्चाऽन्तरिक्षं चैतदमृतम्' (बृ. उ. 4-3-3)

'सैषाऽनस्तमिता देवता ; यद्वायुः' (शातः ब्र. 6-1-1)

इतिवत्, चिरकालावस्थायित्वेन [2]परिणेतुं[2] शक्या ;

'असद्वा इदमग्र आसीत्' (शत. ब्र. 6-1-1)

इति, कृत्स्नप्रपञ्चप्रलयवेलायामपि अवस्थितत्वश्रवणात्। उत्पत्तिवादिन्यस्तु जीवोत्पत्तिवादिन्य इव नेतव्याः—इति ॥

[अधिकरणीयः सिद्धान्तः]

एवं प्राप्ते, अभिधीयते—वियदादिवदेव प्राणाश्च उत्पद्यन्ते।

कुतः ?

'सदेव सोम्येदमग्र आसीत्' (छां. उ. 6-2-1)

'आत्मा वा इदमेक एक एवाग्र आसीत्' (ऐत. उ. 1-1)

इत्यादिषु प्राक् सृष्टेः एकत्वावधारणात्,

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुण्ड. उ. 2-1-3)

इति इन्द्रियाणाम् उत्पत्तिश्रवणाच्च, प्रागवस्थानासम्भ[3]वात्[3] ॥

इति [शङ्काया उत्तरम्] बहुवचनादिति। 'प्राण'शब्दः [अन्यत्र] परमात्मवाचको दृष्ट इति, [नाऽत्र तथा नेतुं शक्यमित्यर्थः।]

एवं प्राप्त इति। अनेककारणवाक्यगतैकत्वावधारणस्वारस्यात्, 'ऋषि' शब्दस्य द्रष्टरि स्वारस्येन, दर्शनकरणे स्वारस्याभावाच्च, 'एतस्मा'दिति वाक्ये खादीनां मुख्यार्थेन जनिधातुना प्राणस्योत्पत्तिवचनस्वारस्यात्, उत्पत्त्यादिनिषेध-नित्यत्ववचनाभावात्, 'प्राण'-शब्दस्य परमात्मनि प्रयोगसद्भावाच्च, परमात्मैवोच्यते—इत्यर्थः ॥

---

[1] शब्दबहुवचनात्—त, थ. [2] नेतुं—वा. [3] वाच—त, थ.

[इन्द्रियोत्पत्तिवादस्य आत्मोत्पत्तिवादवैषम्यम्]

न च—आत्मोत्पत्तिवादवत्, इन्द्रियोत्पत्ति[1]वादाः[1] परिणेतुं [2]शक्याः[2]; आत्मवत् उत्पत्तिप्रतिषेधश्रुतीनां [2]नित्यत्व[2]श्रुतीनां च अदर्शनात्।

['असद्वा' इति प्रस्तुतस्य वाक्यस्य परमात्मपरता]

'असद्वा इदमग्र आसीत्' (शत. ब्रा. 6-1-1)

इत्यादिवाक्येऽपि, 'प्राण'शब्देन परमात्मैव निर्दिश्यते;

'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते'

(छां. उ. 1-11-5)

इति 'प्राण'शब्दस्य परमात्मन्यपि प्रसिद्धेः।

'प्राणा [4]वाव[4] ऋषयः' (शत. ब्रा. 6-1-1)

इति 'ऋषि'शब्दश्च, सर्वज्ञे तस्मिन्नेव युज्यते; न तु [5]अचेतनेष्विन्द्रियेषु[5] ॥ १ ॥

[प्राणर्षिशब्दयोः परमात्मपरत्वे बहुवचनविरोधशमनम्]

'ऋषयः, प्राणाः' [6]इति च[6] बहुवचनश्रुतिः, कथमनुपपद्यते?—इति चेत्। तत्राऽऽह—

२७०. गौण्यसम्भवात् तत्प्राक्छ्रुतेश्च ॥ २-४-२ ॥

न तु अचेतनेष्विन्द्रियेष्विति। अनन्तरसूत्रस्य बहुवचनमात्रनिर्वाहपरत्वेन, अन्यत् सिद्धान्तयुक्तिजातम् अर्थसिद्धमिति, सूत्रकाराभिप्राय इति, तदभिप्रेतं सर्वं स्वयमेवोक्तवान् ॥ १ ॥

[सूत्रार्थः; **गौणी**—'प्राणाः' इति बहुवचनात्मिका श्रुतिः अमुख्या, **असम्भवात्**—सृष्टेः प्राक्काले बहुत्वाश्रयभूतार्थासिद्धेः, **तत्प्राक्छ्रुतेश्च**—परमात्मन एकस्यैव प्राक्कालावस्थानश्रुतिसत्त्वादेव ॥]

प्राक्सृष्टेरेवमेवेति ब्रह्मैकपरिशेषणात्।
प्राणा ऋषय इत्येषा गौणी बहुवचः श्रुतिः ॥ (ब्र. प. २७०)

---

[1] वादः—इ. त. थ. [2] शक्यः—इ. त. थ. [3] बोधक—इ. वा. [4] वा—थ. द.
[5] अचेतनेन्द्रियेषु—द. [6] इति—वा.

बहुवचनश्रुतिः गौणी ; बह्वर्थासम्भवात्, तस्यैव परमात्मनः सृष्टेः प्रागवस्थानश्रुतेरेव ॥ २ ॥

['प्राण' शब्दस्य परमात्मपरत्वे उपष्टम्भकम्]

२७१. तत्पूर्वकत्वाद्वाचः ॥ २-४-३ ॥

इतश्च, 'प्राण'शब्दः परमात्मवचनः । वाचः—परमात्मव्यतिरिक्तविषयस्य नामधेयस्य, वाग्विषय[1]भूत[1]वियदादिसृष्टिपूर्वकत्वात् ।

'तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नाम-रूपाभ्यां व्याक्रियत' (बृ. उ. 3-4-7) **इति नाम-रूपभाजामभावात्, तदानीं वागादीन्द्रियकार्याभावाच्च, तानि न सन्तीत्यर्थः ॥ ३ ॥**

इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

'श्रुतेरेवे'त्येवकारेण सूत्रस्थः 'च'शब्दो व्याख्यातः ॥ २ ॥

इतश्चेत्यादि । आत्मा हि ! अदृष्टसंस्कारस्थितिकार्यदर्शनात् तदानीं कल्प्यते । एवं इन्द्रियकार्यं तदा दृश्यते चेत् ; इन्द्रियाण्यपि कल्प्येरन् । न च तत् इत्यर्थः । **तद्धेदमिति** । वाक्कार्यमुच्चारणम्, श्रोत्रकार्यं श्रवणम्, एवं तत्तत्कर्म-ज्ञानेन्द्रियविषयाभावात्, तत्तदिन्द्रियकार्यं नोपपद्यत इति ; न तदानीं कार्यकल्प्यानीन्द्रियाणीत्यर्थः ॥ ३ ॥

[सूत्राणि — १. तथा, २. गौण्य, ३. तत्पूर्व]

इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

[सूत्रार्थः ; **वाचः**—परमात्मव्यतिरिक्तविषयस्य नाम्नः, **तत्पूर्वकत्वात्**—परमात्मकृतसृष्टिपूर्वकत्वात्, तदा अन्येषामभावात् प्राणः—परमात्मैव ॥]

तत्सृष्टिपूर्वकत्वाच्च नामधेयस्य वस्तुनः ।
प्राणशब्दैर्नेन्द्रियाणि ह्युच्यन्त इति निश्चितम् ॥ (ब्र. प. २७१)

—o—

---

[1] भूतस्य—वा.

(62) सप्तगत्यधिकरणम् ॥ २-४-२ ॥ (सू. ४-५)

[अधि-अर्थ:—इन्द्रियाणां एकादशसङ्ख्यतासमर्थनम्]

२७२. सप्त गतेर्विशेषितत्वाच्च ॥ २-४-४ ॥

[विचारणोपयोगी संशयः]

तानि इन्द्रियाणि किं सप्तैव स्युः? अथवा एकादश?—इति चिन्त्यते। श्रुतिविप्रतिपत्तेः संशयः।

[पूर्वः पक्षः तत्र हेतुश्च]

किं प्राप्तम्? [1]सप्तेति[1]।

कुतः? गतेः, विशेषितत्वाच्च। गतिस्तावत्—जायमानेन म्रियमाणेन [2]च जीवेन[2] सह लोकेषु सञ्चरणरूपा, सप्तानामेव श्रूयते;

'सप्त इमे लोका येषु [3]चरन्ति[3] प्राणा गुहाशया निहिताः सप्त सप्त' (मुण्ड.उ. 2-1-8) इति। वीप्सा पुरुषभेदाभिप्राया। विशेषिताश्च ते गतिमन्तः प्राणाः स्वरूपतः;

सप्तेति। किम् इन्द्रियाणि सप्तैव? किम् एकादश? किं सप्तानां गतिश्रवणम् इन्द्रियाणां सप्तसङ्ख्यत्वम् अवगमयति? न? इति। तदर्थं गतिश्रवणाभावेऽपि हस्तादीनाम् इन्द्रियत्वमुपपद्यते? न? इति। 'दशेमे पुरुषे' इत्यादिश्रुतिः, किम् इन्द्रियाणाम् एकादशत्वे प्रमाणं? न? इति। [विचाराः] ॥

यदा न प्रमाणम्, यदा हस्तादीनाम् इन्द्रियत्वानुपपत्तिः; तदा गतिश्रुतेः सप्तसङ्ख्याव्यवस्थापकत्वात् सप्तेति स्यात्। यदा सा श्रुतिः एकादशत्वे प्रमाणम्; यदा हस्तादीनामिन्द्रियत्वोपपत्तिः; तदा गतिश्रवणस्य सप्तसङ्ख्याव्यवस्थापकत्वाभावात् एकादशेति सिध्यति॥ श्रुतीति। न वादिविप्रतिपत्तेः इत्यर्थः। वीप्सेति। 'सप्तप्राणाः प्रभवन्ति' इति पूर्वं सप्तानामुत्पत्तिश्रवणादिति भावः। स्वरूपत इति। स्वरूपतो विशेषिताः; न तु कार्यादिभि-

---

[सूत्रार्थः; सप्त—जीवेन सह सञ्चरमाणाः प्राणाः सप्तैव, गतेः—तावतामेव श्रुतौ गतिश्रवणात्, विशेषितत्वाच्च—'ज्ञानानि' इति विशिष्य स्वरूपनिर्देशादपि ज्ञापकात् ॥]

चरन्ति सप्त सप्तेति गतिश्रुत्या विशेषणात्।
ज्ञानानीति च सप्तैव त्विन्द्रियाणीति शङ्क्यते ॥ (ब्र. प. २७२)

---

[1] सप्तैवेति—द.　[2] जीवेत—द.　[3] सञ्चरन्ति—न.

'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥' (कठ उ. 6-10)

इति । शरीरान्तःसञ्चरणं विहाय मोक्षार्थगमनं—परमा गतिः । एवं जीवेन सह [1]जन्म[1]-मरणयोः, सप्तानामेव गतिश्रवणात्, योगदशायां '[2]ज्ञानानि[2]' इति विशेषितत्वाच्च, जीवस्य करणानि 'श्रोत्र-त्वक्-चक्षुर्-जिह्वा-घ्राण-बुद्धि-मनांसि सप्तैव इति गम्यते ॥

[हस्त-पादादिषु इन्द्रियव्यपदेशस्यौपचारिकता]

यानि त्वितराणि विषयाणां ग्राहकत्वेन,
'अष्टौ ग्रहाः' (बृ. उ. 5-2-9)
'सप्त वै शीर्षण्याः प्राणाः, द्वाववाञ्चौ' (तै. सं. 7-3-10-27) ?

इत्यादिषु चतुर्दशपर्यन्तानि, प्राणप्रतिपादकवाक्येषु वाक्-[3]पाणि-पाद[3]पायूपस्थाहङ्कार-चित्ताख्यानि इन्द्रियाणि प्रतीयन्ते ; तेषां जीवेन सह गतिश्रवणाभावात्, जीवस्य [4]अल्पाल्पोप[4]कारकत्वमात्रेण औपचारिकः 'प्राण'व्यपदेशः ॥ ४ ॥

[इन्द्रियाणामेकादशत्वनिर्णायकं सिद्धान्तसूत्रम्]

इति [5]प्राप्ते[5], प्रचक्ष्महे—

२७३. हस्तादयस्तु स्थितेऽतो नैवम् ॥ २-४-५ ॥

न सप्तैव इन्द्रियाणि ; अपि तु एकादश ; हस्तादीनामपि,

रित्यर्थः । **परमा गतिः** मोक्षार्थगमनरूपत्वात् योग इत्यर्थः । **ज्ञानानि**—ज्ञायते अनेन इति व्युत्पत्त्या, इन्द्रियाणीत्यर्थः । **इतराणि**, पूर्वैः सप्तभिः सहेत्यर्थः ॥ ४ ॥

[सूत्रार्थः ; **स्थिते**—शरीरे स्थिते जीवे, **अतः**—भोगोपकरणत्वात्, **हस्तादयः**—इन्द्रियत्वार्हाः पाणिपादादयः सन्त्येव, **अतः**—तेषामपि सत्त्वात्, **नैवम्**—ते सन्तीति न मन्तव्यम् ॥]

स्थिते जीवे शरीरे तु वाग्घस्ताद्युपकारतः ।
एकादश त्विन्द्रियाणीत्यतः सप्तैव नेति हि ॥ (ब्र. प्र. २७३)

---

[1] जनन—थ. [2] विज्ञानानि—त. [3] पादपाणि—द. [4] अल्पोप—इ. वा.
[5] एवं प्राप्ते— वा.

[1]शरीरे स्थिते[1] जीवे, तस्य भोगोपकरणत्वात्, कार्यभेदाच्च। दृश्यते हि! श्रोत्रादीनामिव, हस्तादीनामपि कार्यभेदः आदानादिः। अतः तेऽपि सन्त्येव। अतो नैवम्—अतः हस्तादयः न सन्तीत्येवं न मन्तव्यमित्यर्थः ॥

अध्यवसायाभिमानचिन्तावृत्तिभेदात् मन एव बुद्ध्यहङ्कारचित्तशब्दैः व्यपदिश्यत इति, [2]एकादश[2] इन्द्रियाणि। अतः,

'दशेमे पुरुषे प्राणाः, आत्मैकादशः' (बृ. उ. 5-9-4)

इति 'आत्म'शब्देन मनोऽभिधीयते।

'इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः' (भ. गी.)

'तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश।
एकादशं मनश्चात्र' (वि. पु. 1-2-47)

इत्यादिश्रुतिस्मृतिसिद्धा इन्द्रियसङ्ख्या स्थिता। अधिकसङ्ख्यावादाः, मनोवृत्तिभेदाभिप्रायाः। न्यूनव्यपदेशास्तु [3]तत्र तत्र[3], विवक्षितगमनादिकार्यविशेषप्रयुक्ताः ॥ ५ ॥

इति सप्तगत्यधिकरणम् ॥ २ ॥

'शरीरे' इति, अधिकरणस्य, 'जीवे' इति विशेष्यस्य च अध्याहारेण। भोगोपकरणत्वात् इति 'अतः' शब्दार्थमाह। अत्र [सूत्रे] 'अतः' शब्दः, काकाक्षिन्यायेन उभयत्रान्वितः। अध्यवेति। महदनुगृहीतं मनः, अध्यवसायम्; अहङ्कारानुगृहीतं मनः, अभिमानम्; पूर्वसंस्कारविशेषानुगृहीतं मनः, चिन्तां करोति। तत् तत्तदानीं बुद्ध्यादिशब्दैर्व्यपदिश्यते इत्यर्थः। अतः....इन्द्रियसंख्या व्यवस्थिता इत्युत्तरत्राऽन्वयः। 'हस्तादयस्तु' इत्येतावता सिद्धे, 'अतो नैवम्' इति सूत्रखण्डः, प्रमाणदार्ढ्यसूचनार्थमित्यभिप्रायः ॥ ५ ॥

[सूत्रे—१. सप्तगतेः, २. हस्तादयस्तु]

इति सप्तगत्यधिकरणम् ॥ १ ॥

—o—

[1] शरीरस्थिते—थ. [2] एकादशैव—द. [3] तत्र—द.

(63) प्राणाणुत्वाधिकरणम् ॥ २–४–३ ॥ (सू. ६–७)

[अधि-अर्थः—इन्द्रियाणाम् अणुपरिमाणतास्थापनम्]

२७४. अणवश्च ॥ २-४-६ ॥

[पूर्वः पक्षः सप्रमाणः]

'त एते सर्व एव समाः सर्वेऽनन्ताः' (बृ. उ. 3-5-13)
इति आनन्त्यश्रवणात्, विभुत्वं प्राणानाम्—

[सिद्धान्तरूपः सूत्राशयः]

इति प्राप्ते, अभिधीयते—

'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ. उ. 6-4-2)
इति, उत्क्रान्त्यादिश्रवणात् परिमितत्वे सिद्धे सति, उत्क्रान्त्यादिषु पार्श्वस्थैरनुपलभ्य

अणवश्चेति । किम् इन्द्रियाणि सर्वगतानि ? उत अणुपरिमाणकानि ? । आनन्त्य श्रवणम् उपासनार्थम् ? उत न ? इति । उत्क्रान्तिश्रवणम्, किम् अणुत्वमवगमयति ? न ? इति ।

अणुत्वावगमकत्वाभावे, तदानन्त्यश्रवणस्य उपासनार्थत्वाभावात्, [इन्द्रियाणि] सर्वगतानि । उत्क्रान्तिश्रवणस्य अणुत्वगमकत्वे सति, आनन्त्यश्रुतेः उपासनार्थत्वात्, अणुरूपाणि ।

* (अणवश्चेति । [परिमितत्वम् —परिच्छिन्नत्वम् । अनुपलभ्यमानत्वम्—उपलब्ध्यर्हस्थूलताराहित्यम्] उत्क्रान्त्यादिः परिच्छिन्नत्वहेतुः । पार्श्वस्थैरनुपलभ्यमानत्वं स्वच्छत्वहेतुः । परिच्छिन्नत्वे सति उपलब्ध्यर्हस्थूलताराहित्यात [भाष्ये हेतुनयोपात्तात्]. अत्र विवक्षितम् अणुत्वं, विशिष्टम् उपपादितं भवति ; न तु जीवात्मस्वरूपवत् अत्यन्ताल्पत्वम् । तत्र [जीवात्मस्वरूपे] 'वालाग्रे'त्यादिवाक्येन अत्यन्ताल्पत्वस्य उक्तत्वात्, तथाऽभ्युपगमः । [अतः] अत्रोक्तमणुत्वम्—

---

* श्रुतप्रकाशिकापङ्क्तिषु अन्वयक्लेशं विचिन्त्य यथामति अभिप्रायः स्वीकृतः ।

[सूत्रार्थः ; अणवश्च—इन्द्रियरूपाः प्राणाः अणुपरिमाणा एव ; अनूत्क्रमणादिगतेरभिधानात् ॥]

अणून्येवेन्द्रियाण्येतान्यनूत्क्रान्त्यादिभिः श्रुतैः ।
उपासार्थं त्वनन्ता इत्येतानि गदितानि हि ॥ (अ प. २७४)

मानत्वात्, अणवश्च प्राणाः । आनन्त्यश्रुतिस्तु,

'अथ यो हैताननन्तानुपास्ते' (बृ. उ. 3-5-13)

इति उपासनश्रवणात्, उपास्यप्राण[1]विशेषणभूतकार्य[1]बाहुल्याभिप्राया ॥ ६ ॥

२७५. श्रेष्ठश्च ॥ २-४-७ ॥

[मुख्यप्राणस्याऽपि उत्पत्तिमत्ता]

प्राणसंवादे, शरीरस्थितिहेतुत्वेन श्रेष्ठतया निर्णीतः [2]मुख्य[2]प्राणः,

'आनीदवातं स्वधया तदेकम्' (तै. सं. 2-8-9-9)

इति महाप्रलयसमये स्वकार्यभूतप्राणनसद्भावश्रवणात्, 'एतस्माज्जायते' इति जन्मश्रवणस्य, जीवजन्मश्रवणवत् उपपत्तेः, न उत्पद्यते—इत्याशङ्क्य,

प्राक् सृष्टेः एकत्वावधारणादिविरोधात्,

'एतस्माज्जायते प्राणः' (मुण्ड. उ. 2-1-3)

परिच्छिन्नत्वे सति अतिस्वच्छत्वम् । [अतिस्वच्छत्वं च—त्वक्-चक्षुर्भ्यामग्रहणौपयिकः सूक्ष्मताविशेषः ; न ग्रहणानुकूलो धर्मः ।] (भावप्रकाशिकायां तु, अतिस्वच्छत्वमिति न दृश्यते ; स्पर्शवत्त्वमिति दृश्यते । अनुद्भूतस्पर्शवत्त्वमिति च तद्विवरणम् । श्री उत्तमूर्वीरराघवाचार्यैस्तु 'अस्पर्शवत्त्वमिति पाठो वा ; आहङ्कारिकत्वेन स्पर्शप्रसक्त्यभावात् ।' इति टिप्पणी कृता) परिमाणावान्तरभेदे सत्यपि त्वगिन्द्रियस्य, सूक्ष्मशरीरव्यापि ईदृशमणुत्वम् अस्त्येव । 'त एते सर्व एव समाः' इति समत्वश्रुतिः कार्यकरत्वविषया । आनन्त्यम्—कार्यबाहुल्यम् । कार्यबाहुल्यविशेषणविशिष्टतया उपासनार्थम् आनन्त्यकथनमित्यर्थः ॥ ६ ॥

प्राणसंवादो नाम—छान्दोग्यप्रकरणविशेषः । अस्य [प्राणस्य] शरीरस्थितिहेतुत्वेन

[सूत्रार्थः ; श्रेष्ठश्च—मुख्यः प्राणोऽपि (वियदादिवत् इन्द्रियवच्च) उत्पद्यत एव ; न नित्यः, श्रुतेरेव ॥]

श्रेष्ठश्चोत्पद्यते प्राणस्त्वाकाशादिवदस्य हि ।
एतस्माज्जायते प्राण इत्युत्पत्तिश्रुतेरिह ॥ (ब्र. प. २७५)

---

[1] विशेषभूतकार्य—वा. विशेषकार्यभूत—थ. [2] मुख्य—न.

इति पृथिव्यादितुल्योत्पत्तिश्रवणात्, उत्पत्तिनिषेधाभावाच्च, जायत एव श्रेष्ठश्च प्राणः—इत्युच्यते ।

'आनीदवातम्' इति तु, [2]न जैवं[2] श्रेष्ठप्राणमभिप्रेत्योच्यते ; अपि तु परस्य ब्रह्मण एकस्यैव विद्यमानत्वमुच्यते ; 'अवातम्' इति तत्रैव श्रवणात् ।

पूर्वेणैव तुल्यन्यायत्वेऽपि पृथग्योगकरणम् [3]उत्तर[3]चिन्तार्थम् ॥ ७ ॥

इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

श्रेष्ठयम् । उत्पत्तिनिषेधाभावादिति । अनेन जीवजन्मतुल्यत्वं व्यावर्तितम् । तस्य हि उत्पत्तिर्निषिद्धा । आनीत्—'अन-प्राणने' इति धातोः लुङ् । जैवम्—जीवसम्बन्धि । सिद्धान्ते—'स्वधया' इत्यनेन, 'स्वधा त्वं लोकपावनी' इत्युपबृंहणात् लक्ष्मीविशिष्टत्वमुच्यते । अधिकशङ्कापरिहाराभावात् नेदमधिकरणान्तरम् । श्रुतिवाक्यं हि पूर्वपक्षावलम्बनम् । तत् तत्पूर्वाधिकरणे अस्मिन् सूत्रे च समानम् ॥ ७ ॥

[सूत्रे—१. अणव, २. श्रेष्ठ.]

इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

—o—

[2] न चैवं—द. [3] उत्तरत्र—द.

(64) वायुक्रियाधिकरणम् ॥ २-४-४ ॥ (सू. ८–११)

[अधि-अर्थः—श्रेष्ठः प्राणो न वायुसामान्यं, तत्क्रिया वा ; किंतु विशिष्टो वायुः]

२७६. न वायु-क्रिये पृथगुपदेशात् ॥ २-४-८ ॥

[विचारोपयोगी संशयः]

सोऽयं [1]श्रेष्ठः प्राणः[1], किं महाभूतद्वितीयवायुमात्रम् ? तस्य वा स्पन्द[2]रूपा-क्रिया[2] ? अथवा वायुरेव कंचन विशेषमापन्नः ?—इति विशये ;

[पूर्वः पक्षः सहेतुकः]

वायुरेव—इति प्राप्तम् ;

'यः प्राणः स वायुः' (बृ. उ. 5-1-5)

इति व्यपदेशात् । यद्वा—वायु[3]मात्रे[3] प्राणत्वप्रसिद्ध्यभावात्, उच्छ्वास-निश्वासादि-वायुक्रियायां प्राणशब्दप्रसिद्धेश्च, तत्क्रियैव—॥

[सिद्धान्तरूपं सूत्रोत्तरार्धवर्णनम्]

इति प्राप्ते ; 'न वायुमात्रं, न च तत्क्रिया'—इत्युच्यते ।

[4]कुतः ? पृथगुपदेशात्[4] ;

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुः' (मुण्ड. उ. 2-1-3)

न वाय्विति । किं मुख्यप्राणो वायुमात्रम् ? उत वायुक्रिया ? उत अवस्थाविशेषापन्नो वायुः ?—इति ॥ श्रुते-लोकप्रसिद्ध-पृथगुपदेश-तत्त्वसंख्याप्रसिद्धीनां कस्मिन् पक्षे सामञ्जस्यम् ? —इति । वायुमात्रत्वपक्षे वायुक्रियात्वपक्षे वा सामञ्जस्यमस्ति चेत् ! तयोरन्यतरस्य सिद्धिः । अवस्थाविशेषापन्नवायुपक्षे सामञ्जस्यं चेत् ! स एव सिद्धान्तः । एतस्मादिति । 'खं वायुः'

[सूत्रार्थः ; न वायु-क्रिये—मुख्यः प्राणः न केवलो वायुः ; न वा तदीया क्रिया, पृथगुपदेशात्—एतस्मादिति वाक्ये, प्राण-वाय्वोः । पृथग्द्रव्यतया ज्ञापनात् ॥]

पृथगुत्पत्तिवचनान्न वायुर्न च तत्क्रिया ।
विशेषं कंचनाऽऽपन्नः वायुः प्राण इति स्थितम् ॥ (ब्र. प. २७६)

---

[1] श्रेष्ठप्राणः—द. [2] रूपक्रिया—क, थ. [3] मात्रेण—थ. [4] पृथगुपदेशात्—द.

इति। तत एव पृथगुपदेशात्, वायुक्रियाऽपि न भवति प्राणः। न हि! तेजःप्रभृतीनां क्रिया, तैः सह पृथग्द्रव्यतया उपदिश्यते। 'यः प्राणः स वायुः', इति तु 'वायुरेव अवस्थान्तरमापन्नः प्राणः; न तेजःप्रभृतिवत् तत्त्वान्तरम्' इति ज्ञापनार्थम्। उच्छ्वास-निश्वासादावपि, 'प्राणः स्पन्दते' इति क्रियावति द्रव्य एव, 'प्राण'शब्द-[1]प्रसिद्धिः[1]; न क्रियामात्रे ॥ ८ ॥

[वायोः भूतान्तरत्वनिरासः]

किमयं प्राणः, वायोर्विकारः सन्, अग्निवद् भूतान्तरम्? नेत्याह—

२७७. चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ २-४-९ ॥

न अयं भूतविशेषः; अपि तु चक्षुरादिवत् जीवोपकरणविशेषः। तच्च उपकरणत्वम्, उपकरण[2]विशेषभूतैः[2] इन्द्रियैः सह शिष्ट्यादिभ्यः अवगम्यते। चक्षुरादिभिः सह अयं प्राणः शिष्यते, प्राणसंवादादिषु तत्सजातीयत्वे हि? तैः सह शासनं युज्यते।

इति पृथगुपदेशात्, न वायुमात्रमित्यर्थः। तत एवेति क्रियात्वप्रतिक्षेपः। तैः सहेत्यादि। द्रव्योत्पत्तिप्रकरणत्वात् तेजःप्रभृतीनां क्रियाः पृथगुपदिश्यन्ते चेत्! द्रव्यतयोपदिश्येरन्। न च तद्युक्तम्। अतः क्रियाया अद्रव्यत्वेन पृथगुपदेशासम्भवात्, पृथगुपदिष्टः प्राणः न वायुक्रियेत्यर्थः ॥ ८ ॥

किमयमिति। 'अवस्थाविशेषापन्नो वायुः प्राणः' इत्युक्तम्। अवस्थान्तरापत्तिश्च अग्न्यादेरिव वायुत्वावस्थाप्रहाणेनैव स्यात्! इति हि! शङ्का स्यात्। **प्राणसंवादादिष्वित्यादि**। श्रुतिभेदेन सहशिष्टयो बह्व्यः; विशिष्याऽभिधानानि च बहूनीत्यभिप्रायः। अनन्तरसूत्र-विवरिष्यमाणकरणतुल्योपकारसूचनार्थं वा बहुवचनम्। तत्सजातीयत्वे हीति, अग्न्यप्राय-न्याय (पू. मी. 2-2-12) मभिप्रेत्य।

[सूत्रार्थः; **चक्षुरादिवत् तु**—नेत्रादिवदेव मुख्यः प्राणोऽपि जीवोपकरणमेव; न भूतान्तरम्, **तत्स....भ्यः**—इन्द्रियैः सहशासनस्य, करणेषु विशिष्याऽभिधानस्य च दर्शनात् ॥]

वाय्ववस्थाभेद इति नाऽयं भूतान्तरं भवेत्।
इन्द्रियैः सह शिष्ट्यादेः प्राणसंवदनादिषु ॥ (अ. प. २७७)

---

[1] प्रसिद्धेः—थ. [2] भूतैः—न.

'प्राण'शब्दपरिगृहीतेषु करणेषु अस्य विशिष्याऽभिधानम्, 'आदि'शब्देन गृह्यते।

'अथ ह य एवायं मुख्यः प्राणः' (छां. उ. 1-2-7)

'योऽयं मध्यमः प्राणः' (बृ. उ 4-2-1)

इत्यादिषु [1]'विशिष्या'ऽभिधानात् ॥ ९ ॥

[मुख्यप्राणस्य चक्षुरादिवत् जीवोपकरणत्वसमर्थनम्]

चक्षुरादिवत् [2]'अस्याऽपि'[2] करणत्वे, [3]'तद्वत् अस्याऽपि'[3] जीवं प्रति उपकारविशेषक्रियया भवितव्यम्। सा तु न दृश्यते। अतः नाऽयं चक्षुरादिवद् भवितुमर्हति—इति चेत्! तत्राऽऽह—

२७८. अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ २-४-१० ॥

अकरणत्वात्—करणं क्रिया; [4]'अक्रियत्वात्'[4]। अस्य प्राणस्य जीवं प्रति उपकारविशेषरूपक्रियारहितत्वाच्च यो दोष उद्भाव्यते, स नाऽस्ति। यतः उपकारविशेष[5]रूपां शरीरे[5]न्द्रियधारणादिरूपां क्रियां दर्शयति श्रुतिः;

प्राणेति। 'एषु अयं मुख्यः' इत्युक्ते, मुख्यस्य सतः तत्सजातीयत्वं हि! प्रतीयते। यथा भूतत्वाप्रहाणेनैव शरीरावस्था भवति; तथा वायुत्वाप्रहाणेऽपि अवस्थान्तरं जीवोपकरणत्वलक्षणं दर्शितम्। जीवोपकरणत्वावस्थायाः वायुत्वाप्रहाणपूर्वकत्वं 'यः प्राणः स वायुः' इति श्रुत्याऽवगम्यते ॥ ९ ॥

अकरणत्वादिति पूर्वपक्षहेतुः।

[सूत्रार्थः; **अकरणत्वात् च**—मुख्यप्राणस्य जीवानुपकरणत्वं विशङ्क्य, **दोषः**—यो हि चक्षुरादिसाम्याभावः, सः, **न**—नैवाऽस्ति, **हि**—यतः, **तथा**—शरीरधारणादिरूपजीवोप क्रियामेव, **दर्शयति**—श्रुतिः स्पष्टयति ॥]

अक्रियत्वाद् दोष उक्तो यः प्राणस्य स नैव हि।
शरीरादेर्धारणादिक्रियावत्त्वेन कीर्तनात् ॥ (ब्र. प. २७८)

---

[1] विशेष्या—इ. [2] अस्य—द. [3] तद्वदेव—द. [4] अक्रियात्वात्—थ
[5] रूपशरीरे—वा.

'यस्मिन्नुत्क्रान्ते, इदं शरीरं पापिष्ठतरमिव दृश्यते, स [1]वः[1] श्रेष्ठः'

(छां. उ. 5-1-7)

इत्युक्त्वा, वागाद्युत्क्रमणेऽपि शरीरस्य इन्द्रियाणां [2]च स्थितिं[2] दर्शयित्वा, प्राणोत्क्रमणे शरीरेन्द्रियशैथिल्याभिधानात् । अतः प्राणापानव्यानोदानसमानाकारेण पञ्चधाऽवस्थितः अयं प्राणः, शरीरेन्द्रियधारणादिना जीवस्य उपकरोतीति, चक्षुरादिवत् करणत्वम् ॥ १० ॥

[प्राणापानादीनां तत्त्वान्तरत्वशङ्कानिरासः]

नन्वेवं—नामभेदात् कार्यभेदाच्च, प्राणापानादयः तत्त्वान्तराणि स्युः ! तत्राऽह—

२७९. पञ्चवृत्तिर्मनोवद् व्यपदिश्यते ॥ २-४-११ ॥

यथा कामादिवृत्तिभेदे तत्कार्यभेदेऽपि, न कामादिकं मनसस्तत्त्वान्तरम् ;

'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ. उ. 3-5-3)

इति वचनात् । एवम्,

क्रियामिति । शैथिल्याभिधानात् श्रुतिः क्रियां दर्शयति इत्यन्वयः ॥ १० ॥

पञ्चवृत्तिरिति । दृष्टान्त-दार्ष्टान्तिकद्वयमपि वेदसिद्धम् । **न कामादिकमिति** । 'कामादिक'मित्यनेन, कामादिहेतुर्मन उच्यते—इति द्रष्टव्यम् (भा.प्र.) **कामः**—इच्छा । **विचिकित्सा**—सन्देहः । **श्रद्धा**—त्वरा । **धीः**—चिन्ता । कामादयः ज्ञानावस्थाविशेषाः

[सूत्रार्थः ; **मनोवत्**—मनः एकमेव सदपि, यथा स्वकीयवृत्तिविशेषतः काम-सङ्कल्पादि-नानानामवद्भवतीति, 'कामः....सर्वं मन एव' इति श्रुतौ व्यपदिश्यते तथा ; प्राणः एक एव सन्नपि. **पञ्चवृत्तिः**—स्वकीयं वृत्तिपञ्चकमाश्रितः सन् , **व्यपदिश्यते**—प्राणापानादिनाना नामभिः श्रुत्यादौ व्यवह्रियते ॥

कामादिवृत्तिभेदेन मनः सङ्कीर्त्यते यथा ।
तथैकः पञ्चधा वृत्तेः प्राणापानादिरुच्यते ॥ (ब्र. प. २७९)

---

[1] वै—द. [2] स्थितिं—घ, ङ, च, ठ.

'[1]प्राणोऽपानो व्यान उदानः[1] समान....इत्येतत् सर्वं प्राण एव' (बृ.उ. 3-5-3) इति वचनात्, अपानादयोऽपि [2]प्राणस्यैव[2] वृत्तिविशेषाः; न तत्त्वान्तरम्—इत्यवगम्यते ॥ ११ ॥

इति वायु-क्रियाधिकरणम् ॥ ४ ॥

तत्तदवस्थज्ञानहेतुर्मन इति, इदं तैः शब्दैरुच्यते । तत्तद्धेतुत्वं मनोऽवस्था ॥ [अपानादयोऽपीति । स्थानविशेषवृत्त्यवच्छिन्नप्राण एव अपानादिव्यपदेशं लभत इति भावः ॥ (भा.प्र.)] ॥ ११ ॥

[सूत्राणि—१ न वायु. २ चक्षुरा. ३ अकरण. ४ पञ्चवृ]

इति वायुक्रियाधिकरणम् ॥ ४ ॥

—o—

---

[1] प्राणापानो व्यानोदानः—न. [2] प्राणस्य—त, थ.

(65) श्रेष्ठाणुत्वाधिकरणम् ॥ २-४-५ ॥

[अधि–अर्थः—मुख्यप्राणस्याप्यणुत्वमेव ; न विभुत्वम्]

२८०. अणुश्च ॥ २–४–१२ ॥

अणुश्चाऽयम्, पूर्ववत् उत्क्रान्त्यादिश्रवणात्,

'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ. उ. 6-4-2)

इत्यादिषु । अधिकाशङ्का तु—

'सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण' (बृ. उ. 3-3-22)

'प्राणे सर्वं प्रतिष्ठितम्' (प्रश्न. उ. 2-6)

'सर्वं हीदं प्राणेनाऽऽवृतम्' (ऐत. आर. उ. 2-1-6)

इत्यादिश्रवणात्, 'महापरिमाणः' इति ।

परिहारस्तु—उत्क्रान्त्यादिश्रवणात् परिच्छिन्नत्वे निश्चिते, सर्वस्य प्राणिजातस्य प्राणायत्तस्थितित्वेन वैभववादोपपत्तिः—इति ॥ १२ ॥

इति श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥

अणुश्चेति । किम् अयं प्राणः सर्वगतः ? उत अणुः ? । किं 'सम एभिस्त्रिभिर्लोकैः' इति आनन्त्यव्यपदेशः विभुत्वं गमयति ? न ? इति । उत्क्रान्तिश्रवणम् आनन्त्यस्य गौणतामवगमयति ? न ? इति ॥

यदा नाऽवगमयति, तदा ; आनन्त्यव्यपदेशस्य विभुत्वगमकत्वात्, सर्वगतः । यदा गौणत्वं गमयति, तदा ; आनन्त्योक्तेर्गौणत्वात् अणुरिति ॥

'सम एभिस्त्रिभिः' इत्यादिवाक्यानि नैकत्र क्रमपठितानि । 'श्रेष्ठश्च' इति सूत्रे श्रुत्या पूर्वपक्षोत्थानेऽपि परिहारः पूर्वाधिकरणेन तुल्यः । एकत्वावधारणादिभिः उत्पत्तिमत्त्वे सिद्धे सृष्टेः प्रागवस्थानवादिवाक्यस्य ब्रह्मपरत्वोपपादनात्, 'अणवश्च' इत्यानन्त्यश्रुतेः उपासनार्थतया निर्वाहः कृतः । न तथाऽस्य निर्वाह इति, इदम् अधिकरणान्तरम् ॥ १२ ॥

इति श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥

[सूत्रार्थः ; **अणुश्च**—मुख्यः प्राणोऽपि अणुपरिमाण एव ; न महापरिमाणः ॥]

प्राणोऽनूत्क्रामतीत्यादिश्रुत्या प्राणोऽप्यणुर्भवेत् ।
महत्त्व शङ्कितं यत्तु तद् वैभवपरं भवेत ॥ (ब्र. प. २८०)

(66) ज्योतिराद्यधिकरणम् ॥ २-४-६ ॥ (सू. १३-१४)

[अधि-अर्थः—जीवात्मनः अग्न्यादिदेवतानां च प्राणेन्द्रियादिप्रवर्तकत्वं परमात्मसङ्कल्पायत्तम्]

२८१. ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात् ॥ २-४-१३ ॥

[अवान्तरसङ्गतिः, प्रकृतविषयशोधनं च]

सश्रेष्ठानां प्राणानां ब्रह्मण उत्पत्तिः, इयत्ता, परिमाणं च—उक्तम्। तेषां प्राणानाम् अग्न्यादिदेवता[1]धिष्ठितत्वं च[1], पूर्वमेव—

'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' (ब्र. सू. 2-1-5)

इत्यनेन सूत्रेण, प्रसङ्गादुपपादितम्। [2]जीवस्य च[2] स्वभोगसाधनानामेषामधिष्ठातृत्वं लोकसिद्धम्।

'एवमेवैष [3]एतान् प्राणान्[3] गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते'

(बृ. उ. 4-1-18)

इत्यादिश्रुतिसिद्धं च।

[प्रकृतोपयोगी संशयः, पूर्वपक्षश्च]

तदिदं जीवस्य अग्न्यादिदेवतानां च प्राणविषयम् अधिष्ठानं, किं स्वायत्तम्? उत परमात्मायत्तम्?—इति विशये,

---

इयत्ता—सङ्ख्या। परिमाणम्—सङ्ख्यातानां प्रत्येकं परिमितिः। जीवस्य अग्न्यादिदेवतानां च प्राणविषयम् अधिष्ठानम्, किं स्वायत्तम्? उत परमात्मायत्तम्?। तेषां तत्र नैरपेक्ष्यप्रतीतिः समीचीना? उत भ्रान्तिमूला?—इति।

समीचीनत्वे स्वायत्तता। भ्रान्तिमूलत्वे परमात्माधीनता।

[सूत्रार्थः ; प्राणवता—जीवात्मना सह, ज्योतिरादीनाम्—अग्निप्रभृतीनां देवतानाम्, अधिष्ठानम्—प्राणेन्द्रियादिप्रवर्तकत्वम्, तदामननात् तु—परमात्मनः सङ्कल्पादेव भवति, शब्दात्—तज्ज्ञापकात् शास्त्रात् सिध्यति ॥]

ज्योतिरादेस्तु जीवेन सङ्कल्पात् परमात्मनः।
इन्द्रियादेरधिष्ठानं शब्दादेवावगम्यते ॥ (ब्र. प. २८१)

---

[1] धिष्ठितत्वं—द. [2] जीवस्य—थ. [3] एतान्—द.

नैरपेक्ष्यात् स्वायत्तम् ;

[सिद्धान्तमुखेन सूत्रार्थवर्णनम्]

इति प्राप्ते, उच्यते—'ज्योतिराद्यधिष्ठानम्'—इति ॥ प्राणवता-जीवेन सह, ज्योतिरादीनाम्—अग्न्यादिदेवतानां प्राणविषयम् अधिष्ठानम्, तदामननात्—तस्य [1]परमात्मनः[1] आमननात् भवति। आमननम्—आभिमुख्येन मननम् । परमात्मनः सङ्कल्पादेव भवतीत्यर्थः ॥

कुत एतत् ? शब्दात् । इन्द्रियाणां [2]साभिमानि[2]देवतानां, जीवात्मनश्च [3]स्वकार्येषु[3] परमपुरुषमनना[4]यत्तत्व[4]शास्त्रात् । यथा अन्तर्यामिब्राह्मणादिषु—

'योऽग्नौ तिष्ठन् अग्नेरन्तरः, यमग्निर्न वेद, यस्याऽग्निः शरीरम्, योऽग्निमन्तरो-यमयति, सत आत्माऽन्तर्याम्यमृतः' (बृ.उ. 5-7-9)

'यो वायौ तिष्ठन्' (बृ. उ. 5–7–11)

'य आदित्ये तिष्ठन्' (बृ. उ. 5-7–13)

'य आत्मनि तिष्ठन्' (बृ. उ. मा. पा. 5–7–26)

'यश्चक्षुषि तिष्ठन्' (बृ. उ. 5–7–22)

इत्यादि । यथा च —

'भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः ॥
भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चमः ॥' (तै. उ. आन. 8–1)

इति । [5]तथा[5]—

'एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः'
(बृ. उ. 5–8–8)

इत्यादि ॥ १३ ॥

नैरपेक्ष्यात्—जीवस्याऽप्याराध्यत्वात् तस्य अभिमतफलप्रदत्वादिति भावः ॥ जीवस्य परायत्तकर्तृत्वे सिद्धेप्युपादानं, दृष्टान्ततया ॥ १३ ॥

---

[1] परात्मनः—न. [2] स्वाभिमानि—द. [3] कार्येषु—त. थ. [4] यत्तत्वं—त.
[5] तथा च—न.

[सर्वेषां परमात्माधिष्ठितत्वनैयत्यम्]

२८२. तस्य च नित्यत्वात् ॥ २-४-१४ ॥

सर्वेषां परमात्माधिष्ठितत्वस्य नित्यत्वात्—स्वरूपानुबन्धित्वेन नियतत्वाच्च, तत्सङ्कल्पादेव एषामधिष्ठातृत्वम् अवर्जनीयम् ।

'तत् सृष्ट्वा ; तदेवाऽनुप्राविशत् । तदनुप्रविश्य ; सच्च त्यच्चाऽभवत् ।।' (तै. उ. आन. 6-2, 3)

इत्यादिना, परमपुरुषस्य नियन्तृत्वेन [1]सर्वचिद[1]चिद्वस्त्वनुप्रवेशः, स्वरूपानुबन्धी श्रूयते ।। स्मर्यते च—

'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।' (भ. गी. 10-42)

इति ।। १४ ।।

इति ज्योतिराद्यधिष्ठानाधिकरणम् ।। ६ ।।

[नित्यत्वादिति । 'तदामननाद्भवति' इति यद्भवनं प्रतीतं तदेव परमात्माधिष्ठितत्वं, 'तस्य' इति परामृश्यते इत्यर्थः ।। (भा. प्र.)]

इत्यादिना इति 'आदि'शब्देन 'स ईशोऽस्य जगतो नित्यमेव' इत्यादि विवक्षितम् । अग्न्यादीनां देवतानां स्वरूपे स्वतः सिद्धे, इन्द्रियाद्यधिष्ठानमेव परायत्तमिति न कथ्यते ; अपि तु तेषां सत्ताऽपि परमात्मायत्ता ; किं पुनः इन्द्रियाद्यधिष्ठानस्य परमात्मायत्तत्वमित्यर्थः । **विष्टभ्येति** । 'अविशेषेण कृत्स्नं जगदवष्टभ्य' इति वचनात् जगत्त्वप्रयुक्तं भगवदायत्तत्वमिति सिद्धम् ।। १४ ।।

[सूत्रे—१. ज्योतिरा, २. तस्य च.]

इति ज्योतिराद्यधिष्ठानाधिकरणम् ।। ६ ।।

[सूत्रार्थः ; **तस्य च**—परमात्माधिष्ठितत्वस्य च, **नित्यत्वात्**—स्वरूपकृतत्वतः नियतत्वात्, अधिष्ठानं परमात्मसङ्कल्पकृतमेव ।।]

परात्माधिष्ठितत्वस्य नित्यत्वाज्जगतां सताम् ।
अवर्जनीयसङ्कल्पादधिष्ठानं ततो भवेत् ।। (ब्र. प. २८२)

—o—

---

[1] चिद—द.

(67) इन्द्रियाधिकरणम् ॥ २-४-७॥ (सू. १५, १६)

[अधि-अर्थः—श्रेष्ठप्राणं विहायैव प्राणानां इन्द्रियरूपता]

२८३. [1]त इन्द्रियाणि[1] तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥२-४-१५॥

[विचारोपयोगी संशयः]

किं सर्वे 'प्राण'शब्दनिर्दिष्टाः इन्द्रियाणि ? उत श्रेष्ठप्राणव्यतिरिक्ता एव ?—इति विशये,

[पूर्वः पक्षः]

'प्राण'शब्दवाच्यत्वात् करणत्वाच्च, सर्वे एव इन्द्रियाणि—

[सिद्धान्तमुखेन सूत्रार्थविवरणम्]

इति प्राप्ते, उच्यते ; श्रेष्ठप्राणव्यतिरिक्ता एव प्राणाः इन्द्रियाणि ।

कुतः ? श्रेष्ठादन्येष्वेव प्राणेषु तद्व्यपदेशात् ।

'इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः' (भ. गी. 13-5)

इत्या[2]दिभिर्हि[2] ! चक्षुरादिषु [3]समनस्केष्वेव[3] 'इन्द्रिय'शब्दो व्यपदिश्यते ॥ १५ ॥

[प्राणे पृथक्त्वश्रवणं इन्द्रियवैलक्षण्यं च उक्तार्थस्थापकम्]

२८४. भेदश्रुतेर्वैलक्षण्याच्च ॥ २-४-१६ ॥

त इन्द्रियाणीति । किं सर्वे प्राणाः इन्द्रियाणि ? उत मुख्यप्राणव्यतिरिक्ताः ?—इति । किं श्रोत्रादिषु मुख्यप्राणे च 'प्राण'शब्दः, एकनिमित्तेन वर्तते ? उत निमित्तभेदेन ?—इति ।

यदा एकनिमित्तेन तदा सर्वे प्राणाः इन्द्रियाणि । यदा निमित्तभेदेन ; तदा मुख्यप्राणव्यतिरिक्ताः इन्द्रियाणि ॥ १५ ॥

[सूत्रार्थः ; श्रेष्ठादन्यत्र ते—श्रेष्ठप्राणादितरे प्राणा एव, इन्द्रियाणि —इन्द्रियपदवाच्याः तद्व्यपदेशात्—तेष्वेव इन्द्रियपदप्रयोगदर्शनात् ॥]

करणत्वेऽपि सर्वेषां श्रेष्ठादन्यत्र शंसनात् ।
इन्द्रियाणीति, न श्रेष्ठ इन्द्रियं भवति ह्यसौ ॥ (ब्र प. २८३)

[सूत्रार्थः ; भेदश्रुतेः—प्राणे अन्तर्बाह्येन्द्रियपार्थक्यस्य श्रुतौ अवगतेः, वैलक्ष्यण्याच्च—प्राणवृत्तौ इन्द्रियवृत्तिवैजात्याच्च, पूर्वोक्तोऽर्थ एव युक्तः ॥]

समनस्केन्द्रियेभ्योऽस्य भेदेनोत्पत्तिशंसनात् ।
सुषुप्तौ च प्राणवृत्तेरुपलब्ध्या विशेषतः ॥ (ब्र. प. २८४)

---

[1] इन्द्रियाणि तु—श. [2] दिभिः—न. [3] समनस्केषु—द.

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुण्ड. उ. 2-1-3)
इत्यादिषु इन्द्रियेभ्यः प्राणस्य पृथक्श्रवणात्, प्राणव्यतिरिक्तानामेव इन्द्रियत्वमवगम्यते। मनसः पृथक्श्रवणेऽपि, [1]तस्य अन्यत्र[1] इन्द्रियान्तर्भाव उक्तः;
'मनःषष्ठानीन्द्रियाणि' (भ. गी. 15-7)
इत्यादौ।

वैलक्षण्यं च चक्षुरादिभ्यः श्रेष्ठप्राणस्य उपलभ्यते। सुषुप्तौ हि! प्राणस्य वृत्तिरुपलभ्यते; चक्षुरादीनां तु वृत्तिः नोपलभ्यते। कार्यं च चक्षु[2]र्वागादीनां[2] समनस्कानां, ज्ञान-कर्मसाधनत्वम्। प्राणस्य तु शरीरेन्द्रियधारणम्।

[इन्द्रियाणां प्राणवद्व्यपदेश्यत्वे हेतुः]

प्राणाधीनधारणत्वात्तु इन्द्रियेषु 'प्राण'शब्दव्यपदेशः। तथा च श्रुतिः—
'[3]त एतस्यैव[3] सर्वे रूपमभवन्, तस्मादेत [4]एतेनाऽऽख्या[4]यन्ते' (बृ.उ. 3-5-21)
इति। रूपम[5]भवन्—शरीरमभवन्[5]। तदधीनप्रवृत्तयोऽभवन्—इत्यर्थः॥ १६॥

इति इन्द्रियाधिकरणम्॥ ७॥

भेदश्रुतेरिति। 'इत्यादौ' इत्यत्र 'आदि'शब्देन, 'इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः' इत्यादि विवक्षितम्॥

सुषुप्तावित्यादि। सुषुप्तौ वृत्त्युपलम्भवैलक्षण्यं, शरीरेन्द्रियधारणरूपकार्यवैलक्षण्यं, 'प्राण'शब्दप्रवृत्तिनिमित्तवैलक्षण्यं चेत्यर्थः॥ चक्षुरादीनां प्राणशब्दबोध्यत्वं लाक्षणिकम्; मुख्यप्राणस्य तु मुख्यम्। भेदश्रुतेर्वैलक्षण्याच्चेत्येकं सूत्रमिति युक्तम्। वैलक्षण्यानुगृहीतश्रुतेरेव हेतुत्वात्। हेतुभेदे हि! सूत्रभेदोपपत्तिः। मनस इव गोबलीवर्दन्यायेन भेदनिर्देशसम्भवात्। तद्व्यावर्तकाकारान्तरेण वैलक्षण्ये सिद्धे हि! भेदश्रुतिः स्थेयसी स्यात्॥ १६॥

[सूत्रे—१. त इन्द्रियाणि, २. भेदश्रुतेः]

इति इन्द्रियाधिकरणम्॥ ७॥

—o—

[1] अन्यत्र—द. [2] रादीनां—च. [3] एतस्यैव—थ. [4] एतेन व्याख्या—त. थ. एतेनाऽऽप्या—द. [5] भवन्—थ.

(68) संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ २-४-८ ॥

[अधि-अर्थः—नाम रूपव्याकरणात्मकप्रपञ्चव्यष्टिसृष्टेः त्रिवृत्कर्तृसमानकर्तृकता]

२८५. संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २-४-१७ ॥

[पेटिकासङ्गतिः]

भूतेन्द्रियादीनां समष्टिसृष्टिः, जीवानां कर्तृत्वं च, परस्माद् ब्रह्मणः—इत्युक्तं पुरस्तात्। जीवानां स्वेन्द्रिया[1]धिष्ठानं च[1] परायत्तम्—इति च, अनन्तरं स्थिरीकरणाय स्मारितम्।

पुरस्तात्—तृतीये पादे। अनन्तरम्—अस्मिन् पादे पूर्वस्मादपि पूर्वाधिकरणे। स्थिरीति। देवानामपि परायत्तप्रवृत्तित्वनिर्णयेन जीवानां परायत्तं कर्तृत्वं स्थिरं भवति। तदर्थं तदेव दृष्टान्ततया स्मारितमित्यर्थः। तृतीयपादादारभ्य इतः पूर्वमेका पेटिका। तत्र भूतेन्द्रिय-समष्टिसृष्टिनिरूपणम्। अथ व्यष्टिसृष्टिनिरूपणमिति पेटिकासङ्गतिः। व्यष्टेश्च जीवोपकरण-रूपत्वात् तत्सृष्टिनिरूपणमिति पादसङ्गतिः। पूर्वाधिकरणे समष्टिसृष्टेः परमात्मकर्तृकत्वमुक्तम्। अथ व्यष्टिसृष्टिः जीवकर्तृकतया प्रतीयत इति, शङ्कया अवान्तरसङ्गतिः। पूर्वपादोक्तसमष्टि-सृष्टिनिरूपणेन व्यष्टिसृष्टिनिरूपणस्य सङ्गतिः। अन्यान्यधिकरणानि तु प्रसक्तानुप्रसक्तिकया निरूपितानीति एतत् कण्ठोक्तम्॥

ब्रह्मणः साक्षात्सर्वकारणत्वं श्रुतम् उपपद्यते? उत न? इति संशयः। तदर्थं व्यष्टिनाम-रूपव्याकरणं, किं हिरण्यगर्भमात्रकर्तृकम्? उत तदवस्थब्रह्मकर्तृकम्? इति। तदर्थम् 'अनेन जीवेन' इति जीवासामान्यकर्तृकत्वश्रुतिः, किं जीवसमष्ट्याश्रयकेवलहिरण्यगर्भकर्तृकत्वमवगमयति? उत जीवमात्रविशिष्टपरमात्मकर्तृकत्वम्? इति। तदर्थं केवलहिरण्यगर्भकर्तृकत्वे त्रिवृत्करण-

---

[सूत्रार्थः ; संज्ञामूर्तिक्लृप्तिः—नामरूपव्याकरणात्मिका व्यष्टिसृष्टिः, त्रिवृत्कुर्वतस्तु—त्रिवृत्करणात्मकसमष्टिसृष्टिनिर्वोढुः परमात्मन एव ; न केवलं हिरण्यगर्भस्य, उपदेशात्—परमात्मकर्तृकत्वेनैव श्रुतौ ज्ञापनात् ॥]

चतुर्मुखतनोरेव जगत्सृष्टिः परात्मनः।
नाम-रूपादिकरणं त्रिवृत्कुर्वत एव हि॥ (ब्र. प. २८५)

---

[1] धिष्ठानं—द.

[संशयो विचारार्थः]

यात्वियं नाम-[1]रूपव्याकरणात्मिका[1] प्रपञ्चव्यष्टिसृष्टिः ; सा किं समष्टि-[2]जीवरूपस्य[2] हिरण्य[3]गर्भस्यैव[3] कर्म ? उत तेजःप्रभृतिशरीरकस्य परस्य अबादिसृष्टिवत्, हिरण्यगर्भशरीरकस्य [4]परस्य ब्रह्मणः[4] ?—इति इदानीं चिन्त्यते ।

[सहेतुकः पूर्वः पक्षः]

किं युक्तम् ? ; [5]समष्टि[5]जीवस्येति ।

कुतः ?

नामरूपव्याकरणयोः श्रूयमाणयोः एककर्तृकत्वं घटितम्? न? इति । तदर्थं त्रिवृत्करणे हिरण्यगर्भस्य कर्तृत्वं सम्भवति? न? इति ॥ तदर्थं त्रिवृत्करणं, हिरण्यगर्भोत्पत्तिस्थानभूताण्डसृष्टेः उत्तरकालीनं वा? पूर्वकालीनं वा? इति । तदर्थं 'नाम-रूपे व्याकरोत्' 'त्रिवृतं त्रिवृतमेकैकामकरोत्' इति पाठक्रमः, अण्डान्तर्वर्तित्रिवृत्करणप्रदर्शनम्, अन्नादीनां त्रिवृत्करणश्रुतिश्च, त्रिवृत्करणस्य अण्डसृष्ट्युत्तरकालीनतामवगमयति? न? इति ॥ किम् त्रयो हेतवः प्रबलाः? उत दुर्बलाः? इति ।

तेषां प्राबल्ये, त्रिवृत्करणस्य अण्डसृष्ट्युत्तरकालीनतावगमकतया तस्य हिरण्यगर्भकर्तृकत्वसंभवेन, त्रिवृत्करण-नामरूपव्याकरणयोः कर्त्रैक्यश्रुत्युपपत्तेः, 'अनेन जीवेने'ति निर्देशस्य हिरण्यगर्भमात्रकर्तृकत्वज्ञापकतया, व्यष्टिनाम-रूपव्याकरणं हिरण्यगर्भमात्रकर्तृकमिति, परब्रह्मणः साक्षात्सर्वकारणत्वं न स्यात् ॥ पाठक्रमादीनां दुर्बलत्वे, त्रिवृत्करणस्य अण्डसृष्ट्युत्तरकालीनत्वासिद्धेः, तत्र हिरण्यगर्भस्य कर्तृत्वासम्भवेन, त्रिवृत्करण-नामरूपव्याकरणयोः कर्त्रैक्यायोगात्, तदुपपत्त्यर्थम्, 'अनेन जीवेने'ति निर्देशस्य जीवसमष्टिशरीरकपरमात्मकर्तृकत्वावगमकतया, व्यष्टिनामरूपव्याकरणम्, हिरण्यगर्भशरीरकपरमात्मकर्तृकमिति, परब्रह्मणः साक्षात्सर्वकारणत्वमुपपन्नम्—इति सिध्यति ॥ [इति पूर्वपक्ष-सिद्धान्तयोः फल-फलिभावौ] ॥

[समष्टिजीवस्येत्यादि । 'अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नाम-रूपे व्याकरवाणि' इति स्वांशत्वेन आत्मभूतस्य जीवस्यैव अनुप्रवेश-व्याकरणकर्तृत्वाभिधानात्, परदेवतायाः स्वेन रूपेण प्रवेशानुक्तेः, हिरण्यगर्भस्य नाम-रूपव्याकर्तृत्वस्य पुराणादिषु प्रसिद्धत्वात्, परमात्मांशभूतो हिरण्यगर्भ एव अनुप्रवेश-नामरूपव्याकरणयोः कर्ता ॥ (शा. शा. दी.)]

---

1 रूपात्मिका—द. 2 जीवस्य—इ, बा. 3 गर्भस्य—त. थ. 4 परब्रह्मणः—ग. छ. ब्रह्मणः—थ. 5 समष्टिरूपेण अनेन—श्रा.

'अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नाम-रूपे व्याकरवाणि' (छां. उ. 6-3-2) इति जीव[1]कर्तृकत्व[1]श्रवणात्। न हि! परा देवता 'स्वेन रूपेण नामरूपे व्याकरवाणि' इत्यैक्षत ;

अपि तु स्वांशभूतेन जीवरूपेण ; 'अनेन जीवेनाऽऽत्मना' इति वचनात्।

[उक्तव्याख्याने लाक्षणिकत्वाशङ्का—परिहारौ]

नन्वेवं—'चारेणाऽनुप्रविश्य परबलं सङ्कलयानि' इतिवत्, व्याकरवाणीति [2]उत्तमपुरुषः[2], कर्तृस्थक्रियश्च प्रविशतिः, लाक्षणिकः स्यात्।

नैवम्—तत्र राज-चारयोः स्वरूपभेदात् लाक्षणिकत्वम्। इह तु जीवस्याऽपि स्वांशत्वेन स्वरूपत्वात्, तेन रूपेण प्रवेशः। व्याकरणं च आत्मन एवेति, न लाक्षणिकत्वप्रसङ्गः।

न च—सहयोगलक्षणा इयं तृतीया ; कारकविभक्तौ सम्भवन्त्याम्, उपपद-विभक्तेः अन्याय्यत्वात्।

न च—करणे तृतीया ; ब्रह्मकर्तृकयोः प्रवेश-व्याकरणयोः, जीवस्य साधक-तमत्वाभावात्।

न च—जीवस्य कर्तृत्वं प्रवेशमात्रे पर्यवस्यति। नाम-रूपव्याकरणं तु ब्रह्मण एव—इति शक्यं वक्तुम् ; क्त्वाप्रत्ययेन समानकर्तृकत्वप्रतीतेः। जीवस्य स्वांशत्वेन स्वरूपत्वेऽपि, परस्वरूपव्यावृत्त्यर्थः, 'अनेन जीवेने'ति [3]पराक्त्वेन[3] परामर्शः। अतः हिरण्यगर्भकर्तृका इयं नाम रूपव्याक्रिया ॥

कर्तृस्थक्रिय इति। 'व्याकरणकर्तृस्थक्रियः' इति विवक्षया, 'समानकर्तृकः' इत्यर्थः।

प्रविशतिरिति। नाऽत्र धातोः लाक्षणिकत्वमभिमतम् ; अपि तु तदुत्तरप्रत्ययस्य ; 'कर्तृस्थक्रियः' इति विशेषणात्, 'ल्यबन्तप्रविशतिः' इत्यर्थलाभात् (भा. द.) ॥]

नैवमिति। वस्तुतो जीवस्य परमात्मांशत्वात्, तस्य कर्तृत्वं परमात्मन एव भवति। तस्मान्मुख्यकोटिरित्यर्थः।

न च सहेति। 'तृतीयायाः सहयोगाद्यर्थान्तरपरत्वे, परमात्मन्येव कर्तृत्वं स्यात्' इत्याशङ्क्य (इदमुक्तम्) कारकविभक्तिः 'कर्तृकरणयोस्तृतीया' (पा. सू.) इत्यादिभिः पदान्तरमनपेक्ष्य विहिता विभक्तिः। उपपदविभक्तिः—पदान्तरसाहचर्ये विहिता विभक्तिः। अन्याय्यत्वादिति। पदान्तरसाहचर्यसापेक्षतया विलम्बितवृत्तित्वात् अन्याय्यत्वमभिप्रेतम् ॥

---

1 कर्तृत्व—वा. 2 उक्तं परमपुरुषः—श्रा. 3 परत्वात् केन—थ.

अत [1]एव च[1] स्मृतिषु चतुर्मुख[2]कर्तृक[2]सृष्टिप्रकरणे, नामरूपव्याकरणं सङ्कीर्त्यते—

'नामरूपं च भूतानां कृत्यानां च प्रपञ्चनम् ।
वेदशब्देभ्य एवाऽऽदौ देवादीनां चकार सः ॥' (वि. पु. 1-5-63)

इत्यादि ॥

[सूत्रार्थविवृत्या सिद्धान्तप्रदर्शनम्]

एवं प्राप्ते, अभिधीयते—संज्ञा-मूर्तिक्लृप्तिस्तु—इति । 'तु'शब्दः पक्षं व्यावर्तयति । संज्ञामूर्तिक्लृप्तिः—नाम-रूपव्याकरणम् । तत्, त्रिवृत्कुर्वतः [3]परस्यैव[3] ब्रह्मणः; तस्यैव नाम-रूपव्याकरणोपदेशात् । त्रिवृत्करणं कुर्वत एव हि ! नाम-रूपव्याकरणमुपदिश्यते—

'सेयं देवतैक्षत । हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि ।....तासां त्रिवृतं त्रिवृतमेकैकां करवाणि'
(छां. उ. 6-3-2, 3)

इति समानकर्तृकत्वप्रतीतेः । त्रिवृत्करणं तु, चतुर्मुखस्य अण्डान्तर्वर्तिनो न सम्भवति; त्रिवृत्कृतैः तेजोऽबन्नैर्हि ! अण्ड[4]मुत्पाद्यते[4] । चतुर्मुखस्य च अण्डे सम्भवः स्मर्यते—

'तस्मिन्नण्डेऽभवद्ब्रह्मा सर्वलोकपितामहः' (म. स्मृ.)

इति । अतः त्रिवृत्करणं परस्यैव ब्रह्मणः । तत्समानकर्तृकं नाम-रूपव्याकरणं च तस्यैवेति विज्ञायते ।

[अनेन जीवेनेति श्रुत्यर्थसाङ्गत्यम्]

कथं तर्हि 'अनेन जीवेने'ति सङ्गच्छते ?

'आत्मना जीवेने'ति सामानाधिकरण्यात्, जीव[5]शरीरकं[5] [6]परं ब्रह्मैव[6] 'जीव'-शब्देनाऽभिधीयते । यथा—

'तत्तेज ऐक्षत' (छां. उ. 6-2-3)
'तदपोऽसृजत' (छां. उ. 6-2-3)

त्रिवृत्कृतैरिति । अण्डसृष्ट्यर्थत्वात् त्रिवृत्करणस्येत्यर्थः ।

---

[1] एव—इ. [2] कर्तृकं—वा. [3] परस्य—द. [4] मुत्पद्यते—अ, द, न. [5] शरीरं—च.
[6] परब्रह्मैव—ल, थ. ब्रह्मैव—न.

'ता आप ऐक्षन्त' (छां. उ. 6-2-4)

'ता अन्नमसृजन्त' (छां. उ. 6-2-4)

इति, [1]तेजःप्रभृति शरीरकं[1] परमेव ब्रह्म अभिधीयते। अतः जीवसमष्टिभूतहिरण्यगर्भ-शरीरकस्य परस्यैव ब्रह्मणः कर्म, नाम रूपव्याकरणम्।

[प्रविशतेः उत्तमपुरुषस्य चतुर्मुखसृष्टौ नाम-रूपव्याकरणोपदेशस्य च सामरस्यवर्णनम्]

एवं च—'प्रविश्य नामरूपे व्याकरवाणि' इति प्रविशतिः, उत्तमपुरुषश्च अक्लिष्टौ मुख्यार्थावेव भवतः, प्रवेश-व्याकरणयोः समानकर्तृकत्वमप्युपपद्यते। चतुर्मुखशरीरकस्य परस्यैव ब्रह्मणः कर्म, देवादिविचित्रसृष्टिरिति, चतुर्मुख[2]कर्तृकसृष्टि[2] प्रकरणे नाम-रूपव्याक्रियोपदेशश्च उपपद्यते॥

[उक्तार्थानुगुणः अनुप्रवेश-नामरूपव्याकरणश्रुत्यर्थः]

अतः, 'सेयं देवते'त्यादिवाक्यस्य, अयमर्थः—इमाः—तेजोऽबन्नरूपाः, तिस्रो देवताः, [3]अनेन जीवेन[3]—जीवसमष्टिविशिष्टेन, आत्मना अनुप्रविश्य नाम-रूपे व्याकर-वाणि—देवादिविचित्र[4]सृष्टिं[4] तन्नामधेयानि च [5]करवाणि[5]। तदर्थम्, अन्योन्य-संसर्गमप्राप्तानाम् एषां तेजोऽबन्नानां विशेषसृष्टचसमर्थानां, तत्सामर्थ्याय एकैकां [6]त्रिवृतं त्रिवृतं[6] करवाणि—इति। अतः परस्यैव ब्रह्मणः कर्म इदं नाम-रूप-व्याकरणम्॥ १७॥

[उक्तार्थे वैघट्यशङ्कायाः परिहाररूपतया उत्तरसूत्रावतरणम्]

अथ स्यात्—'नाम-रूपव्याकरणस्य त्रिवृत्करणेनैककर्तृकत्वात् परमात्म[7]कर्तृकम्[7]' इति न शक्यते वक्तुम्; त्रिवृत्करणस्याऽपि जीवकर्तृकत्वसम्भवात्। अण्डसृष्ट्युत्तर-कालं हि! चतुर्मुखसृष्टजीवेषु त्रिवृत्करणप्रकार उपदिश्यते—

[अक्लिष्टाविति। परस्परान्वयक्लेशो नास्तीति। तिस्रो देवताः—भविष्यद्देवताभिमान-विषयभावानि त्रीणि भूतानि। जीवसमष्टिविशिष्टेन—तत्तद्देहविशिष्टजीवशरीरकेण] (भा·द.)॥ १७॥

अथ स्यादिति। अण्डसृष्टेः पश्चात् चतुर्मुखसृष्टेषु पुरुषेषु त्रिवृत्करणोपदेशात्, तत्सृष्टाग्न्यादित्यादिषु त्रिवृत्करणदर्शनात्, नामरूपव्यकरणोत्तरकालं त्रिवृत्करणश्रवणाच्च,

---

[1] तेज आदि शब्दैः—ग. [2] सृष्टि—आ, इ, त, थ. [3] अनेन—थ, द. [4] सृष्टि—आ,ग,घ,च,ठ,थ. [5] करवाणीति—न. [6] त्रिवृतं—थ. [7] कर्तृकत्वम्—वा.

"[1]यथा तु[1] खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति' (छां. उ. 6-4-7)

'अन्नमशितं [2]त्रेधा[2] विधीयते, तस्य यः स्थविष्ठो भागः तत् पुरीषं भवति, यो मध्यमः तन्मांसम्, योऽणिष्ठः तन्मनः' (छां. उ. 6-5-1)

इत्यादिना । तथा पूर्वस्मिन्नपि वाक्ये,

'यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्य' (छां. उ. 6-4-1)

इत्यादिना, चतुर्मुखसृष्टाग्न्यादित्यचन्द्रविद्युत्सु त्रिवृत्करणं प्रदर्श्यते । नाम-रूप-व्याकरणोत्तरकालं च त्रिवृत्करणं श्रूयते—

'सेयं [3]देवते[3]मास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नाम-रूपे व्याकरोत्' (छां. उ. 6-3-3)

'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' (छां. उ. 6-3-4)

—इति ; तत्राऽऽह—

२८६. मांसादि भौमं यथाशब्दमितरयोश्च ॥ २-४-१८ ॥

[शङ्कानुवादपूर्वकं सूत्रार्थमुखेन परिहारः]

यदुक्तम्—अण्डसृष्ट्युत्तरकालं चतुर्मुखसृष्टदेवतादिविषयोऽयम्, 'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' (छां. उ. 6-3-4) इति त्रिवृत्करणोपदेशः—इति ;

त्रिवृत्करणस्य अण्डसृष्ट्यर्थत्वं न सम्भवति । अतः त्रिवृत्करणं चतुर्मुखकर्तृकमिति, तदेककर्तृकं नाम-रूपव्याकरणं चतुर्मुखकर्तृकमित्यर्थः ॥

[सूत्रार्थः ; **मांसादि**—मांसं मनश्चेत्युभयम्, **भौमम्**—पार्थिवमेव, **यथाशब्दम्**—'अन्नमशितं त्रेधा' इत्यादिश्रुत्यनुसारात्, **इतरयोश्च**—'आपः पीताः' तेजोऽशितम्' इति इति वाक्ययोरप्येवमेव]

श्रुते तु मांस-मनसी भौमे चैवमबादिषु ।
अन्न चाऽशितमित्यादौ त्रिवृतां करणं न हि ! (अ. प. २८६)

---

[1] यथा—वा. [2] त्रिधा—त, द, न. [3] देवतैक्षते—त.

तन्नोपपद्यते ; 'अन्नमशितं त्रेधा विधीयते' (छां. उ. 6-5-1) **इत्यत्र, मांस-मनसोः पुरीषात् अणुत्वेन अणीयस्त्वेन च व्यपदिष्टयोः, कारणानुविधायित्वेन आप्य-तैजसत्वप्रसङ्गात्, 'आपः पीताः'** (छां. उ. 6-2-5) **इत्यत्राऽपि, मूत्रप्राणयोः स्थविष्ठाणीयसोः [1]पार्थिवत्व[1]-तैजसत्वप्रसङ्गाच्च ॥**

न चैवमिष्यते ; [2]मांसादि हि![2] [3]भौम[3]मिष्यते । पुरीषवत् मांस-मनसी अपि भौमे-पार्थिवे इष्येते ; 'अन्नमशितं त्रेधा' (छां. उ. 6-5-1) **इति प्रक्रमात् ।**

यथाशब्दमितरयोश्च—इतरयोरपि, 'आपः पीताः' 'तेजोऽशितं' (छां. उ. 6-5-2, 3) **इति पर्याययोः, यथाशब्दं [4]विकाराः इष्यन्ते[4] ।**

'आपः पीतास्त्रेधा विधीयन्ते' (छां. उ. 6-5-2)

इति, अपामेव [5]त्रेधा[5] परिणामः शब्दात्प्रतीयते । [6]तथा[6],

'तेजोऽशितं त्रेधा विधीयते' (छां. उ. 6-5-3) **इत्यपि, तेजस एव [7]त्रेधा[7] परिणामः शब्दात्प्रतीयते। अतः, पुरीष-मांस-मनांसि पृथिवीविकाराः ; मूत्र-लोहित-प्राणाः अब्विकाराः ; अस्थि, मज्जा, वाचः तेजोविकाराः—इति प्रतिपत्तव्यम् ॥**

कारणेति । अत्रिवृत्कृतानामपि पृथिव्यप्तेजसां स्थूलत्वाणुत्वाणीयस्त्वात्, त्रिवृत्कृतेष्वपि तत्तद्भूतांशानां स्वकारणानुगुणस्थूलत्वाणीयस्त्वं स्यात् । तस्मात्, 'अन्नमशित'मित्यादिवाक्ये त्रिवृत्करणं प्रदर्श्यते चेत्! स्थविष्ठं पुरीषं पार्थिवम् ; अणु मांसम् आप्यम् ; अणीयो मनश्च तैजसं स्यात् । न तथोपपद्यते ; मांस-मनसोः पार्थिवत्वात् । पार्थिवत्वं च 'अन्नमशित'मिति प्रक्रमादवगतमित्यर्थः । एवम् इतरपर्यायद्वयेऽपि ।

न चैवमिष्यते इत्यन्तेन, प्रथम-द्वितीयपर्याययोरनिष्टं दर्शितम् । तृतीये तु न प्रसक्तम् । तत्राऽयं भावः—प्रतिपर्यायं चरमोपात्तेषु अनिष्टस्य प्रसञ्जनीयत्वात् । तृतीयपर्याये चरमे प्रसञ्जनीयस्य अनिष्टत्वाभावात्, न तत् प्रसञ्जनीयमिति ॥ तृतीयेऽपि अस्थिमज्जापार्थिवाप्यत्वानिष्टता पश्चाद्वक्ष्यते । **मांसादि हीति** । मांस-मनसोः आप्यत्व-तैजसत्वे अनिष्टे । द्वितीये मूत्रं पार्थिवम् ; लोहितम् आप्यम् ; प्राणः तैजसः स्यात् । तत्र मूत्र-प्राणयोः पार्थिवत्व-तैजसत्वे अनिष्टे । 'अन्नमशितम्, आपः पीताः' इति च प्रक्रमेण मांस-मनसोः पार्थिवत्वात् ;

---

[1] पार्थिव—बा. [2] मांसादि—थ, द. मांसदेहि—बा. [3] भौमत्व—बा.
[4] विकारानिष्येते—न, थ. [5] त्रिधा—बा. [6] यथा—न. [7] त्रिधा—बा.

'अन्नमयं हि ! सोम्य मनः, आपोमयः प्राणः, तेजोमयी वाक्' (छां. उ. 6-5-4) इति वाक्यशेषाविरोधाच्च । अतः,

'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' (छां. उ. 6-3-4)

[1]इत्युक्तः[1] त्रिवृत्करणप्रकारः, 'अन्नमशित'मित्यादिना न प्रदर्श्यते । तथा सति, मनः-प्राणवाचां त्रयाणामपि, अणीयस्त्वेन तैजसत्वात्,

'अन्नमयं हि सोम्य ! मनः' (छां. उ. 6-5-4)

इत्यादिर्विरुध्यते ।

प्रागेव त्रिवृत्कृतानां पृथिव्यादीनां पुरुषं प्राप्तानाम्, 'अन्नमशित'मित्यादिना, एकैकस्य त्रेधा परिणाम उच्यते । अण्डसृष्टेः [2]प्रागेव च[2], तेजोऽबन्नानां त्रिवृत्करणेन भवितव्यम्; अत्रिवृत्कृतानां तेषां कार्यारम्भासामर्थ्यात् । अन्योन्यसंयुक्तानामेव हि ! कार्यारम्भसामर्थ्यम् । तदेव च त्रिवृत्करणम् । [3]तथा[3] च स्मर्यते—

'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाऽशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥' (वि. पु. 1-2-52)
'समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥' (वि. पु. 1-2-53)

इति । [4]अत एव[4] च,

'[5]अनेन[5] जीवेनाऽऽत्मनाऽनुप्रविश्य नाम-रूपे व्याकरोत्' (छां. उ. 6-3-3)

मूत्र-प्राणयोः आप्यत्वात् । 'अन्नमयं हि ! सोम्य मनः', 'आपोमयः प्राणः' इति वाक्यशेषाच्च । तृतीयेऽपि अस्थ्नः पार्थिवत्वं, मज्जाया आप्यत्वं, वाचः तैजसत्वं च स्यात् । तत्र अस्थि-मज्जयोः पार्थिवत्वाप्यत्वे अनिष्टे; 'तेजोऽशित'मिति प्रक्रमात्, 'तेजोमयी वाक्' इति वाक्यशेषाच्च । तस्मात्, न त्रिवृत्करणं प्रदर्श्यते; अपि तु अन्नादीनां प्रत्येकं त्रेधा परिणाम उच्यते—इत्यर्थः ॥

तदेव च—अन्योन्यसंयुक्तत्वमेव च । अत एव चेत्यादि । उत्पत्तौ साधनस्य पूर्वभावित्वे, फलस्य पश्चाद्भावित्वे च सत्यपि, सङ्कल्पे फलमेव पूर्वभावि; 'स्वर्गकामो यक्ष्ये' इत्यादिषु तथा दर्शनात् । अस्मिन् प्रकरणेऽपि, 'बहु स्यां प्रजायेय' इति साध्यस्य बहुभवनस्य

---

[1] इत्युक्तं—द. [2] प्रागेव—द. [3] यथा—न. [4] अत एवं—वा. एवं—त. थ.
[5] अनेनैव—त. थ.

'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' (छां. उ. 6-3-4)
इति पाठ[1]क्रमः[1] अर्थ क्रमेण बाध्यते ॥

[अग्न्यादिषु त्रिवृत्करणप्रदर्शनप्रयोजनम्]

[2]अण्डान्तर्वर्तिषु अग्न्यादित्यादिषु[2] त्रिवृत्करणप्रदर्शनं, श्वेतकेतोः शुश्रूषोः अण्डान्तर्वर्तित्वेन ; तस्य बहिष्ठवस्तुषु त्रिवृत्करण[3]प्रदर्शना[4]योगात्, त्रिवृत्कृतानां कार्येषु अग्न्यादित्यादिषु क्रियते ॥ १८ ॥

[त्रिरूपस्य एकैकरूपेण व्यपदेशोपपत्तिः]

स्यादेतत्–'अन्नमशितम्, आपः पीताः, तेजोऽशितम्' इति त्रिवृत्कृतानामन्नादीनाम् एकैकस्य, तेजोबन्नात्म[4]कत्वेन[4] त्रिरूपस्य, कथम् 'अन्नम्, आपः, तेजः' इति एकैकरूपेण व्यपदेशः उपपद्यते—इति ; तत्राह—

२८७. वैशेष्यात्तु तद्वादस्तद्वादः ॥ २-४-१९ ॥

वैशेष्यम्—विशेषभावः। त्रिवृत्करणेन त्रिरूपेऽपि एकैकस्मिन् अन्नाद्याधिक्यात्,

---

पूर्वभावित्वं दृष्टम्। उपबृंहणे च तत् विशदीकृतम्। तस्मात्, 'नाम-रूपे व्याकरवाणि' 'त्रिवृतं त्रिवृतमेकैकां करवाणि' इति सङ्कल्पवाक्ये त्रिवृत्करणफलस्य नाम-रूपव्याकरणस्य पूर्वप्रतिपत्तौ, त्रिवृत्करणस्य पूर्वभावित्वं सिद्धम्। 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इत्यादिषु अर्थक्रमेण पाठक्रमबाधदर्शनात्। सङ्कल्पवाक्यस्वाभाव्यात्, प्राकरणिकसङ्कल्पवाक्यान्तरे पश्चाद्भाविनः फलस्य पूर्वभावदर्शनात्, उपबृंहणवचनस्वारस्याच्च, 'नाम-रूपे व्याकरोत्' 'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इति पाठक्रमः अर्थक्रमेण बाध्यत इत्यर्थः ॥

क्रियते। त्रिवृत्करणप्रदर्शनमिति शेषः ॥ १८ ॥

वैशेष्यमिति। 'विशेष'शब्दः 'विकार'शब्दवत्, धर्मिपरो धर्मपरश्च। अत्र तु

[सूत्रार्थः ; वैशेष्यात् तु—एकैकस्याऽपि भूतस्य विशेषभाव (आधिक्य) सत्त्वादेव, तद्वादः—तेषु तेषु अन्नादीनां पृथक्छब्दानां श्रुतिषु व्यपदेशः ॥]

त्रिवृत्कृतेषु भूतेषु चाधिक्यं यस्य वै भवेत्।
तत्तद्वाचकशब्देन तत्तद्वस्तूच्यते बुधैः ॥ (ब्र. प. २८७)

---

[1] क्रमोऽपि—द. [2] अण्डान्तर्वर्तिषु—थ. अण्डान्तर्वर्तिषु अग्न्यादिषु—त.
[3] प्रदर्शन—द. [4] त्वेन—द.

तत्र तत्र अन्नादिवादः । द्विरुक्तिः अध्याय[4]समाप्तिं[4] द्योतयति ॥ १९ ॥

इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये द्वितीयस्याध्यायस्य

(८) चतुर्थः पादः समाप्तः ॥ ४ ॥

समाप्तश्च द्वितीयोऽध्यायः ॥ २ ॥

—o—

धर्मिपरः । विशेषभावः—वैशेष्यम् आधिक्यरूपम् ॥ १९ ॥

[सूत्राणि—१. संज्ञा, २. मांसादि, ३. वैशेष्या]

इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

(८) इति चतुर्थः पादः ॥ ४ ॥

द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

प्राज्ञैः पूर्वैर्ग्रथिता व्याख्याः सम्यक् समाहृत्य ।
लघ्वी टिप्पन्येषा कलिता ह्यध्येतृबोधार्थम् ॥

—o—

[4] परिसमाप्तिमपि—आ. ड.

ॐ

अनुबन्धाः

(श्रीभाष्याध्ययनसहकारिणः)

॥ श्रीरस्तु ॥

श्रियै नमः । श्रीधराय नमः । श्रीमते रामानुजाय नमः ।

द्वितीयेऽध्याये प्रथमः पादः

(36) स्मृत्यधिकरणम् ॥ २–१–१ ॥

शारीरकन्यायकलापसङ्ग्रहः

[श्रीसेनेश्वराचार्यविरचितः]

[जगद्वारः सुविन्यस्तः सेनेशे यत्र विष्णुना ।
तस्यावतारमपरं सेनानाथमहं भजे ॥]

(59) स्मृतेर्विरोधादुपबृंहणस्य न ब्रह्महेतुर्जगतामितीदम् ।
असारमन्यस्मृतिभिर्विरोधात [1]तेषां त्वनाप्तिश्च[1] न शक्यशङ्का ॥

ब्रह्म—परमात्मभूतं वस्तु, **जगतां न हेतुः**—जगत्कारणं न भवितुमर्हम्, अनधीतवेदार्थविशदीकरणप्रवृत्तस्य, **स्मृतेः**—प्रधानकारणत्वपरकापिलतन्त्राख्यशास्त्रस्य, **विरोधात्**—अनवकाशतापादनरूपाद् विरोधात्, **इतीदम्**—एवमाकारं शङ्कनम्, **असारम्**—अदृढम्, तात्त्विकांशाचिन्तनेन प्रवृत्तम्, **अन्यस्मृतिभिः विरोधात्**—जगद्बीजतया श्रुतिसिद्धाभिः मन्वादीनां स्मृतिभिः सह व्याहतिप्रसङ्गात् । **तेषां अनाप्तिस्तु**—तादृशस्मृतिकर्तृणां मन्वादीनां यथार्थवादित्व-यथावस्थितार्थदर्शित्वोभयात्मकस्य आप्तत्वस्य अभावस्तु, **न च शक्यशङ्का**—नैव शङ्कनस्याप्यनर्हा ॥ १ ॥

अधिकरणसारावलिः (स्मृ. अधि)

(श्रीवेदान्ताचार्यवर्यैः विरचिता)

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

(154) तत्तादृक्तर्कतन्त्रक्रमनिपुणमहाबुद्धिसन्तोषसिद्धिः
यद्यप्युक्तेन लभ्या तदपि मृदुधियां हेतुकास्कन्दशङ्की ।
स्थूणाखातक्रमेण स्थिरयति कथितं ब्रह्मणः कारणत्वं
कार्यत्वं यस्य यादृक्छ्रुतिभिरवगतं तस्य तत्तादृशं च ॥ १ ॥

---

[1]ते षामनाप्तिश्च—क.

यद्यपि— विचार्यमाणे, **तत्तादृक्....सिद्धिः**— विलक्षणविचारपरपर्यायतर्कप्रधाने मीमांसाख्यतन्त्रीयप्रकारविशेषे कुशलानां मेधाविनां (तत्त्वार्थनिर्णयकृत) हर्षप्राप्तिः, **उक्तेन**— आद्याध्यायप्रतिपादितेन सम्यग्ज्ञानेन अर्थजातेन, **लभ्या**—सम्पाद्या भवितुमर्हा, **तदपि**—तथापि, **मृदुधियाम्**— ललितमतीनाम्, **हैतुकास्कन्दशङ्की**—श्रुत्यननुगुणतर्कमात्रपरैः वावदूकैः आक्रमणं सम्भावयन् सूत्रकारः, **कथितम्**—पूर्वप्रतिपादितमेव, **ब्रह्मणः कारणत्वम्**—परमात्मनः जगदभिन्ननिमित्तोपादानकारणत्वम्, **यस्य**—जगदन्तर्गतस्य चेतनस्य अचेतनस्य वा, **कार्यत्वम्**— अवस्थान्तरलाभात्मकं जन्म, **यादृक्**—स्वभावगतं स्वरूपगतं वा विकाररूपं, **श्रुतिभिरवगतम्**— अतीन्द्रियार्थनिर्णयप्रवृत्तैः वेदवाक्यैः प्रतिपन्नम्, **तस्य**—आत्माकाशादेः सृज्यजातस्य **तत्तादृक्**—अवैपरीत्येन तादृशमेव, **स्थूणाखातक्रमेण**—स्थूणानिखननन्यायेन, **स्थिरयति**— स्वयमेव सम्भावनीयक्षोभप्रदर्शनपूर्वकं अपनीतिभिरकम्प्यं करोति, (द्रढयति) ॥ १ ॥

(155) पादद्वन्द्वं द्वितीये परिहरति परे कारणे बाह्यपीडां
कार्यद्वारेण पादान्तर[1]युगमुदय[1]त्यान्तरक्षोभशान्त्यै ।
हेतुत्वायोगभङ्गः प्रथममिह विभोस्तस्य सार्वत्रिकत्वा-
योगक्षेपः परस्तात् फलति स च भवेच्छ्रौतनित्यं विहाय ॥ २ ॥

द्वितीये पादद्वन्द्वम्—द्वितीयाध्यायसम्बन्धि आद्यं पादद्वयम्, **परे कारणे**—परम-कारणभूतपरब्रह्मविषये, **बाह्यपीडां**—अवैदिकैः उद्भाव्यमानां बाध-प्रतिरोधात्मिकां बाधाम्, **परिहरति**—असम्भाविततया बोधयति । **पादान्तरयुगम्**—द्वितीयं पादद्वयम्, **कार्यद्वारेण**— आकाशादिकं कार्यं द्वारीकृत्य, **आन्तरक्षोभशान्त्यै**—आन्तरैः वैदिकान्तःपातिभिः, आन्तरेषु वेदान्तवाक्येषु वा विषये सम्भवतः क्षोभस्य निवृत्त्यै, **उदयति**—प्रवर्तते । (तथा) **इह प्रथमम्**—एतदध्यायीयाद्यपादद्विके, **विभोः**—परमात्मनः, **हेतुत्वायोगभङ्गः**—परैरापाद्यमान-कारणत्वान्वयविरोधदूरीकरणम्, **परस्तात्**—पश्चात्तने पादद्वये, **तस्य**—ईश्वरगतकारणत्वस्य, **सार्वत्रिकत्वायोगक्षेपः**—सर्वजगन्निरूपितत्वानन्वयनिरासः, **फलति**—विचारफलतया सिद्ध्यति, **स च**—कारणत्वायोगनिरासश्च, **श्रौतनित्यं विहाय**—नित्यत्वेन श्रुतिप्रतिपन्नं प्रकृति-पुरुष-कालादिकं तत्त्वजातं निरूपकत्वेन अगृहीत्वा, **भवेत्**—अवशिष्टनिरूपिततया पर्यवसानं लभते ॥ २ ॥

---

[1] **युगलमुदे (सा.र.)**

(156) तन्त्रच्छायानिदाने स्वयमुपनिषदामान्यपर्ये [1]निषिद्धे[1]
तन्त्रेभ्यो दुर्बलत्वात् तदनुसरणमित्युज्जिहीते [2]परोऽद्य[2] ।
इत्थं सत्यत्र तत्तत्स्मृतिनय[3]पृतना[3]तिक्रमं तत्तदर्हैः
प्रत्यस्त्रैर्वारयित्वा द्रढयति चलितं पादतः प्राच्यमर्थम् ।। ३ ।।

तन्त्रच्छायानिदाने—कापिलतन्त्रसादृश्यदर्शनतः शङ्क्यमाने, **उपनिषदां आन्यपर्ये**—वेदान्तवाक्यानां ब्रह्मेतरकारणत्वतात्पर्ये, **स्वयं**—शरीरकसूत्रकृतैव, **निषिद्धे**—आनुमानिकाधिकरणादितः निराकृते, **अद्य**—शारीरकद्वितीयाध्याये, **परः**—साङ्ख्यः, **तन्त्रेभ्यः**—उपबृंहणतया अवश्यानुसरणीयेभ्यः साङ्ख्यादितन्त्रेभ्यः, **दुर्बलत्वात्**—उपबृंहणानां वेदान्तानां तत्प्रामाण्यविघटकतारूपबलाभावात्, **तदनुसरणमिति**—कापिलतन्त्रानुरोध्यर्थकत्वं वेदान्तानां अभ्युपगम्यमिति, **उज्जिहीते**—प्रत्यवस्थितो भवति, **इत्थं सति**—एवमवस्थिते, **तत्तत्स्मृतिनयपृतनातिक्रमम्**—वेदान्ताननुरोधि-स्मृति-तर्कात्मक विरोधिवरूथकृतं सीमोल्लङ्घनम्, **तत्तदर्हैः प्रत्यस्त्रैः**—तत्तत्स्मृति-तर्कनिरसनक्षमैः प्रतिस्मृतितर्कैः, **वारयित्वा**—निरुध्य, **चकितम्**—अपनीतिभिः कम्पितम्, **प्राच्यमर्थम्**—पूर्वं प्रतिपादितं ब्रह्मण एव सर्वकारणत्वरूपमर्थम्, **अत्र पादतः**—एतदध्यायीयाद्यचरणेन, **द्रढयति**—प्रतिष्ठापयति ॥ ३ ॥

(157) निर्णीतं कर्मकाण्डे स्मृतिनयविहतौ निश्चलत्वं श्रुतीनां
चर्चा तत्सिद्धयेऽसौ पुनरिति विफलः स्याद् द्वितीयाद्यपादः ।
मैवं गम्भीरनानाश्रुतिशिखरपरिच्छेद्यदुर्बोधताया-
माप्तोक्त्या तर्कतश्च क्षममनुसरणं पश्यतो ह्यत्र भङ्गः ॥ ४ ॥

श्रुतीनां—वेदवाचाम्, **स्मृति-नयविहतौ**—स्मृत्या तर्केण वा विरोधे प्राप्ते सति, **निश्चलत्वम्**—अबाध्यार्थवत्वम्, **कर्मकाण्डे**—कर्मविधायकश्रुतिवाक्यार्थविचारपरे जैमिनीयतन्त्रे, **निर्णीतम्**—विरोधाधिकरणतो दृढीकृतम् । **तत्सिद्धये**—तस्यैवार्थस्य निर्णयाय, **असौ**—अस्मिन्नध्याये क्रियमाणा, **पुनश्चर्चा**—चर्वितचर्वणात्मिका चिन्ता, **इति**—अतो हेतोः, **द्वितीयाद्यपादः**—(स्मृतिपादनामा) द्वितीयाध्यायीयः प्रथमश्चरणः, **विफलः स्यात्**—निष्प्रयोजन एव भवेत् (इति शङ्कने) ; **मैवम्**—एवं न युज्यते, **गम्भीर....दुर्बोधतायाम्**—गूढाभिप्रायकविविधवेदान्तवाक्यनिर्णेयार्थानाम् दुरवगमत्वप्रसक्तौ सत्याम्, **आप्तोक्त्या**—यथार्थदर्शिनां

---

[1] निरुद्धे (सा.र.) [2] परोऽत्र (सा.र.) [3] कलिता (सा.र.)

कपिलादीनां वाचा, **तर्कतश्च**—तदुपकारकैः तदीयप्रवर्तितैः तर्कैश्च, सहकृतं, **अनुसरणम्**—पश्चात्कालिकं श्रुत्यर्थचिन्तनम् **क्षमं पश्यतः**—युक्तमिति आपातधिया निश्चिन्वतो जनस्य, **अत्र हि**—अस्मिन् पाद एव खलु, **भङ्गः**—अनौचित्यख्यापनयत्नः क्रियते ॥ ४ ॥

(158) द्वाभ्यां स्मृत्या विरोधं परिहरति ततस्त्वष्टभिस्तर्कबाधं
तेनोपादानभावं द्रढयति तु विभोः कर्तृतां तद्द्वयं च ।
तत्तत्क्षेपात् तुलाग्र [1]द्वयनमन[1] समुन्नामनीत्या प्रवृत्ते
शङ्कावर्गे परीक्षासमनिहितमतिः पक्षपातं रुणद्धि ॥ ५ ॥

द्वाभ्याम्—प्रथमद्वितीयाधिकरणाभ्याम्, स्मृति-योगप्रत्युक्तिरूपाभ्यां. **स्मृत्या विरोधम्**—यथाक्रमं कापिलस्मृत्या पातञ्जलस्मृत्या च बाधितार्थकत्वम्, **ततः अष्टभिस्तु**—तदनन्तरप्रवृत्तैः प्रयोजनवत्त्वान्तैः अष्टाधिकरणैः परम्, **तर्कबाधम्**—ब्रह्मण उपादानत्वे आपातप्रतीयमानं युक्तिविरोधम्, (तेन अप्रामाण्यं) च, **परिहरति**—वस्तुतोऽविद्यमानतया ज्ञापयति। **तेन**—कृतेन च विरोधपरिहारेण, **विभोः**—ईश्वरस्य, **उपादानभावम्**—परिणामिकारणत्वरूपं विश्वोपादानत्वम्, **कर्तृताम्**—सृष्ट्यौपयिकसङ्कल्पाश्रयत्वरूपं निमित्तकारणत्वम्। **तद्द्वयं च**—निमित्तत्वोपादानत्वोभयमपि च, **द्रढयति**—(कचिदधिकरणे) स्थिरयति। **तत्तत्क्षेपात्**—तत्तद्वाद्युक्तेष्वर्थेषु यथायोग्यम् एकैकस्यार्थस्य अयुक्तत्वख्यापनात्, **तुलाग्रद्वयनमन-समुन्नामनीत्या**—तुलाख्यदण्डसम्बन्धिकोटिद्वयान्यतरनिम्नोन्नतभावप्राप्तिक्रमेण, **प्रवृत्ते**—समुन्मेषं प्राप्ते, **शङ्कावर्गे**—उत्तरोत्तरप्रवृत्ताक्षेपस्तोमे, **परीक्षासमनिहितमतिः**—साध्वसाधुत्वनिर्णयचिन्तया अवैषम्येन दत्तदृष्टिः सूत्रकारः, **पक्षपातम्**—एकैकस्मिन् पक्षे स्वनिकृष्टत्वबुद्धिरूपमभिमानविशेषम्, **रुणद्धि**—प्रतिबध्नाति ॥ ५ ॥

(159) स्मर्ता श्रुत्यैव गीतः कपिलऋषिरसौ वासुदेवांशभूतः
ख्यातो रामायणादौ प्रणिधि[2]निपुणधीर्वक्ति[2] वेदान्ततत्त्वम् ।
तस्मादस्मद्विदूरे श्रुतिशिरसि तदुक्त्यैव निष्कर्षणं स्या-
न्न स्यादेकार्थमन्वाद्यनघबहुगिरा तत्र तत्त्वार्थसिद्धेः ॥ ६ ॥

स्मर्ता—सांख्यस्मृतेः कर्ता, **असौ कपिलः**—प्रस्तुतः कपिलाख्यः, **श्रुत्यैव**—श्वेताश्वतरोनिषदैव, **ऋषिगीतः**—अतीन्द्रियार्थयाथात्म्यदर्शित्वेन कीर्तितः ('ऋषिं प्रसूतं

[1] द्वितयनति. [2] नियतधीर्वेति—(स.र.)

कपिलम्' इति), **रामायणादौ**—रामायण-भारत-भागवतेषु (इतिहास-पुराणेषु) **वासुदेवांशभूतः ख्यातः**—निरतिशयज्ञानाद्यैश्वर्यसम्पन्नस्य वासुदेवाख्यस्य विष्णोः अंशरूपोऽवतार इति च प्रसिद्धः, **प्रणिधिनिपुणधीः**—चित्तप्रणिधानरूपे योगे परिनिष्ठितमतिः, **वेदान्ततत्त्वं वक्ति**—त्रय्यन्तार्थतत्त्वमेव स्वीयया स्मृत्या विशदयति, **तस्मात्**—एवं कपिलस्य आप्ततमत्वात्, **अस्मद्विदूरे**—चर्मचक्षुषामस्माकं दुर्ग्रहार्थके, **श्रुतिशिरसि**—(उपबृंहणसापेक्षतयैवार्थनिर्णायके) वेदान्तवाक्यजाते, **निष्कर्षणम्**—अर्थनिश्चयसम्पादनम्, **तदुक्त्यैव स्यात्**—कपिलोक्तिमवलम्ब्यैव घटते ; नाऽन्यथा (इत्येवं शङ्कने प्राप्ते), **एकार्थमन्वाद्यनघबहुगिरा**—वेदान्तेन समानार्थिका मिथश्चाविरुद्धार्थिका या मन्वाद्यृषीणां निर्दुष्टा गीः नानास्थानस्था वाक् तया, **तत्र**—अस्मद्विदूरेऽपि वेदान्तवचसि, **तत्त्वार्थसिद्धेः**—प्रामणिकार्थनिश्चयलाभात् ; (उपबृंहणार्थं कापिलस्मृतिर्नाऽनुधावनीया) ॥ ६ ॥

अधिकरणार्थसङ्ग्रहः (स्मृ. अधि.)

(दोड्डय्याचार्यापरनामधेयैः श्रीनिवासाचार्यैर्विरचितः)

[वाधूलश्रीनिवासार्यतनयं विनयाधिकम् । प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्]

एवं प्रथमाध्याये—चिदचिद्विलक्षणं ब्रह्म, निखिलजगदेककारणम्—इत्युक्तम् ।

अस्यैवाऽर्थस्य सम्भावितसमस्तप्रकारदुर्धर्षणत्वख्यापनाय, द्वितीयः अविरोधाध्यायः आरभ्यते । तत्र प्रथमे स्मृतिपादे—स्वपक्षे कारणविषये परोक्तदूषणपरिहारः क्रियते ।

तत्र प्रथमे स्मृत्यधिकरणे—वेदान्तवाक्यानां ब्रह्मकारणत्वपरत्वे, महर्षिप्रणीतायाः साङ्ख्यस्मृतेः निरवकाशत्वप्रसङ्गात्, प्रधानमेव जगत्कारणम्—इत्याशङ्क्य ।

मन्वादिमहर्षिप्रणीतानां बह्वीनां स्मृतीनाम् अनवकाशदोषप्रसङ्गात् ब्रह्मैव कारणम्—इत्युक्तम् ॥

अथाऽविरोधाध्याये(द्वौ)पादौ कारणमूलकम् ।
अनन्तरौ कार्यमूलं विरोधं च निरास्यताम् ॥ ७० ॥

आद्ये स्यात् पेटिकायुग्मं द्वाभ्यामप्यष्टभिर्नयैः ।
स्मृत्या तर्कैश्च सञ्जातौ विरोधो भज्यते क्रमात् ॥ ७१ ॥

सर्वव्याख्यानाधिकृतावीप्सिते चोपबृंहणे ।
साङ्ख्यस्मृत्याऽपवादेन स्मृतिन्यायः प्रवर्तते ॥ ७२ ॥

इति स्मृत्यधिकरणम् ॥ १ ॥

(37) योगप्रत्युक्त्यधिकरणम् ॥ १-१-२ ॥

शारीरकन्यायकलापसङ्ग्रहः

(60) [1]ब्रह्मेति[1] वेदान्तसमर्थितोऽर्थः तत् सेश्वरस्मृत्यनुसारहानेः ।
असाध्वितीदं न [2]परैर्विरोधात्[2] जीव[3]त्वतो वि[3]भ्रमसम्भवाच्च ॥ २ ॥

ब्रह्मेति—ब्रह्म जगतः कारणमिति, **वेदान्तसमर्थितोऽर्थः**—श्रुत्यन्तगतैः कारणवाक्यैः निर्णीतः अंशः, **तत्**—वेदान्तैर्निर्णीतं जगत्कारणत्वं ब्रह्मणः, **असाधु**—अयुक्तम्, **सेश्वर-स्मृत्यनुसारहानेः**—प्रधानकारणत्वपरसेश्वरसांख्य(योग)स्मृत्यननुरोधापत्तेः, **इतीदम्**—ईदृशं शङ्कनम्, **न**—न साधु, **परैर्विरोधात्**—ब्रह्मकारणत्वपरैर्मन्वादिस्मृतिभिः सह व्याघातापत्तेः, (योगस्मृतौ प्रामाण्यनिश्चयप्रतिरोधाद्वा) **जीवत्वतः**—योगस्मृतिकर्तुर्हिरण्यगर्भस्य सङ्कुचितज्ञानत्वात्मकबद्धजीवत्वात्, **विभ्रमसम्भवाच्च**—तत्वयाथार्थ्याप्रतिपत्तिविप्रतिपत्त्यादेः तस्मिन्नपि अवर्जनीयत्वादपि ॥ २ ॥

---

[1] ब्रह्मा तु—ख. [2] परैर्विरोधः—क. [3] त्वतोऽपि—क.

(160) वेदान् पूर्वं विधाताऽलभत भगवतः सर्वविद्यानियुक्तो
वागीशश्चैष तस्मात्तदुदित[1]विहतौ[1] कम्पनं वेदमूर्ध्नः ।
मैवं तस्याऽपि वेदापहृतिमुखविपद्दर्शनात् क्षेत्रिभावात्
[2]भ्रान्त्यादिः सम्भवेदि[2]त्यगतिकविषये पूर्ववन्निर्वहामः ।। ७ ।।

विधाता—हिरण्यगर्भः, **पूर्वम्**—सृष्ट्यारम्भे, **भगवतः**—परमात्मनो विष्णोः सकाशात्, **वेदान्**—स्रष्टव्यार्थादिसर्वार्थावेदकान् अनादिनिधनान् शब्दराशीन्, **अलभत**—प्राप्तवान्, **एषः**—विधाता, **सर्वविद्यानियुक्तः**—सर्वासां विद्यानां प्रवर्तने भगवतैव लब्धाधिकारः, **वागीशश्च**—विद्यारूपिण्या वाग्देवतायाः पतिश्च, **तस्मात्**—उक्तात्कारणकलापात्, **तदुदित-विहतौ**—हिरण्यगर्भप्रवर्तितयोगस्मृतिविरोधे सति, **वेदमूर्ध्नः**—श्रुतिशिरसः (वेदान्तस्य) **कम्पनम्**—उपप्लवः प्राप्नोति (उत्कृष्टोपबृंहणहानात्, इति शङ्कने) **मैवम्**—इदमसाधु, **तस्याऽपि**—हिरण्यगर्भस्याऽपि, **वेदापहृतिमुखविपद्दर्शनात्**—भगवतः सकाशात् प्राप्तानां वेदानां मधु कैटभाभ्याम् अपहारप्रभृतिकानिष्टप्राप्तेः पुराणादिषु दृष्टत्वात्, **क्षेत्रिभावात्**—ईदृशसर्वानिष्टकारणभूतकर्मायत्तशरीरितावत्त्वात्, **भ्रान्त्यादिः**—अन्यथाप्रतिपत्त्यात्मको दोषः, **सम्भवेदिति**—अभ्युपगमार्हैवेति । **अगतिकविषये**—सुस्पष्टवेदविरोधतया अविरोधतात्पर्यकल्पनस्य सुतरामनर्हे विषये, **पूर्ववत्**—प्राक्प्रस्तुते सांख्यतन्त्रे इव, **निर्वहामः**—कथंचित्समर्थयामः ।।७।।

—o—

अधिकरणार्थसङ्ग्रहः (योग-अधि)

योगप्रत्युक्त्यधिकरणे—योगस्मृतेः सर्ववेदप्रवर्तनाधिकृतहिरण्यगर्भप्रणीतत्वात् । तदनुरोधेन वेदान्तार्थनिर्णयः कार्यः—इत्याशङ्क्य ।

हिरण्यगर्भस्याऽपि क्षेत्रज्ञभूतस्य रजस्तमोऽभिभवसम्भवात्, तदुक्तपुराणादिवत् योगस्मृतिरपि तन्मूलेति, न तथा वेदान्तोपबृंहणं कार्यम्—इत्युक्तम् ।।

---

[1] विहतेः—(चि. प.) [2] भ्रान्तिः सम्भावितैवे—(सा. र.)

अधिकरणसारावलिः (विल-अधि)

(161) विश्वं त्रैगुण्य[1]वत्वात्[1] त्रिगुणत उदितं नाऽसमादित्ययुक्तं
सर्वाकारेण साम्यं क्वचिदपि न भवेत् केनचित् साम्यमिष्टम् ।
भग्ना हेतुव्यवस्थोचितगुणसमता गोमयाद्वृश्चिकादौ
स्थूलत्वं याति चेशः प्रकृतितनुरतः सर्वचोद्योपमर्दः ॥ ८ ॥

विश्वम्—इदं जगत्, **त्रैगुण्यवत्वात्**—सत्त्वादिगुणत्रयाश्रयत्वाद्धेतोः, **त्रिगुणत उदितम्**—त्रैगुण्यवतः प्रधानाख्यतत्वादेव जातम्, **असमात्**—विलक्षणाद्ब्रह्मणः, **नोदितम्**—न जातम्, **इत्ययुक्तम्**—ईदृशं शङ्कनं युक्तिदूरम्, **क्वचिदपि**—यस्मिन् कस्मिन्नपि वा वस्तुनि, **साम्यम्**—समानलक्षणत्वमित्येतत्, **सर्वाकारेण**—प्रकारीभूतं सर्वांशमप्यादाय, **न भवेत्**—नैव सम्भावितम्, **इष्टं साम्यम्**—बुबोधयिषितं सालक्षण्यमपि, **केनचित्**—यत्किञ्चित्प्रकारमादायैव । **हेतुव्यवस्थोचितगुणसमता**—(भवत्संमता) कारणत्वनिर्णयौपयिकी गुणतः सलक्षणता च, **गोमयाद्वृश्चिकादौ**—गोपुरीषप्रभवे द्रोणाख्ये कीटविशेषे, तथा अन्यत्र च, **भग्ना**—नष्टनियमा, **प्रकृतितनुः**—सूक्ष्मावस्थचिदचिच्छरीरकोऽवस्थितः, **ईशः**—परमात्मा, **स्थूलत्वं याति**—स्थूलचिदचिच्छरीरकतां प्रतिपद्यते, **अतः**—उक्ताद्धेतोः, **सर्वचोद्योपमर्दः**—सर्वाक्षेपनिरासो भवति॥८॥

—o—

नयसङ्गतिमालिका (योग-अधि)

योगस्मृत्यपवादे तु पूर्वन्यायातिदेशतः ।
योगप्रत्युक्त्यधिकृतिः सङ्गतिस्त्वातिदेशिकी ॥ ७३ ॥

इति योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

—o—

(38) विलक्षणत्वाधिकरणम् ॥ १–१–३ ॥

शारीरकन्यायकलापसङ्ग्रहः

(61) यद्यत्कार्यं न तत्तत्प्रतिभटगुणकं ब्रह्म चेदं च विश्वं
ज्ञत्वाज्ञत्वादिधर्मैः प्रतिभटमथ चेदीक्षणाच्चेतनत्वम् ।
[2]तत्तासां[2] देवतानामिति तु न चतुरं दृश्यते माक्षिकादेः
क्रि(कृ)म्यादिद्रव्यभेदो यदि न भवति तत् कार्यहेत्वोरलं स्यात् ॥ ३ ॥

---

[1] वत् स्यात्—(सा. र.) [2] सा तासां—क.

यत्—घटादिकं यद्वस्तु, **यत्कार्यम्**—यादृशमृदाद्युपादानकम्, **तत्**—मृदादिकार्यरूपं घटादिकम्, **तत्प्रतिभटगुणकं न**—कारणभूतमृद्वृत्तिधर्मविरोधिधर्मकं न भवति, **ब्रह्म च इदं विश्वं च**—उपादानतया प्रतिपन्नं ब्रह्म तथा उपादेयतया प्रतिपन्नं जगच्चेति द्वयम्, **ज्ञत्वाज्ञत्वादिधर्मैः**—ज्ञानाश्रयत्व-तदनाश्रयत्वप्रमुखैः धर्मैः मिथो विरुद्धस्वरूपम्, **अथ ईक्षणात् चेतनत्वं चेत्**—तेज आदिषु श्रुतात् चेतनासाधारणात् ईक्षणाद्धर्मात् चेतनत्वं संमन्यते यदि, **तत्**—ईक्षणसमानाधिकरणं चेतनत्वम्, **तासां देवतानाम्**—अनादिपदवाच्यानामबाद्यभिमानिदेवतानां सम्बन्ध्येव; न केवलाबादिसम्बन्धि, **इति तु**—ईदृशं शङ्कनं तु, **न चतुरम्**—न कौशलकृतम्, **माक्षिकादेः**—मध्वादेर्द्रव्यात्, **कृम्यादिद्रव्यभेदो दृश्यते**—मधुनो विजातीयः कृम्यादिरूपो द्रव्यविशेषः उत्पद्यते-इत्येतत् लोकसिद्धं खलु, **तत्**—सजातीयत्वनैयत्यमित्येतत्, **कार्य-हेत्वोः**—कार्य-कारणयोः, **यदि न भवति**—नास्ति चेत्, **अलं स्यात्**—(निरपेक्षतया) कारणत्वं सिद्ध्येत् ॥ ३ ॥

(162) ईक्षा तादृक् बहुस्यामिति सति पठिता तेजसोऽपां च द्रष्टा
सालक्षण्यं ततः स्याज्जगत इति मृदुप्रज्ञपार्श्वस्थचोद्ये ।
तत्तन्मूर्तेः परस्येक्षणमिदमिति तद्वाक्यभावापलापी
सामान्येनाभिमानिव्यवहरणमिह व्याहरत् पूर्वपक्षी ॥ ९ ॥

सति पठिता—सच्छब्दवाच्यब्रह्मविषये आम्नाता, **बहु स्यामिति**—बहुरूपं भवेयमित्याकारिका, या, **ईक्षा**—सङ्कल्पात्मिका ईक्षणक्रिया, **तादृक्**—तादृशी मुख्यैव सङ्कल्परूपेक्षणक्रिया, **तेजसः अपां च द्रष्टा**—तेजो-जलगततयापि 'तेज ऐक्षत', 'आप ऐक्षन्त', इति पठिता। **ततः**—तस्मात् (जगतो ब्रह्मणश्च मुख्येक्षणवत्त्वात्', **जगतः सालक्षण्यमिति**—विश्वस्य ब्रह्मणा सह समानलक्षणत्वमेव, न विलक्षणत्वमिति, **मृदुप्रज्ञपार्श्वस्थचोद्ये**—मन्दमतेः निकटवर्तिनः शङ्कने, प्रवृत्ते, **तत्तन्मूर्तेः**—जल-तेज-आदिशरीरकस्य, **परस्य**—परमात्मन एव, **इदमीक्षणमिति**—'आप ऐक्षन्त', 'तेज ऐक्षत', इत्युक्तं सङ्कल्पनमितीदृशं, **तद्वाक्यभावापलापी**—तादृशवाक्याशयमपह्नोतुकामः, **पूर्वपक्षी**—एतदधिकरणपूर्वपक्षी, **सामान्येन**—विशेषरूपं परमात्मत्वं विहाय, **अभिमानिव्यवहरणम्**—अभिमानिस्वरूपसामान्यधर्मनिर्देशरूपत्वम् **इह**—अस्मिन्नधिकरणे, **व्याहरत्**—उक्तवान् ॥ ९ ॥

—o—

अधिकरणार्थसङ्ग्रहः (विल. अधि.)

विलक्षणत्वाधिकरणे—अचेतनस्य जगतः, सर्वज्ञत्वात् ब्रह्मणो विलक्षणत्वात्, विलक्षणयोः कार्यकारणभावासम्भवाच्च, अचेतनं प्रधानमेव जगत्कारणम्—इत्याशङ्क्य,

विलक्षणानामपि गोमयवृश्चिकादीनां कार्यकारणभावदर्शनात् ब्रह्मैव जगत्कारणम् इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका (विल. अधि.)

विलक्षणत्वाधिकृतौ साङ्ख्यस्तर्कावलम्बनः ।
पुनः प्रत्यवतिष्ठेत तस्मादाक्षेपसङ्गतिः ॥ ७४ ॥

—o—

(39) शिष्टापरिग्रहाधिकरणम् ॥ २-१-४ ॥

शारीरकन्यायकलापसङ्ग्रहः ॥

*[परस्परव्याहतियुक्तरूपाः शिष्टाःकणादादिमताश्च सर्वे ।
अण्वादिवादाः श्रुतिदूरभूताः निरासमाप्ताः कपिलोक्तिनीत्या ॥]

परस्परव्याहतियुक्तरूपाः—नित्यत्वानित्यत्व-शून्यत्व-वास्तविकत्वादिरूपवत्वाभ्युपगमेन मिथोऽव्याघातयुक्तस्वरूपाः, **शिष्टाः**—निरस्तावशिष्टाः, **कणादादिमताः**—कणभक्षाक्षपादादिसंमताः, **श्रुतिदूरभूताः**—वेदापरिगृहीताः, **अण्वादिवादाः सर्वे**—अण्वारब्धजगदभ्युपगमवादाः सर्वेऽपि, **कपिलोक्तिनीत्या**—साङ्ख्यस्मृतिनिरासक्रमेणैव, **निरासमाप्ताः**—निराकृतप्राया वेदितव्याः ॥]

---

* अस्मिन्नधिकरणे न्यायकलापसङ्ग्रहश्लोको नास्ति । अस्माभिरेव स्थानपूर्तये योजितः ॥

अधिकरणसारावलिः (शिष्टा. अधि)

(163) संवादा[1]दक्षपाद[1] क्षपणक-कणभुग्-भिक्षुपक्षेष्वणूनां
विश्वं तद्धेतुकं स्यादिति मृदुमतिभिः श्वावराह[2]क्रमोक्तौ[2] ।
अन्योन्यव्याहतार्थस्थपुटितकुहनायुक्तिदोषापनुत्यै
भाति त्रय्यन्तसूर्यः प्रतिमततिमिरस्तोमकुक्षिम्भरिर्नः ॥ १० ॥

अक्षपाद ....भिक्षुपक्षेषु—गौतम-जिन-कणाद-सुगतानां मतेषु, **अणूनां संवादात्**—परमाणुकारणताविषये अभिप्रायैक्यात्, **विश्वं**—जगत्, **तद्धेतुकं स्यात्**—परमाणुकारणकमेव भवेत्, **इति मृदुमतिभिः श्वावराहक्रमोक्तौ**—एवमाकारकमन्दप्रज्ञकर्तृकायां श्वावराहावलम्बिन्यां वाचि प्रवृत्तायां सत्याम्, (स्वयूथकलहं विस्मृत्य स्वशत्रुषु सम्भूय प्रतिभटनं—श्वावराहन्यायः) **अन्योन्य....पनुत्यै**—मिथोविरुद्धार्थकृतवैषम्यवत्कपटयुक्तिरूपायाः निशायाः अपहाराय, **प्रतिमत....म्भरिः**—औपनिषदविरोधिमतात्मकतमोजालकवलन (नाशन)क्षमः, **त्रय्यन्तसूर्यः**—वेदान्ताख्यः आदित्यः, **नः**—अस्माकं पुरतः, **भाति**—उज्वलः सन् प्रकाशते ॥ १० ॥

—o—

अधिकरणार्थसङ्ग्रहः (शिष्ट. अधि)

शिष्टापरिग्रहाधिकरणे—कणाद-अक्षपाद-बुद्धादीनां परमाणुकारणवादे संवादात् तत्पक्षानुरोधेन कारणं वक्तव्यम्-इत्याशङ्क्य, तावन्मात्रसंवादेऽपि तर्कमूलकत्वाविशेषात्, परमाणुस्वरूपेपि क्षणिकत्वाद्यवान्तरविवादसम्भवाच्च, तेऽपि पक्षाः, अनादर्तव्याः—इत्युक्तम् ॥

—o—

नयसङ्गतिमलिका (शिष्टा. आधि)

शिष्टापरिग्रहनये योगाद्यास्तर्कसाधनाः ।
अतिदेशान्निरस्यन्ते सङ्गतिस्त्वातिदेशिकी ॥ ७५ ॥

इति शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

—o—

[1] दाक्षपाद (प. पा)   [2] क्रमोक्तिः (प.पा)

(40) भोक्त्रापत्त्यधिकरणम् ॥ २-१-५ ॥

नयसङ्गतिमालिका (भोक्त्रा....अधि)

(62) भोक्तृत्वं स्याज्जीववद् देहवत्त्वादित्येतस्मान्नाधिकं ब्रह्म सिध्येत् ।
[1]नैतच्छङ्क्यं[1] मुक्तवत् कर्महानेः युज्येतैतत् राजवच्चापि लोके ॥४॥

देहवत्त्वात्—सर्वशरीरप्रतिसम्बन्धित्वरूपसर्वात्मत्वस्य ब्रह्मण्यभ्युपगमात्, **जीववत्**—बद्धजीवेष्विव, **भोक्तृत्वं स्यात्**—(परमात्मनोऽपि) सुखदुःखाद्यनुभवितृत्वं प्रसज्येत, **इत्येतस्मात्**—एवंरूपाद्धेतोः, **ब्रह्म**—परं ब्रह्म ईश्वरभूतम्, **अधिकं न सिद्ध्येत्**—निर्दोषत्वतः सर्वातिशायित्ववत्तया न शास्त्रतो ज्ञातुं भवितुमर्हति, (इत्याक्षेपे) **एतत् न शङ्क्यम्**—भवदुक्तं न शङ्कार्हं भवति, **मुक्तवत्**—निवृत्तसंसारेषु चेतनेषु भगवदिच्छाकर्तृकविग्रहवत्स्विव, **कर्महानेः**—कर्मसम्बन्धराहित्याद्धेतोः, **लोके राजवत् च**—लोकदृष्टे शासितरि प्रभाविव च, **एतत्**—सशरीरत्वेऽपि दुःखाद्यसम्बन्धः इत्येतत्, **युज्येत**—सङ्गच्छेतैव ॥ ४ ॥

—o—

अधिकरणसारावलिः (भोक्त्रा....अधि)

(164) एको यस्यास्ति देहः स भवति विविधानन्तदुःखैकभोक्ता
विश्वं देहः प्रभोश्चेत् स कथमतिपतेद् विश्वदुःखानुभूतिम् ।
इत्थं जीवेशसीमामपलपितुमनाः [2]कोशभाजां[2] श्रुतीनां
सम्राट्-भृत्यादिनीत्या शममिह लभतां [3]साम्य[3]-वैषम्यदर्शी ॥११॥

यस्य—जीवरूपस्य यस्य देहिनः, **एको देहोऽस्ति**—एकसङ्ख्याक एव देहो वर्तते, नाधिकः, **सः**—तादृशश्चेतनः, **विविधा....भोक्ता**—बहुप्रकारासङ्ख्येयदुःखानामेव अनुभविता भवति, **प्रभोः**—सर्वनियन्तुः परमात्मनः, **विश्व देहश्चेत्**—जगदेव यदि शरीरभूतं तर्हि, **सः**—विश्वतनुः सर्वेश्वरः, **विश्वदुःखानुभूतिम्**—विश्वसम्बन्धिसर्वदुःखानुभवम्, **कथमतिपतेत्**—कथं वा अतिलङ्घितवान् भवेत्, सर्वदुःखानां नियमेनाश्रयो भवेदेव, **इत्थं**—एवंरीत्या आशङ्क्य,

---

[1] नैतच्छक्यं. [2] क्रोशभाजाम् प. पा, कोशमाजा, कोशभाजं (सा. र) [3] स्वाम्य (सा. र)

कोशभाजाम्–प्रमेयार्थानां सर्वेषां सुरक्षितसङ्ग्रहरूपाणां श्रुतीनां सम्बन्धिनीम्, **जीवेशसीमाम्**– जीवपरमात्मनोः स्वरूपस्वभावमर्यादाम्, **अपलपितुमनाः**—अपह्नोतुं प्रवृत्तो जनः, **इह**— जीव-परयोर्देहसम्बन्धवतोर्विषये, **सम्राड्-भृत्यादिनीत्या**—एकस्मिन् राजभवने एव निवसतोः राज-तद्भृत्ययोः शास्य-शासकभूतयोः न्यायमनुसृत्य, **साम्यवैषम्यदर्शी**—शरीराश्रितत्वेन साम्यम्, नियन्तृत्व-नियाम्यत्वादिना वैषम्यं च पश्यन्, **शमम्**—परमात्मनः शरीरसम्बन्धमात्रेण भोक्तृत्वापादनयत्नवर्जनरूपं शमम्, **लभताम्**—प्राप्नुताम् ॥ ११ ॥

—o—

अधिकरणार्थसङ्ग्रहः (भोक्त्रा. अधि)

भोक्त्रापत्त्यधिकरणे—चिदचिद्वस्तुशरीरकस्य ब्रह्मणः कारणत्वे सशरीरत्वात् सुखदुःखभोक्तृत्वप्रसङ्गः—इत्याशङ्क्य

सुखदुःखानुभवस्य कर्मनिमित्तत्वात् अकर्मवश्यस्य न सुखदुःखभोक्तृत्वप्रसङ्गः इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका (भोक्त्रा. अधि)

प्राक् शरीरात्मभावेन कृताः सर्वोपपत्तयः ।
वैलक्षण्यापवादोऽतो भोक्त्रापत्तिनयोदयः ॥ ७६ ॥

इति भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

—o—

(41) आरम्भणाधिकरणम् ॥ २–१–६ ॥

शारीरकन्यायकलापसङ्ग्रहः

(63) बुद्ध्याकाराभिधानव्यवहृतिगणनैर्भेदकैः कार्यहेत्वो-
रेकत्वं नैव सिद्ध्येदिति तु न चतुरं कारकानर्थता च ।
सद्[1]ब्रह्मादिशब्दै[1]रभिहितमपृथग् येन शब्दादिभेदो
द्रव्यावस्थावलम्बी तत [2]इह[2] न भवेत् कारकानर्थता च ॥ ५ ॥

---

[1] ब्रह्मेत्यादिवाक्यैः—क. [2] इति—ग.

भेदकैः—इतरेतरभेदज्ञापकैः, **बुद्ध्या....गणनैः**—कार्यकारणविषयकैः विलक्षणबुद्धि-विलक्षणाकार–विलक्षणवाचकशब्द–विलक्षणव्यवहार–विलक्षणसंख्यानरूपैरर्थैः, **कार्यहेत्वोः**—पटतन्त्वाद्यात्मकयोः कार्यकारणभूतयोरर्थयोः, **एकत्वं न सिद्ध्येत्**—मिथोऽनन्यत्वं नैव निश्चेतुमर्हम्, **कारकानर्थता च**—कार्यस्य कारणानन्यस्य पूर्वमेव सिद्धतया तन्तुवायादिकारकव्यापार-वैफल्यमपि, **इति तु**—एवं शङ्कनं तु, **न चतुरम्**—न निपुणचिन्तनम्, **येन**—यस्मात् कारणात्, **सद्....आत्मादिशब्दैः अभिहितम्**—(कार्यभूतं जगत्) कारणभूतब्रह्मवाचिभिः शब्दैः 'सदेवेदम्', 'ब्रह्मैवेदम्', 'आत्मा वा इदम्', इत्यादिभिः प्रतिपादितम्; तस्मात्, **अपृथक्**—कारणादनन्यदेव कार्यम्, **शब्दादिभेदः**—कारणापेक्षया कार्ये विलक्षणशब्दादिश्च, **द्रव्यावस्थावलम्बी**—द्रव्यगतं अवस्थावैलक्षण्यमवलम्ब्य प्रवर्तते, **ततः**—तस्मादेव हेतोः, (अवस्थाभेदस्य साध्यत्वादेव च, इह—कार्यगते अवस्थाभेदे जननीये, **कारकानर्थता च न भवेत्**—कारकव्यापारावलम्बनवैफल्यं च नैव सम्भाव्यम् ॥ ५ ॥

—o—

अधिकरणसारावलिः (आर....अधि) (श्लो. १२-१४)

(165) कार्यं धर्मैर्विरुद्धैः [1]कट[1] इव शकटात् कारणद्रव्यतोऽन्यद्-
व्यापारः कारकाणां विफल इतरथेत्यर्धवैनाशि[2]कोक्तौ[2]
द्रव्यैक्येऽप्यस्तु सर्वं तदभिमतदशाभेदतोऽसच्छ्रुतिश्चे-
त्यध्यक्षाल्लाघवाच्च श्रुतिकथितजगद्ब्रह्मतादात्म्यमुक्तम् ॥ १२ ॥

कार्यम्—उत्पाद्यं वस्तु, **विरुद्धैः धर्मैः**—बुद्धिशब्दान्तरादिभिः मिथोव्यावृत्तैर्धर्मैः ज्ञापकभूतैः, **कारणद्रव्यतोऽन्यत्**—उत्पादकात् द्रव्यादतिरिक्तम्, **विरुद्धैः धर्मैः**—उपवेशन-साधनत्व-यानसाधनत्वादिभिः मिथोव्यावर्तकैः धर्मैः, **कट इव शकटात्**—कटरूपोऽर्थो यथा शकटरूपादर्थादन्यः तद्वत्, **इतरथा**—कार्यस्य कारणादनन्यत्वे, **कारकाणां व्यापारः विफल इति**—कार्यनिर्वाहकत्वेन सिद्धानां कर्तृ-करणादिकारकाणां क्रियाविशेषः अप्रयोजनः स्यादित्येवम्, **अर्धवैनाशिकोक्तौ**—तार्किकस्य वचने प्रवृत्ते, **द्रव्यैक्येऽपि**—कार्यकारणद्रव्ययोः पट-तन्त्वाद्योः अनन्यत्वेऽपि, **तदभिमतदशाभेदतः**—तार्किकाणामप्यभिमतात् कार्यगतात् अवस्थाविशेषादेव, **सर्वमपि अस्तु**—बुद्धिशब्दान्तरादि सर्वमपि निर्व्यूढं भवतु नाम, **असच्छ्रुतिश्चेति**—'असदेवेदमग्र आसीत्' इति श्रुतिरपि तथेति हेतोः, (उत्तरत्र जायमानावस्थाविशेषेण असत्वात्) अध्यक्षात्

[1] वट—(प.पा.) [2] कोक्तिः—(सा.र.)

पटत्वावस्थायामपि तन्तोरनन्यतायाः पटे प्रत्यक्षत्वात्, **लाघवाच्च**—कार्ये कारणद्रव्यभेदावस्था-भेदोभयमकल्पयित्वा अवस्थाभेदमात्रस्य कल्पने 'धर्मिकल्पनातो वरं धर्मकल्पना' इतीदृशन्यायानु-रोधकृतात् लाघवादपि, **श्रुतिकथित....तादात्म्यम्**—'सदेव सोम्येदं' इति श्रुतिप्रतिपादितं ब्रह्म-जगतोरनन्यत्वम्, **उक्तम्**—'तदनन्यत्व....' इति सूत्रे विशदीकृतम् ॥ १२ ॥

(166) मायोपाधिस्वशक्तिव्यतिकरितपरब्रह्ममूलः प्रपञ्चो
येषां तेऽप्यद्वितीयश्रुतिमवितथयन्त्यत्र तत्तद्विशिष्टे ।
अप्राधान्यात् तथा न प्रकृतिपुरुषयोरन्तरात्मप्रधाने
वाक्येऽस्मिन् स्थूल-सूक्ष्मान्वय इति जगतोऽनन्यभावोपपत्तिः ॥१३॥

प्रपञ्चः—कार्यात्मको जगद्विस्तारः, **येषां**—शाङ्कर-भास्कर-यादवीयाख्यानां त्रिविधानां येषामद्वैतिनां मते, **मायोपाधि....परब्रह्ममूलः**—यथाक्रमं मायासंबद्धपरब्रह्मकारणकः उपाधिसम्बन्धपरब्रह्मकारणकः, स्वशक्तिसम्बद्धपरब्रह्मकारणकश्च अभ्युपगतो वर्तते, **तेऽपि**—त्रिविधास्ते अद्वैतिनोऽपि, **अत्र**—कारणवाक्यप्रविष्टाम् अद्वितीयपदघटितां 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति श्रुतिम्, **तत्तद्विशिष्टे**—मायाविशिष्टे, उपाधिविशिष्टे, स्वशक्ति-विशिष्टे च ब्रह्मणि, **अवितथयन्ति**—विशिष्टैक्यमादाय सार्थकयन्ति, (कथम्?) **अप्राधान्यात्**—विशिष्टे विशेषणांशस्य अप्रधानत्वात्, प्रधानस्य विशेष्यस्य च एकत्वात्, **तथा**—तेनैव च न्यायेन, **नः**—अस्मन्मतेऽपि, **प्रकृति-पुरुषयोरन्तरात्मप्रधाने अस्मिन् वाक्ये**—प्रकृति-पुरुषान्तर्यामिभूतपरमात्मप्राधान्यके 'सदेवाद्वितीयम्' इति वाक्ये, **स्थूल-सूक्ष्मान्वय इति**—स्थूल-सूक्ष्मयोः प्रपञ्चभूतयोः चेतनाचेतनयोः ब्रह्मणि विशेषणतयान्वय इति हेतोः, **जगतः**—प्रपञ्चस्य, **अनन्यभावोपपत्तिः**—ब्रह्मानन्यभावस्य सङ्गतिः ॥ १३ ॥

(167) विश्वारम्भे विवर्तं शकलपरिणतिं शक्तिशेषस्य सूतिं
व्यक्त्युल्लासौ विकृतिमनियतां तत्त्वपङ्क्तौ च सृष्टिम् ।
तत्तद्वाक्यै[1]कदेशस्वरस इति[1] मुधा कल्पयन्तस्तु मुग्धाः
सर्वश्रुत्यैकरस्यप्रणयिभिरधरीचक्रिरे तत्त्वविद्भिः ॥ १४ ॥

विश्वारम्भे—जगतः सृष्टिर्नाम का इति चिन्तायाम् तत्स्वरूपम्, **विवर्तम्**—ब्रह्मणि जगदध्यासाधिष्ठानताम्, **शकलपरिणतिम्**—(चिदचिदीश्वराख्यांशत्रयवति ब्रह्मणि) अचिदाख्य-ब्रह्मांशस्य परिणामम्, **शक्तिशेषस्य सूतिम्**—(चिदचिदीश्वराख्यशक्तित्रयात्मके ब्रह्मणि)

---

[1] देशैः स्वरसमिति (सा.र देशः स्वरस इति (सा.र)

अचिदाख्यशक्तिविशेषस्य प्रसवम्, **व्यक्त्युल्लासौ**—(कारणतिरोहिततया विद्यमानस्यैव) प्रादुर्भावम्, मुकुलस्य पुष्पत्वमिव विकासविशेषम्, **विसृष्टिम्**—(भस्त्रायामन्तरवस्थितस्य वस्तुनो बहिरवस्थापनमिव) निगीर्णस्य बहिर्विसर्जनम्, **विकृतिम्**—(मृद्रूपेणावस्थितस्य घटरूपतापत्तिमिव) ब्रह्मणो जगद्रूपतापत्तिम्, **तत्त्वपङ्क्तौ**—तत्त्वश्रेणिप्रविष्टे वस्तुजाते, **अनियतां सृष्टिम्**—नियमरहितां (कालविशेषे तेजसो जलस्य, कालविशेषे च जलात् तेजस इव च) सृष्टिमपि च, **तत्तद्वा ....स्वरस इति**—तस्मिंस्तस्मिन् श्रुतिवाक्यखण्डे अक्लेशेन प्रतिपन्नोऽर्थ इति च **मुधा कल्पयन्तः**—श्रुत्यनभिमतमपि स्वबुद्ध्या आरोपयन्तः, **मुग्धास्तु**—मन्दप्रज्ञास्तु, **सर्वश्रु ....प्रणयिभिः**—निखिलोपनिषदैककण्ठ्यबद्धादरैः, **तत्त्वविद्भिः**—अनारोपितार्थचिन्तकैः, **अधरीचक्रिरे**—उदासिताः तत्त्वज्ञा इति नाभ्युपगताः ॥ १४ ॥

—o—

अधिकरणार्थसङ्ग्रहः (आरं....अधि)

आरम्भणाधिकरणे—बुद्धिशब्दान्तरादिभिः कार्यकारणयोः अन्यत्वात्, ब्रह्मणोऽन्यत् जगत्—इत्याशङ्क्य ।

'वाचारम्भणम्' इत्यादिभिः कार्यकारणयोः अनन्यत्वप्रतिपादनात् बुद्धिशब्दान्तरादीनां अवस्थान्तरपरत्वेन उपपत्तेश्च ब्रह्मणोऽनन्यत् जगत्—इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका

वैलक्षण्ये कार्यहेत्वोरसत्कार्याभ्युपागमात् ।
आरम्भणाधिकरणमपवादनिरासकृत् ॥ ७७ ॥

इति आरम्भणाधिकरणम् ॥ ६ ॥

—o—

(42) इतरव्यपदेशाधिकरणम् ॥ २–१–७ ॥

शारीरकन्यायकलापसङ्ग्रहः

(64) जीवस्य ब्रह्मभावं व्यपदिशति यतस्तत्त्वमस्यादिवाक्यं
तस्मात् दुःखैककन्दं न हि सृजति जगत् कः स्वदुःखाभिलाषी ।
नैवेतद् येन भेदं प्रकटयति तयोरन्य इत्यादिवाक्यं
देहात्मत्वादिभेदश्रवणमपि यथा चेतनैक्योपदेशः ॥ ६ ॥

यतः—येन हेतुना, **तत्त्वमस्यादिवाक्यम्**—'तत्वमसि', 'अयमात्मा ब्रह्म' इत्यादि-श्रुतिवाक्यम्, **जीवस्य**—जीवात्मन एव, **ब्रह्मभावम्**—ब्रह्मस्वरूपताम्, **व्यपदिशति**—स्पष्टं ब्रूते, **तस्मात्**—तेन हेतुना, **दुःखैककन्दम्**—दुःखमात्रनिदानम्, **जगत्**—विश्वम्, **न हि सृजति**—नैव खलु उत्पादयति (ईश्वरः), **कः**—को वा प्रेक्षावान्, **स्वदुःखाभिलाषी**—आत्मनो दुःखे इच्छावान्, (एवं शङ्कने प्राप्ते) **एतत् नैव**—उक्तमिदं नैवोचितम्, **येन**—येन हेतुना, **तयोः....वाक्यम्**—'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति' इत्येवमादि श्रुतिवाक्यम्, **भेदं प्रकटयति**—जीवात्मनः ब्रह्मणोऽतिरिक्ततामेव स्पष्टयति, **यथा चेतनैक्योपदेशः**—चेतनभूतयोः जीवेश्वरयोः ऐक्योपदेशः यथा श्रुतौ वर्तते तद्वत्, **देहात्मत्वादिभेदश्रवणमपि**—शरीर-शरीरिभावात्मकस्य भेदस्यापि उपदेशः श्रुतावेव श्रूयते ॥ ६ ॥

—o—

अधिकरणसारावलिः (इतर-अधि)

(168) उक्तेऽनन्यत्वपक्षे चिदपि परिणतिर्ब्रह्मणः स्यात्ततस्त-
ज्जीवैक्यं तत्त्वमस्याद्यवगतमहतं दुःखसिन्धुश्च जीवः ।
अभ्रान्तस्तु स्वदुःखं न सृजति न च तत् क्रीडया[1]प्यस्य[1] मैवं
तात्स्थ्येनानन्यतोक्तेस्तदपि चिदचितोस्तच्छरीरत्वसिद्धेः ॥ १५ ॥

अनन्यत्वपक्षे—कार्यकारणयोः जगद्ब्रह्मणोः अनन्यत्वमेव, न अन्यत्वं इति मते **उक्ते**—आरम्भणाधिकरणेन स्थापिते सति, **चिदपि**—जीवोऽपि, **ब्रह्मणः परिणतिः स्यात्**—परब्रह्मणो विकाररूप एव भवेत्, **ततश्च**—ब्रह्मपरिणामरूपत्वादेव जीवस्य, **तत्त्वमस्याद्यवगतम्**—'तत्त्वमसि' इत्यादिवाक्यैः प्रतिपन्नम्, **तज्जीवैक्यम्**—ब्रह्मणो जीवस्य च अभिन्नत्वम्, **अहतम्**—निर्बाधमेव, **जीवश्च**—ब्रह्माभिन्नो जीवात्मा तु, **दुःखसिन्धुः**—दुःखस्य महतो जलधिरिव आश्रयः, **अभ्रान्तस्तु**—बुद्धिभ्रंशरहितः यः कोऽपि पुरुषः, **स्वदुःखं न सृजति**—आत्मन एव दुःखापादकं किमपि नैव जनयति, (तस्मात्) **अस्य**—सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मणः, **तत्**—स्वदुःखकारिजगज्जनकत्वम्, **क्रीडयापि**—विनोदार्थमपि, **न च**—नैव सम्भवि, (इति शङ्कने) **मैवम्**—एवं ब्रह्मणो जगत्कारणत्वानुपपत्तिचिन्तनं नोचितम्, **तात्स्थ्येन**—ब्रह्मणः चेतने आत्मतया अवस्थितत्वं निमित्तीकृत्यैव, **अनन्यतोक्तेः**—देहात्मभावायत्तानन्यताया

[1] प्यस्तु—(सा. र.)

निर्णयात्, **तदपि**—तत्स्थत्वमपि ब्रह्मणः, **चिदचितोः**—चेतनाचेतनयोः, **तच्छरीरत्वसिद्धेः**—परमात्मानं प्रति शरीरतायाः अन्तर्यामिब्राह्मणादितः प्रतिपत्तेः ॥ १५ ॥

—o—

अधिकरणार्थसङ्ग्रहः (इतर- अधि)

इतरव्यपदेशाधिकरणे—जगद्-ब्रह्मणोः अनन्यत्वे, जीवस्यापि ब्रह्मणोऽनन्यत्वात्, हितरूपजगदकरणाहितरूपजगत्करणादिदोषप्रसङ्गः—इत्याशङ्क्य,

'य आत्मनि तिष्ठन्' इत्यादिभिः जीवब्रह्मणोः भेदव्यपदेशात्, न हिताकरणादिदोषप्रसक्तिः—इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका (इतर-अधि)

सर्वतोऽनन्यता स्याच्चेत् ईश्वरः स्यादनीश्वरः ।
अपाकृतोऽपवादोऽयं तदनन्तरनीतितः ॥

इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

—o—

(43) उपसंहारदर्शनाधिकरणम् ॥ २–१–८ ॥

शारीरकन्यायकलापसङ्ग्रहः

(65) यत् कारणं कारकसव्यपेक्षं तत् स्यात् परं ब्रह्म न तद्व्यपेक्षम् ।
अतो न हेतुस्त्विति नैव यस्मात् क्षीरं तु नैवेच्छति तद्दधित्वे ॥७॥

यत् कारणम्—कारणत्वेन लोके व्यवह्रियमाणं यद्वस्तु, **तत् कारकसव्यपेक्षं स्यात्**—तत् स्वकार्यजनने कारकान्तरसापेक्षमेव दृष्टम्, **परं ब्रह्म**—औपनिषदं परं ब्रह्म तु, **तद्व्यपेक्षं न**—कारकान्तरसापेक्षं न श्रुतम्; **अतः**—अनेन हेतुना, **न तु हेतुः इति नैव**—नैव जगत्कारणं इत्येवं शङ्कनं नैवोचितम्, **यस्मात्**—येन कारणेन (ज्ञापकात्मना), **क्षीरं तु**—क्षीराख्यं द्रव्यमेव, **दधित्वे**—दध्यात्मना परिणमने, **तत् नैवेच्छति**—स्वेतरत् कारकं नापेक्षत एव । एवं सति किमु वक्तव्यं अचिन्त्यमहिम्नः परमात्मनः इतरनैरपेक्ष्ये ॥ ७ ॥

—o—

अधिकरणसारावलिः (उपसं-अधि)

(169) शक्तौ कर्तृ-प्रकृत्योरुपकरणगणोपस्थितौ कार्यकृत्त्वं
तस्मादग्रे सदेकं किमुपकरणयेदित्यसच्छक्तिभेदात् ।
क्षीरायस्कान्तलूतात्रिदशमुनिमुखान् वीक्ष्य तोष्टव्यमस्मिन्
सङ्कल्पादेव जीवो नुदति निजवपुर्विश्वरूपस्तथेशः ।। १६ ।।

शक्तौ—समर्थतायां सत्याम्, **उपकरणगणोपस्थितौ**—सहकारिकारणकलापसमवधाने च सति, **कर्तृ-प्रकृत्योः**—निमित्तोपादानकारणयोः, **कार्यकृत्त्वं**—स्वकार्यजनकत्वं लोके दृष्टमस्ति, नत्वन्यथा ; **तस्मात्**—कारणसामान्यस्य उपकरणसापेक्षत्वात्, **अग्रे**—प्रलये, सृष्टेः प्राक्काले, सत्-सत्पदाभिधेयं ब्रह्म, **एकम्**—स्वेतरराहित्येनावस्थितम्, **किमुपकरणयेत्**—किं वा वस्तु स्वोपकरणतया उपादातुं शक्नुयात् ? (अतो ब्रह्म नैव जगतः कारणम्), **इत्यसत्**—एवं शङ्कनं नैव साधु, **शक्तिभेदात्**—उपकरणान्तरनैरपेक्ष्येऽपि कार्यजननानुकूल्यरूपायाः विलक्षणशक्तेरपि सत्वात्, **क्षीरयस्का....मुखान्**—क्षीरं दध्यात्मना परिणामि, अयस्कान्तं अयस आकर्षकम्, लूता मुखात् तन्तुप्रसरणशीला, देवाः ऋषयोऽपि च स्वसङ्कल्पमात्रेण विचित्रकार्यकरणसमर्थाः, तानेतान् विलक्षणशक्तिमतः, **वीक्ष्य**—सम्यक् परिशील्य, **अस्मिन्**—ब्रह्मणः अभिन्ननिमित्तोपादानत्वे, **तोष्टव्यम्**—निःशङ्कतया स्थातव्यम्, जीवः—साधारणः चेतनोऽपि, **निजवपुः**—स्वीयं शरीरम्, **सङ्कल्पादेव**—मानसिकव्यापारमात्रादेव, **नुदति**—प्रेरयति खलु, **तथा**—तद्वत्, **विश्वरूपः**—विश्वरूपत्वाद्धेतोः **ईशः**—ईश्वरोऽपि, सङ्कल्पादेव विश्वं सृजति ।। १६ ।।

—o—

अधिकरणार्थसङ्ग्रहः (उपसं-अधि)

उपसंहारदर्शनाधिकरणे—कुलालादीनां घटविनिर्माणशक्तानामपि उपकरणसापेक्षत्वदर्शनात्, ब्रह्मणः उपकरणरहितस्य कारणत्वं न सम्भवति इत्याशङ्क्य,

क्षीरादीनां उकरणरहितानामपि दध्यारम्भकत्वदर्शनेन विचित्रशक्तेः ब्रह्मणः उपकरणरहितस्यापि जगदारम्भकत्वं सम्भवति—इत्युक्तम् ।।

—o—

नयसङ्गतिमालिका (उपसं-अधि)

वैलक्षण्यं सत्यकामत्वादिभिः प्रतिपादितम् ।
तन्नोपपद्यत इति ह्याक्षेपोऽत्र निवार्यते ।। ७९ ।।

इति उपसंहारदर्शनाधिकरणम् ।। ८ ।।

—o—

(44) कृत्स्नप्रसक्त्यधिकरणम् ॥ २-१-९ ॥

शारीरकन्यायकलापसङ्ग्रहः

(66) ब्रह्म स्यात् कार्यशेषं निखिलमवयवाभावतः सांशता चेद्-
व्याकोपः स्यादिदानीमवयवविरहश्राविणीनां श्रुतीनाम् ।
हेतुत्वं तस्य तस्माद् विहतमुभयथेत्येतदप्यात्तसारं
वैलक्षण्यात्प्रकाराच्छ्रुतिभिरपि तथा ज्ञापनाच्छक्तिमत्वात् ॥ ८ ॥

(ब्रह्मणो जगत्कारणत्वे) **अवयवाभावतः**—तस्य निरंशत्वात्, **निखिलं ब्रह्म**—कृत्स्नमपि ब्रह्म, **कार्यशेषं स्यात्**—कार्यभूतजगदात्मनैव अवशिष्येत ; (ध्येयत्वाद्यर्हं नैव शिष्येत) **सांशता चेत्!**—तदर्थं तस्य सावयवत्वोपगमश्चेत् क्रियेत ;, **इदानीम्**—अस्यामवस्थायाम्, **अवयव....णीनाम्**—निरंशत्वप्रतिपादकानाम्, **श्रुतीनाम्**—'निष्कलम्' इत्यादीनां वेदगिराम्, **व्याकोपः स्यात्**—बाधितार्थता भवेत्, **तस्मात्**—उक्तहेतोः, **उभयथा**—सावयवत्वे निरवयवत्वे च, **तस्य हेतुत्वं विहतम्**—ब्रह्मणः जगत्कारणत्वं भग्नम्, इत्येतदपि आत्तसारम् एवं शङ्कनमपि दुर्बलम्, **वैलक्षण्यात्**—इतरविसजातीयतारूपात्, **प्रकारात्**—ब्रह्मासाधारणाद्धर्मात्, (उक्तदोषाप्रसक्तेः) **श्रुतिभिरपि**—ब्रह्मस्वरूपवर्णनपराभिः वेदान्तवाग्भिरपि, **तथा ज्ञापनात्**—सकलेतरविसजातीयतयैव ब्रह्मस्वरूपस्योपदेशात्, **शक्तिमत्वात्**—लोके वेदेऽपि च सर्वेषामप्यर्थानां मिथो विलक्षणशक्तिमत्वदर्शनात्, ब्रह्मणोऽपि सर्वाधिकसामर्थ्यशालित्वात् । (अतो जगत्कारणता निर्बाधेति) ॥ ८ ॥

—o—

अधिकरणसारावलिः (कृत्स्न....अधि) (श्लो ३७-३८)

(170) कृत्स्नं कार्यात्मना चेत् परिणमति परं नावशिष्येत किञ्चित्
यद्यंशान्निष्कलत्वश्रुतिविहतिरिदं स्याद्विशिष्टेऽपि तस्मिन् ।
ब्रह्मोपादानतैवं न घटत इति चेन्न स्वपक्षेषु साम्यात्
तन्मानात्तद्गृहीतौ श्रुतिमितमपि तल्लोकवत् स्वीकुरुष्व ॥ ३७ ॥

परं—परंब्रह्म, **कृत्स्नम्**—समग्रमपि, **कार्यात्मना परिणमति चेत्**—सृज्यजगद्रूपेण परिणामं प्राप्नोतीति यद्यभ्युपगम्येत तर्हि, **किञ्चित् नावशिष्येत**—ध्येयत्व-मोक्षप्रदत्वादेः वेदान्तोक्तधर्मस्याश्रयतया, किमपि न शिष्टं स्यात्, **यदि अंशात्**—स्वैकदेशत एव यदि

परिणमति तदा, **निष्कलत्वश्रुतिविहतिः**—ब्रह्मणो निरवयवतावोधकानां श्रुतीनां 'निष्कलम्' इत्यादीनां बाधः स्यात्, **इदम्**—कृत्स्नैकदेशविकल्पायत्तं दूषणम्, **विशिष्टेऽपि तस्मिन् स्यात्**—चेतनाचेतनविशिष्टे मायाविशिष्टे वा ब्रह्मणि जगदुपादानतया स्वीकृतेऽपि समानतया प्राप्नुयादेव। **एवं**—उक्तदोषापरिहारे, **ब्रह्मोपादानता न घटते**—ब्रह्मणः विश्वं प्रति परिणामिकारणत्वात्मकमुपादानत्वं न सुस्थं भवति, **इति चेत् न**—एवं शङ्कनं न युक्तम्, **स्वपक्षेषु साम्यात्**—प्रधान-परमाण्वादिकारणतावादिनां पक्षेष्वपि अस्य दोषस्य समत्वात्, **तन्मानात् तद्गृहीतौ**—प्रधान-परमाण्वादेः जगत्कारणत्वसाधनौपयिकात् अनुमानात् कारणत्व-निश्चये कर्तव्यतया आपतिते सति, 'तत्तदर्थसाधकप्रमाणात् तत्तदर्थनिश्चयः कार्यः' इत्यंशे सुदृढे सति (इति वा), **तदपि**—ब्रह्मण एव जगदुपादानत्वमपि, **श्रुतिमितम्**—प्रमाणत्वे सर्वाधिकया श्रुत्या निर्णीतत्वादेव, **लोकवत्**—प्रत्यक्षदृष्टमिव अबाधेन, **स्वीकुरुष्व**—अभ्युपगच्छ। (न तत्र विमतिं कुरु) ।। १७ ।।

(171) संयोगाख्यं हि कार्यं विभु तदितरयोः स्यादणूनां मिथो वा
कार्त्स्न्येनांशेन वा तद्विहतमिति वदन् शून्यवादे निमज्जेत्
सांख्योऽपि प्राह विभ्वीं प्रकृतिमिति कथं न्यूनसृष्टिस्ततः स्यात्
मायादिष्वेवमूह्यं निगमनिगदिता त्वक्षता पद्धतिर्नः ।। १८ ।।

संयोगाख्यं कार्यम्—संयोगपदाभिधेयं कार्यम्, **हि**—यतः, **विभु-तदितरयोः**—परिच्छेदरहितस्य ईश्वरस्य तद्भिन्नस्य अण्वादेरपि, (अधिष्ठात्रधिष्ठानभावेन) **अणूनां वा मिथः स्यात्**—परमाणूनामेव वा परस्परं सम्भवेत्, **तत्**—संयोगाख्यं कार्यम्, **कार्त्स्न्येन अंशेन वा विहतम्**—(विभुष्वणुषु च) सर्वांशेनेति किञ्चिदंशेनेति च बाधितमेव भवति, (सर्वांशेनेति चेत् अणोरपि विभुत्वापत्तिः; किञ्चिदंशेनेति चेत् विभोरप्यणुत्वापत्तिरिति) **इति वदन्**—एवंवादी वैशेषिकः **शून्यवादे निमज्जेत्**—माध्यमिकबौद्धानां सर्वशून्यतावादे एव स्वसिद्धान्तं परिसमापयेत्, **सांख्योऽपि**—कपिलानुसार्यपि, **प्रकृतिम्**—प्रधानापरपर्यायां मूलप्रकृतिम्, **विभ्वीं प्राह**—अपरिच्छिन्नामेव वदति, **इति**—अनेन हेतुना, **ततः**—विभ्व्याः प्रकृतेः, (पञ्चमी) **न्यूनसृष्टिः कथं स्यात्**—परिच्छिन्नपरिणामस्य कार्यजातस्योत्पत्तिः युक्तिसिद्धा कथं भवेत्? **मायादिषु**—माया-शक्ति-उपाधिषु ब्रह्मविशेषणतास्वीकर्तॄणां मतेष्वपि, **एवमूह्यम्**—सांख्यादि-निरसनविधयैव निरसनं आलोचनीयम्। **नः पद्धतिस्तु**—ब्रह्मणो निमित्तोपादानतां अभ्युपगच्छतां अस्माकं सरणिस्तु, **निगमनिगदिता अक्षता**—श्रुत्यैव निर्णीता सती निराबाधा ।।१८।।

—o—

अधिकरणार्थसङ्ग्रहः (कृत्स्न. अधि)

कृत्स्नप्रसक्त्यधिकरणे—निरवयवस्य ब्रह्मणः कारणत्वे, कृत्स्नस्यापि ब्रह्मणः एककार्योपयुक्तत्व-प्रसङ्गात्, ब्रह्मकारणत्वं असमञ्जसम्—इत्याशङ्क्य,

ब्रह्मणो निरवयवत्वस्य विचित्रजगत्कारणत्वस्य च श्रुतिप्रतिपन्नत्वात्, श्रुतिप्रतिपन्नार्थस्य युक्त्या बाधायोगाच्च, ब्रह्मकारणत्वं समञ्जसम्—इत्युक्तम् ।।

—o—

नयसङ्गतिमालिका (कृत्स्न-अधि)

क्षीरोदकादिकं सांशं निरंशं ब्रह्म संमतम् ।
कृत्स्नप्रसक्त्यधिकृतौ सङ्गतिः प्रत्युदाहृतिः ।। ८० ।।

इति कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

—o—

(45) प्रयोजनवत्त्वाधिकरणम् ।। २-१-१० ।।

शारीरकन्यायकलापसङ्ग्रहः

(67) कामानां समवाप्तितो न हि फलं किञ्चित् समालोक्यते
सृष्टेरस्य परस्य नाऽपि दयया दुःखैकहेतुत्वतः ।
नैवैतत् स हि लीलयैव तनुते पुण्याद्यपेक्षावशात्
वैषम्यादि च नास्ति कर्मवशतासिद्धेरनादित्वतः ।। ९ ।।

परस्य—परमात्मनः, **कामानां समवाप्तितः**—अवाप्तसमस्तकामत्वेन, **अस्य सृष्टेः**—विविधवैषम्ययुतविश्वकर्मकोत्पादनस्य, **किञ्चित् फलम्**—इष्टप्राप्तिरूपं वा अनिष्टनिवृत्तिरूपं वा किमपि वा प्रयोजनम्, **न हि समालोक्यते**—बहुचिन्तितमपि नैव स्फुरति, **नापि दयया**—चेतनेषु, करुणां स्वार्थनिरपेक्षां (दुःखासहिष्णुतां) हेतूकृत्यापि सृष्टिर्न युज्यते, **दुःखैकहेतुत्वतः**—(सृष्टेः) बहुशो दुःखमात्रहेतुत्वदर्शनात्, (इति पूर्वपक्षे)

नैवैतत्—इदमाशङ्कनं नैव साधु, **हि**—यतः, **सः**—परमात्मा, **लीलयैव**—लीलार्थमेव (अनन्यप्रेरितः स्वप्रीत्यर्थो व्यापारः लीला), **पुण्याद्यपेक्षावशात्**—पुण्यपापात्मकं तत्तत्क्षेत्रज्ञकर्म सहकारितया प्रयोजकीकृत्य; **तनुते**—जगत् निर्माति, **कर्मवशतासिद्धेः**—जगतो

विषमसृष्टौ कर्मसापेक्षतालाभस्य, **अनादित्वतः**—अनिदंप्रथमत्वेन हेतुना, **वैषम्यादि च नास्ति**—जीवविशेषे पक्षपातः निष्करुणत्वं इत्यादेरभावोऽपि स्फुटः ॥ ९ ॥

—o—

अधिकरणसारावलिः (प्रयो.अधि) (श्लो. 19–21)

(172) आत्मार्थं विश्वसृष्टिः कथमपि सततावाप्तकामस्य न स्यात्
कारुण्याद् दुःखसृष्टिर्न भवति न च सा सर्वशक्तेश्चिकित्सा ।
सर्वज्ञः स्वात्मतृप्तस्तदिह न जगतो हेतुरित्यन्धचोद्यं
लीलासौ लोकवत् स्यादभिम[1]त[1]समये सिद्धितस्त्वाप्तकामः ॥ १९ ॥

सततावाप्तकामस्य—सर्वदेश-सर्वकाल-सर्वावस्थासु निष्पन्नेष्टार्थस्य परमात्मनः, **आत्मार्थं** स्वप्रयोजनाय, **विश्वसृष्टिः**—जगन्निर्मितिरित्येतत्, **कथमपि न स्यात्**—केनापि प्रकारेण न युज्यते, **कारुण्यात्**—दयां निमित्ततयोपादाय चेत्, **दुःखसृष्टिः न भवति**—प्रातिकूल्यमयी सृष्टिः न घटते ; (दुःखप्रहाणफलकत्वात् दयायाः) **सा**—उक्तविधा सृष्टिः, **सर्वशक्तेः**—सर्वशक्तिमत्परमात्मकर्तृकत्वेन सिद्धा, **न चिकित्सा**—अल्पशक्तवैद्यकर्तृकरोगनिवारकव्यापार इव नैव अवर्जनीयदुःखा स्यात्, **तत्**—उक्तेभ्यो हेतुभ्यः, (स्वपरप्रयोजनराहित्यात्) **सर्वज्ञः**—स्वभावत एव युक्तायुक्तसर्वार्थसाक्षात्कारक्षमः, **स्वात्मतृप्तः**—अनवधिकातिशयानन्दे स्वस्वरूपे एव नित्यसुखी च परमात्मा, **इह**—प्रकृतिमण्डले, **जगतः**—विविधविचित्रकार्यजातस्य, **न हेतुः**—नैव कारणम्, **इति, अन्धचोद्यम्**—ईदृशं शङ्कनं विषयविवेचनाक्षमस्यैव, **असौ**—उक्ता जगत्सृष्टिः, **लोकवत्**—लोकपरिदृष्टसर्वसमृद्धराजादिगतकन्तुकव्यापारादिवत्, **लीला**—पूर्णस्य भगवतः स्वप्रीत्यर्थो व्यापार एव, **अभिमतसमये सिद्धितस्तु**—अपेक्षितकाले सर्वेष्टार्थसम्पत्तित एव, **आप्तकामः**—अवाप्तसमस्तकामपदाभिधेयो भवति परमात्मा ॥ १९ ॥

(173) विश्वं दुःखैकतानं विषममपि सदा निर्मिमाणस्य लीला
सञ्जायेतासमञ्जक्रमत इति भवेन्निर्दयत्वादिदोषः ।
मैवं बीजाङ्कुरादिक्रमविषमभवानादिकर्मौघभाजां
जीवानां सौति तत्तत्फलमिति करुणासाम्ययोरप्रहाणात् ॥ २० ॥

---

[1] मति—सा. रा.

विश्वम्—जगत्, **सदा**—सर्गे सर्गे, **दुःखैकतानं विषममपि**—प्रातिकूल्यमयतया वैषम्यबहुलतयापि च, **निर्मिमाणस्य**—सृजत ईश्वरस्य, **लीला**—सृष्ट्यात्मिका लीला, **असमञ्जक्रमतः**—असमञ्जनाम्नः सगरपुत्रस्य हिंसाविहारसदृशी, **सञ्जायेतेति**—परिणता स्यादिति, **निर्दयत्वादिदोषो भवेत्**—(स्रष्टुः ईश्वरस्य) अकारुण्यपक्षपातौ प्रसज्येयाताम्, इति शङ्कने,

मैवम्—ईदृशं शङ्कनं असाधु, **बीजाङ्कुरादिक्रमेण**—बीजादङ्कुरम्, अङ्कुराद्बीजमित्यादिकया रीत्या, **विषमभवानादिकर्मौघभाजाम्**—स्वयं विषमतापन्नकर्मपारम्परीजुषाम्, **जीवानाम्**—संसारिचेतनानाम्, **तत्तत्फलं सौतीति**—सुखात्मकं दुःखात्मकं वा फलं यथायोग्यं ईश्वरः प्रयच्छतीति, **करुणा-साम्ययोः**—ईश्वरस्वभावसिद्धयोः अपारकरुणाम्बुधित्व-सर्वभूतसमत्वयोः, **अप्रहाणात्**—ईश्वरे अस्खलितत्वात् ॥ २० ॥

(174) दृष्टन्यायेन विश्वप्रजनकविदचित्तत्त्वभेदप्रक्लृप्तौ
स्वेष्टप्रत्यर्थिधर्मोपनयननियतव्याप्तिर्वैयाकुली स्यात् ।
अत्यन्तादृष्टमर्थं भणितुमधिकृतात् शास्त्रतः सर्वकर्तुः
सिद्धौ बाधाद्यनर्हप्रमितिपरवती सर्वधर्मोपपत्तिः ॥ २१ ॥

दृष्टन्यायेन— प्रत्यक्षपरिदृष्टघट-पटादिकार्यजनकीभूतकुलाल-मृत्पिण्डादिन्यायेन, **विश्व....प्रक्लृप्तौ**—जगतः अपरिदृष्टनिमित्तोपादानकारणभूतचेतनाचेतनपदवाच्येश्वरप्रधान-परमाण्वादितत्त्वविशेषकल्पने अनुमानतः क्रियमाणे, **स्वेष्टप्रत्यर्थिनाम्**— स्वाभिमत-विभुत्व-नित्यत्वादिविरुद्धानाम्, **धर्माणाम्**- परिच्छिन्नत्वानित्यत्वादिधर्माणाम्, **उपनयने नियतायाः**—धर्मिणि समर्पणे नियमयुक्तायाः, **व्याप्तेः**—सामान्यव्याप्तेः लोकदृष्टायाः, **वैयाकुली स्यात्**—व्याकुलता व्यभिचारितारूपा भवेत्, **अत्यन्तादृष्टमर्थम्**—सर्वात्मना अतीन्द्रियमर्थम्, **भणितुं अधिकृतात्**—शब्दतः स्पष्टं बोधयितुं महाजनपरिग्रहतः प्राप्ताधिकारात् **शास्त्रतः**—वेदरूपाच्छास्त्रात्, **सर्वकर्तुः**—विश्वनिर्मातुः ईश्वरस्य, **सिद्धौ**—अवगतौ सम्भवत्याम्, **बाधाद्यनर्हप्रमितिपरवती**—बाधादिदोषसम्भावनाविधुरप्रमाधीना, **सर्वधर्मोपपत्तिः**—ईश्वरे कारणत्वौपयिकी सर्वेषां धर्माणां विभुत्वादीनां उपपन्नता भवति ॥ २१ ॥

—o—

अधिकरणार्थसङ्ग्रहः (प्रयो. अधि)

प्रयोजनवत्त्वाधिकरणे—ब्रह्मणः अवाप्तसमस्तकामस्य प्रयोजनाभावात् जगत्स्रष्टृत्वं न सम्भवति—इत्युक्ते,

अवाप्तसमस्तकामस्यापि लीलारूपप्रयोजनसम्भवात् स्रष्टृत्वं संभवति इति परिहारः ।

—o—

नयसङ्गतिमालिका (प्रयो-अधि)

प्रयोजनं विना नेशो विचित्रं स्रष्टुमर्हति ।
इति प्रयोजननये प्रोक्तमाक्षेपदूषणम् ॥ ८१ ॥

—o—

इति प्रयोजनवत्त्वाधिकरणम्

—o—

पादाधिकरणसिद्धार्थसंक्षेपः

शारीरकन्यायकलापसङ्ग्रहः [श्लो. १३-१४]

(68) कपिलस्मृतेर्विरोधात् हिरण्यगर्भस्मृतेर्विरोधाच्च ।
न्यायविरोधात् भोगप्रसङ्गतः कार्य[1]हेतुभेदाच्च[1] ॥ १० ॥

(69) जीव-ब्रह्मैकत्वात् कारकसङ्ग्रहणहानितश्चापि ।
कार्यैकशेषभावात् फलहाने[2]श्चोत्थितं[2] पर्यहरत् ॥ ११ ॥

(द्वितीयाद्ये) **कपिलस्मृतेः विरोधात्**—वेदान्तानां ब्रह्मकारणतावादिनां प्रधानकारणताबोधिकया सांख्यस्मृत्या विरोधतः, **हिरण्यगर्भस्मृतेः विरोधाच्च**—(सेश्वरत्वेऽपि) योगस्मृत्या सह विरोधतः, **न्यायविरोधात्**—कारणस्य स्वसदृशकार्योत्पादकत्वरूपया युक्त्या विरोधतः, **भोगप्रसङ्गतः**—ब्रह्मणो जगत्कारणत्वे सर्वभूतान्तर्यामित्वे वा देहसम्बन्धायत्तसुखादिभोक्तृत्वप्रसक्तितः, **कार्यहेतुभेदाच्च**—कार्य-कारणयोः अन्यत्वतः प्राप्तश्रुत्यर्थानुपपत्तितः, **जीव-ब्रह्मैकत्वात्**—जीव-ब्रह्मणोः अभेदेन स्वाहितसृष्टिप्रसङ्गतः, **कारकसङ्ग्रहणहानितश्चापि**—सर्वशक्तेऽपि ब्रह्मणि स्वेतरकारणसामग्र्यनुपादानतः, **कार्यैकशेषभावात्**—ब्रह्मणो जगदात्मना परिणामित्वे सम्पूर्णस्यापि जगद्रूपकार्यात्मनैवाऽवशेषापत्तेः, **फलहानेश्च**—ब्रह्मणः स्रष्टृत्वे

[1] हेतुत्वाच्च—ख. भेदाच्च—क. [2] श्चार्थिकं—ख.

निष्प्रयोजनत्वतः, **उत्थितम्**—आपतितं आक्षेपम्, **पर्यहरत्**—(स्मृत्यधिकरणमारभ्य प्रयोजनवत्त्वाधिकरणान्तैः दशभिरधिकरणैः परिहृतवान् सूत्रकारः ॥ १०–११ ॥

(70) द्वाभ्यां स्मृत्यविरोधः स्याच्छेषैर्न्यायाविरोधिता ।
चतुर्थपञ्चमौ तत्र तृतीयोक्तौ प्रसङ्गतः ॥ १२ ॥

(71) तस्मात् षष्ठं तृतीयं च पादेऽस्मिन् सङ्गते मते ।
षष्ठादयस्तु चत्वारः सङ्गच्छन्ते यथाक्रमम् ॥ १३ ॥

द्वाभ्याम्—स्मृति-योगप्रत्युक्त्यधिकरणाभ्याम्, **स्मृत्यविरोधः स्यात्**—कापिल-हैरण्यगर्भस्मृतिविरोधस्य वेदान्तार्थप्रतिरोधकत्वाभावः भवेत् । **शेषैः**—अवशिष्टैः अष्टभिरधिकरणैः, **न्यायाविरोधिता**—वेदान्तार्थस्य युक्तिविरोधकृतबाध्यत्वाभावः, **तत्र**—एतेष्वष्टसु, **चतुर्थ-पञ्चमौ**—शिष्टापरिग्रह-भोक्त्रापत्तिन्यायौ, **तृतीयोक्तौ**—विलक्षणत्वाधिकरणोक्तावेव, **प्रसङ्गतः**—प्रसक्तार्थविवरणात्मकतया युज्येते ॥ १२ ॥

तस्मात्—पूर्वोक्ताद्धेतोः, **षष्ठं तृतीयं च**—आरम्भण-विलक्षणत्वाधिकरणे उभे अपि, **अस्मिन् पादे**—आद्ये स्मृतिपादे, **सङ्गते मते**—आक्षेपाख्यसङ्गत्या मिथः साङ्गत्ययुक्ते संमते । **षष्ठादयः चत्वारस्तु**—आरम्भणाधिकरणत आरभ्य कृत्स्नप्रसक्त्यन्ताः न्यायास्तु, **यथाक्रमं सङ्गच्छन्ते**—विन्यासक्रममनुरुध्यैव सङ्गता भवन्ति ॥ १३ ॥

(72) तच्छायवाक्यैरुत्थानं तथान्यायेन चोद्भवः ।
इति पूर्वेण पादेन सङ्गतिः स्यात् सुशोभना ॥ १४ ॥

तच्छायवाक्यैः—सांख्याभिमतार्थप्रतिपादनपरैरिव भासमानैः वेदान्तवाक्यैः ब्रह्मणो जगत्कारणत्वविघटकत्वेन शङ्क्यमानैः (प्रथमाध्यायस्य तुर्यपादस्य) **उत्थानं**—उदयः, **तथा**—तादृश्यैव रीत्या, **न्यायेन**—कार्यसौसादृश्यस्य प्रधाने एव विद्यमानतया ब्रह्मकारणत्वप्रतिरोधकं युक्त्याभासं हेतूकृत्य, (द्वितीयाद्यपादस्य) **उद्भमः**—उदयः, **इति**—एवं रीत्या, **पूर्वपादेन**—आद्यतुर्येण, **सङ्गतिः**—द्वितीयाद्यपादस्य कार्यैक्यरूपा सङ्गतिः, **सुशोभना स्यात्**—अत्यन्तं समीचीना भवेत् ॥

—o—

अधिकरणसारावलिः

(175) सांख्यस्मृत्या विरोधात् विधिमतविहतेः कार्यवैरूप्यतोऽस्मिन्
एकार्थानेकतन्त्रोदितविहततया देहभोगावियुक्त्या ।
कार्योपादानभेदात् स्वहितविहतितः कारकस्तोमहानेः
कृत्स्नांशाद्यूहबाधात् कृतिविफलतयाऽप्युत्थितं प्रत्यविध्यत् ॥ २२ ॥

सांख्यस्मृत्या विरोधात्—(वेदान्तवाक्यानां) कापिलस्मृत्या सह विरोधात्, **विधिमतविहतेः**—हिरण्यगर्भसंमतेन योगशास्त्रेण विरोधात्, **कार्यवैरूप्यतः**—सृज्यस्य जगतः ब्रह्मणः सकाशात् अचेतनत्वकृतवैलक्षण्यात्, **एकार्थानेकतन्त्रोदितविहततया**—(जगत्कारणविषये) समानाभिप्रायकबहुदर्शनोक्तार्थव्याहतार्थकतया, **देहभोगावियुक्त्या**—शरीरसम्बन्धायत्तसुखदुःखसंवेदनस्य ब्रह्मणि अवर्जनीयतया, **कार्योपादानभेदात्**—उपादेयोपादानभूतयोरर्थयोः पटतन्त्वोरिव मिथोभेदस्य आवश्यकत्वात्, **स्वहितविहतितः**—जीवाभिन्नेन ब्रह्मणा दुःखमयजगत्सृष्टौ स्वहितविघातप्रसङ्गात्, **कारकस्तोमहानेः**—शक्तस्य कार्यजनने आवश्यकसामग्र्यनुपादानकृतात् कारणत्वविघटनात्, **कृत्स्नांशाद्यूहबाधात्**—ब्रह्मणः जगत्परिणामः कृत्स्नतः? एकदेशतो वा? इति विकल्पकृतात् उभयानुपपन्नत्वात्, **कृतिविफलतयापि**—ब्रह्मणो जगद्व्यापारतः स्वपरप्रयोजनाभावेनापि च, **उत्थितं**—प्रवृत्तं ब्रह्मणो जगत्कारणत्वाभावशङ्कनं, **प्रत्यविध्यत्**—सूत्रकृत् निराकरोत् ॥ २२ ॥

—o—

नयसङ्गतिमालिका

एवं द्वितीयाद्यपादे मिथः समगमन् क्रमात् ।
पेठिकाद्वयगूढानि दशाधिकरणान्यपि ॥ ८२ ॥

इति द्वितीयाध्याये प्रथमः पादः ॥

॥ श्रीः ॥

श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ।

द्वितीयाध्याये द्वितीयः पादः

(46) रचनानुपपत्त्यधिकरणम् ॥ २–२–१ ॥

शारीरकन्यायकलापसङ्ग्रहः

(73) वेदाहृता यद्यपि तत्त्वसंख्या
जीवान् बहूनिच्छति चापि तन्त्रम् ।
यत् कारणं तत् खलु कर्त्रपेक्षं
नैतत्तथा तान्त्रिकमित्यसाधु ॥ १५ ॥

तत्त्वसंख्या—(सांख्याभिमता) तत्त्वानां चतुर्विंशतिसंख्या, **यद्यपि वेदादृता**—वस्तुतः श्रुतिसंमता, **तन्त्रमपि**—कापिलतन्त्रमपि, **जीवान्**—चेतनान्, **बहूंश्चेच्छति**—असंख्यातानेव अभ्युपैति, (अथापि) **यत् कारणं तत्**—यद्यत् कार्यजनकं तत्सर्वमपि, **कर्त्रपेक्षं खलु**—कर्तृसापेक्षतयैव विद्यमानं लोके दृष्टम् ; न त्वनपेक्षम्, **तान्त्रिकमेतत्**—कपिलतन्त्राभ्युपगतं प्रधानम्, **न तथेति**—अचेतनं सदपि अनपेक्षतयैव कार्यजनकं मतमिति हेतोः, **असाधु**—सांख्याभिमतं प्रधानकारणत्वं अनुचितमेव ॥ १५ ॥

—o—

अधिकरणसारावलिः (रचना....अधि) (श्लो. १-७)

(176) बाधाभावादकम्पे स्थितवति 'निगमैर्ब्रह्म[1] हेतुत्ववादे
भूयः किं वीतरागो वदति परपरीवादमत्रेत्ययुक्तम् ।
प्रख्यातप्राच्यनैकप्रतिसमयभवन्मन्दसन्देहशान्त्यै
तुल्यत्वभ्रान्तिसिद्धा प्रकरणसमता तर्कपादेन वार्या ॥ १ ॥

निगमैः—वेदान्तैः (उद्घोषिते), **ब्रह्महेतुत्ववादे**—ब्रह्मण एव जगत्कारणत्वसिद्धान्ते, **बाधाभावात्**—परिहृतविरोधत्वात्, **अकम्पे स्थितवति**—अचाल्यतया सुदृढे सति, **भूयः**—

---

[1] निगमे ब्रह्म—(प.पा)

पुनरपि, **वीतरागः**—ख्यात्यादिविमुखः, **अत्र**—अस्मिन् द्वितीये पादे, **किम्**—किमर्थम्, **परपरीवादं वदति**—तन्त्रान्तरीयान् प्रति दूषणान् कथयति, **इत्ययुक्तम्**—एवं शङ्कनं न साधु, **प्रख्यातैः प्राच्यैः**—प्रसिद्धैः पूर्वकालतः प्रवृत्तैः, **नैकैः प्रतिसमयैः**—नानाविधैः विरुद्धपक्षैः, **भवतः**—उत्पत्स्यतः, **मन्दसन्देहस्य शान्त्यै**—अल्पप्रज्ञानां विपरीतकोटिप्रामाणिकतासंशयस्य निरवशेषत्वापत्तये, **तुल्यत्वभ्रान्तिसिद्धा**—इतरतन्त्राणां वेदान्तेन साकं समप्रामाण्यभ्रमतो निष्पन्ना, **प्रकरणसमता**—श्रुत्युक्तेऽर्थे सत्प्रतिपक्षितत्वशङ्का, **तर्कपादेन वार्या**—तर्कपादनाम्ना द्वितीयाध्यायद्वितीयचरणेन परिहरणीया भवति ॥ १ ॥

(177) षड्विंशालम्बि सांख्यं स्फुटतरपठितं भारते योगतुल्यं
तत्स्थत्वात् पञ्चविंशस्त्विति च [1]निगदितः[1] सर्वतत्त्वान्तरात्मा ।
तस्मात् सेशानतन्त्रं श्रुतिसमधिगतं स्थापयित्वाथ सूत्रैः
पक्षं त्वीशानपेक्षं प्रतिवदति नयैरुत्कटप्रत्यवायम् ॥ २ ॥

भारते—(पञ्चमवेदाख्ये) महाभारते, **षड्विंशावलम्बि**—षड्विंशकं परमपुरुषमप्यवलम्बमानम्, **सांख्यम्**—पञ्चविंशतिरूपनियाम्यतत्वसंख्यानतः प्रवृत्तम् सांख्यशास्त्रम्, **योगतुल्यम्**—योगशास्त्रेण समतया, **स्फुटपरिपठितम्**—असन्दिग्धं कण्ठत एवोक्तमास्ते । **तत्स्थत्वात्**—पञ्चविंशके जीवतत्वे शरीरितया अवस्थितत्वाद्धेतोः, **सर्वान्तरात्मा**—सर्वजगदन्तर्यामी परमात्मा, **पञ्चविंशस्त्विति**—तत्त्वसंख्याने पञ्चविंशक एवेति, **निगदितः**—निश्चित्य प्रतिपादितः, **तस्मात्**—उक्ताद्धेतोः, **सेशानतन्त्रम्**—सेश्वरं सांख्यतन्त्रम्, तत्सदृशं योगतन्त्रं च, **श्रुतिसमधिगतं स्थापयित्वा**—वेदप्रतिपन्नमेवेति समर्थ्य, **अथ नयैः सूत्रैः**—एतत्पादीयैः अधिकरणसूत्रैः, **ईशानपेक्षं पक्षं तु**—निरीश्वरसांख्यपक्षमेव, **उत्कटप्रत्यवायं प्रतिवदति**—अनतिलङ्घनीयपापावहतया त्याज्यमिति प्रत्याख्याति बादरायणः ॥ २ ॥

(178) अव्यक्तादीन् पदार्थाननुमितिमुखतः [2]स्थाप[2]यन्तः स्वबुद्ध्या
षट्त्रिंशत्तत्त्ववादप्रभृतिषु न कथं सङ्गमिच्छन्ति सांख्याः ।
तुल्याक्षेपोपपत्तीः श्रुतिनियतिमुचां कल्पनाः संमृशन्तः
दृष्टं नापह्नुवीरन् लघुमनुमिनुयुः शेषमिच्छन्ति शास्त्रात् ॥ ३ ॥

अव्यक्तादीन् पदार्थान्—'मूलप्रकृतिः, महान्, अहङ्कारः, तन्मात्राणि' इत्येवमादीन्

---

[1] निगमितः—प. [2] कल्प—सा. र.

परिगण्यमाणान् तत्त्वात्मकान् पदार्थान्, **अनुमितिमुखतः**—अनुमानं द्वारतयोपादाय, **स्वबुद्ध्या**—श्रुत्यननुरोधिन्या, स्वच्छन्दया धिया, **स्थापयन्तः**—समर्थयन्तः, **साङ्ख्याः**—साङ्ख्यतया लोके प्रथिताः तान्त्रिकाः, **षट्त्रिंशत्तत्त्ववादप्रभृतिषु**—पाशुपत-वैशेषिकादिपरिगृहीतेषु षट्त्रिंशत्तत्त्ववाद-सप्तपदार्थवादादिषु अन्यान्यतत्तत्समयसिद्धेष्वर्थेषु, **सङ्गम्**—स्वाभ्युपगमरूपं सम्बन्धम्, **नेच्छन्ति कथम्**—नाभिलषन्ति इत्येतत् कथं वा युज्यते ?, **तुल्याक्षेपोपपत्तीः**—आक्षेप समाधानयोः साम्यवतीः, **श्रुतिनियतिमुचां कल्पनाः**—वेदमर्यादातिलङ्घिनां बाह्यसामयिकानां तास्ताः कल्पनाः **संमृशन्तः**—समानयोगक्षेमतया भावयन्तः वेदावलम्बिनः, **दृष्टं न अपह्नुवीरन्**—प्रत्यक्षतो ज्ञेयमर्थं न अपलपेयुः, **लघुम्**—इन्द्रियावेद्यं कल्पनालाघवयुतमर्थम्, **अनुमिनुयुः**—अनुमानतो निर्णयेयुः, **शेषम्**—प्रत्यक्षानुमानाभ्यामनिर्णेयं चार्थविशेषम्, **शास्त्रात्**—अलौकिकार्थनिर्णये समर्थान् वेद-तदुपबृंहणरूपादागमप्रमाणात्, **इच्छन्ति**—निर्णेतुमभिलषन्ति ॥ ३ ॥

(179) कार्यं किञ्चित् कुविन्दप्रभृतिविरचितं दृश्यतेऽन्यच्च सर्वं
कर्त्रायत्तं श्रुतं तत् क्वचिदपि न पराधीनताभङ्गदृष्टिः ।
पङ्ग्वन्ध-क्षीरपाथस्तृणजलद-तटिद्वाय्वयस्कान्तपूर्वैः
दृष्टान्तैर्न त्वदिष्टं फलति तदखिलं चेतनाधिष्ठितं नः ॥ ४ ॥

कार्यं किञ्चित्—जन्यत्वेन लोकसिद्धं पदार्थजातम्, **कुविन्दप्रभृतिविरचितं दृश्यते**—तन्तुवायादिकर्तृनिर्मिततयैव प्रत्यक्षीक्रियते, **अन्यच्च सर्वम्**—कर्तृनिर्मिततया अस्माभिरदृष्टं मही-महीधरादिकं कार्यं च निखिलम्, **कर्त्रायत्तं श्रुतम्**—कर्तृविशेषाधीनजन्यतया श्रुतिप्रतिपन्नम्, **तत्**—तस्मात्, **क्वचिदपि**—यत्र कुत्रापि कार्ये, **पराधीनतभङ्गदृष्टिः न**—इतराधीनोत्पत्तिनैयत्याभावदर्शनं नास्त्येव, **पङ्ग्वन्ध....पूर्वैः दृष्टान्तैः**—'नेत्रवत्पङ्गुसांनिध्यमात्रतः अन्धस्य प्रवृत्तिः, क्षीरस्य दध्यात्मना परिणतिः, जलस्य करकाद्यात्मना परिणतिः, धेनुजग्धस्य तृणस्य क्षीररूपेण परिणतिः, मेघस्य वर्षणप्रवृत्तिः, अकस्मादेव विद्युतः प्रवृत्तिः, विनापि कारणं चण्डमारुतप्रवृत्तिः, विनैव हेतुं अयस्कान्तोपलेन अयसः कर्षणम्, एवमादिभिः निदर्शनैः, **त्वदिष्टम्**—भवतः सांख्यस्याभिमतं ब्रह्मानधिष्ठितेन प्रधानेन जगदुत्पादनम्, **न फलति**—नैव सिद्ध्यति, **तदखिलम्**—निदर्शितं सर्वमपि, **नः**—श्रुतिशरणानां मते, **चेतनाधिष्ठितम्**—चेतनभूतेन ईश्वरेण अधिष्ठितमेव तत् स्वीयतत्तत्कार्यजनकमिति, (उभयवाद्यसंमतत्वात् न दृष्टान्ततामश्नुते) ॥ ४ ॥

(180) नन्वत्राचेतनानां स्वसमुचितविधौ कर्त्रधीनत्वमुक्तं
शास्त्रारम्भे विधातुर्व्यनुददनुमितिं किं परः सूत्रकारः ? ।
पृच्छेयं नातितुच्छा श्रुणु तदवहितः सर्वकृन्नानुमातुं
नापह्नोतुं च शक्यस्तदुभयनियमादर्शनादित्यमंस्त ॥ ५ ॥

अत्र—अस्मिन्नधिकरणे, **अचेतनानाम्**—चेतनभिन्नानामर्थानाम्, **स्वसमुचितविधौ**—स्वकार्योत्पादने, **कर्त्रधीनत्वम्**—कृतिमच्चेतनापेक्षत्वनैयत्यम, **उक्तं ननु**—युक्तितः समर्थितं खलु, **शास्त्रारम्भे**—शारीरकाद्यपेटिकागते शास्त्रयोनित्वाधिकरणे, **सूत्रकारः**—शारीरकसूत्रकर्ता **किंपरः**—किमभिप्रायकः सन्, **विधातुः**—जगत्कर्तुरीश्वरस्य, **अनुमितिम्**—अनुमानायत्तां सिद्धिम्, **व्यनुदत्**—निराकरोत्, **इयं पृच्छा**—ईदृशः प्रश्नः, **अतितुच्छा न**—अत्यन्तं न लघुः, **तत्**—उत्तरयोग्यत्वाद्धेतोः, **अवहितः श्रुणु**—सावधानमनाः निशामय, **सर्वकृत्**—सर्वकर्ता ईश्वरः, **न अनुमातु शक्यः**—साधितुमपि नार्हः, **न अपह्नोतुं शक्यः**—बाधितुमपि नार्हः, **तदुभयनियमादर्शनात्**—ईश्वर-तदभावव्याप्त्योः कुत्रापि दृष्टान्ते अनुपलम्भात्, **इत्यमंस्त**—एवं निश्चितवान् ॥ ५ ॥

(181) सत्त्वाद्यान् द्रव्यभेदांस्त्रिगुणमिति समाहारतः कल्पयन्त-
स्तेषां नित्यं विभुत्वे सम-विषमदशाद्यत्र कीदृग् वदेयुः ? ।
अन्योन्याध्यास[1]क्लृप्तिः[1] प्रकृति-पुरुषयोर्भोग-मोक्षोपपत्त्यै
छायापत्त्यादिनीत्या कथमियमुभयाचेतनत्वे घटेत ? ॥ ६ ॥

सत्त्वाद्यान् द्रव्यभेदान्—सत्त्व-रजस् तमोरूपान् द्रव्यविशेषान्, (मिथोविभिन्नानि द्रव्याणि), **त्रिगुणमिति**—'त्रिगुणम्' इति एकशब्दवाच्यत्वार्हं यथा तथा, **समाहारतः**—एकवर्गीकरणतः, **कल्पयन्तः**—बुद्धिकृतकल्पनया व्यवहरन्तः साङ्ख्याः, **तेषां नित्यं विभुत्वे**—सत्वादीनां सार्वदिके अपरिच्छिन्नत्वेऽभ्युपगते, **अत्र**—प्रलयाद्युपलक्षिते कालभेदे, **समविषमदशादि**—प्रकृतौ साम्यावस्थां वैषम्यावस्थां तत्प्रयोज्यप्रलयादिकं च, **कीदृक् वदेयुः**—किं प्रकारतया युक्तं निर्वहेयुः ? **प्रकृति-पुरुषयोः**—प्रधानतत्त्वस्य पुरुषतत्त्वस्य च, **अन्योन्याध्यासक्लृप्तिः**—पुरुषे प्रकृतिधर्मस्य, प्रकृतौ पुरुषधर्मस्येति परस्पराध्यासकल्पना, **छायापत्त्यादिनीत्या**—स्फटिकस्य जपाकुसुमच्छायापत्तिप्रभृतिकया नीत्या, **भोगमोक्षोपपत्त्यै**—संसारापवर्गयोः निर्वाहाय सांख्यैः स्वीकृता (वर्तते खलु), **इयम्**—अन्योन्याध्यासकल्पना, **उभयाचेतनत्वे**—

[1] क्लृप्तः

प्रकृतेः जडस्वरूपेऽचेतनत्वे, पुरुषस्य चैतन्यानाश्रयत्वेऽचेतनत्वे च विद्यमाने, **कथं घटेत**—अध्यासस्य चैतनैकधर्मत्वात् कथं वा युज्येत? ॥ ६ ॥

(182) पुंसां भोगापवर्गप्रभृति फलमिदं तच्च सर्वं प्रधाने
द्रष्टृत्वादेश्च [1]क्लृप्तिः[1] पुरुष इह पृथग् द्रष्टृतादिश्च बुद्धौ ।
मुक्त्यै बद्धस्य शास्त्रं मुनिरकृत ततो नित्य[2]मुक्तोऽस्मि[2] चेत्या-
द्यन्योन्यव्याहतोक्तिं वृषलपरिणये जैनभक्ता जपन्तु ॥ ७ ॥

इदं—शास्त्रदृष्टम्, **भोगापवर्गप्रभृति**—संसारमोक्ष-बन्धात्मकम्, **पुंसां फलम्**—पुरुषसम्बद्धं प्रयोजनम्, **तच्च सर्वं प्रधाने**—पुरुषप्रयोजनभूतं सर्वमपि प्रकृतावेवाङ्गीकृतं साङ्ख्यैः, **द्रष्टृत्वादेश्च**—प्रकृतौ परिदृश्यमानस्य द्रष्टृत्वाध्यासस्य अन्यथानुपपत्त्या द्रष्टृत्वादेराश्रयतया **पुरुषे क्लृप्तिः पृथक्**—पुरुषविषयिणी कल्पना पार्थक्येन, **द्रष्टृतादिश्च बुद्धौ**—वस्तुतश्चिन्त्यमाने तु द्रष्टृत्वादि धर्मः बुद्धावेव, **मुनिः**—कपिलऋषिः, **शास्त्रम्**—सांख्यशास्त्रम्, **बद्धस्य मुक्त्यै**—बन्धास्पदस्य पुरुषस्य बन्धविगमाय, **अकृत**—निर्मितवान्, **ततः**—सांख्यशास्त्रात्, **नित्यमुक्तोऽस्मि**—स्वाभाविकमुक्तिमांश्चाहम्, **इत्याद्यन्योन्यव्याहतोक्तिम्**—एवमादिमिथोविरुद्धवाग्जालम्, **वृषलपरिणये**—मिथोविरुद्धवाक्प्रयोगस्थानभूते शूद्राविवाहे, **जैनभक्ताः**—सर्वानैकान्त्यवादिजैननीतिमन्तः सांख्याः, **जपन्तु**—उपांशु उच्चारयन्तु, न तु प्रेक्षावतां पुरतः स्पष्टम्, अपहासनैर्भयात् ॥ ७ ॥

—o—

अधिकरणार्थसङ्ग्रहः (रचना. अधि)

एवं—स्वपक्षे परैरुद्भाविता दोषाः परिहृताः । अनन्तरं-स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्ते ; द्वितीयेन पादेन ।

तत्र रचनानुपपत्त्यधिकरणे—प्रधानस्य अचेतनत्वात्, अचेतनानां चेतनाधिष्ठितानामेव कार्यारम्भकत्वस्य अन्वयव्यतिरेकाभ्यां निश्चितत्वात्, केवलप्रधानवादे जगद्रचना न सम्भवति—इत्युक्तम् ॥

—o—

[1] क्लृप्तः—प.   [2] मुक्तोऽपि—सा. र.

नयसङ्गतिमालिका (रचना-अधि)

एवं बाधः परिहृतः प्रतिपक्षो निरस्यते ।
पार्श्वस्थसंशयोच्छित्त्यै द्वितीये चरणे पुनः ॥ ८३ ॥
विफला चित्प्रवृत्तिश्चेत् तादृश्येवाचितो वरम् ।
इति शङ्कापोद्यतेऽत्र रचनासम्भवात् पुनः ॥ ८४ ॥

इति रचनानुपपत्त्यधिकरणम्

—o—

(47) महद्दीर्घाधिकरणम् ॥ २-२-२ ॥

शारीरकन्यायकलापसङ्ग्रहः

(74) ईशश्च कर्ता बहवश्च जीवास्तथापि न न्यायमतिः समर्था ।
कार्याभ्यु(नु)पायादणुभिर्निरंशैः [1]कार्यत्व[1]तोऽरूपतया च तेषाम् ॥ १६ ॥

(यद्यपि न्यायमते) **कर्ता**—जगत्कर्ता, **ईशश्च**—ईश्वर एव, **जीवाश्च**—जीवात्मानोऽपि, **बहवः**—बन्ध-मोक्षव्यवस्थानुगुणं नानात्वेनैवाङ्गीकृताः, **तथापि**—कतिपयांशे वेदान्तिभिः साम्येऽपि, **न्यायगतिः न समर्था**—तार्किकी सरणिः समीचीनार्था न भवति, **निरंशैः अणुभिः**—निरवयवैः अणुपदाभिधेयैः कारणभूतैः द्रव्यैः, **कार्याभ्यु(नु)पायात्**—कार्यारम्भाभ्युपगमात्, **तेषाम्**—उत्पद्यमानाना च कार्याणां अवयव्यात्मनाम्, **अरूपतया च**—उत्पत्तिकाले नीरूपत्वाभ्युपगमाच्च, कार्यकारणनिरूपणे अनौचित्यात् ॥ १६ ॥

अधिकरणसारावलिः (मह-अधि. श्लो. ८-१८)

(183) कल्प्योपादानमेकं परममहदविक्षिप्य नानाविधाणू
पादानौघस्य दृष्टात् समधिकवपुषः कल्पनेऽनिष्टमाह ।
प्राज्ञाधिष्ठानशून्यप्रकृतिपरिणतिः प्राङ् निरस्ताऽथ सेशं
सूक्ष्माणुद्रव्यमूलद्व्यणुकमुखजगत्सृष्टिपक्षं पिनष्टि ॥ ८ ॥

कल्प्योपादानम्—अनुमेयं जगत उपादानभूतं च, **एकम्**—कार्यभेदेऽपि स्वयमेकम्,

---

[1] अन्य—क.

परममहत्—विश्वात्मकं साङ्ख्यसंमतं प्रधानतत्त्वम्, **अधिक्षिप्य**—(अप्रामाणिकत्वेन हेतुना पूर्वाधिकरणे) निरस्य, **दृष्टात् समधिकवपुषः**—दृश्यत्रसरेण्वपेक्षया अधिकसंख्याकस्वरूपवतः, **नानाविधाणूपादानौघस्य**—पृथिवीत्वाप्त्वादिजातिभेद-गुणवैविध्यवदण्वात्मकसमवायिकारणस्तोमस्य, **कल्पने**—अनुमानतः साधने, **अनिष्टं आह**—तार्किकानभिमतार्थप्रसञ्जनरूपं दोषं, अस्मिन्नधिकरणे सूत्रकृत् प्रतिपादयति, **प्राक्**—पूर्वाधिकरणे, **प्राज्ञाधिष्ठानशून्यप्रकृतिपरिणतिः**—चेतनविशेषानधिष्ठितायाः अचेतनायाः प्रकृतेः परिणामवादसरणिः, **निरस्ता**—प्रमाणदूरतया निरूपिता । **अथ**—अस्मिन्नधिकरणे, **सेशम्**—ईश्वरायत्तत्ववादगर्भम्, **सूक्ष्माणु....पक्षम्**—परमाण्वाख्यद्रव्यकारणकद्व्यणुकादिकार्यप्रपञ्चोत्पत्तिवादसरणिम्, **पिनष्टि**—सर्वांशशोधनतः अप्रामाणिकं बोधयति ॥ ८ ॥

(184) प्रागेवारम्भणोक्तावपहृतविषया प्रागसद्द्रव्यक्लृप्तिः
काणादानामिदानीं क्षिपति बहुमुखं कारणप्रक्रियांशम् ।
त्रेधा हेतौ विभक्ते ह्यनुमितिशरणैस्तत्तदंशे यथार्हं
व्याघातादीन् विकल्पक्रमविविधगतीन् व्याहरत्यत्र सूत्रैः ॥ ९ ॥

प्रागेव—पूर्वस्मिन् स्मृतिपादे एव, **आरम्भणोक्तौ**—आरम्भणशब्दघटिते अधिकरणे, **काणादानाम्**—वैशेषिकानां संमता, **प्रागसद्द्रव्यक्लृप्तिः**—पूर्वमविद्यमानद्रव्योत्पत्तिकल्पनविधा, **अपहृतविषया**—बाधितत्वेन प्रतिपादिता, **इदानीम्**—तर्कपादीये अस्मिन्नधिकरणे, **कारणप्रक्रियांशम्**—कारणसामग्रीसम्बन्धिनं अनिरस्तं काणादाभिमतं शिष्टांशम्, **बहुमुखं क्षिपति**—नानाप्रकारेण निरस्यति, **अनुमितिशरणैः**—अनुमानरसिकैः तार्किकैः, **त्रेधा विभक्ते हेतौ**—समवाय्यसमवायिनिमित्तभेदेन विभज्य निरूपिते कारणजाते, **तत्तदंशे**—त्रिविधकारणकल्पनाधीनसिद्धिके अतिरिक्तावयव्यंशे, **यथार्हं**—यथायोग्यम्, **विकल्पक्रमविविधगतीन्**—विकल्परीत्यानुगुण्येन विविधप्रकारान्, **व्याघातादीन्**—स्वव्याहत्यपसिद्धान्तादिदोषान्, **अत्र सूत्रैः**—एतदधिकरणीयैः सूत्रैः, **व्याहरति**—विविच्य बोधयति भगवान् बादरायणः ॥९॥

(185) दृष्टस्याणोः प्रसूतिं द्व्यणुकमणुमपि स्थापयन्तोऽनुमित्या
दृष्टाकारानुसारान्न निरवयवताद्यत्र वक्तुं क्षमेरन् ।
सर्वं सद्येत सूक्ष्मे प्रकृतिपरव[1]तां[1] जालकालोकलक्ष्ये
तद्भागान् ख्यापये[2]द्वा[2] स्मृतिरफलतया [3]त्वान्य[3]पर्येण नेया ॥१०॥

---

[1] वता—सा. र. [2] द्या—सा. र. [3] सान्य—सा. र.

द्व्यणुकं अणुमपि—(परमाणुद्वयारब्धं) द्व्यणुकाख्यं द्रव्यम्, (तथा) ततोऽपि सूक्ष्मं परमाण्वाख्यं द्रव्यं च, **दृष्टस्य अणोः**—चक्षुर्वेद्यं त्रसरेण्वाख्यं सूक्ष्मद्रव्यं प्रति, **प्रसूतिम्**—कारणत्वेन, **अनुमित्या स्थापयन्तः**—अनुमानाख्यप्रमाणाधीनज्ञानायत्तसिद्धितया समर्थयन्तः वैशेषिकाः, **दृष्टाकारानुसारात्**—दृश्यगतमाकारमनुरुद्ध्यैव अदृष्टकल्पनाद्धेतोः, **अत्र**—कल्पनीये परमाणौ, **निरवयवतादि**—अवयवासमेतनित्यत्वादिकम्, **वक्तुम्**—स्ववचनतः स्थापयितुम्, **न क्षमेरन्**—समर्था न स्युः, **प्रमितिपरवताम्**—प्रमाणायत्तज्ञानपरतन्त्राणां दार्शनिकानाम्, **जालकालोकलक्ष्ये**—वातायनप्रवृत्तसूर्यमरीचिगोचरे, **सूक्ष्मे**—अणुद्रव्ये, **सर्वं सह्येत**—निरवयवत्वादि निखिलम् कथञ्चिदभ्युपगम्येत, (दृष्टे कल्पनाभावात्) **स्मृतिः**—परमाणुपरिमाणप्रदर्शनपरत्वेन आपाततः प्रतीयमाना 'जालसूर्ये'त्यादिरूपा शिल्पशास्त्रमध्यगा स्मृतिः, **तद्भागान् ख्यापयेद्वा**—त्रसरेणोरंशान् स्थापयितुं शक्नुयाद्वा ? नैव, **अफलतया**—तदंशस्थापने प्रयोजनाभावेन, **आन्यपर्येण तु**—तत्प्रकरणोक्तवेश्यादिव क्यशेषत्वकृततात्पर्यान्तरवत्तयैव, **नेया**—निर्वाह्या, न तु परमाण्वादिस्थापकतया ॥ १० ॥

(186) विश्रान्तिर्न क्वचिच्चेदवयवनिवहानन्त्यतो मानसाम्यं
माष-क्षोणीभृतोः स्यादिति यदि तदसत् तारतम्यादनन्ते ।
वैषम्यं पक्षमासप्रभृतिषु नियतं न ह्यनन्तेष्वनिष्टं
पारापर्यं च जात्योर्न किमनुकथितं व्यक्त्यनन्तत्वसाम्ये ॥ ११ ॥

क्वचित्—कुत्रचिद्वस्तुनि, **विश्रान्तिः न चेत्**—अवयवधारायाः विरामः नैवास्ति यदि, **माष क्षोणीभृतोः**—अल्पपरिमाणस्य माषस्य, महापरिमाणस्य महीधरस्य च, **अवयवनिवहानन्त्यतः**—अपरिमितसङ्ख्याकावयवस्तोमवत्ताकृतम्, **मानसाम्यम्**—परिमाणातारतम्यम्, **स्यादिति यदि**—प्रसज्येतेति तार्किकैः यदुच्यते, **तदसत्**—तर्हि तदसाध्वेव, **अनन्ते तारतम्यात्**—असङ्ख्यातेऽपि तारतम्यस्य अवर्जनीयत्वात्; **हि**—यतः, **पक्ष-मासप्रभृतिषु**—पक्ष-मासाद्यात्मकेषु कालावयवेषु, **अनन्तेषु**—इयत्तया अनिर्देश्यसङ्ख्याकेषु सत्स्वपि, **नियतम्**—अविचालनीयतयाऽवस्थितम्, **वैषम्यम्**—सङ्ख्यातारतम्यम्, **न अनिष्टम्**—कस्यापि न असंमतम् अपि तु सर्वप्रतिपन्नमेव, **व्यक्तानन्तत्वसाम्ये**—द्रव्यत्वपृथिवीत्वादिजात्याश्रयभूतानां व्यक्तीनामनन्तत्वे समानेऽपि, **जात्योः**—तदाश्रितयोः द्रव्यत्व-पृथिवीत्वाद्योः सामान्ययोः, **पारापर्यं च**—मिथोऽव्याप्यत्व-व्यापकत्वाभ्यामवस्थानमपि, **किं न अनुकथितम्**—भवद्भिः न सिद्धान्तितं वा ? ॥ ११ ॥

(187) नादृष्टं किञ्चिदन्यच्छ्रुतिसरणिजुषां देवतानुग्रहादे-

रन्यत्वे तस्य तज्ज्ञैरधिकयतनवत्क्लृप्तिरादौ व्युदस्ता ।

यत्ने यत्नानपेक्षां न किमनुमनुते स्याददृष्टेऽपि तद्वत्

भूतस्थादृष्टवादे द्व्यणुकृदणुगतादृष्टकल्पोऽत्र लूनः ॥ १२ ॥

श्रुतिसरणिजुषाम्—वेदमार्गावलम्बिनाम्, **देवतानुग्रहादेरन्यत्**—परमपुरुषप्रीत्यप्रीतिभ्यां भिन्नम्, **अदृष्टम्**—अदृष्टपदाभिधेयं यत्किञ्चिद्वस्तु, **न**—नैव विद्यते, **तस्य अन्यत्वे**—अदृष्टस्य जीवगततया अतिरिक्तस्वरूपत्वे कल्प्यमाने, **तज्ज्ञैः**—तादृशादृष्टस्वरूपनिष्ठावद्भिः क्रियमाणा, **अधिकयतनवत्क्लृप्तिः**—अदृष्टातिरिक्तजगन्निर्माणानुगुणयत्नविशेषवतः ईश्वरस्य अनुमानतः कल्पना, **आदौ**—शारीरकारम्भे शास्त्रयोनित्वाधिकरणे, **व्युदस्ता**—निराकृता बादरायणेन, **यत्ने**—आत्मगते क्रियाजनके गुणविशेषे, **यत्नानपेक्षाम्**—यत्नान्तरापेक्षाराहित्यम्, **किं नानुमनुते ?**—भवान् नाङ्गीकरोति किम्? **अदृष्टेऽपि तद्वत् स्यात्**—यत्ने यत्नान्तरापेक्षाराहित्यमिव अदृष्टस्य निर्वाहकापेक्षाराहित्यमपि स्यादेव, **भूतस्थादृष्टवादे**—अदृष्टस्य भूतगतत्वपक्षे जैनतार्किकाद्यभ्युपगते, **द्व्यणुकृदणुगतादृष्टकल्पः**—द्व्यणुकोत्पादकपरमाणुगतादृष्टवादिनां पक्षः, **अत्र लूनः**—महद्दीर्घाधिकरणे निरवशेषितः ॥ १२ ॥

(188) नित्यं सम्बन्धमेके निजगदुरपृथक्सिद्धसर्वानुवृत्तं

नित्यं नित्येष्वनित्येष्वपि कतिचिदिमं तावदायुष्कमाहुः ।

तत्तद्द्वन्द्वस्वभावप्रतिनियतिमुचां स्यान्न तेन व्यवस्था

गुर्वी त्वन्यस्य क्लृप्तिः कथमधिकजुषां नानवस्थादिदोषः ॥ १३ ॥

एके—वैशेषिकाः **अपृथक्सिद्धसर्वानुवृत्तम्**—नियतपरस्पराश्रितबह्वर्थानुगतम्, (गुण-गुणि-जाति-व्यक्त्यादि, **सम्बन्धम्**—समवायाख्यं संसर्गम्, **नित्यं निजगदुः**—अविनाश्येव ऊचुः । **कतिचित्**—अन्ये केचन प्राभाकराभिधाः, **इमम्**—समवायम्, **नित्येषु नित्यम्**—अविनाशिष्वविनाशि, **अनित्येष्वपि**—विनाशिषु तु, **तावदायुष्कम्**—स्वाश्रयनाशानुविधायिनाशववदिति, **आहुः**—वर्णयन्ति, **तत्तद् .... मुचाम्**—गुण-गुणिप्रभृतितत्तदर्थयुगलस्वाभाविकतां विहाय निर्वाहकान्तरचिन्तनपराणाम्, **तेन**—अभ्युपगतेन सम्बन्धविशेषमात्रेण, (समवायेन) **न व्यवस्था स्यात्**—असङ्कीर्णव्यवहारो नैव भवेत्, **अन्यस्य क्लृप्तिः**—सम्बन्धिद्वयातिरिक्तस्यार्थस्य कल्पना, **गुर्वी तु**—गौरवाख्यदोषग्रस्तैव, **अधिकजुषाम्**—अधिकार्थाभ्युपगन्तॄणाम्,

अनवस्थादिदोषः—कल्पनाविघटकः अविश्रान्तिरूपो दोषः, **कथं न**—केन वा प्रकारेण नोदियात् ॥ १३ ॥

(189) निर्धूते सूत्रकारैरवयवि-परमाण्वात्मके द्रव्यवर्गे
[1]विश्वव्याप्त्येक[1] लक्ष्यं परममहदसत् स्यादथाऽद्रव्यमेव ।
नैवं दृष्टाणु-तत्संहति-तदुभयसम्बन्धसिद्धेरबाधात्
आगन्तुक्षोणिताद्यैः श्रुतिरपि जगदारम्भणं बम्भणीति ॥ १४ ॥

सूत्रकारैः—ब्रह्मसूत्रकृद्भिः बादरायणैः, **अवयवि-परमाण्वात्मके**—उपादानातिरिक्ते पटाद्यवयविस्वरूपे, (तथा) त्रसरेणुभिन्ने परमाणुस्वरूपे च, **द्रव्यवर्गे**—वेदान्त्यनभ्युपगते द्रव्यस्तोमे, **निर्धूते**—आरम्भणाधिकरणेन महद्दीर्घाधिकरणेन च निराकृते सति, **विश्वव्याप्त्येक-लक्ष्यम्**—सर्वमूर्तद्रव्यसंयोगितारूपविभुत्वमात्रविश्रान्तम्, **परममहत्**—परममहदिति स्वीकृतं कालाकाशादिकं द्रव्यमेव, **स्यात्**—अङ्गीकृतं भवेत्, (अथवा) **असत् स्यात्**—परममहदपि अवयव्यादिकमिव असत्कल्पं स्यात्, **अथ**—अथवा, **अद्रव्यमेव स्यात्**—सर्वद्रव्य-निरासपर्यवसाने अद्रव्यमेव प्रमेयतया अभ्युपगतमापद्येत । (इत्याक्षेपे सूत्रकारणामुपरि प्रवृत्ते), **नैवम्**—एवमाक्षेपो न साधुः, **दृष्टाणु....सिद्धेः**—प्रत्यक्षदृष्टस्य त्रसरेणोः, तेषां संघातस्य, संहत्यनन्यथासिद्धाणुद्वयसम्बन्धस्य च अवगमस्य, **अबाधात्**—सूत्रकृद्भिरनिराकरणात्, **आगन्तु-क्षोणिताद्यैः**—मूलप्रकृतेः परिणामतः सम्भविष्यद्भिः पृथिवीत्वादिधर्मैः, **जगदारम्भणम्**—पञ्चीकृतजगत्सृष्टिम्, **श्रुतिरपि बम्भणीति**—श्रुतिरेव पुनः पुनर्भणति ॥ १४ ॥

—o—

अधिकरणार्थसङ्ग्रहः (मह-अधि)

महद्दीर्घाधिकरणे—परमाणूनां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानाम्, अधिक-परिणामद्रव्यारम्भकत्वानुपपत्त्यादिभिः कणादपक्षः असमञ्जसः—इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका (मह. अधि.)

ईश्वराधिष्ठितैरेव जगत् स्यात् परमाणुभिः ।
महद्दीर्घाधिकरणे शङ्कैषा प्रत्युदीर्यते ॥ ८५ ॥

इति महद्दीर्घाधिकरणम् ॥ ८५ ॥

—o—

[1] विश्वव्याप्त्यैव—सा. र. विश्वव्याप्त्यैक.

(48) समुदायाधिकरणम् ॥ २–२–३ ॥

शारीरकन्यायकलापसङ्ग्रहः

(75) सङ्घैरणूनां हि [1]धरादयः[1] स्युः
[2]घटादिभूतैः[2] करणादयश्च ।
इत्यप्यसारं क्षणिकाः पदार्थाः
क्व संहताः स्युः क्व च कार्यसिद्धिः ॥ १७ ॥

धरादयः—भूतात्मकाः पृथिव्यप्तेजोवायवः, **अणूनां सङ्घैः हि**—परमाणूनां पुञ्जैरेव खलु, **स्युः**—उत्पन्ना भवेयुः, **करणादयश्च**—इन्द्रियदेहाद्या अपि, **धरादिभूतैः**—पृथिव्यादिभिर्भूतैः स्युः, **इत्यपि असारम्**—न युक्तिमत्, **क्षणिकाः पदार्थाः**—क्षणध्वंसिनः अणुरूपाः अर्थाः, **क्व संहताः स्युः**—कुत्र वा सङ्घाततामापन्ना भवेयुः?, **क्व च कार्यसिद्धिः?**—जन्यानामर्थानां उत्पत्तिः कुत्र वा सिद्ध्यति? किमपि नैवेत्यर्थः ॥ १७ ॥

—o—

अधिकरणसारावलिः (समु-अधि)

(190) बाह्योक्ताचारभागः श्रुतिविहतिवशाज्जैमिनीये निरस्तः
तत्त्वांशं तर्कितं तैः प्रतिवदति गुरुर्जैमिनेरत्र पादे ।
निर्धूते तत्र पूर्वं निरुपधिकनयैरर्धवैनाशिकोक्ते
पक्षान् वैनाशिकानां जिनगिरिशमतक्षेपतः प्राक् क्षिणोति ॥ १८ ॥

बाह्योक्ताचारभागः—वेदबहिष्कृतनिरूपितयोः आचार-विचारयोरन्यतरः आचारः, **श्रुतिविहतिवशात्**—वेदविरोधं हेतूकृत्य, **जैमिनीये**—जैमिन्यृषिप्रणीते कर्ममीमांसाशास्त्रे, **निरस्तः**—वैदिकैः अनुपादेयतया वर्णितः, **तैः तर्कितं तत्त्वांशम्**—अवैदिकैः केवलेन तर्केण निर्णीतं प्रमेयभागम्, **जैमिनेः गुरुः**—बादरायण आचार्यः, **अत्र पादे**—द्वितीयाध्यायीयद्वितीयचरणे, **प्रतिवदति**—खण्डयति, तत्र खण्डनीयेषु मध्ये, **अर्धवैनाशिकोक्ते**—काणादादिवर्णिते प्रमेयजाते, **पूर्वम्**—पूर्वस्मिन् महद्दीर्घाधिकरणे, **निरुपधिकनयैः**—निर्दोषैर्न्यायैः,

---

[1] महदादयः—क. [2] सत्त्वादि—क.

निर्धूते—निराकृते सति, **वैनाशिकानां पक्षान्**—निरन्वयविनाशवादिनां बौद्धानां संमतानर्थान्, **जिन गिरिशमतक्षेपतः प्राक्**—आर्हत-पाशुपतमतनिरसनतः पूर्वम्, **क्षिणोति**—निराकरोति (सूत्रकारः) ॥ १५ ॥

(191) बुद्धोऽसौ स्वावतारैः सह परिगणितः श्रीधरेण स्वशास्त्रे
सर्वज्ञो [1]नैव[1] मुह्येन्न च निखिलसुहृद् विप्रलिप्सेत कंचित् ।
तस्माद् बुद्धोक्तभङ्गे भजति भिदुरतां सात्वतादीति चेन्न
[2]स्वाभीष्ट[2]प्रत्यनीकप्रमथनमनसा मोहनादिप्रवृत्तेः ॥ १६ ॥

असौ बुद्धः—निरसनीयमतप्रवर्तकः सुगतः, **श्रीधरेण**—श्रीमता नारायणेन, **स्वशास्त्रे**—स्वीये पाञ्चरात्रतन्त्रे, **स्वावतारैः सह**—लोकानुग्रहार्थैः स्वीयैः अवताराभिधैः जन्मभिः सह, **परिगणितः**—अन्यतमतया संख्यातः, **सर्वज्ञः**—निरुपाधिकसार्वज्ञ्यवान् धृतबुद्धशरीरः भगवांश्च, **नैव मुह्येत्**—न कथञ्चिदपि तत्त्वार्थविप्लववान् भवितुमर्हति, **निखिलसुहृत्**—निरुपाधिकसर्वभूतसौहार्दवांश्चायम्, **कञ्चित् न च विप्रलिप्सेत**—उद्दिधीर्षितं यं कमपि वा चेतनं नैव प्रतारयितुमिच्छेत्; **तस्मात्** उक्तहेतोः, (बौद्धवैष्णवतन्त्रयोः एकप्रवक्तृकत्वात्) **बुद्धोक्तभङ्गे**—बुद्धप्रोक्तार्थस्य (श्रुत्यनुगुणैः न्यायैः) निराकरणे आवश्यके सति, **सात्वतादि**—भगवच्छास्त्रादिकमपि, **भिदुरतां भजति**—निरसनीयतामाप्नोत्येव, **इति चेत् न**—एवं शङ्कनं असाधु, **स्वाभीष्टप्रत्यनीकप्रमथनमनसा**—स्वसंमतानां साधूनां विरोधिनो ये असाधवः तद्दमनसङ्कल्पेन हेतुभूतेन, **मोहनादिप्रवृत्तेः**—तत्त्वार्थविप्लवप्रवृत्तेः (परमात्मनि) उदयात् ॥१६॥

(192) दुर्वारा मोहनेच्छा निखिलजनयितुः केन मोहोऽन्यथा नः ?
तस्मात् कर्मानुरूपं दिशति फलमसौ तत्त्वबोधं भ्रमं वा
स्वोक्त्यादेः सिद्धमेतन्निरुपधिविषमो नैष तस्मात् समोक्तिः
कारुण्यात् विप्रलिप्सा न यदि वृजिनजं नेशनिघ्नं फलं स्यात् ॥१७॥

निखिलजनयितुः—सर्वकारणस्य परमात्मनः, **मोहनेच्छा दुर्वारा**—मोहोत्पादनसङ्कल्पः अविद्यमानतया वर्णयितुमशक्यः, **अन्यथा**—भगवतः मोहनसङ्कल्पाभावे, **नः मोहः**—अस्माकं अतत्त्वार्थावगाही धीविशेषः, **केन**—किं हेतुको भवेत् ? **तस्मात्**—भगवत एव मोहनसङ्कल्पवत्त्वात्, **असौ**—भगवान्, **कर्मानुरूपम्**—तत्तच्चेतनगतकर्मानुगुणं, **तत्त्वबोधं भ्रमं वा**—

---

[1] नैष—प.   [2] स्वानिष्ट— .

वास्तविकार्थज्ञानं, तदन्यथाज्ञानं वा, **फलं दिशति**—फलत्वेन चेतनेभ्यः प्रयच्छति, **एतत्**—प्रमाऽप्रमे प्रति भगवत एव जनकत्वम्, **स्वोक्त्यादेः**—"मत्तः स्मृतिर्ज्ञानमपोहनं चे"ति भगवद्वचनादेव, **सिद्धम्**—निर्णीतम्, **एषः**—भगवान्, **निरुपधिविषमो न**—जीवेषु स्वभावतो वैषम्यवान् न, **तस्मात्**—स्वाभाविकवैषम्याभावादेव, **समोक्तिः**—भगवतः सर्वान् प्रति समत्ववाचोयुक्तिर्घटते, **कारुण्यात्**—अनौपाधिकीं दुःखप्रहाणेच्छां निमित्तीकृत्य, **विप्रलिप्सा न यदि**—भगवतः असाधुमोहनेच्छा नैव संमन्येत चेत्, तर्हि, **वृजिनजं फलम्**—पापायत्तं फलम्, **ईशनिघ्नं न स्यात्**—ईश्वराधीनमिति वक्तुं नैव शक्येत ॥ १७ ॥

(193) कल्प्यो बोद्धेति सर्वे सुगतमतविदो बोध्यमध्यक्षमेके
बुद्ध्याकारानुमेयं कतिचन कतिचिद् बोध्यमिथ्यात्वमाहुः ।
तत्तुल्यायतोऽन्ये धियमपि जगदुः संवृतेरेव सिद्धां
तान् सर्वांस्तर्कमानैर्द्यति दितिजगुरू[1]न[1]द्य वैभाषिकादीन् ॥ १८ ॥

सुगतमतविदः सर्वे—बुद्धाशयवेदिनः सर्वेऽपि, (चतुर्विधा अपि), **बोद्धा**—ज्ञातृभूतोऽर्थः, **कल्प्यः**—कल्पनामात्रसिद्धः ; न वास्तविकः, **इति आहुः**—इति वदन्ति, (सर्वेषां वैराग्यवादे विशेषात्) **एके**—तदेकदेशिनः वैभाषिकाख्याः, **बोध्यं अध्यक्षमाहुः**—ज्ञेयमर्थं प्रत्यक्षसिद्धमेव कथयन्ति, **कतिचन**—तन्मतीया एव सौत्रान्तिकनामानः केचन, **बुद्ध्याकारानुमेयं आहुः**—(बोध्यमर्थं) बुद्धिगतेन आकारविशेषेण अनुमेयस्वरूपं वर्णयन्ति, **कतिचित्**—तदन्तःपातिन एव योगाचाराख्याः केचित्, **बोध्यमिथ्यात्वमाहुः**—ज्ञेयस्यार्थस्य अवास्तविकतामेव ऊचुः, **अन्ये**—तदीया एव माध्यमिकसंज्ञाः इतरे, **धियमपि**—(ज्ञेयमिव) ज्ञानमपि, **तत्तुल्यन्यायतः**—ज्ञेयकल्पनसदृक्षन्यायेन, **संवृतेरेव सिद्धाम्**—अविद्यैककल्पिताम्, **जगदुः**—वर्णयामासुः, **तान् सर्वान् दितिजगुरून्**—तानेतानखिलान् दैत्याचार्यान्, **अथ**—परपक्षप्रतिक्षेपप्रस्तावे, **तर्कमानैः**—सौगतीयकल्पनानिरासकैस्तर्कैः, तदनुगृहीतैः प्रमाणैश्च साधनतयाऽवलम्बितैः, **द्यति**—शकलीकरोति सूत्रकारः ॥ १८ ॥

(194) एक-द्व्यादिस्वभावैर्यदणुभिरथवा तत्तदेकस्वभावैः
क्षोणी-देहादिपुञ्जप्रसृतिरिति समाभाषि वैभाषिकेण ।
ज्ञानादानादि तत्र क्षणभिदुरतया बोध्य-बुद्धेर्न सिध्येत्
निर्बाधा प्रत्यभिज्ञाव्यनुमितिमथनी शेषमन्यत्र सूक्तम् ॥ १९ ॥

---

[1] नत्र—प.

एक-द्वयादिस्वभावैः—स्पर्शैकस्वभावैः, स्पर्शरूपद्विस्वभावैः, स्पर्श-रूप-रस-त्रिस्वभावैः, स्पर्श-रूप-रस-गन्धाख्यचतुःस्वभावैश्च, **अणुभिः**—यथाक्रमं वायुतेजो-जल-पृथिव्याख्य-चतुर्भूतीयैः परमाणुभिः, **अथवा**—यद्वा, **तत्तदेकस्वभावैः अणुभिः**—स्पर्श-रूप-रस-गन्धा-ख्यैकैकमात्रस्वभावैः उक्तैरणुभिः, **क्षोणी....प्रसृतिरिति**—पृथिव्यादिभूतसङ्घातस्य तथा देहादिभौतिकसङ्घातस्य च प्रसरणात्मिका सृष्टिरिति, **वैभाषिकेण यत् समाभाषि**—वैभाषिककृतं च सौत्रान्तिककृतं च यत् स्वसिद्धान्तवर्णनमस्ति, **तत्र**—तस्मिन् सिद्धान्ते, **बोध्य-बुद्धयोः**—ज्ञेयस्य अणोः तद्विषयज्ञानस्य च, **क्षणभिदुरतया**—क्षणमात्रध्वंसितया, **ज्ञानादानादि**—विषयीकार-तद्ग्रहणादिक्रम्, **न सिद्धयेत्**—निर्व्यूढं न भवेत्, **निर्बाधा**—उत्तरकालिकबाधकप्रत्ययविदूरा, **प्रत्यभिज्ञापि**—संस्कारसचिवेन्द्रियसंनिकर्षजा धीरपि, (स एवायमिति) **अनुमितिमथनी**—'यत् सत् तत् क्षणिकम्' इति क्षणिकत्वानुमितेः अनुत्पादकरी, (जागर्ति), **शेषम्**—अवशिष्टं सौगतदूषणम्, **अन्यत्र**—स्थानान्तरे ग्रन्थान्तरे च **सूक्तम्**—सम्यक् प्रतिपादितम्,

(194) बोधेष्वाकारभेदं निजमुपरितनेष्वर्पयन् प्राक्तनोऽर्थः
तद्वैचित्र्यानुमेयः क्वचिदपि न तदाध्यक्षतेति प्रजल्पन्।
प्राक् पश्चाच्च प्रवृत्तैर्विहतिबहुलतां गौरवं च ब्रुवाणैः
शिक्षादक्षैस्सयूथ्यैर्दमित उपशमं यातु सौत्रान्तिकाख्यः ॥ २० ॥

प्राक्तनः—स्वग्राहिणो ज्ञानात् पूर्वकालवर्ती **अर्थः**—घटादिर्विषयः **उपरितनेषु**—स्वानन्तरकालिकेषु, **बोधेषु**—ज्ञानेषु, **निजम् आकारभेदम्**—स्वगतं आकारविशेषम्, **अर्पयन्**—स्वभावत एव योजयन्, **तद्वैचित्र्यानुमेयः**—तत्तज्ज्ञानगतेन विषयितावैलक्षण्येन कल्प्यस्वरूपो भवति, (अत एव) **तदाध्यक्षता** ज्ञेयानामर्थानां प्रत्यक्षता, **क्वचिदपि न** कीदृशज्ञानस्थलेऽपि नैव सम्पादिता, **इति प्रजल्पन्**—एवं निरवग्रतया यत्किञ्चिद्भाषमाणः, **सौत्रान्तिकाख्यः**—सौत्रान्तिकनामा (बौद्धसयूथ्यः) **प्राक् पश्चाच्च प्रवृत्तैः सयूथ्यैः**—स्वस्मात् पूर्वं स्वमतप्रचारायोद्युक्तैः योगचाराख्यैः, स्वस्मादनन्तरमुद्युक्तैः वैभाषिकाख्यैश्च बौद्धकोटिप्रविष्टैः, **विहतिबहुलताम्**—व्याघातप्राचुर्यम्, (नष्टेनार्थेन अनुत्पन्ने ज्ञाने स्वाकारसमर्पणादि) **गौरवं च**—ज्ञाने आकारविशेषाभ्युपगमनिबन्धनं गौरवमपि, **ब्रुवाणैः**—स्पष्टं घोषयद्भिः, (अत एव) **शिक्षादक्षैः सयूथ्यैः**—स्वयूथमध्यगेषु न्यूनातिरेक-चिन्तनपटुभिः, **सद्भिः दमितः**—प्रतिरुद्धस्वाच्छन्द्यः सन्, **उपशमं यातु**—(सम्प्राप्तशृङ्खलः हस्तीव दौष्ट्यं विहाय) शान्तिं प्राप्नोतु ॥ २० ॥

—o—

सङ्घातवादे प्रारम्भवाददोषो न विद्यते ।
समुदायनये चापि शङ्कैषा प्रत्युदीर्यते ॥ ८६ ॥

इति समुदायाधिकरणम् ॥ ३ ॥

—o—

(49) उपलब्ध्याधिकरणम् ॥ २–१–१० ॥

शारीरकन्यायकलापसङ्ग्रहः

(76) आकार एकस्तु विवादहानेः
ज्ञानस्य नार्थस्य ततः स नास्ति ।
इत्यप्यसत् स्यात् त्रितयावभासाद्
विज्ञान[1]वज्ज्ञेयतदा[1]श्रयौ च ॥ १८ ॥

आकारः—तत्तच्छब्दोल्लेखहेतुः आकारविशेषः, **एकस्तु**—ज्ञाने ज्ञेये च अभिन्न एव ; न अन्यान्यः, **विवादहानेः**—उभयसम्प्रतिपन्नत्वेन विवादराहित्येन हेतुना, **ज्ञानस्य**—ज्ञाननिष्ठ एव स्वीकार्यः, **न अर्थस्य**—अर्थगततया न स्वीकार्यः, **ततः स नास्ति**—ज्ञानस्यैव आकाराश्रयत्वात् ज्ञेयोऽर्थो नैव विद्यते, **इत्यप्यसत् स्यात्**—एवं शङ्कनमप्यसाधु भवेत्, **त्रितयावभासात्**—'घटमहं जानामि' इति ज्ञेय-ज्ञातृ-ज्ञानानां त्रयाणामपि प्रतीतेः, **विज्ञानवत्**—ज्ञानमिव, **ज्ञेय-तदाश्रयौ च**—ज्ञानविषयभूतोऽर्थः ज्ञानाश्रयभूतः ज्ञाता च वस्तुभूतावेव ॥ १८ ॥

—o—

अधिकरणसारावलिः (उप–अधि. श्लो. २१–२२)

(196) न ग्राह्यग्राहकौ स्तः क्वचिदपि विविधानादिसन्तानचित्रः
बुद्ध्यात्मा त्र्यात्मकोऽद्य स्फुरति भवदशातिक्रमे स्वात्मनैव ।
योगाचारोक्तिरित्थं विषय-विषयिणोर्बोध-बाधौ समानौ
मन्वानैर्वारणीया स्वपरविभजनाद्यत्र न क्वापि सिध्येत् ॥ २१ ॥

---

[1] वज्ज्ञानतदा—क. वज्ज्ञायत एतदा—ख.

क्वचिदपि—स्वाप्ने जागरे कस्मिन्नपि वा प्रत्यये, **ग्राह्य-ग्राहकौ**—ज्ञेयग्रहीतृभूतौ बाह्यावर्थौ, **न स्तः**—नैव विद्येते, **अद्य**—संसरणावस्थायाम्, **बुद्ध्यात्मा**—ज्ञानमात्रात्मकः आन्तरोऽर्थः, **त्रिविधानादिसन्तानचित्रः**—नानाप्रकारानादिकालप्रवृत्तवासनाकृतवैचित्र्यवान् सन्, (अत एव त्र्यात्मकः ज्ञेय-ज्ञान ज्ञात्रात्मकतया त्रिरूप इव, **स्फुरति**—भासते, **भवदशातिक्रमे**—संसरणावस्थायाः अतिलङ्घने, **स्वात्मनैव**—केवलज्ञप्तिसन्मतिरूपेणैव अवभासते, **इत्थं योगाचारोक्तिः**—ईदृशी योगाचारस्य स्वाभिमतार्थवर्णनरीतिः, **विषय-विषयिणोः**—ज्ञेय-ज्ञानयोर्विषये, **बोध-बाधौ**—बोधसाधिकां प्रतीतिं तद्बाधिकां कल्पनां च, **समानौ मन्वानैः**—तुल्यतया विमृशद्भिः प्राज्ञैः, **वारणीया**—तत्त्वोपप्लववशमनार्थं प्रतिक्षेप्या, **अत्र**—योगाचारसंमतेऽर्थे रूढे सति, **क्वापि**—कस्मिन्नपि विषये, **स्वपरविभजनादि न सिद्ध्येत्**—स्वीय-परकीयविभागादिकं नैव लभ्येत सर्वोपप्लवात् ॥ २१ ॥

(197) बुद्ध्यैक्यं बोध्य-बोद्ध्रोर्न घटत इह ते सत्ययोरन्ययोर्वा
भिन्नत्वे ग्राह्यलक्ष्मक्षतिमभिमनुषे नात्र चित्रैक्यमर्थ्यम् ।
चित्रं द्रव्यं गुणं वा किमपि न च विदुः केऽपि भिन्नैकरूपं
तेनात्मख्याति[1]वादः[1] स्थितिमिह भजतु स्वप्रकाशत्वमात्रे ॥ २२ ॥

इह—ज्ञान ज्ञेय-ज्ञातृरूपेष्वर्थेषु, **बोध्य-बोद्ध्रोः**—ज्ञेय-ज्ञात्रोरर्थयोः, **सत्ययोः अन्ययोर्वा**—वस्तुभूतयोः तदितरयो (अवास्तविकयो)र्वा अभ्युपगतयोरपि, **ते बुद्ध्यैक्यम्**—तवाभिमतं बुद्ध्या सह अभिन्नत्वम्, **न घटते**—त्वदभिमतसाधकतया सङ्गतं न भवति, (सत्ययोश्चेत्) अपलापायोगात्, असत्ययोश्चेत्! असत्याभिन्नाया बुद्धेरपि असत्यत्वापातात्, **भिन्नत्वे**—एतद्दोषनिवारणाय तयोः बुद्धेः सकाशाद्भेदे स्वीकृते सति, **ग्राह्यलक्ष्मक्षतिम्**—(ग्राह्यविषये) यत् तत्तज्ज्ञानविषयतारूपं तत्तज्ज्ञानाभिन्नत्वं लक्षणं तस्य भङ्गं त्वं चिन्तयसि, **चित्रैक्यम्**—दृष्टविसजातीयं भेदसहाभेदरूपं, भिन्नाभ्याममभेदरूपं वा ऐक्यम्, **अत्र**—ज्ञानादित्रितयमध्ये, **न अर्थ्यम्**—विवक्षायोग्यं न भवति. **केऽपि**—ये केऽपि वा दार्शनिकाः, **द्रव्यं गुणं वा किमपि**—द्रव्यरूपं अद्रव्यरूपं वा यत्किञ्चिदपि वस्तु, **चित्रं न च विदुः**—मिथोविरुद्ध-भिन्नाभिन्नोभयानात्मकं नैव अभ्युपगच्छेयुः,(तथा) **भिन्नैकरूपं च न विदुः**—भेदानुपमर्द्दैकत्ववद्वा नैव संमन्येयुः. **तेन**—उक्तेन वैघट्येन, **इह**—योगाचारमते दृश्यमानः, **आत्मख्यातिवादः**—ज्ञानस्य स्वात्मन एव ज्ञेय-ज्ञात्रात्मना ख्यातिः इत्येवं परिदृश्यमानो वादः, **स्वप्रकाशत्वमात्रे**—

---

[1] वादे—प.

घटादिवदितरापेक्षस्वप्रकाशतां विहाय स्वायत्तस्वप्रकाशतारूपत्वे एव, **स्थितिं भजतु**—पर्यवसानं प्राप्नोतु ॥ २२ ॥

—o—

अधिकरणार्थसङ्ग्रहः (उप- अधि)

उपलब्ध्यधिकरणे—योगाचाराभिमतं ज्ञानानां अर्थशून्यत्वं—आशङ्क्य, ज्ञातुः अर्थविशेषसिद्धिरूपतयैव ज्ञानस्य उपलब्धेः, स्वाप्नज्ञानवत् बाधादर्शनाच्च तदयुक्तम्—इत्युक्तम् ।।

—o—

नयसङ्गतिमालिका (उप–अधि)

वस्त्वस्ति यदि बाह्यं तत् प्रोक्तदोषः प्रसज्यताम् ।
इत्यतोऽथाऽभावनयः प्रत्युदाहृतिसङ्गतेः ॥ ८७ ॥

इति उपलब्ध्यधिकरणम् ।। ४ ।।

—o—

(50) सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥

शारीरकन्यायकलापसङ्ग्रहः

(77) नित्योत्पत्तिप्रसङ्गादविकृतभवनं नाम नैवोपपन्नं
नैवावस्थानहानेर्विकृतभवनमप्यश्नुते युक्तिमत्ताम् ।
तस्मात्तुच्छात् प्रभूतं भुवनमिति न सद् वस्तुनः कस्यचित्स्यात्
भावाभावव्यवस्थां तदितरविषये तेन तुच्छत्वहानिः ।। १९ ।।

नित्योत्पत्तिप्रसङ्गात्—कार्याणां अविरतमेव जननापत्तेः, **अविकृतभवनं नाम**—अप्राप्तविकारात् निदानात् कार्योत्पत्तिरित्येतत् , **नैव उपपन्नम्**—सङ्गतं नैव भवति, **अवस्थान-**

हानेः—अनवस्थापत्तिरूपाद्दोषात्, **विकृतभवनमपि**—प्राप्तविकारात् कारणात् कार्यजननमित्येतदपि, **युक्तिमत्तां नैव अश्नुते**—तर्कानुरोधितां नैव लभते, **तस्मात्**—विकृतात् अविकृताच्च हेतुस्वरूपात् कार्योदयस्य अयोगात्, **भुवनम्**—जगत्, **तुच्छात्**—निरुपाख्यात् शून्यादेव, **प्रभूतम्**—उत्पन्नम्, (अतः शून्यमेव च) **इति न सत्**—ईदृशं माध्यमिकानां वचनम्, नैव साधु, **कस्यचित् वस्तुनः**—यस्य कस्यापि वा प्रमाणसम्बन्धार्हस्य अर्थस्यैव, **भावाभावव्यवस्था**—भावत्वस्य वा अभावत्वस्य वा अवस्थाविशेषस्य नियमः, **स्यात्**—अवर्जनीयः, **तेन**—उक्तेन हेतुना, **तदितरविषये**—भावशब्दबुद्ध्योः अभावशब्द-बुद्ध्योश्च गोचरे, **तुच्छत्वहानिः**—तुच्छत्वस्य सयोग एव ।

—o—

अधिकरणसारावलिः (सर्वथानु-अधि) (श्लो २३-२६)

(198) सत्त्वेऽसत्त्वे द्वये च द्वितयपरिहृतावप्यनिष्टप्रसङ्गैः

सर्वं शून्यं चतुष्कोट्यतिगतमिति नाऽमानतः स्वेष्टवादात् ।

अक्षोभ्यं तत्प्रहाणे परमतमसती संवृतिर्नार्थसिद्ध्यै

तस्मादित्थं निषेधो निरुपधिक इह काऽप्यदृष्टो न कल्प्यः ॥ २३ ॥

सत्त्वे—सत्त्वस्य सदात्मकत्वे, **असत्त्वे**—असदात्मकत्वे, **द्वये च**—सदसद्रूपत्वेऽपि, **द्वितयपरिहृतावपि**—सदसदुभयवैलक्षण्येऽपि च, **अनिष्टप्रसङ्गैः**—यथाक्रमं सर्वस्य सार्वदिकत्व-सार्वत्रिकत्व-सर्वप्रकारत्वानामापत्त्या, (2) (सर्वस्य) क्वचिदपि देशे कस्मिन्नपि काले ख्यात्यविषयत्वापत्त्या, (3) उभयात्मत्वकृतदुर्निरूपत्वापत्त्या, (4) उभयानात्मत्वकृतदुर्निरूपत्वापत्त्या, च अनिष्टैः दोषैः, **सर्वं शून्यम्**—अखिलमपि जगत् शून्यपदाभिधानार्हम्, **चतुष्कोट्यतिगतम्**—कोटिचतुष्टयातिलङ्घि, **इति न**—ईदृशं माध्यमिकोद्घोषणं न युक्तम्, **अमानतः**—प्रमाणमननुरुध्य, **स्वेष्टवादात्**—स्वच्छन्दोक्तिरूपत्वादस्या वाचोयुक्तेः, **तत्प्रहाणे**—प्रमाणाननुरोधिन्याः स्वच्छन्दोक्तेः त्यागे सति, **परमतम्**—प्रमाणशरणानां परेषां मतम्, **अक्षोभ्यम्**—अचालनीयम्, **असतीं संवृतिस्तु**—अपारमार्थिकी अविद्या तु, **अर्थसिद्ध्यै**—अभिमतस्य सर्वशून्यत्वरूपस्यार्थस्य लाभे, **न**—प्रयोजिका न भवति, **तस्मात्**—प्रमाणाननुरोधे अनुरोधेऽपि दोषात्, **काऽप्यदृष्टः**—कुत्राप्यननुभूतः, **निरुपधिकः**—देश-कालाद्युपाधिरहितः, **इत्थं निषेधः**—ईदृशः चतुष्कोटिनिषेधः, **न कल्प्यः**—नैव स्वबुद्ध्या वर्णनीयः ॥ २३ ॥

(199) प्राक् पश्चात् सत्त्वहानेर्गगनकुसुमवत् स्यान्न मध्येऽपि कार्यं
मैवं तत्रैव दृष्टेर्न यदि कथमसौ मध्यकार्यादिशब्दः ।
कार्यारम्भे निदानं विकृतिमदुत नेत्यादिचिन्ताऽपि वन्ध्या
सामग्र्या कार्यसिद्धेर्भजति च गुणतां कारणस्यानवस्था ॥ २४ ॥

कार्यम्—उत्पत्तिभाक् वस्तु, **प्राक्**—स्वोत्पत्तेः पूर्वं, **पश्चात्**—विनाशानन्तरं च, **सत्त्वहानेः**—अस्तित्वव्यवहारगोचरतायाः भ्रंशात्, **मध्येऽपि**—उत्पत्तिविनाशान्तरिते कालेऽपि, **गगनकुसुमवत्**—खपुष्पसदृशं सत् शून्यमेव, **स्यात्**—अङ्गीकार्यं भवति, (इति शङ्कने) **मैवम्**—ईदृशं शङ्कनं नोचितम्, **तत्र**—मध्यकाले, **दृष्टेरेव**—सत्त्वाव्यभिचारिण्याः उपलब्धेरेव, **न यदि**—सत्त्वज्ञापिका उपलब्धिः तत्प्रयोज्यं सत्त्वं वा यदि न स्यात् तर्हि. **असौ मध्यकार्यादिशब्दः**—उत्पत्तिविनाशकालव्यावर्तकः 'मध्य' शब्दः, अजन्यव्यावर्तकः 'कार्यादिः' शब्दो वा भवता प्रयुज्यमानः, **कथम्**—कया वा रीत्या साधुर्भवेत्? **निदानम्**—कारणभूतं वस्तु मृत्पिण्डादि, **कार्यारम्भे**—कार्ये उत्पादनीये, **विकृतिमत् उत न**—उपमर्दादिरूपक्रिया-सम्पन्नमेव कार्यजनकम्? अप्राप्तविकारमपि कारणं वा? **इत्यादि चिन्ताऽपि**—एवमाद्या विचिकित्सापि, **वन्ध्या**—विफलैव, **सामग्र्या**—समग्रकारणसम्पत्त्या, **कार्यसिद्धेः**—कार्याणां स्वरूपलाभात्, **कारणस्यानवस्था**—कारणपरम्परायाः अविश्रान्तिः, **गुणतां च**—गुणत्वमेव, न दोषताम्, **भजति**—सम्पद्यते ॥ २४ ॥

(200) साध्यं हेतुस्तदङ्गप्रभृति च यदि वः संवृतेरेव सिध्ये-
दस्मद्वाक्यानुरोधादिह न कथमसिद्ध्यादिदोषा भवेयुः ।
तत्र प्रामाण्यबुद्धिर्न यदि पठत तन्मानमित्यस्मदुक्ति
वस्तुस्थित्या न मानं तदिति यदि समं त्वन्मतस्थापकेऽपि ॥ २५ ॥

(माध्यमिकेन सर्वापलापात् (प्रमाणानामप्यपलापात्) शून्याख्यस्य प्रमेयस्यासिद्धिः; प्रमेयसिद्धेः प्रमाणाधीनत्वात्, इति (बौद्धोपर्याक्षेपे) सांवृतिकसिद्धिकाङ्कलापवता अनुमानेन शून्यत्वादिसिद्धिरिति बौद्धाशयः, तद्दूषणं च विवियेते अनेन)

साध्यम्—अनुमेयं सर्वशून्यत्वम्, **हेतुः**—तत्साधनभूतोऽर्थः, **तदङ्गप्रभृति च**—हेत्वङ्गभूतव्याप्ति-पक्षधर्मत्वादि च, **वः**—बौद्धानां युष्माकम्, **संवृतेरेव**—संवृत्याख्यात् दोषविशेषादेव, **सिध्येद्यदि**—लभ्येत यदि तर्हि, **अस्मद्वाक्यानुरोधात्**—भवद्दृष्ट्या सांवृतिकान्तर्गतास्मदीयवचनानुसारतः, **इह**—शून्यत्वरूपप्रमेयसाधके प्रमाणे अनुमानरूपे प्राप्यमाणाः,

असिद्ध्यादिदोषाः—हेत्वाभासत्वापादकाः असिद्धि-बाधप्रभृतयो दोषाः, **कथं न भवेयुः**—कथं वा न प्राप्नुयुः ? प्राप्नुयुरेव, **तत्र**—अस्मदुक्ते आपादने, **यदि न प्रामाण्यबुद्धिः**—प्रमाणत्वधीः यदि न जायेत तर्हि, **तन्मानमिति अस्मदुक्तिम्**—'तद्वाक्यं प्रमाणम्' इत्येवमर्थकं मदीयं वचनम्, **पठत**—पुनः पुनरभिमानेन वदत, (बौद्धोपदेशस्याऽऽवृत्तिमात्रेण भवन्मतसिद्धिवत्) **तत्**—मदीयं तद्वाक्यम्, **वस्तुस्थित्या**—वास्तविक्या रीत्या, **न मानम् इति यदि**—न प्रमाणमिति भवतः आशयो यदि, **त्वन्मतस्थापकेऽपि**—भवदीयमतस्थापनप्रवृत्ते 'सर्वं शून्यम्' इति वाक्येऽपि, **समम्**—(सांवृतिकत्वात्) वस्तुस्थित्या अप्रमाणत्वं तुल्यमेवेति तदपि नैव सिद्धं भवति ।। २५ ।।

(20[1]) अख्यातिस्त्वन्यथाधीर्विषयरहित[1]धीश्चा[1]नधिष्ठानबुद्धि-
बाह्यार्थाकारयोगः सदसदितरधीः शून्यधीरात्मधीश्च ।
भ्रान्तौ सर्वत्र तत्तत्परमतकथकैरादृताः पक्षभेदाः
प्रायो बुद्धिर्यथार्था श्रुतिविदभिमता क्वाऽपि भेदाग्रहादि ।। २६ ।।

भ्रान्तौ सर्वत्र—भ्रमसामान्ये, **तत्तत्परमतकथकैः**—प्राभाकरादितत्तन्मतीयैः वादिभिः, **आदृताः**—स्वीकृताः, **पक्षभेदाः**—पक्षविशेषा एते—, **अख्यातिः**—अग्रहणम् (धर्मिणि (प्रकारासंसर्गस्य), **अन्यथाधीः**—धर्मिण्यविद्यमानेन प्रकारेण धर्मिग्रहणम्, **विषयरहितधीः**—विकल्पापरपर्याया निर्विषयख्यातिः, **अनधिष्ठानबुद्धिः**—आरोपधर्मिणं विनैव धर्मारोपाख्या निरधिष्ठानख्यातिः, **बाह्यार्थाकारयोगः**—अर्थसंसर्गजाकारख्यातिनाम्नो निराकारे ज्ञाने घटाद्याकारोल्लेखिनी धीः, **सदसदितरधीः**—विवर्तापरपर्याया अनिर्वचनीयख्यातिः, **शून्यधीः**—शून्यापरपर्यायस्य अभावस्य भावरूपजगदात्मना ख्यातिः, **आत्मधीश्च**—आत्मापरपर्यायस्य ज्ञानस्यैव बाह्याभ्यन्तरसर्वप्रकारेण ख्यातिश्चेति, **प्रायो बुद्धिः**—विशिष्टा प्रतीतिः सर्वाऽपि, **यथार्था**—यथार्थख्यातिरित्येव, **श्रुतिविदभिमता**—वेदवित्संमता, **क्वापि**—याथार्थ्योपपादनानुपपत्तिस्थले क्वचित्तु प्रत्यक्षविशेषे प्रमायामप्रमायां च, **भेदाग्रहादि**—भेदस्य अग्रहणरूपा, असंसर्गस्य अग्रहणरूपा च अख्यातिर्भवति ।। २६ ।।

—o—

अधिकरणार्थसङ्ग्रहः (सर्वथानु. अधि)

सर्वथानुपपत्त्यधिकरणे—सत्त्वासत्त्वयोः अवस्थाविशेषरूपत्वात्, असदिति प्रतिज्ञायामपि, सदिति प्रतिज्ञायामिव माध्यमिकाभिमततुच्छत्वानुपपत्तेः, तन्मतम् अनुपपन्नम्—इत्युक्तम् ।।

—o—

[1] धीस्था—सा. र.

नयसङ्गतिमालिका (सर्वथानु-अधि)

न हि सर्वाभाववादे कोऽपि दोषः प्रसज्यते ।
इति माध्यमिको वादः प्रत्युदाहृतिसङ्गतेः ॥ ८८ ॥

इति सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥

—o—

(51) एकस्मिन्नसम्भवाधिकरणम् ॥ २–२–६ ॥

शारीरकन्यायकलापसङ्ग्रहः

(78) सर्वं च सत्त्वादि-[1]पटादि[1]भावै-
भिन्नं त्वभिन्नं स्थिरमस्थिरं च ।
इत्यप्यसद् येन विरुद्ध[2]धर्मौ[2]
नैकाश्रया[3]वन्य[3]कृता प्रतीतिः ॥ २० ॥

सर्वं च—निखिलमेव वस्तु, **सत्त्वादिभावैः अभिन्नं स्थिरं च**—सत्व-द्रव्यत्वादीन् सामान्यधर्मान् द्वारीकृत्य, भेदरहितं, चिरावस्थायि च, **पटादिभावैः**—पटत्व-घटत्वादीन् विशेषधर्मान् द्वारीकृत्य मिथोभेदवत् , आशुविनाशि च भवति, (अतः अनेकान्तवाद एवोचितः)' **इत्यपि असत्**—एवं चिन्तनमपि असाधु, **येन**—येन हेतुना, **विरुद्धधर्मौ**—मिथः प्रतिद्वंद्विनौ द्वौ धर्मौ, **न एकाश्रयौ**—नैव समानाधिकरणौ स्याताम्, **प्रतीतिः**—एकस्मिन्नेव धर्मिणि विरुद्धधर्मावगाहिनी धीः परम्, **अन्यकृता**—देश-कालाद्युपाध्यन्तरकृता न तु अनैकान्त्यकृता ॥ २० ॥

—o—

अधिकरणसारावलिः (एक-अधि) (श्लो. 27–29)

(202) संवादात् क्वापि भागे जिनमुनिवचसः शेषमप्यस्तु मानं
तस्मात् तेनोपरोध्योपनिषदिति कचोल्लुञ्छनानां दुराशा ।
[4]वैयर्थ्य[4]स्यापि दृष्टेर्न यदि सुगतवागेवमेवास्तु सत्या
तेनाऽन्योन्यं [5]विरो[5]धात् पुरुषवचनयोरप्रकम्प्या श्रुतिर्नः ॥ २७ ॥

---

[1] वदादि—ख. [2] धर्मा क. [3] त्वन्य—क. [4] वैषम्य—सा. र. [5] निरो—सा. र.

क्वापि भागे—मानवानां सामान्यधर्मभूते अहिंसादौ किञ्चिदंशे, **जिनमुनिवचसः संवादात्**—जिनाख्यर्षेः वाक्यस्य श्रुतिसंप्रतिपत्तेः, **शेषमपि मानमस्तु**—जैनागमोक्तं अवशिष्टमपि वचः प्रमाणतया सम्प्रतिपन्नं भवतु, **तस्मात्**—प्रमाणत्वेन साम्यसिद्धेः, **तेन**—जिनमुनेर्वचसा, **उपनिषत् उपरोध्येति**—वेदान्तगीः क्वचिद्बाध्यापि भवेदिति, **कचोल्लुञ्छनानाम्**—केशलुञ्छननिष्ठानां जैनानाम्, **दुराशा**—दुष्टा अपेक्षा चेज्जायेत ; सा न सफला भवेत्, **वैघट्यस्यापि**—जिनवचःसु वैदिकार्थविपरीतबोधकत्वस्यापि, **दृष्टेः**—उपलम्भात् (सर्वांशसंवादाभावात्), **न यदि**—वेदविरोधेऽपि जिनवाचामदुष्टत्वे, **एवमेव**—जिनोक्तिरिव, **सुगतवाक्**—शाक्यमुनिभाषापि, **सत्यास्तु**—अभ्युपगतप्रामाण्या भवतु, **तेन**—वेदविरुद्धत्वांशे अविशेषेण, **पुरुषवचनयोः**—पुरुषोक्त्योः जिन-सुगतगिरोः, **अन्योन्यं निरोधात्**—मिथोविरोधाद्बाधप्राप्तेः, **नः श्रुतिः**—वैदिकानामस्माकं प्रमाणभूता अपौरुषेयी वैदिकी वाक्, **अप्रकम्प्या**—अचालनीयप्रामाण्या सती जागर्ति ।। २७ ।।

(203) सच्चासच्च द्वयं च द्वितयसमधिकं तच्च पूर्वैः सहेति
स्यादस्तीत्यादिवाचा परिहितगगनैर्गीयते सप्तभङ्गी ।
व्याघातस्तैर्यदीष्टः[1] स्वसमयविहतिर्यद्यनिष्टः परोक्ते-
[2]स्त्वद्वाक्यैर्न क्षतिः स्यान्न च निरुपधिकः क्वाप्यसत्त्वादियोगः ॥२८॥

परिहितगगनैः—गगनवासस्कैः दिगम्बरजैनैः, **सप्तभङ्गी**—अभ्युपगतसप्तविधभङ्ग (अनैकान्त्य)वती स्वसिद्धान्तसरणिः, **स्यादस्तीत्यादिवाचा**—'स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यम्, स्यादस्ति चावक्तव्यं च, स्यान्नास्ति चावक्तव्यं च, स्यादस्ति च नास्ति चावक्तव्यं च' इत्येवंरूपया भाषया, **सच्च असच्च**—सत्तावदपि सत्तावदन्यदपि, **द्वयं च**—सत्त्वासत्त्वोभयवदपि, **द्वितयसमधिकम्**—उक्तोभयवद्विलक्षणमपि, (अनिर्वाच्यम्) **पूर्वैः सह तच्च**—उक्तैरेतैः सह तत्सर्ववैलक्षण्यरूपानिर्वाच्यत्ववदपि, **इति गीयते**—इत्येवमर्थतया प्रतिपाद्यते, **तैः**—सप्तभङ्गीवादिभिर्जैनैः, **व्याघातः**—व्याघातनामा कथकैरुद्भाव्यो दोषः, **इष्टो यदि**—दोषतया स्वैरप्यङ्गीकृतो यदि तर्हि, **स्वसमयविहतिः**—स्वसिद्धान्तच्युतिः (सप्तभङ्ग्याः व्याहतिमयत्वात्) **यदि अनिष्टः**—सदोषतया न संमतश्चेत्, **त्वद्वाक्यैः**—दोषोद्भावनार्थैः भवदीयैः वचोभिः, **परोक्तेः न क्षतिः**—त्वत्प्रतिवाद्युक्त्याः तत्सिद्धान्तवाचः नैव भङ्गो भविता, **क्वाऽपि**—यत्र कुत्राप्येकस्मिन्नर्थे, **निरुपधिकः**—देशकालाद्युपाधिभेदानायत्तः (स्वाभाविकः),

---

[1] स्ते यदीष्टः सा.प. [2] स्त्वद्वा—सा.प.

असत्त्वादियोगः न च—(स्वगतसत्त्वेन साकं) असत्त्वादेर्विरुद्धधर्मस्य समावेशो नैव भवितुमर्हः ॥ २८ ॥

(204) वृद्धिह्रासौ यथार्हं प्रतितनु भविनां देह[1]भङ्गे वि[1]मानं
मुक्तौ नित्योर्ध्वयानप्रभृति गुरुतया नित्यपातं क्ष्मादेः ।
धर्मादेर्व्यापकत्वं गगनवदथवा[2]ऽतादृशं[2] पुद्गलत्वं
दुस्तर्कैः कल्पयन्तः श्रुतिनयकुशलैर्दूरमुत्सारणीयाः ॥ २९ ॥

भविनाम्—संसरतां जीवानाम्, **प्रतितनु**—प्रतिदेहम् (देहे-देहे), **यथार्हम्**—यथायोग्यम्, **वृद्धिह्रासौ**—उपचयापचयौ (महदल्पपरिणामत्वे) अवर्ज्यौ, **देहभङ्गे**—देहसम्बन्धोच्छेदे सति, **विमानम्**—परिमाणसामान्यभावः (भावप्रधाननिर्देशात्), **मुक्तौ**—मोक्षावस्थायाम्, **नित्योर्ध्वयानप्रभृति**—सततोर्ध्वगमनादिकम्, (एवम्) **क्ष्मादेः**—भूग्रहमण्डलादेः, **गुरुतया**—पतनहेतुगुरुत्वाख्यधर्मवत्त्वेन हेतुना, **नित्यपातम्**—पतननैरन्तर्यम्, **धर्मादेः**—धर्मस्याधर्मस्य च **गगनवत्**—आकाशसाम्येन, **व्यापकत्वम्**—सर्वदेशसर्वकालव्याप्तिम्, **अथवा**-यद्वा, **अतादृशम्**—व्यापकत्वविरुद्धम्, **पुद्गलत्वम्**—परिच्छिन्नपरिमाणत्वम्, **दुस्तर्कैः**—श्रुतिविरुद्धैस्तर्कैः, **कल्पयन्तः**—अप्रमाणं निश्चिन्वन्तः एते जैनाः, **श्रुतिनयकुशलैः**—वेदनीतिनिपुणैः, **दूरमुत्सारणीयाः**—अपुनःप्ररोहं निरसनीयाः ॥ २९ ॥

—o—

अधिकरणार्थसङ्ग्रहः (एक. अधि)

एकस्मिन्नसम्भवाधिकरणे—'कृत्स्नं जगत् सत्त्वाऽसत्त्वादिभिः अनेकान्तम्' इति जैनमतम्—आशङ्क्य

एकस्मिन् वस्तुनि सत्त्वाऽसत्त्वादीनां विरुद्धधर्माणां अनुपपत्तेः तदपि अनादरणीयम्—इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका (एक–अधि)

अथ सार्वात्म्यवादेन सर्वदोषनिराकृतिम् ।
अभ्युपेत्यार्हतनयस्योदयात् प्रत्युदाहृतिः ॥ ८९ ॥

इति एकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

—o—

---

[1] भङ्गेऽपि, भङ्गेस्व—सा.र. [2] तादृशम्—सा.र.

(52) पशुपत्याधिकरणम् ॥ २–२–७ ॥

शारीरकन्यायकलापसङ्ग्रहः

(79) पत्युः पशूनां मतमादरार्हं

सर्वज्ञभावाच्च परिग्रहाच्च ।

इत्यप्यसद् वेदविरुद्धधर्म-

परावरादिप्रतिपादनेन ॥ २१ ॥

पशूनां पत्युः मतम्—पशुपतेः शिवस्य उपदेशतः प्रवृत्तं पाशुपताख्यं मतम्, **सर्वज्ञभावाच्च**—तदुपदेष्टुः शिवस्य सर्वतत्त्वार्थवेत्तृत्वात्, **परिग्रहाच्च**—वैदिकैरेव कैश्चित् उपदेशानुष्ठानादिद्वारा (प्रमाणतया) तत्कृतस्य आगमस्य स्वीकृतत्वदर्शनादपि ज्ञापकात्, **आदरार्हं**—वेदोपबृंहणभूतागमप्रवृत्ततया अभ्युपगमार्हम्, **इत्यपि असत्**—एवं चिन्तनमपि असाधु, **वेदविरुद्ध....पादनेन**—श्रुत्यनभिमतनिमित्तत्वोपादानत्ववत्तया ईश्वर-प्रधानाख्यतत्त्वयोः, बोधनेन (अस्य मतस्य वैदिकैरनादरणीयत्वात्) ॥ २१ ॥

—o—

अधिकरणसारावलिः (पशु-अधि) (श्लो. ३०–३४)

(205) सर्वं जानाति रुद्रः श्रुतिषु च महितः सत्यवादी च दृष्टः

प्रख्यातं तद्व्रतं च क्वचिदुपनिषदीत्यस्तु मानं तदुक्तिः ।

मैवं देवेन दैत्यप्रमथनरुचिना मोहशास्त्राणि कुर्वि-

त्यादिष्टो ह्येष तन्त्रं निजमकृत ततस्तन्न शिष्टोपजीव्यम् ॥ ३० ॥

रुद्रः—पाशुपतप्रवर्तकः शिवः, **सर्वं जानाति**—समस्तं तत्त्वं वेत्ति (सर्वज्ञः), **श्रुतिषु च महितः**—वेदेष्वपि 'ईशानः सर्वविद्यानाम्' इत्यादिषु उत्कृष्टतया बोधितः, **सत्यवादी च दृष्टः**—'दासभूताः स्वतः सर्वे' इत्यादौ जीवानां भगवदेकशेषत्वबोधवतः वास्तवार्थस्य उपदेष्टृतया ज्ञातः, **तद्व्रतं च**—पाशुपताख्यं व्रतमपि, **क्वचिदुपनिषदि**—अथर्वशिरोनाम्न्यामुपनिषदि, **प्रख्यातम्**—'व्रतमेतत्पाशुपतम्' इत्युल्लेखतः औपनिषदानां प्रसिद्धम्, **इति**—अत्रोक्तेभ्यो हेतुभ्यः, **तदुक्तिः**—पशुपतेः शिवस्योक्तिरूपः आगमः, **मानमस्तु**—तत्त्वार्थनिर्णयसाधनं भवतु, (इति शङ्कने), **मैवम्**—एवं मा शङ्क्यताम्, **हि**—

यतः, **दैत्यप्रमथनरुचिना**—दनुजमर्दनाभिलाषिणा, **देवेन**—भगवता महाविष्णुना, **मोहशास्त्राणि कुरु इति**—असुरमोहकारीणि शास्त्राणि प्रवर्तयेति, **आदिष्टः**—आज्ञप्तः सन्, **एषः**—पशुपतिसंज्ञः शिवः, **निजतन्त्रम्**—स्वीयं पाशुपतं तन्त्रम्, **अकृत**—अरचयत्, **ततः**—तस्माद्धेतोः, **तत्**—असुरमोहनार्थं पाशुपतं तन्त्रम्, **शिष्टोपजीव्यं न**—सच्छास्त्र (तैः) तानां प्रमाणतया नाऽवलम्बनीयम् ॥ ३० ॥

(206) प्राजापत्ये हि वाक्ये प्रकटमुपनिषत् प्राह देहात्मवादं
चक्रे लोकायतं तत् सुरगुरुरभजन्मो[1]हनत्वं[1] मुकुन्दः ।
कण्वस्थाने च लोकायतिकपरिबृढा भारतेऽपि प्रगीताः
[2]कार्यार्थो[2] विप्रलम्भस्तदिह पशुपतेस्तद्वदेवोपपन्नः ॥ ३१ ॥

उपनिषत्—छान्दोग्यश्रुतिः, **प्राजापत्ये वाक्ये**—प्रजापतिना इन्द्र-विरोचनौ प्रति उपदिष्टे आत्मस्वरूपबोधनपरे वाक्ये (दहरविद्याशेषभूते), **देहात्मवादम्**—देहस्यैव आत्मताबोधकं वाक्यम्, **प्रकटं हि आह**—स्पष्टमेव वदति, **तत्**—प्रजापत्युक्तमेव देहात्मत्वम्, **सुरगुरुः**—देवाचार्यो बृहस्पतिः **लोकायतं चक्रे**—लोकायतनाम्ना प्रथितशास्त्रतया रचितवान्, **मुकुन्दः**—मुक्तिदायको जनार्दन एव, **मोहनत्वम्**—मोहिन्याख्यं रूपम्, बुद्धादिरूपं वा मोहनौपयिकम्, **अभजत्**—प्राप्तवान्, अङ्गीचकार वा, **कण्वस्थाने च**—कण्वस्य ऋषेराश्रमेऽपि, **लोकायतिकपरिबृढाः**—लोकायतमतीयाग्रेसराः, **भारतेऽपि प्रगीताः**—महाभारतेऽपि स्पष्टीकृताः, **तत्**—उक्ताद्धेतोः, **इह**—पाशुपततन्त्रेपि, **तद्वदेव**—प्राजापत्यादिवाक्येष्विव, **पशुपतेः**—पशुपतिनाम्नः शिवस्य, **विप्रलम्भः**—प्रकृतिविशेषमुद्दिश्य मोहनव्यापारः **कार्यार्थः**—भगवतः सत्यसङ्कल्पनिर्वहणप्रयोजनकः सन्, **उपपन्नः**—युक्त एव ॥ ३१ ॥

(207) शैवाद्याख्याविशेषैः पशुपतिसमयः स्याच्चतुर्धाऽन्यथा वा
श्रुत्याऽन्योन्यं च बाधः स्फुट इह तदसौ शापदुष्टार्ह उक्तः ।
अग्राह्यान् वैदिकानामनुसृतनिगमाः सस्मरुस्तत्प्रविष्टान्
तत्त्वेऽप्यत्राऽयथात्वं सुगतजिनमतानन्तरोक्तिः क्रमाप्ता ॥ ३२ ॥

पशुपतिसमयः—पशुपतेः शिवस्य सिद्धान्तः, **शैवाद्याख्याविशेषैः**—शैव-पाशुपत-

---

[1] हकत्वं—सा.र. [2] कार्यार्थं—सा.र.

कापाल कालामुखेति संज्ञाभेदैः, **चतुर्धा स्यात्**—भेदचतुष्टयवान् वर्तेत, **अन्यथा वा स्यात्**—एकप्रकारवानेव वा वर्तेत, (अस्माकं तत्र न आदरः) **इह**—पाशुपते तन्त्रे, **श्रुत्या अन्योन्यं च बाधः स्फुटः**—वेदेन सह स्वस्मिन्नेव मिथश्च विरुद्धार्थकत्वं विवेचकानां सुज्ञेयः, **तस्मात्**—उक्ताद्धेतोः, **असौ**—पाशुपतः समयः, **शापदुष्टार्हः**—गौतमस्य मुनेः प्राप्तात् शापात् दूषितानामेव सेवनयोग्यः ; न वैदिकानामिति, **उक्तः**—वैदिकैर्निश्चितो वर्तते, **अनुसृत-निगमाः**—वेदमार्गावलम्बिनो मन्वादयः, **तत्प्रविष्टान्**—पाशुपतसमयप्रविष्टान्, **वैदिकानां अग्राह्यान्**—वेदमार्गप्रविष्टानां अनुपादेयत्वेन, **सस्मरुः**—स्वीयासु स्मृतिषु बोधयामासुः, **अत्र**—अस्मिन् पाशुपते, **तत्त्वेऽपि**—मुमुक्षुभिर्निर्णेयार्थविषयेऽपि, **अन्यथात्वम्**—श्रुतिविपर्यस्त-त्वम् ; (न केवलमाचारांशे) **सुगत-जिनमतान्तरोक्तिः**—अस्य तन्त्रस्य बौद्धार्हतमत निरासपश्चाद्भावेन निरसनवाचोयुक्तिः, **क्रमात्सा**—वैदिकेतरत्वे तारतम्यक्रममनुरुध्य सिद्धा ॥ ३२ ॥

(208) निष्ठा सर्वेषु नारायण इति वचनाद्धेत्वहन्तव्यतोक्ते-
मनित्वोक्त्या च तन्त्रान्तरमपि महितं वेदवद् भारतादौ ।
नाऽतो बौद्धादिवत् तन्निरसनमिति चेत् सत्यमंशे तु बाधः
स्यान्नाऽसौ पञ्चरात्रे क्वचिदपि तदिह स्वीकृतिर्वेदतुल्या ॥ ३३ ॥

सर्वेषु—साङ्ख्यादिष्वखिलतन्त्रेष्वपि, **निष्ठा नारायण इति**—पर्यवासानभूमिः नारायण एवेति, **भारतादौ**—प्रमाणतया सर्वसम्प्रतिपन्नेषु महाभारतप्रभृतीतिहासपुराणेषु, **वचनात्**—'निष्ठा नारायणः स्मृतः' इति वर्णनात् ज्ञापकात्, **हेत्वहन्तव्यतोक्तेः**—'पाशुपतं तथा न हन्तव्यानि हेतुभिः' इति केवलाभियुक्तिभिरबाध्यत्वनिर्णयात्, **मानत्वोक्त्या च**—'आत्म-प्रमाणान्येतानी'ति प्रमाणतायाश्च व्यवस्थापनात्, **तन्त्रान्तरमपि**—पञ्चरात्रादन्यदपि तन्त्रम्, **वेदवत् महितम्**—वेदसदृशतया उत्कर्षवदेव, **अतः**—उक्तहेतुभ्यः, **बौद्धादिवत्**—सौगत-जैनादिसमानत्वबुद्ध्या, **तन्निरसनं न इति चेत्**—कापिलादितन्त्रखण्डनं नैव युक्तम् इति शङ्कने, **सत्यम्**—इयमुक्तिः किञ्चिदंशे अङ्गीकार्यैव, **अंशे तु बाधः स्यात्**—ईश्वरस्य निमित्त-मात्रत्वानुपादानत्वादिकिञ्चिदंशे एव वेदविरोधोऽनपह्नवनीय एव, **पञ्चरात्रे**—नारायणप्रोक्ते पञ्चरात्राख्ये तन्त्रे, **असौ**—श्रुतिविरोधः, **क्वचिदपि न स्यात्**—किञ्चिदंशेऽपि नैव सम्भावन-मप्यर्हति, **तत्**—ततो हेतोः, **इह**—पञ्चरात्रे, **स्वीकृतिः वेदतुल्या**—वैदिकग्राह्यता वेदसाम्ये-नैव न तारतम्येनेति ॥ ३३ ॥

(209) दृश्यन्ते सङ्गृहीता जगति हि समयास्ते च राज्ञानुपाल्या-
स्तस्मान्नः पक्षपातः क्वचिदनुचित इत्यर्भकप्रायचोद्यम् ।
मुग्धैरन्ये गृहीता भवतु समयसंरक्षणोक्तिश्च धर्म्ये
निष्ठैक्योक्तिस्तदन्यग्रह[1]विहति[1]परा तद्विरुद्धोक्तिदृष्टेः ॥ ३४ ॥

हि—यतः, **जगति**—लोके, **समयाः**—अन्येऽन्ये सिद्धान्ताः, **सङ्गृहीताः दृश्यन्ते**—ग्रन्थरूपेण एकत्र निवेशिताः, (तैस्तैः तीर्थङ्करैः) उपलभ्यन्ते, **ते च**—ते च सर्वे सिद्धान्ताः, **राज्ञा अनुपाल्याः**—पार्थिवेन (प्रजासंरक्षणवदेव) संरक्षणीयाः **तस्मात्**—राज्ञापि संरक्षणीयत्वाद्धेतोः, **नः**—अस्माकमपि—**क्वचित्**—कस्मिंश्चिदेकस्मिन् दर्शने, **पक्षपातः अनुचितः**—विशिष्ट अभिमानः असाधुः, **इति अर्भकप्रायचोद्यम्**—एवं बालिशतुल्यानामेवाशङ्कनम्, **अन्ये**—अवैदिकाः समयाः, **मुग्धैः गृहीताः** प्राप्तमोहैरेव उपात्ताः (न विवेकिभिः) **समयसंरक्षणोक्तिश्च**—'सर्वे सिद्धान्ताः अनुपालनीयाः' इति प्रवादस्तु, **धर्म्ये भवतु**—धर्माविरोधिसिद्धान्तविषयक इति निश्चितो भवतु, **निष्ठैक्योक्तिः** 'सर्वेषामेव तन्त्राणां निष्ठा नारायणः परः' इति नारायणे एकस्मिन्नेव पर्यवसानवाचोयुक्तिः, **तदन्यग्रहविहतिपरा**—नारायणेतरस्मिन् (देवतान्तरे) परत्वबुद्धिनिषेधोद्देशतः प्रवृत्ता, **तद्विरुद्धोक्तिदृष्टेः**—भगवदेकपरत्वविरोधिवचसां पुराणान्तरेषु जनेषु च उपलभ्यमानत्वात् तन्निराकरणस्य विवेकिभिः कर्तव्यत्वात् ॥ ३४ ॥

—o—

अधिकरणार्थसङ्ग्रहः (पशु-अधि)

पशुपत्यधिकरणे—वेदविरुद्धत्वात् असामञ्जस्याच्च पशुपतिमतम् अनादरणीयम्—इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका (पशु-अधि)

सर्वं पाशुपतं तन्त्रं सम्भवास्पदमिष्यताम् ।
इति शङ्कासम्भवेन चात्राऽपि प्रत्युदाहृतिः ॥ ९० ॥

इति पशुपत्यधिकरणम् ॥ ७ ॥

---

[1] निहति—सा.र.

(213) उत्पत्त्यसम्भवाधिकरणम् ॥ २–२–८ ॥

शारीरकन्यायकलापसङ्ग्रहः

(80) जीवः परस्मात्तु मनस्तु जीवा-
दित्यादिभिर्वेदविरोधदृष्टेः ।
स्यात् पञ्च[1]रात्रं[1] न सदित्यसारं
व्यूहाभिधानात् प्रतिबोधतश्च ॥ २२ ॥

परस्मात् तु—परमकारणात् वासुदेवात् ब्रह्मण एव, **जीवः स्यात्**—जीवात्मा जायते, **मनस्तु**—मन इन्द्रियं तु, **जीवात् स्यात्**—जीवात्मनो जायते, **इत्यादिभिः**—एवमाद्यर्थकैः श्रीपञ्चरात्रगतैर्वाक्यैः, **वेदविरोधदृष्टेः**—जीवनित्यत्ववादिन्या मनसः परमात्मकारणकत्ववादिन्या च श्रुत्या विप्रतिपत्तेर्दर्शनात्, **पञ्चरात्रं न सत्**—पञ्चरात्राख्यं तन्त्रं न साधु (न प्रमाणभूतम्) **इत्यसारम्**—एवं शङ्कनं न युक्तिमत्, **व्यूहाभिधानात्**—तेषां वाक्यानां जीवतत्त्वाभिमानिभगवद्व्यूहाविर्भावप्रतिपादनपरत्वात्, मनस्तत्त्वाभिमानिभगवद्व्यूहाविर्भावप्रतिपादनपरत्वाच्च, **प्रतिषेधतश्च**—पाञ्चरात्रे एव 'स ह्यनादिरनन्तश्चे'ति जीवोत्पत्तेः कण्ठोक्त्यैव निवारणाच्च ज्ञापकात् ॥ २२ ॥

(81) कपिल-कणभुग्[2]बुद्धा[2]र्हन्तो हताः सह शम्भुना
कुलिशनिशितैरेतैस्तर्कैरकर्कशबुद्धयः ।
अपि च भगवद्दृष्टा श्रीपाञ्चरात्रगतिस्त्वियं
न खलु सदृशी बाह्यैरन्यैरिति प्रतिसाधितम् ॥ २३ ॥

कपिल-कणभुग् बुद्ध-अर्हन्तः—कपिल-कणाद-सुगत-जिनाः सांख्य-वैशेषिक-बौद्ध-जैनसमयाचार्याः, **शम्भुना सह**—पाशुपताचार्येण पशुपतिना साकम्, **अकर्कशबुद्धयः**—अतीक्ष्णमतित्वाद्धेतोः, **एतैः**—शारीरके प्रतिबोधितैः, **कुलिशनिशितैः**—वज्रवत् तीक्ष्णतरैः, **तर्कैः**—तर्कैः साधनतया अवलम्बितैः, **हताः**—तत्तन्मतनिरसनतो निरस्ताः ; **अपि च**—किञ्च, **इयं श्रीपाञ्चरात्रगतिस्तु**—प्रस्तुता श्रीपाञ्चरात्रप्रक्रिया तु, **भगवद्दृष्टा**—वासुदेवेन भगवता साक्षात्कृता, (अतः) **बाह्यैः**—वेदबहिष्कृतैः इतरैः तन्त्रैः साकम्, **न खलु सदृशीति**—नैव समेति, **प्रतिसाधितम्**—सम्यङ्निर्णीतम् ॥ २३ ॥

—o—

[1] सारं—क.   [2] बोद्धा—क.

(210) प्रामाण्यं कर्मका(ण्डे)ण्डस्मृतिनयवशतः सात्वतस्यापि सिद्धं
पादेऽस्मिन् सङ्गतिश्च प्रतिमतदमने नास्त्यमुष्येति चेन्न ।
प्रत्यर्थित्वं विरोधभ्रममपनयता पञ्चरात्रस्य वार्यं
दुस्तर्का[1]द्युत्थ[1]तोक्त्या तदितरसमयेष्वित्यनु[2]स्यूत[2]सिद्धिः ॥ ३५ ॥

सात्वतस्याऽपि—सात्वतापरपर्यायस्य पाञ्चरात्रतन्त्रस्यापि, **प्रामाण्यम्**—प्रमाणभूत-(तत्त्वार्थ) ज्ञानजनकत्वम्, **कर्मकाण्डस्मृतिनयवशतः**—पूर्वमीमांसीयात् स्मृत्यधिकरणात्, **सिद्धम्**—लब्धमेव, **प्रतिमतदमने**—प्रतिपक्षप्रतिक्षेपार्थके, **अस्मिन् पादे**—द्वितीयाध्यायीये द्वितीयचरणे, **अमुष्य**—पाञ्चरात्रप्रामाण्यसमर्थनौपयिकस्यास्य उत्पत्त्यसम्भवाधिकरणस्य, **सङ्गतिश्च न**—निरूपणीयत्वौपयिकः सम्बन्धोऽस्ति नास्ति, **इति चेत् न**—एवं शङ्कनमपि नोचितम्, **पञ्चरात्रस्य**—सात्वताख्यस्यास्य तन्त्रस्य, **विरोधभ्रमम्**—श्रुतिप्रतिपन्नार्थविरुद्धार्थ-प्रतिपादकत्वभ्रान्तिम्, **अपनयता**—निवारयितुमुद्युक्तेन सूत्रकारेण, **प्रत्यर्थित्वम्**—वेदाननु-रोधित्वम्, **वार्यम्**—परिहरणीयम् (अस्मिन्नधिकरणे), **तदितरसमयेषु**—वैदिकेतरसिद्धान्तेषु, **दुस्तर्काद्युत्थतोक्त्या**—अप्रतिष्ठितदुर्युक्तिप्रभवत्वप्रतिपादनतः, **प्रत्यर्थित्वम्**—वेदप्रतिभटन-क्षमत्वम्, **वार्यम्**—परिहार्यम्, **इति**—उक्तया रीत्या, **अनुस्यूतसिद्धिः**—विरोधापनयरूपस्य अनुवृत्तस्यैकस्य पादार्थस्य लाभो भवति ॥ ३५ ॥

(211) दृष्टास्मिन् वेदनिन्देत्यनभिमतमृषेः सात्वते वैदिकत्वं
नैवं वैशद्यमूलस्तुतिपरवचने वेदवैरस्यहानेः ।
संगृह्याऽऽम्नायसारं प्रणयति भगवां[3]स्तद्धि[3] ! भक्तानुकम्पी
श्रौत-स्मार्तादिवच्च व्यभजदिह विभुर्वैदिकं तान्त्रिकं च ॥ ३६ ॥

अस्मिन्—श्रीपाञ्चरात्रे, **वेदनिन्दा**—शान्तिलाभाजनकत्ववर्णनकृता गर्हा, **दृष्टेति**—उपलब्धेति हेतोः, **सात्वते**—पाञ्चरात्रतन्त्रे, **वैदिकत्वम्**—वेदानुरोधित्वम्, **ऋषेः अनभिमतम्**—सूत्रकृतो बादारायणस्य अनिष्टम्; **नैवम्**—ईदृशं शङ्कनं न साधु, **वैशद्यमूलस्तुति-परवचने**—तत्त्वार्थविषयकविशदप्रतिपत्तिजनकत्वं निमित्तीकृत्य पाञ्चरात्रप्रशंसार्थं प्रवृत्ते वाक्ये (साङ्गेषु वेदेषु निष्ठामलभमाना इति), **वेदवैरस्यहानेः**-वेदविरोधित्वतात्पर्यकत्वाप्रसक्तेः, **हि**—यतः,

---

[1] द्युत्थितो. [2] स्यूति. [3] स्तत्र.

भक्तानुकम्पी भगवान्—आश्रितवात्सल्यैकशीलः नारायणः, **आम्नायसारम्**—सर्वेषु वेदेषु प्रधानभूतमर्थम्, **संगृह्य**—एकत्र संक्षेपत आहृत्य, **तत् प्रथयति**—पाञ्चरात्रं निर्माति स्म, **विभुः**—पाञ्चरात्रप्रवर्तको भगवान्, नारायणः, **इह**—पाञ्चरात्रतन्त्रे, **वैदिकं तान्त्रिकं च**—वैदिकमिति तान्त्रिकमिति च, **श्रौतस्मार्तादिवच्च**—वैदिकेषु कर्मसु श्रौतं कर्म, स्मार्तं कर्मेति विभागकरणवदेव, व्यभजत् विभक्तवान् ॥ ३६ ॥

(212) वेदानां मानतोक्तेस्तदनुसरणतः स्वस्य तन्मूलतोक्त्या
व्यावृत्तिर्भाति बाह्यागमत इति न तत्तुल्यभावोक्तिरार्षी ।
का हानिः क्षुद्रविद्याशबलमिति यथा तादृशे वेदभागे
मोक्षस्य प्रत्ययार्थं त्वगणिषत परं सात्वते सिद्धिभेदाः ॥ ३७ ॥

वेदानाम्—अपौरुषेयगिरां ऋगादिरूपाणाम्, **मानतोक्तेः**—प्रमाणतायाः श्रीपाञ्चरात्रे प्रतिपादनात्, **स्वस्य**—पाञ्चरात्रस्य, **तदनुसरणतः**—वेदानुरोधतः, **तन्मूलतोक्त्या**—वेदमूलकत्ववचनेन, **बाह्यागमतः**—वेदबहिष्कृतेभ्यः आगमेभ्यः, **व्यावृत्तिः भाति**—पार्थक्यं प्रतीयते, **इति**—अतो हेतोः, **तत्तुल्यभावोक्तिः**—पाञ्चरात्रस्य बाह्यसाम्यवाचोयुक्तिः, **न आर्षी**—ऋषेः सूत्रकर्तुः न संमता, **क्षुद्रविद्याशबलमिति**—बुभुक्षुजनादरणीयाभिः बह्वीभिर्विद्याभिः संवलितमिदं तन्त्रमित्येतावता, **का हानिः**—किं मुमुक्षुजनोपादेयत्वहानिर्भवेत्? नैव, **यथा तादृशे वेदभागे**—रक्तैर्विरक्तैश्च आदरणीयाभिर्विद्याभिः (ब्रह्मप्राप्तिफलाभिः उपासनाभिः, काम्याभिः इष्टिविधिरूपाभिश्च) संवलिते श्रुतीनामेकदेशे यथा न काऽपि प्रमाणत्वक्षतिः तद्वत्, **सात्वते**—पांचरात्रे, **सिद्धिभेदाः परम्**—बुभुक्षुजनसेव्याः सिद्धिविशेषास्तु, **मोक्षस्य प्रत्ययार्थं तु**—मोक्षविषयकविश्वासोपजननार्थमेव, **अगणिषत**—गुडजिह्विकान्यायेन सिद्धित्वेन परिगणिता अभवत् ॥ ३७ ॥

(213) जीवस्योत्पत्तिमाह प्रथयति च मनो जीवतत्त्वप्रसूतिं
तच्चाहङ्कारहेतुं व्यपदिशति ततः पञ्चरात्रं न मानम् ।
मैवं जीवादिवाचो ह्यभिदधति विभोर्व्यूहभेदानिह त्रीन्
तत्तत्तत्त्वाभिमानान्नियतिमधिगता तेषु तत्तत्समाख्या ॥ ३८ ॥

जीवस्य उत्पत्तिमाह—(इदं तन्त्रं) 'जीवो जायते' इति जीवात्मनो नित्यस्य जन्म प्रतिपादयति, **मनश्च जीवतत्त्वप्रसूतं प्रथयति**—परमात्मनो जातं च मनस्तत्त्वं जीवतत्त्वादुत्पन्नतया प्रतिपादयति, **तच्च अहङ्कारहेतुं व्यपदिशति**—मनस्तत्त्वमपि अहङ्कारतत्त्वं प्रति

कारणत्वेन व्यवहरति, **ततः**—श्रुतिविरुद्धानामेषामर्थानां प्रतिपादनात्, **पञ्चरात्रम्**—पञ्चरात्राख्यं तन्त्रम्, **न मानम्**—प्रमाणं नैव भवितुमर्हम्; **मैवम्**—ईदृशं शङ्कनं नोचितम्, **हि**—यतः, **जीवादिवाचः**—जीव-मनोऽहङ्कारशब्दाः, **इह**—एतद्वाक्यवृत्तयः, **विभोः**—भगवतो वासुदेवस्य, **त्रीन् व्यूहभेदान्**—सङ्कर्षण-प्रद्युम्नानिरुद्धाख्यान् त्रिसङ्ख्यान् व्यूहसंज्ञाविर्भावविशेषान्, **अभिदधति**—बोधयति, **तेषु**—उक्तेषु व्यूहभेदेषु, **तत्तत्समाख्या**—सा सा संज्ञा, **तत्तत्त्वाभिमानात्**—जीव-मनोऽहङ्काराख्यानां तेषां तेषां तत्त्वानां स्वेषु अभिमानपदाभिधेयात् सम्बन्धविशेषात्, **नियतिं अधिगता**—अयोगान्ययोगव्यवच्छेदाभ्यां तद्वाचकत्वनियमयुक्ता वर्तते ॥ ३८ ॥

(214) जीवोऽत्राऽनाद्यनन्तः कथित इति तदुत्पत्तिपक्षो न हीष्टः
शब्दः सङ्कर्षणादिर्न कथमपि समन्वेति जीवादिमात्रे ।
श्रौतः सृष्टिक्रमश्च स्वयमनुपठितस्तद्विरुद्धं न कल्प्यं
तस्माच्छ्रुत्या मिथो वा न विहतिरिह तत्तन्त्रतात्पर्यदृष्टेः ॥ ३९ ॥

अत्र—पञ्चरात्रे, **जीवः**—चेतनः, **अनाद्यनन्तः**—उत्पत्ति-विनाशरहितत्वेन, **कथित इति**—'सह्यनादिरनन्त' श्चेति वचनतः स्पष्टमुक्त इति हेतोः, **तदुत्पत्तिपक्षः**—जीवस्य जन्मस्वीकारपक्षः, **न हि इष्टः**—नैव पाञ्चरात्रसंमतः, **सङ्कर्षणादिः शब्दः**—सङ्कर्षणप्रभृतिकः शब्दः, **जीवादिमात्रे**—केवलजीव-मनोऽहङ्काररूपेऽर्थे, **कथमपि न समन्वेति**—केनापि प्रकारेण प्रतिपादकतयाऽन्वेतुं नाऽर्हति, **श्रौतः सृष्टिक्रमश्च**—श्रुतिसिद्धः सृष्टिप्रकार एव, (चतुर्विंशतितत्त्वानां) **स्वयमनुपठितः**—अत्राऽपि कण्ठोक्त्या प्रतिपादितः, **तद्विरुद्धम् न कल्प्यम्**—कण्ठोक्तक्रमविरुद्धं 'जीवो जायते' इत्यादिवाक्यप्रतिपन्नतया नैव कल्पनार्हम्, **तस्मात्**—एवं विवेचनतः, **तत्तन्त्रतात्पर्यदृष्टेः**—पाञ्चरात्रतन्त्रतात्पर्यावगमात्, **इह**—अस्मिन् तन्त्रे, **श्रुत्या मिथो वा**—वेदेन सह वा स्वस्मिन्नेव वा, **न विहतिः**—न व्याहतार्थप्रतिपादकता ॥ ३९ ॥

(215) साङ्ख्या वैशेषिकाश्च श्रुतिपरिपठितं धर्ममैच्छन्न तत्वं
तत्त्वाचारौ तु बुद्ध क्षपणक-पशुपत्युक्तिषु श्रुत्यपेतौ ।
वेदोपस्कारिविष्णुस्मृतिवदवि[1]तथं[1] पञ्चरात्राख्यतन्त्रे
तत्त्वं त्रय्यन्तसिद्धं चरणमपि समं गृह्यभेदादिनीत्या ॥ ४० ॥

साङ्ख्याः वैशेषिकाश्च—कापिलाः, काणादाश्च, **श्रुतिपरिपठितं धर्मम्**—वेदोक्तं

---

[1] तथे—सा. र.

विहितानुष्ठान-निषिद्धवर्जनादिकं श्रेयः साधनमर्थम्, **ऐच्छन्**—अभ्युपागमन्, **तत्त्वं**—श्रुत्युक्तं प्रमेयं परम्, **नैच्छन्**—नाभ्युपागमन्, **बुद्ध-क्षपणक-पशुपत्युक्तिषु तु**—सौगतार्हत-पाशुपतागमेषु परम्, **तत्त्वाचारौ**—शास्त्रप्रमेयं अनुष्ठानं चेत्युभावपि, **श्रुत्यपेतौ**—वेदविदूरावेव, **वेदोपस्कारिविष्णुस्मृतिवत्**—वेदोपबृम्हणतया सम्प्रतिपन्नायां विष्णुस्मृताविव, **पञ्चरात्राख्य-तन्त्रे**—पञ्चरात्राख्ये वैष्णवे तन्त्रेऽपि, **तत्त्वं चरणमपि**—शास्त्रप्रमेयं अनुष्ठानं चेति द्वयमपि, **त्रय्यन्तसिद्धम्**—वेदान्तवाक्यप्रतिपन्नमेव, **समम्**—(इति) अविशिष्टम्, **गृह्यभेदादिनीत्या**—आश्वलायनापस्तम्बादिगृह्यविशेषादिगतं क्रममनुरुध्य चिन्त्यमाने, **अवितथम्**—वेदोक्तस्यैव स्वस्मिन्नप्युक्तावपि न पौनरुक्त्यदोषभाक् भवेत् ॥ ४० ॥

(216) स्मर्यन्ते पञ्चयज्ञा मुनिभिरपि नमस्कारमन्त्रेण शूद्रे
तत्राधीतं हविष्कृत्प्रभृति पदमिहाप्यंशतोऽस्याऽधिकारः ।
योज्या दक्षोक्तकालक्रमगतिरभिगत्यादिभेदे तदुक्ते
ग्राह्यं पश्विष्टिसोमप्रभृतिवदखिलं युक्तितः सङ्कलय्य ॥ ४१ ॥

शूद्रे—चतुर्थवर्णीये अधिकारिणि, **पञ्चयज्ञाः**—देवयज्ञ-पितृयज्ञ-मनुष्ययज्ञ-भूतयज्ञ-ब्रह्मयज्ञाख्याः महायज्ञाः पञ्च, **नमस्कारमन्त्रेण**—'नम' इत्यनेन मन्त्रेणैव, (कार्या इति) **मुनिभिरपि**—स्मृतिकारैः ऋषिभिरपि, **स्मर्यन्ते**—'नमस्कारेण मन्त्रेण पञ्चयज्ञान् समापयेत्' इति स्मृतितो ज्ञाप्यन्ते, **तत्र**—शूद्रविषये, **हविष्कृत्प्रभृति पदम्**—यज्ञीयहविषः कर्तृत्वनिमित्तकं प्रैषोच्चारणकालिकवाक्ये प्रयोगार्हं 'हविष्कृत्' पदम्, (तथा) अग्न्याहरणयोग्यागारविधानवेलायां नानायागकर्तृत्वनिमित्तकं 'बहुयाजि' पदं च, **अधीतम्**—'हविष्कृदाधानेति शूद्रस्य' इति, 'बहुयाजिनोऽगाराच्छूद्रवर्जम्' इति च कल्पसूत्रादौ पठितम्, (अतः) **इहापि**—वैदिके कर्मण्यपि, **अस्य**—शूद्रवर्णीयस्य, **अंशतः**—स्ववर्णोचिते एव क्वचित् कर्मविशेषे, **अधिकारः**—आचरणार्हता, (अस्त्येव ; न सर्वत्र, तथा पञ्चरात्रोदिते कर्मण्यपि त्रैवर्णिकेतरस्य आंशिकोऽधिकारो वर्तत एव) **तदुक्ते**—पाञ्चरात्रोदिते, **अभिगत्यादिभेदे**—अभिगमनोपादानेज्यास्वाध्याययोगाख्यपाञ्चकालिक-क्रियाकलापविशेषे, **दक्षोक्तकालक्रमगतिः**—दक्षस्मृत्युक्ताष्टकालिकक्रमिककर्मानुष्ठानपद्धतिः, **योज्या**—मिथोऽनुपमर्देन अनुष्ठेयतया व्यवस्थापनार्हा भवति, **अखिलम्**—श्रौतं, स्मार्तं, तान्त्रिकं च सर्वं कर्म, **पश्विष्टिसोमप्रभृतिवत्**—वैदिकान्तःपातीन्येव यथा पशु-इष्टि-सोमसंज्ञकानि भिन्न-भिन्नानि कर्माणि, कालविशेषे (देशविशेषे) अधिकारिणैकेनैव परस्पराविरोधेनानुष्ठेयानि भवन्ति, तथा, **युक्तितः**—उपायतः, **सङ्कलय्य ग्राह्यम्**—सम्यग्योजयित्वा ज्ञातव्यं भवति ॥ ४१ ॥

(217) जातावाचार्यशब्दः क्वचिदिति न तथाऽऽचार्यदेवो भवेत्या-
घाम्नाते तत्प्रतीतिः स्मृतिषु नियमिताल्लक्षणात् तत्प्रवृत्तेः ।
तद्वत् स्यात् सात्त्वतादावगतिकविषये रूढिभङ्गो न दोषो
विप्रादेरत्र शास्त्रे स्थितिरपि बहुधा भारतादौ प्रसिद्धा ॥ ४२ ॥

आचार्यशब्दः—'आचार्यः' इत्ययं शब्दः, **क्वचित्**—लौकिकानां व्यवहारविशेषे, **जाताविति**—तक्षादिजातीये जने प्रयुज्यत इत्येतावता, **आचार्यदेवो भवेत्याम्नाते**—'आचार्यदेवो भव' इत्यादि वैदिकप्रयोगगोचरे आचार्यशब्देऽपि, **तथा**—लौकिकप्रयोगे इव-**न तत्प्रतीतिः**—न जातिविशेषवतो जनस्य बोधो भवति, **स्मृतिषु नियमितात् लक्षणात्**—'उपनीय तु यश्शिष्यं....तमाचार्यं प्रचक्षते' इत्यादिस्मृतिषु निश्चितं लक्षणमवलम्ब्य, **तत्प्रवृत्तेः**—आचार्यशब्दस्य स्वार्थबोधने व्यापृतेः, **तद्वत्**—तां रीतिमनुरुध्यैव, **अगतिकविषये**—समुदायशक्तिबोध्यार्थबोधनार्हताशून्ये, **सात्त्वतादौ**—सात्त्वतभागवतादिरूपे एतत्तन्त्रप्रयोगगोचरे शब्दे, **रूढिभङ्गः न दोषः**—समुदायशक्तिपरित्यागः व्युत्पत्तिभङ्गकृतो दोषो न भवति, **अत्र शास्त्रे**—पाञ्चरात्रतन्त्रेऽपि, **विप्रादेः स्थितिरपि**—ब्राह्मणादेर्वर्णस्यावस्थितिरपि, (मर्यादाऽपि), **भारतादौ**—प्रमाणमूर्धन्यतया प्रसिद्धे महाभारतादौ (पाञ्चरात्रप्रस्तावे) **बहुधा प्रसिद्धा**—बहुवारं प्रथिता वर्तते ॥ ४२ ॥

—o—

अधिकरणार्थसङ्ग्रहः (उत्पत्त्य-अधि)

उत्पत्त्यसम्भवाधिकरणे—'वासुदेवात् सङ्कर्षणो नाम जीवो जायते' इत्यादिषु, वेदविरुद्धस्य जीवोत्पत्त्यादेः प्रतिपादनात्, 'पञ्चरात्रतन्त्रं अप्रमाणम्' इत्याशङ्क्य,

जीवादिशब्दानां जीवाद्यभिमानिपरब्रह्मव्यूहपरत्वेन जीवोत्पत्तिप्रतिपादनपरत्वाभावात्, परमाप्तनारायणप्रणीतत्वात् पञ्चरात्रशास्त्रमपि प्रमाणम्—इत्युक्तम् ॥

—o—

नयसङ्गतिमालिका (उत्पत्त्य–अधि)

पाञ्चरात्रे तन्त्रसाम्यात् प्रामाण्यं चेदपोद्यते ।
उत्पत्त्यसम्भवनयः प्रामाण्यं प्रत्यतिष्ठिपत् ॥ ९१ ॥

इति उत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥

—o—

पादोपसंहारः (२–२)

शारीरकन्यायकलापसङ्ग्रहः

(82) स्मृतिन्यायाविरोधं च परपक्षपराहतिम् ।
विधाय परतो द्वाभ्यां कार्यभावो 'विचिन्त्यते'[1] ।। २४ ।।

स्मृतिन्यायाविरोधम्—वेदान्तप्रतिपाद्यस्य ब्रह्मकारणत्वस्य कापिलादिस्मृतिभिः वैशेषिकादिन्यायैश्च अप्रतिक्षेप्यत्वम्, **परपक्षपराहतिं च**—वेदबाह्यसौगतादिपक्षाणां निरासं च, **विधाय**—आद्यपादाभ्यां संसाध्य, **परतो द्वाभ्याम्**—पश्चात्तनाभ्यां तृतीय-चतुर्थपादाभ्याम्, **कार्यभावः**—आकाश-प्राणादेः ब्रह्मकार्यत्वम्, **विचिन्त्यते**—विचार्य स्थाप्यते ।। २४ ।।

—o—

अधिकरणसारावलिः (श्लो. ४३—४४)

(218) योगाः साङ्ख्यव्युदासात् कणचरदमनादक्षपादानुयाताः
बौद्धोन्माथेन लोकायतमुषितधियो जैनभङ्गात् तदुत्थाः ।
पत्युस्तन्त्रे पशूनां प्रकटितविहतौ तादृशापष्ठुनिष्ठाः
ध्वस्तास्तत्तुल्यतर्कागमशरणतया साकमस्मिन् कुदृग्भिः ।। ४३ ।।

(अस्मिन् शारीरके) **साङ्ख्यव्युदासात्**—कापिलतन्त्रानुयायिनां निराकरणात्, **योगाः**—पातञ्जलाः (सेश्वरसाङ्ख्याः), **कणचरदमनात्**—वैशेषिकानां खण्डनात्, **अक्षपादानुयाताः** गौतमीयास्तार्किकाः, **बौद्धोन्माथेन**—शाक्यमतीयानां निरसनेन, **लोकायतमुषितधियः**—चार्वाकदर्शनादपहृतविवेकाः, **जैनभङ्गात्**—आर्हतानां खण्डनात्, **तदुत्थाः**—मिथोविरुद्धार्थसमावेशरूपभेदाभेदवादिनो भाट्टाः, **पशूनां पत्युः तन्त्रे**—पाशुपतागमे, **प्रकटितविहतौ**—वेदविरुद्धतया निर्णीते सति, **तादृशापष्ठुनिष्ठाः**—तत्सदृशशाक्तागमावलम्बिनः **तत्तुल्यतर्कागमशरणतया**—तत्तदनुकारितर्क-तत्तदनुकारितन्त्रावलम्बितया, **कुदृग्भिः साकम्**—कुदृष्टिभिः सह, (ब्रह्माज्ञानवादिभिः सह), **अस्मिन् पादे**—द्वितीयाध्यायीयद्वितीयपादे, **ध्वस्ताः**—(अनौचित्यपूर्णतायाः प्रतिपादनेन) निरवशेषिताः ।। ४३ ।।

---

[1] विधीयते—ग.

(219) पादेऽस्मिम् कापिलस्थैः कणभुगनुगतैर्वृद्धवैभाषिकाद्यै—

योगाचाराभिधानैः सुगतमतरहःशून्यवादप्रसक्तैः ।

अर्हत्सिद्धान्तभक्तैः पशुपतिसमयस्थायिभिश्चोपरोधं

क्षिप्त्वाऽथो पञ्चरात्रे श्रुतिपथमवदत् पञ्चमाम्नायदर्शी ॥ ४४ ॥

अस्मिन् पादे—द्वितीय-द्वितीये चरणे, **पञ्चमाम्नायदर्शी**—महाभारताख्यपञ्चम-वेदद्रष्टा कृष्णद्वैपायनऋषिः, **कापिलस्थैः**—निरीश्वरसाङ्ख्यावलम्बिभिः, **कणभुगनुगतैः**—कणादसमयाश्रितैः—**वृद्धवैभाषिकाद्यैः**—प्राचीनार्वाचीनाख्यैः द्विविधैः वैभाषिकबौद्धैः, **योगाचाराभिधानैः**—योगाचारनामभिः बौद्धैः, **सुगत....प्रसक्तैः**—बौद्धमतसारभूतात्यन्त-रहस्यशून्यवादाश्रयिभिः माध्यमिकबौद्धैः, **अर्हत्सिद्धान्तभक्तैः**—जिनसमयशरणैः, **पशु....स्थायिभिश्च**—पाशुपतं मार्गं आतिष्ठमानैश्च, **उपरोधम्**—सम्भाव्यमानं वेदप्रामाण्यविघट-नोद्यमम्, **क्षिप्त्वा**—रचनानुपपत्त्यादि-पशुपत्यधिकरणान्तैः सप्तभिरधिकरणैः निरस्य, **अथो**—तत्पश्चात्तने उत्पत्त्यसम्भवाधिकरणे, **पञ्चरात्रे श्रुतिपथम्**—पञ्चरात्रतन्त्रे विद्यमानं वेदमार्गानु-रोधम्, **अवदत्**—स्पष्टीचकार ॥ ४४ ॥

—o—

नयसङ्गतिमालिका

इत्थमष्टाधिकरणी पेटिकाद्वयगर्भिता ।

शारीरके तर्कपादे सन्दर्भं समुपागमत् ॥ ९२ ॥

इति पादोपसंहारः ॥

इति द्वितीयाध्याये द्वितीयः पादः ॥ २ ॥

—o—

॥ श्रीः ॥

श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ।

द्वितीयाध्यायस्य तृतीयः पादः ॥ २–३ ॥

(48) वियदधिकरणम् ॥ २–३–१ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः ॥

(83) उत्पत्तिमन्तो न यथैव जीवाः
नभश्च नोत्पत्तिमदंश [1]हानेः[1] ।
इति त्वसारं वदति श्रुतिश्चेत्
तथैव तत् स्यान्न तु तर्कभङ्गात् ॥ २५ ॥

जीवाः—प्रत्यगात्मानः, **अंशहानेः**—अवयवरहितत्वात्, **यथैव न उत्पत्तिमन्तः**—येनैव प्रकारेण जन्मवन्तो न भवन्ति, तथैव, **नभश्च**—गगनमपि, **न उत्पत्तिमत्**—कार्यत्ववन्न भवति, **इति तु**—एवमाशङ्कनं तु, **असारम्**—स्थापकयुक्तिशून्यम्, **श्रुतिः**—वैदिकी वाक्, **वदति चेत्**—उत्पत्तिराहित्यं ब्रवीति यदि, **तत् तथैव स्यात्**—तदा गगनं नित्यमेव भवेत्, **तर्कभङ्गात्**—'यन्निरवयवं तदजन्यम्' इति स्वमात्रकल्पितव्याप्तिविरोधमात्रतः, **न तु**—गगनं अजन्यं भवितुं नैवाऽर्हम्, (अतः आकाशस्य ब्रह्मकार्यता दुरपवादा) ॥ २५ ॥

—o—

अधिकरणसारावलिः (श्लो. ४५-४८)

(220) सर्वं साङ्ख्यास्तु नित्यं क्षणिकमखिलमप्यत्र वैभाषिकाद्या
नित्यानित्यं समस्तं जिनपरिपठितां सप्तभङ्गीं पठन्तः ।
नित्यानित्ये विभज्याऽप्यभिदधति विपर्यस्य वैशेषिकाद्याः
श्रुत्युत्थांस्तान् निरुन्धञ्छ्रुतिभिरथ वियत्-प्राणपादो युनक्ति ॥ ४५ ॥

अत्र—जगति, **सर्वम्**—वस्तुजातम्, **नित्यं तु**—उत्पत्तिरहितमित्येव, **साङ्ख्याः**—कापिलाः, **अभिदधति**—वदन्ति, (अभिव्यक्तिवादेन आरम्भानभ्युपगमात्) **वैभाषिकाद्याः**—

[1] भानेः—क.

वैभाषिकप्रभृतयः त्रयो बौद्धाः, **अखिलमपि**—अनवशेषेण सर्वमपि, **क्षणिकं अभिदधति**—उत्पत्तितः द्वितीयक्षणे एव विनाशि इति वदन्ति, **जिनपरिपठिताम्**—जिनमुनिप्रोक्ताम्, **सप्तभङ्गीं**—ऐकान्त्यभङ्गपरिपाटीम्, **पठन्तः**—अनुदिनमावर्तयन्तो जैनाः, **समस्तम्**—सर्वमपि, **नित्यानित्यम्**—द्रव्यतदवस्थात्मना नित्यत्ववदनित्यत्ववदपि च अभिदधति, **वैशेषिकाद्याः**—काणादाः गौतमीयाश्च, **नित्यानित्ये विभज्यापि**—वस्तुजातं नित्यत्वेन, अनित्यत्वेन च विविच्योक्त्वाऽपि, **विपर्यस्य**—(श्रुतिमतं नित्यानित्यविभागं) अन्यथाकृत्य, (नित्यं ज्ञानादिकं अनित्यमिति, संस्थानात्मकतया अनित्यं जातिरूपमर्थं नित्यमिति च) अभिदधति, **श्रुत्युत्थान् तान्**—श्रुत्यवलम्बनेनैव लब्धस्वरूपानिव स्थितानेतान् पक्षान्, **श्रुतिभिरथ निरुन्धन्**—सम्यक् चिन्तितैः श्रुतिभिरेव निवारयितुकामो बादरायणः, **वियत्-प्राणपादौ**—वियत्पादनामानं तृतीयं पादं प्राणपादनामानं तुरीयं पादं च, **युनक्ति**—अस्मिन् अध्याये योजयति ॥ ४५ ॥

(221) पूर्वत्राधिक्रियायां पुरुषजनिवचो नित्यतोक्त्या [1]निरूढं-[1]

व्योमोत्पत्तौ तथैव स्थितिरिति वचसोर्व्याहतौ वक्ति कश्चित् ।

सिद्धान्ती व्योमसृष्टिर्निगमशतमिता नाऽन्यथासिद्धिरस्यां

वायु-व्योमामृतोक्तिर्जनिविधिविहतेत्युक्तिवैषम्यमाह ॥ ४६ ॥

पूर्वत्र अधिक्रियायाम्—पूर्वस्मिन् उत्पत्त्यसम्भवाधिकरणे, **पुरुषजनिवचः**—'जीवो जायते' इति जीवोत्पत्तिबोधकमिव भासमानं पाञ्चरात्रवाक्यम्, **नित्यतोक्त्या**—पाञ्चरात्रस्थ-जीवनित्यत्वबोधकस्य 'सह्यनादिः' इति वाक्यस्य प्रदर्शनेन, **निरूढं**—युक्तार्थविवरणपूर्वकं कृतनिर्वाहमभवत्, **व्योमोत्पत्तौ**—आकाशस्य कार्यताया विषयेऽपि, **वचसोः**—सम्भूतत्वामृतत्व-प्रतिपादकयोर्वाक्ययोः, **व्याहतौ**—मिथो विरोधभाने सति, **तथैव स्थितिरिति**—अमृतत्ववचसा सम्भूतवचसः औपचारिकत्वेन निर्वहणमेव वास्तविकी स्थितिरिति, **कश्चित्**—श्रुत्यर्थपर्यालोचने अनिपुणः पूर्वपक्षी, **वक्ति**—ब्रवीति; **सिद्धान्ती**—वेदान्ततात्पर्यचिन्तनकुशलस्तु, **व्योमसृष्टिः**—आकाशोत्पत्तिः, **निगमशतमिता**—बहुश्रुतिप्रतिपन्ना, **अस्याम्**—उत्पत्तिवादिन्यां श्रुतौ, **न अन्यथासिद्धिः**—निर्वाहान्तरेण चरितार्थता नैव भवितुमर्हा, **वायुव्योमामृतोक्तिः**—'वायुश्चान्तरिक्षं चैतदमृतम्' इति श्रुत्युक्तिः, **जनिविधिविहतेति**—उत्पत्तिविधायकवाक्येन बाधितेति, **उक्तिवैषम्यमाह**—जीवोत्पत्ति-व्योमोत्पत्तिवचसोः असमानरूपतां वदति ॥ ४६ ॥

---

[1] **निरुद्ध—सा.र.**

(222) तेजः प्राथम्यदृष्टेरमृतवचनतोऽनंशकद्रव्यभावाद्
व्योमन्युत्पत्तिवाक् स्यादुपहितविषयैवात्मनीवेति चेन्न ।
प्राथम्यस्याश्रुतत्वात् प्रथमपठनतः कल्पनेऽन्येन बाधात्
[1]किञ्चा[1]मर्त्योक्तितुल्यं त्वमृतपदमिहाऽनेकवाक्यैककण्ठ्यात् ॥४७॥

व्योमनि—आकाशविषये, **उत्पत्तिवाक्**—सम्भूतत्वश्रुतिः, **आत्मनि इव**—'कुम्भकारो जायते' इत्यादिरूपा आत्मविषयकोत्पत्तिबोधिका लौकिकोक्तिरिव, **उपहितविषयैव**—घट-पटाद्युपाधिसम्बद्धाकाशगोचरैव, न तु शुद्धकाशगोचरा, (कुत इति चेत्! हेतुत्रयमत्र) **तेजः प्राथम्यदृष्टेः**—सृष्टौ तेजस आद्यतायाः 'तत्तेजोऽसृजत' इति श्रुतावुपलब्धेः ; **अमृतवचनतः**—'अन्तरिक्षं चैतदमृतम्' इति आकाशे अमृतत्वकण्ठोक्तेः ; **अनंशकद्रव्यभावात्**—व्योम्नः निरवयवद्रव्यत्वात् , (इति) **इति चेत् न**—एवं शङ्कनं न युक्तम् , **प्राथम्यस्य**—तेजः सृष्टेः आद्यतायाः, **अश्रुतत्वात्**—श्रुतिसिद्धत्वाभावात् , **प्रथमपठनतः**—सृष्टिप्रस्तावस्यादौ तेजःसृष्टिकथनमात्रतः, **कल्पने**—अनुमाने क्रियमाणे, **अन्येन बाधात्**—सम्भूतत्वप्रत्यक्षवचनेन अनुमानस्य बाधापत्तेः, **किं च**—निपुणं चिन्तने, **इह अमृतपदम्**—आकाशविषये अमृतत्ववचनम् , **अमर्त्योक्तितुल्यं तु**—देवेषु चिरस्थायित्वतः अमर्त्यशब्दप्रयोगसदृशमेव, **अनेकवाक्यैककण्ठ्यात्**—उत्पत्तिबोधकबहुवाक्यसंवादात् ज्ञापकात् ॥ ४७ ॥

(223) [2]यौक्तः[2] सत्कार्यवादः श्रुतिभिरनुमतो नावयव्यस्ति सृज्य-
स्तत्तद्रव्येषु नामान्तरभजनसहावस्थया सृष्टिवादः ।
इष्टाः शब्दाद्यवस्थास्तव निरवयवद्रव्यवर्गेऽपि तस्माद्-
व्योमव्युत्पत्तिरुक्ता श्रुतिषु तदितरोत्पत्तितुल्या न बाध्या ॥ ४८ ॥

सत्कार्यवादः—'पूर्वं सदेव कार्यं जायते' इत्ययं वादः, **यौक्तः**—युक्तिसिद्धः, (पूर्वं इदानीमपि मृत्त्वानपायात्) **श्रुतिभिरनुमतः**—'सदेव सोम्ये'त्यादिश्रुतिवाक्यैरपि अनुज्ञातः, **सृज्यः**—सर्वथा प्रागसन्नेव उत्पादनीयः, **अवयवी**—अवयवित्वेन तार्किकैरभ्युपगतः नूतनोऽर्थः **न अस्ति**—नैव प्रमाणगोचरः, **सृष्टिवादः**—उत्पत्तिगोचरो लौकिकः शास्त्रीयो वा व्यवहारः, **तत्तद्रव्येषु**—मृत्-तन्त्वादिषु तेषु तेषु द्रव्येषु, **नामा....वस्थया**—अभिधायकशब्दविशेषप्राप्तिक्षमागन्तुकधर्मसम्बन्धमात्रायत्तः, **तव**—वैशेषिकस्य भवतः, **निर....वर्गेऽपि**—कालात्माकाशादिनिरंशत्वेनाभिमतद्रव्यजातेऽपि, **शब्दाद्यवस्थाः**—आकाशे शब्दः, आत्मनि ज्ञानम् ,

---

[1] देवा—सा.र.   [2] युक्तः—सा.र.

काल-परमाण्वादौ संयोगादिश्चेत्याद्याः आगन्तुका धर्माः, **इष्टाः**—संमता एव, **तस्मात्**—अवस्था-विशेषप्राप्तेरेव उत्पत्तिपदाभिधेयत्वात्, **व्योमनि**—आकाशविषये, **श्रुतिषु उक्ता**—वेदेषु कथिता, **उत्पत्तिः**—कार्यता, **तदितरोत्पत्तितुल्या**—तत्सहचरितवाय्वग्न्याद्युत्पत्तिसमेति कृत्वा, **न बाध्या**—न बाधितुं योग्या ॥ ४८ ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः

एवं परपक्षाः प्रतिक्षिप्ताः, अथ स्वपक्षस्य निर्दोषत्वख्यापनाय, चिदचिदात्मकप्रपञ्चस्य कार्यताप्रकारो विशोध्यते अनन्तरपादद्वयेन ।

तत्र वियत्पादे तृतीये—

वियदधिकरणे—छान्दोग्ये अग्न्यादीनामिव उत्पत्त्यश्रवणात् वियत् नोत्पद्यते—इत्याशङ्क्य,

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यादौ आकाशस्यापि उत्पत्तिश्रवणात्, छान्दोग्येऽपि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानेन वियदादेरपि कार्यत्वावगमाच्च वियत् उत्पद्यते—इत्युक्तम् ।

—o—

(4) नयसङ्गतिमालिका (श्लो. ९३–९५)

एवं निरस्तोपरोधा ब्रह्मकारणता स्थिता ।
निराबाधा कार्यतापि वर्तते पादयोर्द्वयोः ॥ ९३ ॥
अत्र पादद्वयमपि पेटिकाद्वयलक्षणम् ।
आद्या सप्ताधिकरणी द्वितीयाष्टनयात्मिका ॥ ९४ ॥
औपचारिकमित्युक्तं प्राग्जीवोत्पत्तिभाषितम् ।
तथेति वियदुत्पत्तिवादः स्यादित्यपोद्यते ॥ ९५ ॥

इति वियदधिकरणम् ॥ १ ॥

—o—

(55) तेजोऽधिकरणम् ॥ २-३-२ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

(84) कार्याणि सर्वाणि [1]तथा श्रुतत्वात्[1]
स्थानान्तरात् कारणतो भवन्ति ।
नैवं श्रुतेरव्यवधानदृष्ट्या
तत्तच्छरीरात् परतो भवन्ति ॥ २६ ॥

कार्याणि सर्वाणि—जन्यतया लोकवेदावगतान्यखिलानि, **तथा श्रुतत्वात्**—"आकाशाद्वायुः, वायोरग्निः" इत्येवमादिश्रुतिभ्यः आकाशादितत्तद्वस्तुकारणतयैवोक्तत्वात्, **स्थानान्तरात्**—अन्नपदस्थाने पृथिवीति पदान्तरश्रवणात् (?), **कारणतो भवन्ति**—स्वस्वपूर्वकारणादेव जायन्ते ; न ब्रह्मणः ; **नैवम्**—एवं शङ्कनं नोचितम, **श्रुतेः**—'सर्वं खल्विदं ब्रह्म' इति श्रुतेः, (तथा) 'एतस्माज्जायते' इत्यादिश्रुतेश्च, **अव्यवधानदृष्ट्या**—स्वेतराव्यवहिततया ब्रह्मणः सकाशादेव सर्वकार्योत्पत्त्यवगमेन, **तत्तच्छरीरात्**—आकाशादितत्तद्भूतशरीरकात् **परतः भवन्ति**—परस्माद् ब्रह्मण एव उत्पद्यन्ते ॥ २६ ॥

—o—

(2) अधिकरणसारावलिः

(224) कूटस्थाद् ब्रह्मणः स्याज्जगदखिलमिदं पुत्रपौत्रादिनीते-
रेतस्मात्प्राण इत्याद्यपि सुगममिहेत्यादिरूहोऽत्र मोहः ।
प्राण-स्वान्तादिपाठक्रमत इतरसंक्षोभणेऽतिप्रसङ्गा-
दीक्षानुस्यूतिदृष्टेः प्रथममिव परं सौति [2]तत्तच्छरीरे[2] ॥ ४९ ॥

इदं अखिलं जगत्—नामरूपविभागयुक्तं जङ्गमस्थावरात्मकं विश्वम्, **कूटस्थात्**—स्वयमविकृतात् सर्वविधविकारोपादानभूताच्च, **ब्रह्मणः**—परस्माद्ब्रह्मणः, **पुत्रपौत्रादिनीतेः**—पितुः सकाशात् पुत्रः, तस्मात् पौत्रः, तस्मात् प्रपौत्रः इत्येवंक्रमेणैव, **स्यात्**—जायेत, (ब्रह्मणः प्रकृतिः, ततो महान् इत्येवम्) **इह**—ईदृशे पारम्परिककारणत्वे अभ्युपगम्यमाने, **एतस्मात् प्राण इत्याद्यपि**—'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च इत्येवमादिसृष्टिवर्णनमपि,

---

[1] तथाश्रितत्वात्—ख. [2] तत्तच्छरीरम्—पा. तत्तच्छरीरी—पा.

सुगमम्—अक्लेशेन योजयितुं शक्यम्, **इत्यादिः ऊहः**—एवंप्रभृतिकः बुद्ध्या तर्कः, **अत्र मोहः**—जगतो ब्रह्मकार्यत्वविषये, विपरीताध्यवसाय एव, **प्राणः... क्रमतः**—प्राण-मनःप्रभृति श्रुतिपाठमात्रमनुरुध्य, **इतरसंक्षोभणे**—सौबालश्रुत्याद्यवगतक्रमचालने, **अतिप्रसङ्गात्**—विनिगमनाभावतः सर्वश्रुति-स्मृत्यादिव्याकुलीभावापत्तेः ; (तथा करणायोगात्) **ईक्षानुस्यूतिदृष्टेः**—'तदैक्षत,तेज ऐक्षत, आप ऐक्षन्त' इति सृष्ट्यौपयिकसङ्कल्पात्मकस्येक्षणस्य अविच्छेदेनानुवृत्तिदर्शनात्, **प्रथममिव**—आद्यं प्रधानतत्त्वं परं ब्रह्मैव यथा सृजति तथा, **परम्**—अनन्तरभावि महदादिकमपि सृज्यमर्थम्, **तत्तच्छरीरि**—प्रधानादितत्तत्पूर्वपूर्वतत्त्वशरीरकं परं ब्रह्मैव, **सौति**—अव्यवधानतः स्वयमेव जनयति ; (न तु पुत्रपौत्रादिनीत्येति) ॥ ४९ ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः

तेजोऽधिकरणे—'वायोरग्निः' इत्यादिषु वाय्वादिभ्य एवाग्न्यादीनामुत्पत्तिश्रवणात् केवलवाय्वादिभ्य एवाग्न्यादीनामुत्पत्तिः—इत्याशङ्क्य,

'तेज ऐक्षत', 'आप ऐक्षन्त' इत्यादिभिः ब्रह्मासाधारणभूतेक्षणश्रवणात् तत्तच्छरीरकाद्ब्रह्मण एवाग्न्यादीनामुत्पत्तिः—इत्युक्तम् ॥

—o—

(4) नयसङ्गतिमालिका

साक्षात्तु ब्रह्मकार्यत्वं न स्यात्तेजोजलादिषु ।
इति तेजोऽधिकरणे शङ्का पुनरपोद्यते ॥ ९६ ॥

इति तेजोधिकरणम् ॥ २ ॥

—o—

(56) आत्माधिकरणम् ॥ २–३–३ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

* (85) ....

* अत्रत्यः श्लोकः मातृकास्खालित्यादत्र न मुद्रितः, अन्ते सविवरणं मुद्र्यते ।

(2) अधिकरणसारावलिः (श्लो. ६–९)

(225) द्रव्यं सर्वं हि नित्यं कथितमवयविद्रव्यभङ्गेन पूर्वं
नित्यत्वं सूत्रकारः पुनरपि पुरुषे किं विशिष्याभिधत्ते ।
सत्यं नामान्तरार्हामिह नुदति दशां चेतनस्यानुपाधेः
प्रत्यक्त्वज्ञत्वधर्मौ तदिह नियमितौ शाश्वतौ क्षेत्रिणोऽपि ॥ ५० ॥

पूर्वं—महद्दीर्घाधिकरणे, **अवयविद्रव्यभङ्गेन**—मृदाद्यवयवातिरिक्तघटाद्यवयविनिराकरण-द्वारा, **सर्वं द्रव्यम्**—चेतनाचेतनाविशेषेण द्रव्यसामान्यम्, **नित्यं कथितं हि**—उत्पत्ति-विनाशरहिततया स्थापितं खलु, (एवं स्थिते) **सूत्रकारः**—शारीरकसूत्रकृत् भगवान् बादरायणः, **पुरुषे**—जीवात्मभूते पुरुषे, **नित्यत्वम्**—जन्मादिरहितत्वरूपं नित्यत्वम्, **विशिष्य**-आत्मत्वाख्यं विशेषाकारमुपादाय, **पुनरपि**—भूयोऽपि, **किं अभिधत्ते**—कस्मै फलाय अस्मिन्नधिकरणे ब्रवीति ? (पुनरुक्तं विफलं चेत्यर्थः) (इति शङ्कने) **सत्यम्**—स्वाभाविकमेवैतत् ; परम्, **इह**—अस्मिन्नधिकरणे, **अनुपाधेः चेतनस्य**—करण-कलेबराद्युपाध्यसंस्पृष्टस्य केवलज्ञाना-कारस्यात्मनः, **नामान्तरार्हां दशाम्**—संज्ञान्तरप्राप्त्यौपयिकीमवस्थामन्याम्, **नुदति**—निरस्यति, **तत्**—उक्ताचेतनाचेतनवैषम्यात्, **क्षेत्रिणोऽपि**—प्राप्तदेहस्यापि जीवस्य, **प्रत्यक्त्व-ज्ञत्वधर्मौ**—स्वस्मै भासमानत्वं, ज्ञानाश्रयत्वं चेतीमौ धर्मौ, **शाश्वतौ**—यावदात्मभाविनाविति, **इह**—अत्राधिकरणे, **नियमितौ**—ध्रुवं समर्थितप्रायौ । (अतो न पौनरुक्त्यवैफल्ये) ॥ ५० ॥

(226) सच्छब्दार्थातिरिक्तं जनिमदखिलमित्यैतदात्म्यादिसिद्धं
प्रोक्ता सृष्टिश्च जीवे निरवयवनयस्त्वम्बरादौ निरस्तः ।
जीवोत्पत्तिस्ततः स्यादिति न सदकृताभ्यागमादिप्रसङ्गा-
न्नित्यत्वाजत्वकण्ठोक्तिभिरपि जननं त्वस्य देहादियोगः ॥ ५१ ॥

सच्छब्दातिरिक्तं अखिलम्—सत्पदबोध्यब्रह्मेतरद्वस्तुजातम्, **जनिमदिति**—उत्पत्ति-भागिति, **ऐतदात्म्यादिसिद्धम्**—'ऐतदात्म्यमिदं सर्वम्,' 'सन्मूलाः सर्वाः प्रजाः' इत्यादि-श्रुतिभिर्ज्ञातम्, **जीवे सृष्टिश्च प्रोक्ता**—जीवात्मन्यपि उत्पत्तिभाक्त्वं 'तोयेन जीवान् व्यससर्ज' इति श्रुतितः कण्ठोक्तैव, **निरवयवनयस्तु**—'यन्निरवयवं तदजन्यम्' इति तर्कस्तु, **अम्बरादौ**—आकाशादिविषये, **निरस्तः**—दृष्टव्यभिचारतया असाधकत्वेनोक्तः, **ततः**—उक्ताद्धेतुजातात्, **जीवोत्पत्तिः स्यादिति**—जीवेष्वपि नामान्तरार्हावस्थायोगात्मिका जनिः, अप्रतिहतैवेत्येतत्, **न सत्**—न साधु, **अकृता....सङ्गात्**—विहित-निषिद्धाख्यकर्माचरणं विनापि सुखदुःखादि-

प्राप्तिप्रसक्तेः, **नित्यत्वाजत्वकण्ठोक्तिभिरपि**—'अजो नित्यः शाश्वतः' इत्यादिस्पष्टोक्तिभिरपि ज्ञापकैः, **अस्य जननम् तु**—आत्मनः उत्पत्तिस्तु, **देहादियोगः तु**—करणकलेबरसम्बन्ध एव ; न तु घटादिवत् स्वरूपान्यथाभावः ।। ५१ ।।

(227) देहात्मत्वे जनिः स्यात् तदिह न घटते जातमात्रस्य रागात्
ज्ञाने किण्वादि-मेघोपल-शबलपटप्रक्रियाऽ[1]त्यन्त[1]दुःस्था ।
देहे गेहादितुल्या ममकृतिरनघा दोषतस्त्वैक्यमोहः
क्षिप्तं चैक्यानुमानं बलवदनुमितेः शास्त्रतस्तर्कतश्च ।। ५२ ।।

देहात्मत्वे—आत्मत्वस्य देहनिष्ठत्वे, **जनिः स्यात्**—आत्मन उत्पत्तिर्युक्ता भवेत्, **तत् इह न घटते**—आत्मत्वं देहे न युज्यते, **जातमात्रस्य**—उत्पन्नमात्रस्यैव शरीरिणः, **रागात्**—(स्तन्यपानादौ) इच्छापूर्वकप्रवृत्तेर्दर्शनात्, (तस्य च पूर्वपूर्वसंस्कारपरम्परायत्तत्वात्, **ज्ञाने**—चैतन्ये जननीये, **किण्वादि....प्रक्रिया**—सुरादौ मदशक्तावुत्पाद्यायां किण्वादिद्रव्य-संहतेरिव, करकोपले उत्पाद्ये परिमाणविशेषापन्नतेजोजलसङ्घातस्येव, चित्रपटे उत्पाद्ये नानावर्ण-तन्तुसङ्घातस्येव च सामग्रीविशेषमेलनमात्रस्य हेतुता, **अत्यन्तदुःस्था**—सर्वथा दोषयुक्ता, **देहे ममकृतिः**—शरीरविषयकममत्वबुद्धिः, ('ममेदं शरीरम्' इति) **गेहादितुल्या**—'ममेदं गृहम्' इत्यादिरूपा गृहे ममत्वधीसदृश्येव अनुभूयमाना, **अनघा**—निर्बाधा जागर्ति, **ऐक्यमोहस्तु**—'स्थूलोऽहम्' 'शुक्लोऽहम्' इति अहमर्थ-शरीरयोरभेदावगाही विपर्ययस्तु, **दोषतः**—अनादि-पापवासनारूपदोषकृतः, **ऐक्यानुमानम्**—'देह एव आत्मा, अहम्बुद्धिगोचरत्वात्' इति आत्मनि देहाभेदाभिमानं तु, **बलवदनुमितेः**—देहातिरिक्तत्वानुमानस्य 'ममाऽयं देहः' इति प्रत्यक्षोपष्टम्भनेन बलवत्वात्, **शास्त्रतः**—आत्मनि देहभेदज्ञापकात् ('द्वा सुपर्णा....समानं वृक्षं परिषस्वजाते') इत्यादिशास्त्रात्, **तर्कतश्च**—'वीतरागजन्मादर्शनात्' इत्यादिसूत्रज्ञापितात् तर्कादपि, **क्षिप्तम्**—निरस्तम्, प्रतिहतम् ॥ ५२ ॥

(228) देहं देहातिरेके तदवधिनियतप्राणबुद्ध्यक्षरूपं
धीसन्तानं च नित्यं प्रलयविलयिनं स्थास्नुमप्यापवर्गात् ।
डिण्डीराभं सदब्भावविततथविकृतौ जीवमिच्छन्त इत्थं
निर्धूता दूरमत्र श्रुतिभिरितरवद्बाधदोषोज्झिताभिः ॥ ५३ ॥

---

[1] प्यत्र—सा.र.

(1) **देहम्**—नश्वरत्वे सन्देहानास्पदस्वरूपं शरीरमेव, **जीवमिच्छन्तः**—जीवात्मानमभ्युपगच्छन्तः, (2) **देहातिरेके**—आत्मनो देहापेक्षया भेदे सत्यपि, **तदवधि....रूपम्**—देहसत्तानियतसत्तावत्प्राण-बुद्धीन्द्रियस्वरूपं जीवमभ्युपयन्तः, (3) **नित्यं धीसन्तानं च**—निरुपप्लवं चित्सन्तानं जीवमङ्गीकुर्वन्तः, (4) **प्रलयविलयिनम्**—प्रलयपर्यन्तमवस्थाय प्रलये विच्छेदभागिचित्सन्तानरूपं जीवं स्वीकुर्वन्तः, (5) **आपवर्गात् स्थास्नुमपि**—मोक्षपर्यन्तं अनादितया अवस्थाय, मोक्षे विनश्यत्स्वरूपं जीवमङ्गीकुर्वन्तः, (तथा) (6) **अवितथविकृतौ**—अवर्जनीयकार्योपयुक्तविकाराश्रये, **सदब्धौ**—सच्छब्दाभिधेयब्रह्मसागरे, **डिण्डीराभम्**—फेनबुद्बुदादिसदृशस्वरूपं जीवं संमन्यन्तः इत्येते (चार्वाकादयो यादवप्रकाशीयपर्यन्ताः सर्वे) **इत्थम्**—श्रुत्यादिप्रतिपन्ननित्यात्मस्वरूपाङ्गीकारेण, **अत्र**—आत्माधिकरणे, **बाधदोषोज्झिताभिः श्रुतिभिः**—प्रमाणतर्कादिबाध-पुरुषदोषभूतभ्रमादिविदूराभिः वेदवाग्भिः साधकत्वेनाश्रिताभिः, **इतरवत्**—साङ्ख्यादिपक्षवदेव, **दूरं निर्धूताः**—समूलं निरस्ताः ॥ ५३ ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः

आत्माधिकरणे—'तोयेन जीवान् व्यससर्ज भूम्याम्' इत्यादिवाक्येषु जीवानामुत्पत्तिप्रतिपादनात्, 'आत्मा उत्पद्यते'—इत्याशङ्क्य,

'न जायते म्रियते वा विपश्चित्' इत्यादिषु जीवस्योत्पत्तिनिषेधात्, उत्पत्तिवादिनीनां देहसम्बन्धाभिप्रायत्वात्, 'आत्मा नोत्पद्यते'—इत्युक्तम् ॥

—o—

(4) नयसङ्गतिमालिका (आत्माधिकरणम्)

प्रागुक्तयुक्त्या जीवोऽपि कार्यः स्यादिति संशयात् ।
आत्माधिकरणं प्राप्तमपवादाख्यसङ्गतेः ॥ २७ ॥

इति आत्माधिकरणम् ॥ ३ ॥

—o—

[1] **देहे—सा.र.**

(57) ज्ञाधिकरणम् ॥ २-३-४ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः ॥

(86) विज्ञानशब्दात् स्वपनेष्वदृष्टेः
संज्ञानमागन्तुकचेतनो वा ।
नैवं श्रुतेः सङ्कुचितं सुषुप्तौ
ज्ञानाभिधा तद्गुणसारतः स्यात् ॥ २८ ॥

आत्मा—जीवः, **विज्ञानशब्दात्**—'यो विज्ञाने', 'विज्ञानं यज्ञम्' इति विज्ञानशब्दाभिहितत्वात्, **स्वपनेषु**—सुषुप्त्यवस्थासु, **अदृष्टेः**—ज्ञानरूपधर्मादर्शनादपि, **संज्ञानम्**—चिन्मात्रस्वरूप एव ; न ज्ञानधर्मकः, **वा**—अथवा, **आगन्तुकचेतनः**—सामग्र्यायत्तचैतन्यगुणकतावान् ; न स्वाभाविकचैतन्याश्रयः, (इति शङ्कने), **एवं न**—इति शङ्का नोचिता, **श्रुतेः**—'नाविज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रुतिप्रमाणात्, **सुषुप्तौ**—निद्रावस्थायाम्, **सङ्कुचितम्**—धर्मभूतं ज्ञानम् अप्राप्तप्रसरम् ; न असत्, **ज्ञानाभिधा**—आत्मनः ज्ञानवाचकशब्देनाऽभिधानम्, **तद्गुणसारतः स्यात्**—यावदात्मभाविज्ञानाख्यगुणाश्रयत्वतः प्राप्तमस्ति ॥ २८ ॥

—o—

(2) अधिकरणसारावलिः (श्लो ५४-५७)

(229) केश्चिज्ज्ञानत्वमात्रं कथितमुपधिजा ज्ञातृतैवाऽऽत्मनोऽन्यै-
स्तत्र श्रुत्यादिबाधं प्रथयति विविधं 'ज्ञोऽत' इत्यादिसूत्रैः ।
पूर्वन्यायादमुष्मिञ्जनिलयरहिते नित्यबोधेऽत्र चोक्ते
सङ्कोचाद्यर्हबुद्धेर्विकृतिवचनमप्यस्य सद्वारकं स्यात् ॥ ५४ ॥

आत्मनः ज्ञानत्वमात्रम्—जीवात्मनः चिन्मात्रस्वरूपता, (न तु ज्ञातृत्वम्) (इति) **कैश्चित् कथितम्**—दार्शनिकविशेषैः अद्वैतिभिः प्रतिपादितम्, **अन्यैः**—अपरैर्दार्शनिकैर्वैशेषिकाख्यैः, **उपधिजा ज्ञातृतैव**—देहेन्द्रियाद्युपाध्यायत्ता ज्ञानाश्रयतैवोक्ता, (न ज्ञानरूपता) **तत्र**—तयोरुभयोरपि पक्षयोः, **श्रुत्यादिबाधम्**—श्रुतिस्मृत्यनुभवविरोधम्, **'ज्ञोऽत' इत्यादिसूत्रैः**—'ज्ञोऽत एव' इत्येवमादिभिः शारीरकसूत्रैः, **विविधं प्रथयति**—नानाप्रकारेण स्पष्टीकरोति

बादरायण:, **पूर्वन्यायात्**—पूर्वस्मादात्माधिकरणात्, **अमुष्मिन्**—जीवात्मनि, **जनिलयरहिते**—उत्पत्ति-विनाशाभाववत्तया प्रतिपादिते, **अत्र च**—अस्मिन् ज्ञाधिकरणे च, **नित्यबोधे उक्ते**—स्वाभाविकज्ञातृत्ववत्तया निर्णीते सति, **अस्य**—जीवात्मनः, **विकृतिवचनमपि**—कार्यत्ववर्णनमपि, **सङ्कोचाद्यर्हबुद्धेः**—सङ्कोच-विकासार्हबुद्धित्वाद्धेतोः, **सद्वारकं स्यात्**—स्वधर्मभूतज्ञानद्वारा प्रवृत्तं भवेत्; न तु वियदादिवत् स्वरूपान्यथाभावकृतम् ॥ ५४ ॥

(230) ज्ञातृत्वं ज्ञानता च श्रुतिभिरभिदधे नाऽत्र पक्षे पतामः
सर्वत्रात्मा न भायात् किमिति न निगमैर्देहिनोऽणुत्वसिद्धेः ।
स्वाभासैकस्वमूर्तेरविशदमहमः सर्वदा भानमिष्टं
धीसङ्कोचात् सुषुप्तिप्रभृतिषु विशदोल्लेखमात्रोपरोधः ॥ ५५ ॥

श्रुतिभिः—'जानात्येवायं पुरुषः', 'विज्ञानं यज्ञं तनुते' इत्येमादिभिर्वैदिकीभिर्वाग्भिः, **ज्ञातृत्वं ज्ञानता च**—ज्ञानधर्मकत्वं ज्ञानस्वरूपत्वं चेत्युभयम्. **अभिदधे**—शब्दत एव प्रतिपादितम्, **अत्र**—श्रुतिप्रतिपन्नेऽर्थे, **न पक्षे पतामः**—एकमात्राभ्युपगमरूपं पक्षपातं नैव कुर्मो वयम्; उभयमप्यविशेषेण स्वीकुर्मः, **आत्मा**—जीवः. **सर्वत्र**—देहे इव कुड्यादावपि, **किं न भायात्**—कुतो वा न भासेत? (ज्ञानस्वरूपतया स्वयंप्रकाशत्वात् सर्वत्र प्रकाशमानत्वापत्तेः **इति न**—एवमापादनं नैव साधु, **निगमैः**—'एषोऽणुरात्मा, "बालाग्रशत...." इत्यादिश्रुतिभिः, **देहिनः**—देहाधिष्ठातुरात्मनः, **अणुत्वसिद्धेः**—अणुप्रमाणतायाः प्रतीतेः, (अतः परिमितस्वरूपतया सर्वत्र भानाभावः) **स्वाभासैकस्वमूर्तेः**—स्वप्रकाशैकस्वरूपस्य, **अहमः**—अहमर्थस्यात्मनः, **अविशदम्**—देहादिगतधर्माविषयीकारेण, **सर्वदा भानम्**—सार्वकालिकं स्फुरणम्, (प्रत्यक्त्वम्) **इष्टम्**—वेदान्तिभिरभ्युपगतम्, **सुषुप्तिप्रभृतिषु**—स्वापमदमूर्च्छात्मिकास्ववस्थासु, **धीसङ्कोचात्**—(निमित्तविशेषकृतात्) धर्मभूतज्ञानाप्रसरात्, **विशदोल्लेखमात्रोपरोधः**—देहादिगतधर्मसम्पृक्ततया परम्, अवभासप्रतिबन्धः ॥ ५५ ॥

(231) धर्मस्थेत्वेवकारे त्रिविधमपि भवेत् तद्व्यवच्छेदकत्वं
धर्मिण्यस्याऽन्वये स्यात् तदितरविषये तस्य धर्मस्य हानिः ।
जानात्येवेत्यबोद्धा न भवति जडता ज्ञानमात्रोक्तिवार्या
ज्ञानालोपादिवाक्यानुगुणविषयतां यात्यसावेवकारः ॥ ५६ ॥

एवकारे—अवधारणार्थके एवशब्दे, **धर्मस्थे तु**—विशेषणेनान्विते तु, **तद्व्यवच्छेदकत्वम्**—एवकारप्रयोज्यं इतरव्यावर्तकत्वम्, **त्रिविधमपि भवेत्**—अयोगस्य, अन्ययोगस्य,

अत्यन्तायोगस्य च व्यावर्तकत्वरूपं त्रिप्रकारमपि भवति यथायोग्यम्, **अस्य धर्मिणि अन्वये**—एवकारस्य विशेष्ये सङ्गतत्वे सति, **तदितरविषये**—प्रकृतेतरधर्मिविषये, **तस्य धर्मस्य हानिः स्यात्**—तद्धर्मस्याऽभावसिद्धिः भवेत्, **जानात्येवेति**—'जानात्येवायं पुरुषः' इत्ययमेवकारः, **अबोद्धा न भवति**—'आत्मा कदाऽपि ज्ञानधर्मकत्वाभाववान् न भवति' इत्यर्थकः, **जडता**—आत्मनि अचेतनता, **ज्ञानमात्रोक्तिवार्या**—'विज्ञानमयः' इति ज्ञानैकाकारत्ववचनेन व्यावर्त्या, **असौ एवकारः**—'जानात्येव' इति क्रियासङ्गतोऽप्येवकारः, **ज्ञानालोपादि....यताम्**—'न हि विज्ञातुर्विज्ञातेर्विपरिलोपः' इत्येतद्वाक्यानुरोध्यभिधेयकताम्, (विषयः-अभिनेयः) **याति**—प्राप्नोति ॥ ५६ ॥

(232) उत्क्रान्तिस्पन्दनाणूपमितिवचनतोऽणीयसः शक्तिलाभे
धीभूम्ना यौगपद्यं त्ववयवनयतोऽनेकमूर्तिग्रहेऽपि ।
यत्राऽऽम्नातं विभुत्वं परविषयमिदं भाति तात्पर्यलिङ्गै-
र्जीवे व्यापित्ववादो मतिमहिमपरः स्वच्छताद्याशयो वा ॥ ५७ ॥

उत्क्रान्ति....वचनतः—'निष्क्रामति, सर्वे गच्छन्ति, वालाग्रशत' इति देहादुत्क्रमणस्य, गमनस्य, वालाग्रशतभागरूपसूक्ष्मार्थौपम्यस्य च श्रुतौ कथनतः, **अणीयसः**—अत्यन्तं सूक्ष्मस्य, जीवस्य, **शक्तिलाभे**—परकायप्रवेशादिसामर्थ्यप्राप्तौ सत्याम्, **अनेकमूर्तिग्रहेऽपि**—नानाशरीरस्वीकारेऽपि, **यौगपद्यम्**—एकदैव सर्वशरीरावच्छिन्नसुखदुःखादिप्रतिसन्धानम्, **अवयवनयतः**—एकस्मिन् देहे हस्तपादाद्यवयवेष्विव, **धीभूम्ना**—धर्मभूतज्ञानविकासेन (न विरुध्यते) **यत्र**—'स वा एष महानज आत्मा' इति यस्मिन् श्रुतिवाक्ये, (महत्वापरपर्यायं) **विभुत्वम्**—सर्वगतत्वम्, (अपरिच्छिन्नपरिमाणत्वम्) **आम्नातम्**—उपदिष्टम्, **इदम्**—तदेतत् श्रुतिवचनम्, **तात्पर्यलिङ्गैः**—श्रुतितात्पर्यनिर्णायकैः अर्थप्रकरणादिभिः, **परविषय भाति**—परमात्मपरमित्येव स्फुटीभवति, **जीवे व्यापित्ववादः**—'नित्यो व्यापी प्रतिक्षेत्रमात्मा' इति जीवात्मविषये व्यापकताव्यवहारः, **मतिमहिमपरः**—आत्मनो गुणभूते ज्ञाने विद्यमानस्य व्यापकत्वाख्यमहिम्नः आश्रयत्वकृतं महिमानम् आत्मनि प्रतिपादयितुं प्रवृत्तः, **स्वच्छताद्याशयो वा**—आत्मनि विद्यमानं अप्रतिघातेन सर्वाचेतनान्तःप्रवेशसामर्थ्यं स्वच्छतापरपर्यायं प्रतिपादयितुं प्रवृत्तो वा ॥ ५७ ॥

—o—

अधिकरणार्थसङ्ग्रहः

ज्ञाधिकरणे—'यो विज्ञाने तिष्ठन्' इत्यादिना ज्ञानमात्रत्वव्यपदेशात् , ज्ञानमात्रस्वरूपः आत्मा—इत्याशङ्क्य,

'विज्ञातारमरे केन विजानीयात्' ? इत्यादिषु ज्ञातृत्वप्रतिपादनात् ज्ञानस्य अपृथक्-सिद्धधर्मतया तच्छब्देन ज्ञातुः व्यपदेशोपपत्तेश्च ज्ञातैव आत्मा इति सिद्धान्तितम् ॥

—o—

नयसङ्गतिमालिका

ज्ञानरूपस्य जीवस्याऽनुत्पत्त्यैव व्यपोदिते ।
स्वभावेऽप्यन्यथाभावे स्याद् ज्ञाधिकरणोदयः ।। ९८ ।।

इति ज्ञाधिकरणम् ।। ४ ।।

—o—

(58) कर्त्रधिकरणम ।। २–३–५ ।।

(1) शारीरकन्यायकलापसङ्ग्रहः

(87) नान्यं गुणेत्यादिषु कर्तृतास्य
निषिध्यते येन ततो न कर्ता ।
इत्येतदेवं न विशङ्कनीयं
शास्त्रार्थवत्त्वादुपपत्तितश्च ॥ २९ ॥

नान्यं गुणेत्यादिषु—'नाऽन्यं गुणेभ्यः कर्तारम्' इत्येवमादिषु शास्त्रेषु, **अस्य कर्तृ**—जीवात्मनः कर्तृभावः, **येन निषिध्यते**—यतः प्रतिषिध्यते, **ततः**—तस्माद्धेतोः, **न कर्ता**—(अयं जीवः) कर्तृत्वाश्रयो न भवितुमर्हति, **इत्येतत्**—'नाऽन्यं गुणेभ्यः' इत्येवमादिकम् , **एवं न विशङ्कनीयम्**—आत्मनः कर्तृत्वनिषेधनपरमिति न शङ्कनार्हम् , **शास्त्रार्थवत्त्वात्**—जीवस्य स्वर्गापवर्गार्थविहितयागोपासनादिजन्यफलभोक्तृत्वेन शास्त्रस्य अर्थवत्त्वावश्यम्भावात् ॥ २९ ॥

(2) अधिकरणसारावलिः (श्लो. ५७—६०)

(233) ज्ञातृत्वं पुंस इत्थं भवतु तदपि नामुष्य कर्तृत्वसिद्धिः
श्रुत्याद्यैस्तन्निषेधाद् विकृतिविरहतश्चेत्यसद् दृष्टबाधात् ।
कर्तृत्वापह्नवोक्तेरविकृतिवचसोऽप्यान्यपर्यं हि ! गीतं
कर्ता शास्त्रार्थवत्वात् तदयमिह न च स्यादबोद्धुर्नियोगः ॥ ५८ ॥

पुंसः ज्ञातृत्वम्—जीवस्य ज्ञानाश्रयत्वम्, **इत्थं भवतु**—ज्ञाऽधिकरणोक्तरीत्या सिध्यतु नाम, **तदपि**—तथापि, **अमुष्य कर्तृत्वसिद्धिः न**—जीवात्मनः कर्तृत्वलाभः प्रमाणतो नैव वक्तुं शक्यः, **श्रुत्याद्यैः तन्निषेधात्**—प्रमाणतया सम्प्रतिपन्नैः श्रुति-स्मृतिप्रभृतिभिः 'नायं हन्ति', 'विमूढात्मा कर्ताऽहमिति मन्यते' इति तस्मिन् कर्तृत्वाभावज्ञापनात्, **विकृतिविरहतश्च**—निर्विकारत्वादपि जीवस्य, (कर्तृताया अपि विकारान्तःपातित्वात्) **इत्यसत्**—एवं शङ्कनं असाधु, **दृष्टबाधात्**—प्रत्यक्षतः कर्तृत्वग्राहकात् तदभावग्रहस्य बाधितत्वात्, **हि**—यतः, **कर्तृत्वापह्नवोक्तेः**—कर्तृत्वनिषेधकवाक्यस्य, (तथा) **अविकृतिवचसोऽपि**—निर्विकारत्वप्रतिपादकवाक्यस्यापि च, **आन्यपर्यम्**—कर्तृत्वस्य प्रकृतिसंसर्गायत्तत्वे तात्पर्यम्, **गीतम्**—'कर्तारमात्मानं केवलं तु यः' इति गीतावचनतोऽवगतम्, **तत् अयं इह कर्ता**—तस्मात् अयं जीवः कर्मणि कर्तृत्वधर्माश्रय एव, **शास्त्रार्थवत्वात्**—विधिनिषेधपराणां शास्त्राणां साफल्यस्य अवश्यंभावात्, शास्त्रफलभागित्वस्य जीवे वर्णनीयत्वाच्च, **अबोद्धुः**—ज्ञातृत्वानाश्रयस्य प्रधानादेः, **नियोगो न च स्यात्**—नियोजकं शास्त्रम्, शास्त्रतः सिद्धं शासनं वा नैव स्वरूपं साफल्यं वा लभते ॥ ५८ ॥

(234) किञ्च स्वोक्त्यादिभग्नो निगदितुरहमः कर्तृताया निषेधो
यद्यन्यस्याऽहमर्थात् तदिदमुपनिषद्वेदिनः सिद्धसाध्यम् ।
भोक्तृत्वस्याप्यभावे प्रसजति वितथं बन्धमोक्षादिशास्त्र
प्राणादानाद्विहारात् प्रकृतिसमधिकोऽस्मीति योगाच्च कर्ता ॥ ५९ ॥

किञ्च—अपि च, **अहमः कर्तृताया निषेधः**—जीवात्मनः कर्तृत्वासम्भववादः, **निगदितुः**—तथा वक्तुः, **स्वोक्त्यादिभग्नः**—स्ववचन-स्वानुमानाभ्यां स्वकर्तृकाभ्यां व्याहतः, **अहमर्थादन्यस्य निषेधो यदि**—अहमर्थभूतजीवात्मेतरविषयोऽयं कर्तृत्वनिषेध इति यद्युच्येत तर्हि, **तदिदम्**—अहमर्थातिरिक्तस्य कर्तृत्वाभाववचनम्, **उपनिषद्वेदिनः**—वेदान्तवेदिनः, **सिद्धसाध्यम्**—निश्चितार्थसाध्यकं सत् निष्फलमेव, **भोक्तृत्वस्याप्य-**

भावे—(व्यापकभूतस्य कर्तृत्वस्याभावेन, तद्व्याप्यस्य) भोक्तृत्वस्यापि निषेधपर्यवसाने सति, **बन्धमोक्षादिशास्त्रम्**—संसार-तन्निवृत्ति-तदुपायप्रभृत्यर्थावेदकं हितानुशासनं सर्वम्, **वितथं प्रसजति**—व्यर्थमापतति, (सर्वस्याऽपि तस्य भोक्तृत्वायत्तत्वात्), **प्राणादानात्**—स्वभोगार्थं इन्द्रियाणां प्रेरणात्, **विहारात्**—तदर्थमेव शरीरप्रेरणाच्च श्रुत्युक्तात्, **प्रकृतिसमधिकोऽस्मीति योगाच्च**—मोक्षसाधनत्वेनाभिमतस्य 'प्रकृतेरन्योऽहमस्मि' इत्येवंरूपस्य समाधेः आश्रयत्वाय च, **कर्ता**—(जीवात्मैव) कर्तृत्ववान् न बुद्ध्यादिः ॥ ५९ ॥

(235) व्यापार-ज्ञान-वाञ्छा-प्रशकन-यतनायोगयुक्तिस्तु मन्दा
कार्ये सामग्र्यपेक्षे विधि-तदितरयोर्लोकसिद्धा प्रवृत्तिः ।
सार्थं शास्त्रं हितोक्त्या नियतिनियमिता शास्त्रयोग्या दशा सा
ज्ञाता कर्ता च भोक्ता तदयमिह पुमान् भाति सर्वैः प्रमाणैः ॥ ६० ॥

व्यापार....युक्तिस्तु—उपादानादिसूत्रोक्तव्यापार-तदौपायिकज्ञातृत्व-तज्जन्येच्छा-तत्साध्यकार्यनिर्वहणसामर्थ्य-तत्प्रयोजकप्रयत्नानां जीवात्मन्यसम्भवन्त्वोपपादनार्थं दर्शिता युक्तिः परम्, **मन्दा**—युक्त्याभासरूपैव, (विभुत्व-निर्विकारत्वयोः अभिमतासाधकत्वात्) **विधि-तदितरयोः**—'इदं कुरु' इति विधेः, 'इदं मा कुरु' इति निषेधस्य च, **सामग्र्यपेक्षे कार्ये**—कारणसमवधानावलम्बिनि प्रवृत्तिनिवृत्तिरूपे विषये, (तादृशं साध्यमुद्दिश्य) **प्रवृत्तिः**—तत्त-द्देहेष्वविकारिषु व्यापृतिः, **लोकसिद्धा**—सार्वजनीना दृश्यते, **शास्त्रम्**—लौकिकं वैदिकं वा शासनम्, **हितोक्त्या**—पुरुषार्थसाधनावगमनेन, **सार्थम्**—सफलं भवति, **शास्त्रयोग्या सा दशा**—शास्त्रबोधितहितानुष्ठानार्हा विलक्षणा अवस्था च, **नियतिनियमिता**—दैवकृतवर्णाश्रमादि-नियमविशेषावलम्बनाधीना, **तत्**—उक्तादेतस्माद्धेतुजातात्, **अयं पुमान्**—देहेन्द्रियाद्यधिष्ठाता चेतनः, **इह**—अस्मिन् शास्त्रे, **सर्वैः प्रमाणैः**—तत्त्वनिर्णायकैः प्रत्यक्षादिभिः साधनैः, **ज्ञाता कर्ता भोक्ता च भाति**—ज्ञातृत्व-कर्तृत्व-भोक्तृत्वानामाश्रयः सन् प्रतिपन्नो भवति ॥ ६० ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः

कर्त्रधिकरणे—'प्रकृतेः क्रियमाणानि' इत्यादिषु गुणानामेव कर्तृत्वप्रतिपादनात्, आत्मा न कर्ता—इत्याशङ्क्य,

'स्वर्गकामो यजेत' इत्यादीनां, भोक्तारमेव कर्मसु नियुञ्जानानां शास्त्राणाम्, अर्थवत्त्वात्,

'प्रकृतेः क्रियमाणानि' इत्यादीनां, जीवस्य सांसारिककर्तृत्वस्य गुणसंसर्गायत्तत्वप्रतिपादनपरत्वाच्च 'आत्मा कर्ता' इत्युक्तम् ॥

—o—

(4) नयसङ्गतिमालिका

ज्ञानैकगुणसारस्य निर्विकारस्य चात्मनः ।
अपोदिते च कर्तृत्वे भवेत् कर्तृनयोदयः ॥ ९९ ॥

इति कर्त्रधिकरणम् ॥ ५ ॥

—o—

(59) परायत्ताधिकरणम् ॥ २-३-६ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

(88) कर्तृत्वमेतस्य परानपेक्षं
शास्त्रार्थवत्त्वाय स हि स्वतन्त्रः ।
नेतच्छ्रुतिभ्यो न च शास्त्रकोपः
प्रयत्नसापेक्षतया परस्य ॥ ३० ॥

एतस्य—जीवात्मनः, **शास्त्रार्थवत्त्वाय**—विधायक-निषेधकरूपाणां शास्त्राणां सप्रयोजनत्वाय (कल्प्यमानं यत्), **कर्तृत्वम्**—स्वाभिमतक्रियानिर्वर्तकत्वमस्ति तत्, **परानपेक्षम्**—परमात्मानायत्तमेव, **हि**—यतः, **सः स्वतन्त्रः**—स्वातन्त्र्यापरपर्यायकर्तृत्ववान्, (यदि तत् अन्याधीनं तर्हि वासी-कुठारादिवत् जडत्वे विश्रान्तिः स्यात्) **एतत् न**—ईदृशं परापेक्षतारहितं स्वातन्त्र्यं जीवस्य न युज्यते, **श्रुतिभ्यः**—सापेक्षस्वातन्त्र्यस्यैव तत्र श्रुतिभ्योऽवगम्यमानत्वात्, **न च शास्त्रकोपः**—'जीवमुद्दिश्य विधिं निषेधं च कुर्वतां शास्त्राणां वैय्यर्थ्यापत्तिः, कर्मसु शुभाशुभासु प्रेरकस्यैव विधि-निषेधभागित्वात्' इतीदृशो दोषश्च नोद्भाव्यः, **परस्य**—प्रेरकस्यापि परमात्मनः, **प्रयत्नसापेक्षतया**—जीवीयपूर्ववासनाधीनप्राथमिक (युक्तायुक्ततत्तत्कर्मविषयक) प्रयत्नावलम्बितयैव (तत्र तत्र प्रेरणस्य, शास्त्रसिद्धत्वात्) ॥ ३० ॥

—o—

(2) **तत्त्वसारः** (श्लो- ४६-४८)

आदावीश्वरदत्तयैव पुरुषः स्वातन्त्र्यशक्त्या स्वयं
तत्तज्ज्ञान-चिकीर्षण-प्रयतनान्युत्पादयन् वर्तते ।
तत्रोऽपेक्ष्य ततोऽनुमत्य विदधत् तन्निग्रहानुग्रहौ
तत्तत्कर्मफलं प्रयच्छति ततः सर्वस्य पुंसो हरिः ।। ४६ ।।

पुरुषः—संसारी चेतनः, **आदौ**—करण कलेबरप्रदानात्मकसृष्टिसमये एव, **ईश्वर-दत्तयैव**—परमपुरुषप्रसादितयैव, **स्वातन्त्र्यशक्त्या**—स्वातन्त्र्यापरपर्यायया स्वगतया कार्यनिर्वहण-शक्त्या, **स्वयम्**—स्वाच्छन्द्येनैव पूर्ववासनायत्तेन) स्वतः, **तत्तज्ज्ञान....तनानि**—तत्तदभिमत-विषयकं ज्ञानं, तादृशीमिच्छाम्, तादृशमुद्योगमपि च, **उत्पादयन्**—स्वस्मिन् जनयन्, **वर्तते**—देहाधिष्ठाता भवति, **हरिः**—सर्वेश्वरो नारायणः, **तत्र**—तदीयच्छन्दानुरोधिनि तदीये आदिमे उद्योगे, **उपेक्ष्य**—तूष्णीम्भावरूपमौदासीन्यमाश्रित्य, **ततः**—अनन्तरभावितत्तदर्थविषयक-द्वितीयाद्युद्योगे, **अनुमत्य**—तत्प्रचोदन-तत्साहाय्यादिना तं पोषयित्वा, **ततः**—तदनन्तरम्, **तन्निग्रहानुग्रहौ विदधत्**—यथायोग्यं तद्विषये कोपं प्रतीतिं च कुर्वन्, **तत्तत्कर्मफलम्**—तत्तदीयकर्मार्हस्वात्मप्रदानादिमहान्धतमोमयस्थानप्रापणपर्यन्तं उत्तम-मध्यमाधमरूपं फलविशेषम्, **सर्वस्य पुंसः**—समस्तस्य चेतनवर्गस्य, **प्रयच्छति**—(प्रियद्वेष्यभावविमोकेन वितरति ॥ ४६ ॥

दुष्कर्मस्वनिवर्तनानुमनने पुंसः करोत्यच्युतः
स्वातन्त्र्येण निरङ्कुशेन सगुणः श्रुत्या न दोषो हरेः ।
दृष्टश्चारिषु निग्रहो गुणतया लोके न दोषात्मना
न स्यादाश्रयसिद्धिरौपनिषदं नो चेत् प्रमाणं वचः ।। ४७ ।।

अच्युतः—भगवान् नारायणः, **निरङ्कुशेन स्वातन्त्र्येण**—अप्रतिहतेन स्वातन्त्र्येण, **पुंसः दुष्कर्मसु**—चेतनकर्तृकेषु स्वाज्ञाविरुद्धेषु पापकर्मसु, **अनिवर्तनानुमनने**—प्रवृत्तस्यानिवारणं ततः अनुज्ञादानं च, **करोति**—तनुते, **सः**—तादृशः स्वतन्त्रभावः, **गुणः**—अतिशयापादक एव इति, **श्रुत्या**—वेदवाचा अवगम्यते, **सः हरेः न दोषः**—तादृशः स्वतन्त्रभावः हरेः सर्वोत्कृष्टत्व-विघातको न भवति, (इत्यपि श्रुत्याऽवगम्यते,) **अरिषु निग्रहः**—शत्रुविषये कोपकृतो दण्डन-व्यापारः, **लोके च**—जगत्यपि, **गुणतया दृष्टः**—प्रशंसाहेतुत्वेनैव अनुभूतः, **न दोषात्मना**—गर्हाहेतुतया न अवगतः, **औपनिषदं वचः**—ईदृशेश्वरग्राहकं वेदान्तवाक्यम्, **प्रमाणं न चेत्**—तत्त्वयाथात्म्यावगमसाधनतया न स्वीक्रियेत यदि, **आश्रयसिद्धिः न स्यात्**—दूष्यतया

नास्तिकाभिमतस्य ईश्वरस्यैवालाभो भवेत्, (यदि प्रमाणं ; तदा धर्मिग्राहकप्रमाणबाधः उपजीव्यविरोध एवेति च ईश्वरस्य दूष्यतेति) ॥ ४७ ॥

दुष्कर्मव्यवसायतस्तु विरतो यस्तस्य पुंसः पुरा-
भूयोजन्मसमार्जितान्यगणितान्यागांस्यनादृत्य यत् ।
तस्यानन्तसुखाप्तये च यतते लक्ष्मीसहायः स्वयं
तत्कारुण्यपुरःसरो गुणगणस्तस्याऽयमुज्जृम्भते ॥ ४८ ॥

यस्तु—य एव चेतनः, **दुष्कर्मव्यवसायतः**—पापक्रियोद्यमात्, **विरतः**—निवृत्तमनाः, **तस्य पुंसः**—तस्य चेतनस्य, **पुरा....र्जितानि**—प्राक्तनबहुभवसम्पादितानि, **अगणितानि आगांसि**—सङ्ख्यातुमशक्यानि पापजातानि, **अनादृत्य**—दण्डनहेतुत्वेनाऽविगणय्य, **यत्**—येन हेतुना, **तस्य**—अपराधिनोऽपि विरतदुष्कर्मोद्यमस्य पुंसः, **अनन्तसुखाप्तये च**—निरवधिक-महानन्दप्रापणायाऽपि, **लक्ष्मीसहायः**—श्रियःपतिर्नारायणः, **स्वयं यतते**—स्वयमपि कृतोद्यमो भवति, **तत्**—तस्मात्, **तस्य**—भगवतो विष्णोः, **कारुण्यपुरःसरोऽयं गुणगणः**—निरुपाधिक-दयाप्रभृतिः शास्त्रसिद्धो गुणसमूहः, **उज्जृम्भते**—प्रवृद्धः सन् विराजते ॥ ४८ ॥

—o—

(3) **अधिकरणसारावलिः** (परा....धिकरणम्) (श्लो. ६१–६८)

(236) कर्ता न ह्यन्यतन्त्रः स्मरति खलु ! तथा पाणिनिश्चान्यथा चेत् !
आज्ञा कुर्यान्न कुर्यादिति तु निगलिते धावनादेशवत् स्यात् ।
मैवं कर्माक्षकाल [1]प्रभृति[1] परवशे कर्तृतां तत्फलं च
स्वीकृत्यात्मेशमात्रे श्रुतिशतविदिते द्वेष इत्थं दुरन्तः ॥ ६१ ॥

कर्ता—'कर्तृ' पदाभिधेयोऽर्थः, **अन्यतन्त्रो न हि!**—पारतन्त्र्यवान् नैव भवितुमर्हति, (यद्वा) परतन्त्रः कर्तृपदाभिधेयो नैव भवेत् ; **पाणिनिश्च**—शब्दानुशासनकर्ता पाणिनिनामा आचार्योऽपि, **तथा खलु स्मरति**—'स्वतन्त्रः कर्ता' इति खलु अनुशास्ति, **अन्यथा चेत्**—पर-तन्त्रोऽपि यदि कर्तृपदार्थः स्यात् ; तदा, **'कुर्यात् न कुर्यात्' इति आज्ञा**—विधिरूपा निषेधरूपा च श्रुत्यादिसिद्धा प्रशास्तिः, **निगलिते धावनादेशवत् स्यात्**—शृङ्खलाबद्धं पुरुषमुद्दिश्य धावन-क्रियाशासनमिव विरुद्धा विफलैव च भवेत्, (अतो परायत्तकर्तृता नाभ्युपगम्या जीवस्य इति शङ्कने) **मैवम्**—एवं शङ्कनं नोचितम्, **कर्माक्ष....वशे**—पुण्यपापाख्यकर्मणां, चक्षुरादीना-मिन्द्रियाणाम्, सर्वकारणस्य कालस्य, स्वभावस्य, दैवरूपाया नियतेश्च अधीने जीवे, **कर्तृतां**

[1] प्रकृति—सा० र.

तत्फलं च स्वीकृत्य—क्रियायां स्वातन्त्र्यं क्रियाफलभागितां च अभ्युपगम्य, **श्रुतिशतविदिते आत्मेशमात्रे**—बहुश्रुतिप्रतिपन्ने सर्वात्मनियन्तरि परमपुरुषे परम्, **इत्थं द्वेषः**—कारणत्वासहः विरोधभाव ईदृशः, **दुरन्तः**—दुष्परिणामकारीति हेतोः न कार्यः (अतो जीवः परायत्तस्वातन्त्र्यवानेवेति) ॥ ६१ ॥

(237) साधारण्येन हेतुः सलिलमिव विभुः सर्वकार्याङ्कुराणां
वैषम्यं त्वाविरिञ्चात् प्रतिनियतफलैः प्राणिनां कर्मबीजैः ।
साम्यं स्वस्य स्वगीतं श्रुतमपि तदिहाऽधोनिनीषादिभेद-
स्तादृक्कर्मानुरूपं फलमिति नियतोऽनादिरेष प्रवाहः ॥ ६२ ॥

सर्वकार्याङ्कुराणाम्—सर्वेषामपि सर्वबीजसम्बन्धिनामपि अङ्कुराणां जायमानानाम्, **साधारण्येन**—सामान्यरूपेण, **सलिलं हेतुरिव**—जलं यथा कारणं तथैव, **सर्वकार्याङ्कुराणाम्**—अङ्कुरसादृश्येन जनिमताम् सर्वेषामप्यर्थानाम्, **साधारण्येन**—कार्यत्वरूपसामान्याकारेण, **विभुः**—सर्वेश्वरः परमात्मा, **हेतुः**—कारणभूतो भवति, **वैषम्यं तु**—सृज्यवस्तुषु वैचित्र्यं तु, **आविरिञ्चात्**—व्यष्टिसृष्टिकर्तुः हिरण्यगर्भादारभ्य, **प्राणिनाम्**—अखिलानामेव देहिनाम्, **प्रतिनियतफलैः**—सुव्यवस्थितविशिष्टफलवद्भिः, **कर्मबीजैः**—विशिष्टबीजसदृशैः विशिष्टैः तत्तत्कर्मभिरेव भवति; (न तु साधारणहेतुना परमात्मना) **स्वस्य**—भगवतः स्वस्य, **साम्यम्**—सर्वसाधारण्येन निष्पक्षपातित्वम्, **स्वगीतम्**—स्वेन (परमात्मनैव) स्पष्टं कथितम् 'समोऽहं सर्वभूतेषु' इति, **श्रुतमपि च**—श्रुत्यापि वर्णितम् 'शास्ता जनानां सर्वात्मा' इति, **तत्**-उक्ताद्धेतोः, **इह**—भगवति (विद्यमानतया श्रुतिसिद्धः), **अधोनिनीषादिभेदः**—अधोलोकनयनोऽर्ध्वलोकनयनादिसङ्कल्परूपो विषयभावः, **तादृक्कर्मानुरूपं फलमिति**—तत्तज्जीवीयतादृशकर्मानुगुणफलात्मकमेवेत्यतः, **एष प्रवाहः**—'विलक्षणे सुकृत-दुष्कृते, विलक्षणे च सुखदुःखादिके' इत्येवंरूपः कार्यकारणसन्तानः, **अनादिः नियतः**—अज्ञातेदंप्रथमताकः मिथोऽसङ्कीर्णतया अत्यन्तव्यवस्थितस्वरूपस्वभाववानिति ज्ञेयम् ॥ ६२ ॥

(238) काले दुःखोपशान्तिं जनयति भगवान् व्याजमात्रावलम्बी
या दुःखापाचिकीर्षा परहितमनसः सैव तस्यानुकम्पा ।
दत्ते देहादि[1]योगं[1] दिशति च निगमं वक्ति वेदान्तसारं
निस्सीमानन्दयोगं निरुपधिसमये सौति पुंसां [2]तथैव[2] ॥ ६३ ॥

---

[1] योग्यं—सा. र. [2] तथैव—सा. र.

भगवान्—षड्गुणैश्वर्यसम्पूर्णः सर्वेश्वरः, **काले**—सुकृतपरिपाकसमये, **व्याजमात्रावलम्बी**—भगवत्प्राप्त्युपायानुष्ठानसङ्कल्प-तत्प्रवृत्त्यादिकमेव (वस्तुतः फलप्रदानयोग्यतारहितमपि) उपायत्वेन परिगणय्य, **दुःखोपशान्तिं जनयति**—निरवशेषतया सर्वदुःखप्रहाणरूपां शान्तिं चेतनानामुत्पादयति, **परहितमनसः**—अन्यहितेदम्परस्वान्तस्य, **तस्य**—परमपुरुषस्य, **दुःखापाचिकीर्षा या**—अन्यदीयदुःखोन्मूलनविषयिणी या स्वाभाविकी अपेक्षाऽस्ति, **सैव अनुकम्पा**—सैव अनुकम्पा-दया इत्युच्यते, **तयैव**—दययैव, **पुंसाम्**—चेतनानाम्, **देहादियोगम्**—(मुमुक्षा-मोक्षोपायानुष्ठानाद्यर्हं) देहेन्द्रियादिसम्बन्धम्, **दत्ते**—अनुगृह्णाति, **निगमं च दिशति**—तत्त्वहितपुरुषार्थवेदकं वेदरूपं दीपं च प्रयच्छति, **वेदान्तसारं वक्ति**—(अविलम्बेन भगवत्प्राप्त्युपायप्रतिपत्तिसाधनभूतं) वेदान्तपरमप्रधानार्थमपि सदाचार्याद्यन्तःप्रविष्टः सन्, प्रकटीकरोति, **निरुपधिसमये**—देहेन्द्रियाद्युपाधिविगमकाले **निस्सीमानन्दयोगं सौति**—परमानन्दलाभं च स्वाभाविकं वितरति ॥ ६३ ॥

(239) दोषः स्यान्निग्रहांशो यमयितुरिति चेन्नोपमर्दासहत्वात्
[1]स्वा[1]निष्टं [2]नेश्वरे हि[2] प्रसजति न परानिष्टमस्य प्रतीपम् ।
कारुण्यं सावकाशं क्वचिदिति कथितं साक्षिताद्यं च सुस्थं
दृष्टे चैतत्स्वभावे फलद इति धिया युज्यते तत्प्र[3]पत्तिः[3] ॥ ६४ ॥

यमयितुः—सर्वनियामकस्वातन्त्र्यवतः सर्वेश्वरस्य, **निग्रहांशः**—निग्रहानुग्रहयोरेकतरः निग्रहः, **दोषः स्यादिति चेत्**—तत्समाश्रयणविघटको भवेत् इति चिन्तनम्, **न**—न कार्यम्, **उपमर्दासहत्वात्**—कथं दोषः? कीदृशो दोषः? कस्य दोषः? इत्येवमादिरीत्या शोधने दोषरूपत्वासिद्धेः, **हि**—यतः, **ईश्वरे**—नियन्तरि परमात्मनि, **स्वानिष्टं न प्रसजति**—निग्रहनिबन्धनं तदनभिमतं किञ्चित् नैव आपद्यते, **परानिष्टम्**—निग्रहतः प्राप्तं परकीयं अनभिमतं यद्भवेत्तत्, **अस्य न प्रतीपम्**—ईश्वरस्य दोषरूपं न भवति, **कारुण्यम्**—निर्हेतुक-सहेतुकोभयरूपमपि भगवतो दयास्वरूपम्, **क्वचित् सावकाशमिति**—सृष्ट्यारम्भे (यथायोग्यकरणकलेबरसम्पत्तये) पश्चात्, (स्वर्गापवर्गार्थोपायानुष्ठानतः तत्तत्फलावाप्तये) च सविषयमेव विजृम्भते इति, **कथितम्**—पूर्वस्मिन् श्लोके प्रतिपादितम्, **साक्षिताद्यं च**—भगवति जीवकृतसुकृत-दुष्कृतादिकं प्रति) साक्षित्व-अनुमन्तृत्व-प्रेरकत्व उदासीनत्व-सहकारित्व-फलप्रदत्व-सर्वफलित्वादि अखिलम्, **सुस्थम्**—दोषानावहं सत् अचाल्यमस्ति, **एतत्स्वभावे दृष्टे**—

---

[1] ना—सा. र.   [2] हीश्वरस्य.   [3] वृत्तिः—सा. र.

एतस्मिंश्च निखिले भगवतः स्वभावे शास्त्राचार्यादितः परिचिते सति, **फलद इति धिया**—भगवान् फलप्रदानसमर्थ इति बुद्ध्या, **तत्प्रपत्तिः**—तस्मिन् भगवति शरणवरणम्, **युज्यते**—न्याय्यं भवति ॥ ६४ ॥

(240) प्रत्यङ्ङात्माऽहमर्थः प्रमितिपरवतां कर्तृतादिश्च तस्मिन्
स्वेच्छापूर्वप्रवृत्तेरयमचिदधिकस्ता[1]वतेशान[1] तुल्यः ।
ईशस्तु स्वेच्छयैव प्रयतत इति तन्निघ्नमन्यत् समस्तं
सारथ्यादिक्रमेण प्रतिनियतगतिः स्यात् त्रयाणां प्रवृत्तिः ॥ ६५ ॥

प्रमितिपरवताम्—प्रमाणपराधीनानाम्, **अहमर्थः**—अहमित्युल्लिख्यमानोऽर्थः, **प्रत्यङ्ङात्मा**—स्वस्मैभासमानस्वरूपश्चेतनः, **तस्मिन्**—तादृशे चेतने, **कर्तृतादिश्च**—कर्तृत्व-भोक्तृत्व-ज्ञातृत्वादिर्धर्मो वर्तते, **अयम्**—कर्तृत्वादिमान् जीवः, **स्वेच्छापूर्वप्रवृत्तेः**—स्वसङ्कल्पपूर्वक-प्रवृत्तिस्वभावत्वात्, **अचिदधिकः**—अचेतनविलक्षणः तदतिशयितश्च, **तावता ईशानतुल्यः**—एतावतांशेन ईश्वरसदृशः, **ईशस्तु स्वेच्छयैव प्रयतत इति**—ईश्वरः परं स्वसङ्कल्पमात्राधीन-प्रवृत्तिमान् इति हेतोः (सः जीवादप्यधिकः) **अन्यत् समस्तम्**—ईश्वरातिरिक्तं सर्वम्, **तन्निघ्नम्**—ईश्वरपरतन्त्रम्, **त्रयाणां प्रवृत्तिः**—चिदचिदीश्वराणां त्रयाणामपि व्यापृतिः, **सारथ्यादिक्रमेण**—सारथि-रथि-रथानां रीत्या, **प्रतिनियतगतिः स्यात्**—सुव्यवस्थितस्वभावा जागर्ति ॥ ६५ ॥

(241) कर्तृत्वं स्यात् कदाचित् करणवति परप्रेरणानिर्व्यपेक्षं
नो चेत् तन्निग्रहाद्यं कथमिति यदि न स्वेष्टपक्षेऽपि साम्यात् ।
स्वेनाऽपथ्यप्रवृत्तं न हि पुनरपि तत्कारयेयुर्दयार्द्राः
[2]तच्चेत् तस्य[2] स्वभावादितरदपि न किं निष्फलोऽधीतभङ्गः ॥ ६६ ॥

करणवति—शरीरेन्द्रियादिमति जीवे, **कदाचित्**—आदिप्रवृत्तिसमये, **परप्रेरणानिर्व्यपेक्षं कर्तृत्वम्**—परमात्मप्रचोदनानधीनं केवलं स्वायत्तं कर्तृत्वम्, (सम्भवति), **नो चेत्**—आदिमप्रवृत्तावपि परमात्मायत्तं यदि स्यात् तर्हि, ! **तन्निग्रहाद्यम्**—स्वप्रेरणामात्रायत्तप्रवृत्ति-मतश्चेतनस्य निग्रहो वा अनुग्रहो वा, **कथमिति यदि**—(स्वेनैव प्रेरितमुद्दिश्य दण्डनादेः उन्मत्तव्यापारताप्रसक्त्या) कथं वा उचितः स्यात्? इत्येवं यदि शङ्क्येत तदा, **न**—नेदं शङ्कनं युज्यते, **स्वेष्टपक्षेऽपि साम्यात्**—द्वितीयादिप्रवृत्तिषु ईश्वरायत्तत्वमिति स्वसंमतेऽपि पक्षे,

---

[1] **दीशान—सा. र.** [2] **तच्चेदस्य—सा. र.**

अस्य दोषस्य समानत्वात्, **स्वेन**—परप्रेरणां विना स्वत एव, **अपथ्यप्रवृत्तम्**—अहितफले कर्मण्युद्युक्तं पुरुषं, **दयार्द्राः**—परदुःखापाचिकीर्षातत्परमृदुहृदयाः सन्तः, **पुनरपि**—द्वितीयवारमपि वा, **तत् न हि कारयेयुः**—तादृशमपथ्यं कर्म कर्तुं नैव खलु प्रेरयेयुः, **तत् तस्य स्वभावात् चेत्**—द्वितीयादि वृत्तौ प्रेरकत्वं भगवतः स्वभावकृतमित्यतः न आक्षेपार्हमिति यदि समाधीयते तदा, **इतरदपि किं न**—आद्यप्रवृत्तौ तदीयप्राग्वासनासापेक्षप्रवर्तकत्वम् द्वितीयादिप्रवृत्तावनुमत्य निग्रहादिकमपि च तस्य स्वभावकृतमिति कुतो न समाधीयते ? **अधीतभङ्गः**—(एवं समाधाने सुगमे) श्रुत्याद्युक्तसर्वकारणत्वादेः सर्वेश्वरे भञ्जनप्रयत्नः, **निष्फलः**—निष्प्रयोजन एवेति जीवस्य सार्वेदिकं परायत्तकर्तृत्वं निराबाधम् ॥ ६६ ॥

(242) क्षेत्रज्ञानां समानां विषमयतनता तादृशादृष्टभेदा-
न्नादृष्टं त्वन्यदिष्टं नियमनभिदया [1]शासितु[1]स्तत्र [2]भाव्यम्[2] ।
साक्षित्वाद्यं च नेतुः समनिगममितं प्रेरकत्वं न रुन्धे
भाष्यादिग्रन्थलेशोऽप्यवहितमनसामैदमर्थ्यं भजेत ॥ ६७ ॥

क्षेत्रज्ञानाम्—जीवात्मनाम्, **समानाम्**—स्वरूपतः स्वभावतश्च अविषमाणामपि सताम्, **विषमयतनता**—प्रवृत्तिवैषम्यम्, **तादृशादृष्टभेदात्**—तदनुगुणादृष्टवैषम्यात्, (इति प्रथमप्रवृत्तौ जीवस्य अदृष्टायत्तकर्तृत्वमेव ; न परमात्मायत्तकर्तृत्वम्—इति शङ्कने) **अदृष्टं तु**—अदृष्टपदाभिधेयं तु, **अन्यत्**—वैशेषिक मीमांसकाद्यभिमतस्वरूपम्, **न इष्टम्**—वेदान्तिभिर्नाभ्युपगतम्, **तत्र**—सर्गाद्यकाले, **शासितुः**—सर्वनियन्तुरीश्वरस्य, **नियमनभिदया**—नियमनपदवाच्यसङ्कल्पविशेषेणैव, **भाव्यम्**—अदृष्टात्मना भवितव्यम् ; नान्येन, (अतः नियमनद्वारा ईश्वरकारणत्वे एव विश्रान्तम्) **नेतुः**—प्रवृत्तिहेतोरीश्वरस्य, **साक्षित्वाद्यं च**—प्रथमप्रवृत्तौ केवलद्रष्टृत्वादिकं च, **समनिगममितम्**—साक्षित्वप्रमापकसदृशप्रमाणप्रमितम्, **प्रेरकत्वम्**—निरुपाधिकं प्रयोजककर्तृत्वम्, **न रुन्धे**—न वारयति, **भाष्यादिग्रन्थलेशोऽपि**—एतदधिकरणीयश्रीभाष्यतत्त्वसारादिप्राक्तनग्रन्थानामेकैकोंऽशोऽपि, अनुचिन्त्यमानः, **अवहितमनसाम्**—तदेकचित्तानाम्, **ऐदमर्थ्यं भजेत**—एतस्मिन्नुक्तेऽर्थे एव तात्पर्यं प्राप्नुयादेव, (न आन्यपर्यम्) ॥ ६७ ॥

(243) कर्ता देवः फलानां न तु करणभृतः प्रेरकश्चेत्ययुक्तं
सर्वश्रुत्यादिकोपान्न भवति न फलं कर्मणः पापचर्या ।
कर्माधीनं तु चिन्ताद्यपि हि भवभृतो भाषितं भाष्यकारै-
र्जन्तूनां देवतानामपि करणगणाधिष्ठितिं वक्ष्य[3]तीत्थम्[3] ॥ ६८ ॥

---

[1] हीशितु—सा. र. [2] भाव्यः—सा. र. [3] तीति.

देवः—सर्वेश्वरः, **फलानां कर्ता**—कर्मफलानां प्रदातैव, **न तु करणभृतः प्रेरकश्च**—न तु देहेन्द्रियादिमतः चेतनस्य कर्मणां प्रयोजककर्ताऽपि, **इत्ययुक्तम्**—एवं शङ्कनमसाधु ; **सर्वश्रुत्यादिकोपात्**—'शास्ता जनानाम्, करणाधिपाधिपः, ईश्वरप्रेरितः' इत्येवमादिसकलश्रुतिस्मृतिविरोधात्, **कर्मणः**—प्राग्भवीयस्य कर्मणः, **पापचर्या**—एतद्भवीयदुष्कृतानुष्ठानम्, **फलं न भवतीति न**—परिपाकप्रयोजनरूपं न भवतीति, वक्तुं न शक्यते, **हि**—यतः, **भवभृतः**—बद्धजीवस्य, **चिन्ताद्यपि**—साध्वसाधुविषयालोचनादिकमपि, **कर्माधीनं तु**—प्राक्तनकर्मविशेषायत्तमेव, न तादात्विकम् (इति) **भाष्यकारैः भाषितम्**—श्रीभाष्यकारैः भगवद्रामानुजैः विशदीकृतम्, **जन्तूनां देवतानामपि**—सर्वेषां प्राणभृताम्, इन्द्रादीनामपि च, **करणगणाधिष्ठितिम्**—देहेन्द्रियाद्यधिष्ठानम्, (अग्न्यादिदेवतानां सकलप्राणिसम्बन्धिवागाद्यधिष्ठानं च) **इत्थम्**—ईश्वरप्रेरणायत्तमित्येव, **वक्ष्यति**—भाष्यकारः प्रकटीकरिष्यति ॥ ६८ ॥

—o—

(4) अधिकरणसारावलिः

परायत्ताधिकरणे—जीवस्य स्वतः प्रवृत्तिशक्त्यभावे, विधिनिषेधशास्त्रानर्थक्यप्रसङ्गात्, जीवस्य कर्तृत्वं स्वातन्त्र्येण—इत्याशङ्क्य ।

'अन्तः प्रविष्टः' इत्यादिना परमात्माधीनत्वश्रवणात्, तदधीनत्वे प्रथमप्रवृत्तौ जीवस्य स्वतन्त्रतया शास्त्रानर्थक्याभावाच्च, पराधीनमेव कर्तृत्वम्—इत्युक्तम् ॥

—o—

(5) नयसङ्गतिमालिका

स्वातन्त्र्यविनिवृत्त्यैव कर्तृत्वं विनिवर्तते ।
इत्याक्षेपं समाधातुं परायत्तनयोदयः ॥ १०० ॥

इति परायत्ताधिकरणम् ॥ ६ ॥

—o—

(60) अंशाधिकरणम् ॥ २-३-७ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः ॥

(89) भेदान्न जीवोंऽश इति श्रुतीनां
दृष्टे विरोधस्त्वितरेतरेण ।
अंशस्मृतेः पादतयोपदेशात्
स्यादंश एवास्य परस्य जीवः ॥ ३१ ॥

भेदात्—जीवपरयोः पृथक्त्वस्य श्रुतितः सिद्धेः, **जीवः न अंश इति**—जीवात्मा परमात्मनः अंशात्मको न भवतीत्येवोचितम्, **श्रुतीनां तु**—जीव-परस्वरूपवेदनप्रवृत्तानां वेदगिरां तु, **इतरेतरेण विरोधः दृष्टः**—अन्योन्यं अनैककण्ठ्यम्, अभिप्रायभेदश्च स्पष्टप्रतिपन्नः (इति पूर्वपक्षे) **पादतया उपदेशात्**—'पादोऽस्य' इति श्रुत्या सर्वस्याऽपि पादत्वबोधनात्, **अंशस्मृतेः**—'ममैवांशः' इति गीतस्मृतिसत्त्वात्, **अस्य परस्य**—प्रक्रान्तस्य परमात्मनः, **जीवः अंश एव स्यात्**—जीवात्मा विशिष्टवस्त्वेकदेशत्वरूपांशत्ववानेव भवति ॥ ३१ ॥

—o—

(2) **तत्त्वसारः** (श्लो. ५९–६७)

आदौ भेदश्रुतीनामनृतविषयता लक्षणा चैक्यवाचां
दूरेणैव प्रहाणं तदुभयघटनातत्पराणां च वाचाम् ।
प्रत्यक्षादिप्रमाणस्वरसगतिहतिस्तर्कबाधश्च भूयान्
मायावादे तदेतत् सकलमितरथा लक्ष्मणाचार्यपक्षे ॥ ४९ ॥

मायावादे—अद्वैतिनां सिद्धान्ते, **आदौ**—प्रथमतः, **भेदश्रुतीनाम्**—तत्त्वभेदप्रतिपादकानां 'भोक्ता भोग्यं प्रेरितारम्' इत्यादिश्रुतीनाम्, **अनृतविषयता**—मिथ्यभूतार्थबोधकता, **ऐक्यवाचाम्**—तत्त्वमस्यादिरूपाणां वेदवाचाम्, (अभेदश्रुतीनाम्) **लक्षणा च**—विशेष्यमात्रपरत्वेन श्रुतार्थपरित्यागात् अमुख्यार्थत्वम्, **तदुभयघटनातत्पराणां वाचां च**—भेदाभेदश्रुतिसङ्गमनतात्पर्यवतीनां 'य आत्मनि' इत्यादीनां श्रुतीनां तु, **दूरेणैव प्रहाणम्**—अत्यन्तामुख्यार्थतावर्णनात् सर्वथा त्यागपर्यवसानम्, **प्रत्यक्षा....हतिः**—प्रत्यक्षप्रभृतीनां सकलप्रमाणानां स्वाभाविकप्रवृत्तिभङ्गः, **भूयान्**—असङ्ख्यातः, **तर्कबाधश्च**—लौकिक-शास्त्रीययुक्तिविरोधश्च (प्राप्नोति), **लक्ष्मणाचार्यपक्षे**—भगवद्रामानुजार्यसिद्धान्ते तु, **तदेतत् सकलम्**—उक्तं सर्वम्, **इतरथा**—व्यत्यस्तम् (कुत्राप्यन्याय्यकल्पना किञ्चिन्मात्रमपि नास्ति) ॥ ४९. ॥

न द्वैतं प्रतिपादयन्त्युपनिषद्वाचः प्रसिद्धं हि तत्
किं त्वद्वैतमनन्यगोचरतया तद्वेद्यमास्थीयताम् ।
अप्राप्ते खलु ! शास्त्रमर्थवदिति व्यर्थः प्रयासो यतः
प्रख्यातादपरस्तु शास्त्रविषयो भेदस्त्वदद्वैतवत् ॥ ५० ॥

उपनिषद्वाचः—उपनिषदात्मिकाः श्रुतिगिरः, **द्वैतम्**—भेदरूपमर्थम्, **न प्रतिपादयन्ति**—नैव बोधयन्ति, **हि**—यतः, **तत् प्रसिद्धम्**—भेदात्मकं द्वैतं सर्वविदितम्, **किन्तु**—तर्हि,

किमन्यत् उपनिषत्प्रतिपाद्यम्? इति प्रश्ने, **अद्वैतम्**—प्रत्यक्षविदितद्वैतविरुद्धं अभेदरूपमद्वैतमेव, **अनन्यगोचरतया**—श्रुतीतरागम्यत्वेन, **तद्वेद्यम् आस्थीयताम्**—उपनिषद्वेद्यमिति स्वीक्रियताम्, **अप्राप्ते खलु**—प्रमाणान्तरावेद्ये हि विषये, **शास्त्रं अर्थवत्**—शास्त्राख्यं प्रमाणं सप्रयोजनतामश्नुते, **इति प्रयासः**—एवमादिव्यवहाररूपः प्रयत्नविशेषः, **व्यर्थः**—स्वाभिमताद्वैतसाधनेन फलवान् न भवति, **यतः**—यस्माद्धेतोः, **प्रख्यातादपरः भेदः**—लोकसिद्धाद्भिन्नः नियाम्य-नियामक-भावादिप्रयोजकः जीवपरयोर्भेदः, **त्वदद्वैतवत्**—त्वदभिमताभेदवत्, **शास्त्रविषयस्तु**—लोका-विदितत्वात् शास्त्रैकलभ्य एव ॥ ५० ॥

यच्छ्वेताश्वतरश्रुतिर्नृबहुतामेको बहूनामिति
ब्रूते तत्र विधिर्विशिष्टविषयस्त्वष्टाकपालादिवत् ।
नित्यत्वात्मबहुत्वमत्र निगमादन्यत्र विद्मः कथं?
प्रत्यक्त्वेन पराक्तया स्वपरयोर्मुक्तौ च भेदः स्फुटः ॥ ५१ ॥

श्वेताश्वतरश्रुतिः—'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' इतीयं श्रुतिः, **एको बहूनामिति**—'एको बहूना'मिति मन्त्रैकदेशेन, **नृबहुतां ब्रूते यत्**—चेतनानां नानात्वं प्रतिपादयतीति यदस्ति, **तत्र विधिः**—चेतनबहुत्वे अज्ञातज्ञापनव्यापारः, **अष्टाकपालादिवत्**—'यदाग्नेयोऽष्टाकपालः' इत्यादिवाक्येन अष्टसङ्ख्याककपालसंस्कृताग्निदेवताक-पुरोडाशविशिष्टामावास्या-पौर्णमास्यात्मककालविशिष्टयागविशेषविधिरिव, **विशिष्टविषयस्तु**—नित्यत्व-बहुत्वविशिष्टचेतनसम्बन्धिफलविधायित्वविशिष्टनित्यैकचेतनविषयक एव, (पूर्णवाक्य-बोध्यविशिष्टार्थगोचर एव) **अत्र**—वाक्ये विधेयत्वाभिमतम्, **नित्यत्वात्मबहुत्वम्**—नित्यत्व-विशिष्टं (सामानाधिकरण्येन) आत्मनानात्वम्, **निगमादन्यत्र**—वेदं विहाय प्रमाणान्तरात्, **कथं विद्मः?**—केन वा साधनेन अवगच्छामः?, **मुक्तौ च**—अतिक्रान्तसंसारतादशायामपि जीवगतायाम्, **स्व-परयोः**—जीवात्म-परमात्मनोः, **प्रत्यक्त्वेन पराक्तया च भेदः**—यथाक्रमं अहम्बुद्धि-इदम्बुद्धि-बोध्यत्वकृतः पृथग्भावः, **स्फुटः**—अतिरोहितः जागर्ति ॥ ५१ ॥

सामानाधिकरण्यभागिषु पदस्तोमेषु सर्वेषु किं
प्रत्याख्यं व्यतिरिच्यते प्रतिपदं वक्तव्यमद्वैतिना ।
यद्वा नेति न चेदनर्थकतया नैकातिरिक्तं पदं
पठ्येत प्रतिवादिनस्त्वितरथा युक्तिः स्वमासीदति ॥ ५२ ॥

सामानाधिकरण्यभागिषु—समानविभक्तिकेषु, **पदस्तोमेषु सर्वेषु**—'सत्यं ज्ञानम्', 'तत्त्वमसि', 'अयमात्मा ब्रह्म', 'सर्वं खल्विदं' इत्यादिषु पदजातेषु निखिलेषु, **प्रत्याख्यम्**—

स्वेन स्वेन बोध्यम्, **प्रतिपदम्**—प्रत्येकस्मिन्नपि पदे, **व्यतिरिच्यते यद्वा न इति**—भिद्यते उत न इति प्रश्ने, **किं वक्तव्यमद्वैतिना**—किं वा प्रतिवचनीयं भवति निर्विशेषब्रह्मात्मैकत्व-वादिना? (नैव किमपि), **न व्यतिरिच्यते चेत्**—न भिद्यते इति यद्युत्तरं दीयते तदा, **अनर्थकतया**—एकाधिकपदजातस्य बोध्यवैलक्षण्यकृतसाफल्याभावेन, **एकातिरिक्तं पदं न पठ्येत**—एकाधिकं पदजातं नैव श्रुतौ आम्नायेत, **इतरथा**—'प्रतिपदं व्यतिरिच्यते' इति यद्युत्तरं दीयेत तदा, **प्रतिवादिनो युक्तिः**—प्रतिवादिबाधकतया भवदुपन्यस्ता समानाधिकरण्य-फलभूताखण्डार्थसिद्धिरूपा युक्तिः, **स्वम् आसीदति**—आत्मानमेवाऽनुधावति ; अखण्डार्थ-साधनाशक्तेः इति ॥ ५२ ॥

दृश्यत्वादनृतं विगीतमिति यद् दृष्टान्तयन्तो जगुः
शुक्त्यारोपितरूप्यमत्र कतिचित् तत्रेदमाचक्ष्महे ।
धर्मिग्राहकमान(बाधित)धिक्कृतमिदं सोपाधिकत्वं पुनः
सौत्रं व्यक्तमभङ्गुरं व्यभिचरल्लिङ्गं च भङ्गाय वः ॥ ५३ ॥

कतिचित्—अद्वैतिसामयिकाः, **अत्र**—स्वोक्ते विश्वमिथ्यात्वे, **शुक्त्यारोपितरूप्यम्**—शुक्तिकाख्ये धर्मिण्यध्यस्तं रजतम्, **दृष्टान्तयन्तः**—साधनीये मिथ्यात्वे निदर्शनीकुर्वन्तः, **विगीतम्**—सत्यत्व-मिथ्यात्वाभ्यां विप्रतिपत्तिविषयभूतं जगत्, **दृश्यत्वात्**—प्रत्यक्षगोचरत्वात्, **अनृतमिति**—मिथ्येति, **यत् जगुः**—साधयामासुरिति यदस्ति, **तत्र इदमाचक्ष्महे**—तस्मिन् विषये दोषजातं प्रतिपादयामः, (किमिति चेत्) **इदम्**—दृश्यत्वहेतुकं मिथ्यात्वानुमानम्, **धर्मिग्राहकमानधिक्कृतम्**—मिथ्यात्वधर्मिभूतजगद्ग्राहकप्रत्यक्षबाधितं भवति, ('वह्निरनुष्णः प्रत्यक्षत्वात् जलवत्' इत्यनुमानस्य उष्णत्वग्राहिणा त्वाचप्रत्यक्षेण बाधितत्वमिव) **सोपाधिकत्वं पुनः**—अनुमानस्य बाधितत्वाख्योपाधिग्रस्तत्वं तु, **सौत्रम्**—'वैधर्म्याच्चे'ति सूत्रप्रतिपन्नम्, **अभङ्गुरं व्यक्तम्**—अपरिहार्यमित्येतत् सुस्पष्टम्, **लिङ्गं च**—हेतुत्वेनोपात्तं दृश्यत्वमपि, **व्यभिचरत्**—'दृश्यते त्वग्र्यया' इति श्रुतिसिद्धदृश्यत्ववति ब्रह्मणि मिथ्यात्वानभ्युपगमेन प्राप्तव्यभिचारदोषं सत्, **वः भङ्गाय**—युष्माकं अभिमतार्थविघटनाय पराजयाय च भवति ॥ ५३ ॥

मिथ्यात्वं भ्रान्तिसिद्धं यदि खलु जगतः साध्यते सिद्धसाध्यो
हेतुः सत्यः प्रपञ्चो भवति च यदि वा सत्यमद्वैतहानिः
साध्यं ब्रह्मस्वरूपं यदि भवति तदा सिद्धसाध्यत्वमेव
स्यादेवं च प्रपञ्चव्युदसनसरणिर्दूरतस्ते निरस्ता ॥ ५४ ॥

जगतः—प्रपञ्चस्य, **भ्रान्तिसिद्धं मिथ्यात्वम्**—मिथ्याभूतं मिथ्यात्वम्, **यदि खलु साध्यते**—दृश्यत्वहेतुकानुमितिविधेयतामापाद्यते यदि तर्हि, **हेतुः**—साधनत्वाभिमतः दृश्यत्वरूपोऽर्थः, **सिद्धसाध्यः**—पक्षतावैकल्यवान्, (भ्रान्तिसिद्धत्वेन सन्देहानवकाशात्) **प्रपञ्चः**—साध्यमिथ्यात्वधर्मिभूतोऽर्थः (जगद्रूपोऽर्थः), **सत्यो भवति**—सत्य एव स्यात्, **यदि वा सत्यम्**—पारमार्थिकमेव मिथ्यात्वं यद्यनुमितिविधेयीक्रियते तर्हि, **अद्वैतहानिः**—ब्रह्मातिरिक्तमिथ्यात्वभङ्गः, (मिथ्यात्वस्य परमार्थस्याभ्युपगमात्) **साध्यम्**—अनुमेयभूतं मिथ्यात्वम्, **यदि ब्रह्मस्वरूपं भवति तदा**—ब्रह्मानतिरिक्तस्वरूपमेव अभ्युपगतं भवेद्यदि तर्हि, **सिद्धसाध्यत्वमेव स्यात्**—श्रुत्यादिभिर्निश्चितस्वरूपस्यैव ब्रह्मणः अनुमेयत्वाभ्युपगमकृतः सिद्धसाधनाख्यो दोषः अनुमानस्यापतति, **एवञ्च**—उक्तविकल्पतः मिथ्यात्वानुमानदौःस्थ्ये सति, **ते प्रपञ्चव्युदसनसरणिः**—अद्वैतिनस्तव ब्रह्मातिरिक्तनिराकरणरीतिः, **दूरतो निरस्ता स्यात्**—सर्वथा असिद्धस्वरूपैव भवेत् ॥ ५४ ॥

चिन्मात्रव्यतिरेकि वस्तु सकलं मिथ्येति जोघुष्यते
योगाचारमते यदौपनिषदीकर्तुं तदाकृष्यते ।
मायावादिभिरप्रतीतनिगम-न्याय-प्रमाणान्तर-
प्रस्थानैरपहस्तयन्ति हि ! सह न्यायैः प्रमाणानि तत् ॥ ५५ ॥

योगाचारमते—योगाचाराख्यबौद्धसिद्धान्ते, **चिन्मात्रव्यतिरेकि**—केवलायाः संविदोऽतिरिक्तं ज्ञातृ-ज्ञेयात्मकम्, **सकलं वस्तु**—निखिलमपि पारमार्थिकम्, **मिथ्येति जोघुष्यते यत्**—अपरमार्थमित्येव शब्दौघेन महता प्रसार्यत इति यदस्ति, **तत्**—चिन्मात्रातिरेकि मिथ्यात्वम्, **औपनिषदीकर्तुम्**—श्रुत्यन्तारूढतामापादयितुम्, **अप्रतीत....प्रस्थानैः**—श्रुति-तर्क-प्रत्यक्षादिषु विद्यमाने स्वाभाविके अर्थनिश्चायकत्वे अलब्धविश्वासैः, **मायावादिभिः**—अद्वैतिसमयनिर्वाहकैः, **आकृष्यते**—श्रुत्यादिः बलात् तत्परतया नेतुं प्रयत्यते, **तत्**—योगाचारमतम्, **प्रमाणानि**—प्रत्यक्षानुमानागमरूपाणि सर्वाण्यपि, **न्यायैः सह**—स्वानुग्राहकतर्कसहकृतानि भूत्वा, **अपहस्तयन्ति**—प्रमाणपथात् दूरतो निष्कासयन्ति ॥ ५५ ॥

नानात्व-क्षणिकत्वयोरुपगतेरेकत्व-नित्यत्वयो-
रप्येकत्र मते परत्र च धियो वैषम्यमस्तीति चेत् ।
मायावादिमतस्य सौगतमतादेतन्न यत् तात्त्विको
धर्मस्तत्र मतद्वयेऽपि न धियः कश्चित् स्वरूपादृते ॥ ५६ ॥

एकत्र मते—योगाचारमते, **धियः**—संविदः, **नानात्वक्षणिकत्वयोरुपगतेः**—(विज्ञानसन्ततेः क्षणिकायाः स्वीकारेण) बहुत्व-क्षणैकवृत्तित्वयोरभ्युपगमात्, **परत्र च**—मायावादिनां मते च, **एकत्वनित्यत्वयोः उपगतेरपि**—अखण्डैकस्वरूपतायाः अविनाशितायाश्च अङ्गीकारात्, **सौगतमतात् मायावादिमतस्य वैषम्यमस्ति इति चेत्**—बौद्धमतापेक्षया अद्वैतिमतस्य वैलक्षण्यं वर्तत एवेति शङ्कने, **एतत् न**—इदं वैषम्यकथनं न सुष्ठु, **यत्**—येन हेतुना, **तत्र मतद्वयेऽपि**—संविन्मात्रसत्यतावादिसौगतवेदान्त्येकदेशिसिद्धान्तद्वयेऽपि, **धियः स्वरूपादृते**—विज्ञानात्मकमेकं धर्मिणं विना, **कश्चित् तात्त्विको धर्मः**—यः कोऽपि पारमार्थिकः विज्ञानाश्रितः धर्मपदाभिधेयोऽर्थः, **न**—नैवाभ्युपगत इति, वैषम्यायोगात् (नित्यत्वैकत्वादि तु अधिकरणानतिरिक्तम्) ॥ ५६ ॥

स्वरूपानादित्व-स्वपरघटने दुर्घटनता
प्रवाहानादित्वं पुनरिति चतस्रो हि गतयः ।
असत्याविद्याया गदितुमनवस्थापरिहृतौ
मतास्त्वेतास्तुल्याः स्फुटमसदधिष्ठानसरणौ ॥ ५७ ॥

असत्याविद्यायाः—अपारमार्थिक्याः जीवब्रह्माश्रयतया वर्ण्यमानायाः भावरूपाज्ञानापरपर्यायायाः अविद्यायाः, (कल्प्यमानायाः) **अनवस्थापरिहृतौ**—स्वकल्पनेऽप्यविद्यान्तरकल्पनापेक्षाकृतकल्पकपरम्परापातरूपायाः अनवस्थायाः निवारणे कार्ये, **गदितुं मताः**—अद्वैतिभिर्विवक्षिताः, **चतस्रो हि गतयः**—चतुर्विधाः खलु रीतयः, (कास्ताः ?) **स्वरूपानादित्व-स्वपरघटने**—अनादि (कारणानपेक्ष) स्वरूपता, (तथा)स्व(अविद्या)पर(प्रपञ्च) निर्वाहकत्वम् (इति द्वे गती) **दुर्घटनता**—उपपत्तिनिरपेक्षस्वरूपत्वम्, **पुनः**—तथैव, **प्रवाहानादित्वम्**—(बीजाङ्कुरवत्) अनिदमाद्यसन्तन्यमानस्वरूपपारम्पर्यम्, **इति**—एवं रीतिकाः, (इति द्वे गती) **अधिष्ठानसरणौ**—भ्रमाधिष्ठानभूतसंविदोऽप्यपारमार्थ्यवादिनां माध्यमिकानां मतेऽपि, **एतास्तुल्याः**—उक्ताश्चतस्रो गतयः समाना इति, **स्फुटम्**—सर्वेषामपि स्पष्टम्। (अतः सौगत-मायावादिनोः साम्यमपरिहार्यम्) ॥ ५७ ॥

रे रे खण्डनकार ! खण्डय ! भवत्पक्षः प्रतिक्षिप्यते
तर्कैस्त्वत्कथितैः ततः किमिति चेदस्मन्मतं तिष्ठति ।
यद्वन्माध्यमिकोक्तचिद्व्युदसनप्रत्यासतस्त्वन्मतं
तिष्ठत्येव यथा च बाधकहतौ लोके स्वरूपस्थितिः ॥ ५८ ॥

रे रे खण्डनकार!—हे निकृष्ट ! खण्डनाख्यग्रन्थकर्तः !, **खण्डय!**—सर्वपारमार्थ्य-वादिमतं दूषय (निर्भरम्), **भवत्पक्षः प्रतिक्षिप्यते**—भवदीयः पारमार्थ्यविघटनोद्यतः पक्षः निरस्यते ; (कथम् ?) **त्वत्कथितैः तर्कैः**—माध्यमिकनिरासकतया भवदुक्तैरेव तर्कैः साधनभूतैः, **ततः किमिति चेत्**—खण्डनग्रन्थनिरसनेन भवतां को लाभ इति चेत् ! **अस्मन्मतं तिष्ठति**—अस्मदीयं जगत्पारर्थ्यमतम् अबाधितमवस्थितं भवति तेन, **यद्वत्**—यथा वा, **माध्य....त्यासतः**—माध्यमिकबौद्धवर्णितसंविन्निरसनप्रतिक्षेपात्, **त्वन्मतं तिष्ठत्येव**—भवदीयं जगद्भ्रमाधिष्ठान-संवित्पारमर्थ्यमतं निर्बाधमवतिष्ठते, **यथा च**—यथैव, **लोके**—लौकिके सस्यादौ, **बाधकहतौ**—तन्नाशकविघाते क्रियमाणे, **स्वरूपस्थितिः**—सस्यादेः स्वरूपेणावस्थानं सिध्यति ; तद्वत् इत्यवेहि ॥ ५८ ॥

अधीत्वं वेद्यत्वे प्रसजति धियः कुम्भवदिति
स्वसिद्धिः सा धीत्वादिति यदिह कोऽप्याह तदसत् ।
स्वसिद्धिः स्वाधारं प्रति हि ! न परं प्रत्यपि नरं
परज्ञेया सेयं तदपि न मतित्वं विघटते ॥ ५९ ॥

धियः वेद्यत्वे—संविदः (ज्ञानस्य) ज्ञानान्तरप्रकाश्यस्वरूपत्वे, **कुम्भवत्**—घटवत्, **अधीत्वम्**—संविदितरत्वम् (जडत्वम्) **प्रसजति**—आपद्यते, **इति**—एवंरीत्या, (तथा) **सा**—संवित्, **धीत्वात्**—संवित्त्वाद्धेतोः, **स्वसिद्धिः**—(अन्यानपेक्ष) स्वप्रकाशा, **इति**—एवं रीत्या च, **इह**—ब्रह्मणि, (संविन्मात्रं पक्षीकृत्य) **कोऽपि**—अद्वैतिसामयिकः कश्चित्, **आह**—(संविद्रूपस्य) ब्रह्मणः अवेद्यत्वस्वप्रकाशत्वे उक्तवान्, **तदसत्**—तदेतत् विषयस्वरूपाविवेककृतम्, **हि**—यतः, स्वसिद्धिः-(धियः)स्वप्रकाशता, **स्वाधारं नरं प्रति**—धियः आश्रयभूतं चेतनं प्रत्येव, **परं नरं प्रत्यपि न**—स्वस्या अनाश्रयं चेतनान्तरं प्रत्यपि न भवति ; (अतः) **सेयम्**—प्रस्तुतेयं संवित् (अनुभूतिः) **परज्ञेया**—ज्ञानान्तरवेद्या (अनुभाव्येव), **तदपि**—तथाऽपि, (अनुभाव्यत्वे सत्यपि) **मतित्वम्**—(संवित्त्वम्-अनुभूतित्वम्) धीत्वम्, **न विघटते**—विघटितं न भवति, अनुभूतित्वानुभाव्यत्वयोः मिथोऽविरोधात् ॥ ५९ ॥

तथा हि प्रत्यक्षप्रभृतिमितिवर्गप्रकटितः
स्वभावो भावानामपसरति वेद्यास्त इति किम् ।
स्वभावप्रत्यासो यदि भवति वेद्यत्ववशतः
परस्य ज्ञेयत्वे घटवदपटत्वं प्रसजति ॥ ६० ॥

तथा हि—उक्तमेतत्तथैव ; (न विपर्यस्यति), **ते वेद्या इति**—भावाः वेद्या इति हेतोः, (वेद्यत्वमात्रेण) **भावानाम्**—तेषां तेषामर्थानाम्, **प्रत्यक्ष ···· प्रकटितः**—प्रत्यक्षादिप्रमाणजातसिद्धः, **स्वभावः अपसरति किम्**—स्वासाधारणो धर्मः तस्माद्भावात् दूरीभवति किम्? (नैव), **वेद्यत्ववशतः**—ज्ञेयत्वमात्रतः, **स्वभावप्रत्यासः**—स्वासाधारणधर्मविपर्यासः, **भवति यदि**—भवतीत्येतद्यदि स्वाभाविकं स्यात्तर्हि, **पटस्य ज्ञेयत्वे**—पटरूपस्यार्थस्य ज्ञानगम्यत्वे प्राप्ते सति, **घटवत्**—ज्ञानगम्यस्य घटस्येव, **अपटत्वम्**—पटेतरत्वम्, पटत्वाभावो वा, प्रसजति–प्राप्नुयात्, (धर्मस्यैकस्य धर्मान्तरसामानाधिकरण्यं न हि ! तदाश्रितस्य अतत्तामापादयितुमलम् ; व्याप्यव्यापकभावादिविलोपप्रसङ्गात्) ॥ ६० ॥

प्रकाशः कुम्भादौ जडिमवति तद्गोचरमिति-
स्तिरोधिश्चैतस्या विरतिरजडे ब्रह्मणि पुनः ।
स्वरूपं चिन्मात्रं स्फुरणमपिधिश्च स्वनिधनं
जडं वा ब्रह्म स्यादपिधिविधुरं वाप्यपरथा ॥ ६१ ॥

जडिमवति—जडत्ववति, **कुम्भादौ**—घटादावर्थे, (विद्यमानः) **प्रकाशः**—'प्रकाश'-पदवाच्या अवस्था नाम, **तद्गोचरमिति**—तद् (घटादि) विषयिणी प्रमितिरेव, **तिरोधिश्च**—(घटादौ) तिरोधानपदवाच्या अवस्था तु, **एतस्याः**—तद्विषयकप्रमितेः, **विरतिः**—अभावः, **अजडे ब्रह्मणि पुनः**—'अजड'पदवाच्ये ब्रह्मणि तु, **स्फुरणम्**—प्रकाशात्मिका स्थितिः, **चिन्मात्रं स्वरूपम्**—निर्विशेषचैतन्यस्वरूपं ब्रह्मैव, न प्रतीतिरूपं तत् (अवेद्यत्वात् तस्य), **अपिधिश्च**—ब्रह्मणः तिरोधानरूपा स्थितिस्तु, **स्वनिधनम्**—ब्रह्मानतिरिक्तः यः प्रकाशः तस्य विनाश एव (ब्रह्मविनाशपर्यवसितः), **अपरथा**—घटादाविव स्वरूपप्रकाश-तत्तिरोधानयोरभ्युपगमे, **ब्रह्म जडं वा स्यात्**—परं ब्रह्मापि घटादिवत् जडमेव भवेत्, **अपिधिविधुरं वापि**—असंस्पृष्टतिरोधानमेव वा भवेत् ; जडत्व-स्वरूपनाशपक्षयोरनिष्टत्वात् ॥ ६१ ॥

पुरोवर्तिद्रव्यस्फुरणमपि रूप्यभ्रमसहं
न शुक्तित्वस्फूर्तिर्भ्रमविहतये या प्रभवति ।
यदि ब्रह्म प्राग्वन्न खलु जगदध्यासविरतिः
क्व सिध्येदध्यासो यदि भवति शुक्तित्वसदृशम् ॥ ६२ ॥

पुरो ···· स्फुरणम्—चक्षुःसंनिकृष्टशुक्त्यादिधर्मिणां भानम्, **रूप्यभ्रमसहमपि**—स्वविषयभूतशुक्त्यादिधर्मिणां रजतत्वप्रकारकं रजताभेदप्रकारकं वा भ्रमं सहत एव ; न निरुणद्धि,

न शुक्तित्वस्फूर्तिः—पुरोवर्तिनि शुक्तित्वस्य प्रतीतिः परं, न रजतभ्रमं सहते, (कुतः ?) **या**—शुक्तित्वस्फूर्तिः, **भ्रमविहतये प्रभवति**-रजतभ्रमानुत्पादाय समर्था भवति, (विशेषधर्मद्वयस्य विरोधात्; सामान्य-विशेषात्मकधर्मद्वयस्य अविरोधाच्च) **ब्रह्म यदि प्राग्वत्**—स्वप्रकाशैकरसं स्फुरणात्मकं ब्रह्म यदि इदंत्वरूपसामान्यधर्मस्फुरणतुल्यम्, तर्हि ; (तस्य भ्रमसहत्वात्) **न खलु जगदध्यासविरतिः**—प्रपञ्चाध्यासरूपस्य संसारबन्धस्य विश्रान्तेरप्रसङ्ग इति मोक्षानुपपत्तिरेव, **यदि भवति शुक्तित्वसदृशम्**—पुरोवर्तिनि शुक्तित्वरूपविशेषधर्मस्फुरणतुल्यं भवति चेत्, स्फुरणाभिन्नं स्वप्रकाशैकरसं ब्रह्म, तर्हि !; **अध्यासः**—संसारात्मकः जगदध्यासः, **क्व सिध्येत् ?**—कस्मिन् अधिष्ठाने उत्पद्येत ? ('शुक्तिः, रजतम्' इत्येवं भ्रमः यथा असम्भावितः, तथा विशेषस्फुरणे, 'ब्रह्म जगत्' इत्येवं भ्रमानुदयात्) ।। ६२ ।।

इदं मायावादे विविधमुदितं दूषण[1]मिह[1]
स्वयंज्योतिर्ब्रह्म व्यपगतविशेषं यदि कथम् ? ।
मते तस्मिन्नस्मद्दृशि तु सविशेषः पुरुष इ-
त्यतद्रूपारोपस्तदुपरतिरित्यादि घटते ।। ६३ ।।

इदमुदितम्—एतावद्भिः कतिपयैः श्लोकैर्वर्णितम्, **विविधं दूषणम्**—नानाप्रकाराश्रितं दोषप्रदर्शनम्, **मायावादे**—अद्वैतसमयं विषयीकृत्य प्रवृत्तमभवत्, **इह**—अस्मिन्नेव दर्शने (अन्यदपि दूषणजातं समस्ति) **स्वयं ज्योतिः ब्रह्म**—स्वप्रकाशैकरसं परं ब्रह्म, **यदि व्यपगतविशेषम्**—निर्विशेषचिन्मात्रात्मकं यदि स्यात् तर्हि ! **अस्मद्दृशि तु**—अहन्त्वेन स्फुरणरूपे ब्रह्मण्येव, **सविशेषः पुरुष इति**—विशेषधर्मावगाही 'पुरुष' इत्युल्लेखयोग्यः ('पुरुषत्व'रूपविशेषविषयकः) **अतद्रूपारोपः**—ब्रह्मण्यविद्यमानधर्मारोपः, (संसारः) **तदुपरतिः**—तादृशारोपनिवृत्तिः, (मोक्षः) **इत्यादि**—एवमादिकं बन्धमोक्षोपपादकं सर्वं व्यवहारजातम्, **तस्मिन् मते**—मायावादपक्षे, **कथं घटते**—कथं सङ्गतं भवेत् ? (मिथो व्याहतिमयत्वात् सर्वव्यवहारस्य) ॥ ६३ ॥

अधिष्ठाने पुंसि स्वयमहमिति स्फूर्जति वपुः
प्रकाराध्यारोपः पशुरहमहं मानुष इति ।
अणुत्वादौ देहव्यतिकरविदूरे च [2]विहिते[2]
तिरोधिः सङ्कोचो ननु भवति तद्गोचरधियः ॥ ६४ ॥

---

[1] मित्र—वा. [2] पिहिते—वा.

अहमिति—अहंत्वेन रूपेण, **स्वयं स्फूर्जति**—प्रकाशकान्तरनैरपेक्ष्येण स्वत एव भासमाने, **पुंसि अधिष्ठाने**—चेतनाख्ये आश्रये, **अहं पशुः अहं मानुष इति**—'पशुरहम्, मनुष्योऽहमिति, **वपुः प्रकाराध्यारोपः**—देहगतपशुत्वमनुष्यत्वादिधर्माणां वस्तुतोऽहमर्थेऽविद्यमानानां भ्रमः (सम्भवति), **विहिते**—आगमैकज्ञाप्ये, **देह....विदूरे च**—सर्वथा देहाश्रयत्वानर्हे च, **अणुत्वादौ**—अणुत्व-नित्यत्व-निरवयवत्वादिधर्मे आत्मगते, **तिरोधिः**—तिरोधानम्, (स्फुरतोऽहमर्थस्य नियतप्रकारभावेनाऽप्रकाशः) इत्येतत्, **तद्गोचरधियः**—तत्तद्धर्मविशिष्टात्मविषयिण्याः आत्मधर्मभूतायाः बुद्धेः, **सङ्कोचो भवति ननु**—सङ्कोचपदवाच्योऽवस्थाविशेष एव भवितुमर्हति ॥ ६४ ॥

अहंत्व-ज्ञातृत्वे ननु पुरुषधर्मौ न तु वपु-
गुणौ वस्तुस्थित्या तदपि न तथात्वं ननु तयोः ।
अनादेरध्यासादवगतमिदानीं श्रुति-नय-
स्वयोगाद्यैरन्यः स्फुरति वपुरादेस्तु पुरुषः ॥ ६५ ॥

अहंत्व-ज्ञातृत्वे—प्रत्यक्त्वं ज्ञानधर्मित्वं च, **पुरुषधर्मौ ननु**—चेतनाश्रयौ धर्माविव, **वस्तुस्थित्या**—वस्तुतः, **न तु वपुगुणौ**—नैव देहधर्मौ, **तदपि**—तथापि, **तयोः**—अहंत्वज्ञातृत्वयोर्द्वयोरपि, **तथात्वम्**—देहगुणत्वराहित्यम्, पुरुषैकाश्रयत्वं वा, **अनादेरध्यासात्**—अनादिसंसरणतः प्राप्तात् देहात्मभ्रमात् हेतुभूतात्, **न अवगतं खलु**—नैव ज्ञातमासीत्, **इदानीं**—सुकृतपरिपाकेन लब्धे विशिष्टेऽस्मिन् जन्मनि, **पुरुषः**—चेतनः, **श्रुति-नय-स्वयोगाद्यैः**—विविक्ततत्त्वग्राहिकाभिः श्रुतिभिः, तदनुरोधिभिः समीचीनैस्तर्कैः, (तथा) ज्ञानयोगेन चात्मावलोकनसाधनेन, **वपुरादेरन्यः**—देहेन्द्रियमनः-प्राण-धीभ्यो विविक्तः सन्, **स्फुरति**—प्रकाशते ॥ ६५ ॥

जीवन्मुक्तिमतं न जीवति यतः शस्त्रेण शास्त्रात्मना
लूनं लोकविरुद्धसिद्धि च यतस्तेनेदमादावपि ।
आपस्तम्बनिरस्तमौपनिषदं प्रस्थानमातस्थुषा-
माचार्योऽपि निराचकार खलु तद् द्वैपायनाख्यो मुनिः ॥ ६६ ॥

जीवन्मुक्तिमतम्—(लब्धज्ञानस्य) 'जीवद्दशायामेव मोक्षो लभ्यते' इतीदृशमद्वैतिनां मतम्, **न जीवति**—नैव स्वरूपं लभते, **यतः**—यस्माद्धेतोः, **शास्त्रात्मना शस्त्रेण**—देहपातमात्रावधिकविलम्बबोधकशास्त्ररूपेण शस्त्रतुल्येन साधनेन, **लूनम्**—भग्नस्वरूपम्, **यतः लोकविरुद्धसिद्धि च**—प्रत्यक्षप्रतिबद्धनिश्चयं च, (तस्यापि तापत्रयाभिहतिमत्वात्), **तेन**—तदेव

कारणत्वेन प्रदर्श्य, **आदावपि**—इदानीं उपलभ्यमानतया रीत्या दर्शनानां प्रवृत्तेः पूर्वमेव, **इदं आपस्तम्बनिरस्तम्**—जीवन्मुक्तिमतं 'बुद्धे चेत् क्षेमप्रापणम्; इहैव न दुःखमुपलभेत' इति सूत्रितवता आपस्तम्बाख्येन मुनिना निराकृतम्, **औपनिषदं प्रस्थानमातस्थुषामाचार्यः**—श्रुत्यन्तमार्गावलम्बिनां वैदिकानां प्रवर्तकः, **द्वैपायनाख्यो मुनिरपि**—कृष्णद्वैपायननामा ऋषिरपि, **तत्**—जीवन्मुक्तिमतम्, **निराचकार खलु**—'तदाऽऽपीतेः संसारव्यपदेशात्' इति स्वासम्मतं स्पष्टीचकार खलु ॥ ६६ ॥

क्व वेदान्ताः काभी निहितमतयः शङ्करमते
वदन्तः प्रामाण्यं भ्रमविलसितं वेदवचसाम् ।
अहो यद्वत् बुद्धग्रथितफणितीनामथ च ते
कलिग्राहग्रस्तैरगणिषत वेदान्तिन इति ॥ ६८ ॥

वेदान्ताः क्व?—त्रय्यन्तगिरः क्व? **वेदवचसाम्**—श्रुतिवचनानाम्, **भ्रमविलसितम्**—(भ्रमाधीनम्) अविद्याविजृम्भणमेव, **प्रामाण्यं वदन्तः**—प्रमाणपदवाच्यत्वं कथयन्तः, **शङ्करमते निहितमतयः**—शाङ्करे मायावादे विश्वस्तभावाः, **अमी क्व?**—अद्वैतिनः क्व?, (तन्मते वेदान्तप्रामाण्यं दुःस्थमेव) **बुद्धग्रथितफणितीनां यद्वत्**—बुद्धसङ्कलितानां वाचां यादृशं प्रामाण्यं तादृशमेव वेदवचसामपि, **अहो**—विषादावहमेवैतत्, **अथ च**—एवं स्थितावपि, **ते वेदान्तिन इति**—अद्वैतिनः वेदान्तवादिन इत्येव, **कलिग्राहग्रस्तैः**—कलिरूपेण तत्वतिरोधायकेन आवृतमतिभिः **कैश्चित्**, **अगणिषत**—परिगणनां प्राप्ताः विजृम्भन्ते ॥ ६७ ॥

—o—

(3) अधिकरणसारावलिः (श्लो ६९–७६)

(244) जीवादत्यन्तभिन्नः पर इति बहुधा व्याहरत् सूत्रकारो
भेदाभेदश्रुतीनां घटकनिगमतः शात्रवं च व्यपोढम् ।
उत्क्षेपे समाधावपि न समधिको हेतुरत्राऽस्ति सत्यं
पादांशाद्युक्तिमुद्यद्बहुकुमतिमतक्षित्तये त्वंशचिन्ता ॥ ६९ ॥

सूत्रकारः—द्वैपायनः, **परः**—परमात्मा, **जीवात्**—प्रत्यगात्मनः सकाशात्, **अत्यन्तभिन्नः**—तत्वान्तरत्वपर्यवसितपार्थक्यवान्, **इति बहुधा व्याहरत्**—इत्येवं बहुषु सूत्रेषु अनेकवारमकथयत्, **भेदाभेदश्रुतीनाम्**—'भोक्ता भोग्यं प्रेरितारम्', 'तत्त्वमसि' इत्येवमादीनां,

(जीवपरयोः) मिथोभेदस्य अभेदस्य च बोधकानां वेदगिराम्, **शात्रवं च**—आपाततः प्रतिपन्नं विरुद्धत्वमपि, **घटकनिगमतः**-अन्तर्यामिब्राह्मण-सौबालादिश्रुतिवचांस्यादाय, **व्यपोढम्**—(सूत्र-कारेण 'अवस्थितेरिति काशकृत्स्नः' इत्यादिन्यायप्रदर्शनतः) परिहृतमभवत्, **उक्ताक्षेपे समाधा-वपि**—प्राङ्निरूपितपूर्वपक्ष-सिद्धान्तस्वरूपे च, **समधिकः हेतुः**—उक्तापेक्षया अतिशयितः अतिरिक्तो वा हेतुः (युक्तिविशेषः), **अत्र नास्ति**—अस्मिन्नंशाधिकरणे न प्रदर्शितो वर्तते, (एवं सति अधिकरणारम्भः कुतः इति शङ्कने) **सत्यम्**—यद्यप्याक्षेपोऽयं युज्यते ; अथापि, **पादांशा....क्षिप्तये तु**—जीवविषये श्रुतौ 'पाद'शब्दस्य, (तथा) गीतायां 'अंश' शब्दस्य च दर्शनेन भ्राम्यतां अन्यमतीयानां मतेषु दोषज्ञापनायैव, **अंशचिन्ता**—अंशाधिकरणीयः अंशस्वरूपस्य विचारः कृतः ।। ६९ ।।

(245) अंशत्वं रामकृष्णप्रभृतिषु घटतां विग्रहांशावतारा-
ज्जीवे ब्रह्मांशतोक्तिर्न तु निरवयवं ब्रह्म वक्तुर्घटेत ।
ब्रह्माऽतश्चित्समष्टिः प्रतिपुरुषमिह त्वंशता चेत्ययुक्तं
विश्वस्रष्टुर्बहु स्यामिति बहुभवनध्यातुरेकत्वसिद्धेः ।। ७० ।।

अंशत्वम्—एकदेशत्वरूपं अंशत्वम्, **राम....तिषु**—राम-कृष्णादिभगवद्विभवमूर्ति-भेदेषु, **विग्रहांशावतारात्**—परमपदस्थपरवासुदेवदिव्यमूर्त्यैकदेशावताररूपत्वात्, **घटताम्**—युज्यतां नाम, **ब्रह्म निरवयवं वक्तुः**—ब्रह्मणो निरंशतावादिनो वेदान्तिनः, **जीवे ब्रह्मांश-तोक्तिः**—नित्ये पृथक्त्वभूते प्रत्यगात्मनि ब्रह्मैकदेशत्ववर्णना, **न तु घटेत**—नैव सर्वथा युज्येत, **अतः**—अंशत्ववचनस्य सङ्गमनीयत्वात्, **ब्रह्म**—जीवनिरूपितांशित्वाश्रयभूतं ब्रह्मपदाभि-धेयं वस्तु, **चित्समष्टिः**—सकलचेतनसङ्घातरूपमेवेति न्याय्यम्, **प्रतिपुरुषम्**—एकैकस्मिन्नपि जीवात्मनि, इह **अंशता च**—समष्टिब्रह्मनिरूपितं एकदेशत्वमपि, (सेनैकदेशे सेनांशत्वमिव वनैकदेशे वृक्षादौ वनांशत्वमिव च) **इत्ययुक्तम्**—एवं पूर्वपक्षीकरणं न साधु, **बहु स्यामिति बहुभवनध्यातुः**—'बहु स्याम्' इति स्वस्यैव बहुधा भवनं यथा स्यात्तथा सङ्कल्पयितुः, **विश्वस्रष्टुः**—जगत्कारणस्य ब्रह्मणः, **एकत्वसिद्धेः**—एकसङ्ख्याश्रयताया एव श्रुतितोऽवगमात् (समष्टिरूपत्वादेः श्रुत्यादिविरोधात्) ।। ७० ।।

(246) व्योमैकं स्याद् घटाद्यैः पृथगुपधिगणैर्ब्रह्म बह्वंशमेवं
तत्रोपाधिव्यपाये भवभृदयमियाद् ब्रह्मतामित्ययुक्तम् ।
स्वानर्थारम्भदौःस्थ्यात् प्रतिनियतगुणप्रत्यभिज्ञाद्यदृष्टेः
छिन्नांच्छिन्नांशचिन्तोदितबहुविहतेः साम्यशब्दाच्च मुक्तौ ॥ ७१ ॥

एकं व्योम—वस्तुतो नानात्वरहितमपि गगनम्, **घटाद्यैः उपधिगणैः**—घट-मठादिरूपैः नानात्मकैरुपाधिस्तोमैः, **पृथक् स्यात्**—घटाकाश-मठाकाशादिरूपं प्राप्तमिव सत् नानाव्यवहारास्पदं भवेत्, **एवं**—आकाशे प्रदर्शितया रीत्या, **ब्रह्म**—परं ब्रह्मापि, **बह्वंशम्**—वस्तुतो निरंशमपि उपाधिकृतांशबहुत्ववत्, **तत्र**—औपाधिकांशबहुत्ववति ब्रह्मणि, **उपाधिव्यपाये**—नानाजीवव्यवहारजनकदेहाद्युपाधिविगमे सति, **अयं भवभृत्**—ब्रह्मांशरूपोऽयं संसारी जीवः, **ब्रह्मतां इयात्**—निरुपाधिकं ब्रह्मरूपत्वं प्राप्नुयात्, **इति अयुक्तम्**—एवं औपाधिकब्रह्मजीववादिनां शङ्कनं असाधु, **स्वान....दौस्थ्यात्**—'स्वस्य संसारिताप्राप्तिरूपमनर्थं जानद् ब्रह्म, तादृशं सृष्टिकर्म कथं प्रारभेत?' इत्यस्य अपरिहारात्, **प्रति....घदृष्टेः**—नानाविधतत्तद्देहोपहिते (ब्रह्मणि) तत्तद्देहादिनियतसुखदुःखाद्यनुभवासिद्धेः (सौभर्यादिष्विव) (इदं मतमयुक्तम्) **छिन्ना....विहतेः**—जीवरूपोऽर्थः पूर्णस्य ब्रह्मणः खण्डितः अंशो वा? अखण्डितोऽप्यंशो वा? इत्येवमादिविचारायत्तनैकविधव्याघातप्रसङ्गादपि (मतमिदमनुचितम्) **मुक्तौ**—जीवस्य मोक्षकाले, **साम्यशब्दाच्च**—जीवस्य ब्रह्मसमतापत्तेः नियतभेदघटितायाः एव 'परमं साम्यमुपैति' इति श्रुतावुक्तेरपि (उपहितब्रह्मजीववादोऽयमयुक्तः ॥ ७१ ॥

(247) मायोदन्वत्यपारे प्रतिफलति मृषावीचिषु ब्रह्मचन्द्रः
छायांशास्तस्य जीवा इति कतिचिदुशन्त्येत[1]दालोचनीयम्[1] ।
न ब्रह्म द्रष्टृ तेषामचिदपि [2]हि[2] तथा स्वेन कल्प्यो न जीवः
क्लृप्तेः प्राक् स्वात्महानेस्त्रितयसमधिकः कल्पकस्तत्र मृग्यः ॥ ७२ ॥

अपारे मायोदन्वति—अलभ्यतीरे मायात्मके सागरे, **मृषावीचिषु**—(प्रतिबिम्बनार्हासु) वीचिवत् दृश्यमानासु मिथ्याभूतासु बुद्धिपरिणतिषु, **ब्रह्मचन्द्रः**—चन्द्रबिम्बसदृशं ब्रह्म, **प्रतिफलति**—प्रतिबिम्बभावेन भासते, **तस्य**—प्रतिफलतो ब्रह्मणः, **छायांशाः**—प्रतिच्छायासदृशांशतावन्तः, **जीवाः**—जीवात्मानः (संसारिणः); (न वस्तुतोऽन्ये, ब्रह्म-जीवयोः बिम्बप्रतिबिम्बभावः इत्यर्थः) **इति कतिचित् उशन्ति**—एवं केचन अद्वैतिनः अङ्गीकुर्वते, **एतत् आलोचनीयम्**—इदं मतं चिन्त्यम्, न तु अभ्युपगमार्हम्; **हि**—यतः, **तेषां द्रष्टृ**—प्रतिच्छायारूपाणां ब्रह्मांशानां कल्पकम्, **न ब्रह्म**—बिम्बभूतं ब्रह्मैव न भवितुमर्हम्, (निर्विशेषशुद्धचैतन्ये तस्मिन् कल्पनायोगात्) **अचिदपि न**—अचिद्भूतमपि किञ्चित् न द्रष्टृ भवितुमलम्, (द्रष्टृत्वस्य चेतनैकधर्मत्वात्) **तथा**—ब्रह्माचिद्द्वयमिव यथा तथैव, **स्वेन**—प्रतिच्छायाभूतेन जीवेनापि, **जीवः कल्प्यो न**—स्वात्मा जीवः कल्पनार्हो नैव स्यात्, **स्वात्महानेः**—कल्पनातः

[1] दुन्मत्तगीतम्—सा. र. [2] न—सा. र.

पूर्वं कल्पकस्यासिद्ध्या कल्पनाया अनिष्पत्तेः, **त्रितयसमधिकः कल्पकस्तु**—एतत्त्रयातिरिक्तः जीवकल्पकः परम्, **तत्र मृग्यः**—तस्मिन् मते अन्वेष्य एव; अतः इदं मतमपि दुःस्थमेव ॥ ७२ ॥

(248) सन्मात्रं ब्रह्म सर्वानुगतमिह पुनर्नित्यसिद्धास्त्रयोंऽशाः
जीवेशाचित्प्रभेदादिति च कतिचनेदं च नोदञ्चनीयम् ।
सत्तामात्रानुवृत्तेस्तदधिकवपुषः शासितुर्ब्रह्मतोक्ते-
ब्रह्मत्रैविध्यवाक्यं निरवयवतया निश्चितेऽन्याशयं स्यात् ॥ ७३ ॥

सन्मात्रं ब्रह्म—श्रुतिषु सदेकाकारतया प्रतिपन्नं ब्रह्मतत्त्वम्, **सर्वानुगतम्**—सर्वतत्त्वेषु अनुवृत्ततया भासमानम्, **इह पुनः**—अस्मिन्नेव ब्रह्मतत्त्वे, **जीवेशाचित्प्रभेदात्**—जीव ईश्वराचेतनाख्यं विशेषं (मिथोविलक्षणं रूपम्) समाश्रित्य, **त्रयः अंशाः**—त्रयो भागाः, **नित्यसिद्धाः**—कस्यापि कल्पनां कारणतां वा अनपेक्ष्यैव अनादितः क्लृप्ताः, **इति च कतिचन**—एवमपि केचिदद्वैतिनः अभिप्रयन्ति, **इदञ्च न उदञ्चनीयम्**—एतन्मतमपि नैव संमान्यम्, **सत्तामात्रानुवृत्तेः**—अस्तीतिव्यवहारविषयतारूपस्य सत्तारूपस्य धर्मस्यैव केवलं त्रिष्वप्यनुगतेः, (युक्तत्वात्), **तदधिकवपुषः**—सत्ता-सदुभयातिशयितस्वरूपस्य, **शासितुः**—सर्वनियन्तुरात्मविशेषस्यैव, **ब्रह्मतोक्तेः**—ब्रह्मपदाभिधेयतायाः श्रुत्यन्तेषु प्रतिपादनात्, **निरवयवतया निश्चिते**—निरंशतया निर्णीते अन्वयि, **ब्रह्मत्रैविध्यवाक्यम्**—'त्रिविधं ब्रह्ममेतत्' इति वाक्यम्, **अन्याशयं स्यात्**—विशिष्टवस्त्वेकदेशत्वाभिप्रायकं भवेत् ॥ ७३ ॥

(249) मेरोरंशः किरीटप्रभृतिभिरिति नयान्नित्यभिन्नेंऽशतोक्तिः
साजात्याल्पत्वमूला गमयितुमुचितेत्यागमासन्नपक्षे ।
अंशोक्तिः स्यादमुख्या स हि ! निपुणधियामेकवस्त्वेकदेशः
तस्माज्जीवो विशिष्टे भगवति गुणवत् तत्प्रकारोंश उक्तः ॥ ७४ ॥

किरीटप्रभृतिः—सौवर्णः किरीटादिरर्थः, **मेरोरंशः**—सौवर्णस्य मेरुपर्वतस्यांशभूतः, **इति नयात्**—इत्येवंविधव्यवहाररीतिमनुरुध्य चिन्तने, **नित्यभिन्ने**—स्वाभाविकात्यन्तिकभेदवति वस्तुनि व्यवह्रियमाणा, **अंशतोक्तिः**—अंशत्वगीः, **साजात्याल्पत्वमूला**—तत्समानजातीयतां तदपेक्षया अल्पतां च निमित्तीकृत्य प्रवृत्तेति, **गमयितुमुचितेति**—कथंचिन्नेतुमर्हा इत्येवम्, **आगमासन्नपक्षे**—भगवद्गुणचिन्तनतः श्रुतिनिकटवर्तिनां मते, **अंशोक्तिः**—'जीवोंऽशः' इति श्रुत्यादिगता भाषा, **अमुख्या स्यात्**—गौणी स्यात्, **हि**—यतः, **निपुणधियाम्**—कुशलमतीनां मते, **सः**—अंशपदार्थः, **एकवस्त्वेकदेशः**—विशेषणविशिष्टस्यैकस्य वस्तुनः

एकदेशरूप एव, **तस्मात्**—उक्ताद्धेतोः, **विशिष्टे भगवति**—चेतनाचेतनाख्यापृथक्सिद्धविशेषणयुते परे ब्रह्मणि, **गुणवत् तत्प्रकारः**—द्रव्ये गुण इव नियतप्रकारभूतोऽर्थ एव, **अंश उक्तः**—अंशशब्देन व्यवहृतः ॥ ७४ ॥

(250) उक्तं नित्योपलब्धिप्रभृति परमते पूर्वमेव ह्यनिष्टं
भूयस्तादृक् प्रसङ्गः प्रकथित इह किं भोगसङ्कीर्ण[1]तादेः[1] ।
मैवं पूर्वं हि बाह्यप्रसृतिमशमयत् साम्प्रतं ब्रह्मवाद-
व्याजोत्सिक्तान् कुदृष्टीन् परिहृतिरिति च स्याद् भविष्यन्नयेषु ॥७५॥

परमते—आत्मनो विभुत्ववादिनां मते, **नित्योपलब्धिप्रभृति**—अहमिति सर्वदा भानं सर्वत्र भानमित्यादि, **अनिष्टम्**—अनभिमतार्थप्रसञ्जनम्, **पूर्वमेवोक्तम्**—ज्ञाधिकरणे एव वर्णितम्, **भूयः**—पुनरपि, **इह**—अंशाधिकरणे, **तादृक्**-परमतनिरासपरः, **भोगसङ्कीर्णतादेः प्रसङ्गः**—भोगसाङ्कर्यापादनरूपः (दूषणव्यापारः) **किं प्रकथितः**—किमर्थं स्पष्टीकृतः, (पौनरुक्त्यात्) इति शङ्कने, **मैवम्**—एवं शङ्कनं नोचितम्, **हि**—यतः, **पूर्वम्**—ज्ञाधिकरणे, **बाह्यप्रसृतिम्**—श्रुत्यननुरोधिनां साङ्ख्यादीनां प्रसारम्, **अशमयत्**—क्षपयामास, **साम्प्रतम्**—इदानीं तु, **ब्रह्मवादव्याजोत्सिक्तान्**—व्याजमात्रतः औपनिषदं ब्रह्मवादमवलम्ब्य 'वेदान्तिनो वयम्' इति प्राप्तदर्पान्, **कुदृष्टीन्**—श्रुतिविरुद्धाभिप्रायवतः अद्वैतमतीयान् अशमयत्; (अतो न पौनरुक्त्यम्), **इति परिहृतिश्च**—इत्येवं परिहारविधानमपि, **भविष्यन्नयेषु च स्यात्**—आगामिष्वप्यधिकरणेषु अन्वयार्हं भवेत् ॥ ७५ ॥

(251) मिथ्याज्ञानादिचक्रे मरुति भगणवद् घूर्णमानस्य जन्तोः
[2]प्रत्यक्त्वप्र[2]बोधाद् भवपरिहरणे सर्वतन्त्राविगीते ।
शुद्धात्मज्ञानगर्भां परभजनभिदामङ्गभेदांश्च वक्ष्यन्
मीमांसारम्भसिध्यद्वपुषमपि पुनः शोधयामास जीवम् ॥ ७६ ॥

मिथ्याज्ञानादिचक्रे—चक्रवत् सान्तत्येन परिवर्तमाने अतस्मिंस्तद्बुद्धि-तदधीनकर्म-तदधीनवासना-तज्जन्यनिर्विवेकरुचिविशेष-तन्निबन्धनावर्जनीयप्रकृतिसम्बन्धपरम्परात्मके कार्य-कारणस्तोमे, **मरुति भगणवत्**—वायुचक्रे ग्रहनक्षत्रादिज्योतिर्मण्डलमिव, **घूर्णमानस्य**—अवशतया बम्भ्रम्यमाणस्य, **जन्तोः**—संसरतो जीवजातस्य, **प्रत्यक्त्वावबोधात्**—स्वस्वरूपयाथात्म्य-विज्ञानरूपात् हेतोः, **भवपरिहरणे**—संसरणचक्रप्रहाणे, **सर्वतन्त्राविगीते**—सकलदर्शनानां विप्रतिपत्तेरनास्पदे स्थिते सत्यपि, **शुद्धात्मज्ञानगर्भाम्**—अचिद्वियुक्तात्मचिन्तनघटिताम्,

---

[1] तादिः—सा. र. [2] प्रत्यक्त्वाव—सा. र.

परभजनमिदाम्—वैविध्यवतीं परमात्मोपासनाम्, **अङ्गभेदांश्च**—तदुपयोग्यङ्गकलापविशेषांश्च, **वक्ष्यन्**—तृतीये अध्याये न्यायव्युत्पादनपूर्वकं विचारयिष्यन्, बादरायणः, **मीमांसा.... वपुषमपि जीवम्**—कर्ममीमांसारम्भे एव यज्ञादिफलभोक्तृत्वाय देहाद्यतिरेकेण, निश्चित-स्वरूपमपि जीवात्मानम्, **पुनः शोधयामास**—अस्मिन् शारीरकेऽपि अपवर्गार्हतानिश्चयसम्पत्तये भूयो विचारितवान् ॥ ७६ ॥

—o—

(4) अधिकरणार्थसङ्ग्रहः

अंशाधिकरणे—'ज्ञाज्ञौ द्वावजावीश-नीशौ' इत्यादिवाक्ये जीव-ब्रह्मणोः भेददर्शनात् 'परमपुरुषादत्यन्तभिन्नो जीवः'; अथवा 'तत्त्वमसि' इत्यादिवाक्येषु जीवब्रह्मणोः ऐक्योपदेशात् 'अविद्योपहितं ब्रह्मैव जीवः'—इत्याशङ्क्य,

नानात्वव्यपदेशात् ऐक्योपदेशाच्च अत्यन्तभेद-स्वरूपैक्ययोः अनुपपन्नत्वात् अविद्योपहितब्रह्मण एव जीवत्वे सुखदुःखभोगव्यतिकरप्रसङ्गाच्च 'परमात्मनः विशेषणतया अंशः जीवः'—इत्युक्तम् ।

—o—

(5) नयसङ्गतिमालिका

परायत्ते च कर्तृत्वे परांशत्वं विरुध्यते ।
इति प्राप्तेऽपवादोऽथ स्यादंशाधिकृतिः पुनः ॥ १०१ ॥

इति अंशाधिकरणम् ॥ ७ ॥

—o—

पादोपसंहारः

(1) शारीरकन्यायकलापसङ्ग्रहः ॥

(90) कार्यता वियदादीनां तस्याश्चाऽव्यवधानता ।
उत्पत्त्यभावो जीवस्य ज्ञातृता कर्तृताऽपि च ॥ ३२ ॥

(91) कर्तृतायाः परापेक्षा परं प्रत्यंशताऽपि च ।
इत्थमर्थास्त्वमी सर्वे पादेनाऽनेन चिन्तिताः ॥ ३३ ॥

1) **वियदादीनां कार्यता**—आकाशाद्यर्थानां परमात्मनः उत्पत्तिः, 2) **तस्याश्च अव्यवधानता**—परमात्महेतुकवाय्वाद्युत्पत्तेरपि पारम्परिकत्वं विहाय आनन्तर्यम्, 3) **जीवस्य उत्पत्त्यभावः**—जीवात्मनः नित्यत्वम्, 4) **जीवस्य ज्ञातृता**—जीवात्मनः ज्ञानधर्मकत्वम्, 5) **जीवस्य कर्तृताऽपि च**—जीवात्मनः विहित-निषिद्धक्रियानिर्वोढृत्वरूपं स्वातन्त्र्यम्,

6) **कर्तृतायाः परापेक्षा**—जीवगतकर्तृत्वस्य परमात्माधीनता, 7) **परं प्रति जीवस्य अंशताऽपि च**—परमात्मनिरूपितं जीवस्य अंशत्वमपि, **इत्थम्**—अनया रीत्या, **अमी सर्वे अर्थाः**—उक्ताः सर्वे सप्त अर्थाः, **अनेन पादेन**—द्वितीय-तृतीयेन चरणेन, **चिन्तिताः**—न्यायतो निर्णीताः ॥ ३२-३३ ॥

(92) प्रथमश्च द्वितीयश्च तृतीयाश्चाऽत्र[1]सङ्गताः[1] ।
तृतीयशेषाश्चत्वारः प्रसङ्गा[2]स्त्विह[2] चिन्तिताः ॥ ३४ ॥

आदिमास्त्रयो न्यायाः अस्मिन् साक्षात्सङ्गतिमन्तः, अवशिष्टाश्चत्वारो न्यायाः तृतीयस्य न्यायस्य उपकारकाः सन्तः प्रसक्तानुप्रसक्त्या निरूपिताः साक्षात्सङ्गतिरहिताः ॥ ३४ ॥

—o—

(२) अधिकरणसारावलिः

(252) क्लृप्तिर्व्योमादिकेऽपि क्रमभुवि च विभोः प्राच्यतत्त्वैर्विशिष्टा-
ज्जीवस्यौपाधिकौ तु प्रजननविलयौ चिद्घनज्ञातृताऽस्य ।
कर्तृत्वं पारतन्त्र्यं गुणतनुनयतो विश्वरूपांशता चे-
त्याम्नायान्योन्यबाधव्यपनयनवियत्पादसाध्यानि सप्त ॥ ७७ ॥

1) **व्योमादिकेऽपि**—आकाशादावपि, **विभोः क्लृप्तिः**—परमात्मन एवोत्पत्तिः, 2) **क्रमभुवि च**—पारम्परिकसृज्यतया श्रूयमाणेऽपि वाय्वग्न्यादौ तत्त्वजाते, **प्राच्यतत्त्वैर्विशिष्टात् विभोः क्लृप्तिः**—पूर्वश्रुताकाशादितत्त्वशरीरकात् परमात्मनः उत्तरतत्त्वानामुत्पत्तिः, 3) **जीवस्य**—प्रत्यगात्मनः, **औपाधिकौ प्रजननविलयौ**—देहागम-विगमरूपोपाध्यायत्तौ उत्पत्ति विनाशव्यवहारौ, 4) **चिद्घनज्ञातृता अस्य**—ज्ञानैकाकारत्वसहकृतं ज्ञानाश्रयत्वमस्य जीवस्य, 5) **कर्तृत्वम्**—जीवात्मनः प्राप्तक्रियायां स्वातन्त्र्यम्, 6) **पारतन्त्र्यम्**—जीवात्मनः परमात्मनिघ्नं कर्तृत्वम्, 7) **गुण-तनुनयतः**—द्रव्यं प्रति गुणस्येव, आत्मानं प्रति देहस्येव च, **विश्वरूपांशता च**—जीवस्य विश्वशरीरिणं परमात्मानं प्रत्यंशत्वमपि, **इति**—उक्तरीत्या, **आम्नाया....साध्यानि**—श्रुतिषु भासमानमिथोविरोधपरिहारपरेण वियत्पादेन साधनीयानि विषयस्वरूपाणि, **सप्त**—सप्तसङ्ख्यानि वर्तन्ते ॥ ७७ ॥

—o—

इति पादोपसंहारः

इति द्वितीयाध्याये तृतीयः पादः ॥ ३ ॥

—o—

[1] सङ्गतः—ख. [2] स्त्विति—ग. त्परि—ख.

॥ श्रीः ॥

श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ।

द्वितीयाध्यायस्य चतुर्थः पादः ॥ २–४ ॥

(61) प्राणोत्पत्त्यधिकरणम् ॥ २–४–१ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

(93) न हि जननमिन्द्रियाणां प्राणा अग्रेऽभवन्निति श्रुत्या ।
नैवं प्राणस्तु परः प्रतिज्ञया गौणमेव बहुवचनम् ॥ ३५ ॥

इन्द्रियाणाम्—जीवोपकरणभूतानामक्षाणाम्, **जननं न हि**—कार्यत्वं नैव विद्यते, **प्राणा अग्रेऽभवन्निति श्रुत्या**—श्रुतितः प्राणापरपर्यायाणामिन्द्रियाणां सृष्टिपूर्वकालवृत्तित्वप्रतिपादनात्, (इति पूर्वपक्षे), **नैवम्**—एवं शङ्कनं असाधु, **प्राणः परस्तु**—श्रुतिस्थप्राणशब्दार्थः परमात्मैव, न इन्द्रियाणि ; 'सदेव सोम्येदमग्र आसीदेकमेव' इति श्रुतिगतैकमात्रसत्ताप्रतिज्ञया, (प्राणानां पूर्वकालसत्तायाः बाधात्) **बहुवचनम्**—'प्राणाः' इति, 'ऋषयः' इति च बहुवचनं तु, **गौणम्**—अमुख्यमेव ॥ ३५ ॥

—o—

(2) अधिकरणसारावलिः (श्लो. १–३)

(253) अक्षाद्युत्पत्त्यनूक्तौ न हि ! फलमधिकाशङ्कनं त्वत्र मन्दं
तत्सङ्ख्यादेः परीक्षाऽप्यनुकृतबलिभुग्दन्तचिन्तेति चेन्न ।
एतेष्वब्रह्मकार्यं किमपि कथयतां बाधनेनार्थवत्त्वात्
तत् साक्षात्सङ्गतिः स्यात् प्रथम-चरमयोर्मध्यमानां प्रसङ्गात् ॥ १ ॥

अक्षाद्युत्पत्त्यनूक्तौ—पूर्वपादतो ज्ञातायाः इन्द्रियाद्युत्पत्तेः अस्मिन् पादे अनुवादमात्राभ्युपगमे, **न हि फलम्**—नैव प्रयोजनं सम्पन्नं भवति, **अधिकाशङ्कनं तु**—पूर्वप्रसक्तशङ्कापेक्षया शङ्काधिक्यं (समाधेयं) तु, **अत्र मन्दम्**—अत्र स्पष्टप्रतिपन्नं न भवति, **तत्सङ्ख्यादेः**—इन्द्रियप्राणादिसङ्ख्यापरिमाणादेरर्थस्य, **परीक्षाऽपि**—विचारपूर्वकं व्यवस्थाऽपि, **अनुकृतबलिभुग्दन्तचिन्ता**—(विफलत्वात्) काकदन्तपरीक्षासदृश्येव, **इति चेन्न**—एवं त्रिधाऽपि वैयर्थ्यस्याशङ्कनं न युक्तम्, **एतेषु**—इन्द्रियादिष्वचिदर्थेषु मध्ये, **किमपि**

अब्रह्मकार्यं कथयताम्—यत्किञ्चिदेकमपि वा परमात्मनोऽजन्यमिति वादिनाम्, **बाधनेन**—निराकरणेन, **अर्थवत्वात्**—पादारम्भस्य सप्रयोजनत्वसिद्धेः, **तत्**—तस्मात् कार्यतायाः समर्थनात्, **प्रथम-चरमयोः**–आद्या(प्राणोत्पत्त्यधिकरण)न्तिमाधिकरण(संज्ञामूर्तिक्लृप्ति)योः, **साक्षात्सङ्गतिः स्यात्**—अव्यवहितैव पादसङ्गतिर्भवेत्, **मध्यमानाम्**—एतदन्तर्वर्तिनामितरेषामधिकरणानां तु, **प्रसङ्गात् सङ्गतिः स्यात्** प्रासङ्गिकी सङ्गतिर्भवेत्; न साक्षात् ॥ १ ॥

(254) अष्टावत्राधिकाराः प्रथम इह वियन्नीतिरुक्तेन्द्रियाणां
तेजोऽबन्नोक्तनीतिं द्रढयति चरमे व्यष्टिभेदस्य सृष्टौ ।
सङ्ख्या-मानादिचिन्तास्वपि तदुपहितोपासनाद्यैः फलं स्यात्
प्राणादिभ्यः प्रमाता पृथगिति विशदीकर्तुमप्येष पादः ॥ २ ॥

अत्र—द्वितीयतुर्ये प्राणपादे, **अष्टौ अधिकाराः**—अष्टसङ्ख्यान्यधिकरणानि सन्ति, (तेषु मध्ये) **इह**—प्रथमे संनिकृष्टे आद्येऽधिकरणे, **इन्द्रियाणाम्**—सात्विकाहङ्कारोपादानकानां कर्मज्ञानेन्द्रियाणामुभयेषामपि, **वियन्नीतिः उक्ता**—वियदधिकरणतः सिद्धा नीतिः (आकाशस्य ब्रह्मकार्यता) **अतिदिष्टा**—'तथा प्राणाः' इति), **चरमे**—एतत्पादान्तिमे (संज्ञामूर्तिक्लृप्त्यधिकरणे) **व्यष्टिभेदस्य सृष्टौ**—देवमनुष्यादिव्यष्टिविशेषोत्पत्तिविषये, **तेजोऽबन्नोक्तनीतिम्**—तेजोऽधिकरणसिद्धां तजो-जल-पृथिवीतत्त्वानां ब्रह्मकार्यत्वरीतिम्, **द्रढयति**—चतुर्मुखादशरीरकब्रह्मकार्यत्वातिदेशतः स्थिरीकरोति, **सङ्ख्या....स्वपि**—सप्तत्व-षट्त्व-एकादशत्वादिभिः इन्द्रियगणनायाः अणुत्वादिप्रकारतः तत्परिणामस्य च विचारणासु क्रियमाणास्वपि, **तदुपहितोपासनाद्यैः**—तत्सङ्ख्याकतत्परिणामकेन्द्रियादिविशेषणविशिष्टतया भगवतो भजनादितः, **फलं स्यात्**—प्रयोजनं लभ्यत एव, **प्रमाता**—धर्मभूतज्ञानाश्रयो जीवः, **प्राणादिभ्यः पृथगिति**—प्राणेन्द्रियप्रभृतिभ्यः स्वोपकरणभूतेभ्यः विभिन्न इति, **विशदीकर्तुमपि**—स्पष्टयितुमपि, **एष पादः**—अयं तुर्यः प्राणपादः उपयुक्तो भवति ॥ २ ॥

(255) अग्रे सत्तामृषीणां श्रुतिरभिदधती प्राणतां वक्ति तेषां
नाऽत्र ब्रह्मैव वाच्यं बहुवचनहतेस्तेन नित्याक्षसिद्धिः ।
नैवं तत्स्रष्टिदार्ढ्यात् बहुवचनमिदं पाशनीत्यैव नेयं
प्राणर्षित्वे परात्मन्यपि हि ! सुघटिते तन्निरुक्त्यादिसाम्यात् ॥ ३ ॥

श्रुतिः—'असद्वा इदमग्र आसीत्....प्राणा वाव ऋषयः' इतीयं शतपथश्रुतिः, **ऋषीणाम्**—ऋषिपदबोध्यानामर्थानाम्, **प्राणतां वक्ति**—प्राणस्वरूपतामेव कथयति, **अत्र ब्रह्मैव वाच्यं न**—'ऋषि'-'प्राण'शब्दयोः परब्रह्मैव विवक्षितमिति वक्तुं न शक्यम्, **बहुवचनहतेः**—बहुत्वानन्वयेन

(ब्रह्मण एकत्वात्) बहुवचनव्याघातापत्तेः, **तेन**—उक्तेनानेन हेतुना, **नित्याक्षसिद्धिः**—इन्द्रियेषु बहुत्वान्वयात् नित्येन्द्रियसिद्धिर्भवति (इति शङ्कने) **मैवम्**—एवं शङ्कनं मास्तु, **तत्सृष्टिदार्ढ्यात्**—इन्द्रियाणां ब्रह्मसृज्यत्वस्य असन्दिग्धत्वात् (एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' इति श्रुतेः), **इदं बहुवचनम्**—'प्राणाः' 'ऋषयः' इति बहुवचनम्, **पाशनीत्यैव**—पाशाधिकरण (पू. मी. 9-3-5) न्यायेनैव, **नेयम्**—उपचारतो निर्वाह्यम्, **हि**—यतः, **परात्मन्यपि**—सृष्टेः प्रागविप्रतिपन्नसत्ताके परब्रह्मण्यपि, **प्राणर्षित्वे**—प्राणत्वं ऋषित्वं चेत्युभे, **तन्निरुक्त्यादिसाम्यात्**—'प्राणयति सर्वान्' इति प्राणः, इति, 'ऋष ज्ञाने' इति च प्राणनसाधनत्व-सर्वार्थद्रष्टृत्वयोः अवयवार्थयोः तथा तच्छब्दसमुदायशक्तेश्च समानत्वात्, **सुघटिते**—सुसङ्गते एवेति ॥ ३ ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः

एवं—वियदादीनामुत्पत्तिर्निरूपिता, अनन्तरं-जीवोपकरणानामुत्पत्तिर्निरूप्यते—चतुर्थेन प्राणपादेन ।

तत्र—प्राणोत्पत्त्यधिकरणे 'असद्वा इदमग्र आसीत्' इत्यादिवाक्ये, 'प्राण'शब्दनिर्दिष्टानामिन्द्रियाणाम् प्रलयकालेऽप्यवस्थानप्रतीतेः इन्द्रियाणि न उत्पद्यन्ते—इत्याशङ्क्य,

'एतस्माज्जायते' इत्यादिवाक्ये, इन्द्रियाणामुत्पत्तिश्रवणात् 'असद्वा....' इत्यादिवाक्ये प्राणशब्दस्य परमात्मपरत्वाच्च, इन्द्रियाणि उत्पद्यन्ते—इत्युक्तम् ॥

—o—

(4) नयसङ्गतिमालिका

आत्माधिकरणस्यैवातिदेशो भवेदिह ।
प्राणाधिकरणे तस्मादातिदेशिकसङ्गतिः ॥ १०३ ॥

इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

—o—

(62) सप्तगत्यधिकरणम् ॥ २-४-२ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

(94) सप्त तु यदेति वाक्यात् सप्त प्राणा इति श्रुतेश्चापि ।
नैवं प्रधानभावाद् दशेम इति वाक्यतः स्मरणात् ॥ ३६ ॥

यदेति वाक्यात्—'ज्ञानानि' इति विशेषनिर्देशयुतात् 'यदा पञ्च ....परमां गतिम्' इति कठवल्लीगतात् वाक्यात्, **सप्त प्राणा इति श्रुतेश्चापि**—'सप्त प्राणाः प्रभवन्ति....सप्त सप्त' इति मुण्डकश्रुतिवाक्यादपि ज्ञापकात्, **सप्त तु**—जीवोपकरणभूतानि इन्द्रियाणि सप्तैव, **नैवम्**—एवं शङ्कनं नोचितम्, **प्रधानभावात्**—सप्तानां प्रधानतो जीवोपकरणत्वतः सप्तसङ्ख्या-निर्देशात्, **दशेम इति वाक्यतः स्मरणात्**—'दशेमे पुरुषा प्राणाः आत्मैकादशः' इति वाक्यतः एकादशसङ्ख्यत्वस्य ज्ञापनात्, (एकादशसङ्ख्यताया अबाधात्) ॥ ३६ ॥

—o—

(2) **अधिकरणसारावलिः** (सप्त-अधि)

(256) सप्त प्राणाश्चरन्तीत्युदितमभिहितास्ते विशिष्याऽपि योगे
तस्मात् सप्तेन्द्रियाणीत्यसदधिकवचोदृष्टितोऽत्राऽन्यपर्यात् ।
लक्ष्मैषां सात्त्विकाहङ्करणपरिणतिद्रव्यता चाऽविशिष्टा
भेदेनोक्तिः प्रधाने मनसि फलवती कर्मबोधेन्द्रियेभ्यः ॥ ४ ॥

प्राणाः—प्राणापरपर्यायाणीन्द्रियाणि, **सप्त चरन्तीति**—सप्तसङ्ख्यानि जीवेन सह सञ्चरन्तीति, **उदितम्**—मुण्डकश्रुतावभिहितम्, **ते**—सप्त प्राणाः, **योगे**—परमगतिप्रतिपादके 'यदा पञ्च' इति कठश्रुतौ, **विशिष्यापि**—'ज्ञान-मनो-बुद्धि' शब्दोल्लेखतः, विशेषरूपेणापि, **अभिहिताः**—स्पष्टमुक्ताः, **तस्मात्**—एवं जीवोपकरणेषु सप्तत्वस्य स्फुटावगतेः, **इन्द्रियाणि सप्त**—इन्द्रियाणि सप्तैव, न त्वधिकसङ्ख्यानि, **इत्यसत्**—एवं सप्तमात्रत्वशङ्कनं अनुचितम्, **अत्र**—इन्द्रियविषये, **अधिकवचोदृष्टितः**—सप्ताधिकदशैकादशसङ्ख्याबोधकस्य 'दशेमे पुरुषाः प्राणाः आत्मैकादशः' इति वाक्यस्योपलम्भात्, **आन्यपर्यात्**-सप्तत्ववचसः अर्थान्तरे तात्पर्यात्, **एषां लक्ष्म**—इन्द्रियाणां लक्षणभूता, **सात्त्विका....द्रव्यता च**—सात्त्विकाहङ्कारोपादानक द्रव्यतापि, **अविशिष्टा**-समानैव, **प्रधाने मनसि**—सर्वप्रधानवति अन्तःकरणे, **कर्मबोधेन्द्रियेभ्यो भेदेनोक्तिः**—वागादिकर्मेन्द्रियेभ्यः श्रोत्रादिज्ञानेन्द्रियेभ्यश्च पार्थक्येन वर्णना, (आत्मैकादशः इति) **फलवती**—प्राधान्यबोधनेन सफला (अतः एकादशैवेन्द्रियाणि) ॥ ४ ॥

(257) देहव्याप्येकमक्षं कतिचिदकथयन् भागतो भिन्नरूपं
केचित्कर्मेन्द्रियाणि श्रुतिपथविमुखास्तत्यजुः क्षुद्रतर्कैः ।
क्षेत्रज्ञस्याहुरेके सह करणगणं बुद्ध्यहङ्कारचित्तै-
रन्ये तं चित्तवर्जं निजगदुरिति तानर्थतोऽत्र व्युदास ॥ ५ ॥

कतिचित्—दार्शनिकैकदेशिनः, **देहव्यापि**—समग्रं शरीरमभिव्याप्य वर्तमानम्, **भागतः भिन्नकृत्यम्**—श्रोत्रादिस्थानाख्योपाधितः स्वीयैकदेशेन वचन-श्रवणादिकार्यभेदवत्, **एकम् अक्षम्**—स्वरूपतोऽभिन्नमेवेन्द्रियम्, **अकथयन्**—प्रतिपादयामासुः, **श्रुतिपथविमुखाः केचित्**—वेदमात्रानवलम्बिनः वैशेषिकादयः, **क्षुद्रतर्कैः**—अल्पमेव तर्कं निश्चयसाधनतया अवलम्ब्य, **कर्मेन्द्रियाणि**—वागादीनि पञ्च, **तत्यजुः**—निराकृतवन्तः, **एके**—पौराणिकाः, **क्षेत्रज्ञस्य कारणगणम्**—जीवोपकरणभूतं इन्द्रियस्तोमम्, **बुद्ध्यहङ्कारचित्तैः सह**—बुद्धिं, अहङ्कारं, चित्तं च संमेल्य, **आहुः**—(आहत्य चतुर्दशसङ्ख्यानीन्द्रियाणि इति) वर्णयन्ति, **अन्ये**—केचन, (साङ्ख्याः) **तम्**—इन्द्रियस्तोमम्, **चित्तवर्जम्**—चित्तं वर्जयित्वा, (मनोबुद्ध्यहङ्काराख्यान्तःकरणेन सह) **निजगदुरिति**—कथयामासुरिति हेतोः, **तान्**—एवमेवं श्रुतिविरुद्धप्रमेयवादिनः सर्वान्, **अर्थतः**—तत्तदर्थबोधनतः, **अत्र व्युदास**—सप्तगत्यधिकरणे अवैदिकत्वज्ञापनेन निराचकार ॥ ५ ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः (सप्त. अधि.)

सप्तगत्यधिकरणे—'सप्त इमे लोका येषु चरन्ति' इत्यादिवाक्ये सप्तानामेव जीवेन सह गतिश्रवणात् 'सप्तैव इन्द्रियाणि'—इत्याशङ्क्य,

'दशेमे पुरुषाः प्राणाः आत्मैकादशः' इत्यत्र एकादशत्वश्रवणात्, हस्तादीनामपि देहस्थजीवोपकरणत्वाविशेषात्, 'एकादश'—इत्युक्तम्' ॥

—o—

(4) नयसङ्गतिमालिका (सप्त. अधि.)

तथेन्द्रियाणां कार्यत्वमुक्तं तस्य प्रसङ्गतः
सङ्ख्याचिन्ताऽधुना तेषां स्यात् सप्तगतिनीतितः ॥ १०४ ॥

इति सप्तगत्यधिकरणम् ॥ २ ॥

—o—

(63) प्राणाणुत्वाधिकरणम् ॥ २-४-३ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

(25) तानि तु विभूनि युक्तं सर्वेऽनन्ताः समा इति श्रवणात् ।
नैवमुपास्त्यर्थत्वादुत्क्रमणश्रुतित एव चोत्क्रमणे ॥ ३७ ॥

तानि–इन्द्रियाणि प्राणाख्यानि **विभूनि तु युक्तम्**—सर्वगतानीत्येव साधु, **सर्वेऽनन्ताः समा इति श्रवणात्**—'त एते सर्व एव समाः सर्वेऽनन्ताः' इति आनन्त्यापरपर्यायस्य विभुत्वस्यैव श्रुत्युक्तत्वात्, **नैवम्**—एवं शङ्कनमयुक्तम्, **उत्क्रमणश्रुतित एव**—'तमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति जीवोत्क्रमणप्रतिपादकश्रुत्यैव, **उत्क्रमणे च**—इन्द्रियाणां जीवेन सह गमने, तेन परिच्छिन्नत्वगर्भे अणुत्वे च (अणुत्वम् परिच्छिन्नत्वे सति अतिस्वच्छ (सूक्ष्म)-त्वम्) सिद्धे सति, **उपास्त्यर्थत्वात्**—आनन्त्योपदेशस्य कार्यबाहुल्यविशिष्टवेषेण) प्राणोपासन-कर्तव्यताज्ञापनफलकत्वात् ।। ३७ ।।

—o—

(2) **अधिकरणसारावलिः** (प्राण. अधि.)

(258) सर्वेष्वानन्त्यवादात् परिमितिनियमानुक्तितश्चेन्द्रियाणां
व्याप्तिः सिद्धेति चेन्न प्रयदखिलतनूत्क्रान्तिगत्यागतिभ्यः ।
वृत्त्या दूरस्थधीः स्याद् भजनविधिपरेऽनन्ततोक्तिः स्वकार्यैः
कन्दस्थानां च तत्तत्तनुषु विकृतिमद्द्रव्यभावात् पृथुत्वम् ।। ६ ।।

सर्वेषु—प्राणाख्येषु सर्वेषु, **आनन्त्यवादात्**—विभुत्वकथनात्, **परि....तश्च**—तत्तदिन्द्रियप्रतिनियतपरिमाणविशेषाकथनादपि, **इन्द्रियाणाम्**–सर्वेषामपीन्द्रियाणाम्, **व्याप्तिः**–अपरिच्छिन्नपरिमाणत्वरूपा विभुता, **सिद्धा**—प्रमाणतो लब्धा, **इति चेत् न**—एवं शङ्का न युज्यते **प्रयद....गतिभ्यः**—देहात् देहान्तरं प्राप्नुवतां जीवानां तत्तन्निखिलदेहावधिको-त्क्रमणगमनागमनेभ्यः, श्रुतिसिद्धेभ्यः, (विभुत्वस्य) बाधात्, **दूरस्थधीः**—दूरे सतामर्थानां विषये ऐन्द्रियकी बुद्धिस्तु, **वृत्त्या**—आप्यायकभूतकृतया प्रसरणरूपया साधनभूतया, **स्यात्**–सिध्येत्, (विभुत्वाभावेऽपि) **भजनविधिपरे**—उपासनाविधिपरे 'सर्व एव समाः सर्वेऽनन्ताः' इति वाक्ये (श्रूयमाणा), **अनन्ततोक्तिः**—अणुपरिमाणवतामपि अपरिमितत्वोक्तिः **स्वकार्यैः**—स्वैः साध्यं अपरिमितासङ्ख्यातविषयग्रहणबाहुल्यं हेतूकृत्यैव, **तत्तत्तनुषु कन्द-स्थानां च**—तत्तद्देहीयहृदयाख्यनाडीमूलस्थानवर्तिनां इन्द्रियाणामपि, **विकृतिमद्द्रव्यभावात्**—प्रसरणाख्यविकारार्हद्रव्यत्वतः, **पृथुत्वम्**—प्रसरणरूपं पृथुत्वं युज्यते ।। ६ ।।

—o—

(3) **अधिकरणार्थसङ्ग्रहः** (प्राण अधि)

प्राणाणुत्वाधिकरणे—'सर्व एव समाः, सर्वेऽनन्ताः' इत्यादिना आनन्त्यश्रवणात् इन्द्रियाणि विभूनि—इत्याशङ्क्य,

'प्राणमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति उत्क्रान्तिश्रवणात्, उत्क्रान्तिकाले पार्श्वस्थैः अनुपलभ्यमानत्वात्, आनन्त्यश्रुतेश्च उपासनार्थकार्यानन्त्यपरत्वाच्च अणूनि—इत्युक्तम् ॥

—o—

(4) **नयसङ्गतिमालिका** (प्राण-अधि)

प्रसङ्गेनैवेन्द्रियाणां प्राणानामेव चिन्त्यते ।
प्राणाणुत्वाधिकरणेऽणुत्वं वृत्तिविकासिनाम् ॥ १०५ ॥

इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

—o—

(64) वायुक्रियाधिकरणम् ॥ २–४–४ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

(9) वाक्यात् प्रसिद्धेश्च विशङ्क्यतेऽयं
न वायुमात्रं न च तत्क्रिया वा ।
प्राणस्तु देहादिभृदेव वायुः
प्राणस्य वायोश्च पृथक्त्वशब्दात् ॥ ३८ ॥

वाक्यात्—'यः प्राणः स वायुः' इति श्रुतिवाक्यात्, **अयं विशङ्क्यते**—प्राणो नाम सामान्यरूपो वायुरेवेति शङ्कास्पदीक्रियते, **तथा प्रसिद्धेश्च**—उच्छ्वासादिवायवीयक्रियायां 'प्राण'पदव्यवहारस्य लोकावगतेः, वायवीयक्रियैव प्राण इति शंक्यते चेत्, **न वायुमात्रं न च तत्क्रिया वा**—प्राणस्य वायुसामान्यरूपता तदीयक्रियाविशेषरूपता वा, न युज्यते, **प्राणस्तु**-प्राणो हि नाम, **देहादिभृत् वायुरेव**—शरीरेन्द्रियादिधारको वायुविशेष एव, **प्राणस्य वायोश्च पृथक्त्वशब्दात्**—प्राणाख्यवायोः वायुसामान्यस्य च श्रुतौ, 'एतस्माज्जायते प्राणः.... खं वायुः' इत्येवं पृथग्भावेनैव संशब्दनात् ॥ ३८ ॥

—o—

(2) अधिकरणसारावलिः (वायु-अधि)

(259) प्राणः प्रागुक्तनीत्या परजनित इति स्थापितो वायुमात्रं
देहान्तस्तत्क्रिया वा स इति न पृथगुत्पत्तिवादात् सहाऽस्य ।
द्रव्यत्वं द्रव्यवर्गे पठनत उचितं नैष तत्त्वान्तरं स्यात्
तेजस्त्वे वाय्ववस्थात्यजनवदिह तत्त्यागहानेः कदापि ॥ ७ ॥

प्राणः—श्रेष्ठः प्राणः, **प्रागुक्तनीत्या**—पूर्वोक्तवियदधिकरणन्यायेन, **परजनित इति**—परस्माद् ब्रह्मण एवोत्पन्न इति, **स्थापितः**—प्राणाधिकरणे, दृढीकृतः, **सः**—परब्रह्मकार्यभूतः प्राणः, **देहान्तर्वायुमात्रम्**—शरीरोदरसञ्चरणस्वभावः केवलो वायुः ? **देहान्तस्तत्क्रिया वा**—शरीरगर्भे सततप्रवर्तनस्वभावा उच्छ्वासनिश्वासरूपा वायवीया क्रिया वा ?, **इति न**—शङ्कितान्यतरकोटिनिर्णयो न समीचीनः, **अस्य**—विप्रतिपत्तिगोचरस्य प्राणस्य, **सह**—एतदभिन्नत्वसम्भावनाविषयेण वायुना सार्धम्, पृथक्-विशिष्य नामोल्लेखतः, **उत्पत्तिवादात्**—'एतस्माज्जायते प्राणः....खं वायुः' इति श्रुतित एव उत्पत्तेः कथनात्, **द्रव्यत्वम्**—क्रियारूपत्वं विहाय क्रियाश्रयद्रव्यस्वरूपत्वम्, **द्रव्यवर्गे पठनतः**—'खं वायुर्ज्योतिरापः पृथिवी' इति द्रव्यस्तोमान्तःपातितया श्रुतौ आम्नातत्वतः, **उचितम्**—अवश्याभ्युपगमार्हम्, **एषः**—प्रस्तुतोऽयं श्रेष्ठः प्राणः, **तत्त्वान्तरं न स्यात्**—तत्त्वविभाजकोपाधेः न साक्षादाश्रयो भवितुमर्हति, (पृथक्तत्त्वतया परिगणनां नार्हति), **तेजस्त्वे**—वायोः तेजस्त्वावस्थाप्राप्तौ सत्याम्, **वाय्ववस्थात्यजनवत्**—प्राक्स्थितायाः वायुत्वावस्थायाः प्रहाणवत्, **इह**—प्राणे, **कदाऽपि**—यदा कदाचिदपि, **तत्त्यागहानेः**—वायुत्वावस्थाप्रहाणस्य अदर्शनात्, प्राणः न तत्त्वान्तरमपि ; किन्तु अवस्थाविशेषं प्राप्तो वायुरेव ॥ ७ ॥

—o—

(2) अधिकरणार्थसङ्ग्रहः (वायु-अधि)

वायुक्रियाधिकरणे—'यः प्राणः स वायुः' इत्युपदेशात्, प्राणो वायुः ; यद्वा उच्छ्वासादिषु प्राणशब्दप्रसिद्धेः, वायुक्रियैव प्राणः—इत्याशङ्क्य,

'एतस्माज्जायते प्राणः' इत्यादिवाक्ये पृथगुपदेशात्, अवस्थाविशेषापन्नस्यैव वायोः प्राणत्वेन 'यः प्राणः स वायुः' इत्युपदेशोपपत्तेः, 'प्राणः स्पन्दते' इति क्रियावति प्राणप्रसिद्धेश्च न वायु-क्रिये प्राणः—इत्युक्तम् ॥

—o—

(4) **नयसङ्गतिमालिका** (वायु-अधि)

मुख्यप्राणस्वरूपेऽपि विवादानां बहुत्वतः ।

वायु-क्रियाधिकरणे प्रसङ्गात् तत्त्वनिर्णयः ।। १०६ ।।

इति वायुक्रियाधिकरणम् ।। ४ ।।

—o—

(65) श्रेष्ठाणुत्वाधिकरणम् ।। २-४-५ ।।

(1) शारीरकन्यायकलापसङ्ग्रहः

(97) लोकैस्त्रिभिः साम्यगिरा विभुः स्यात्
प्राणस्त्वितीदं न विशङ्कनीयम् ।
उत्क्रान्तिशब्दादिभिरस्य लोकैः
साम्यश्रुतिर्याऽत्र तथाऽर्थवादः ।। ३९ ।।

प्राणः—श्रेष्ठः प्राणः, **त्रिभिर्लोकैः साम्यगिरा**—'सम एभिस्त्रिभिर्लोकैः' इति श्रेष्ठप्राणे लोकत्रयसमानत्वोक्त्या, **विभुः स्यात्**—महापरिमाणवान् भवेत्, **इतीदं न विशङ्कनीयम्**—इत्येतत्तु न शङ्कार्हं भवति, **अस्य**—श्रेष्ठप्राणस्य, **उत्क्रान्तिशब्दादिभिः**—'प्राणोऽनूत्क्रामति' इति उत्क्रमणवागादिभिः परिच्छिन्नज्ञापकैः, **अत्र**—श्रेष्ठप्राणप्रस्तावे, **लोकैः साम्यश्रुतिः या**—लोकत्रयसमानश्रुतिवाक् या वर्तते, **तथा**—तेन प्रकारेण, **अर्थवादः**—श्रेष्ठप्राणस्य प्रशंसैव सा ; न तु वस्तुस्वरूपावेदनपरेति ।। ३९ ।।

—o—

(2) **अधिकरणसारावलिः** (श्रेष्ठ-अधि)

(260) उक्तः प्राणस्त्रिलोक्या सम इति स जगद्व्यापकोऽस्त्वित्ययुक्तं
जीवाक्षन्यायतस्तत्सहपठिततदुत्क्रान्तिगत्यादिबाधात्
स्तुत्यर्था सर्वसाम्यश्रुतिरिह करण-क्षेत्रधृत्यादिहेतौ
देहेऽनल्पोपकारः स्फुरति च दशधा वृत्तिभेदैर्विभक्तः ।। ८ ।।

प्राणः—मुख्यः (श्रेष्ठः) प्राणः, **त्रिलोक्या सम उक्त इति**—लोकत्रयेण तुल्यतया 'सम एभिस्त्रिभिर्लोकैः' इति श्रुत्या कथितत्वाद्धेतोः, **सः जगद्व्यापकोऽस्तु**—सर्वगतस्वरूपविभुत्ववान्

भवतु, **इत्ययुक्तम्**—एवं शङ्कनं असाधु, **जीवाक्षन्यायतः**—जीवात्मनां तदीयेन्द्रियाणामिव च, **तत्सह....बाधात्**—जीव-तदिन्द्रियसाहचर्येण श्रुत्युक्तस्य प्राणोत्क्रमण-तदधीनगतागतादेः विरोध-प्रसङ्गात्, **करण....हेतौ**—इन्द्रियाणां देहस्य च धारणादिसाधनभूते, **इह**—प्राणे, **सर्वसाम्य-श्रुतिः**—'समोऽनेन सर्वेण लोकेन' इति सर्वलोकसमानत्वश्रुतिः, **स्तुत्यर्था**—प्रशंसावबोधफला, न तु महापरिमाणत्वप्रतिपत्तिफला, **देहे**—शरीरे चाऽस्मिन्, **वृत्तिभेदैः**—तदीयैः व्यापृति-विशेषैः, **विभक्तः**—सुव्यवस्थितः, **दशधा**—प्राणादिपञ्चकात्मना नागादिपञ्चकात्मना च दशरूपः, **अनल्पोपकारः**—अवर्णनीयो महान् प्रयोजनलाभः (सर्वपुरुषार्थौपयिकः) **स्फुरति**—लोकवेदगता विजृम्भते ॥ ८ ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः (श्रेष्ठ-अधि)

श्रेष्ठाणुत्वाधिकरणे—**'सर्वं हीदं प्राणेनाऽऽवृतं'** इत्यादिश्रवणात् 'प्राणो विभुः'—इत्याशङ्क्य,

'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इति उत्क्रान्तिश्रवणात्, 'सर्वं हीदं' इत्यादिवाक्यस्य सर्वेषां प्राणाधीनजीवनत्वप्रतिपादनपरत्वात्, 'अणुत्वं'—इत्युक्तम् ॥

—o—

(4) नयसङ्गतिमालिका (श्रेष्ठ-अधि)

श्रेष्ठप्राणस्य कार्यत्वं स्वरूपं चोपवर्णितम् ।
श्रेष्ठाणुत्वाधिकरणेऽणुत्वं चाऽपि प्रसङ्गतः ॥ १०७ ॥

इति श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥

—o—

(66) ज्योतिराद्यधिष्ठानाधिकरणम् ॥ २–४–६ ॥

(1) शारीरकन्यायकलापसङ्ग्रहः

(97) वागाद्यधिष्ठानमिह स्वतः स्यात्
जीवेन सार्धं ज्वलनादिकानाम् ।
नैवं परात्माननादमीषा-
मेतत्तु योऽग्नाविति च श्रुतत्वात् ॥ ४० ॥

इह—अस्मिन् शरीरे, **ज्वलनादिकानाम्**—अग्न्यादिरूपाणां अभिमानिदेवतानाम्, **जीवेन सार्धम्**—जीवात्मना सह, **वागाद्यधिष्ठानम्**—वाक्प्रभृतिकर्म-ज्ञानेन्द्रियप्रवर्तकत्वरूपं अधिष्ठानम्, **स्वतः स्यात्**–स्वायत्तमेव भवेत्, न तु परमात्मायत्तम्, **मैवम्**—एवं केवलस्वायत्तत्व-वर्णनं न साधु, **अमीषाम्**—अग्न्यादिदेवानां जीवस्य च, **एतत्**—उक्तमधिष्ठानम्, **परात्मामननात्तु**—परमपुरुषसङ्कल्पादेव भवति ; न स्वतः, **योऽग्नौ इति च श्रुतत्वात्**—'योऽग्नौ तिष्ठन्' योऽग्निमन्तरो यमयती'ति तेष्ववस्थानस्य तेषां नियन्तृत्वस्य च श्रुत्याऽवगतेः ॥ ४० ॥

—o—

(2) **अधिकरणसारावलिः** (ज्योति-अधि)

(261) भोक्तॄणां देवतानामपि तनुकरणाधिष्ठितिर्नेशतन्त्रा
तत्स्वातन्त्र्यप्रदानादिति न तनुभृतस्तच्छरीरं हि सर्वे ।
नित्ये तत्पारतन्त्र्ये क्वचिदपि न भवेद् राजसामन्तनीतिः
प्राणन्यायात्प्रभुत्वं तदिह परवशं चेतनानां स्वशक्ये ॥ ९ ॥

भोक्तॄणां—कर्मानुगुणभोगार्थं गृहीतदेहानां जीवात्मनाम्, **देवतानामपि**—इन्द्रियाद्यभिमानिनां अग्न्यादिदेवतानामपि च, **तनुकरणाधिष्ठितिः**—देहेन्द्रियप्रवर्तनरूपं अधिष्ठानम्, **ईशतन्त्रा न**—परमात्मायत्तं न भवति, **तत्स्वातन्त्र्यप्रदानात्**—जीवानां देवानामपि परमात्मना स्वातन्त्र्यस्य पूर्वमेव प्रदत्तत्वात्, **इति न**—एवं शङ्कनं अनुचितम्, **सर्वे-तनुभृतः**—अखिला अपि देहिनः, **तच्छरीरं हि**—परमात्मनोऽवस्थानास्पदाः खलु, (नित्यनियाम्यस्वरूपा एव खलु) **तत्पारतन्त्र्ये नित्ये**—ईश्वरायत्तत्वे स्वरूपानुबन्धित्वकृतनैयत्यवति सिद्धे, **क्वचिदपि**—जगदन्तःपातिनि यत्र कुत्राऽपि चेतने, **राजसामन्तनीतिः**—तदा तदा राजमुखानिरीक्षया प्राग्दत्त-स्वातन्त्र्येणैव सामन्तस्य प्रवृत्तिरिव परात्मानायत्तप्रवृत्तिता, **न भवेत्**—कदापि नैव सम्भाविता, **तत्**—तस्माद्धेतोः, **चेतनानाम्**—जीवात्मनाम्, **इह**—जगति, **स्वशक्ये**—स्वात्मनिर्वाह्येऽपि कार्यविशेषे, **प्रभुत्वम्**—निर्वहणसामर्थ्यम्, **प्राणन्यायात्**—सर्वस्मिन्नपि विषये सर्वस्याऽपि (ज्ञानगोचरत्वेऽपि) प्राणायत्तप्रवृत्तित्वध्रौव्यमिव, **परवशम्**—ध्रौव्येण अवर्जनीयपरमात्मपारवश्यवत् ॥ ९ ॥

—o—

(3) **अधिकरणार्थसङ्ग्रहः** (ज्योति-अधि)

ज्योतिराद्यधिष्ठानाधिकरणे—जीवस्य अग्न्यादिदेवतानां च प्राणविषयं अधिष्ठानं स्वाधीनम् ; नैरपेक्ष्यप्रतीतेः—इत्याशङ्क्य,

'यस्याग्निः शरीरम्' इत्यादौ अग्न्यादीनां परमात्माधीनस्वरूपत्वप्रतिपादनात् तेषामधिष्ठानं परमात्माधीनम्—इत्युक्तम् ॥

—o—

(4) **नयसङ्गतिमालिका** (ज्योति-अधि)

प्राणानां जन्यतेयत्ता परिमाणप्रसङ्गतः ।
अग्न्यादिदेवतानां चाऽधिष्ठानं तत्र चिन्त्यते ॥ १०८ ॥

इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

—o—

(7) इन्द्रियाधिकरणम् ॥ २–४–७ ॥

(1) **शारीरकन्यायकलापसङ्ग्रहः**

(99) प्राणाभिधानादुपकारसाम्याज्-
ज्येष्ठोऽपि चायं स्फुटमिन्द्रियं स्यात् ।
नैतद् दशेति व्यपदेशभावात्
प्राणो मनश्चेन्द्रियमित्यतश्च ॥ ४१ ॥

प्राणाभिधानात्—इन्द्रियेषु श्रेष्ठप्राणे च 'प्राण'नाम्नः एकत्वात्, **उपकारसाम्यात्**—इन्द्रियेषु श्रेष्ठप्राणे च जीवोपकरणत्वस्यापि समानत्वात्, **अयं च**—मुख्यप्राणश्च, **ज्येष्ठोऽपि**—ज्येष्ठ इति श्रुतिबोध्यः सन्नपि, **स्फुटं इन्द्रियं स्यात्**—असन्देहेन इन्द्रियपदाभिधेयो भवेदेव, (इति शङ्कने) **नैतत्**—इदं न युक्तम्, **दशेति**—'इन्द्रियाणि दशैकं चे'ति (तथा) **प्राणो मनश्चेन्द्रियमित्यतश्च**—प्राण-मन-इन्द्रियाणां पृथक्तया असाङ्कर्यतश्च, **व्यपदेशभावात्**—'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' इति श्रौतव्यपदेशसद्भावात् ॥ ४१ ॥

—o—

(2) अधिकरणसारावलिः (इन्द्रियाधि)

(262) प्राणोऽपि स्याद्धृषीकं भृशमुपकरणात् तेषु मुख्यत्ववादा-

दुत्क्रान्त्यादौ च साह्यादिति यदि न पृथक्छब्दनैस्तस्य भेदात् ।

कण्ठोक्तादिन्द्रियत्वान्मनसि तु घटते गो-बलीवर्दनीति-

र्न प्राणे सात्विकाहङ्करणविकृतिता शब्दसाम्यादि मन्दम् ॥ १० ॥

प्राणोपि—मुख्यः प्राणोऽपि, **हृषीकं स्यात्**—(जीवोपकरणत्वादिसाम्यतः) इन्द्रियमेव भवितुमर्हम्, **भृशमुपकरणात् तेषु मुख्यत्ववादात्**—अतिशयेन जीवस्य उपकारित्वतः इन्द्रियेषु मध्ये तस्य मुख्यत्वेन निर्धारणस्य तत्कथनस्य च प्रवृत्तत्वात्, **उत्क्रान्त्यादौ च साह्यात्**—देहादुत्क्रमणे गतागतादावपि साहाय्यकरणादपि, **इति यदि न**—एवं चेत् शङ्कनं क्रियते न तत्साधु, **पृथक्शब्दनैः**—श्रुतिगतैः प्राण-मन इन्द्रियाख्यैर्विविक्तैर्व्यपदेशैः, **तस्य भेदात्**—प्राणस्य इन्द्रियेभ्यः पार्थक्यात्, **मनसि**—मनोविषये तु, **कण्ठोक्तात्**—'मनः षष्ठानीन्द्रियाणि' इति स्पष्टोक्तिसिद्धात्, **इन्द्रियत्वात्**—मनसः इन्द्रियकोटिप्रवेशात्, **गो बलीवर्दनीतिः**—वैयर्थ्यपरिहाराय शब्दोपात्तव्यतिरिक्तविषये सामान्यशब्दस्य सङ्कोचलक्षणः सामान्यविशेषशब्दयोः सहप्रयुक्तयोः अपौनरुक्त्यावहो न्यायः, (मनः सर्वेन्द्रियाणि च इति) **घटते**—युज्यते, (किं च) **प्राणे**—श्रेष्ठप्राणे, **सात्विकाहङ्करणविकृतिता**—इन्द्रियलक्ष्मभूतं सात्त्विकाहङ्कारोपादानकद्रव्यत्वमपि, **न घटते**—नैव युज्यते, **शब्दसाम्यादि**—इन्द्रिये मुख्यप्राणे च प्राणशब्दैक्यादिरूपं निदानं तु, **मन्दम्**—(नानार्थस्थले व्यभिचरितत्वतः तस्य अभिमतासाधकत्वात्) निरर्थकं तत् ॥ १० ॥

—o—

(3) अधिकरणार्थसङ्ग्रहः (इन्द्रियाधि)

इन्द्रियाधिकरणे—सर्वेषां प्राणशब्दवाच्यत्वात् जीवोपकरणत्वाविशेषाच्च सर्वे प्राणाः इन्द्रियाणि—इत्याशङ्क्य,

'इन्द्रियाणि दशैकं च' इत्यादिषु मुख्यप्राणव्यतिरिक्तानामेव इन्द्रियत्वव्यपदेशात्, 'एतस्माज्जायते प्राणः' इत्यादिवाक्ये पृथङ्निर्देशाच्च, मुख्यप्राणव्यतिरिक्तानि इन्द्रियाणि—इत्युक्तम् ॥

—o—

(4) **नयसङ्गतिमालिका** (इन्द्रियाधि)

प्राणेन्द्रियाविभागेन विचारो विफलस्त्विति ।
आक्षेपपरिहारार्थं स्यादिन्द्रियनयोदयः ॥ १०९ ॥

इति इन्द्रियाधिकरणम् ॥ ७ ॥

—o—

(68) संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ २–४–८ ॥

(1) **शारीरकन्यायकलापसङ्ग्रहः**

(100) नामादिसृष्टिस्तु हिरण्यगर्भाद्-
भवेदनेनेति तु वाक्यभावात् ।
नैवं परादेव तु तच्छरीरात्
सेऽयं त्रिवृत्कारसमानकर्तुः ॥ ४२ ॥

नामादिसृष्टिः—सृज्यानामर्थानां नामरूपव्याकरणम्, **हिरण्यगर्भात् तु**—जीवसमष्ट्यात्मकात् चतुर्मुखादेव, **भवेत्**—सम्भवति, **अनेनेति तु वाक्यभावात्**—'अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी'ति श्रुतिवाक्यसद्भावात्, (इति शङ्कने) **नैवम्**—एवं शङ्कनं न साधु, **सेऽयम्**—प्रस्तुतेऽयं नामरूपव्याकृतिः, **त्रिवृत्कारसमानकर्तुः**—'त्रिवृतं त्रिवृतमेकैकां करवाणि' इत्युक्तत्रिवृत्कर्त्रभिन्नादेव, **तच्छरीरात्**—चतुर्मुखशरीरकात्, **परादेव**—परस्माद् ब्रह्मण एव भवति, न केवलात् चतुर्मुखात् ॥ ४२ ॥

—o—

(2) **अधिकरणसारावलिः** (संज्ञा. अधि.) (श्लो. ११–१२)

(263) मन्वाद्यैः स्मर्यतेऽसौ सरसिजवसतिर्व्यष्टिनामादिकर्ता
जीवेनाऽनुप्रविश्येत्यपि कथितमतः प्रेष्यकृत्यक्रमोऽत्र ।
तन्नेको हि! प्रवेष्टा त्रिवृतमकृत च व्याकरोदित्यधीतः
तत्तज्जीवान्तरात्मा सृजति च भगवांस्तादृशं कार्यजातम् ॥ ११ ॥

असौ सरसिजवसतिः—जीवसमष्टिभूतोऽयं कमलासनश्चतुर्मुखः, **व्यष्टिनामादिकर्ता**—व्यष्टिसृष्टिभूतनाम-रूपव्याकर्तेति, **मन्वाद्यैः स्मर्यते**—आप्ततमैः मनुप्रभृतिभिः ऋषिभिः

स्वीयासु स्मृतिषु ज्ञाप्यते ('नामरूपं च भूतानां....देवादीनां चकार सः' इति) **जीवेनाऽनुप्रविश्येत्यपि कथितम्**—'जीवेनाऽऽत्मनाऽनुप्रविश्ये'त्यपि च श्रुतौ कथितं वर्तते, **अतः**—श्रुति-स्मृतिभ्यां जीवकर्तृकत्वोक्तेः, **अत्र**—व्यष्टिसृष्टिविषये, **प्रेष्यकृत्यक्रमः**—स्वामिप्रेरितेन भृत्येन कार्यनिर्वाहक्रम एव विवक्षितः, इति शङ्कायाम्, **तन्न**—तथाविधं शङ्कनं असाधु, **हि**—यतः, **एकः**—एक एव पुरुषः, **प्रवेष्टा**—अनुप्रवेशकर्ता, **त्रिवृतमकृत**—पृथिव्यप्तेजांसि त्रिवृत्कृतवान्, **व्याकरोत् च**—नामरूपे विशेषतः सृज्येषु यथायोग्यं योजितवांश्च, **इत्यधीतः**—इति श्रुताम्नातः, (तस्मात्) **भगवान्**—आदिकर्ता परमात्मैव, **तत्तज्जीवान्तरात्मा**—ब्रह्मादीनां तेषां तेषां जीवानामन्तः प्रवेशतो नियामकः सन्, **तादृशं कार्यजातम्**—तत्तज्जीवनिर्व्यूढतया श्रुतिस्मृत्यादिप्रतिपन्नं कार्यस्तोमम्, **सृजति**—निर्माति, (न तु प्रेष्येणेव अन्येन सृष्टिः) अतः सर्वं परमात्मकर्तृकमेवेति ॥ ११ ॥

(264) या जीवेनाऽऽत्मनेति श्रुतिरियमपि न ब्रह्मजीवैक्यमाह
प्रागेवैकोऽन्तरात्मा वपुरितर इति स्थायिभेदाभिधानात् ।
तेनेशस्तद्विशिष्ट(:)स्वकरणकतयाऽनुप्रवेशेऽपि कर्ता
जीवे तत्कर्तृतायामिह न हि घटते 'क्त्वा' श्रुतिः कर्तृभेदात् ॥ १२ ॥

जीवेनात्मनेति या श्रुतिः—'अनेव जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति या श्रुतिरस्ति, **इयमपि**—इयं कण्ठोक्ता श्रुतिरपि, **ब्रह्मजीवैक्यं नाऽऽह**—पर-प्रत्यगात्मनोः अभेदं नैव वक्ति, **प्रागेव**—पूर्वमेव, **एकः**—परमात्मा एकः, **अन्तरात्मा**—निरुपाधिक-सर्वान्तर्यामित्ववान्, **इतरः**—तदन्यः सर्वोऽपि चेतनाचेतनस्तोमः, **वपुरिति**—तत्तच्छरीरस्वभाव इति, **स्थायिभेदाभिधानात्**—नित्यसिद्धस्य शाश्वतिकस्य पृथक्त्वस्य सप्रमाणं शारीरके प्रतिपादनात्, **तेन**—उक्तेन हेतुना, **ईशः**—परमात्मा, **तद्विशिष्टस्वकरणकतया**—जीवविशिष्ट-स्वात्मकरणकत्वेन (सम्पद्यमाने) **अनुप्रवेशे**—अनुप्रवेशकर्मणि, **कर्ताऽपि**—कर्तृकारकभूतोऽपि भवति, (आकारभेदेन) कर्तृत्व-करणत्वयोः समावेशोऽविरोधात्, ('अनुप्रवेशेऽपि कर्ता' इत्येव वा अन्वयः) **जीवे तत्कर्तृतायाम्**—जीवात्मनि नामरूपव्याकर्तृत्वाऽभ्युपगमे, **इह क्त्वाश्रुतिः**—एतत्प्रकरणगता 'क्त्वा' प्रत्ययरूपा श्रुतिः, **न हि घटते**—नैव सङ्गता भवति खलु, **कर्तृभेदात्**—(समानकर्तृकयोरेव क्त्वाप्रत्ययस्य अनुशिष्टत्वात्) अनुप्रवेशकर्तुः नामरूपव्याकर्तुश्च मिथोभेदात् ॥ १२ ॥

(265) अग्न्यादावण्डमध्यस्थितिमति कथितं रूपभेदैस्त्रिवृत्त्वं
तेजोऽबन्नाशितोक्तावपि विशदमिदं तेन वेधास्त्रिवृत्कृत् ।
मैवं ब्रह्माण्डसृष्टिर्भवतु कथमसावत्रिवृत्कारपूर्वा
भुक्तेऽन्नादेः त्रिधोक्ता परिणतिरितरत् संनिकृष्टे प्रदृष्टिः ॥ १३ ॥

अण्डमध्यस्थितिमति—व्यष्टिसृष्टिगोचरब्रह्माण्डान्तःपातिनि, **अग्न्यादौ**—तेजो-जल-पृथिव्याख्ये भूतत्रये, **रूपभेदैः**—रोहित-शुक्ल-कृष्णाख्यैरूपविशेषैः, **त्रिवृत्त्वम्**—त्रिवृत्करणास्पदत्वम्, **कथितम्**—'यदग्ने रोहित'मित्यादिश्रुतौ वर्णितम्, **तेजोऽबन्नाशितोक्तावपि**—'तेजोऽशितम्', 'आपःपीताः', 'अन्नमशितम्' इति श्रुतिवचस्यपि, **इदं विशदम्**—त्रिवृत्करणं स्फुटमस्ति, **तेन**—उक्तहेतुना, **वेधाः**—चतुर्मुख एव **त्रिवृत्कृत्**—त्रिवृत्करणनिर्वोढा, (इति शङ्कने) **मैवम्**—एवं शङ्कनं असाधु, असौ **ब्रह्माण्डसृष्टिः**—ब्रह्माण्डतदन्तर्गतानां सृष्टिरियम्, **अत्रिवृत्कारपूर्वा कथं भवतु**—स्वसृष्टेः प्राक् त्रिवृत्करणं विना सम्भावयितुमपि नार्हा, **भुक्ते अन्नादौ**—भुक्त-पीताद्यात्मकमन्नजलादिकं प्रस्तुत्य **त्रिधोक्ता**—'त्रेधा विधीयते' इति श्रुत्युक्ता तु, **परिणतिः**—भोजन-पानाद्यनन्तरकालिका परिणामरूपा अवस्थैव, न तु त्रिवृत्करणम्, **इतरत्**—अग्न्यादौ रोहितादिरूपभेदवर्णनादिकमन्यत, **संनिकृष्टे**—भूतान्तरेण सम्बद्धे एकैकस्मिन् भूते, **प्रदृष्टिः**—प्रकर्षेण वैशद्येन विविच्य सूक्ष्मांशप्रदर्शनमात्रम् । (अतः त्रिवृत्करणं परमात्मकर्तृकमेव; न जीवकर्तृकमिति) ॥ १३ ॥

—o—

(4) अधिकरणार्थसङ्ग्रहः (संज्ञा-अधि)

संज्ञामूर्तिक्लृप्त्यधिकरणे—'अनेन जीवेनात्मनाऽनुप्रविश्य' इति नामरूपव्याकरणस्य जीवकर्तृकत्वश्रवणात्, व्यष्टिसृष्टिः हिरण्यगर्भकर्तृका—इत्याशङ्क्य,

'नाम-रूपे व्याकरवाणि' 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति त्रिवृत्कुर्वत एव नामरूपव्याकरणोपदेशात् त्रिवृत्करणस्य हिरण्यगर्भकर्तृकत्वानुपपत्तेः, 'अनेन जीवेने'ति 'जीव' शब्दस्य जीवशरीरकपरमात्मपरत्वाच्च हिरण्यगर्भकर्तृकपरमात्मकर्तृकैव व्यष्टिसृष्टिः—इत्युक्तम् ॥

—o—

(5) नयसङ्गतिमालिका (संज्ञा-अधि)

समष्टिसृष्टौ हेतुत्वं स्यादेव परमात्मनः ।
संज्ञामूर्त्तित्रये व्यष्टौ जीवस्य तदपोद्यते ॥ ११० ॥

इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

—o—

पादोपसंहारः

(1) शारीरकन्यायकलापसङ्ग्रहः (श्लो. ४३–४७)

(101) उत्पत्त्या सङ्ख्यानं परिमाणं चैव कारणानाम् ।
प्राणस्य च स्वरूपं परिमाण(मधिष्ठितिर्निघ्ना ?)मनिन्द्रियत्वं च ॥ ४३ ॥

(102) (एतस्यानिन्द्रियता) एतेषां सर्वेषां सर्गकरो व्यष्टि (सृज्यनामादेः) भूतानाम् ।
इत्येतदखिलममुना पादेन विचिन्तितं सम्यक् ॥ ४४ ॥

(आद्ये) **करणानां उत्पत्त्या**—इन्द्रियाणां परमात्मकार्यतानिर्णयेन सह, (द्वितीये) **सङ्ख्यानम्**—इन्द्रियाणां श्रुत्यादिसिद्धं गणनम्, (तृतीये) **परिमाणं चैव**—इन्द्रियाणां सर्वगतत्वनिरासेन अणुत्वस्थापनम्, (चतुर्थे) **प्राणस्य च स्वरूपम्**—प्राण-वायोः वायुसामान्य-तत्क्रियारूपत्वयोर्निरसनेन अवस्थाविशेषापन्नवायुस्वरूपत्वनिर्णयः, (पञ्चमे) **परिमाणम्**—मुख्यप्राणस्याप्यणुपरिमाणत्वम्, (षष्ठे) **निघ्ना**—परमात्मायत्तता, **अधिष्ठितिः**—चेतनेन सह अग्न्यादिदेवतानां वागाद्यधिष्ठातृत्वम्, **एतस्यानिन्द्रियता**—(सप्तमे) प्राणवायोः इन्द्रियकोट्य-प्रवेशः, (अष्टमे) **व्यष्टिसृज्यनामादेः**—व्यष्टिसृष्टिगोचरस्य जगतो नाम-रूपादेः, **सर्गकरः**—स्रष्टा परमात्मैवेति निर्णयः, **इत्येतदखिलम्**—उक्तमेतत् सर्वम्, **अमुना पादेन**—द्वितीय-तुर्येण चरणेन, **सम्यक् विचिन्तितम्**—निपुणं विचार्य स्थिरीकृतम् ॥ ४३-४४ ॥

(103) प्रथमे प्रसक्तरूपाः पञ्चाऽपि विचिन्तिता द्वितीयाद्याः ।
तस्मात् सङ्गतमस्मिन् पादे प्रथमं च चरमं च ॥ ४५ ॥

(104) प्राणस्वरूपचिन्ता प्राणतया शब्दनेन करणानाम् ।
प्रासङ्गिकप्रसिद्धा प्रसङ्गतस्तद्विशेषचिन्ता च ॥ ४६ ॥

(105) अण्डबहिर्भूतानां पूर्वेण विचिन्तिता सृष्टिः ।
सृष्टिस्तु चिन्तिता स्यादण्डान्तर्वर्तिनामनेनाऽपि ॥ ४७ ॥

प्रथमे—तुरीयाद्याधिकरणे, **प्रसक्तरूपाः**—स्मृता अनुपेक्षणीयस्वरूपाः, **द्वितीयाद्याः**—द्वितीयाधिकरणार्थप्रभृतिकाः, **पञ्चाऽपि**—इन्द्रियसङ्ख्या-परिमाणाद्याः पञ्चविधा अपि, **विचिन्तिताः**—विचार्य निर्णीताः सन्ति, **तस्मात्**—उक्ताद्धेतोः, **अस्मिन् पादे**—द्वितीयतुर्ये चरणे, **प्रथमं च चरमं च**—आद्यं प्राणोत्पत्त्यधिकरणम्, अन्तिमं संज्ञामूर्तिक्लृप्त्यधिकरणं च, **सङ्गतम्**—साक्षादेव सङ्गतिमत् ॥ ४५ ॥

करणानाम्—जीवोपकरणभूतानामिन्द्रियाणाम्, **प्राणतया शब्दनेन**—मुख्यप्राणस्यापि अन्वयिना प्राणत्वेन रूपेण श्रुतौ कीर्तनेन, **प्राणस्वरूपचिन्ता**—मुख्यप्राणस्य स्वरूपविषयिणी विचारणा, **प्रासङ्गिकप्रसिद्धा**—प्रसङ्गायत्तप्रसिद्धिमती, **तद्विशेषचिन्ता च**—प्राणगतस्य विशेषस्य परिमाणादेः चिन्ताऽपि, **प्रसङ्गतः**—प्रसङ्गसङ्गत्यैव भवति ॥ ४६ ॥

पूर्वेण—द्वितीय-तृतीयेन वियत्पादेन, **अण्डबहिर्भूतानां सृष्टिः**—ब्रह्माण्डाख्यव्यष्टिसृष्टेः प्राग्भाविनामाकाशादितत्त्वानां समष्टिसृष्टिः, **विचिन्तिता**—विशेषतश्चिन्तिताऽभवत्, **अनेन तु**—द्वितीय-तुर्येण प्राणपादेन तु, **अण्डान्तर्वर्तिनामपि**—ब्रह्माण्डान्तःपातिनामपि, (व्यष्टि) **सृष्टिः**—नामरूपव्याकरणरूपा निर्मितिः, **चिन्तिता स्यात्**—विचारगोचरीकृता भवति ॥ ४७ ॥

[सेनेश्वरार्यरचितसन्न्यायकलापसङ्ग्रहस्याऽस्य ।
श्रीरामभद्रकलिता टिप्पन्येषा समाप्यत द्वितीयस्य ॥]

—o—

(2) अधिकरणसारावलिः (श्लो. १४–१६)

(226) अक्षाणां जन्म-सङ्ख्या-परिमितय इह प्राणवायोः स्वरूपं
तत्सौक्ष्म्यं देवतादेस्तदुभयविषयाधिष्ठितौ पारतन्त्र्यम् ।
प्राणस्यानिन्द्रियत्वं बहुविधचिदचिद्व्यष्टिनामादि चाऽऽद्यात्
पञ्चीकर्तुः स्वनाभप्रभवकवचितादूचिरे प्राणपादे ॥ १४ ॥

इह प्राणपादे—द्वितीय-चतुर्थे प्राणाख्ये चरणे, **अक्षाणां जन्म-सङ्ख्या-परिमितयः**—इन्द्रियाणामुत्पत्तिः, शास्त्राभिमता गणना तादृशं परिमाणम्, **प्राणवायोः स्वरूपम्**—मुख्यप्राणपदवाच्यस्य न्याय्यं स्वरूपम्, **तत्सौक्ष्म्यम्**—मुख्यप्राणस्य अणुरूपत्वम्, **देवतादेः**—अग्न्यादिदेवतानां जीवात्मनां च, **तदुभयविषयाधिष्ठितौ**—मुख्यप्राण-इन्द्रियात्मकजीवोपकरणविषयके स्व-स्वकार्यप्रवर्तने परमात्मसङ्कल्पाधीनत्वम्, **प्राणस्य अनिन्द्रियत्वम्**—मुख्यप्राणस्य इन्द्रियवर्गाप्रवेशः, **आद्यात् पञ्चीकर्तुः**—समष्टिसृष्टिरूपपञ्चीकरणनिर्वोढुः परस्माद् ब्रह्मण एव, **स्वनाभिप्रभवकवचितात्**—स्वनाभ्युत्पन्नहिरण्यगर्भशरीरकात् सतः, **बहुविधचिदचिद्व्यष्टिनामादि च**—नानाविधचेतनाचेतनव्यष्टिविषयकनामरूपव्याकरणमपि चेत्येतेऽर्थाः, **ऊचिरे**—न्यरूप्यन्त ॥ १४ ॥

(267) नित्यत्वं व्योम्नि वाताद्यणुषु च पुरुषेऽप्यज्ञतादीनपार्था-
न्छ्रोत्रादौ भूतताद्यं मनसि च विभुतां नित्यतत्त्वान्तरत्वम् ।
प्राणेष्वात्मादिभावं स्वपदनियमनस्वैरितां स्वर्गिबृन्दे
वेधस्युन्मुक्तयन्त्रक्रममपि वदतां पादयुग्मेऽत्र भङ्गः ॥ १५ ॥

व्योम्नि—आकाशे, **वाताद्यणुषु च**—वायु-तेजो-पृथिवीपरमाणुष्वपि, **नित्यत्वं वदताम्**—उत्पत्त्यादिराहित्यवादिनां (वैशेषिकाणाम्), **पुरुषेऽपि**—जीवात्मन्यपि, **अज्ञतादीन्-अपार्थान्**—ज्ञातृत्वाभावं कर्तृत्व-भोक्तृत्वयोरभावं च अश्रौतानर्थान् निरूपयताम्, **श्रोत्रादौ**—आहङ्कारिके श्रवणादाविन्द्रियगणे, **भूतताद्यम्**—आकाशादिभूतस्वरूपत्वादिकम्, **मनसि**—मनोरूपे इन्द्रिये अणुभूते, **विभुताम्**—सर्वगतत्वम्, **नित्यतत्त्वान्तरत्वं च**—अजन्याविनाशि-पृथक्तत्त्वरूपतां च वदताम्, **आत्मादिभावम्**—भोक्तृभूतात्मरूपताम्, उपकरणभूतेन्द्रियरूपतां च, **प्राणेषु**—शरीरधारणौपयिके मुख्यप्राणे वर्णयताम्, **स्वर्गिवृन्दे**—स्वर्गस्थानं प्राप्य विराजतां देवानां गणे, **स्वपदनियमनस्वैरिताम्**—लब्धस्वस्थाननियन्त्रणविषये निरपेक्ष-स्वातन्त्र्यम्, **वेधसि**—सृष्टिनिर्वहणाय भगवता नियुक्ते चतुर्मुखे, **उन्मुक्तयन्त्रक्रमम्**—विसृष्टे यन्त्रे विसृष्टुः अस्वातन्त्र्यमिव परमात्मनः अस्वातन्त्र्यं च वदतां तेषां तेषां वादिनाम्, **अत्र पादयुग्मे**—अस्मिन् पादद्वये, **भङ्गः**—प्रतिक्षेपो भवति, (वादिनां पादद्वयस्य भङ्गो भवतीति तेषां गतिनाशः इत्यप्यर्थः स्यात् ॥ १५ ॥

(268) तर्कैरापातसत्यैरविहतिकथने व्याहतिः स्थापिता स्यात्
सम्यग्भिर्वस्तुवृत्त्या तदिति यदि तदा स्वाभिमानोपरोधः ।
तेनाऽध्यायो विरोधप्रशमनकृदसौ बौद्धबन्धोर्विरुद्धः
सौत्री तर्काप्रतिष्ठा श्रुतिपथविमुखस्वैरवादेषु योज्या ॥ १६ ॥

आपातसत्यैः—स्थूलदृष्टेः सत्यवदवभासमानैः, **तर्कैः**—तर्कैः साधनतयाऽऽश्रितैः, **अविहतिकथने**—एतदध्यायसाध्यस्य विरोधस्य समर्थने कृते, **व्याहतिः**—अविरोधप्रतियोगिभूतो विरोध एव, **स्थापिता स्यात्**—स्थिरतामापादितो भवेत्, **सम्यग्भिः**—समीचीनैरेव तर्कैः साधनतयाऽऽश्रितैरेव, **वस्तुवृत्त्या तदिति यदि**—वास्तविकमेव अविरोधकथनमिति यद्युच्यते, **तदा**—तर्हि, **स्वाभिमानोपरोधः**—स्वैरभिमन्यमानस्य निर्विशेषचिन्मात्रसत्यत्वस्य प्रतिघातः अवर्जनीयः, **तेन**—उक्तेनाऽनेन हेतुना, **विरोधप्रशमनकृत्**—वेदान्तार्थस्य तर्क-तन्त्रादिविरोध-निरासाय प्रवृत्तः, **असौ अध्यायः**—द्वितीयोऽयं शारीरकाध्यायः, **बौद्धबन्धोः**—जगन्मिथ्यात्व-वादेन बौद्धसंनिकृष्टस्य अद्वैतिनः, **विरुद्धः**—प्रतिकूलः, **सौत्री**—'तर्काप्रतिष्ठानात् (ब्र. सू.) इति शारीरकसूत्रोक्ता, **तर्काप्रतिष्ठा**—तर्काणामनवस्थितत्वायत्ता विषयासाधकता, **श्रुतिपथ-विमुखस्वैरवादेषु योज्या**—वेदमार्गविरोधिषु स्वच्छन्दवादेषु योजनीया, (तद्विषयिणी बोध्या) न तु श्रुत्यनुगुणतर्कविषयिणी ज्ञेया ; तस्य सुव्यवस्थितत्वात् ॥ १६ ॥

—o—

[340 पुटे अमुद्रितः शारीरकन्यायकलापसङ्ग्रहश्लोकः विवरणेन सह अत्र मुद्रितः]

आत्माधिकरणीयः श्लोकः

श्लोकसंख्या (85) तोयेन जीवानिति वाक्यभावात्

प्रतिज्ञया जायत एव जीवः ।

इति त्वसारं कृतविप्रणाश-

प्रसङ्गतो नित्य इति श्रुतेश्च ॥ २७ ॥

तोयेन....भावात्—तैत्तिरीयके 'यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्' इति सर्वजीवसृष्टिप्रतिपादकवाक्यसद्भावात्, **प्रतिज्ञया**—'यस्मिन् नु खलु विज्ञाते सर्वमिदं विज्ञातं भवती'ति एकविज्ञानतः सर्वविज्ञानसिद्धिप्रतिज्ञया च ज्ञापकभूतया, **जीवः**—प्रत्यगात्मभूतश्चेतनः, **जायत एव**—उत्पाद्यत एवेत्यभ्युपगमः साधुर्भवति, (इति शङ्कने), **इदं तु असारम्**—आत्मोत्पत्तिसाधकतया उक्तयुक्तिचिन्तनं परं दुर्बलमेव, **कृतवि....ङ्गतः**—जीवसृष्ट्यभ्युपगमे, उत्पद्यमाने जीवे (फलविशेषमनुभवति, पूर्वं फलकारणसिद्ध्या अकृताभ्यागमस्य) तथा जन्यभावस्य विनाशध्रौव्यात्, तस्मिन् विनश्यति जीवनकाले कृतानां कर्मणां फलमदत्त्वैव नाशेन कृतविप्रणाशरूपदोषस्य च प्रसङ्गात्, **नित्य इति श्रुतेश्च**—जीवनित्यत्वप्रतिपादिकायाः 'अजो नित्यः शाश्वतः' 'नित्यो नित्यानाम्' इत्यादिकायाः श्रुतेः सद्भावाच्च, आत्मनः अनुत्पत्तेरेव युक्तिप्रमाणाभ्यां निर्णेयत्वादिति ॥ २७ ॥

सारावलिरधिकृतीनां वेदान्तार्यैर्विनिर्मिता साध्वी ।
लघ्व्या चार्थविवृत्या सुयोजिता द्वितीयकेऽध्याये ॥

श्रीरामभद्रविदुषा ऋतुनाथार्यान्वयाप्तशुभजनुषा ।
अध्येतॄणां च कृते शब्दयथाश्रुतार्थधारणार्थाय ॥

इति द्वितीयाध्यायस्य चतुर्थः पादः
समाप्तश्चायं द्वितीयाध्यायः ॥

—o—

अनुबन्धः—२

[प्रमाणार्थकोषः]

१. श्रुतयः

२. सूत्रस्मृतीतिहासपुराणादीनि

॥ श्रीः ॥

श्रीमते रामानुजाय नमः । श्रियै नमः । श्रीधराय नमः ।

॥ प्रमाणार्थकोषः ॥

अस्मिन् द्वितीयाध्यायाख्ये श्रीभाष्यतृतीयसम्पुटे उदाहृतानां श्रुत्यादिप्रमाणानाम् आकरनिर्देशार्थानुवादाभ्यां युतः अकाराद्यनुक्रमेण सङ्ग्रहः ।

[श्रुतयः]

क्रमसंख्या			पृ. सं.
1		'अग्निर्वाग् भूत्वा मुखं प्राविशत् । आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् । वायुः प्राणो भूत्वा नासिके प्राविशत्' ॥ (ऐत. उ. 2-4) (उपनिषद्ग्रन्थे पाठव्यत्यासो दृश्यते)	17

(स्वसृष्टापृथिव्यादिलोकानां पालकत्वे योजनाय आत्मना सृष्टाः पुरुषाकारपिण्डसम्बन्धिमुखाद्यधिष्ठानकवागादीन्द्रियावषिकप्रादुर्भावाश्रयाः अग्न्यादिरूपाः वागाद्यभिमानिन्यो देवताः, स्वोद्गमयोनिभूतेषु तेषु तेषु स्थानेषु प्राविशन्) तत्र वागिन्द्रियाभिमानी देवताभूतोऽग्निः, वाक्पदाभिधेयमाकारविशेषं प्राप्य मुखाख्यमवयवं प्रविष्टवान्, चक्षुरभिमानी देवताभूत आदित्यः चक्षुःपदाभिधेयमाकारं स्वीकृत्य नेत्रगोलकाख्यमवयवम्, प्राणाभिमानी देवताभूतो वायुः प्राणशब्दाभिलापार्हमाकृतिविशेषमाश्रित्य, नासिकाख्यमवयवं प्रविष्टवान् ॥

2	I	'अग्नेरापः । अद्भ्यः पृथिवी ।' (तै.उ.आन. 1-1)	189
	II	'अग्नेरापः' ,,	188

('सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोक्तसत्यज्ञानानन्तस्वरूपात् ब्रह्मपदाभिधेयात् परमात्मनः आकाशाख्यो भूतविशेष उत्पन्नः । तस्माच्चाकाशात् परमात्मशरीरभूतात् वायुः, वायोश्च परमात्मशरीरभूतात् अग्निः) अग्नेरपि च तादृशात् आपः (जलानि), अद्भ्यश्च तादृशीभ्यः पृथिवी च समजायन्त ॥

क्रमसंख्या प्र. सं.

3 अजायमानो बहुधा विजायते' (तै.आर.उ. 3-13-3) 169

परमात्मा हि जन्मपदाभिलप्यकर्मनिबन्धनशरीरसम्बन्धरहितोऽपि, इच्छविग्रहपरिग्रहेण नानाविधाविर्भावाश्रयो भवति ॥

4 'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' (कठ उ. 2-10) 197

अयं जीवाख्य आत्मा, ज्ञानसङ्कोचविकासकरदेहसंश्लेषातिरिक्त-स्वरूपोत्पत्ति-विनाशाख्यजन्म-मरणविदूरः, अविशदसततपरिणामैरप्य-न्वीयमानतया प्रकृतिविसजातीयः, सर्वकालेप्यपूर्ववदेव अपर्युषितानु-भवार्हः, शरीरच्युतावपि अप्रच्युतस्वभाव एव जागर्ति ॥

5 'अथ यो वेदेदं जिघ्राणीति, स आत्मा' (छां. उ. 8-12-4) 203

यः पुनः घ्रातव्यमर्थं 'जिघ्राणि' इति घ्राणजेन ज्ञानेन विषयीकरोति सः गन्ध-तदाश्रयविषयकज्ञानवानेव जीवपदाभिलप्य आत्मा ॥

6 अथ यो हैताननन्तानुपास्ते' (बृ. उ. 3-5-13) 248

यः खलु फलेप्सया वाङ्मनःप्राणानामुपासने प्रवृत्तिमान्, तेषां कल्पावसानपर्यन्तावस्थायित्वरूपानन्तवत्त्वेन 'वाङ्मनःप्राणाः अनन्ताः' इति आनन्त्यधर्मकांस्तानुपास्ते, (सः अनन्तं लोकं जयति, ईप्सितां फलपूर्तिं च लभते) ॥

7 'अथ ह य एवाऽयं मुख्यः प्राणः' (छां. उ. 1-2-7) 252

(उद्गीथावयवभूतं च ओङ्कारं) देवाः मुख्यप्राणत्वेन उपासितवन्तः ॥

8 'अद्भ्यः पृथिवी' (तै. उ. आन. 1-1) 188, 189

(अग्नेरापः' प्र. सं. २ द्रष्टव्या विवृतिः)

9 'अनश्नन्नन्यो अभिचाकशीति' (मुण्ड. उ. 3-1-1) 21

अपहतपाप्मत्वादिना समानगुणकौ अपृथक्स्थितिनिबन्धननियत-साहचर्ययुक्तौ, पक्षिसदृशौ द्वौ चेतनौ, छेदनार्हत्वगुणयोगेन वृक्षसदृश-मेकमेव शरीरं सम्बध्य वर्तेते । तयोरेकतरो जीवः, भोगार्हं कर्मफल-मास्वादयन् वर्तते । अपरस्तु परमात्मभूतश्चेतनः, शरीरावच्छिन्नान्यपि कर्मफलान्यननुभवन्नेव असङ्कुचितज्ञानप्रकाशस्सन्नेव स्वयं जागर्ति ॥

क्रमसंख्या — पृ. सं.

10 ‘**अनीशया शोचति मुह्यमानः**’ (मुण्ड. उ. 3-1-2) 20
‘समाने वृक्षे’ प्र. सं. 192 विवृतिर्द्रष्टव्या)

11 ‘**अनीशश्चाऽऽत्मा बध्यते भोक्तृभावात्**’ (श्वे. उ. 1-8) 13, 20
सर्वेश्वरभूतात् परमात्मनो भिन्नो जीवः, कर्मफलभोक्तृत्वाभिसन्धि-लक्षणात् बन्धकाद्भावात् बद्धो भवति ॥

12 I ‘**अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि**’
(छां. उ. 6-3-2) 263, 268

II ‘**अनेन जीवेनात्मनाऽनुप्रविश्य**’ ,, 43, 65

III ‘**अनेन जीवेन**’ 265
(‘सेयं देवता’ प्र. सं. 204 विवृतिर्द्रष्टव्या)

13 I ‘**अनेन जीवेनात्मनाऽनुप्रविश्य नाम-रूपे व्याकरोत्। तासां त्रिवृतं त्रिवृतमेकैकामकरोत्**’ (छ. उ. 6-3-3, 4) 268

II ‘**अनेन जीवेनात्मनाऽनुप्रविश्य**’ (छां. उ. 6-3-3) 44
सेयं परा देवता, तेजो-जल-पृथिवीनां मध्ये एकैकामपि (स्वात्मिकां) जीवात्मात्मभूतेन स्वेनानुप्रविष्टां कृत्वा, योग्यमभिलापकं शब्दं योग्यं च विशिष्टमाकारं तासां सम्पादयामास। तासामेकैकामपि (त्रिवृत्कृत-स्वरूपां) सृष्ट्युपयोगिसामर्थ्यात्मकान्योन्यसंयोगवतीमकरोत् ॥

14 **अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा**’ (तै.आर.उ. 3-11-3) 221
परब्रह्मभूतः परमात्मा, सृज्यकोटिनिविष्टाना सर्वेषां भूतानामन्तरनु-प्रविष्टः सन्, तेषां चात्मभूतः धारको नियन्ता शेषी च वर्तते ॥

15 I ‘**अन्नमयं हि ! सोम्य ! मनः आपोमयः प्राणः तेजोमयी वाक्**’
(छां.उ. 6-5-4) 268

II ‘**अन्नमयं हि ! सोम्य ! मनः**’ 268
हे सोमार्ह श्वेतकेतो ! मनसः अन्नसम्बध्यणिष्ठांशाप्यायितत्वात्, तत् ‘अन्नमय’मित्युच्यते। प्राणानाम् आप्यैरणिष्ठैरंशैराप्यायितत्वात्, ते आपोमया भवन्ति। तथा वागपि तैजसैः सूक्ष्मतमैरंशैराप्यायनात् सा तेजोमयीति ॥

क्रमसंख्या | पृ. सं.

16 I अन्नमशितं त्रेधा विधीयते ; तस्य यः स्थविष्ठो भागः (धातुः) तत् पुरीषं भवति, यो मध्यमः तन्मांसम्, योऽणिष्ठः तन्मनः
(छां.उ. 6–5–1) 266

II 'अन्नमशितं त्रेधा विधीयते' ,, 267

पुरुषेण भुक्तं जाठरेणाऽनलेन पच्यमानमन्नं स्थविष्ठमध्यमाणिष्ठात्मना प्रकारत्रयेण विभागमापद्यते । तत्र स्थूलतमोंऽशः पुरीषं (शारीरं मलं) भवति, मध्यमोंऽशः मांसपदाभिधेयो भवति सूक्ष्मतमश्चांऽशः मनस आप्यायकतां लभते ॥

17 I 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः'
(छां.उ. 8–1–5, 8–7–1) 97

II 'अपहतपाप्मा विजरो विमृत्युः' ,, 20

III 'अपहतपाप्मा विजरः' ,, 21

(दहराकाशशब्दवाच्यः परमात्मा) सुकृत-दुष्कृताभ्यामश्लिष्टः, जरामरणवर्जितः, शोक-तद्धेतुकर्मभिरसंस्पृष्टः, बुभुक्षा-पिपासाविदूरः (अक्षरपरमव्योमाधिष्ठाता अप्रतिहतसङ्कल्पवांश्च वर्तते ॥

18 I 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः'
(श्वे.उ. 3–19) 21

II 'अपाणिपादो जवनो ग्रहीता' ,, 23

परमात्मा हि हस्तपादादिकं कर्मेन्द्रियमनुपजीव्यैव वेगातिशयेन दूरं स्थानं प्राप्तुं समर्थः, चक्षुःश्रोत्राद्यनुपजीव्यैव साक्षात्कार-श्रवणादावपि च समर्थो भवति ॥

19 'अप्राणो ह्यमनाः' (मुण्ड. उ. 2–1–2) 21

स्वयंप्रकाशरूपः परमात्मा, बाह्याभ्यन्तरैरिन्द्रियैरसंस्पृष्टः (इन्द्रियसम्बन्धकृतदोषैः अलिप्तश्च विराजते) ॥

20 'अयमात्मा ब्रह्म' (बृ. उ. 6–4–5) 83, 228, 233

देवादिविविधविचित्रशरीरभाक् अयं जीवात्मा, अपहतपाप्मत्वादिभिः स्वभावसिद्धैः ब्राह्मैर्गुणैः सम्पन्नः ॥

क्रमसंख्या पृ. सं.

21 'अवातम्' (तै ब्रा. 2-8-9-4) 249

('आनीदवातं' प्र. सं. 32 द्रष्टव्या)

22 'अशरीरं शरीरेषु' (कठ. उ. 2-22) 23, 27

परं ब्रह्म, स्वयं च कर्मकृतशरीररहितम्, जीवानां भोगायतनेषु अनित्येषु शरीरेष्ववस्थितमपि स्वयं नित्यमेव च वर्तते। तच्च अपरिच्छेद्यमाहात्म्यं परं ब्रह्म साक्षात्कृत्य प्रज्ञाशाली विद्वान् चेतनः, विनिर्मुक्तसमस्तसांसारिकदुःखो भवति ॥

23 'अष्टौ ग्रहाः' (बृ. उ. 5-2-1) 245

गृह्णन्ति-जीवात्मानं स्ववशमापादयन्तीति, ग्रहाः—इन्द्रियाणि। घ्राण-वाक्-जिह्वा-चक्षुः-श्रोत्र-मनो-हस्त-त्वग्रूपाः इन्द्रियभूता अर्थाः, यज्ञीयपात्रसादृश्येन ग्रहपदवाच्याः ॥

24 I 'असदेवेदमग्र आसीत्' (छां. उ. 3-19-1) 79

II 'असदेवेदम्' ,, 80

सृष्टेः पश्चात् विभक्तनामरूपं सत् विविधविचित्ररूपतामापन्नं यज्जगत् परिदृश्यते; तत् सृष्टेः प्राक् अनिष्पन्ननामरूपविभागमेवाऽसीत् ॥ (ब्रह्मापृथग्भूतमेवासीत्)

25 I **'असद्वा इदमग्र आसीत्। तदाहुः। किं तदासीत्? ऋषयो वाव ते अग्रेऽसदासीत्। तदाहुः। के ते ऋषयः? इति। प्राणा वाव ते ऋषयः'** (शत. ब्रा. 6-1-1) 240

II **'असद्वा इदमग्र आसीत्'** ,, 79, 241, 242

इदं जगत्, सृष्टेः पूर्वम्, अविभक्तनामरूपम् अत एव च प्रतीतिव्यवहारयोरनर्हं सत्, 'असत्'पदाभिलप्यमासीत। तदेतत् विचारणीयं तत्त्वमधिकृत्यैव पूर्वे विचिकित्सां चक्रुः। 'प्राक् किमवर्तत?' इति। तदा तन्निर्धारणाय तत्त्वज्ञा प्रत्यूचुश्च—'तदा अस्खलितत्रैकालिकार्थज्ञः, तस्मादेव 'ऋषि'शब्दवाच्यः, परमात्मैक एव आसीत् इति। अव्याकृतावस्थत्वाच्च सः असत्पदाभिलप्य आसीत्। स एव तादृशः परमात्मा सर्वप्राणिप्राणनहेतुत्वात् 'प्राण'पदवाच्यश्च। (अतः 'असत्-ऋषि-प्राण'शब्दैः परमात्मैवाऽभिहितः) ॥

क्रमसंख्या पृ. सं.

26 अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चाऽन्यो मायया संनिरुद्धः'
(श्वे.उ. 4–9) 85

'माया'शब्दितात् त्रिगुणात्मकप्रकृतिरूपादस्मात् साधनात्, तत्प्रेरकः तदधिष्ठाता च परमात्मा, इदं चराचरं जगत् उत्पादयति। परमात्माश्रितया च मायया, मायाधिष्ठातुरन्यो जीवः मोहमापन्नः निरुद्धज्ञानः ज्ञानादिस्वाभाविकगुणसङ्कोचं प्राप्नोति ॥

27 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते, इदं सर्वं विदितम्'
(बृ.उ. 6–5–6) 71

अयि मैत्रेयि! निरुपाधिकात्मभूते परमात्मनि श्रवण-मनन-विज्ञानैः प्रत्यक्षतामापादिते सत्येव खलु, तन्निमित्तोपादानकत्वकृततदनन्यत्ववदिदं जगत् ज्ञातमेव भवति ॥

28 I 'आत्मा वा इदमेक एवाऽग्र आसीत्, नाऽन्यत् किंचन मिषत्।
स ऐक्षत लोकान्नु सृजा इति' (ऐत.उ. 1–1) 74

II 'आत्मा वा इदमेक एवाऽग्र आसीत्' ,, 20, 92, 241

सृष्टेः पूर्वम् इदं जगत्, अविभक्ततमोऽवस्थं सत् परमात्मना सह अपृथग्भावमापन्नमासीत्। परमात्मनो व्यतिरिक्तं किमपि नैव सव्यापारमासीत्। करण-कलेबरादिरहितं चाऽभवत्। सर्वप्रकाराविभक्तैकधर्म्यात्मकः परमात्मा द्युप्रभृतीन् सर्वान् लोकान् स्रष्टुं समकल्पयत् ॥

29 'आत्मैवेदं सर्वम्' (छां·उ. 7–25–2) 71

'प्राक्, प्रत्यक्, ऊर्ध्वम् अधः' इति सर्वदेशवर्तिनां सर्वभूतानामध्यात्मतया उपदिष्टः परमात्मा भूमपदाभिधेयः, तदुपासकस्य चेतनस्याप्यात्मभूत एव ; नाऽन्यः ॥

30 'आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति ॥'
(तै.उ.आन. 9–1) 210

आनन्दमयस्याऽस्य परस्य ब्रह्मण आनन्दं श्रवण-मननाद्यनुगृहीतेन अकलुषेण मनसा साक्षात्कुर्वन् चेतनः, अनादिजन्मसञ्चितेभ्यः पाप्मभ्यः कदाऽपि न भीतो भवति ॥

क्रमसंख्या			पृ. सं.
31		'आनन्दो ब्रह्मेति व्यजानात्' (तै.उ.भृ. 6-1)	210
		वरुणपुत्रो भृगुः, तपः साधनीकृत्य, 'आनन्दपदाभिधेयः परमात्मा, उक्तब्रह्मलक्षणसम्पन्नः' इति ज्ञानं लब्धवान् ॥	
32	I	'आनीदवातं स्वधया तदेकम्' (तै.ब्रा. 2-8-9-4)	248
	II	'आनीदवातम्' ,,	249
		सृष्टेः प्राक् महाप्रलये, स्पन्दस्य(चेष्टायाः)निदानभूतेन वायुनाऽपि रहितं, केवलं श्रुत्यादिप्रतिपन्नं ब्रह्मैकमेव, माया-प्रकृत्यादिपदबोध्यया स्वीयशक्त्या सहितं सत् , सत्तामात्राश्रितमवर्तत ॥	
33	I	'आपः पीतास्त्रेधा विधीयन्ते' (छां.उ. 6-5-2)	267
	II	'आपः पीताः'	267
		भोक्त्रा पुरुषेण पीतम् उदकं, स्थूलतम-मध्यम-सूक्ष्मतमात्मना त्रैविध्येन युक्तं भवति ॥	
34		'आपो वा अकामयन्त' (तै.ब्रा. 3-1-5-4)	16
		जलाभिमानिन्यो देवताः (वक्ष्यमाणया रीत्या) कामनां प्रापुः ॥	
35		'आराग्रमात्रो ह्यवरोऽपि दृष्टः' (श्वे.उ. 5-8)	206
		(यः प्राणसहचारेण देहाद्देहान्तरं गच्छन् , पूर्वपूर्वकर्मपाशेन बद्धः अनिर्देश्यकालावधिकं संसरणशीलो वर्तते, स जीवाख्यश्चेतनः) चर्मसीवनसूच्यग्रादपि सूक्ष्मतम इति श्रुत्युक्तः ॥	
36		'इदं वा अग्रे नैव किञ्चनाऽऽसीत्' (तै.ब्रा. 2, 2-9-1)	79,80,92
		आद्यसृष्टेः प्राक्, परिदृश्यमानं जगत्पदाभिधेयं अर्थतत्त्वं यत्किंचिदपि नैवाऽवर्तत ॥	
37		'इदं सर्वं यदयमात्मा' (बृ.उ. 6-5-7)	71
		'अयमात्मा' इत्युक्तं यद् ब्रह्म, तदेव सर्वशरीरकत्वात् सर्वशब्दैर्वाच्यं भवति ॥	

क्रमसंख्या | पृ. सं.

38 **'इन्द्रो मायाभिः पुरूरूप ईयते'** (बृ.उ. 4–5–19) 43

सर्वेश्वरो भगवान्, स्वीयैः सङ्कल्पात्मकैर्ज्ञानैः साधनभूतैः नानादेह-परिग्रहीता भवति। न कर्मायत्तशरीरवान् ॥

39 **'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः'** (तै. ना. उ. 1–6) 115

इष्टपदवाच्यं श्रौतं याग-होमादि, वापी-कूपारामादिकं 'खात'-पदाभिधेयं स्मार्तं च कर्म, अग्नीन्द्रादिनानादेवतासम्बन्धितया नाना-रूपतां प्राप्तं सर्वमपि (कर्मजातम्), तत्तत्कर्मफलप्रदानेन पोषयन् कर्मप्रवर्तनेन तद्धारकः परमात्मा, तत् सर्वं स्वाराधनतया स्वीकरोति ॥

40 **'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्, इतिहासपुराण पञ्चमम्'** (छां. उ. 7–1–2) 171

भो भगवन् सनत्कुमार! अहं तावत् ऋग्यजुःसामाथर्वाख्यां-श्चतुरो वेदान्, इतिहासपुराणाख्यं पञ्चमं च वेदं, (तथा तदर्थतत्त्व-निर्णयहेतुत्वेन तदङ्गभूतान् व्याकरणादींश्चेति) गृहीतान् सर्वानपि (शास्त्ररूपान्) स्मरामि ॥

41 I **'ऋषिं प्रसूतं कपिलम्'** (श्वे. उ. 5–2) 4

II **'ऋषिं प्रसूतं कपिलम्'** (,,) 9

यः पूर्वं स्वेनैवाविष्कृतं कपिलाख्यं रूपं, तत्त्वजिज्ञासूनां चेतनानां ज्ञानोपदेशाय स्वयमेव अस्खलितज्ञानतया पोषितवान्, अतिरोहित-ज्ञानतया आविश्चकार च; सः चेतनाचेतनाधिकः परमात्मा ॥

42 **'एको देवः सर्वभूतेषु गूढः'** (श्वे. उ. 6–11) 43

स्थावर-जङ्गमाख्येषु चेतनाचेतनरूपेषु सर्वभूतेष्वपि तदवेद्य एव अत्यन्तं गूढस्वरूपः सन् अन्तःप्रविश्य वर्तमानः स्वयंज्योतिः (सर्व-नियन्ता) परमात्मा एकएव ।।

43 **'एको देवो बहुधा निविष्टः'** (तै आर. 3–14–1) 43

एक एव हि परमात्मा, स्वयं ज्योतिर्मयविग्रहः, चेतनाचेतनाख्यान् सर्वान् प्रत्यपि प्रकारितया अवस्थाय, सर्वात्मभूतो विराजते ॥

क्रमसंख्या पृ. सं.

44 I 'एको ह वै नारायण आसीत् । न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः । स एकाकी न रमेत । तस्य ध्यानान्तस्थस्य' (महो.) 74, 162

II 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' 163

III 'एको ह वै नारायण आसीत्' 90

(उपनिषत्पाठे आनुपूर्व्याव्यत्यासो दृश्यते)

सृष्टेः पूर्वं, नारायण एक एव अवर्तत । अन्यत् किमपि ब्रह्मेशान-द्यावापृथिवीनक्षत्रजलाग्निसोमसूर्यादिकं चेतनाचेतनजातं नैवाऽवर्तत । स परमात्मा नारायणः, एक एव सन् रन्तुं सन्तुष्टान्तःकरणो नैवाशक्नोत् । (तदर्थं तस्य स्वीयलीलासम्पत्त्युपयोगिसङ्कल्पेन स्वान्तरेव अबहिर्मुखतया मग्नस्य सतः, तदीयात् सृष्टियज्ञात् चतुर्दशपुरुषा अजायन्त) ।।

45 I 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ।।' (मुण्ड.उ. 2-1-3) 189

II 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः'
(मुण्ड.उ. 2-1-3) 181

III 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुः'
(मुण्ड.उ. 2-1-3) 250

IV 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' (मुण्ड.उ. 2-1-3) 167, 241

V 'एतस्माज्जायते प्राणः' (,,) 191, 248

VI 'एतस्माज्जायते' (,,) 192

नामान्तराभिलपनयोग्यावस्थाप्राप्तिरूपक्षरणशून्यत्वकृताव्याकृतपद-वाच्यत्ववतः भूतयोन्यक्षराख्यात् परमात्मनः सकाशादेव, चेतनानां प्राणनोपकरणभूतो मुख्यः प्राणः, मन आदीनि ज्ञान-कर्मेन्द्रियाणि, आकाशवायुतेजोजलाख्यानि भूतानि, तथा सर्वभूतधात्री पृथिवी च (भूतरूपा) सर्वेऽप्युत्पद्यन्ते ।।

क्रमसंख्या		पृ. सं.

46 **'एतस्य वा अक्षरस्य प्रशासने गार्गि! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः'** (बृ. उ. 5-8-8) 257

अयि गार्गि! पूर्वप्रस्तुतस्य सर्वान्तर्यामिणः परस्य ब्रह्मणः, अप्रतिहतस्वभावया आज्ञया, दिवाकर-निशाकरावुभावपि स्वे स्वे स्थाने स्वे स्वे कर्मणि च अप्रच्युतौ, धृतस्वरूपौ च अवतिष्ठेते ।।

47 **'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनुविनश्यति'** (बृ. उ. 4-4-12) 213

(अपरिच्छेद्यस्वरूपरूपगुणविभवैश्वर्यवत् परं ब्रह्म, विज्ञानघनपद-वाच्य (ज्ञानगुणकज्ञानरूप) जीवात्मशरीरकं सत्, पृथिव्यादिषूत्पद्य-मानेषु) तेभ्य एव च भूतेभ्यः स्वयमुत्पद्यमानं, (सहैव ऽपृथक्स्थित्या-श्रितमाविर्भूय) तेषु तेषु भूतेषु विनाशं प्राप्नुवत्सु, पश्चात् स्वयमपि विनाशमिवाप्नोति—अव्यक्तां स्थितिं भजते ।। (जीवद्वारा ज्ञानसङ्कोच-विकासवदवस्थं भवतीवेति वा)

48 **'एवमेवाऽस्य परिद्रष्टुरिमाः षोडशकलाः'** (प्रश्न. उ. 6-5) 204

अनुभवितुः (भोक्तृभूतस्य) अस्य जीवस्य, तद्भोगोपकरणभूताः प्राणादिनामान्ताः (प्राण-श्रद्धा-आकाश-वायु तेजो-जल-पृथिवी-इन्द्रिय-मनः-अन्न-वीर्य-तपो-मन्त्र-कर्म-लोक-नामाख्याः) षोडशसङ्ख्याः कलाः, (पुरुषसङ्कल्पायत्तस्वरूपस्थितिप्रवृत्तिमत्यः, नदीसमुद्रन्यायेन निरुपाधिक-पुरुषरूपं परं वासुदेवं प्राप्य, (तदनन्तरं जीवस्य) सुखादिभोगप्रदान-प्रवृत्तिमत्यो नैव भवेयुः ।।

49 **'एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणेऽर्पिताः'** (कौषी.उ. 3-61) 13

(यथा रथनेमिः अरशब्दवाच्येषु रथनाभिसम्बन्धिषु काष्ठेषु आश्रयाश्रयिभावेन सम्बद्धा) तथैव 'भूतमात्रा' शब्दवाच्यं ग्राह्यग्राहक-भावापन्नं सर्वं, 'प्रज्ञामात्रा' शब्दाभिधेयेषु चेतनेषु समर्पितम्—आश्रयाश्रयिभावेन सम्बद्धम् ।।

50 **'एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते'**
(बृ. उ. 4-1-18) 218, 256

स्वप्नावस्थागतः स्वाप्नलोकसञ्चारी एष जीवः, जनपदसञ्चारी महाराज इव, स्वीयभोगोपकरणानि इमानि कर्मज्ञानेन्द्रियाणि, तत्तत्स्थानेभ्यः स्वभोगार्थमाकृष्य स्वीकृत्य, जनपदसदृशे स्वीये शरीरे स्वयं राजस्थानीयः स्वेच्छानुगुणं अप्रतिघातेन विहरति ।।

51 **'एष एवाऽसाधु....निनीषति'** (कौषी. उ. 3-65) 223
(विवृतिः प्र. सं. 55 'एष ह्येव' इत्यत्र द्रष्टव्या)

52 **'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः'**
(सुबा. उ. 7) 25, 85

एष परमात्मा, सकलचराचराणां हृदिस्थः सन् नियन्ता अश्लिष्टसुकृतदुष्कृतः, दिव्ये धामनि विराजमानः अद्वितीयः नारायणशब्दाभिधेयः ।।

53 **'एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते'** (कठ. उ. 3-12) 44

सर्वेष्वपि चराचरेषु भूतेष्वात्मतयाऽवस्थित एष परमात्मा, गुणत्रयात्मिकया दैव्या मायया तिरोहितस्वरूपत्वात्, अजितबाह्यान्तरकरणानां चेतनानां न गोचरो भवति ।।

54 **'एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः'** (प्रश्न. उ. 4-9) 204

रूप-रस-गन्ध-स्पर्श-शब्दाख्यबहिरर्थविषयकज्ञानवान्, ज्ञानसुखाद्यान्तरार्थविषयकज्ञानवान्, कार्यानुगुणप्रयत्नवान्, ज्ञानस्वरूपश्च अयं जीवात्मा ।।

55 **'एष ह्येव साधुकर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषति ।**
एष एवाऽसाधुकर्म कारयति तं, यमधो निनीषति ।।'
(कौषी. उ. 3-64, 65) 223

एष परमात्मा यं चेतनं कर्मफलमात्रानुभवयोग्येभ्यो मर्त्यादिलोकेभ्य ऊर्ध्वं स्वस्थानं परमं पदं नेतुमिच्छति ; तं चेतनं तदुपायभूतेषु

क्रमसंख्या | पृ. सं.

साधुकर्मसु योजयति । यं चेतनं नीचेषु लोकेषु तिरोहितात्मस्वरूपं कर्तुकामो भवति ; स्वोपासनविरोधिषु कर्मसु योजयति ।।

56 **एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणःपञ्चधा संविवेश ।'**
(मुण्ड. उ. 3-1-9) 206

चेतनानां प्राणने प्रधानोपकरणभूतो मुख्यःप्राणः, प्राणापानव्यानोदानसमानाख्यरूपपञ्चकवान् यं जीवमाश्रित्य वर्तते ; स एष जीवः अत्यन्तं सूक्ष्मत्वेन हेतुना इन्द्रियैर्दुर्विज्ञेयः । (अतः) कर्म-ज्ञानादिभिः अनभिसंहितफलैः लब्धनैर्मल्येन सत्त्वप्रचुरेणाऽन्तःकरणेनैव ग्राह्यः ; न तु इतरैः साधनैः ।।

57 I **'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत् त्वमसि श्वेतकेतो'**
(छां. उ. 6-8-7) 65

II **'ऐतदात्म्यमिदं सर्वं तत् सत्यम्'** (,,) 42

III **'ऐतदात्म्यमिदं सर्वम्'** (छा. उ. 6-8-7) 71, 184, 185, 196

(विवृतिः प्र. सं. 189 'सन्मूलाः' इत्यत्र)

58 **'औदुम्बरीं स्पृष्ट्वोद्गायेत्'** (?) 3

यज्ञवाटे निखाताम् उदुम्बरवृक्षप्रकृतिकां शाखां स्पृशन्, उद्गाता उद्गानकर्म कुर्यात् ।।

59 **'कतम आत्मेति'** (बृ. उ. 6-3-7) 203, 208

पूर्वोक्तेन मन्त्रेण, 'आत्मैवाऽस्य ज्योतिः' इति निर्दिष्टस्यात्मनः स्वरूपं कीदृशम्? इति, (जनकस्य याज्ञवल्क्यं प्रति प्रश्नः) ।।

60 **'कथं नु भगवः स आदेशः'** (छां. उ. 6-1-3) 66

भगवन्-तत्त्वज्ञानसम्पन्न ! गुरो ! अश्रुतामताविज्ञातानां सर्वेषां चार्थानां, स्वविषयकज्ञानतः श्रुतत्व-मतत्व-विज्ञातत्वापादकः, सर्वप्रशासितृत्वेन हेतुना आदेशपदाभिधेयोऽर्थः, कीदृशप्रकारवान् भवेत् (तन्मे उपदिश) ।।

61 **'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीः' इत्येतत् सर्वं मन एव'** (बृ. उ. 3-5-3) 253

कामादिकं सर्वं मनआयत्तमेव ; न तु दर्शन-श्रवणादिमात्रम् । शब्दादौ विषये अभिलाषः, स्वकर्तव्यार्थविषयको व्यवसायाख्यो वृत्तिविशेषः, संशयः, कर्मादिषु शास्त्रीयेषु आस्तिक्यबुद्धिः, नास्तिक्यबुद्धिः, भोग्यवस्तुषु प्रीतिः, द्वेष्येष्वप्रीतिः, निषिद्धाचरणे लज्जा, शास्त्राद्यायत्तं ज्ञानम्, आगामिदुःख-तद्धेतुविषयिणी आकुलता चेत्येतानि सर्वाणि मनोऽधीनान्येव ।।

62 **'किंस्विद्वनं क उ स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद् यदध्यतिष्ठद् भुवनानि धारयन् ।।'**
(तै. ब्रा. 2-8-9-5) 95

भो मन्तारो वाचकाः ! लोके हि गृहनिर्माणे प्रवृत्ता जनाः, वनं, तद्गतं वृक्षं, तदीयानि दारूणि च गृहनिर्माणायाऽपेक्षन्ते । तद्वत् जगन्निर्माणे प्रवृत्तो (भगवान्) दिवम्पृथिवीं च निर्मातुं किं वनं, कं वा वृक्षमाश्रितवान्? किं वा तदा अवर्तत? ईदृशजगन्निर्मातृ अपारमहिमसम्पन्नं च वस्तु कीदृशम्? यत् सर्वं विश्वं स्वयं धारयत् तदधिष्ठातृ भवति' इदं सर्वं मननीयमर्थजातं गुरुसकाशे पृष्ट्वा सम्यग्विजानीत ।।

63 **'कुतस्तु खलु सोम्येवं स्यात्'** (छां. उ. 6-2-2) 81

हे सोमार्ह ! 'असतो हेतुभूतात् सद्वस्तु जायते' इत्ययमर्थः केन वा प्रमाणेन सिद्धो भवति? सर्वथा असम्भावितमिदम्—इत्यर्थः ।।

64 **'जानात्येवाऽयं पुरुषः'** (?) 204, 209

अयं चेतनवर्गः सर्वोऽपि, सर्वदेश-सर्वकाल-सर्वावस्थास्वपि ज्ञानधर्मक एव ; न तद्रहितः ।।

65 I **'ज्ञाज्ञौ द्वावजावीशनीशौ'** (श्वे. उ. 1-9) 85, 227

II **'ज्ञाज्ञौ द्वावजौ'** (,,) 196

नित्यासङ्कुचितज्ञानवान् निरुपाधिकेश्वरः परमात्मा, नित्यसङ्कुचितज्ञानाश्रयः अनीश्वरस्वभावः बद्धजीवश्चेत्युभावपि जन्मरहितौ नित्यावेव ।।

क्रमसंख्या | पृ. सं.

66 'तं पृथिव्यब्रवीत्' (तै. सं. 5-5-2-4) 16, 17

चयनाख्ये श्रौते कर्मणि प्रवृत्तं तदधिकारिणमुद्दिश्य पृथिवी उक्तवतीव । (यद्वा) पृथिव्यभिमानिनी देवता उक्तवती ।।

67 'त एतस्यैव सर्वे रूपमभवन् । तस्मादेत एतेनाख्यायन्ते' (बृ. उ. 3-5-21) 260

यस्माद्धेतोः, वागादयः सर्वेऽपि मुख्यप्राणायत्तवृत्तित्वेन हेतुना मुख्यप्राणसम्बन्धिरूपवत्तया वक्तुं योग्या अभवन्; अत एते सर्वेऽपि 'प्राण'शब्देनैव व्यवह्रियन्ते ।।

68 'त एते सर्व एव समाः सर्वेऽनन्ताः' (बृ. उ. 3-5-13) 247

सप्तान्नब्राह्मणे 'त्रीण्यात्मने कुरुत' इति प्रस्तुताः अर्थाः, जीवजातस्योपयोगाय स्रष्ट्रा परमात्मना कल्पिताः । ते वाङ्मनः-प्राणास्त्रयोऽपि जीववर्गाधिष्ठानभूतेषु सुरनरतिर्यक्स्थावराख्येषु चतुर्विधेषु देहेषु अविषमवर्तिनः, अतः समाः, अल्पस्थायित्वात् प्रतिशरीरं वृत्तितया असङ्ख्यरूपत्वाच्च अनन्तपदवाच्या भवन्ति ।।

69 'तत्तेज ऐक्षत । बहु स्यां प्रजायेयेति' (छां. उ. 6-2-3) 190

स्वसङ्कल्पत एव तेजःशरीरकतां प्राप्तं परं ब्रह्म, बहुभवनसङ्कल्पमकरोत् ।।

70 'तत्तेजोऽसृजत' (छां. उ. 6-2-3)
(विवृतिः प्र. सं. 77 'तदैक्षत' इत्यत्र) 182, 184, 189

71 'तत् त्वमसि' (छां. उ. 6-8-7)
(विवृतिः प्र. सं. 189 'सन्मूलाः' इत्यत्र) 71, 83, 228, 233

72 'तत् सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम्' (गर्भो. 1) 212

(स्वरूप-स्वभावाभ्यां विविच्यमानं) त्वगसृङ्मांसमेदोऽस्थिमज्जाख्यैः (धारकत्व-पोषकत्वाभ्यां) धातुपदवाच्यैः सप्तभिरर्थैरुपेतं, नख-केश-

लोमाख्यमलत्रययुतं, पुण्य-पापाख्यदेहयोनिद्वयेन, शुक्र-शोणिताख्य-मातापितृधातुरूपशरीरयोनिद्वयेन वा लब्धस्वरूपं, लेह्य-पेय-चोष्य-खाद्याभिधैः चतुर्विधैराहारैः प्रत्यहं पोष्यमाणं शरीरमिदं, चेतनानां भोगायतनतां प्राप्यावस्थितम् ॥

73 **'तत् सृष्ट्वा । तदेवाऽनुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाऽभवत् ॥'** (तै. उ. आन. 6–2, 3) 70, 258

(ब्रह्मादिस्तम्बपर्यन्तं पावनमपावनं, मङ्गलमङ्गलं, चरमचरं, चेतनाचेतनाभिधं, स्थूल-सूक्ष्मात्मकमखिलं) जगत् सृष्ट्वा, सर्वत्रानुवृत्तरूपेण प्रतिवस्तु तेष्वनुप्रवेशं कृतवान् परमात्मा । कृत्वा च, निर्विकार-सविकारचेतनाचेतनरूपी च स एवावस्थाय, तत्तन्नामरूपभागेवाऽभवत् ॥

74 **'तदपोऽसृजत'** (छां. उ. 6–2–3) 188, 264

'सत्'पदाभिधेयं परं ब्रह्म, स्वीयबहुभवनसङ्कल्पानुसारेण जलाख्यं द्वितीयं वस्त्वसृजत ॥

75 **'तदसदेव सन्मनोऽकुरुत स्यामिति'** (तै. ब्रा. 2–2–9–2) 80

विश्वोत्तीर्णं परं ब्रह्म, आदौ विश्वात्मना अविद्यमानम्, 'विश्वात्मना भवेयम्' इति यतः सङ्कल्पितवत्, अतः सत्पदाभिधेय(सोपाधिसत्ताश्रय) जगद्रूपमभवत् । (सोपाधिकीं सत्तां जगद्गतां मनसिकृत्य निरुपाधिकसत्तावति ब्रह्मणि असत्पदव्यपदेशः) ॥

76 **'तदात्मानं स्वयमकुरुत'** (तै. उ. आन. 7–1) 162

अविभक्तनामरूपतयाऽवस्थितं परं ब्रह्म, स्वयं स्वस्वरूपमेव उपादानीकृत्य, स्वस्य अभिव्यक्तनामरूपतामापादयामास ॥

77 I **'तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत ॥'** (छां. उ. 6–2–3) 65, 180

II **'तदैक्षत बहु स्यां प्रजायेयेति'** (,,) 73, 162

III **'तदैक्षत बहु स्यां प्रजायेय'** (,,) 69

सत्पदाभिधेयं तत् परं ब्रह्म, 'विचित्रानन्तचिदचिन्मिश्रव्यष्टिजगदा-

कारेण वहु स्याम् , तदर्थं च तेजोबन्नाख्यसमष्टिरूपेण प्रकर्षेण जायेय' इति सङ्कल्पितवत् । ततः तेजः सृष्टवत् ।।

78 'तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नामरूपाभ्यां व्याक्रियत'
(बृ. उ. 3-4-7) 81, 102, 199

तदिदं स्त्रीपुंसादिलक्षणमखिलं विश्वं प्राक् नामरूपासंसर्गात् अनभिव्यक्तचेतनाचेतनशरीरकं सत्, पश्चात् स्वयमेव नामरूपे प्राप्य अभिव्यक्तशरीरकमभवत् ।।

79 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते' (मुण्ड उ. 1-1-9) 183

निवातदीपवदवस्थितं परं ब्रह्म, सृष्टिसङ्कल्पाख्येन तपसाऽन्वितं सत् प्रवृद्धमिव भवति । तादृशाच्च ब्रह्मणः भोक्तृ-भोग्यात्मकचेतनाचेतनसंहतम् अव्याकृताख्यं 'अन्न'पदाभिधेयं भूतसूक्ष्मं जायते ॥

80 'तमः परे देव एकीभवति' (सुबा.उ. 2) 193

सृष्ट्यौपयिकाक्षरावस्थौन्मुख्यवत् विभक्ततमोरूपम् अतिसूक्ष्मावस्थं प्रधानम्, ततोऽपि सूक्ष्मे अक्षरावस्थौन्मुख्यरहिते परमात्मशरीरतयाऽपि चिन्तयितुमशक्यत्वेन अविभक्ततमआख्ये सृष्ट्यनुपयुक्ते प्रधाने (तद्द्वारा) तच्छरीरकपरमात्मनि गाढसंश्लिष्टं भवति ॥

81 'तमीश्वराणां परमं महेश्वरम्' (श्वे.उ. 6-7) 74, 76

सोपाधिकनियन्तृत्वरूपैश्वर्यवतां ब्रह्मादीनां मध्ये, निरुपाधिकैश्वर्यरूपमहेश्वरत्ववन्तं, (सर्वैः सर्वकर्मभिराराध्यैकस्वभावं) भगवन्तं (परज्ञानेन साक्षात्कुर्मः) ॥

82 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ.उ. 6-4-2) 255

जीवात्मनः प्रधानोपकरणभूतो मुख्यः प्राणः, तस्य देहादपक्रमणकाले स्वयं शरीरदेशेभ्यः चक्षुर्मूर्धादिभ्य उत्क्रम्य, तमनुसृत्योत्क्रम्य अनुयाति ॥

क्रमसंख्या प्र. सं.

83 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसाऽनाशकेन। ....एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ॥' (बृ.उ. 6-5-22) 162

यं परमात्मानमेव उपासितुकामाः ब्राह्मणाः, अधीतवेदावर्तन-यज्ञ-दान-तप-उपवासादीनि विविधानि व्रतान्याचरन्ति, (यमेव ध्याना-लम्बनीकृत्य सतततद्भावनाभावितान्तःकरणो भवत्युपासिता ;) तमेवैतं सर्वस्य लोकस्य निरुपाधिकमीशानं साक्षाच्चिकीर्षवः त्यक्ताखिलसङ्गाः साधवः तुर्यमाश्रमं स्वीकुर्वन्ति ; (स एष जगद्रक्षणाय असाङ्कर्येण लोकमर्यादाकारकः) ॥

84 'तमेवं विद्वानमृत इह भवति। नाऽन्यः पन्था अयनाय विद्यते'॥ (तै.उ.आर. 3-12-17) 162

पुरुषसूक्तप्रतिपाद्यं तं परमपुरुषं य उक्तया रीत्या उपास्ते, साक्षात्करोति च, सः इहैव जन्मनि मुक्तभोग्यं परमात्मानमनुभवति। भगवत्प्राप्तये उक्तादुपासनादन्य उपायो नैव वर्तते ॥

85 I 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मुण्ड.उ. 3-1-1) 20,85

'तयोरन्यः पिप्पलं स्वाद्वत्ति' ,, 235

(विवृतिः प्र. सं. 9 'अनश्नन्' इत्यत्र)

86 'तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते' (मुण्ड.उ. 1-1-10) 183,189

सृष्ट्युन्मुखाद् ब्रह्मणः, अव्याकृताख्यं (प्रधानरूपं) ब्रह्म, तद्द्वारा नामरूपपरिष्वक्तम् 'अन्न'शब्दाभिलप्यभोग्य-भोक्तृमयं जगच्च प्रादुर्भूयते ॥

87 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै.उ.आन. 1-2) 181,189

'सत्यं ज्ञान'मिति मन्त्रवर्णोक्तात्परमात्मभूतात् परस्माद्ब्रह्मणः आकाशः समभवत् ॥

क्रमसंख्या			पृ. सं.
88		**'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे'** (नृसिं.उ. 6–4–6)	205

संसारी अयं जीवः, पुण्यफलभोगाधायके स्वर्गादौ लोके कृत्स्न-पुण्यफलभोगानन्तरं, तस्मात्स्वर्गादेर्लोकात् इमं लोकं पुनरायाति, जन्मादि-चक्रोपयोगिकर्माचरणाय ॥

89 **'ता अन्नमसृजन्त'** (छां.उ. 6–2–4) 188, 265

ब्रह्मशरीरभूताः आपः (जलानि) [अप् शरीरकं ब्रह्म] पूर्वसङ्कल्प-मनुरुध्य पृथिव्याख्यं वस्तु सृष्टवत्यः ॥

90 **'ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि (इति)'** (छां.उ. 6-2-4) 190

परब्रह्मशरीरभूताः आपः (अप्शरीरकः परमात्मा), बहुरूपेण परिणामं प्रकर्षेण(विभक्तनामरूपतया) जनिं च सङ्कल्पितवत्यः ॥

91 I **'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्'** (छां.उ. 6–3–4) 266,268,269

II **'तासां त्रिवृतम् त्रिवृतम्'** ,, 70

(विवृतिः प्र.सं. 13 'तासाम्' इत्यत्र)

92 **'तिस्रो देवताः'** (छां.उ. 6–3–2) 70

(विवृतिः 205 'हन्ताहम्' इत्यत्र)

93 I **'तेजोऽशितं त्रेधा विधीयते'** (छां.उ. 6–5–6) 267

देहिभिः देहधारणार्थमुपयुज्यमानेषु वस्तुषु, तेज इव देहकान्त्यादि-हेतुभूतत्वात् तेजःपदेनोपचर्यमाणं तैल-घृतादिकं, देहे स्थूलतम-मध्यम-सूक्ष्मतमाख्येन त्रैविध्येन युक्तं भवति ॥

94 **'ते देवाः प्राणे निःश्रेयसं विदित्वा'** (कौषी.उ. 2–14] 17

('ता वा एता सर्वा देवताः' इति औपनिषदकोशे पाठोपलम्भः)

वागादीन्द्रियात्मिकाः देवताः देहगताः, प्राणेन साकं स्वस्वोत्कृष्ट-त्वाभिमानेन कृतस्पर्धाः, प्राण एव सर्वश्रैष्ठ्यं विचारतो निश्चित्य, स्वेषु स्वेषु प्रज्ञासम्बन्धः, तदायत्तं कार्यकरत्वं च प्राणाधीनमेवेति, अविप्रतिपत्त्या अभ्युपाजग्मुः ॥

क्रमसंख्या			पृ. सं.
95		'तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः' (बृ.उ. 6-4-22) मरणकाले उपसंहृतकरणग्रामस्य जीवस्य, तदावासभूतहृदयाग्रस्थं यत् नाडीमुखं, तत् ज्ञानप्रभयैव सप्रकाशं भवति । तेन प्रकाशितनिर्गमनपथोऽयं जीवः, चक्षुःशिरआदिशरीरदेशान् द्वारीकृत्य तस्माच्छरीरादुत्क्रामति ॥	204
96		'ते हे मे प्राणाः अहंश्रेयसे विवदमानाः ब्रह्माणं जग्मुः' (बृ. उ. 8-1-7) वाक्-चक्षुरादीनि कर्मज्ञानेन्द्रियाणि, स्वस्वश्रेष्ठ्यनिर्धारणाय मिथोविवादं कुर्वाणानि सन्ति, श्रेष्ठ्यनिर्णायकं स्वस्रष्टारं ब्रह्माणं उपसृतान्यभवन् ॥	16
97		'दशेमे पुरुषे प्राणाः आत्मैकादशः' (बृ. उ. 5-9-4) जीवात्मन्यस्मिन् शरीरवर्तिनि सति, जीवनोपकरणभूतानि प्राणपर्यायाणि दशेन्द्रियाणि (वागादिकर्मेन्द्रियपञ्चकम् चक्षुरादिज्ञानेन्द्रियपञ्चकम्) एकादशं मनश्च आत्मापरपर्यायमिति एतानि, 'वसु-रुद्रादित्य'-पदैः अभिधेयेषु त्रयस्त्रिंशत्सङ्ख्याकेषु देवेषु मध्ये, एकादशरुद्ररूपाणि ॥	246
98	I	'न जायते म्रियते वा विपश्चित्' (कठ. उ. 2-18)	102, 167, 196
	II	'न जायते म्रियते' (,,) विविधज्ञानाश्रयचेतनत्वरूपस्य विपश्चित्त्वस्य अर्होऽयं जीवः, (देहाश्रयत्वावस्थायामपि) जनन-मरणानर्हस्वरूपः (ज्ञानैकाकारः) ॥	199, 215
99		'न तत्समश्चाऽभ्यधिकश्च दृश्यते' (श्वे. उ. 6-8)	76
100	I	'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते' (श्वे. उ. 6-8)	20
	II	'न तस्य कार्यं करणं च विद्यते' (,,) सर्वेषां लोकानां निरुपाधिकेश्वरत्ववतो भगवतः शरीरेन्द्रियादिकं नैवाऽस्ति ब्रह्मादीनामिव । परब्रह्मरूपस्यास्य सदृशः अस्मादतिशयितश्च यः कोऽपि नैव सम्भाव्यः ॥	98

क्रमसंख्या		प्र. सं.

101 I **'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् ।
सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः ॥'** (छां. उ. 7–26–2) 213

II **'न पश्यो मृत्युं पश्यति'** (,,) 203

यथोक्तब्रह्मदर्शी विद्वान्, मरणं, ज्वरादिकं रोगं, भगवतो लीला-विभूतिभूतेऽस्मिन् जगति स्वं प्रति प्रतिकूलभावं च नैव चिन्तयति । सर्वार्थसाक्षात्कर्ता सन्, सङ्कल्पमात्रेण ईप्सितान् अर्थान् सर्वदेश-सर्वकालसर्वावस्थास्वपि प्राप्तुमर्हो भवति । स्वाभाविकापहत-पाप्मत्वाद्याविर्भाववान् भवति ॥

102 **'न प्रेत्य संज्ञाऽस्ति'** (बृ. उ. 4–4–12) 203, 213

अस्य जीवस्य, प्रकृष्टस्थान(मुक्ति)प्राप्त्यनन्तरं (प्रेत्य-मुक्तिं प्राप्य) दैहिकजन्मनाशादिप्रयुक्तं सङ्कोच-विकासापन्नं ज्ञानं न विद्यते, (देहात्माभिमानाख्यो भ्रमो नावशिष्यते इति वा) ॥

103 I **'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः'** (छां. उ. 8–12–1) 33

II **'न ह वै सशरीरस्य'** (,,) 32, 34

पुण्य-पापाख्यकर्मारब्धशरीरयोगिनः पुरुषस्य, तन्निबन्धनसुखदुःख-भोगवर्जनं नैव सम्भवि । (सुखाद्यनुभवार्थमेव शरीरारम्भात्) तादृश-शरीरवर्जितमेव पुरुषं सुख-दुःखे न सम्बध्नीतः ॥

104 **'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते'** (बृ. उ. 6–3–30) 210

ज्ञानाश्रयस्य जीवात्मनो धर्मभूतं यत् ज्ञानं, तदुच्छित्तिः कदाऽपि नैव भवति ॥

105 **'नाऽन्योऽतोऽस्ति द्रष्टा'** (बृ. उ. 5–7–27) 44

निरुपाधिकसर्वद्रष्टृत्ववतः अन्तर्यामिणो भगवतोऽन्यः, करणायत्त-ज्ञानो जीवः, स्वयमन्यैरदृश्यमानः सन्, रूपादिज्ञानवान् भवति ॥

क्रमसंख्या　　　　　　　　　　　　　　　　　　　　　　　　　　पृ. सं.

106　**'नारायण परं ब्रह्म तत्त्वं नारायणः परः ।**
नारायणपरो ज्योतिरात्मा नारायणः परः ॥' (तै.ना.उ. 10-4)　162

श्रुत्यादिषु, परं ब्रह्मेति, परंतत्त्वमिति, परंज्योतिरिति, परआत्मेति च सर्वोत्कर्षप्रतिपिपादयिषया निरूपितं वस्तु नारायण एव । शरीरं प्रति जीव इव, विश्वं प्रति स एव व्यापको धारको नियन्ता शेषी चेति, स एव परात्परः ॥

107　**'नाऽह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति ; नो एवेमानि भूतानि'** (छा. उ. 8-11-2)　203

प्राप्तसुषुप्तिरयं जीवः, तदा जाग्रत्स्वप्नयोरिव, 'अहमीदृशोऽस्मि' इत्येवं स्वीयाकारनामकुलदेशादिभिर्विशिष्टैराकारैः स्वात्मानं, स्वभोग्यार्थांश्च नैव अवबोद्धुं प्रभवति ॥

108　I　**'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'**
(श्वे.उ. 6-13)　85, 197, 230

II　**'नित्यो नित्यानाम्'**　(　,,　)　199

परमात्मा हि स्वयमपि (जीववत्) नित्यश्चेतन एव सन्नपि, सर्वविलक्षणाद्वितीयस्वरूपस्वभावः, असङ्ख्यातानां नित्यानां चेतनानां काम्यभूतान् अर्थान् प्रयच्छति । अतः तदुपासनं साक्षात्कारश्च परमशान्तेर्हेतुभूतम् ॥

109　I　**'नेह नानाऽस्ति किंचन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'** (बृ. उ. 6-4-9)　43, 71

II　**'नेह नानाऽस्ति किंचन'** (　,,　)　61

द्रष्टव्यतया पूर्वप्रस्तुते परस्मिन् ब्रह्मणि सर्वशरीरके सर्वाधारे सर्वनियन्तरि, सर्वान् प्रत्याधारत्वात्मत्वादौ, अल्पोऽपि भेदो नैवाऽस्ति । ईदृशे परमात्मनि सर्वेश्वरे सर्वशेषिणि, अल्पमपि वा भेदं यो मनसाऽपि वा चिन्तयति, स महासंसारे सन्तन्यमाने प्रविष्टो भवति ; नैव मुक्तिं प्राप्नोति ॥ (अब्रह्मात्मकं नैव किंचिदस्ति इत्यर्थः) ॥

क्रमसंख्या | | पृ. सं.

110 **'नोपजनं स्मरन्निदं शरीरम्'** (छां. उ. 8-12-3) 203, 213

आनन्दमयेन परमात्मना साकं लब्धसायुज्यस्य चेतनस्य प्राक्तन-देहसम्बन्धादिस्मरणं नैव सम्भवति ।।

111 **'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'** (श्वे.उ. 6-8) 75,97

भगवतः विविधविचित्रजगन्निर्माणाद्यनुगुणा सर्वातिशायिनी शक्तिः तदनुगुणा ज्ञानबलाभ्यां युक्ता विचित्रक्रियासम्पत्तिश्च स्वरूपायत्तैव श्रुतिषु उद्धुष्यते ।।

112 **'पादोऽस्य विश्वा भूतानि त्रिपादस्याऽमृतं दिवि'** (तै.आर.पु. 3-12-3) 230

सर्वत्र पूर्णस्य सर्वेश्वरस्यास्य, अनेककोटिब्रह्माण्डगर्भमिदं विश्वं, केवलमेकदेशो भवति । अविनाशि अत एव अमृतवाच्यं यत् परम-व्योमाभिधं दिव्यं स्थानं, तत् तस्य पादत्रयात्मकं सत् महदस्ति । (अतः स भगवान् त्रिपाद्विभूतेः लीलाविभूतेश्च नायकः) ।।

113 I **'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनाऽमृतत्वमेति'** (श्वे.उ. 1-6) 85

II **'पृथगात्मानं प्रेरितारं च मत्वा'** (श्वे.उ. 1-6) 235

अस्मिन् संसारचक्रे बम्भ्रम्यमाणं जीवात्मानं, भ्रमयितारं परमात्मा-नमीश्वरं च श्रवणादिभिर्विविच्य निश्चित्य, तदधीनोपासनतः सुप्रीतेन परमात्मना प्रीतिविषयीकृतो जीवः मुक्तो भवति ।।

114 **'पृथिव्यप्सु प्रलीयते'** (सुबा.उ. 2) 193

प्रलयकाले सम्प्राप्ते सति, पृथिवी पृथिवीत्वावस्थां तत्प्राक्तनीं गन्धतन्मात्रावस्थां च हित्वा, स्वोपादानभूतामबवस्थां प्राप्ता सती, प्रागवस्थितेषु जलादिषु संसृष्टा भवति ।।

115 **'प्रजापतिः प्रजा असृजत'** (तै.सं. 2-1-2-1) 196,199

जगत्सृष्टिकामश्चतुर्मुखः सृज्यत्वेन सङ्कल्पिताः प्रजाः (चेतनान-चेतनांश्च सृष्टवान् ।।

क्रमसंख्या पृ. सं.

116 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे.उ. 6–16) 85

प्रकृति-पुरुषयोः (अचितां चितां च) स्वामी, ज्ञानादिषड्गुणैश्वर्य-सम्पन्नः परमात्मा। (स्वोपकरणभूतस्य गुणत्रयस्य (सत्व-रजस्-तमसां) नियन्तेति वा)॥

117 'प्रविश्य नाम-रूपे व्याकरवाणि' (छां.उ. 6–3–2) 265

(विवृतिः प्र.सं 12 'अनेने'त्यत्र)

118 'प्राज्ञेनात्मनाऽन्वारूढः' (बृ.उ. 6–3–35) 85

(शकटस्थानीयः शरीरात्मभूतो जीवः,) सारथिस्थानीयेन सर्वज्ञेन परमात्मना विशिष्टं सम्बन्धं प्राप्तः सन्, (शरीरमिदं विहाय याति)॥

119 'प्राज्ञेनाऽऽत्मना सम्परिष्वक्तः' (बृ.उ. 6–3–21) 85

अयं जीवः सुषुप्तिकाले स्वस्य परमप्रियेण सुहृदा प्राज्ञाभिधेन परमात्मना गाढं सम्यगाश्लिष्टः सन्, तदा बाह्यमान्तरं वा किमपि स्वेतरत् सर्वं विषयजातं नैव जानाति॥

120 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ.उ. 6–4–2) 247

(विवृतिः प्र.सं. 'तमुत्क्रामन्तं' 82 इत्यत्र)

121 'प्राणा वाव ऋषयः' (शत.ब्रा. 6–1–1) 242

(विवृतिः प्र.सं. 25 'असद्वा' इत्यत्र)

122 'प्राणे सर्वं प्रतिष्ठितम्' (प्रश्न.उ. 2–6) 255

यथा रथचक्रस्य नाभ्याख्ये मध्यप्रदेशे, नाभि-नेम्योरन्तरालवर्तीनि अराख्यानि दारुखण्डानि सुष्ठु प्रतिष्ठितानि-दृढतयाऽवस्थितानि; तथा प्रस्तुतेऽस्मिन् प्राणे सर्वं (ऋग्-यजुः-सामाख्याः सर्वा वेदवाचः, ब्रह्म-क्षत्रोपलक्षितं जङ्गम-स्थावरात्मकं) जगच्च दृढमवस्थितम्॥

123 'प्राणोऽपानो व्यान उदानः समा(नोऽन) न इत्येतत् सर्वं मन एव' (बृ. उ. 3–5–3) 254

वाङ्मनः-प्राणेष्वन्यतमः प्राण एव, प्राणन-अपानन-व्यानन-उद्गानन-समाननाख्यैः पञ्चविधैस्तैस्तैर्व्यापारैः प्राणादितत्तन्नामकः सन्,

क्रमसंख्या | प्र. सं.

तत्तद्वृत्तिद्वारा (मनसः) तदाश्रयस्य जीवस्योपकरोतीति, (उपकारकेषु उपकार्योपचारात् 'मनः'पदप्रयोगः) 'अनः' इति सामान्यनामवांश्च भवति ।।

124 **'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्'** (ऐत. ब्रा. 4–5) 171

ये अग्निहोत्रानुष्ठानपराः याज्ञिकाः, सूर्यस्योदयनात्प्रागेव अग्निहोत्र-होमं कुर्वते ; ते प्रतिदिनं प्रातरुत्थाय, अनृतवदनसदृशं कर्मैवाऽऽचरन्ति ; यतः सूर्यागमनकाल एव 'सूर्याय स्वाहे'ति होमं (निषिद्धं कर्माऽऽचरन्ति) कुर्वन्ति ।।

125 **'बहु स्याम्'** (छां. उ. 6–2–3)

विवृतिः प्र. सं. 77 'तदैक्षत' इत्यत्र)

126 **'ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवा (उत)' (अथर्व)** 229

धीवराः (मत्स्यजीविनः), भृत्यजनाः, द्यूतजीविनश्चेति सर्वेऽपि, ब्रह्मजातत्वात् ब्रह्मानन्यतां लभन्ते । (जन्य-जनकभावस्य शरीर-शरीरिभावस्य च अनन्यताव्यवहारहेतुत्वात्) ।।

127 **'ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावा-पृथिवी निष्टतक्षुः ।**
मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन्।।'
(तै. ब्रा. 2–8–9–16) 95

'किंस्विद्वनम्' इत्यनेन यत् प्रश्नत्रयमुक्तं, तस्य प्रतिब्रूते आचार्यः— द्यावापृथिव्योर्निर्माणसाधनभूतवन–तद्गतवृक्ष–तत्प्रकृतिकदार्वादिस्थानीयं ब्रह्मैव ; नान्यत् । यतस्तत्, सर्वशक्तित्वात्, कर्तृत्व-निमित्तत्व-उपादानत्व-उपकरणत्वादिसर्वभावं (सामग्र्यन्तरानपेक्षं) स्वयमेव भजते ।।

128 I **'ब्रह्म वा इदमग्र आसीदेकमेव । तदेकं सन्न व्यभवत् । तच्छ्रेयो-रूपमत्यसृजत क्षत्रम् । यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति ।।'** (बृ.उ. 3–4–11) 74

इदं जगत्, सृष्टेः प्राक् अविभक्तनामरूपादिकं सत्, 'ब्रह्मे'त्येव

वक्तुं योग्यमासीत्। यत एकमेवासीत्, अतः अनिरूपितवैभवमासीत्। (तत् आदौ ब्राह्मणवर्णरूपमग्निं सृष्टवत् सत्) स्ववैभवप्रकाशकं 'क्षत्र' पदाभिधेयं स्वीयमेवैकं रूपं सर्वाधिकतया ससर्ज। तान्येतेमानि देवगणान्तर्गतक्षत्रियाख्यानि लोकपालस्वरूपाणि। ('देवराजाख्य इन्द्रः, यादसांपतिर्वरुणः, ब्राह्मणराजः सोमः, पशुपतिः रुद्रः, विद्युदादीनां पतिः पर्जन्यः, पितृपतिः यमः, रोगाधिपो मृत्युः, भासां पतिरीशानः' इति शं. भा) ॥

129 **'ब्रह्मैवेदं सर्वम्'** (नृसि. ता. उ. 7–3) 71

(बृहदारण्यके—'इदं ब्रह्मेदं सर्वम्' (4–5–1) इति दृश्यते)

परिदृश्यमानमिदं जगत्, ब्रह्माधीनोत्पत्त्यादिमत्त्वात्, अविनाभावेन सर्वास्वप्यवस्थासु तत्प्रकारतैकस्वरूपत्वात्, प्रकार-प्रकारिणोरभेदव्यवहाराच्च, 'ब्रह्मैवे'त्युच्यते ॥

130 **'भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पंचमः॥'** (तै. उ. आन. 8–1) 257

अस्य महामहिमवतः परमात्मनः शासनातिक्रमणे महता भयेन, वायु-सूर्य-अग्नि-इन्द्र-मृत्यवः जगन्निर्वहणे नियुक्ताः, स्वे स्वे कर्मणि सम्भ्रमेण त्वरया प्रवर्तन्ते ॥

131 I **'मनसैवैतान् कामान् पश्यन् रमते, य एते ब्रह्मलोके'** (छां. उ. 8–12–5) 203

II **'मनसैवैतान् कामान् पश्यन् रमते'** (,,) 213

देहेन्द्रियादिविलक्षणोऽयं जीवः, कर्मकृतदेहेन्द्रियादिविनिर्मोककाले, ब्रह्मलोकपदवाच्ये दहराकाशे(परमात्मनि) विद्यमानान् काम्यान् कल्याणगुणान्, मनोऽधीनविकासवता अत एव मनःपदाभिधेयेन स्वीयेन धर्मभूतज्ञानेनैव अनुभवन् तृप्तो वर्तते ॥

क्रमसंख्या | पृ. सं.

132 'मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः' (छां. उ. 3–14–2) 97

उक्तः परमात्मा, निर्मलान्तःकरणैकग्राह्यः, मुख्यप्राणस्याऽपि नियन्ता, नित्यनिरतिशयदीप्तिमद्दिव्यमङ्गलविग्रहयुक्तः, अप्रतिहतस्वसङ्कल्पः, आकाशवत्सूक्ष्मस्वच्छस्वरूपः, (यद्वा) अव्याकृताकाशाख्यस्य प्रधानस्याऽपि नियन्ता, सर्वजगन्निर्माता, सर्वकर्मसमाराध्यो वा, सर्वोत्कृष्टसत्त्वमयभोग्यभोगोपकरणभोगस्थानसमृद्धः, अप्राकृतस्वासाधारणदिव्यगन्धरसादिमान्, सर्वमपि स्वेन परैरपि चानुभवितुमर्हं कल्याणगुणजातमाश्रित्य अवाप्तसमस्तकामः सन्, मौनेन सर्वं तृणीकृत्याऽवस्थितः ।।

133 'मन्तव्यः' (बृ. उ. 6–5–6) 14

हे मैत्रेयि! परमात्मैव निदिध्यासितव्यः, तदर्थं च श्रवणपूर्वकं मननेन दृढीकार्यः ।।

134 'मुमुक्षुः ब्रह्मोपासीत' (?) 216

मुक्तिकामः पुरुषः ब्रह्मोपासनं कुर्यात् ।। (इदं स्ववाक्यं भवेत्)

135 'यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरम्' (सुबा. उ. 7) 25

यः परमात्मा पृथिव्या अन्तस्तिष्ठन्, यं प्रति पृथिवी च आधेयत्व-विधेयत्व-शेषत्ववती, सः दिव्यो देव एको नारायणः ।।

136 I 'यः पृथिव्यां तिष्ठन्....यस्य पृथिवी शरीरम्' (बृ. उ. 5–7–7) 24

II 'यः पृथिव्यां तिष्ठन्' (,,) 190

यः खलु परमात्मा, पृथिव्याख्यतत्त्वस्य अन्तरवस्थितः, पृथिवी यस्यैव शरीरतया अवस्थिता, स्वान्तरेवाऽवस्थितमपि यं पृथिवी न वेत्तुं शक्नोति, सः तवान्तर्यामिभूतो नियन्ता अमृतस्वरूपश्च ।।

क्रमसंख्या | पृ. सं.

137 'यः प्राणः स वायुः' (बृ. उ. 5-1-5) 250, 251

('तद्योऽयं प्राणः स वायुः' इति औपनिषदः पाठो दृश्यते) 'प्राण' इत्युच्यमानो यः सः वायुतत्वे एवाऽन्तर्भूतः ; न तु तेजःप्रभृतिरिव तत्त्वान्तरम् ।।

138 I 'यः सर्वज्ञः सर्ववित्' (मुण्ड. उ. 1-1-10) 20, 75

II 'यः सर्वज्ञः' (,,) 211

यः पूर्वोक्तलक्षणः अक्षराख्यः परमात्मा, सः तत्तद्वस्तुगतसामान्य-विशेषाख्यप्रकारद्वयेनाऽपि सर्वार्थविषयकज्ञानवान् ।।

139 'य आकाशे तिष्ठन्' (बृ. उ. 5-7-16) 190

(136 प्रमाणविवृतौ पृथिवीति स्थाने आकाशमिति निवेश्य ज्ञातव्यम्)

140 I 'य आत्मनि तिष्ठन्नात्मनोऽन्तरः, यमात्मा न वेद, यस्यात्मा शरीरं, य आत्मानमन्तरो यमयति, स त आत्माऽन्तर्याम्यमृतः' (बृ.उ.मा.पा. 5-7-26) 85, 221

II 'य आत्मनि तिष्ठन् आत्मनोऽन्तरः यमात्मा न वेद यस्यात्मा शरीरम्' (बृ.उ.मा.पा. 5-7-26) 24

III 'य आत्मनि तिष्ठन्' (,,) 202, 257

यादृश आत्मा, जीवात्मरूपेषु सर्वेषु चेतनेष्वात्मतयाऽवस्थितः, तद्भिन्नः तदन्तरेव सन्नपि तेषामवेद्यः ; तच्छरीरिभूतः, अन्तः प्रविश्य तन्नियमनं करोति ; स एवात्मा तवाप्यात्मभूतोऽन्तर्यामी निरुपाधिका-मृतत्ववान् परमात्मा ।।

141 'य आदित्ये तिष्ठन्' (बृ. उ. 5-7-13) (विवृतिः पूर्ववत्) ॥ 257

142 'यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्' (तै. ना. उ. 1-4) 196

जगद्योनिभूता मूलप्रकृतिरपि, यस्मात् ब्रह्मण एव योनिभूतात् उत्पन्ना, य एव च परमात्मा जलोपलक्षितं पृथिव्यादिभूतपञ्चकमुपादाय

क्रमसंख्या		पृ. सं.

आब्रह्मस्तम्बान्तं जीवजातं समस्तभुवनेषु देहचातुर्विध्येन सृष्टवान् स एव सर्वाधिकः ; ततोऽन्यः परो नास्ति ॥

143 **'यतो वा इमानि भूतानि जायन्ते'** (तै. उ. भृ. 1-2) 196

प्रत्यक्षादिप्रमाणसिद्धानि सर्वाणि चराचराणि भूतानि स्वनिमित्तोपादानभूतात् यस्मात् लब्धस्वरूपाणि भवन्ति ; (तदेव ब्रह्म ; तदेव त्वं श्रवणादिभिरुपास्व) ॥

144 **'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । .... यत्र त्वस्य सर्वमात्मैवाऽभूत् तत् केन कं पश्येत् ?'** (बृ. उ. 6-5-15) 43, 51, 71

यस्यामवस्थायाम् अस्य जीवस्य, परमात्मनः सकाशात् पृथक्त्वेन (स्वनिष्ठतया) स्व-स्वेतरभानं विद्येत ; तदा इतरो जीवः इतरदर्थजातं पश्यतीव भवति । यदा तु स्वयं स्वेतरच्च सर्वं जगत्, परमात्माऽपृथक्सिद्ध्या एकात्मकमेव भासते तदा, द्रष्टृ-दर्शनसाधन-दर्शनकर्माण्यपि ब्रह्मनिष्ठान्येवेति नानाभावभानं नैव सम्भवि ॥

145 **'यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य, त्रिवृत्त्रिवृदेकैका भवति, तन्मे विजानीहीति'** (छां. उ. 6-4-7) 266

स्व स्वाभिमानिदेवताधिष्ठितानि तेजो-जल-पृथिव्याख्यानि भूतानि, शरीरिणा भोगार्थं स्वीक्रियमाणानि, पुरीष-मूत्रास्थि-मांस-लोहित-मज्जाख्यत्रैधातुकशरीरात्मना, स्वाप्यायितेन्द्रियमनःप्राणात्मना च प्रत्येकशः त्रैविध्यं भजन्ते । तत्प्रकारं सावधानेन मनसा मत्तः श्रुत्वा अवधारय ॥

146 I **'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्'** (छां. उ. 6-1-4) 66

II **'यथा सोम्यैकेन'** (,,) 198

अयि सोमार्ह श्वेतकेतो ! यथा घटोपादानभूतमृत्पिण्डविज्ञानात्, तत्कार्यभूते घट-शरावादौ मृद्विकारत्वज्ञानं सुदृढं स्यात् ; (तथा चिदचिच्छरीरकसर्वोपादानभूतपरमात्मविज्ञानात्, तत्कार्यभूतसर्वशरीरकपरमात्मविज्ञानं सम्पद्यते ॥

क्रमसंख्या | पृ. सं.

147 'यदग्ने रोहितं रूपं तेजसस्तद्रूपम्, यच्छुक्लं तदपाम्' यत् कृष्णं तदन्नस्य' (छां. उ. 6-4-1) 189, 261

ज्वलत्यग्नौ दृश्यमानं रक्तं रूपं, अत्रिवृत्कृतस्य तेजसो रूपम्; तत्रैव दृश्यमानं शुक्लं रूपं, अत्रिवृत्कृतजलगतं रूपम्; तत्रैव भासमानं श्यामं रूपं यत्, तत् अत्रिवृत्कृतपृथिवीगतं चेति ज्ञेयम् ॥

148 'यदा पञ्चाऽवतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तमाहुः परमां गतिम् ॥' (कठ. उ. 6-10) 245

ज्ञानसाधनभूतानि चक्षुरादीनि पञ्चेन्द्रियाणि, यदा स्वप्रवृत्तिनिदानेनान्तःकरणेन साकं, विषयेभ्यो निवृत्तां दृढावस्थितिं लभन्ते; बुद्धिरपि (साध्यवसायं मनोऽपि) निर्व्यापारतामधिगच्छति, सैव स्थितिः मोक्षोपयोगित्वात् परमा गतिरित्युच्यते तत्त्वविद्भिः ॥

149 'यदेष आकाश आनन्दो न स्यात्' (तै. उ. आन. 7-1) 210

परमात्मैव सर्वेषामानन्दयिता । नो चेत्! (यःकोऽपि चेतनः सांसारिक-स्वर्ग-मोक्षादिजं सुखं नैव लभेत) ॥

150 'यद्वै किञ्च मनुरवदत् तद्भेषजम्' (तै. सं. 2-2-10-3) 9

मननात् मनुः, ऋषिः प्रजापतिश्च । तेन सर्वलोकहितैषिणा यत् प्रतिपादितं, तत् सर्वं निःसन्देहं, भेषजमिव आधिव्याधिनिवारणेन इष्टप्रदानेन च योगक्षेमकरं भवति ॥

151 'यश्चक्षुषि तिष्ठन्' (बृ. उ 5-7-22) 257

152 'यस्तेजसि तिष्ठन्' (बृ. उ. 5-7-18) 190

चक्षुषि दर्शनसाधनभूतेन्द्रिये, तथा तेजसि च अन्तरवस्थिते । यः स परमात्मा तवाऽन्तर्यामी ॥

153 'यस्मिन्नुत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते; स वः श्रेष्ठः' (छां. उ. 5-1-7) 253

वागादीनां युष्माकं मध्ये यस्मिन् एकस्मिन् देहादुत्क्रान्ते सति, इदं शरीरम् अतिहेयमिव सर्वथा स्वकार्याक्षमं सत् विकृतं ज्ञायते, (यस्मिंश्चावस्थिते समीचीनं च) स एव युष्मासु मध्ये श्रेष्ठतमः ॥

क्रमसंख्या		प्र. सं.
154	'यस्य पृथिवी शरीरम्' (सुबा. उ. 7)	191
155	'यस्य बुद्धिः शरीरम्' (,,)	191
	यं प्रति पृथिवी बुद्धिश्च, आधेयत्व-विधेयत्व-शेषत्वैः शरीरभूते वर्तेते ; सः आधारत्वादिमान् पुरुषः, अन्तरात्मभूतः स्वयंज्योतिः भगवान् नारायणः ।।
156	'यस्याऽऽत्मा शरीरम्' (बृ. उ. मा. पा. 5-7-26)	86, 233
	(विवृतिः प्र सं. 140 'य आत्मनि' इत्यत्र)
157	'यस्याऽनुवित्तः प्रतिबुद्ध आत्मा' (बृ. उ. 6-4-13)	206
	यः जीवस्य कर्मफलोपभोगाय प्रवृत्ते, अनर्थबहुले अस्मिन् देहे, जीवेन सहैव तदनुग्रहार्थं प्रविष्टः सन्, तस्य उपास्यः प्राप्यश्च भवति, सः प्राज्ञात्मा, मुक्तप्राप्यः परमात्मा ।।
158	'यस्याऽव्यक्तं शरीरम्' (सुबा. उ. 7)	191
159	'यस्याऽहङ्कारः शरीरम्' (,,)	191
	अव्यक्ताहङ्कारौ तत्त्वात्मकौ, आधेयत्वादिना यन्नियाम्यभूतौ, स पुरुषः, सर्वान्तर्यामी भगवान् नारायणः ।।
160	'येनाऽश्रुतं श्रुतम्' (छां. उ. 6-1-3)	183, 198
	(विवृतिः प्र. सं. 210 'स्तब्धोऽसि' इत्यत्र)
161	'ये वै केचाऽस्माल्लोकात् प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौषी. उ. 1-9)	205
	निष्पन्नमोक्षोपायाः विद्वांसः, इष्टापूर्ताद्यनुष्ठानपराः अविद्वांसश्च, ये वा के वा सर्वेपि देहादपक्रम्योर्ध्वगामिनः (स्वर्गापवर्गभागिनः), अविशेषतः चन्द्रं प्राप्नुवन्त्येव ।।
162	'योऽग्नौ तिष्ठन्नग्नेरन्तरः, यमग्निर्न वेद, यस्याऽग्निः शरीरम्, योऽग्निमन्तरो यमयति, स त आत्माऽन्तर्याम्यमृतः ।।' (बृ. उ. 5-7-9)	257
	(विवृतिः प्र.सं. 140 'य आत्मनि' इत्यत्र आत्मपदस्थाने अग्निपदं निवेश्य ज्ञातव्या) ।।

क्रमसंख्या			पृ. सं.
163		**'योऽप्सु तिष्ठन्'** (बृ.उ. 5-7-8) ['यः पृथिव्यां तिष्ठन्' इतिवत्]	113
164		**'योऽयं मध्यमः प्राणः'** (बृ.उ. 4-2-1) ('अयं वाव शिशुः' इति वाक्यारम्भे श्रुतम्) प्राणस्य सर्वशरीर-वर्तित्वेऽपि, हृदयाख्यदेहमध्यस्थानवर्ती प्राणः, (स्थानान्तरसञ्चारि-प्राणवत् कार्यविशेषाजननात्, सद्योजातशिशुसदृशः) ॥	252
165		**'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः'** (बृ.उ. 6-3-7) विज्ञानधर्मकः विज्ञानस्वरूपश्च, यः प्राणशब्दितेन्द्रियप्राणमध्यगः हृत्कमलमध्यगः) ज्योतिःशब्दितप्रकाशस्वरूपः पुरुषः, स एव जीवाभिध आत्मा ॥	203,208
166		**'यो वायौ तिष्ठन्'** (बृ.उ. 5-7-11) ['यः पृथिव्यां तिष्ठन्' इतिवत्]	190,257
167	I	**'यो विज्ञाने तिष्ठन्....यस्य विज्ञानं शरीरम्'** (बृ.उ. 5-7-26)	24
	II	**'यो विज्ञाने तिष्ठन्'** ,, 'ज्ञानस्वरूपे ज्ञानधर्मके च जीवरूपे आत्मन्यवस्थितः'—इत्यादि य आत्मनीत्यत्रेव ॥	202,210
168		**योऽव्यक्तमन्तरे सञ्चरन्, यस्याऽव्यक्तं शरीरं, यमव्यक्तं न वेद, योऽक्षरमन्तरे सञ्चरन्, यस्याऽक्षरं शरीरं, यमक्षरं न वेद, एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः ॥** (सुबा.उ. 7) यः परमात्मा, अव्यक्ताक्षरयोः अन्तरवस्थितः, तयोरवेद्यः तच्छरीरकश्च, स एव सर्वेषु भूतेष्वन्तःप्रविश्य तेषां नियमनशीलः पापासंश्लिष्टः अद्वितीयस्वयंज्योतीरूपः परमव्योमनिलयः, नारायणपदाभिधेयः ॥	85
169		**'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'** (छां.उ 6-1-4) घट-शरावादिलक्षणो विकारः, तत्तन्नामधेयं च वाक्पूर्वकहानोपादाना-	65, 66

क्रमसंख्या पृ. सं.

दिव्यवहारार्थम् आरभ्यते-आलभ्यते स्पृश्यते मृत्पिण्डेन । वस्तुतो मृत्पिण्डमेव अवस्थाभेदेन तत्तन्नामरूपभाक् । तत्सर्वं मृत्तिकेत्येव खलु प्रमाणत उपलभ्यते ॥

170 'वायुश्चाऽन्तरिक्षं चैतदमृतम्' (बृ.उ. 4–3–3) 182,185,241

वाय्वन्तरिक्षे परस्यात्मनः चिरकालावस्थायिनी अमूर्ते रूपे ॥

171 'वायोरग्निः (तै.उ.आन. 1–2) 182, 187

वायुशरीरकात् परस्मादात्मनः अग्निरुत्पन्नः ॥

172 'वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥' 206

स्वरूपत एव सूक्ष्मस्य केशस्याऽग्रभागः ततोऽपि सूक्ष्मतरः । सोऽपि यदि शतांशवानिति मनसा कल्प्येत, तर्हि तेष्वेकतमोंशः जीवस्य परिमाणनिरूपकतया भावनीयः । अतः अणुरेवाऽयमिति निर्धार्यः । स्थूलदृष्टेः सर्वथा अगोचरः । अयं स्वरूपत ईदृशोऽपि, स्वभावतः स्वीयधर्मभूतज्ञानतः, आनन्त्यवान् भवति, समस्तप्रतिबन्धकनिवृत्तौ सत्याम् । मोक्षदशायां एतदीयं विभु भवतीति ॥

173 'विज्ञातारमरे केन विजानीयात् ?' (बृ. उ. 6–5–15) 204

सर्वज्ञं तादृशं परमात्मानं, ध्यानाख्यमुपायं विना, केन वा अन्येनोपायेन साक्षात्कुर्यात् ?

174 'विज्ञानं चाविज्ञानं च' (तै. उ. आन. 6–3) 13

ब्रह्मैव सर्वविधातृ, ज्ञानाश्रय-तदनाश्रयचेतनाचेतननामरूपभाक् अभवत् ॥

175 I 'विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च ॥' (तै.उ.आन. 5–1) 202, 218

II 'विज्ञानं यज्ञं तनुते' (,,) 210

ज्ञानस्वरूपो ज्ञानधर्मकश्च जीवः, शास्त्रविहितं, लौकिकं च कर्म अनुतिष्ठति । (कर्तृत्ववानेव सः) ॥

क्रमसंख्या पृ. सं.

176 **'विश्वं नारायणः'** (तै. उ. आन. 11–1–2) 176

(तैत्तिरीयोपनिषदि, 'विश्वं नारायणं हरिम्' इति आनुपूर्वी)। बद्ध-मुक्त-नित्यात्मकानां चेतनानां, तद्भोग्यरूपाणामचेतनानां च धारण-पोषणादिना कारणत्वे चावस्थानात् विश्वात्मको नारायणः ॥

177 **'विश्वा भूतानि'** (तै. आर. पु. 3–12–3) 230

(विवृतिः प्र. सं. 112 'पादोऽस्य' इत्यत्र)

178 **'वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे'** (तै. आर. पु. 3–12–16) 162

पुरुषसूक्तप्रतिपादितवैभवं, सर्वत्र व्याप्तस्वरूपं, सूर्यसदृशतेजसम्, सर्वलोकातिगे परमे व्योम्नि विराजमानं परमपुरुषम् अहं साक्षात्कृत-वानस्मि ॥

179 **'व्याकरवाणि'** (छां. उ. 6–3–2)

(विवृतिः प्र. सं. 12 'अनेन जीवेन' इत्यत्र)

180 I **'स एकधा भवति त्रिधा भवति पञ्चधा'** (छां. उ. 7–25–2) 34

II **'स एकधा भवति'** (,,) 26

सर्वबन्धविनिर्मुक्तः आविर्भूतस्वस्वरूपो जीवः, भगवत्सङ्कल्पानुगुण-स्वसङ्कल्पेन विविधशरीरपरिग्रहवान् भवति ॥

181 **'स एकाकी न रमेत'** (महो. 1) 163

(विवृतिः प्र. सं. 45 'एको ह वै' इत्यत्र)

182 **'स एको ब्रह्मण आनन्दः'** (तै. उ. आन. 8–4) 210

उपास्यभूतस्य परस्य ब्रह्मण आनन्दः, प्रजापत्यानन्दशतगुणिता-नन्दोपलक्षितस्वरूपो निरवधिकः ॥

183 I **'स कारणं करणाधिपाधिपो न चाऽस्य कश्चिज्जनिता न चाधिपः'** (श्वे. उ. 6–9) 74

II **'स कारणं करणाधिपाधिपः'** ,, 85

परमात्मैव, सर्वेषां सर्वविधज्ञानस्याऽपि कारणभूतः, केवलं तावदेव न;

क्रमसंख्या | पृ. सं.

कर्मज्ञानेन्द्रियाणामधिष्ठातुर्जीवस्याऽधिष्ठाता नियन्ता च । अस्य परमात्मनः कारणं नियन्ता च नैव कश्चनाऽस्ति ॥

184 'सच्च त्यच्चाऽभवत्' (तै.उ.आन. 6–3) 70, 258
(विवृतिः प्र. सं. 73 'तत्सृष्ट्वा' इत्यत्र)

185 'स तत्र पर्येति ; जक्षत् क्रीडन् रममाणः' (छां. उ. 8–12–3) 34
जीवात्मा परं ज्योतिरुपसम्पद्य, अविनाभावेन तत्सांनिध्य-तदनुभवादिमान् भवति । परमात्मभोगानुगुणादन-क्रीडा-रतिमान् भवति ॥

186 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ. आन. 1–1) 54, 64, 211
मोक्षोपायभूतोपासनविषयीभूतं ब्रह्म, निरुपाधिकसत्तायोगि, नित्यासङ्कुचितज्ञानैकाकारं देश-काल-वस्तुपरिच्छेदरहितं च । (हृदयगुहानिहितं तत् य उपास्ते, सः ब्रह्म तद्गुणांश्चानुभूयानन्दी भवति) ॥

187 'सत्यकामः सत्यसङ्कल्पः' (छां. उ. 8–1–5, 8–7–1) 97, 203
(विवृतिः प्र. सं. 18 'अपहत' इत्यत्र)

188 I 'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्' (छां.उ. 6–2–1) 184, 65, 69, 93
II 'सदेव सोम्येदमग्र आसीदेकमेव' ,, 73, 86
III 'सदेव सोम्येदमग्र आसीत्' ,, 20,78,102,241
IV 'सदेव सोम्येदमग्रे' ,, 80,90,92,163
बहुत्वेन विभक्तनामरूपतया च प्रत्यक्षादितो ज्ञायमानं विश्वं, सृष्टेः प्राक् निमित्तान्तरशून्यं, अविभक्तनामं च सत्, सच्छब्दितब्रह्मैकरूपमेवासीत् ॥

189 I 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः । .... ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'
(छां. उ. 6–8–6, 7) 65
II 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'
(छां. उ. 6–8–6, 7) 196

अचित्संसृष्टं सर्वमिदं चेतनजातं, सच्छब्दवाच्यब्रह्माधीनोत्पत्तिमत् ब्रह्मैकधार्यं तत्रैव लीयमानं च। इदं प्रमाणप्रतिपन्नं सर्वं, उपादानभूतेन अन्तर्यामिभूतेन च ब्रह्मणा व्याप्तम्। तच्च ब्रह्म सर्वनियन्तृत्वात् सर्वं प्रति आत्मा। तादृशब्रह्मात्मकोऽसि श्वेतकेतो! त्वम्॥

190 **'सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त'** (मुण्ड. उ. 2-1-8) 241

अक्षराख्यात् परस्माद्ब्रह्मणः सकाशात्, प्राणादयो होमान्ताः अजायन्त खलु। तथैव भूरादयः सत्यान्ताः सप्तलोका अप्युत्पन्नाः। येषु भूरादिषु देहान्तर्गतेषु लोकेषु, सर्वभूतगुहाशयेन परमात्मना चक्षुरादिरूपेन्द्रियाख्याः सप्त प्राणा अपि स्थापिताः (प्रतिदेहि) स्वस्वव्यापार-प्रवणा वर्तन्ते॥

191 **'सप्त वै शीर्षण्याः प्राणाः, द्वाववाञ्चौ'** (तै.सं. 5-3-10-13) 245

प्रतिदेहं मूर्धनि विद्यमानाः प्राणाः – इन्द्रियच्छिद्राणि सप्त भवन्ति नासा श्रोत्र-नेत्रेषु द्वे द्वे छिद्रे। वदनच्छिद्रमेकमिति। अधश्च पायूपस्थयोर्द्वे छिद्रे। आहत्य नवच्छिद्रात्मकमिदं शरीरम्॥

192 **'सम ऐभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण'** (बृ.उ. 3-3-22) 255

(वाग्विशिष्टोऽयं मुख्यः प्राणः) समष्टिजीवभूतस्य त्रैलोक्यशरीरकस्य ब्रह्मणः शरीरेणाऽपि समः। तथा देव-मनुष्यादि सर्वचेतनशरीरेणाऽपि समः; तत्तच्छरीरानुरूपव्याप्तिमत्त्वात्। (अतोऽयं प्राणः सम इत्युच्यते)॥

193 **'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः'** (मुण्ड.उ. 3-1-2) 13

छेद्यत्वसादृश्येन वृक्षवदत्यन्तं नश्वरेऽस्मिन् एकस्मिन्नेव देहे, परमात्मना सहैवाऽवस्थितो जीवः अनादिभगवन्मायातिरोहितस्वरूपप्रकाशः, स्वसंसृष्टाचिदात्म्यं स्वस्मिम् भावयन्, तदायत्तं च दुःखमनुभवति (अस्वतन्त्रः)॥

194 **'स यथा महाराजः'** (बृ. उ. 4-1-18) 218

(विवृतिः प्र. सं. 51 'एवमेवैषः' इत्यत्र)

क्रमसंख्या　　　　　　　　　　　　　　　　　　　　　　　　　　　पृ. सं.

195　**'स यदि पितृलोककामो भवति'** (छां. उ 8-2-1)　　34

दहराकाशाख्यं परमात्मानं, तद्गतांश्च कल्याणगुणान् उपास्य, परमपदं प्राप्नुवन् निर्धूतपारतन्त्र्यः, यदि प्राक्तनानेकजन्मसम्बन्धिपितृवर्गं दिदृक्षेत, तदा अस्य प्राक्तनः पितृवर्गः, अस्य सङ्कल्पमात्रेण आविर्भूतः सन् एतदनुभवविषयो भवति ॥

196　**'सर्वं खल्विदं ब्रह्म'** (छां. उ. 3-14-1)　　71, 176, 196

सर्वस्याऽस्य जगतः, ब्रह्माधीनजनिमत्त्वात्, ब्रह्मण्येव लीयमानत्वात्, ब्रह्माधीनस्वरूपस्थितिप्रवृत्तिमत्त्वाच्च 'इदं सर्वं ब्रह्मात्मकम्' 'ब्रह्म वा सर्वात्मकम्' इति ज्ञात्वा, कुत्राऽपि ईर्ष्यारोषादिकमकृत्वा, शान्तः सन् ब्रह्मोपासीत ॥

197　**'सर्वं तं परादात् योऽन्यत्राऽऽत्मनः सर्वं वेद'** (बृ. उ. 6-5-7)　　71

यश्चेतनः, 'सर्वं जगत् ब्रह्मणः सकाशात् विनाभूतम्—स्वनिष्ठम्' इति अब्रह्मात्मकत्वेन जानीयात्, तं सर्वमपि जगत् अभिभवेत् ॥

198　**'सर्वं हीदं प्राणेनाऽऽवृतम्'** (ऐत. आर. 2-1-6)　　255

वागादीनामिन्द्रियाणां व्यापारजातं प्राणायत्तमेव ॥

199　**'सर्वा (एत) ह वै देवता अहं श्रेयसे विवदमानाः'**
(कौषी. उ. 2-14)　　17

देहेऽस्मिन् सम्भूय वर्तमानाः वागादयो देवताः प्राणेन साकं स्वस्वोत्कृष्टताख्यापनाय कृतस्पर्धाः, देहादस्मात् पर्यायत उच्चक्रमुः। (अन्ते प्राणे एव सर्वोत्कर्षं निश्चितवत्यश्च) ॥

200　**'सर्वाणि ह वा इमानि भूतानि प्राणमेवाऽभिसंविशन्ति प्राणमभ्युज्जिहते'** (छां. उ. 1-11-5)　　242

उत्पन्नानि सर्वाण्यपि भूतानि प्राणसम्बन्धाधीनोत्पत्तिमन्ति, पुनः प्राण एव लीयन्ते च। (अभिसंविशन्ति—लीयन्ते, अभ्युज्जिहते—उत्पद्यन्ते) ॥

201　I　**'स वा एष महानज आत्माऽजरोऽमरोऽमृतो ब्रह्म'** (बृ उ. 6-4-25)　　199

क्रम संख्या | | | प्र. सं.

II 'स वा एष महानज आत्मा' (बृ.उ. 6-4-25) 206
पूर्वप्रस्तुत एष परमात्मा, जन्म-जरा-मरणशून्यः असंसारी च ।।

202 'सह ब्रह्मणा विपश्चिता' (तै. उ. आन. 1-2) 211
सत्य-ज्ञानानन्तस्वरूपस्य हृदयगुहानिहितस्य परस्य ब्रह्मण उपासिता, उपास्यं परं ब्रह्म तद्गतान् असंख्येयांश्च कल्याणगुणांश्च परमे व्योमनि अनुभवति ।।

203 'साधुकारी साधुर्भवति पापकारी पापो भवति ।
पुण्यः पुण्येन कर्मणा भवति पापः पापेन ।।' (बृ. उ. 6-4-5) 101
श्रुत्यादिविहितसात्त्विककर्माचरणपरः, ब्राह्मणादिरमणीयशरीरसम्पन्नो जायते । तन्निषिद्धराजसतामसकर्माचरणशीलः श्वचण्डालादिकुत्सित-देहवान् भवति । इमे साधुकारित्व-पापकारित्वे अपि प्राक्तनपुण्यपाप-प्रयुक्ते एवेति ।।

204 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' (ते. ना. उ. 1-44) 102
उत्पन्नस्य जगतो नियन्ता चतुर्मुखः, प्राक्तने कल्पे इव अधुनातनेऽपि कल्पे अह्नो रात्रेश्च विधानाय दिवाकर-निशाकरावपि कल्पयामास।।

205 I 'सेयं देवतैक्षत, हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति' 'तासां त्रिवृतं त्रिवृतम्' (छां. उ. 6-3-2, 3) 70, 264

II 'सेयं देवता' 265
सच्छब्दाभिहिता परमात्मस्वरूपा देवता, अहं तत्तदभिमानि-देवताधिष्ठितानि तेजो-जल-पृथिव्यात्मकानि त्रीणि भूतानि, मदात्मकेन जीवेन (जीवशरीरकेण मयेति वा) अनुप्रविष्टाः कृत्वा, तत्तदनुगुण-नामरूपयोः सन्धाता भवेयम्, तेषां भूतानां मध्ये एकैकामपि सृष्ट्युपयोग्यन्योन्यसंयोगवतीं करोमि ।।

206 'सेयं देवतेमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरोत्' (छां. उ. 6-3-3) 266
(विवृतिः प्र. सं. 13 'अनेन जीवेन' इत्यत्र)

क्रमसंख्या पृ. सं.

207 **'सैषाऽनस्तमिता देवता यद्वायुः'** (बृ. उ. 3-5-72) 241

अग्न्यादित्यादिरूपाः देवताः, कदाचित् स्वव्यापाराद्विरताः—अस्तम्-अदर्शनं प्राप्नुवन्ति। वायुरूपा देवता तु, सदागतिमत्त्वात् अविरतव्यापारा सती, अस्तशून्या देवतेति, सा सर्वोत्कृष्टा ॥

208 **'सोऽकामयत। बहु स्यां प्रजायेयेति'** (तै.उ.आन. 6-2) 162

पूर्वोक्त आनन्दमयः परमात्मा, 'अहमेव देव-मनुष्याद्यात्मना बहुरूपं प्राप्नुयाम्, तदर्थं समष्टिव्यष्टिचेतनाचेतनरूपेण प्रकर्षेण जायेय' इति सृष्टिसङ्कल्पमकरोत् ॥

209 **'सोऽहं भगवो मन्त्रविदेवाऽस्मि नाऽऽत्मवित्'** (छां.उ. 7-1-3) 171

भो गुरुत्वेन मया उपसन्न उपदेश्यार्थतत्त्वज्ञ ! सनत्कुमार ! वेद-तदङ्गोपवेदादिसर्वविद्यास्थानज्ञानसम्पन्नोऽप्यहम्, केवलं शब्दब्रह्मण्येव विश्रान्तोऽस्मि ; न तु सर्वशोकनिवारके सर्वविद्यास्थानपर्यवसानभूमि-भूते परमात्मनि ॥

210 **'स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाऽश्रुतं श्रुतं भवत्यमतं मतम-विज्ञातं विज्ञातम्'** (छां.उ. 6-1-3) 65

हे श्वेतकेतो ! गुरुकुलात् समावृत्तः त्वम्, विद्यार्जनविषये जडीकृतमनाः निर्व्यापारोऽसि। श्रवण-मनन-निदिध्यासनैः यस्मिन् वस्तुनि विषयीकृते सति, तेन अश्रुतामतानिदिध्यासितमपि सर्वं वस्तु श्रवणादिविषयीकृतप्रायमेव भवेत्, तादृशं सर्वप्रशासितृ आदेशपद वाच्यं, प्रश्नपूर्वकं किं ज्ञातवानसि ? तस्मिन् ज्ञाते खल्वियं स्तब्धता युज्यते ॥

211 I **'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।**
उभौ तौ न विजानीतो नाऽयं हन्ति न हन्यते॥' (कठ.उ. 2-19) 216

कश्चन घातको यदि कंचनोद्दिश्य, 'अहमेनं वधिष्यामि' इति चिन्तयेत्, यदि वा केनचित् प्रहृतः कश्चन छिन्नाङ्गः सन्, 'अहमनेन हतः' इति चिन्तयेत्, तौ द्वावपि न यथार्थवेदिनौ ; जननमरणादि-रहितस्य ज्ञानैकाकारस्यात्मनः हननाद्ययोग्यत्वात्, (तस्य अन्यथा-ज्ञानरूपत्वात्) ॥

क्रमसंख्या **प्र. सं.**

212 **'हन्ताऽहमिमास्तिस्रो देवताः'** (छां.उ. 6-3-2) 17

(विवृतिः प्र.सं. 205 'सेयं देवता' इत्यत्र)

213 **'हृदि (ह्येष) ह्ययमात्मा'** (प्रश्न.उ. 3-6) 208

प्रस्तुतोऽयं जीवात्मा, हृदयाख्ये शरीरमध्यगते प्रदेशे समानसंज्ञकेन प्राणवायुना सह वर्तते। तत्रैव हृदयदेशे एकाधिकाः शतं नाड्यः वर्तन्ते ॥

[इति श्रौतानां प्रमाणानामर्थाः]

—o—

[सूत्र-स्मृत्यादयः]

214 **'अग्नेरूर्ध्वज्वलनं, वायोस्तिर्यग्गमनम्, अणुमनसोराद्यं कर्म, —इत्येतान्यदृष्टकारितानि'** (वै.सू. 5-2-13) 128

वह्निगतं यत् ज्वलनाख्यं कर्म ऊर्ध्वदेशसंयोगानुकूलं, वायुगतं यत् तिर्यग्गमनम्, ऊर्ध्वाधोनियमरहितं सम-वक्रादिगमनं, यच्च सर्गाद्यकाले परमाणौ आद्यं स्पन्दनं, यदपि च मनसि जायमानं ज्ञानासमवायिकारणात्मसंयोगानुकूलं पुरीतद्भिन्नदेशावच्छिन्नं प्राथमिकं चलनम्—इमानि सर्वाणि जीवसमवेतेन अनादिपुण्य-पापात्मकेन अदृष्टेन निमित्तभूतेन जायमानानि ॥

215 **'अचेतना परार्था च नित्या सततविक्रिया।**
त्रिगुणा कर्मिणां क्षेत्रं प्रकृतेरूपमुच्यते ॥' (प.सं.) 170

सत्व-रजस् तमोरूपगुणत्रयवती प्रकृतिः, स्वयमचेतना चेतनोपकारैकप्रयोजना उत्पत्ति-विनाशरहितस्वरूपवती, सर्गकाले सततपरिणामिनी च। क्षेत्रपदाभिधेयं यत् कर्मिणां शरीरं, तत् अस्याः परिणतिरूपमेव ॥

216 I **'अधिकं तु भेदनिर्देशात्'** (ब्र.सू. 2-1-22) 71
II ,, ,, 87
III ,, ,, 28

क्रमसंख्या प्र. सं.

217 'अधिपति-सहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारः ज्ञानोत्पत्तौ हेतवः' (बौ.द.) 139

चक्षुरादीन्द्रियम्, तत्सहकारि आलोकादि, ग्राह्यो घटादिर्विषयः, अव्यवहितपूर्वक्षणप्रत्ययः—एतानि चत्वारि, ज्ञानसामान्योत्पत्तौ कारणानि॥

218 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधा च पृथक्चेष्टा दैवं चैवाऽत्र पञ्चमम् ॥' (भ.गी. 18-14) 217

आत्मनः प्रवृत्त्याद्यधिष्ठानं शरीरम्, शरीराधिष्ठातृभूतो जीवः, तद्व्याप्तिसाधनं समनस्कं वागादिकमिन्द्रियम्, निमेषोन्मेषादिचेष्टाहेतुः देहधारकः प्राणः, सर्वनियन्ता परमात्मा चेति पञ्चामी सर्वकार्येषु हेतुभूताः ॥

219 'अधीता भगवन् वेदाः साङ्गोपाङ्गाः सविस्तराः ।
श्रुतानि च मयाङ्गानि वाकोवाक्ययुतानि च ॥' (परं. सं.) 172

भो परमार्थवेदिन् नारद ! तत्त्वार्थजिज्ञासुना मया तत्त्वावेदनपरा वेदाः, तदङ्गानि च शिक्षादीनि, उपाङ्गभूतानि वेदार्थविस्तारपराणीतिहास-पुराणादीनि, एतद्दृढीकरणप्रयोजनानि चान्यानि उक्ति-प्रत्युक्त्यात्मकानि विदुषां वचांसि—एतानि सर्वाण्यधीतानि । परंतु निःश्रेयसहेतुस्तत्त्वार्थ-निर्णयो नैव सम्पन्नः । संशया एव सर्वत्र प्रवृद्धाः इति नारदं प्रति शाण्डिल्यस्योक्तिः ॥

220 I 'अपीतौ तद्वत् प्रसङ्गादसमञ्जसम्' (ब्र. सू. 2-1-8) 27
II ,, ,, 87

221 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' (ब्र. सू. 2-1-8) 256

222 'अभ्युपगमेऽप्यर्थाभावात्' (ब्र. सू. 2-2-8) 28

223 'अवस्थितेरिति काशकृत्स्नः' (ब्र. सू. 2-2-8) 86

स्वशरीरभूते जीवात्मनि अन्तरात्मतयाऽवस्थानं निमित्तीकृत्य, श्रुतिषु जीवात्मवाचिभिः शब्दैः परमात्मनः अभिधानं दृश्यते—इति समाधानं काशकृत्स्न आचार्यो मन्यते ॥

क्रमसंख्या पृ. सं.

224 'अवा(पा)न्तरतपा नाम वेदाचार्यः स उच्यते' (म.भा.शां. 358-66) 175

(अत्र 'प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन' इत्युत्तरार्धम्) 'अवान्तरतपाः' इति प्रसिद्धः कश्चन महर्षिरासीत् । स एव वेदानामाद्यः प्रवक्ता आचार्योऽभूत् । तमेव च ऋषिं 'प्राचीनगर्भं' इति केचिद्वदन्ति ॥

225 'अव्यक्तं पुरुषे ब्रह्मन् प्रकृतौ सम्प्रलीयते' (म.भा.शां. 347-31) 6

(अत्र, 'नास्ति तस्मात्परतरः पुरुषाद्वै सनातनात्' इत्युत्तरार्धम्) हे ब्रह्मर्षे ! नारद ! प्रलयकाले सम्प्रवृत्ते सति, सर्वस्याऽपि तत्त्वजातस्य अव्यक्ताख्ये भूतसूक्ष्मे लये सम्पन्ने, सृष्टिक्रियाविमुखे सनातने परमपुरुषे तदव्यक्तम् अविभक्तावस्थं सत् पृथक्प्रतीत्यनर्हतया लीनं भवति । स एव च सर्वस्मात्परतरः पुरुषः ॥

226 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्' (भ. गी. 16-8) 224

ये आसुरसर्गप्रविष्टाः शास्त्रीयार्थप्रद्वेषणशीलाश्चेतनाः, ते—जगदिदं सत्यभूतवस्त्वधीनप्रवृत्त्यादिमन्नभवति ; अत एव दृढाधाररहितं चेति, नियामकरहितं कामहेतुकमेव प्रवर्तते इति ब्रुवते ॥

227 I 'असदिति चेन्न प्रतिषेधमात्रत्वात्' (ब्र. सू. 2-1-7) 37

II ,, ,, 88

228 'असन्ततेश्चाव्यतिकरः' (ब्र. सू. 2-3-48) 231

229 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (भ. गी. 7-6) 5

हे अर्जुन ! चेतनाचेतनसमष्टिरूपमदीयप्रकृतिद्वययोनिकस्य ब्रह्मादिस्तम्बान्तस्याऽस्य विश्वस्य, सृष्टिनिदानभूतः प्रलयाश्रयश्च, वासुदेवोऽहमेव—इति निश्चिनु ॥

230 I 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥' (भ गी. 10-8) 224

II 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते' ,, 5

'चेतनाचेतनगर्भस्य समग्रस्याऽस्य विश्वस्य उत्पत्ति-प्रवृत्त्यादिकं सर्वं प्रत्यपि अहं वासुदेव एक एव हेतुभूतः' इत्येवंविधं मदीयं निरुपाधिकमैश्वर्यं, तदुपयोगि मदसाधारणं सौशील्यादिगुणजातं च मद्वृत्तं, शास्त्र-गुरूपसत्ति-मदनुग्रहायत्तानुभवादिना च ज्ञात्वा, तादृशवैभवयुते मयि स्पृहयालुतारूपभावविशेषयुक्ताः सन्तः, मां भक्तितः सततं सेवन्ते ॥

231 **'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।**
न तु मामभिजानन्ति तत्त्वेनाऽतश्च्यवन्ति ते ॥' (भ.गी. 9-24) 8

श्रौत-स्मार्तरूपाणां देवताराधनरूपाणां सर्वेषामपि कर्मणाम्, आरध्यतत्तद्देवताशरीरकोऽहमेव आराध्यभूतो भोक्ता । अहमेव च, मर्यादानतिलङ्घनेन तत्तत्कर्मफलप्रदः सन् तेषां प्रभुरपि वर्ते । एतच्च वस्तुतत्त्वमजानन्तः केचन त्रैविद्याः परिमितफलभाजो भूत्वा, च्यवन-स्वभावा भवन्ति ॥

232 **'आभा(मा) स एव च'** (ब्र.सू. 2-3-49) 230

233 **'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।**
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः' (म.स्मृ. 12-106) 29

ऋषिप्रवक्तृकं ऋगादिवेदजातं, तन्मूलकं धर्मोपदेशपरं स्मृतिजातं च, दृष्टश्रुत्यविरोधिना मीमांसादिविचारेणानुगृहीतं यथा स्यात् तथा यो निर्णयति, स एव धर्मतत्त्वज्ञो भवति ; नान्यः ॥

234 **'आसीदिदं तमोभूतम्'** (म.स्मृ. 1-5) 4

अत्र 'अप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः' इति श्लोकशेषः । इदं जगत्, सृष्टेः प्राक् प्रलयकाले, सम्प्राप्त-तमोऽवस्थमभवत् । लक्षणानाश्रयत्वात् प्रत्यक्षानुमानादिभिः प्रमाणै-रप्यविषयीकार्यं सत्, नीरे क्षीरमिव पृथग्व्यवहारानर्हससंर्गवत् आसीत् ॥ कार्याभिमुख्याभात् सर्वव्यापारोपरतं सुप्तावस्थमिवाऽवर्तत ॥

क्रमसंख्या — पृ. सं.

235 **'इतरव्यपदेशात्'** (ब्र.सू. 2-1-21) 27

236 **'इदं महोपनिषदं चतुर्वेदसमन्वितम् ।**
साख्य-योगकृ(तं तेन)तान्तेन पञ्चरात्रानुशब्दितम् ॥'
(मभा.शां. 348–62) 174

इदं वैष्णवं तन्त्रं, महत्तरं उपनिषत्पदाभिधानयोग्यं वर्तते ; यतः योगिमात्रगम्यपरमरहस्यभूतार्थबोधकम् । ऋग्यजुःसामाथर्वाख्यवेद-चतुष्टयप्रतिपाद्यानां तत्त्वहितपुरुषार्थानामवबोधनात् तत्समन्वितं च । तथा सांख्ययोगसिद्धान्तस्याऽपि अत्र मेलनात्, वेदचतुष्टय-सांख्य-योगरूपशास्त्रपञ्चकस्य परमज्ञानप्रदस्य सङ्गमनात् पञ्चरात्रेत्यन्वर्थ-नामवदास्ते ॥

237 **'इदं शतसहस्राद्धि भारताख्यानविस्तरात् ।**
आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम् ॥ (म.भा.शां. 353–11) 174
(उत्तरार्धे 'आमन्थ्य मतिमन्थेन ज्ञानोदधिमनुत्तमम्' इत्यपि पाठविशेषः)

यदिदमत्र सारभूतं विषयवस्तु प्रतिपादितमस्ति, तत् लक्षग्रन्थात्मकात् विस्तृतात् महाभारतनाम्नो महतः आख्यानात् कुशाग्रबुद्धिरूपेण मन्थनदण्डेन मन्थनपूर्वकं, दध्नः सकाशाद्घृतमिव उद्धृतं वर्तते (नारायणीयं पंचरात्रम्) ॥

238 **'इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम्'** (म.भा.शां. 343–33) 174
'ऋग्यजुः सामभिर्जुष्टमथर्वाङ्गिरसैस्तथा' (म.भा.शां. 343–41) 174
'भविष्यति प्रमाणं वै एत(न्मद)देवाऽनुशासनम्'
(म.भा.शां. 343–45) 174

पांचरात्राख्यैतच्छास्त्रोक्तमेव विषयजातं, सांसारिकापवर्गिकयोः अभ्युदयनिःश्रेयसयोः द्वयोरपि पुरुषार्थयोः परमं साधनम्, ब्रह्मानु-भवोऽपायोऽप्यत्र सम्यगुक्तः । अत इदमेव परमं हितम् । ऋग्यजुः-सामाथर्वाख्यैश्चतुर्भिर्वेदैरपि सम्यक् सम्बद्धम् ; यतः तत्त्वहितपुरुषार्थानां

क्रमसंख्या | | पृ. सं.

ऐहिकपारत्रिकाख्यानां वेदोदितानामत्र समीचीनं प्रतिपादनम् । इदमेव च शास्त्रं बुभुक्षूणां मुमुक्षूणां च हितोपदेशप्रवृत्तं सत्, प्रमाणभूतमनुशासनं भवति ॥

239 I 'इन्द्रियाणि दशैकं च पञ्चचेन्द्रियगोचराः' (भ. गी. 13–5) 246

II ,, ,, 259

(अत्र 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च' इति पूर्वार्धभागः) क्षेत्रभूतशरीरारम्भकद्रव्याणि, पूर्वार्धोक्तानि । चक्षुरादीनि पञ्च ज्ञानेन्द्रियाणि, वागादीनि पञ्च कर्मेन्द्रियाणि, एतयोर्द्वयोरपि उपकारि मनश्चेति एकादशेन्द्रियाणि, ज्ञानेन्द्रियविषयाः शब्दादयः पञ्चेति, आहत्य षोडश, क्षेत्राश्रिततत्त्वानि ॥

240 'ईक्षतेर्नाऽशब्दम्' (ब्र. सू. 1–1–5) 106

'सदेव सोम्येदमग्र आसीत्' इति सच्छब्दाभिधेयं, शब्देतरानुमानमात्रगम्यं सांख्योक्तं प्रधानं न भवितुमर्हति ; यतः 'तदैक्षत बहु स्याम्' इति, सच्छब्दवाच्यार्थचेतनत्वबोधकस्य 'ईक्ष' धातोः श्रुतौ प्रयोगोऽस्ति । प्रधाने चाचेतने, ईक्षधात्वर्थस्य सङ्कल्परूपेक्षणस्य बाधात् ॥

241 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥' (भ.गी. 18–6) 222

चेतनाचेतनसर्वजगन्नियमनशीलो भगवान् वासुदेवः, निखिलानां देहिनां सकलप्रवृत्तिनिवृत्तिहेतुभूतज्ञानोदयनिदाने शरीरान्तर्वर्तिनि हृदयाख्ये स्थानविशेषेऽवस्थितः सन्, तानि सर्वाणि भूतानि, तत्तत्फलभोगाय स्वेनैव निर्मितं देहेन्द्रियावस्थं प्रकृत्याख्यं यन्त्रमारूढानि कृत्वा, स्वीयया गुणमयया मायया तत्तत्कर्मानुगुणप्रवृत्त्यादौ संयोज्य, अवशसञ्चारशीलतामापादयन्, तदगोचर एवास्ते ॥

242 'उपलब्धिवदनियमः' (ब्र. सू. 2–3–36) 237

243 'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि' (ब्र. सू. 2–1–24) 113

क्रमसंख्या | पृ. सं.

244 'एकदेशस्थितस्याऽग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥' (वि. पु. 1–22–56) 233

गृहादेरन्तः यत्र क्वचित् अग्नेरवस्थानेऽपि, तदीयायाः प्रभायाः यथा गृहीयसर्वदेशव्यापिता, तथा अमूर्तस्य परस्य ब्रह्मणः सर्वतः प्रसारिशक्त्यात्मकं भवतीदमखिलं जगत् ॥

245 'एवमेकं सांख्ययोगं वेदारण्यकमेव च ।
परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते ॥' (म.भा.शां. 358–81) 176

परब्रह्मात्मकपञ्चविंशतितत्वानां विविच्य प्रतिपादनतः मुक्त्युपायभूतज्ञानयोगोपदेशपरं सांख्यम्, यमनियमाद्यष्टाङ्गोपेतब्रह्मोपासनं प्रति इतिकर्तव्यतारूपेण वर्णाश्रमविहितश्रौतस्मार्ताख्यकर्मानुष्ठानरूपकर्मयोगोपदेशपरं योगम्, देवताराधनात्मककर्मस्वरूपविशेषापदेशपरान् वेदान्, कर्मणामुपासनानां च भगवदाराधनरूपत्वख्यापनपराण्यारण्यकानि चेति आहृत्य (सांख्य-योगम्, चत्वारो वेदाः आरण्यकानि चेति पंचविधानि शास्त्राणि मेलयित्वा) मिथोङ्गाङ्गिभावापन्नानि एकतत्वप्रतिपादनपरतया एकीभूतानि तानि पंचरात्रमिति वर्ण्यते ॥

246 औदुम्बरी सर्वा वेष्टयितव्या' (स्मृतिः) 3

उदुम्बरवृक्षप्रकृतिका यज्ञवाटे निखाता (उद्गानकाले स्पृश्या) शाखा समग्रा, वस्त्रेण वेष्टनमर्हति ॥

247 'कण्ठिका रुचकं चैव कुण्डलं च शिखामणिः ।
भस्म यज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ॥
आभिर्मुद्रितदेहस्तु न भूय इह जायते ॥' (शै.आ.) 161

कण्ठिका-रुचक-कुण्डलानि, कर्णाभरणानि । शिखामणिः, शिरोधार्यो रत्नविशेषः । भस्म, ललाटे अङ्गेषु च धार्यम् । यज्ञोपवीतम्, देहधार्यम् । उक्तमेतत् मुद्राषट्कमुच्यते शैवे तन्त्रे । एताभिः षड्भिर्मुद्रितशरीरो मुमुक्षुः, पुनर्जन्मरहितो भवति ॥ (शैवे) ॥

क्रमसंख्या पृ. सं.

248 'कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते ।
क्रमागतैः स्वसंज्ञाभिर्ब्राह्मणैरागमं तु तत् ॥' (पौ.सं.) 168

यस्मिन् शास्त्रभागे अवगतं सिद्धान्तं प्रमाणीकृत्य, आनुवंशिकतया प्राप्ताराधनदीक्षैः द्विजैः ब्रह्मोपासनपरैः, वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धाख्यव्यूहमूर्तिचतुष्टयोपासनं क्रियते, स सिद्धान्तः वासुदेवादितत्त्वसंज्ञाचतुष्टयं पुरस्कृत्य ; आगमसिद्धान्त इत्यभिधीयते ॥

249 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु' (भ.गी. 13-2) 217

पूर्वपूर्वकर्मायत्तप्रकृतिपरिणामरूपदेवमनुष्यादियोनिविशेषेषु लब्धजन्मा अयं चेतनः, तत्तद्योनिसम्बन्धप्रयुक्तेषु गुणमयेषु सुखादिषु सक्तमनाः सन्, तत्साधनभूतेषु पुण्यपापात्मकेषु कर्मसु प्रवर्तते । ततश्च तत्फलानुभवाय पुनःस्वकर्मानुगुणेषु साध्वसाधुषु योनिषु जायत इति, जन्म-कर्मादिचक्रपारम्पर्येण अविरतप्रवृत्तिः अवशः संसरणे सक्तो भवति । अतः सत्वादिगुणेषु सक्तैव विविधजन्मप्राप्तौ कारणमिति ॥

250 'कार्य-कारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुख-दुःखानां भोक्तृत्वे हेतुरुच्यते ॥ (भ.गी. 3-20) 226

जीवीयादृष्टायत्तस्य शरीरस्य (भोगायतनभूतस्य), भोगसाधनभूतानां समनस्कानामिन्द्रियाणां च स्वस्वीयक्रियाकारित्वे निर्वाह्ये, तत्तज्जीवाधिष्ठिता प्रकृतिरेव हेतुः । सुख-दुःखभोगे निर्वाह्ये च प्रकृतिसंसृष्टश्चेतन एव हेतुः । अतः देहिकादिकार्यनिवाहे पुरुषस्याधिष्ठातृत्वरूपा कर्तृता । भोगनिष्पत्तौ तु आश्रयत्वरूपा सा इति विवेकः ॥

251 'किमेतान्येकनिष्ठानि पृथङ्गनिष्ठानि वा मुने' । (म.भा.शां. 359-2) 175
(विवृतिः प्र. सं. 351 'सांख्यं' इत्यत्र)

252 'कुतः सृष्टमिदं सर्वं जगत् स्थावरजङ्गमम् ।
प्रलये च कमभ्येति तन्मे ब्रूहि पितामह ! ॥' (म.भा.शां. 180-1) 5

जगन्निर्मातॄणां दक्ष-मरीच्यादीनां जनक ! हे चतुर्मुख ! प्रत्यक्षादिगोचरतापन्नमिदं जगत्, आदौ कारणभूतेन केन उत्पादितम् ? अन्ते च कस्मिन् वा लीयमानं भवति ? तत् मह्यं स्पष्टीकुरु ॥

क्रमसंख्या | | पृ. सं.

253 **'कृत्य-ल्युटो बहुलम्'** (पा.सू. 3-3-113) 66

'कृत्य' संज्ञकाः प्रत्ययाः, ल्युट् च प्रत्ययः, बहुलं प्रवर्तन्ते । भावे कर्मणि वा विहिताः कृत्याः, कारकान्तरेऽपि स्युः । करणाधिकरणयोः भावे च विहितो ल्युट्, अन्यत्राऽपि प्रवर्तते । यत्र यत्र विहिताः ततोऽन्यत्रापि भवन्तीत्यर्थः (का. वृ.) ॥

254 **'गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।**
य इच्छेत् सिद्धिमाधातुं देवतां कां यजेत कः ॥'
(म.भा.शां 342–1) 173

ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-सन्यासाख्येष्वाश्रमेषु चतुर्षु अन्यतममाश्रितः यःकोऽपि अधिकारी, स्व-स्वानुगुणां पुरुषार्थावाप्तिं कामयेत चेत्, कस्कः कां कां देवतामाराध्य परिपूरिताभिलाषः स्यात्? मह्यं विवृणु ॥

255 **'जगत् सर्वं शरीरं ते'** (वा.रा.यु. 120–27) 20

भगवन्! श्रीरामचन्द्र! चराचरात्मकमिदमखिलं जगत्? सर्वनियन्तृतया सर्वाधारकतया सर्वशेषितया च सर्वात्मभूतस्य तव, नियाम्यत्व-धार्यत्व-शेषत्वैः शरीरतापन्नमेव वर्तते । अपृथगवस्थप्रकारभावमाश्रितम् ॥

256 **'जन्माद्यस्य यतः'** (ब्र.सू. 1–1–2) 163

विचित्रानन्ताकारस्याऽस्य जगतः सृष्टि-स्थिति-प्रलयात्यन्तिकलयाना हेतुभूतं यत्, तदेव ब्रह्म ।

257 **'जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षाः'** (जै.द.) 155

ज्ञानदर्शनसुखवीर्यगुणः जीवः, जीवभोग्यवस्तुजातात्मकः अजीवः, जीवोपकरणभूतेन्द्रियादिरूपः आस्रवः, घातिकर्माघातिकर्मचतुष्टयाख्यः अष्टविधः बन्धः, मोक्षोपायत्वेन अर्हदुपदेशसिद्धतपोरूपं निर्जरम्, समाधिपदाभिधेयेन्द्रियनिरोधः संवरः, निवृत्तरागादिक्लेशस्य स्वाभाविकात्मस्वरूपाविर्भावरूपो मोक्षः, इति मोक्षसङ्ग्रहः । सत्यग्ज्ञान-दर्शनचारित्रात्मकः मोक्षोपायः इत्येते जैनसंमता अर्थाः ॥

क्रमसंख्या पृ. सं.

258 **'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्'** (भ.गी. 3-3) 174

अत्र 'सांख्य' शब्देन ज्ञानयोगः, 'योग' शब्देन कर्मयोगश्चाऽभिधीयेते। संख्या आत्मैकविषयिणी बुद्धिः। तद्वतां च अव्याकुलमतीनां ज्ञानयोगावलम्बिनी मोक्षार्था प्रवृत्तिः। तदनर्हाणां विषयव्याकुलितबुद्धीनां तु, कर्मयोगावलम्बिनी मोक्षार्था प्रवृत्तिरिति, ज्ञानयोग-कर्मयोगयोरधिकारिविवेकः इत्यर्थः॥

259 I **'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः'** (वि.पु. 1-2-6) 205

II **'ज्ञानस्वरूपमत्यन्तनिर्मलं'** ,, 210

III **'ज्ञानस्वरूपम्'** ,,

अत्र, 'तमेवाऽर्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्' इति उत्तरार्धम्। वास्तविकतया नित्यनिर्मलज्ञानैकाकारजीवशरीरकं, कर्मवशात् स्वाभाविकरूपबहिर्भूतदेवाद्याकारवत्तया भ्रान्तिविषयीभवज्जीवशरीरकं च परमात्मानं सर्वनियन्तारं विष्णुं प्रणम्य—इत्यर्थः॥

260 **'ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै।**
सांख्यस्य वक्ता कपिलः (परमर्षिः स उच्यते)॥'

(म.भा.शां. 359-64, 65) 175

'सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा' इति पूर्वो भागः। हिरण्यगर्भो योगस्य वेत्ता नाऽन्यः पुरातनः' इति पश्चात्तनो भागः। हे राजर्षे! साङ्ख्यादिशास्त्रप्रवर्तकानां कपिलहिरण्यगर्भप्रभृतीनां तात्पर्यगोचरीभूतानि तत्तच्छास्त्रसिद्धानीमानि ज्ञानानि मिथोविलक्षणस्वरूपाण्येव; तत्तत्कर्तृवैलक्षण्यस्य प्रमाणसिद्धत्वात्। यतः कपिलहिरण्यगर्भौ सांख्य योगयोः प्रवर्तकौ इति, भिन्नप्रवक्तृकयोः अभिप्रायभेदस्य अविप्रतिपन्नत्वात्॥

261 I **'ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्।**
महाभूतादि वृत्तौजाः प्रादुरासीत् तमोनुदः॥ (म.स्मृ. 1-6) 5

क्रमसंख्या | पृ. सं.

II 'ततः स्वयम्भूर्भगवान्' (म. स्मृ. 1–6) 74

सर्गकालप्राप्त्यनन्तरं, परमकारणभूतो भगवान् नारायणः, व्यष्टि-पदाभिधेयं कार्यजातं व्यंजयितुकामः, व्यष्टिकारणेषु पृथिव्यादिषु महाभूतेषु तत्कारणभूतयोर्महदहङ्कारयोश्च प्रवृत्तसङ्कल्पज्ञानरूपमहातेजोयुक्तः सन्, अविभक्ततमः शरीरकतां विसृज्य, अक्षरावस्थाप्राप्तिपूर्वकम् अव्यक्तावस्थप्रकृतिशरीरकोऽभूत् ।।

262 'तत्तु समन्वयात्' (ब्र.सू. 1–1–4) 157

जिज्ञास्यतया प्रतिज्ञातस्य ब्रह्मणः, निरुपाधिकपरमपुरुषार्थतया निखिलशास्त्रप्रतिपाद्यमानस्वरूपात् शास्त्रेण साकं समीचीनात् सम्बन्धात् ज्ञापकात्, शास्त्रैकप्रमाणकस्वरूपं शास्त्रयोनित्वं निर्बाधमेव ॥

263 'तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ।। (भ.गी. 18–16) 217

'जीवात्मनां कर्मसु स्वातन्त्र्यं परमात्मानुमन्तृत्वनिबन्धनम्' इति निश्चिते सति, यः स्वात्मानमेकमेव निरपेक्षं कर्तारं मन्यते, सः अपरिचिताध्यात्मशास्त्रत्वात् अयथावस्थितदर्शन इति, नैवाऽर्थतत्त्वदर्शनक्षमः ।।

264 'तत् सर्वं वै हरेस्तनुः' (वि.पु. 1–12–38) 25

(विवृतिः प्र.सं. 321 'यत्किंचित् सृज्यते' इत्यत्र)

265 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र. सू. 2–1–15) 140, 227

266 'तदन्तरप्रतिपत्तौ' (ब्र. सू. 3–1–1) 24

('रंहति संपरिष्वक्तः प्रश्न-निरूपणाभ्याम्' इति सूत्रशेषः) अमुमुक्षुः, अत एव फलाभिसन्धितः इष्टापूर्तादिकर्माचरणशीलः पुरुषः, पूर्वदेहं परित्यज्य देहान्तरगमनसमये पश्चात्तनभोगोपयिकदेहारम्भानुगुणैः भूतसूक्ष्मैः सम्बद्ध एव गच्छतीत्यवगम्यते ; श्रुतौ तत्प्रकरणस्थप्रश्नोत्तराभ्यां तथैव अवगम्यमानत्वात् ॥

क्रमसंख्या | पृ. सं.

267 **'तस्मात् कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः'** (आप. ध. सू. 1-23-2) 6

सुरनरतिर्यक्स्थावराख्यानि सर्वाण्यपि शरीराणि, विभाजः परमात्मनः सकाशादुत्पद्यन्ते। विभजति आत्मानं देवमनुष्यादिनानादेहानुप्रवेशेनेति विभाक् परं ब्रह्म। स एव सर्वकारणम्। स निर्विकारः सः अविनाशी ॥

268 **'तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।**
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ।। (सां. का. 19) 121

'त्रिगुणमविवेकि' (सां. का.) इत्यत्रोक्तात् पुरुषगतात् व्यक्ताव्यक्ताभ्यां वैधर्म्यात्, यथायोग्यमेते धर्माः पुरुषस्य सिध्यन्ति। कैवल्यं—दुःखादिसम्बन्धात्यन्तिकाभाववत्त्वम्, साक्षित्वम—बोद्धृत्वे सत्यकर्तृत्वम्, द्रष्टृत्वम्—बुद्धेः साक्षात् प्रकाशकत्वम्, अकर्तृत्वम्—स्वाभीष्टसम्पत्तये अयतमानत्वम्, माध्यस्थ्यम्—सुखदुःखादिसम्बन्धकृतरागद्वेषादिशून्यत्वम्—इति ॥

269 **'तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।**
गुण-कर्तृत्वे (ऽपि) च तथा कर्तेव भवत्युदासीनः॥' (सां.का. 20) 121

चैतन्य-कर्तृत्वयोः एकनिष्ठत्वाभावस्य पूर्वोक्तयुक्तिसिद्धत्वात्, स्वयं चैतन्यरहितमपि लिङ्गम्—बुद्धितत्त्वम्, स्वस्य पुरुषतत्त्वस्य च सांनिध्यायत्तात् भेदाग्रहात्, पुरुषगतचैतन्येन सम्बद्धमिव—जानामीति व्यवहारगोचर इव भवति। एवमेव च बुद्धिगताः सुखादयो गुणाः कर्तृत्वमपि च अन्योन्यधर्माध्यासात् पुरुषगता इव भवन्ति। वस्तुतस्तु पुरुषः, कर्तृत्वादिधर्मविदूरत्वात्, उदासीन एव वर्तते ॥

270 **'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम'** (म.भा.शां. ८-13) 6

हे द्विजश्रेष्ठ! सृष्ट्यर्थसङ्कल्पवतः सर्वकारणाद्भगवतो नारायणात्, त्रैगुण्यस्याश्रयभूतं अव्यक्तपदाभिधेयं भूतसूक्ष्मं प्रादुरभवत्—'विभक्ततमः' शब्दाभिलप्यमजायत ॥

271 'तस्मान्न बध्यतेऽद्धा न मुच्यते नाऽपि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ।।' 121

गुणमयी प्रकृतिः । पुरुषस्तु निर्गुणः । त्रैगुण्योपाधिकाः संसार-मोक्ष-स्थिति-बन्धाश्च न पुरुषाश्रया भवितुमर्हाः । अतः संसारादयः सर्वे प्रकृत्याश्रया एवेति दृढम् ॥

272 'तस्मिन्नण्डेऽभवद्ब्रह्मा सर्वलोकपितामहः' (म.स्मृ. 1) 264

परमात्मना त्रिवृत्कृतैः तेजोजलपृथिवीभिः समुत्पन्ने अण्डाकारे, सर्वेषां लोकानां पितामहस्थानीयः (जगज्जनकमरीच्यादिजनकः) चतुर्मुखः प्रादुरभवत् ॥ अण्डम्-ब्रह्माण्डम्-भुवनकोषः ॥

273 I 'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।।' (भ.गी. 16–19) 115

II 'तानहं द्विषतः ,, योनिषु' 225

अनात्मगुणभूतान् अहङ्कारादीनेव संश्रितवतः, कार्येषु स्वात्मनो निरपेक्षहेतुतामभिमन्यमानान्, वैषम्यादिराहित्येन सर्वभूतसमे हित-कारिणि मयि द्वेषादिप्रावण्यरूपम् आसुरं भावं प्राप्तवतः, स्वपरहित-विघातकान्, साधुकण्टकान्, अत एव मनुष्याधमान् देहिनः, चक्रवदविरतं परिवृत्त्या सन्तन्यमानेषु संसाराभिधेषु जन्मराशिषु, अहमेव पुनः पुनर्योजयामि ॥

274 'तानि सर्वाणि तद्वपुः' (वि.पु. 1–22–86) 25

पूर्वप्रस्तुतानि चराचरात्मकानि सर्वाण्यपि सर्वनियन्तुः परमात्मनः शरीरभूतानि ॥

275 I 'तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।।' (भ.गी. 10–11) 116

II तेषामेवाऽनु........तमः । नाश........भास्वता ।।' ,, 224

मयि सततयोगमाशंसमानानां तत एव मदुपासने प्रवृत्तानां चेतनानां, इष्टप्राप्त्यनिष्टनिवारणहेतुमदीयप्रसादविशेषसिद्ध्यर्थं, अनुग्रहौपयिकज्ञान-शक्तिकारुण्यादिमयदिव्यमङ्गलविग्रहसम्पन्नोऽहम्, तेषां निरन्तरध्याना-लम्बनभूते मदीये निरुपाधिके आत्मभावे अवस्थितः सन्, ध्यानकालीनमत्प्रकाशविरोधिभूतं, प्राक्तनकर्मरूपादज्ञानवतो जातं, विषयान्तरप्रवणतारूपं मानसिकं तमः, मदनुभवनैरन्तर्यात्मना दीपेन साधनभूतेन, निर्मूलयामि ॥

276 I **'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।**
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥' (भ.गी. 10–10) 116

II **'तेषां सतत.... पूर्वकम्। ददामि ....न्ति ते ॥'** ,, 224

मय्येव सततयोगमाशंसमानानां, मदुपासनपराणां चेतनानां, योग-पदाभिलप्यं विपाकदशापन्नं बुद्धिविशेषम्, मदीयप्रीत्यात्मकेन तदीयेन भावेनाऽप्यायितः अहमेव अनुगृह्णामि। येन च बुद्धियोगेन मदुपासकाः मां ध्रुवं प्राप्नुयुरेव ॥

277 **तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश।**
एकादशं मनश्चाऽत्र (देवा वैकारिकाः स्मृताः)॥ (वि.पु. 1–2–46) 246

केचित् इन्द्रियाणि सर्वाणि राजसाहङ्कारत उत्पन्नानीत्यभिप्रयन्ति। अपरे च केचन समनस्कमिन्द्रियदशकमपि सात्त्विकाहङ्कारजमिति आशेरते। द्वितीयः पक्ष एव मत्संमतः ॥

278 **'दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात्।**
कापालं व्रतमास्थाय यतिर्भवति मानवः ॥' (शै. आ.) 161

जन्मना केवलं मानव एव सन्नपि, शैवदीक्षास्वीकरणेनैव केवलेन ब्राह्मण्यसम्पत्तिमान् भवति। गृहीतशैवदीक्षेण तेन कापालं व्रतमा-स्थीयते चेत्, सः यतिरेव भवति ॥

क्रम संख्या पृ. सं.

279 'ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ।
ब्रह्मलोकमवाप्नोति न चेहावर्तते पुनः ।।' (द. स्मृ.) 8

स्नानतः प्रभृति सर्वकर्मानुष्ठानकालेऽपि, सर्वान्तरात्मानं नारायणं निरन्तरं चिन्तयेत् । भगवत्स्मरण-तन्नामसङ्कीर्तनादिसहकारतः विहितेषु वर्णाश्रमधर्मेष्वनुष्ठितेषु, स पुरुषः ब्रह्मैव प्राप्नोति । तस्य पुनर्जन्मादिकं नैव आपद्यते (संसारावर्ते नैव पुनर्भ्राम्यति) ॥

280 I 'न कर्माऽविभागादिति चेन्नानादित्वादुपपद्यते चाऽप्युपलभ्यते च' (ब्र. सू. 2-1-53) 200

II 'न कर्माऽविभागादिति चेन्नानादित्वादुपपद्यते चाऽप्युपलभ्यते च' (ब्र. सू. 2-1-35) 87

III 'न कर्मा....नाऽनादित्वात्' (,,) 35

281 'न चैतेषु समस्तेषु संशयेन विना क्वचित् ।
श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति ।।' 172

पूर्वोक्तेषु सर्वेष्वपि वाङ्मयेषु, सन्देहराहित्येन सिद्धिकरं श्रेयोमार्गं नैवाहं दृष्टवान् ॥

282 I 'न तु दृष्टान्तभावात्' (ब्र. सू. 2-1-9) 27

II ,, (,,) 32, 72, 88

283 'न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः' (म. भा. 206-60) 26

लोकानुजिघृक्षया इच्छविग्रहधारिणो भगवतः, सङ्कल्पमात्रपरिगृहीतो देहः, अस्मदादीनां देह इव न पञ्चभूतविकारात्मकः ; किन्तु मङ्गलमयो दिव्यः ॥

284 'नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा (मलयाचन्दनं यथा) ।
आरण्यकं च वेदेभ्य ओषधीभ्यो यथामृतम् ।।
(म. भा. शां. 353-12) 174

इदं महाभारतमध्यगतं भगवच्छस्त्रभूतं नारायणीयम्, दध्नः परमसारभूतं नवनीतमिव, द्विपात्सु नरेषु मोक्षोपायपरो ब्राह्मण इव, वेदाख्यात् शब्दराशेर्विविच्य गृहीतं परमपुरुषार्थवेदनपरम् आरण्यकमिव, सर्वाभ्य ओषधीभ्य उद्धृतम् अमृतमिव च, सारतमं वर्तते ॥

285 I **'न विलक्षणत्वात्'** (ब्र. सू. 2–1–4) 122

II ,, ,, 127

286 I **'नात्मा श्रुतेः'** (ब्र. सू. 2–3–18) 170, 230

II **'नात्मा श्रुतेः'** ,, 170

III **'नात्मा श्रुतेः'** ,, 230

287 **'नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।**
गुणवत्यगुणस्य सतस्तस्याऽर्थमपार्थकं चरति ॥' (सां.का. 60) 122

गुणत्रयरूपा इयं प्रकृतिः, (गुणशालिनी) परोपकरणस्वभावसामर्थ्याभ्यां युक्ता सती, गुणसङ्गविदूरस्य (गुणहीनस्य) चैतन्यैकस्वभावस्य निर्विकारत्वात् सत्पदाभिधेयस्य, साक्षिमात्रतया परोपकरणादिस्वाभाव्यशून्यस्य, अस्य पुरुषस्य, प्रत्युपकारानपेक्षिणी सती (पतिपरायणा), महदादिपरिणामप्राप्तिप्रभृतिभिः विविधैर्विलक्षणैश्चोपायैः पुरुषप्रयोजननिष्पादनरूपमुपकारमनुतिष्ठति ॥

288 **'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।**
नाऽशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥' (वि.पु. 1–2–52) 268

मिथोविलक्षणस्वभाव-प्रभावाः, प्रत्येकम् असंश्लिष्टतया पार्थक्येन वर्तमानाः, महदादयोऽर्थाः, सृष्ट्यौपयिकप्रमाणविशेषापन्नं सर्वांशसंश्लेषं मिथोऽप्राप्य, अमिलिताः सन्तः, सृज्यं जगत् स्रष्टुमसमर्था अभवन् ॥

289 **'नाऽन्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति'** (भ.गी. 14–9) 216

('गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥' इति उत्तरार्धम्)

उत्कृष्टसत्त्वस्थः अयं द्रष्टा जीवः, सांसारिकीषु विविधास्वपि प्रवृत्तिषु

क्रमसंख्या | पृ. सं.

कर्तृत्वं त्रिगुणाश्रयप्रकृत्यायत्तमेव ; अहं तु ज्ञानैकाकारः त्रैगुण्यादुत्तीर्णः तद्गतप्रवृत्त्यादीनामनाश्रयश्च' इति प्राप्ताप्राप्तविवेकेन अचालनीयार्थनिश्चयवान् भवति ; तदा जन्मादिचक्रपरिवृत्तेः अगोचरः सन्, ब्राह्मगुणाविर्भावसम्पन्नो भवति ॥

290 'नाम-रूपं च भूतानां कृत्यानां च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः' ॥ (वि.पु. 1-5-6) 264

स्रष्टा चतुर्मुखः आदिसृष्टौ देवादिचतुर्विधदेहसंसृष्टानां चेतनानां, 'देवो, मनुष्यः, पशुः, तरुः' इत्यादिकं जात्यभिधानं, अनिमिषत्व-द्विपात्त्व-चतुष्पात्त्व-पादपत्वादिकं रूपं, यज्ञादिसम्बन्धिहविरादान-यज्ञाद्याचरण-यज्ञादिकर्मौपयिकत्व-यज्ञोपकरणयूपादिभावप्राप्त्यादिकं प्रयोजनं चेति सर्वस्य स्मारकेभ्यो वैदिकशब्देभ्य एव साधनतया उपात्तेभ्यः, यथापूर्वं सृष्टवान् ॥

291 I 'नारायणो जगन्मूर्तिरनन्तात्मा सनातनः ।
स सिसृक्षुः सहस्रांशादसृजत् पुरुषान् द्विधा ॥'
(म.भा.शां.मो. 8-11-12) 75

II 'नारायणो........सनातनः' ,, 6. 74

स्वयमप्रच्युतस्वरूप-स्वभावो भगवान् नारायणः, जगदात्मना विक्रियमाणाव्यक्तशरीरकः सन्नपि, सर्वत्रापरिच्छिन्न एव वर्तते । सः स्वीकृतजगत्सृष्टिसङ्कल्पः, स्वीयादपरिमितादसङ्ख्याताच्च महिम्नः एकदेशात्, (सङ्कल्पैकदेशात्, प्रकृत्येकदेशाद्वा) सृज्यानां चेतनानां स्त्रीपुम्भावेन द्वैधमापन्नानि शरीराणि सृष्टवान् ॥

292 I 'नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा'
(ब्र.सू. 2-3-32) 237

II 'नित्यो........प्रसङ्गः' ,, 219

293 'निमित्तमात्रमेवाऽसौ सृज्यानां सर्गकर्मणि ।
प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥' (वि.पु. 1-4-51) 101

चतुर्मुखाकृतिधरोऽसौ परमात्मा जगत्सृष्टिरूपे कार्ये निर्वाह्ये, केवलं

निमित्त(व्यवस्थापकत्वाकारेण) भूत एव वर्तते । यतः अर्थानां तत्तद्रूप-निर्वृत्तौ प्राचीनकर्मवासना एव प्राधान्यमश्नुवते । यथा तत्तङ्कुरोत्पत्तौ बीजान्येवासाधारणकारणानि, सलिलादीनि साधारणानि सन्ति निमित्त-मात्रतां प्राप्नुवन्ति ॥

294 **'निमित्तमात्रं मुक्त्वै(वं)(नं) व नाऽन्यत् किञ्चिदपेक्षते ।**
नीयते तपतां श्रेष्ठ ! स्वशक्त्या वस्तु वस्तुताम् ॥'
(वि.पु. 1-4-52) 101

भो मुनिश्रेष्ठ ! देवादिचतुर्विधदेहभृदात्मकं यद्यद्वस्तुजातं वर्तते, तत्सर्वमपि (व्यवस्थाया अनतिक्रमाय) परमपुरुषं निमित्तमात्रमपेक्षते ; नान्यत् । स्व-स्वानादिकर्मात्मिकया स्वशक्त्यैव परं विशिष्टतत्तद्वस्तु-स्वरूपतां प्रतिपद्यते ॥

295 **'निर्गुणस्याऽप्रमेयस्य शुद्धस्याऽप्यमलात्मनः ।**
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते' ॥ (वि.पु. 1-3-1) 95

रागादिभिर्गुणैरसम्पृक्तस्य, शब्दादिविषयग्राहिप्रमाणागोचरस्य, कर्मादिरूपोपाध्यसंस्पृष्टस्याऽपि सतः परमात्मनः, लोकावगतकर्तृसामान्य-विलक्षणत्वात्, सर्गादिकार्यनिर्वाहकत्वरूपं कर्तृत्वं, कथं वा अभ्युप-गन्तुं शक्यम ?

296 **'पञ्चरात्रस्य कृत्स्नस्य वक्ता(तु भगवान्) नारायणः स्वयम्'**
(म.भा.शा. 359-68) 175

भगवच्छास्त्राभिधस्य सम्पूर्णस्याऽपि पांचरात्राख्यतन्त्रस्य, प्रवक्त्रन्तर-मद्वारीकृत्य षाड्गुण्यपूर्णो नारायण एव (भ्रमविप्रलम्भादिगन्धरहितः परमपुरुषः) प्रवक्ताऽभवत् ॥

297 **'पयोम्बुवच्चेत्तत्राऽपि'** (ब्र.सू. 2-2-2) 117

298 **'परमकारणात् परब्रह्मभूताद्वासुदेवात् सङ्कर्षणो नाम जीवो जायते । सङ्कर्षणात् प्रद्युम्नसंज्ञं मनो जायते । तस्मात् अनिरुद्धसंज्ञः अहङ्कारो जायते'** । पां.आ.)

सर्वेषां कारणानामपि कारणभूतः, चतुर्व्यूहे आदिमो रूपभेदः वासुदेवाख्यः। स एव मुक्तप्राप्यं परं ब्रह्म। तस्मात् सकलजीवाभिमानो सङ्कर्षणाख्यो व्यूहभेदः प्रादुर्भवति। (सम्यक्-कारणे सङ्गतं यथा स्यात्तथा कर्षणं करोतीति प्रलये उपसंहर्ता सङ्कर्षणः)। तस्मात् मनसोऽभिमानी प्रद्युम्नाख्यो व्यूहः। तस्माच्च अनिरुद्धनामा अहंकाराभिमानी व्यूहभेदः प्रादुर्भवति ॥

299 **परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्**' (सां.का. 16) 112

मेघमण्डलात् भूमौ पतितं जलं, यथा ओषधि-वनस्पत्यादिकं प्राप्य त्वक्काण्डपर्णादिषु रसवैलक्षण्यकारकम्; तथा अव्यक्ते महदादि-पृथिव्यन्तपरिणामशीले कार्यवैचित्र्यावहत्वं युज्यत एव। तत्र हेतुः प्रतिप्रतिगुणाश्रयविशेषः। प्रतिनियतानां गुणानामाश्रयभूतोऽर्थः— प्रतिगुणाश्रयः। प्रतिनियतगुणाश्रयभूतायां सर्वस्यामपि तत्तद्व्यक्तौ प्रतिप्रतिगुणाश्रयं—जम्बीर-नारिकेलादिरूपायां विद्यमानात् धर्मविशेषात्, मधुराम्लादिरसविशेषपरिणामवत्, महदादितत्तत्तत्त्वगतात् विशेषात्, पृथिव्यन्तकार्यभूतजगद्वैचित्र्यमिति ॥

300 I **'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः' ॥ (सां.का. 21) 118

II **'पुरुषस्य....प्रधानस्य। पङ्ग्वन्ध....सर्गः'** ॥ ,, 121

III **'पुरुषस्य....प्रधानस्य'** 120

चेतन(पुरुष) कर्तृकस्य(प्रधान)कर्मकभोगरूपदर्शनसम्पत्त्यर्थं, पुरुषे सत्त्व(प्रकृति)पुरुषान्यताख्यातिलक्षणकैवल्यसिद्ध्यर्थं च, पुरुषप्रधानयोर्द्वयोरपि कालकर्मकृतात् मेलनात्, भोग-कैवल्ययोः साधनौपयिकः, महदादितत्त्वानां सृष्टिव्यापारः प्रवर्तते ॥

301 **'पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य'** (सां का. 57) 121

धेनुषु वत्सानां वर्धनाय, यथा अचेतनस्याऽपि क्षीरस्य प्रवृत्तिः, ज्ञानेच्छाद्यनपेक्षा नैसर्गिकी सम्पद्यते; तथा अचेतनस्याऽपि प्रधानाख्य-

क्रमसंख्या प्र. सं.

तत्त्वस्य प्रवृत्तिः (प्रेरकाजन्या), स्वसंनिहितपुरुषमोक्षणरूपप्रयोजन-सिद्धये, देहादिपरिणामहेतुर्भवति ॥

302 'पुरुषोऽस्ति भोक्तृभावात्' (सां. का. 17) 219
(विवृतिः प्र. सं. 345 'सङ्घात' इत्यत्र)

303 'पूः प्राणिनः सर्व एव गुहाशयस्य अहन्यमानस्य विकल्मषस्य'
(आप. ध. सू. 1-22-4) 6

निखिला अपि देहिनः, वध-बन्धाद्यसज्जिनः अपुरुषार्थासंस्पृष्टस्य हृदयगुहावासस्य, पूर्णस्य परमात्मनः, पुररूपा भवन्ति ॥ पुरम्—लीलाविहारार्थं आवासस्थानम् ॥

304 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । (भ. गी. 13-19) 102

हे कौन्तेय! महदादिपृथिव्यन्ततत्त्वात्मना परिणामशीलं प्रधानं, अपरिणामी पुरुषश्चेत्युभावपि 'आदि' पदवाच्योत्पत्तिरहितावेव ॥

305 I 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥' (भ. गी. 3-27) 216

II 'प्रकृतेः क्रियमाणानि' ,, 217

देहात्मभ्रमवान् चेतनः, अकर्तारं स्वात्मानमजानानः, प्रकृति-सम्बन्धिसत्त्वादिगुणायत्तसिद्धिमन्ति कर्माणि प्रति, स्वात्मानमेव कर्तारं मन्यमानो भ्राम्यति । कर्तृत्वं प्राकृतगुणानाम् । नात्मभूतस्य जीवस्येत्यर्थः ॥

306 'प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य' ॥ (सां.का. 61) 122

प्रकृतिं स्वभावतो विवेचयतो ममेयं मतिर्जायते—इयमत्यन्तं कोमल-स्वभावेति ; यतः इयं कुलवधूरिव अतीव लज्जायुक्ता सती, पुरुषेणाऽहं दृष्टेति सम्भाव्य, स्वस्य तेन पुनर्दर्शनं दूरीकुर्वन्ती तिरोभवति । सत्त्व-पुरुषान्यताख्यातौ जातायां, पुरुषस्य कैवल्यसिद्ध्या पुनः प्रकृतिसंसर्गो नैव भविष्यतीति ॥

क्रमसंख्या | पृ. सं.

307 ‘प्रतिप्रतिगुणाश्रयविशेषात्’ (सां.का. 16) 119
(विवृतिः प्र.सं. 301 ‘परिणामतः’ इत्यत्र)

308 ‘फलसम्बिभन्त्सया हि कर्मभिरात्मानं पिप्रीषन्ति ।
स प्रीतः अलंफलाय—इति शास्त्रमर्यादा’ (द्र.भा.) 115

अधिकारिणो नराः, ईप्सितेन फलेन साकं स्वेषां सम्बन्धलाभोद्देशेन, शास्त्रविहितैर्यज्ञादिक्रियाकलापैः, सर्वान्तरात्मभूतं भगवन्तं, प्रीतमापादयितुमभिलषन्ति । तथा कृतैः कर्मभिः प्रीतिमापन्नो भगवान्, कर्मोद्देश्यभूतफलवितरणे अन्यानपेक्षसामर्थ्यवान् भवति—इति शास्त्रार्थसरणिः। अतः भगवता कर्मफलप्रदाने अपूर्वादेः अपेक्षा नैव वाच्येति ॥

309 ‘ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः ।
अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः ॥
(सेव्यतेऽभ्यर्च्यते चैव नित्ययुक्तैः स्वकर्मभिः)
सात्वतं विधिमास्थाय गीतः सङ्कर्षणेन यः’ ॥
(म.भा.भी. 66-39, 40) 174

‘सङ्कर्षणाख्येन भगवद्रूपेण प्रवर्तितां पाञ्चरात्रावगतां रीतिमाश्रित्य, ब्राह्मणादिचतुर्वर्णान्तःप्रविष्टैरपि साधुभिः, यथार्हसंस्कारयुक्तैः, भगवान् महाविष्णुः, इज्यया आराधनीयः, ध्यानादितः भेषजवत् संसेव्यः, आप्ततमो बन्धुरिव सम्यगादरणीयश्च ॥

310 ‘ब्राह्मणानां हि सद् ब्रह्म-वासुदेवाख्ययाजिनाम् ।
विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत् ॥’ (सात्व.सं.) 168

‘सत्-ब्रह्म-वासुदेवादिभिः शब्दैः श्रुत्यादिप्रतिपन्नस्य भगवतो विष्णोः यजन-याजनादौ प्रवृत्तानां वैष्णवानां, ब्रह्मतत्त्वरहस्यप्रतिपादनपरं विस्तृतमिदं पंचरात्र तन्त्रम्, तत्त्व-हित-पुरुषार्थानाम् असङ्कीर्णतया स्पष्टप्रतिपत्तिजनने उत्कृष्टतमं सत्, हितानुशासने असदृशमस्ति ॥

क्रमसंख्या पृ. सं.

311 **'भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता'** (वि.पु. 1-3-3) 95

(विवृतिः प्र.सं. 338 'शक्तयः सर्वे' इत्यत्र)

312 **'भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।**
कारण-कार्यविभागादविभागाद्वैश्वरूप्यस्य ॥
कारणमस्त्यव्यक्तम्' (सां. का. 15, 16) 109

मिथोविरुद्धव्याप्यभूत-विशेषात्मकनानाधर्मभाजां व्यक्तस्वरूपाणां महदादिकार्याणाम्, अन्योन्यविरोधरहितव्यापकीभूतसामान्यात्मकैक-धर्मवता अव्यक्ताभिधेन केनचित्कारणेन अवश्यं भवितव्यम् । व्यक्तं सर्वम् अव्यक्तमूलमेवेति । तत्र हेतवः पञ्च प्रतिपाद्यन्ते—विशेष-रूपाणां, परिमितत्वादेव विशेषपदबोध्यत्वेन सर्वकार्यानुवृत्तत्वायोगेन कारणत्वाभावात् ; सामान्यरूपाणां व्यापकत्वादेव सामान्यपदबोध्यत्वेन सर्वानुवृत्तत्वरूपस्य समन्वयस्य सम्भवात् ; तादृशशक्तिमत एव च कार्यजननप्रवृत्तेः दृष्टत्वात् ; कारणे सामान्ये सूक्ष्माकारेण सत एव, तस्मात्कारणाद्विभागं प्राप्यैव कार्यतया आविर्भावतः कार्यपदव्यप-देशोपपत्तेः ; विविधविचित्रावस्थापन्नस्य कार्यस्य स्वकारणे अविभक्त-तापत्तिरूपतिरोभावस्यैव नाशपदार्थत्वाच्चेति ॥

313 **'मनः षष्ठानीन्द्रियाणि'** (भ. गी. 15-7) 260

अतिसङ्कुचितज्ञानैश्वर्यो जीवः, स्वीयानादिकर्मपरम्परानिबन्धन-प्रकृतिपरिणामरूपतत्तच्छरीरगतानां पञ्चानामिन्द्रियाणां, षष्ठस्य मनो-रूपेन्द्रियस्य च अधीशः सन्, तानि षडपीन्द्रियाणि इतस्ततः कर्षन् देहयात्रां निर्वहति ॥

314 **'ममैवांऽशो जीवलोके जीवभूतः सनातनः'** (भ. गी. 15-7) 231

अनादिरयं जीवात्मा, सर्वशरीरकस्य, अत एव सर्वप्रकारिणो भगवतो वासुदेवस्य ममैव विशेषणतां प्राप्तः, विशिष्टैकदेशत्वरूपम् अंशभावं प्राप्तोऽपि, अनादिकर्मरूपया अविद्ययाऽऽवेष्टितत्वेन जीव-भावमापन्नः, जीवलोक एव वर्तमानः, स्वस्वकर्मानुगुणैः शरीरेन्द्रिया-दिभिः सम्बद्धो भ्राम्यति ॥

315 'मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः' (भ. गी. 16–18) 225

आसुरप्रकृतयो हि जनाः, आत्मघातकं दर्पाहङ्कारादिकमाश्रित्य वर्तमानाः, स्वीयपरकीयशरीरे—सर्वत्रान्तरात्मतयाऽवस्थितं मां, दोषाविष्करणतः सर्वप्रकारेण द्विषन्तः, मदप्रीतिकरं कर्म कुर्वते ॥

316 'मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः ।
भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति ॥' (शै. आ.) 161

शैवागमोक्तकण्ठिकारुचकादिषण्मुद्राणां परमार्थवित्, इतोऽन्यासु उत्कृष्टासु मुद्रासु च नैपुण्यवान् यो मुमुक्षुः सः, शैवतन्त्रप्रतिपन्ने भगाख्ये स्थाने आसीनमात्मस्वरूपं विचिन्त्य, कैवल्यं सम्पन्नो भवति ॥

317 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः' ॥ (सां.का. 3) 106

तत्त्वानि पञ्चविंशतिः । तत्राद्यं तत्त्वं मूलप्रकृतिः । सा च कस्याऽपि कार्यभूता न भवतीति अविकृतिरित्युच्यते । कारणत्वकार्यत्वोभयवन्ति तत्त्वानि च—महान्, अहङ्कारः, पञ्च तन्मात्राणीति सप्तसङ्ख्यानि । ज्ञानेन्द्रियपञ्चक-कर्मेन्द्रियपञ्चक-मनः-पञ्चभूताख्यानि षोडश तत्त्वानि केवलं कार्यभूततत्त्वान्येव ; न तत्त्वान्तरकारणानि । (पुरुषः) चेतनतत्त्वं तु, न कस्याऽपि कार्यम् ; नापि कस्यचन कारणम् ॥

318 'यज्ञैस्त्वमिज्यसे (ऽचिन्त्य)नित्यं सर्वदेवमयाऽच्युत ।
हव्य-कव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्' ॥ (वि.पु. 50–20–97) 8

अखिलदेवतान्तरात्मभूत ! निर्विकारस्वरूप ! भगवन् ! नारायण ! त्वमेव, त्रैवर्णिकानुष्ठेयैः श्रौत-स्मार्ताख्यैः कर्मभिः नित्यं आराध्यमानो वर्तसे । त्वमेव पितृरूपं स्वीकृत्य श्राद्धीयहविषां स्वीकर्ता । देवरूपं स्वीकृत्य दैविकहविषां स्वीकर्ता भवसि ॥

क्रमसंख्या | पृ. सं.

319 'यत्किंचित् सृज्यते येन सत्त्वजातेन वै द्विज।
तस्य सत्त्वस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः'॥ (वि.पु. 1-12-38) 233

येन येन कारणभूतेन वस्तुना यद्यत् कार्यं लोके उत्पद्यमानमस्ति; तदखिलं सर्वान्तरात्मभूतस्य भगवतो विष्णोः शरीरभूतं सत्, अपृथग्भूत-विशेषणतापन्नं वर्तते॥

320 I 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः'॥ (भ.गी. 18-16) 8

II 'यतः.........ततम्। स्वकर्मणा.........मानवः'॥ ,, 115

देवादीनां चतुर्विधदेहिनामपि स्थित्युत्पत्त्यादिर्यदायत्तः, इदं च सर्वं भूतजातम् येन चान्तर्बहिर्व्याप्तम्, तादृशं मां स्वेन स्वेन वर्णाश्रम-प्रतिनियतेन कर्मणा सम्यगाराध्य, अधिकारी नरः मत्प्राप्तिरूपां सिद्धं लभते॥

321 'यथागमं यथान्यायं निष्ठा नारायणः प्रभुः।' (म.भा.शां. 358-68) 177

(विवृतिः प्र.सं. 349 'सर्वेषु च' इत्यत्र)

322 'यथा लोके राजा प्रचुरदन्दशूके घोरे अनर्थसङ्कटेऽपि प्रदेशे वर्तमानः, व्यजनावधूतदेहो दोषैर्न स्पृश्यते, अभिप्रेतांश्च लोकान् परिपालयति, भोगांश्च गन्धादीन् अविश्वजनोपभोग्यान् धारयति; तथा असौ लोकेश्वरः भ्रमत्स्वसामर्थ्यचामरः, दोषैर्न स्पृश्यते; रक्षति च लोकान् ब्रह्मलोकादीन्, भोगांश्च अविश्वजनोपभोग्यान् धारयति'॥ (द्र.भा.) 34

लोकदृष्टो हि राजा, प्रजारक्षणप्रवृत्तः, साधूपद्रवकारिणां मृगया-व्यापाराय गतः, दंश-कीटादिमये अनिष्टकारिणि देशे विद्यमानः, व्यजनाद्युपकरणसम्पत्त्या दंशादीनामवधूननेन अनुपद्रुतदेहः सुखे-नाऽवस्थाय, संमतान् साधूनात्मीयान् निरवग्रहं रक्षति; स्वयं स्वासाधारणगन्धमाल्यादिभोगसम्पन्नश्च विराजते; तथैवाऽसौ परमेश्वरो

क्रमसंख्या | पृ. सं.

भगवानपि, स्वीकृतजगद्रक्षादीक्षः, सर्वेषु देहिष्वन्तर्यामितयाऽनुप्रविश्य, स्वभावायत्तेन ज्ञानादिशक्तिप्रभावेन, देहसम्पर्कायत्तानपुरुषार्थान् दूरीकृत्य, स्वासाधारणनिरतिशयज्ञानादिपूर्णः, सकललोकसंरक्षणं निर्वहति ॥

323 **‘यदम्बु वैष्णवः कायः’** (वि.पु. 2–12–37) 25

परमात्मसृष्टं यत् अबुपलक्षितं सर्वं जगत्, तत् भगवतो महाविष्णोः शरीरभूतमेव ॥

324 **‘यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः’** (म.स्मृ. 12–106) 14

(विवृतिः प्र.सं. 233 ‘आर्षम्’ उत्यत्र)

325 **‘यस्मात् सम्यक् परं ब्रह्म वासुदेवाख्यमव्ययम् ।**
अस्मादवाप्यते शास्त्रात् ज्ञानपूर्वेण कर्मणा ॥’ 169

वासुदेवाभिधानेन भगवच्छास्त्रसिद्धं, त्रिविधपरिच्छेदातीतं परंब्रह्म, विवेकज्ञानयुतेन इज्याकर्मणा यतः अस्मात् सात्वताख्यात् शास्त्रात् सम्यगवाप्यते, अतः इदं शास्त्रं सर्वोत्कृष्टम् ॥

326 **‘येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयाऽन्विताः ।**
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥’ (भ.गी. 9–23) 8

हे कौन्तेय ! ये च जनाः श्रद्धायुक्ताः सन्तः देवतान्तरोपासका भूत्वा, ताः इन्द्रादिरूपाः देवताः विहितैः कर्मभिराराधयन्ति ; तेऽपि सर्वतत्तद्देवताशरीरकं वासुदेवं मामेव पूजयन्ति, परंतु मां शरीरित्वेनाऽविज्ञाय, तास्वेव परत्वभ्रान्त्येति अविधिपूर्वकमेषां पूजनम् ॥ अतः मत्प्राप्तिफलकं न भवत्येषां कर्म ॥

327 **‘यैः स्वधर्मपरैर्नाथ नरैराराधितो भवान् ।**
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये ॥’ (वि.पु. 5–30–16) 8

हे सर्वशरण्य ! ये नराः स्वस्ववर्णाश्रमधर्मानुष्ठाने सक्ताः, भवन्तमाराधयन्ति, ते तावत्, स्वेषां सर्वबन्धविमोचनाय, जीव-परमात्मतिरोधानकरीं दैवीं गुणमयीं मायाम् उत्तीर्य स्वाभाविकानन्दभाजो भवन्ति॥

क्रमसंख्या		पृ. सं.

328 **रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।**
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ (सां.का. 61) 122

नर्तकी यथा नाट्यरङ्गं प्राप्य, स्वीयैः कायिक-वाचिकाख्यै-र्व्यापारैः, पारिषदानां स्वीयं रूपं प्रदर्श्य, कृतार्थताबुद्ध्या नाट्यरङ्गान्निवर्तते, तथैवेयं बुद्ध्यादिका प्रकृतिरपि, संनिहितस्य पुरुषस्य सुख-दुःख-मोहात्मिकां स्वां प्रदर्श्य, तस्य सत्त्व-पुरुषान्यताख्यातिमपि निर्वर्त्य, कैवल्यरूपमोक्षौपयिकी भूत्वा, कृतार्थंमन्यमाना, अपुनर्दर्शं पुरुषसांनिध्यतो दूरीभवति ॥

329 **'रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके ।**
कपालं भस्मना स्नानम्' (शै.आ.) 161

शैवीं दीक्षां स्वीकृतवतः पुरुषस्य व्रतमिदम्—करे रुद्राक्षमणिग्रथितस्य वलयस्य रक्षाकङ्कणात्मना धारणम्, मूर्धनि जटाकाररचितकेशस्तोमः, भिक्षार्थं नरशिरःकपालस्य धारणम्, अङ्गारभस्मना सर्वाङ्गस्नानम्—इति ॥

330 **'विचित्राश्च हि'** (ब्र.सू. 2-1-28) 94

'आत्मनि चैवं विचित्राश्च हि' इति पूर्णं सूत्रम् ॥

331 **'विभवार्चनाद्व्यूहं प्राप्य, व्यूहार्चनात् परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यते'** (पांच.आ.) 169

सात्वतेन विधानेन रामकृष्णादिविभवमूर्तीनाम् आराधनतः, अनि-रुद्ध-प्रद्युम्नसङ्कर्षण-वासुदेवाख्यचतुर्व्यूहप्राप्तिपूर्वकं, चतुर्व्यूहपूजनतश्च परवासुदेवाभिधं सूक्ष्मतमं परंब्रह्म प्राप्यते साधकेनेति पांचरात्रोक्त-पूजापर्यवसानम् ॥

332 I **'विरोधे त्वनपेक्षं स्यात्'** (पू.मी.सू. 1-3-3) 3

II **'विरोधेत्वनपेक्ष्यं(क्षं) स्यात्'** ,, 165

'असति ह्यनुमानम्' इति सूत्रशेषः । धर्मनिश्चायकप्रमाणभूतेषु श्रुति-स्मृत्यादिषु मध्ये, स्वमूलश्रुत्यपेक्षाणां स्मृत्यादीनां प्रत्यक्षश्रुतिविरोधे

क्रमसंख्या — पृ. सं.

प्रसक्ते, श्रुतिविरुद्धं स्मृत्यादि, अनादरणीयमेव ; न अनुग्राह्यम्। विरोधे अविद्यमाने एव खलु तया श्रुत्यनुमानप्रसक्तिः ॥

333 **'विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत्'** (भ.गी. 10–42) 258

हे अर्जुन! कार्य-कारणावस्थचेतनाचेतनगर्भमिदमखिलमपि विश्वम्, अहं वासुदेव एव, मदीयस्य महिम्नः किंचिदंशमात्रेणाधिष्ठाय तन्नियामको वर्ते ॥

334 I **विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम्।**
स्थिति-संयमकर्ताऽसौ जगतोऽस्य जगच्च सः॥' (वि.पु. 1–1–3) 6

II **'विष्णोः सका.........स्थितम्'** ,, 75

III **'विष्णो सका.........स्थितम्'** ,, 6

महाविष्णोरेव कारणभूतात्, सर्वस्याऽस्य जगतः सृष्टि-स्थिति-लयाः प्रवर्तन्ते। जगतः स्थिति-नियमनयोः (प्रलययोर्वा) अहमेव कर्ता। अतः अहमेव, विष्णुरेव विश्वमिति अभिधीयमानोऽस्मि ॥ ('सर्वं खल्विदं ब्रह्म, सर्वं विष्णुमयं जगत्' इति श्रुति-स्मृती) ॥

335 **'वेदान्तेषु यथासारं सङ्गृह्य भगवान् हरिः।**
भक्तानुकम्पया विद्वान् सञ्चिक्षेप यथा सुखम्॥' (पर.सं.) 172

षड्गुणैश्वर्यपूर्णो हरिः, श्रुतिशतशिरस्सिद्धं तत्त्वहितपुरुषार्थवेदकं सारतमं भागमर्थतः संगृह्य, भक्तानां तदर्थबुबोधयिषया, दयासारः शब्दतोऽपि संक्षिप्य, पंचरात्रमिदं प्रवर्तितवान् ॥

336 I **'वैषम्य-नैर्घृण्ये न सापेक्षत्वात्'** (ब्र.सू. 2–1–34) 87

II **'वैषम्य...........क्षत्वात्'** ,, 200

337 **'व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च॥**
सह्यनादिरनन्तश्च परमार्थेन निश्चितः॥' (पर.सं.) 170

त्रिगुणात्मिकायाः प्रकृतेः चेतनस्य पुरुषस्य च, सम्बन्धः मिथो-व्याप्य-व्यापकभावात्मकः। आद्यन्तरहितः प्रकृतिपुरुषयोः स सम्बन्धः।

प्रकृतिर्व्याप्य व्याप्तुमर्हा । पुरुषः व्यापनशीलः ।। अयं चार्थः वास्तविक इति शास्त्रसम्प्रतिपन्नः ।।

338 'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।।' (वि. पु. 1-3-2) 95
'भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता ।।' (वि. पु. 1-3-3)

भो तपस्विवर्य ! दृश्यादृश्यात्मकानां सर्वेषामप्यर्थानां कार्योत्पत्त्यौपयिक्यः सर्वा अपि शक्तिरूपा धर्माः, अतीन्द्रियाः सन्तो दिव्यप्रज्ञाविषया एव । अतः ताः परमात्मैकसम्बन्धिन्यः । लोकेऽपि औष्ण्यात्मिका शक्तिर्यथा वह्निमात्रगता ; नाऽन्यसम्बन्धिनी, तद्वत् ।।

339 'शक्तौ हस्ति कपा(वा)टयोः' (पा. सू. 3-2-54) 75

'हस्ति-कपाट' शब्दयोरुपपदयोः कर्मवाचकयोः, हन् धातोः परः टक् प्रत्ययो भवति, शक्तौ गम्यमानायाम् । हस्तिनं हन्तुं शक्तः हस्तिघ्नः मनुष्यः । कपाटघ्नः चोरः ।।

340 'शब्दमूलत्वात्' (2-1-7) 94, 98

'श्रुतेस्तु शब्दमूलत्वात्' इति पूर्णं सूत्रम् ।।

341 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र. सू. 1-1-3) 162

प्रतर्दनं प्रति इन्द्रेण कृतः 'मामुपास्वे'त्ययमुपदेशः, वामदेवकृतः 'अहं मनुरभवं सूर्यश्चे'ति स्वस्मिन् मनु-सूर्याद्यभेदव्यवहार इव, परमात्मनः स्वस्य च शरीर-शरीरिभावकृततादात्म्यावगाह्येव ।।

342 'शास्त्रफलं प्रयोक्तरि' (पू. मी. सू. 3-7-18) 217

'तल्लक्षणत्वात् तस्मात् स्वयं प्रयोगे स्यात्' इति अवशिष्टः सूत्रभागः । शास्त्रोदितं विहितकर्मजं फलं अन्नपुत्रपशुभूस्वर्गादि सर्वं, साङ्गस्य कर्मणो यागादेरनुष्ठातर्यधिकारिण्येव युज्यते ; कर्तृत्व-भोक्तृत्वयोः सामानाधिकरण्यनियमात् । (इति उदाहृतभागस्याऽर्थः) ।।

क्रमसंख्या प्र. सं.

343 I ‘शास्त्रयोनित्वात्’ (ब्र. सू. 1-1-3) 129

II ‘शास्त्रयोनित्वात्’ ,, 164

परस्य ब्रह्मणः प्रमाणान्तरागोचरत्वेन शास्त्रैकप्रमाणत्वात्, ब्रह्म वेदान्तवेद्यमेवेति, तद्विचारपरं शारीरकं शास्त्रमारम्भणीयमेवेति ॥

344 ‘सङ्कर्षणात् प्रद्युम्नसञ्ज्ञं मनो जायते’ (पांच. आ.) 167

विवृतिः प्र. सं. 331 ‘विभवार्चनात्’ इत्यत्र)

345 ‘सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ।।’ (सां.का. 17) 121

सङ्घातभावं प्राप्य देहादिभावं भजतः प्राकृतार्थस्तोमस्य परप्रयोजन-निष्पादनैकस्वाभाव्यात्, तादृशप्रयोजनभागिनः कस्यचन आवश्य-कत्वात्, त्रिगुणात्मकप्रकृतिविलक्षणस्यैव कल्पनीयत्वात्, अधिष्ठान-भूतायाः प्रकृतेरधिष्ठातुः अचेतनत्व-भोग्यत्वयोर्दर्शनेन तदधिष्ठातुः चेतनत्व-भोक्तृत्वयोः अवर्जनीयत्वात्, प्रधान(प्रकृति)प्रवृत्तेः कैवल्यार्थ-त्वेन कैवल्यार्हस्यैव कल्प्यत्वाच्च पुरुषसिद्धिः ॥

346 ‘समेत्याऽन्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।।’ (वि.पु. 1-2-53) 268

पूर्वोक्ताः महदादिपञ्चभूतान्ताः, न्यूनाधिकभावेन मिलिताः सन्तः, अन्योन्यमाश्रिताश्रयभावं प्राप्य, अण्डोत्पत्तौ कारणतां भजन्ते ॥

347 ‘सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्’ (ब्र. सू. 1-2-8) 32

परमात्मनः हृदयाख्यदेहैकदेशवर्तित्वे अभ्युपगते, परस्यापि जीवस्येव सुखादिभोक्तृत्वापत्त्या, नेदं युक्तमिति शङ्कने ; देहसम्बन्धादन्यस्य कर्मवशत्वस्यैव भोक्तृताप्रयोजकत्वान्न दोषः ॥

348 ‘सर्वस्य चाऽहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च’
(भ.गी. 15-15) 222

सर्वस्य भूतजातस्य हृदयाख्ये देहदेशे अवस्थितोऽस्मि ; सर्वेषामपि

क्रमसंख्या   पृ. सं.

अनुभूतार्थस्मरणं, अनुभवात्मकं प्रमाणाधीनं ज्ञानं, तत्तिरोधानं, (ऊहापरपर्यायं ज्ञानं वा) सर्वं मदेकाधीनमेव ॥

349 **'सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ।**
यथागमं यथान्यायं निष्ठा नारायणः प्रभुः ॥'
(म.भा.शां. 359-68, 69) 176

हे राजर्षे ! सत्तर्कानुगृहीतवेदागमानुरोधेन तत्त्वार्थे चिन्त्यमाने, ज्ञानदायकेषु एतेषु सर्वेष्वपि शास्त्रेषु ध्येयतया आराध्यतया च पर्यवसानभूमिः नारायण एवेति निश्चीयते ॥

350 **सहोपलम्भनियमादभेदो नील-तद्धियोः'** (विवरणप्रमेयसंग्रहः) 150

विषय-विषयिणोः घट-तद्बुद्ध्याद्योः, मिथः उपलम्भे समनैयत्यात्, अभेद एवेति ॥

351 **'सांख्यं योगः पंचरात्रं (वेदारण्यकमेव च) वेदाः पाशुपतं तथा ।**
किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने ॥' (म.भा.शां. 359-2) 174

कापिल-हैरण्यगर्भ-वैष्णव-पाशुपताख्यानि इमानि तन्त्राणि, चत्वारश्च वेदा ऋगाद्याः, सर्वाण्येतानि किम् एकतत्त्वप्रतिपादनप्रवृत्तानि ? उत पृथक्तत्त्वप्रतिपादनपराणि ? किं चैकं तत्त्वम् ? कथं वा एतेषां अन्योन्यमबाधः सर्वमसंशयं विवृणु ॥

352 **'सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा ।**
आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ॥'
(म.भा.शां. 350-63 ? 177

कापिल-हैरण्यगर्भ वैष्णव-पाशुपताख्यानीमानि शास्त्राणि, ऋगाद्याश्चत्वारो वेदाः, इमानि सर्वाणि, देहातिरिक्तात्मनिर्णायकत्वात्, कुतर्कतो न बाध्यानि ॥

353 **'साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पंचरात्रमधीतवान्'**
(पंच.आ.) 171

तत्त्वहितपुरुषार्थवेदनपरेषु साङ्गसरहस्येषु सर्वेषु वेदेष्वधीतेष्वपि,

प्रतिष्ठितां मतिमप्राप्तवान् शाण्डिल्यो महर्षिः तत्प्राप्तये पांचरात्राख्यं शास्त्रमधीतवान् ॥

354 I 'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥' (म.स्मृ. 1–8) 74

II 'सोऽभिध्याय....मपासृजत् ॥' ,, 5

III 'सोऽभिध्याय शरीरात् स्वात्' ,, 25

सृष्टेः पूर्वमेकः अद्वितीयोऽवस्थितः परमात्मा, सृष्टिसंकल्पं कृत्वा, स्वशरीरभूतात् भूतसूक्ष्मात् व्यष्टिसृष्टिं कामयमानः, आदिसर्गे अपः अत्रिवृत्कृताः सृष्टवान् । तासु चाप्सु अण्डाकारभूतसमस्ततत्त्वेषु त्रिवृत्करणजनिताम् अण्डोत्पादनशक्तिमजनयत् ॥

355 'स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यम्, स्यादस्ति चावक्तव्यं च, स्यान्नास्ति चावक्तव्यं च, स्यादस्ति च नास्ति चावक्तव्यं च' (जै.द.) 156

अयं सप्तभङ्गीनयः । सप्तानां भङ्गानां प्रमेयगतानां प्रकाराणां प्रतिपादनप्रकारः ॥

श्रीयज्वनाथकुलजनुषा श्रीवासराघवार्यतनयेन ।
श्रीरामभद्रनाम्ना ग्रथिता चेयं प्रमाणविवृतिः ॥

शारीरकभाष्यगतद्वितीयलक्षणस्थप्रमाणानाम् ।
अध्येतृबोधसिद्ध्यै भगवान् प्रीणातु चैतया कृत्या ॥

इति द्वितीयाध्यायगतप्रमाणार्थकोषः

॥ श्रीः ॥

—o—

अनुबन्धः—३

पदार्थकोषादयः

॥ श्रीः ॥

॥ श्रीभाष्यस्थविशिष्टपदानामर्थकोषः ॥

(अ)

1 **अकरणत्वम्**—अक्रियत्वम् ।

2 **अकार्त्स्न्यम्**—अपरिपूर्णता ।

3 **अकिञ्चित्करत्वम्**—यत्किञ्चित्प्रयोजनासाधकत्वम् ।

4 **अकृताभ्यागमः (दोषः)**—स्वाकृतकर्मणः फलानुभवापत्तिः ।

5 **अगौणः**—गौणेतरः (प्रवृत्तिनिमित्तैकदेशेन प्रयुज्यमानेतरः शब्दः) ।

6 **अग्निहोत्रम्**—आधानसम्पादितेऽग्नौ (श्रौतेऽग्नौ) सायं-प्रातःकालयोः कर्तव्यः कर्मविशेषः ।

7 **अखण्डैकरसम्**—नित्यनिर्विशेषस्वप्रकाशैकस्वभावं ब्रह्म ।

8 **अचेतनव्यष्टिः**—अचेतनत्वतः समान्यपि मिथोऽत्यन्तविलक्षणानि अण्ड-तदावरण-चतुर्दशभुवनानि ।

9 **अचेतनसमष्टिः**—अचेतनत्वेतरमिथोविरुद्धयत्किञ्चिदाकारानास्पदभूतं अव्यक्ताव्याकृतादिपदाभिधेयं भूतसूक्ष्मम् ।

10 **अज्ञानम्**—स्वभ्रान्तिहेतुः ।

11 **अणिष्ठः**—सूक्ष्मतमः ।

12 **अण्डम्**—ब्रह्माण्डम् ।

13 **अतत्परत्वम्**—तात्पर्यराहित्यम ।

14 **अतर्क्यम्**—बाधकागोचरभूतम् ।

15 **अतिग्रहाः**—विषयाः (2-4-4) ।

16 **अतिदेशः**—'अन्यत्रैवोपदिष्टायाः कृत्स्नाया धर्मसन्ततेः ।
अन्यत्र कार्यतः प्राप्तिरतिदेशः प्रकीर्तितः ॥'

17 **अतिरेकः**—अतिशयः (2-2-1) ।

18 **अतीन्द्रियग्राह्यः**—इन्द्रियमतीत्य वर्तमानेन शास्त्रेणैव ग्राह्यः । इन्द्रियग्राह्यमतीत्य वर्तमानो(वा) (2-1-2) ।

19 **अत्यन्तातीन्द्रियाणि**—नित्यानुमेयानि (2-1-1) ।

20 **अद्वैतदर्शनम्**—सर्वस्य ब्रह्मैकप्रकारत्वदर्शनम् ।

21 **अधर्मः**—(जै म) स्थितिहेतुभूतो व्यापी द्रव्यविशेषः (2-2-31) ।

22 **अधिकारः**—प्रस्तावः (2-3-13)

23 **अधिकृतः**—लब्धाधिकारः ।

24 **अधिपतिः** (बौ.म.)—इन्द्रियम् (2-2-20) ।

25 **अधिष्ठाता**—स्वतन्त्रः (2-2-9) ।

26 **अधिष्ठानम्**—1. शरीरम्, 2. आरोपधर्मि (2-3-33), 3. जीवात्मभिः देवताभिश्च क्रियमाणं देहेन्द्रियादिप्रवर्तनम् (2-4-13) ।

27 **अध्यवसायः**—'इदमित्थम्' इति दृढनिश्चयः (2-4-5) ।

28 **अध्यासः**—1. अन्यस्मिन् अन्यधर्मानुसन्धानम् (2-2-9), 2. प्रथमभ्रमः (2-2-7) असंसर्गाग्रहायत्तः आरोपः ।

29 **अनन्तत्वम्**—परिच्छेदराहित्यम् (2-1-5) ।

30 **अनन्यत्वम्**—ऐक्यम् (2-1-15) ।

31 **अनन्यथासिद्धम्**—विरुद्धार्थप्रमाणाबाधेन अनुदयम् ।

32 **अनपेक्ष्यम्**—अनादरणीयम् (2-1-1) ।

33 **अनवकाशत्वम्**—अप्रमाणकोट्यनन्तर्भाव-विषयान्तरालाभाभ्यां विरुद्धार्थोपस्थापक-प्रमाणाबाधेन अनुदयत्वम् ।

34 **अनवक्लृप्तिः**—असिद्धिः (2-1-15) ।

35 **अनवस्था**—अप्रामाणिक्याः कल्पनायाः अविश्रान्ततापत्तिः ।

36 **अनश्नत्वम्**—कर्मफलभोक्तृत्वाभावः (परमात्मनः) ।

37 **अनाकलितः**—अननुसंहितः । संशय-विपर्ययानवकाशो यथा भवति तथा पुनःपुनरभ्यस्तः ।

38 **अनादरणीयत्वम्**—आवश्यकार्थबोधकत्वाभावनिश्चयत: अपरिग्रह: ।

39 **अनादिनिधनत्वम् (शास्त्रे)**—सर्गप्रलयकालेष्वपि आनुपूर्व्यविपर्यास: ।

40 **अनित्यत्वम्**—विनाश: । परिमितकालवर्तित्वम् (2–2–33) ।

41 **अनिर्मोक्ष:**—दोषादनपगम: । मोक्षाभावापत्ति: ।

42 **अनिर्वचनीयत्वम्**—'इदम् ईदृशम्' इति निष्कृष्य वक्तुमशक्यत्वम् ।

43 **अनीशा**—अस्वतन्त्रा भगवतो माया ।

44 **अनुकूलत्वम्**—स्वत इष्टत्वम् ।

45 **अनुगति:**—अनुप्रवेश: ।

46 **अनुग्रह:**—सहकार: । उपकार: । निकृष्टेषु सुखाधानौपयिक: उत्कृष्टगतो ज्ञानावस्थाविशेष: ।

47 **अनुज्ञा**—अनुमति: (2–2–47) ।

48 **अनुद्भूतम्**—अनुत्कटम् । अप्रकटम् ।

49 **अनुपपन्नैकवेषत्वम्**—असङ्गतैकरूपत्वस्वाभाव्यम् ।

50 **अनुप्रवेश:**—स्वकीयेन धर्मभूतज्ञानेन व्यापनविशेष: । (परमात्मना देवताभिर्वा)

51 **अनुमन्ता**—प्रवृत्तस्य प्रवर्तक: (2–2–3)

52 **अनुमानम्**—तर्क: (2–1–15)

53 **अनुवर्तमानत्वम्**—उत्तरोत्तरप्रतीतिविषयेषु विद्यमानत्वम् ।

54 **अनुवाद:**—ज्ञातस्यैवाऽर्थस्य उपयोगान्तरसिद्ध्यर्थं वचनम् ।

55 **अनुवित्त:**—उपास्य: प्राप्यो वा (2–3–22) उपासित: ।

56 **अनुशासनम्**—शासनं वेदं कार्त्स्न्येन अनुसरत् (2–2–41)

57 **अनुस्मरणम्**—पूर्वानुभूतवस्तुविषयं ज्ञानम् , प्रत्यभिज्ञानम् (श्री) (2–2–24)

58 **अनुस्मृति:**—प्रत्यभिज्ञानम्

59 **अनेकान्तत्वम् (हेतौ)**—साध्यव्यभिचरितस्वभावत्वम् (साध्य-तद्भाववद्वृत्तित्वम्)

60 **अन्तर्यामिब्राह्मणम्**—वाजसनेयशाखान्तर्गतबृहदारण्यकान्तर्गतो भागविशेष: ।

61 **अन्यथाभाव:** (जीवस्य)—ज्ञान-सङ्कोच विकासलक्षण: । (श्री) (2–3–3)

62 अन्यपरत्वम्—तात्पर्यान्तरम् ।

63 अन्योन्यसहचराः—अविनाभूताः ।

64 अपरिग्रहाः—न विद्यते वेदपरिग्रहो येषां ते (भा) वेदापरिगृहीताः ।

65 अपहतपाप्मत्वम्—कर्मसम्बन्धराहित्यम् ।

66 अपह्नोतुम्—अपलपितुम् ।

67 अपासृजत्—अजनयत् ।

68 अपीतिः—देहिनः अप्ययावस्था, सुषुप्तिः, स्वकारणे लयः ।

69 अपुरुषार्थः—पुरुषस्य अनभीप्सितोऽर्थः (त्याज्योऽर्थः)

70 अप्रज्ञातम्—प्रकृष्टज्ञानरूपप्रत्यक्षागोचरः (2–1–1) प्रत्यक्षत्वहेतुरूपादिरहितम्)

71 अप्रतर्क्यम्—तर्कागोचरः, बाह्यतर्कागोचरः, अनुमानागम्यम् ।

72 अप्रतिष्ठितत्वम् (तर्के)—अदृष्टस्वरूपत्वम् प्रतिक्षेप्यस्वरूपत्वम् ।

73 अप्रतिसङ्ख्यानिरोधः—प्रतिक्षणभावी उपलब्ध्यनर्हः सूक्ष्मो निरन्वयो विनाशः

74 अप्रमेयम्—साधकाविषयभूतम्

75 अभाक्तः—मुख्यः

76 अभिधानाऽऽवृत्तिः—बोधनव्यापाराऽऽवृत्तिः

77 अभिध्यानम्—सङ्कल्पः

78 अभिभवः—तत्त्वार्थतिरोधानम्

79 अभिमानः—ममत्वबुद्धिः, भ्रमो वा

80 अभिमानिनः—देहेन्द्रियादौ स्वविभूतित्वधीमन्तः (आत्मानो देवताश्च)

81 अभिव्यक्तिः—पूर्वस्थितस्यैव अप्रकटस्य सामग्र्यधीना प्रकटता (2–3–31)

82 अभिसन्धिः—सङ्कल्पः । (2–3–51)

83 अभ्युदयः—ऐहिकामुष्मिकरूपः ऐन्द्रियकैरनुभाव्यः पुण्यफलभूतो भोगविशेषः ।

84 अमृतम्—चिरकालावस्थायि (2–4–1)

85 अयुतत्वम्—अपृथग्भावः (2–2–12)

86 अयुतसिद्धिः—अपृथक्सिद्धिः ,,

87 **अर्थक्रमः**—पदार्थस्वरूपसिद्धिगतः पूर्वापरीभावः ।

88 **अर्थवादः**—विध्यधीनप्रवृत्त्युत्तम्भकः स्तुत्यादिफलः वैदिको वाक्यविशेषः ।

89 **अर्थान्तरभूतम्**—अतिरिक्तपदार्थभूतम् ।

90 **अर्थापत्तिः**—ज्ञातार्थान्यथानुपपत्त्यायत्तः अज्ञातार्थनिश्चयः ।

91 **अल्पश्रुतः**—अल्पं श्रुतं अध्ययनार्थज्ञानरूपं यस्य सः ।

92 ,, श्रोतव्यार्थविषये किञ्चिन्मात्रश्रवणेन विरतः ।

93 **अवतरति**—प्रसक्तं भवति ।

94 **अवयवः**—अंशः ।

95 **अवरतत्त्वम्**—चेतनाचेतनात्मकं निखिलं जगत् ।

96 **अवसीयते**—निश्चीयते ।

97 **अवस्तुभूता**—अपरमार्थभूता । मिथ्याभूता ।

98 **अवस्था**—आगन्तुकः अपृथक्सिद्धो धर्मः । अनित्यो धर्मः ।

99 **अवाञ्चौ प्राणौ**—पायूपस्थौ ।

100 **अविज्ञेयम्**—परमात्मनः पृथक्तया ग्रहणानर्हम् । विभज्य ज्ञातुमशक्यम्

101 **अविद्या**—विद्याविरोधिनी । विपरीतबुद्धिः । स्वभ्रमहेतुः ।

102 **अविद्याविजृम्भितम्**—अविद्याविलासः । (अविद्याकार्यप्रपञ्चः)

103 **अविभागः**—लयः ।

104 **अविशिष्टम्**—समानम् ।

105 **अव्यक्तः**—त्रिगुणाव्यक्तशरीरकतां प्राप्तः परमात्मा । अव्यक्तावस्थप्रकृतिशरीरकः परमात्मा ।

106 **अव्यतिकरः**—असाङ्कर्यम् ।

107 **अव्याप्तिः**—लक्षणत्वाभिमतधर्मस्य सर्वलक्ष्यावर्तनम् ।

108 **अशकनीयता**—साधयितुमशक्यता

109 **अशुद्धिः**—शुद्धित्वप्रतियोग्याकारः । अविद्यासम्बन्धयोग्यता । दोषार्हता ।

110 **अंशत्वम्**—एकवस्त्वेकदेशत्वम् (भा) ।

111 अंशभेदः—विशेषणभेदः (2-1-19)।

112 अंशित्वम्—सावयवत्वम्।

113 असत्कार्यवादः—पूर्वमसदेव कार्यमुत्पद्यते इत्ययं तार्किकाणां वादः।

114 असत्त्वम्—विरोधिव्यवहारयोग्यता (भा)।

115 असत्त्वं (जगतः)—नाम-रूपयोगविरोधिसूक्ष्मदशापत्तिः।

116 असत्त्वधर्मः—सत्त्वधर्मविरोधिनी सूक्ष्मावस्था।

117 असङ्ख्यातप्रदेशः—अनियतप्रदेशः (जै. म.)।

118 असन्ततिः—अणुत्वम्।

119 असमञ्जसम्—असाङ्गत्यपूर्णम्।

120 असम्भवः—अनुत्पत्तिः।

121 असम्भावितदोषत्वम् (वेदे)—स्वतन्त्रानुपूर्व्यवच्छिन्नत्वरूपम् अपौरुषेयत्वम्।

122 अस्तिकायः—अनेकदेशवर्ति द्रव्यम्। स्थूलरूपेण अनेकदेशास्तित्वविशिष्टं द्रव्यम्।

123 अहल्या—गोतमस्यर्षेः पत्नी।

124 अहंश्रेयः—समवेतेषु अन्योन्यं स्पर्धया स्वप्राशस्त्यख्यातिकामना।

(आ)

125 आकाङ्क्षा—वर्ण-पदादीनां पौर्वापर्यरूपः समभिव्याहारः।

126 आक्षपादाः—गौतमीयाः, नैयायिकतार्किकाः।

127 आगन्तुकम्—स्वरूपानायत्तम्, अस्वाभाविकम्, कादाचित्कं कारणायत्तम्।

128 आगमः—प्रमाणभूतः शब्दः।

,, 'कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते।
क्रमागतैः स्वसंज्ञाभिर्ब्राह्मणैरागमं तु तत्॥'

,, 'सृष्टिश्च प्रलयश्चैव देवतानां तथाऽर्चनम्।
साधनं चैव मन्त्राणां पुरश्चरणमेव च॥
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तं विदुर्बुधाः॥'

129 आचार्यः—ज्ञानदो गुरुः। 'उपनीय तु यःशिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥'

130 आतञ्चनम्—क्षीरस्य दधित्वापादको व्यापारः।

131 आतमता—नियन्तृता।

132 आतमा—शरीरप्रतिसम्बन्धी। स्वरूपम्।

133 आमैकत्ववादिनः—अद्वैतिसामयिकाः।

134 आदिः—कारणम्। आदीयते अस्मात् कार्यम् इति।

135 आनन्त्यम्—सावधिसङ्ख्याराहित्यम्। अपरिच्छिन्नत्वम्।

136 आनन्दैकतानः—आनन्दमात्राश्रयस्वरूपः।

137 आपस्तम्बः—धर्मादिसूत्रप्रवर्तकः कश्चन ऋषिः।

138 आप्ततमत्वम्—सार्वत्रिकयथावस्थितदर्शनपूर्वकयथादृष्टार्थवादित्वम्।

139 आप्ताः—राजस-तामसाप्रवृत्ताः सत्त्वैकनिष्ठाः।

140 आप्तिः—यथावस्थितवस्तुस्वरूपदर्शनं, यथार्थवादित्वं च।

141 आमननम्—आभिमुख्येन मननम्, (सङ्कल्पः) (भा)

142 आरम्भणम्—आरभ्यते आलभ्यते स्पृश्यते इति व्यवहारः। (भा)

143 आरा—चर्मसीवनार्था सूची।

144 आराधनम्—(देवादि) प्रीतिजनको व्यापारः।

145 आर्षम्—ऋषीणां प्रातिभं तपोऽधीनं च ज्ञानम्।

146 आलोकाकाशः—मोक्षस्थानम् (जै. सि.)

147 आवरणम्—अप्रकाशः। तिरोधानम्।

148 आस्रवः—भोगोपकरणभूतमिन्द्रियादिकम्। (भा.) भवहेतुः (जै.सि.)

(इ)

149 इच्छाविग्रहः—कर्मानधीनः लोकानुग्रहौपयिकस्वसङ्कल्पमात्रायत्तस्वरूपः भगवतः (तदीयानां वा) देहः।

150 इतरेतराश्रयः—परस्परज्ञप्त्यधीनज्ञप्तिकत्वं (अन्योन्यं) दोषः ।

151 इतिकर्तव्यता—अङ्गजातम् ।

152 इतिहासः—पुरावृत्तप्रतिपादकः आर्षो ग्रन्थविशेषः । (इति-ह-आस)

153 इन्द्रियाणि—जीवात्मनः ज्ञानकरणानि एकादश ।

154 इन्द्रियाश्रयत्वम्—इन्द्रियोपजीव्यत्वम्, स्वोपचयोपघातप्रयुक्तोपचयोपघातशालीन्द्रियकत्वम् ।

155 इयत्ता—सङ्ख्या । परिच्छेदः ।

156 इष्टापूर्तम्—इष्टं च पूर्तं च । श्रौतं स्मार्तं च कर्मजातम् ।

157 इहप्रत्ययः—'इह' इति प्रत्ययः, यत्किंचिद्देशाद्याधारावगाहि ज्ञानम् ।

(ई)

158 ईश्वरः—सर्वनियन्ता सर्वात्मा विशिष्टश्चेतनः । क्लेश-कर्म-विपाकाशयैरपरामृष्टः पुरुषविशेषः ।

(उ)

159 उत्तम्भनम्—स्थापकम् । ज्ञापकम् ।

160 उदारः—अविषमः, प्रिय-द्वेष्याद्यविभागतः सर्वोपयोगी ।

161 उदितः—प्रतिपादितः ।

162 उद्गानम्—त्रैस्वर्यवत्याः ऋचः सप्तस्वरत्व-त्रिस्थानत्वादिसम्पादकं उद्गात्राख्यऋत्विक्कृतं गानम् (सामाख्यम्) ।

163 उन्मत्तः—अनियतधीप्रसरश्चेतनः ।

164 उन्मानम्—उद्धृत्य मानम् (परिमाणविशेषवद्वस्तुनिदर्शनपूर्वकं) ।

165 उत्पत्तिः—(स्वावयवस्य द्रव्यस्य) उत्तरोत्तरसंस्थानसंयोगः ।

166 उपपदविभक्तिः—पदान्तरसाहचर्यनिमित्ता विभक्तिः ।

167 उपबृंहणम्—श्रुतिप्रतिपन्नार्थविशदीकरणम् । अनधीतवेदशाखार्थैककण्ठ्येन अधीतशाखार्थनिष्कर्षः ।

168 **उपलब्धिः**—प्रात्यक्षिकी मतिः ।

169 **उपष्टम्भनम्**—धारणम् । प्रवर्तनम् ।

170 **उपसंहारः**—परिकरसम्पत्तिः ।

171 **उपहितः**—उपाधिसम्बद्धः ।

172 **उपादानम्**—इन्द्रियाणां प्रेरणम् । स्वीकरणम् । परिग्रहः ।

173 **उपादानता**—परिणामि कारणद्रव्यम् ।

174 **उपाधिः**—स्वस्मिन् अविद्यमानस्य धर्मस्य आरोपहेतुः ।

175 **उपेक्षकत्वम्**—औदासीन्यम् ।

176 **ऊर्णनाभिः**—लूताख्यः जन्तुविशेषः ।

(ए)

177 **एकतानम्**—अनन्यवृत्ति ।

178 **एकाकारद्रव्यनियतवृत्तिः**—नियतैकाकारावयवसंनिवेशे द्रव्य एव अव्यभिचरितप्रयोग-विषयता ।

179 **एकान्तत्वम्**—नियतस्वभावता, अव्यभिचरितस्वभावता ।

(औ)

180 **औदुम्बरी**—यज्ञवाटनिखाता यूपाख्या उदुम्बरवृक्षविकृतिः ।

181 **औलूक्याः**—वैशेषिकतार्किकाः । काणादाः ।

(क)

182 **कणभक्षः**—वैशेषिकदर्शनप्रवर्तकः कणादः ।

183 **कपिलः**—भगवतो महाविष्णोरवतारभूतः साङ्ख्यशास्त्रप्रवर्तको मुनिः ।

184 **करकः**—वर्षोपलः ।

185 **कर्ता**—क्रियानिर्वर्तने स्वतन्त्रः, प्रयोजयिता च ।

186 **कर्तृत्वम्**—क्रियाश्रयत्वम् । क्रियानिर्वर्तने स्वातन्त्र्यम् ।

187 **कर्तृस्थक्रियः**—समानकर्तृकः ।

188 **कल्पः**—ब्रह्मणो दिनम् । ससन्धिकालः चतुर्दशमन्वन्तरात्मकः कालः ।

189 **कल्पकः**—कल्पनाया आश्रयभूतः, भ्रमाश्रयः ।

190 **कल्पयन्ति**—निष्प्रमाणमपि स्वबुद्ध्या वर्णयन्ति ।

191 **कल्याणगुणाः**—अनुभवितॄणामन्येषामप्यानन्दहेतवो गुणाः ।

192 **कव्यम्**—पित्रुद्देशेन प्रवृत्तमन्नम् ।

193 **कापिलस्मृतिः**–कपिलेन मुनिना प्रवर्तितं साङ्ख्यशास्त्रम् ।

194 **कामः**—इच्छा ।

195 **कामाः**—'काम्यन्त इति' आनन्दहेतुतया प्रार्थ्यमाना भगवद्गुणाः ।

196 **काण्वशाखा**—शुक्लयजुःसम्बन्धि सप्तदशप्रभेदान्तःपाती शाखाविशेषः ।

197 **कायाः**—देव-मनुष्यादिशरीराणि ।

198 **कारकम्**—क्रियानिर्वर्तकम् । कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥

199 **कारकविभक्तिः**—अपादानादिकारकभावप्रयोज्या विभक्तिः ।

200 **कारणत्वम्**—तदनन्यथासिद्ध तन्नियतपूर्ववृत्ति पूर्वावस्थापन्नम् ।

201 **कारणसालक्षण्यं (कार्ये)**—कारणभूतं वस्तु येन स्वभावेन वस्त्वन्तराद् व्यावृत्तम् ; तस्य स्वभावस्य तत्कार्येऽप्यनुवृत्तिः ।

202 **कारणानुविधायित्वम्**—अन्वय-व्यतिरेकसिद्धस्वकारणानुगुण्यम् ।

203 **कार्यम्**—प्राप्तोत्तरावस्थं कारणम् ।

204 **कार्य-कारणे**—शरीरेन्द्रिये ।

205 **कालः**—'अभूत्, अस्ति, भविष्यति' इति व्यवहारहेतुः अणुरूपो द्रव्यविशेषः (जै.सि.) [भा]

206 **कालपरिच्छेदः**—उत्पत्ति-विनाशभागित्वम् ।

207 **काश-कुशावलम्बनम्**—अमुख्यम् । (कुशालाभे तत्स्थाने काशावलम्बनमिव)

208 **कितवाः**—धूर्ताः । द्यूतकृतः ।

209 **कीटः**—क्रिम्यपेक्षया किञ्चिदिव बृहन् जन्तुः ।

210 **कुतर्कः**—प्रमाणविरुद्धः मूलशैथिल्यमिथाविरोधादिदोषदूषितस्तर्कः ।

211 **कुप्येयुः**—बाधिता भवेयुः (भा)

212 **कृतलक्षणाः**—भगवच्छास्त्रोक्तभगवदाराधनोपयोगिसंस्कारवन्तः ।

213 **कृतविप्रणाशः**—फलप्रदानसमर्थस्याऽपि कृतस्य कर्मणः स्वं प्रति अप्रदायैव फलं विनाशः ।

214 **कृत्यानां प्रपञ्चनम्**—अनुष्ठेयानामर्थानां अभ्युदय-निःश्रेयसार्थिभिः विस्तरेण प्रतिपादनम् ।

215 **कृपाणः**—खड्गः ।

216 **केवलब्रह्मकारणवादः**—?

217 **कैवल्यम्**—आत्यन्तिकदुःखप्रशमनम् । मोक्षः ।

218 **क्रि(कृ)मिः**—यूकालिक्षादिः मत्कुणादिश्च ।

219 **क्रिया**—प्रयत्नः ।

220 **क्षणिकत्वम्**—द्वितीयक्षणविनाशित्वम् । (बौ.सि.)

221 **क्षपणकाः**—(क्षपयति-दूरीकरोति लज्जाम्) दिगम्बरजैनयतिः ।

222 **क्षपिताः**—निरस्ताः ।

223 **क्षेत्रज्ञः**—तत्तत्क्षेत्रज्ञः जीवः, सर्वक्षेत्रज्ञः ईश्वरः ।

224 **क्षेत्रम्**—शरीरम् ।

225 **गुणः**—अप्रधानम् । शेषभूतः ।

226 **गुप्तिः**—काय-वाङ्-मनोनिग्रहः । (जै.सि.)

227 **गुहाशयः**—सर्वभूतहृदयावासः (परमात्मा) ।

228 **गौरवम्**—पतनहेतुभूतं गुरुत्वम् ।

229 **ग्राहकाभिमानारूढः**—'अहम्' इत्यवभासमानः ।

230 **चतुर्विधाहाराः**—खाद्य-लेह्य-चोष्य-पेयाः ।

231 **चतुर्व्यूहः**—चतुर्विभागः (भगवद्रूपसम्बन्धी) ।

232 **चलनम्**—व्यापारः ।

233 **चित्तम्**—विज्ञानसन्तानः (बौ. सि.) ।

234 **चिन्ता**—आलोचनम् ।

235 **चिन्मात्रैकरसः**—चैतन्यस्वरूपातिरेकेण चैतन्याश्रयत्वादिरहितः (आत्मा) (अ.सि.) ।

236 **चेतनः**—चैतन्यविशिष्टः ।

237 **चेतना**—चैतन्यम् ।

238 **चेष्टा**—I प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया (वै.द.) ।

— II प्राणशरीरसंयोगासमवायिकारणिका क्रिया ।

239 **चैतन्यमात्रवपुः**—ज्ञानमात्रस्वरूपः (अ. सि.) ।

240 **चैत्तम्**—रागादिकम् (बौ. सि.) ।

241 **चोद्यम्**—अनुपपत्त्युद्घाटनेन अर्थाक्षेपपूर्वकं परिहारबुभुत्साख्यापनम् ।

242 **जगत्प्रवृत्तिः**—जगदुत्पत्तिः । प्रकृतेः विक्रियमाणता ।

243 **जडः**—चैतन्यानाश्रयः अचिदर्थः । त्रिगुणं-तत्कार्याणि च ।

244 **जवनत्वम्**—कालविलम्बमन्तरा अपेक्षितदेशसम्बन्धित्वम् ।

245 **जातिः**—जन्म ।

246 **जातिनिबन्धना**—एकजातीयत्वप्रयुक्ता ।

247 **जीवः**—प्रत्यगात्मा । नियाम्यतैकस्वभावश्चेतनः ।

248 **ज्योतिष्टोमः**—आहिताग्निभिः श्रौतेऽग्नौ प्रतिवत्सरं वसन्तर्तौ अनुष्ठेयः क्रतुविशेषः ।

249 **तत्त्वम्**—परमार्थः । अनारोपितोऽर्थः । अर्थस्थितिः ।

250 **तद्वत्ता**—तत्सम्बन्धः ।

251 **तद्व्यपदेशः**—तद्वाचिशब्दः (भा.) ।

252 **तमोभूतम्**—तमोभाववत् । सम्प्राप्ततमोवस्थम् ।

253 **तमोनुदः**—अक्षरावस्थापन्नः ।

254 **तर्कः**—I प्रमाणानुग्राहकः प्रमाणेतिकर्तव्यताभूतो वा ज्ञानविशेषः ।

II व्याप्यारोपेण व्यापकारोपः ।

III विचाराख्यो ज्ञानविशेषः ।

IV अर्थस्वभावविषयेण सामग्रीविषयेण वा निरूपणेन अर्थविशेषे प्रमाणं व्यवस्थापयत् ऊहापरपर्यायं ज्ञानम् ।

255 **तुच्छम्**—प्रमाणसम्बन्धानर्हम् । असत् । भावातिरिक्तम् ।

256 **तेजोऽबन्नानि**—तेजो-जल-पृथिव्यः ।

257 **त्रिगुणम्**—त्रयो गुणाः अस्येति सत्त्व-रजस्-तमोमयी प्रकृतिः ।

258 **त्रिमलम्**—मल-मूत्र-स्वेदाख्यमलत्रयवत् ।

259 **त्रिवृत्करणम्**—पृथिवी-जल-तेजसां जगत्सृष्ट्युपयोगि अन्योन्यसंसृष्टतापादनम् ।

260 **दन्दशूकः**—दंश-मशकादिः क्षुद्रजन्तुविशेषः ।

261 **दया**—स्वार्थनिरपेक्षा परदुःखासहिष्णुता । (भा)

262 **दर्पणः**—मुकुरः, आदर्शः

263 **दर्शपूर्णमासौ**—आहिताग्निना पुरुषेण प्रतिपर्व श्रौतेऽग्नौ कर्तव्यौ इष्टी: ।

264 **दाशाः (साः)**—धीवराः (मत्स्यजीविनः)

265 **दुःखम्**—आत्मनः प्रतिकूलवेदनीयः ज्ञानावस्थाविशेषः ।

266 **दुरुपपादा**—उपपन्नतया (युक्ततया) बोधयितुमशक्या ।

267 **दुर्धर्षणत्वम्**—निराकर्तुमशक्यत्वम् ।

268 **दूषणम्**—दूषको हेतुः ।

269 **दृष्टान्तः**—निदर्शनम् । साध्यहेत्वोर्व्याप्तिग्रहणस्थानम् ।

270 **द्रमिडभाष्यकारः**—टङ्कापरपर्यायब्रह्मानन्दिकृतवाक्यग्रन्थव्याख्याता ।

271 **द्वैतदर्शनम्**—सर्वस्मिन् ब्रह्मैकप्रकारतां विना स्वनिष्ठत्वभ्रमः ।

272 **धर्मः**— I अलौकिकश्रेयःसाधनतया श्रुत्याद्यवगतोऽर्थः ।

II अभ्युदयनिःश्रेयसहेतुरर्थः ।

III यं क्रियमाणमार्याः प्रशंसन्ति सः ।

IV विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः । हृदयेनाऽभ्यनुज्ञातो यो धर्मस्तं निबोधत ।

V धृतिहेतुः ।

(जै.सि.) गतिमतां गतिहेतुभूतः जगद्व्यापी द्रव्यविशेषः ॥

273 **धर्मान्तरम्**—सस्थानान्तरम् ।

274 **धातुसाम्यम्**—देहिनां स्वस्थताहेतुः वात-पित्त-श्लेष्मणां प्रमाणविशेषयुक्तः समसमायोगः ।

275 **धातुवैषम्यम्**—देहिनां अस्वास्थ्यहेतुः वात-पित्त-श्लेष्मणां विषमसमायोगः ।

276 **धीः**—चिन्ता ।

277 **ध्रुवत्वम्**—त्रिकालावस्थायि(स्थिर) स्वरूपत्वम् ॥

278 **नरः**—अक्षयः । निर्विकारो भगवान् (रीङ्-क्षये डः. टिलोपः । न-रः)

279 **नाम-रूपव्याकरणम्**—सृज्यानां वस्तूनां तत्तदनुगुणसंज्ञा-मूर्त्योः कल्पनम् ।

280 **नारायणः**—नाराख्या आपः अयनं-स्थानं यस्य सः, जगत्कारणं ब्रह्म, सर्वेश्वरः जगदन्तरात्मा ।

281 **नाराः**—नरा जाताः आपः ।

282 **निखिलजगदेककारणम्**—निमित्तोपादानरूपोभयविधकारणम् (आकाशादेरपि) ।

283 **निगमयति**—उपसंहरति ।

284 **निगरणम्**—भक्षणम् ।

285 **निग्रहः**—अपकारः । निकृष्टगतदुःखाद्याधानौपयिकः उत्कृष्टपुरुषवर्ती ज्ञानावस्थाविशेषः ।

286 **निग्रहानुग्रहौ**—कोपप्रसादौ ।

287 **निदर्शनम्**—प्रथमोदाहरणम् ।

288 **निमित्तकारणम्**—विकाराश्रयत्वव्यतिरिक्ताकारेण कार्योपयोगि कारणम् ।

289 **निरधिष्ठानभ्रमः**—आरोपधर्मिणं विनैव आरोपः (अध्यासः) (शून्यवादिनाम्) ।

290 **निरञ्जनः (परमात्मा)**—सत्त्वादिगुणरहितः ।

291 **निरवकाशत्वं (शास्त्रे)**—अप्रमाणकोट्यनन्तर्भाव-विषयान्तरालाभाभ्यां विरुद्धार्थोपस्थापकप्रमाणाबाधेन अनुदयित्वम् ।

292 **निरवद्यः (परमात्मा)**—अकर्मवश्यः ।

293 **निरंशाः (अणवः)**—निष्प्रदेशाः ।

294 **निरुपाख्यत्वम्**—तुच्छत्वम् , प्रमाणसम्बन्धानर्हत्वम् ।

295 **निर्जरम्**—मोक्षसाधनम् (जै.म.) अर्हदुपदेशावगतं तपः ।

296 **निर्धर्मकः (आत्मा)**—ज्ञातृत्वरहितः ।

" रागादिविकाररहितः ।

297 निराकाङ्क्षत्वम् (शास्त्रे)— I स्वार्थविषयकानुभवजनने (स्मृतिवत्) ज्ञानान्तरा-नपेक्षत्वम् ।

II अनन्यगोचरार्थविषयकज्ञानजनकत्वम् ।

298 निर्विशेषम् (ब्रह्म)—सजातीयविजातीयस्वगतभेदरहितं वस्तु ।

299 निश्श्रेयसम्—I नितरां श्रैष्ठ्यम् ।

II मुक्तिः ।

300 निष्ठा—तात्पर्यपर्यवसानभूमिः ।

301 नैर्घृण्यम्—निर्दयता ।

302 न्यायः—I पञ्चाङ्गमधिकरणम् ।

II अधिकरणेन निष्पन्नोऽर्थः ।

III प्रमाणैः अर्थपरीक्षणम् ।

IV अनुमानोद्बोधकं वाक्यम् ।

303 न्याय्यम्—न्यायतः प्राप्तम् । न्यायादनपेतम् ।

304 पञ्चरात्रम्—I रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्रं च प्रवदन्ति मनीषिणः ॥

II पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि ।
तत्सन्निधौ समाख्याऽसौ तेन लोके प्रवर्तते ॥

305 पञ्चवृत्तिः (प्राणः)—पञ्चविधव्यापारवान् ।

306 पतङ्गः—I शलभः ।

II पक्षी च ।

307 पतञ्जलिः—योगशास्त्रप्रवर्तनाचार्यः (व्याकरणमहाभाष्यकारश्च) ।

308 परकायः—जीवान्तराधिष्ठितो देहः ।

309 परं तत्त्वम्—परब्रह्मभूतो भगवान् सर्वेश्वरः ।

310 परमा गतिः—योगः । यदा पञ्चाऽवतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥

311 परमं निःश्रेयसम्—भगवत्सायुज्यरूपा मुक्तिः ।

312 **परमर्षयः**—मन्त्राणाम् अतीन्द्रियार्थानां च द्रष्टारः ।

313 **परमाणुकारणवादः**—परमाणुमूलजगदारम्भवादः (तार्किकाणाम्) ।

314 **परमार्थः**—तत्त्वावेदकप्रमाणविषयोऽर्थः । अनारोपितं तत्त्वम् ।

315 **परस्परविरुद्धाः**—मिथः सामानाधिकरण्यानर्हाः ।

316 **परात्त्वम् (विषयेषु)**—परस्मै (आत्मने) भासमानत्वम् ।

317 **परा देवता**—परं ब्रह्म ।

318 **परामर्शः**—प्रतिसन्धानम् ।

319 **पराशरः**—विष्णुपुराणस्य कर्ता ब्रह्मर्षिः (कृष्णद्वैपायनस्य पिता) ।

320 **परिणमते**—अपरित्यक्तस्वस्वरूपं सत् अवस्थान्तरप्राप्तिमद्भवति ।

321 **परिणामः**—अवस्थान्तरप्राप्तिः (विषमपरिणामः) ।

322 **परिमण्डलम्**—परमाणुः ।

323 **परिमाणम्**—परिमितत्वम्, अव्यापित्वम् ।

324 **परिस्पन्दः**—I अन्यथाभावोद्योगः (2-2-2) ।

,, II समपरिणामः (2-2-4) ।

325 **पारिमाण्डल्यम्**—परमाणु-द्व्यणुकयोः परिमाणे ?

326 **परिवर्तते**—विहरति ।

327 **परिहारः**—निषेधः ।

328 **पर्यवस्यति**—विश्राम्यति ।

329 **पर्यायः**—द्रव्यावस्थाविशेषः ।

330 **पाठक्रमः**—श्रुत्यादिपाठस्थः पूर्वापरीभावः ।

331 **पापं कर्म**—भगवन्निग्रहप्रयोजकं कर्म ।

332 **पितरः**—सोम-यमाग्न्यादयः पितृत्वजातिमच्छरीरयुक्ताश्चेतनाः ।

333 **पिप्रीषन्ति**—प्रीणयितुमिच्छन्ति ।

334 **पुद्गलः**—वर्णगन्धरसस्पर्शवद्द्रव्यम् ।

335 **पुण्यं कर्म**—भगवत्प्रीतिप्रयोजकं कर्म ।

336 **पुण्यापुण्ये**—परमपुरुषाराधन-तद्विपर्ययरूपे कर्मणी ।

337 **पुराणम्**—सर्ग-प्रतिसर्ग(प्रलय)वंशविशेषादिप्रतिपादकः आर्षः ग्रन्थविशेषः ।

338 **पुरीषम्**—दैहिकं मलम् (पांसुः) ।

339 **पुरुरूपः**—नानारूपः ।

340 **पुरुषः**—जीवः ।

341 **पूः**—पुरं, शरीरम्, उपभोगस्थानम् ।

342 **पृथग्योगः**—सूत्रस्य पृथग्भावः ।

343 **पौरुषेयत्वम्**—पुरुषैरधीतत्वम् ।

344 **प्रकाशः**—तत्त्वज्ञानम् (स्वतोभानम्) ।

345 **प्रकृतिः**—I सत्त्वरजस्तमसां समूहः ।

,, II उपादानकारणम् ।

346 **प्रकेतः**—स्थानं, चिह्नं वा ।

347 **प्रजननशक्तिः**—अपत्यप्रसवसामर्थ्यम् ।

348 **प्रज्ञामात्राः**—चेतनाः ।

349 **प्रतिक्षेपः**—असामञ्जस्यज्ञापनम् ।

350 **प्रतिबन्धः**—कार्याक्षमत्वापादनम् ।

351 **प्रतिपत्तारः**—तत्त्वार्थग्रहणे प्रवृत्ताः ।

352 **प्रतिप्रतिगुणाश्रयविशेषः**—प्रतिवस्तु गुणोन्मेषविशेषः । (प्रतिनियताः गुणाः यस्मिन् आश्रये सः प्रतिगुणाश्रयः । प्रतिगुणाश्रये प्रतिगुणाश्रये प्रतिप्रतिगुणाश्रयम् । तत्र विद्यमानो विशेषः) ।

353 **प्रतिबुद्धः आत्मा**—प्राज्ञ आत्मा ।

354 **प्रतिषेधः**—प्रतियोग्यनुयोगिविशेषोपरागेण अभाववचनम् ।

355 **प्रतिसङ्ख्या**—संख्या-विषयः, तत्प्रतिकूला विषयासत्त्वग्राहिका लौकिकानां बुद्धिः ।

356 **प्रतिसङ्ख्यानिरोधः**—उपलब्ध्यर्हः सदृशसन्तानावसानरूपः स्थूलः निरन्वयविनाशः ।

357 **प्रतिसन्धानम्**—ऐक्यबुद्धिः (प्राक्तनाद्यतनगृहीतयोः) दृष्ट-स्मृतयोर्वा ।

358 प्रतीतिः—अनुभवः

359 प्रत्यक्षम्—I चक्षुरादि इन्द्रियम् ।

II इन्द्रियार्थसंनिकर्षजं ज्ञानम् ।

360 प्रत्यनीकम्—विरोधि, प्रतिभटम् ।

361 प्रत्यभिज्ञानम्—अतीत-वर्तमानवर्त्येकार्थविषयकं 'तदेवेदम्' इत्याकारं संस्कारसचिवं प्रात्यक्षिकं ज्ञानम् ।

362 प्रत्ययः—सर्वकारणसमवायः (प्रति-एकैककारणस्याऽपि, अयः—अन्येन प्राप्तिः ।

363 प्रत्यवतिष्ठते—प्रतिपक्षोद्भावको भवति ।

364 प्रत्युक्तिः—प्राप्तशङ्कानिरासकं प्रतिवचनम् ।

365 प्रधानकारणवादः—अब्रह्मात्मिकायाः प्रकृतेः जगत्कारणतावादः (साङ्ख्यानाम्)

366 प्रधानम्—त्रिगुणात्मिका मूलप्रकृतिः ।

367 प्रपञ्चयिष्यते—विस्तरेण वर्णयिष्यते ।

368 प्रभुः (कर्मणाम्)—फलप्रदः (भगवान्)

369 प्रमाणानि—प्रमासाधनानि प्रत्यक्षानुमानागमाख्यानि ।

370 प्रमितिः—I प्रमा, यथावस्थितवस्तुव्यवहारौपयिकं ज्ञानम् ।

II अर्थनिश्चायकत्वम् ।

371 प्रयोजयितृत्वम्—अप्रवृत्तप्रवर्तनरूपं कर्तृत्वम् ।

372 प्रवाहानादित्वम्—स्वाधिकरणकालत्वव्यापकस्वसजातीयाधिकरणकालोत्तरत्वकत्वम् ।

373 प्रविशतिः—प्रेत्युपसर्गपूर्वको विश् धातुः ।

374 प्रवृत्तिः—व्यापारः ।

375 प्रवृत्तिनिमित्तम् (शब्दस्य)—पदस्य अर्थे समुदायशक्तौ निमित्तभूतं पदवाच्यं (गोत्वादि) ।

376 प्रसज्यते—अनभिमतमपि अभ्युपगन्तव्यतां प्राप्नोति ।

377 प्रसुप्तमिव—सुष्वापकालिकतुल्यम् । ज्ञानप्रसरगन्धहीनम् ।

378 प्राचीनभागः (वेदस्य)—कर्मप्रतिपादको वेदभागः ।

379 **प्राज्ञः**—परमात्मा ।

380 **प्राणवान्**—जीवः ।

381 **प्राणः**—सर्वप्राणनहेतुः परमात्मा ।

382 **प्राणाः**—इन्द्रियाणि ।

383 **प्राणिनः**—ब्रह्मादिस्तम्बपर्यन्ताः जीवात्मानः ।

384 **प्राप्तम्**—प्राप्तिः, अन्वयः ।

385 **प्राप्ताप्राप्तविवेकः**—I अन्वय-व्यतिरेकपरिशीलना ।
II स्वरूपप्राप्त-औपाधिकयोर्वा चिन्ता ।

386 **प्राप्तिः**—संयोगः । अन्वयः ।

387 **बद्धः**—अनुवृत्तसंसारश्चेतनः ।

388 **बन्धः**—कर्मनिघ्ना जन्मादिप्राप्तिः । संसारः । (अविद्याश्रयत्वम्) ।

389 **बलात्**—अनिच्छयाऽपि ।

390 **बलीयस्त्वम् (शास्त्र)**—प्रमाणान्तरप्रतिबध्यत्वानर्हज्ञानाधायकत्वम् ।

391 **बाधः (ज्ञानात्मकः)**—अदुष्टकारणजन्या निषेधबुद्धिः ।

392 **बाधितत्वम् (शास्त्र)**—प्रमाणान्तरप्रतिबध्यत्वार्हार्थप्रतिपत्तिजनकत्वम् ।

393 **बीजाङ्कुरन्यायः**—कार्यत्व-कारणत्वावच्छेदकयोरभेदप्रतीत्याधायको व्यवहारः ।

394 **बुद्धिः**—अध्यवसायकरणम् ।

395 **बुध्नः**—घटादेः पात्रस्याधोभागः । (वृक्षस्य मूलभागः) ।

396 **बृहस्पतिः**—देवगुरुः आङ्गीरसः । लोकायतमतप्रवर्तकश्च ।

397 **ब्रह्म**—चेतनस्य मुक्तावुपेयं जगत्कारणं परं तत्त्वम् ।

398 **ब्रह्मकारणवादः**—विश्वोत्पत्तौ निमित्तमुपादानं च ब्रह्मैवेति वेदान्तिनां वादः ।

399 **ब्रह्मभावः**—चराचरात्मकस्य जगतोऽन्तर्यामितया ब्रह्मणः सद्भावः ।

400 **ब्रह्मलोकः**—ब्रह्मैव लोकः (लोक्यते-साक्षात्क्रियते इति) ।

401 **ब्राह्मण्यादिजातिः**—शरीरारम्भकद्रव्यसमवेतानां सत्त्वरजस्तमसां तारतम्यविशेषः ।

402 **भक्ताः**—पूज्यविषये अनुरागविशेषवन्तः (भक्तिः—ईश्वरे परानुरक्तिः) ।

403 भक्तिः—उपासनम् (ध्यानम्—विजातीयप्रत्ययाव्यवहितं ध्येयचिन्तनम् ।
,, बोध्ये पदशक्तेः भङ्गः । (उपचारः—प्रवृत्तिनिमित्तापौष्कल्येऽपि शब्दप्रयोगः) ।

404 भगवान्—'ज्ञान-शक्ति-बलैश्वर्य-वीर्य-तेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥' परमात्मा ।
,, 'उत्पत्तिं (च विनाशं च) प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥' तत्त्वज्ञः ।

405 भन्त्स्यते—बद्धो भविष्यति ।

406 भाक्तः—भक्त्या-अमुख्यया वृत्त्या प्रयुक्तः शब्दः (औपचारिकः) ।

407 भिक्षुः—(परिव्राजकः) बौद्धसंन्यासी ।

408 भूतमात्राः—ग्राह्य-ग्राहकात्मकं वस्तुजातम् ।

409 भूतानि—आकाश-वायु-तेजो-जल-पृथिव्याख्यानि ।

410 भेषजम्—आधि-व्याधिनिवारणसाधनम् ।

411 भोक्ता—आराध्यः । कर्मजन्यप्रीत्याश्रयः ।

412 भोगायतनम्—यत्र वर्तमानस्यैव सुखदुःखोपभोगः तत् (पू) भोगसाधनविशेषः ।

413 भ्रमः—विपरीतनिर्णयः ।

414 भ्रान्तिः—अयथावत्प्रतिपत्तिः ।

415 मणिकः—मृदादिविकारभूतः पात्रविशेषः ।

416 मननम्—गृहीतस्य शास्त्रार्थस्य तर्कतः प्रतिष्ठापनम् ।

417 मनस्कारः—सङ्कल्पः ।

418 मनुः—धर्मप्रवक्ता तन्नामा महर्षिः ।

419 मन्दमतयः—विचारणीये विषये आपातग्रहणे एव विश्रान्ताः (सूक्ष्मेक्षिकायामशक्ताः)

420 महद्दीर्घम्—त्र्यणुकम् ।

421 महाभूतादिवृत्तौजाः—महाभूतकारणमहदहङ्कारतत्त्वविषयकसङ्कल्पवान् ।

422 महाभूतादि—व्यष्टिकारणभूतानि पृथिव्यादीनि, महदहङ्कारौ च ।

423 माक्षिकम्—मधुमक्षिकाभिरार्जितं मधु ।

424 **माध्यन्दिनशाखा**—शुक्लयजुःसम्बन्धिसप्तदशप्रभेदान्तर्गतः शाखाविशेषः ।

425 **माया**—I परस्य भ्रमहेतुः (पू)

II त्रैगुण्यमयी प्रकृतिः ।

III 'माश्च मोहार्थवचनः याश्च प्रापणवाचनः ।
तं प्रापयति या नित्यं सा माया परिकीर्तिता ॥'

IV 'विचित्रकार्यकरणा अचिन्तितफलप्रदा ।
स्वप्नेन्द्रजालवल्लोके माया तेन प्रकीर्तिता ॥'
आश्चर्यकरी भगवच्छक्तिः तत्सङ्कल्पश्च ।

426 **मायाऽविद्याविभागवादः**—'माया—परभ्रमहेतुः । अविद्या-स्वभ्रमहेतुः' इति वादः ।

427 **मिथ्यात्वम्**—प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वम् ।

428 **मुख्यः**—मुखे भवः (शीघ्रोपस्थितिविषयः) ।

429 **मुक्ताः**—निवृत्तसंसाराश्चेतनाः ।

430 **मूर्च्छा**—पित्ततमः प्रायः सुख-दुःखव्यपोहकृत् रोगविशेषः (अवस्थाविशेषः) ।

431 **मूलप्रकृतिः**—सुख-दुःख-मोहात्मकानि लाघव-प्रकाश-चलनोपष्टम्भन-गौरवावरणकार्याणि अत्यन्तातीन्द्रियाणि कार्यैकनिरूपकविवेकानि अन्यूनानतिरेकाणि समतामुपेतानि सत्त्व-रजस्-तमांसि द्रव्याणि ॥

432 **मृत्युः**—संसारः । अविद्या । प्रमादः । ज्ञानोत्पत्तिविरोधि प्राचीनं कर्म ।

433 **मेधा**—(धारणावती धीः) निदिध्यासनम् ।

434 **मैत्रेयः**—पराशरशिष्यो विप्रर्षिः ।

435 **मोक्षः**—I स्वरूपोच्छित्तिः (पू) अविद्याविनाशः । निवृत्ताविद्यादिक्लेशस्य स्वाभाविकात्मस्वरूपाविर्भावः ।

,, II निरतिशयानन्दपरिपूर्णपरब्रह्मानुभवः ।

436 **मोहः**—भ्रान्तिः विपरीतज्ञानं वा ।

437 **मोदः**—इष्टवस्तुलाभजन्यः सुखविशेषः ।

438 **यज्ञः**—यजतिचोदनाचोदितं ('यजेत') देवाद्याराधनरूपं कर्म ।

439 **यथाकथञ्चित्**—इदमित्थमिति निष्कर्षाविषयेण तत्तत्संनिवेशानुगुणेनाकारेण ।

440 **यथागमं यथान्यायम्**—सत्तर्कानुगृहीतवेदागमप्रमाणानुसारेण ।

441 **यथाश्रुतोऽर्थः**—वक्तृतात्पर्यापरिशीलनतः शब्दशक्तिमात्रलभ्योऽर्थः ।

442 **यागः**—यजति(यजेत)चोदनाचोदितः देवतोद्देश्यकद्रव्यत्यागघटितः कर्मविशेषः ॥

443 **योगः**—I (शास्त्रीयार्थविशेषप्रतिपादकशब्दसन्दर्भरूपं) सूत्रम् ।

,, II यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्याख्यैः अष्टभिः अङ्गैर्युतः ध्यानविशेषः ।

,, III चित्तवृत्तिनिरोधः ।

,, IV 'संयोगो योग इत्युक्तो जीवात्म-परमात्मनोः' ।

444 **योगस्मृतिः**—हिरण्यगर्भप्रवर्तितं आत्मदर्शनोद्देश्यकं शास्त्रम् ।

445 **योगाचाराः**—विज्ञानमात्रसत्यतावादिनो बौद्धाः । (गुरूक्तार्थविषये पर्यनुयोगतत्स्वीकरणोभयकारिणाः) ।

446 **योग्यता**—वाक्यगतपदोपस्थितानामर्थानामन्वयाबाधः (मिथोऽन्वयाहार्थोपस्थापकपदत्वम्) ।

447 **रुग्णः**—आधिव्याधिपीडितः ।

448 **रुचकम्**—कण्ठाभरणविशेषः ।

449 **रूपम्**—I शरीरम् ।

II शुक्लादिर्वर्णः ।

450 **रूपस्कन्धः**—भूतेन्द्रियविषयाः (बौ. द.) ।

451 **रूपिद्रव्यम्**—रूपशब्दवाच्यशरीरोपादानभूतं द्रव्यम् ।

452 **लक्षणा**—मुख्यार्थसम्बन्धिन्यर्थे शब्दस्य वाचकतया वृत्तिः ।

453 **लाक्षणिकम्**—अमुख्यया वृत्त्या अर्थबोधकं पदम् ।

454 **लाघवम्**—I गुरुत्वप्रत्यनीको धर्मः (द्रव्यगतः) ।

,, II कल्पनीयार्थकल्पने अल्पत्वरूपः प्रमाणानुग्राहकस्तर्कः ।

455 **लिङ्गम्**—I लयं गच्छतीति ।

II लीनमर्थं गमयतीति ।

456 **लीला**—अनन्यप्रेरितः स्वप्रीत्यर्थो व्यापारविशेषः ।

457 **लीलाकैवल्यम्**—केवला लीला ।

458 **लोकायतम्**—लोके सर्वत्र प्रसृतं देहात्मवादिमतम् (बृहस्पत्याख्येन प्रवर्तितम्) ।

459 **लोकाकाशः**—उपर्युपरि स्थितानां लोकानामन्तर्वर्ती आकाशः ।

460 **वन्ध्या**—अपत्यप्रजननानर्हा (योग्यतारहिता) स्त्री ।

461 **वन्ध्यासुतः**—असम्भावितोऽर्थः (तुच्छः) ।

462 **वस्तुतः परिच्छेदः**—वस्त्वन्तरभावः । (स्वेतरस्य वस्तुनो विद्यमानता) ।

463 **वस्तुतोऽपरिच्छेदः**—स्वानात्मक वस्त्वन्तराभावः । (सर्ववस्तुसामानाधिकरण्यार्हत्वम्) ।

464 **वस्तुयाथात्म्यम्**—यथावस्थितं वस्तुस्वरूपम् ।

465 **वाक्यम्**—मिथोऽन्वयार्हाणां पदानां संहतिः ।

466 **वाक्यशेषः**—प्रधानवाक्योपकारकं वाक्यान्तरम् ।

467 **वाचारम्भणम्**—वाक्पूर्वको व्यवहारः ।

468 **वाजसनेयकम्**—वाजि (अश्व) रूपधरात् सवितुः सकाशात् याज्ञवल्क्येन साक्षादधीतः शुक्लयजुःशाखाविशेषः ।

469 **वासना**—विलक्षणप्रत्ययप्रवाहः ।

470 **विकल्पः**—(अन्यतरकल्पानुष्ठानकृतः) पाक्षिको बाधः ।

471 **विकल्पासहत्वम्**—विकल्पमात्रे (विविधावान्तरकोटिप्रदर्शनमात्रे) स्पष्टदोषत्वम् ।

472 **विकल्मषत्वम्**—निर्लेपत्वम् ।

473 **विकारत्वम्**—I कार्यत्वम् ।

II केवलविकाररूपत्वम् (सां. द.) ।

III अवस्थात्वम् ।

474 **विकारः**—I कार्यम् ।

II संस्थानविशेषः ।

III उत्पत्ति-विनाशौ ।

IV अवस्थान्तरप्राप्तिः ।

475 **विकासः**—कार्यावस्थान्वयः ।

476 **विकृतिः**—कार्यम् ।

477 **विचिकित्सा**—सन्देहः ।

478 **विज्ञानम्**—इन्द्रियाणि ।

479 **विज्ञानस्कन्धः**—तत्तद्विषयग्राहकत्वेन अहमित्यभिमानारूढा ज्ञप्तिः ।

480 **विज्ञानादि**—ज्ञानस्वरूपं, (तथा) जगत आदि (कारण) भूतं चेति, ब्रह्म विज्ञानादि ।

481 **विनाशो द्रव्यस्य**—(पूर्वपूर्वसंस्थानसंस्थितस्य) उत्तरोत्तरसंस्थानसंयोगः ।

482 **विपरिवर्तते**—विभिन्नो भवति ।

483 **विपर्ययः**— I वैपरीत्यम् ।

II अन्यथाभावः ।

484 **विपश्चित्**— I विविधं पश्यन् चिद्रूपो (चेतनात्मको) जीवः ।

II निरुपाधिकसर्वज्ञः परमात्मा च । (चिच्छब्दः ज्ञानाश्रयपरत्वे पुल्लिङ्गः स्यात् ?)

485 **विपाकः**—फलदशा, फलार्हदशा वा ।

486 **विप्रतिषिद्धम्**—(मिथो) व्याहतिमत् ।

487 **विप्रतिषेधः**—(मिथो) व्याघातः ।

488 **विप्लवः**—विकारः ।

489 **विभवः (अवतारः)**—रामकृष्णादिप्रादुर्भावगणः ।

490 **विभागः**—आविर्भावः । उत्पत्तिः ।

491 [**विभाजः**—नामरूपविभागकर्ता ।]

492 **विरुद्धम्**—विपरीतम् ।

493 **विलक्षणम्**—विसजातीयम् ।

494 **विरोधः**— I असामानाधिकरण्यम् ।

II व्याघातः ।

III हेतुनिष्ठं साध्यव्यापकीभूताभावप्रतियोगित्वम् (दोषः) ।

495 **विवदमानाः**—विरुद्धप्रतिपत्तिजनकं आलापं कुर्वाणाः ।

496 विवर्तते—अध्यासस्याधिष्ठानं भवति । स्वस्वरूपादप्रच्युतं सत् स्वरूपविपरीतेन अमत्येनानेकाकारेण अवभासते ।

497 विशिष्याभिधानम्—अतिशयितत्वेन वचनम् ।

498 विशेषः—विशेषणम् । (इतरस्माद् व्यावर्तनौपयिको धर्मः) ।

499 विशेषभावः—भूयस्त्वम् । अधिकता ।

500 विशेष्यम्—विशेषितुमर्हं धर्मिस्वरूपम् ।

501 विश्वजनीनम्—सर्वजनविदितम् ।

502 विसंवादः—विरुद्धो वाग्व्यवहारः ।

503 विहारः—शरीरप्रेरणम् ।

504 विहित-प्रतिषिद्धे—विधि-निषेधौ (भावे क्तप्रत्ययः) ।

505 वीर्यम्—त्रिवृत्करणजनिता अण्डोत्पादनशक्तिः । (2-1-1)

506 वृक्षः—वृक्षवत् वासार्हः छेदनार्हश्च देहः ।

507 वृत्तिः—व्यापारः ।

508 वृत्तौजाः—प्रवृत्तसङ्कल्पज्ञानरूपतेजाः ।

509 वृश्चिकः—गोमयवृश्चिकाख्यः कीटविशेषः ।

510 वेदना—दुःखानुभवः ।

511 वेदनास्कन्धः—प्रियाप्रियानुभयानुभवजन्यसुखदुःखोपेक्षात्मकः चित्तस्यावस्थाविशेषः ।

512 वेदान्तन्यायः—अधिगतवेदार्थस्य संशयादिनिरासकः शारीरकशास्त्रोत्थो न्यायः ।

513 वेदारण्यकम्—वेदाश्च आरण्यकानि च ।

514 वैदिकत्वम् (अर्थे)—युक्तिबाधागोचरत्वम् ।

515 वैभाषिकः—बौद्धप्रभेदः ।

516 वैलक्षण्यम्—विरुद्धः स्वभावः ।

517 वैशेष्यम्—विशेषभावः । अधिकतयाऽवस्थानम् ।

518 वैश्वरूप्यम्—विचित्रसन्निवेशं तनुभुवनादि कृत्स्नं जगत् ।

519 **वैषम्यम्**—पक्षपातः ।

520 **व्यतिषङ्गः**—मिथः संसर्गः ।

521 **व्यजनम्**—तालवृन्तम् ।

522 **व्यतिकरः**—साङ्कर्यम् ।

523 **व्यतिरेकः**—भेदः । पृथक्त्वम् ।

524 **व्यभवत्**—वैभवं प्रापत् ।

525 **व्यवस्थितिः**—असङ्करौपयिकनिष्कृष्टाकारप्रदर्शनम् ।

526 **व्यवहारयोग्यता**—अर्थक्रियाकारित्वम् ।

527 **व्यष्टिसृष्टिः**—ब्रह्माण्डसृष्ट्युत्तरकालिकी सृष्टिः ।

528 **व्याघातः**—स्वोक्तविरोधादिः ।

529 **व्यापारः**—चलनम् । स्पन्दः ।

530 **व्यावर्तमानत्वम्**—उत्तरोत्तरप्रतीतिविषयेष्वविद्यमानता (गोत्वस्य अश्वादौ) ।

531 **व्यावृत्तिः**—(अनभिमतस्यार्थस्य) स्वोक्तपदानभिधेयत्वज्ञापनम् ।

532 **व्यूहः**—वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धाख्यः (भगवदाविर्भावभेदः) ।

533 **शरीरम्**—I भोगसाधनसामान्यम् ।

II यदिच्छाधीनस्वरूपस्थितिप्रवृत्तिमत् यत्, तत् तस्य शरीरम् ।

III भोगस्य यद्वस्त्ववच्छेदः प्रयोजकः तद्वस्तु (पू) ।

IV भोगायतनम् ।

V कर्मफलरूपसुख-दुःखभोगसाधनभूतेन्द्रियाश्रयः पञ्चवृत्तिप्राणाधीनधारणः पृथिव्यादिभूतसङ्घातविशेषः (पू) ।

VI यत् यदेकनियाम्यं यदेकधार्यं यस्यैव शेषभूतं, तत् तस्य शरीरम् (पू) । यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं, तच्छेषतैकस्वरूपं च, तत् तस्य शरीरम् (सि) ।

534 **शाक्याः**—शकः अभिधानमस्य शाक्यः—बुद्धमुनिः ; तस्येमे शाक्याः । सौगताः बौद्धाः ।

535 **शाश्वतिकः**—एकरूपः, अविकारः, सदातनः ।

536 **शासनम्**—प्रवर्तनम् ।

537 **शासनातिवृत्तिः**—आज्ञोल्लङ्घनम् ।

538 **शासनानुवृत्तिः**—आज्ञानुवर्तनम् ।

539 **शास्त्रम्**—शास्ति इति । अनादिनिधनाविच्छिन्नपाठसम्प्रदायानाघ्रातप्रमादादिदोष-वेदाख्याक्षरराशिः ।

540 **शास्त्रमर्यादा**—शास्त्रनिर्णीता अनुलङ्घ्या रीतिः ।

541 **शिष्टाः**—I परिशिष्टाः ।

II 'न पाणि-पादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य लक्षणम् ॥'

III नित्यमात्मगुणान्विताः ॥

542 **शिष्यः**—गुरुणा शासितुम् उपदेष्टुं योग्यः ।

,, 'वाङ्मनः कायवसुभिर्गुरुशुश्रूषणे रतः ।
एतादृशगुणोपेतः शिष्यो भवति नारद ॥'

,, 'देवताचार्यशुश्रूषुर्मनोवाक्कायकर्मभिः ।
शुद्धभावो महोत्साहो बोद्धा शिष्य इति स्मृतः ॥'

543 **शीर्षण्याः प्राणाः**—नेत्रद्वय-श्रोत्रद्वय-घ्राणद्वयानि वाक् च ।

544 **शुद्धविद्या**—शुद्धा ज्ञप्तिः ।

545 **शुश्रूषुः**—तत्त्वज्ञानार्थे श्रवणे प्रवृत्तः । उपासिसिषुः ।

546 **शून्यम्**—सर्वाभावः ।

547 **शून्यात्मकत्वम्**—जगतो निःस्वभावतालक्षणं बौद्धाभ्युपगतम् ।

548 **शेषतैकस्वरूपम्**—शेष्यतिशयाधानार्थैकस्वरूपम् । अशेषत्वानर्हम् ।

549 **श्रद्धा**—I सम्प्रत्ययः, विश्वासः ।

II शास्त्रार्थे दृढः प्रत्ययः ।

III चेतसः प्रसादः ।

IV मनोवृत्तिविशेषः ।

V त्वरा ।

550 **श्रवणम्**—शब्दजन्या प्रमितिः ।

551 **श्रुतिः**—I श्रवणम् ।

II वेदाख्या अपौरुषेयी वाक् ।

552 **श्रेयः**—सांसारिकफलसाधनम् (2–2–42) ।

553 **षोडशकः**—षोडशसंख्यापरिमितः प्रकृतिविकाररूपः तत्त्वगणः ।

554 **सङ्कोचः**—(कार्यावस्थस्य) कारणावस्थान्वयः ।

,, (शास्त्रार्थस्य) एकदेशबाधः ।

555 **सततविक्रिया (प्रकृतिः)**—सर्वदा परिणामिनी । (सर्गे विषमपरिणामा, प्रलये समपरिणामा) ।

556 **सत्कार्यवादः**—'पूर्वं सदेव कार्यात्मना अभिव्यज्यते' इति, सांख्यानां, 'अवस्थान्तरमापद्यते' इति विशिष्टाद्वैतिनां च वादः ।

557 **सत्यम्**—I प्रमाणत उपलभ्यते ।

II अबाधितार्थकम् ।

III अर्धाङ्गीकारः ।

558 **सत्त्वम्**—व्यवहारयोग्यता ।

559 **सत्त्वधर्मः (जगतः)**—नाम-रूपे ।

560 **सदातनत्वम्**—सार्वकालिकत्वम् ।

561 **सनातनः**—अव्यक्तशरीरकत्वेऽपि स्वयमप्रच्युतस्वभावः ।

562 **सन्ततिः**—समन्तात् ततिः, विभुत्वम् । सर्वदेशसम्बन्धित्वम् ।

,, सम्यक् ततिः, विकारः ।

563 **सप्त धातवः**—रक्तासृङ्मांसमेदोऽस्थिमज्जाशुक्लानि ।

564 **समनन्तरप्रत्ययः**—अनन्तरपूर्वक्षणप्रत्ययः ।

565 **समवधानम्**—सामीप्यम् ।

566 **समवहितम्**—समन्वितम् ।

,, समवधानवत् ।

567 **समवायिकारणम्**—I यत्समवेतं कार्यमुत्पद्यते तत् ।

II उपादानं कारणम् ।

568 **समष्टिजीवः**—अण्डान्तर्गतवस्तूनां स्रष्टा चतुर्मुखः ।

569 **समष्टिसृष्टिः**—ब्रह्माण्डसृष्टिप्राक्कालिकी प्राक्तनी सृष्टिः ।

570 **समाधिः**—I इन्द्रियनिरोधः ।

II विविक्तत्वख्यातिः ।

III आक्षेपपरिहारः ।

571 **समानकर्तृत्वम्**—एककर्तृनिर्वाह्यत्वम् ।

572 **समितिः**—I सम्यक् इतिः । जन्तुहिंसापरिहाराय सम्यगादित्यप्रकाशिते प्रहते पथि-गमनम् ।

II मितभाषण-भोजनादि च । नियताहारनिषेवणादिकम् ।

573 **समुच्चयः**—श्रुतनैरपेक्ष्यबाधः ।

574 **सम्यङ्न्यायः**—प्रमाणानुगुणो न्यायः ।

575 **सर्ग-प्रतिसर्गौ**—सृष्टि-प्रलयौ ।

576 **सर्वगतत्वम्**—विभुत्वम् । सर्वव्यापित्वम् ।

577 **सर्वात्मत्वम्**—सर्वभावः ।

578 **सर्वात्मना**—यावद्द्रव्यभावितया ।

579 **सशरीरब्रह्मकारणवादः**—परिगृहीतशरीरमेव ब्रह्म जगतःकारणं भवतीति वादः ।

580 **सहयोगलक्षणा तृतीया**—सहार्थकशब्दयोगनिमित्ता 'सहयुक्तेऽप्रधाने' इति सूत्रोक्ता तृतीया ।

581 **सहस्रांशः**—सहस्रान्तर्गतः एकोंऽशः ।

582 **संख्या**— I बुद्धिः ।

II विषयः ।

583 **संज्ञामूर्तिक्लृप्तिः**—नामरूपव्याकरणम् ।

584 **संज्ञास्कन्धः**—सविकल्पकः प्रत्ययः ।

585 **संनिधानम्**—सामीप्यम् ।

586 **संनिधिः**—मिथोऽन्वय्यर्थकतया प्रयुक्तानां पदानामविलम्बितोच्चारणम् ।

587 **संप्रतिपन्नः**—उभयवादिसंमतः ।

588 **संविभन्त्सा**—सम्बन्धुमिच्छा ।

589 **संभावना**—उत्कटैककोटिकः संशयः ।

590 **संभावनीयम्**—शङ्कनीयम् ।

591 **संरंभः**—अभिनिवेशः ।

592 **संवरः**—I मोक्षसाधनभूतं गुप्तिसमित्यादिकम् । (संवृणोति इन्द्रियप्रवृत्तिमिति) (जै.द.)

,, II इन्द्रियनिरोधः ।

593 **संशब्दनम्**—विविच्य शब्दतो बोधनम् ।

594 **संसारः**—अचिद्भिः सह आत्मानमेकीकृत्य प्रवृत्तिः । पौनःपुन्येन देवादिविविध-स्थितिप्राप्तिः । जन्म-जरा-मरणाद्यविच्छेदः ।

595 **संस्कारस्कन्धः**—राग-द्वेषादिः ।

596 **संस्थानम्**—असाधारण आकारः ।

597 **संहतिः**—I मेलनम् ।

II वृन्दम् ।

598 **साक्षी**—साक्षाद् द्रष्टा । विवादविषयोर्थः यस्मै प्रदर्श्यते सः ।

,, स्वरूपेणाऽनुसन्धाता (सां. द.) ।

599 **सागरः**—समूहः । निधानभूतः ।

600 **सात्त्वतविधिः**—पञ्चरात्रम् ।

601 **साधकतमत्वम्**—अतिशयेन साधकत्वम् ।

602 **साधनम्**—साध्यार्थसाधको हेतुः ।

603 **साधनकल्पनाः**—साधनानुष्ठानानि ।

604 **साधीयः**—अङ्गीकार्यतमम् ।

605 **साध्यविकलता**—साध्यस्यार्थस्य साध्यतावच्छेदकरूपेण दृष्टान्ते अभावः ।

606 **सामग्री**—आवश्यकयावत्कारणकलापसम्पत्तिः ।

607 **सामानाधिकरण्यम्**—पदगतं समानविभक्तिकत्वम् । भिन्नप्रवृत्तिनिमित्तानां शब्दाना-मेकस्मिन् अर्थे वृत्तिः । प्रवृत्तिनिमित्तद्वयान्वय्येकविशेष्यार्थकपदद्वयत्वम् ।

608 **सलक्षणम्**—समानजातीयम् ।

609 **सालक्षण्यम्**—वस्तुनो वस्त्वन्तराद् व्यावृत्तिहेतुभूतस्याकारस्यानुवृत्तिः (पू.) ।

610 **सालभञ्जिका**—दार्वादिमयी पुत्तलिका ।

611 **सावकाशत्वम्** (शास्त्रे)—विषयान्तरलाभः अप्रमाणकोटिनिवेशो वा ।

612 **सांख्यम्**—तत्त्वसंख्यानप्राधान्येन प्रवृत्तं कापिलं दर्शनम् ।

613 **सांख्य-योगौ**—सांख्यं च योगश्च । ज्ञानयोग-कर्मयोगौ ।

614 **सांख्यस्मृतिः**—कापिलं तन्त्रम् ।

615 **सांसारिकप्रवृत्तयः**—बन्धदशाभाविनो व्यापाराः ।

616 **सिद्धिः**—I अभीप्सितार्थनिर्वृत्तिः ।

II स्थितिः ।

III उपलब्धिः ।

617 **सुखम्**—अनुकूलत्वप्रतिसन्धानविषयज्ञानावस्थाविशेषः ।

618 **सुबालोपनिषत्**—वाजसनेयशाखान्तर्गता तन्नाम्नी उपनिषत् ।

619 **सुषुप्तिः**—देहिनो जीवस्य निद्राख्योऽवस्थाविशेषः । उपरतेन्द्रियव्यापारता ।

620 **सूक्ष्मम्** केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परं ब्रह्म ।

,, इन्द्रियाग्राह्यं, केवलमनुमेयम् ।

621 **सूत्रम्**—'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।

अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥'

622 **सौत्रान्तिकः**—बौद्धप्रभेदः ।

623 **स्तम्बः**—तृणम् ।

624 **स्थविष्ठः**—स्थौल्यातिशयवान् ।

625 **स्थावराः**—अगमाः प्राणवन्तः वृक्ष-गुल्माद्याः ।

626 **स्थितिः**—I गतिनिरोधः ।

II उत्पन्नस्य कालान्तरानुवृत्तिः ।

III आधेयता ।

627 **स्थूलम्**—I इन्द्रियग्रहणार्हम् ।

II अणुत्वप्रतिद्वन्द्विपरिमाणवत् ।

628 **स्पन्दः**—I चलनात्मको व्यापारः ।

II अन्यथाभावः ।

629 **स्मृतिः**—I श्रुत्यविरुद्धाचारव्यवहारप्रायश्चित्ताद्यवगमोपयोगी आप्तैः ऋषिभिःप्रणीतो निबन्धः । धर्मशास्त्रम् ।

II संस्कारमात्रप्रभवं ज्ञानम् ।

630 **स्मृत्युपबृंहणम्**—स्मृतिकृतं साहाय्यम् ।

631 **स्वतःसिद्धः**—स्वरूपप्रयोज्यः । स्वाभाविकः । अनौपाधिकः ।

632 **स्वधा**—I स्वकीया शक्तिः ।

II पित्रुद्दोशियका आहुतिः ।

633 **स्वप्नार्थकल्पाः**—बहिरविद्यमानाः ।

634 **स्वभावविभागः**—स्वभावपार्थक्यम् ।

635 **स्वयम्भूः**—अनन्याधीनसत्ताकः । परमकारणभूतो नारायणः ।

636 **स्वरूपपरिणामः**—स्वरूपान्यथाभावः ।

637 **स्वरूपम्**—I वस्तु ।

II स्वाभाविकः आकारः ।

638 **स्वरूपानुबन्धि**—स्वरूपायत्तम्, अनागन्तुकम् ।

639 **स्वरूपोच्छित्तिः**—स्वरूपनाशः ।

640 **स्वशक्तिः**—स्वीयं कर्म ।

641 **स्वस्तिकम्**—सौवर्णं मङ्गलद्रव्यम् । स्वस्ति- क्षेमं कायतीति ।

642 **स्वातन्त्र्यम्**—यथासङ्कल्पमनुष्ठानम् ।

643 **स्वार्थः**—स्वशक्यार्थः ।

644 **स्वाहा**—देवताप्रीत्युद्देश्यकमन्नम् ।

645 **हितम्**—अपवर्गसाधनम् । पुरुषार्थावाप्त्युपायः ।

646 **हिरण्यगर्भः**—योगशास्त्रप्रथमप्रवक्ता । स्रष्टा चतुर्मुखः ।

647 **हृदयायतनम्**—देहान्तर्वर्ति हृदयसंज्ञं जीव-परयोः स्थानम् ।

648 **ह्रस्वम्**—अणुकम् ।

649 **हेयम्**—अपुरुषार्थतया त्याज्यम् ।

650 **हेम**—सुवर्णम् ।

651 **होमः**—जुहोतिचोदनाचोदितः त्यागपूर्वकः अग्नौ प्रक्षेपः ।

652 **हौत्रम्**—होतृसंज्ञेन ऋत्विजा अनुष्ठेयं कर्म ।

653 **हंसः**—ज्ञानप्रदः भगवदाविर्भावविशेषः ॥

श्रीभाष्यगा इमे शब्दा अर्थेन सह योजिताः ।
द्वितीयाध्यायपूर्त्यन्ता अध्येत्रक्लेशसिद्धये ॥

क्रतुनाथार्यवंश्येन रामभद्रविपश्चिता ।
श्रीहरिः प्रीयतां तेन विद्यारूपी जनार्दनः ॥

—o—

सिद्धान्तोक्तयः

क्रमसंख्या | पृ. सं.

1 यद्यपि वेदान्तवाक्यानाम्, अतिक्रान्तप्रत्यक्षादिसकलेतरप्रमाणसम्भवनाभूमिभूतार्थप्रतिपादनपरत्वात्, तदर्थवैशद्याय अल्पश्रुतानां प्रतिपत्तॄणां, तदुपबृंहणमपेक्षितम्। तथापि, तदर्थानुसारिणीनाम् आप्ततमप्रणीतानां बह्वीनां स्मृतीनां तदुपबृंहणाय प्रवृत्तानाम्, अनवकाशत्वं मा प्रसाङ्क्षीदिति, श्रुतिविरुद्धार्था कपिलस्मृतिः उपेक्षणीया ॥ (2–1–1) 7

2 अब्रह्मात्मकप्रधानकारणवादात्, निमित्तकारणमात्रेश्वराभ्युपगमात्, ध्येयैकनिरूपणीयस्य ध्यानात्मकस्य योगस्य ध्येयभूतयोः आत्मेश्वरयोः, ब्रह्मात्मकत्वजगदुपादानतादि सर्वकल्याणगुणात्मकत्वविरहेण अवैदिकत्वात्, वक्तुर्हिरण्यगर्भस्याऽपि क्षेत्रज्ञभूतस्य कदाचिद्रजस्तमोऽभिभवसम्भवाच्च, योगस्मृतिरपि तत्प्रणीतरजस्तमोमूलपुराणवत् भ्रान्तिमूलेति, न तया वेदान्तोपबृंहणं न्याय्यम् ॥ (2–1–3) 11

3 एतदुक्तं भवति—चिदचिद्वस्तुशरीरतया तदात्मभूतस्य परस्य ब्रह्मणः, सङ्कोचविकासात्मककार्य-कारणभावावस्थाद्वयान्वयेऽपि न कश्चिद्विरोधः। यतः सङ्कोच-विकासौ परब्रह्मशरीरभूतचिदचिद्वस्तुगतौ। शरीरगताश्च दोषाः न आत्मनि प्रसज्यन्ते; आत्मगताश्च गुणाः न शरीरे। यथा देवमनुष्यादीनां सशरीराणां क्षेत्रज्ञानां, शरीरगताः बालत्व-युवत्व-स्थविरत्वादयः, न आत्मनि सम्बध्यन्ते, आत्मगताश्च ज्ञान-सुखादयः न शरीरे॥ (2–1–9) 23

4 सर्वे एव हि वेदान्ताः, स्थूलस्य सूक्ष्मस्य चेतनस्याचेतनस्य समस्तस्य च, परमात्मानं प्रति शरीरत्वं श्रावयन्ति ॥ (2–1–9) 24

5 लोके हि! 'शरीर'शब्दः, घटादिशब्दवत् एकाकारद्रव्यनियतवृत्तिम् अनासादितः, क्रिमि-कीट-पतङ्ग-सर्प-नर-पशुप्रभृतिषु अत्यन्तविलक्षणाकारेषु द्रव्येषु अगौणः प्रयुज्यमानो दृश्यते। तेन तस्य प्रवृत्तिनिमित्तव्यवस्थापनं, सर्वप्रयोगानुगुण्येनैव कार्यम् ॥ (2–1–9) 25

6 अतः—यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं, तच्छेषतैकस्वरूपं च, तत् तस्य शरीरम्—इति शरीरलक्षणमास्थेयम्।

क्रमसंख्या पृ. सं.

........सर्वं परमपुरुषेण सर्वात्मना स्वार्थे नियाम्यं धार्यं तच्छेषतैकस्वरूपमिति सर्वं चेतनाचेतनं, तस्य शरीरम् ॥ (2–1–9) 26

7. अतः अतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणम् । तदुपबृंहणायैव तर्क उपादेयः । 2–1–12) ॥ 29

8 अपहतपाप्मनस्तु परमात्मनः, स्थूल-सूक्ष्मरूपकृत्स्नजगच्छरीरत्वेऽपि, कर्मसम्बन्धगन्धो नाऽस्तीति, नतराम् अपुरुषार्थगन्धप्रसङ्गः । यथा लोके राजशासनानुवर्तिनां तदतिवर्तिनां च राजानुग्रह-निग्रहकृतसुखदुःखयोगेऽपि, न शरीरित्वमात्रेण शासके राज्यपि शासनानुवृत्त्यतिवृत्तिनिमित्तसुख-दुःखयोः भोक्तृत्वप्रसङ्गः ॥ (2–1–14) 34

9 अत्रेदं तत्त्वम्—चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्मैव, सर्वदा सर्वशब्दाभिधेयम् । तत् कदाचित् स्वस्मात् स्वशरीरतयाऽपि पृथग्व्यपदेशानर्हसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरम् । तत् कारणावस्थं ब्रह्म । कदाचिच्च विभक्तनामरूपव्यवहारार्हस्थूलदशापन्नचिदचिद्वस्तुशरीरम् । तच्च कार्यावस्थमिति, कारणात् परस्माद् ब्रह्मणः कार्यरूपं जगत् अनन्यत् ॥ शरीरभूतचिदचिद्वस्तुनः शरीरिणो ब्रह्मणश्च कारणावस्थायां कार्यावस्थायां च, श्रुतिशतसिद्धया स्वभावव्यवस्थया गुण दोषव्यवस्था ॥ (2–1–15) 72

10 सर्वा हि ! श्रुतयः सस्मृतीतिहासपुराणाः सर्वेश्वरं सदैव सर्वज्ञं सर्वशक्ति सत्यसङ्कल्पं निरवद्यं देशकालानवच्छिन्नानवधिकातिशयानन्दं परमकारणं ब्रह्म प्रतिपादयन्ति ॥ न पुनः ईश्वरादपि परम् ईश्वरांशि सन्मात्रम् ॥ (2–1–15) ॥ 73

11 यथा च वायुरेक एव शरीरे वृत्तिविशेषं भजमानः, प्राणापानादिनामरूपकार्यान्तराणि भजते ; तद्वत् ब्रह्मैकमेव विचित्रस्थिरत्रसरूपं जगद् भवतीति, परमकारणात् परस्माद्ब्रह्मणोऽनन्यत्वं जगतः सिद्धम् (2–1–20) ॥ 82

12 आध्यात्मिकादिदुःखयोगार्हात्प्रत्यगात्मनः अर्थान्तरभूतं ब्रह्म । 'य आत्मनि तिष्ठन्' इत्यादिभिः प्रत्यगात्मनो हि भेदेन निर्दिश्यते परं ब्रह्म । (2-1-22) ॥ 84

क्रमसंख्या — पृ. सं.

13 अश्मकाष्ठलोष्ठतृणादीनामत्यन्तहेयानां सततविकारास्पदानाम् अचिद्विशेषाणाम् निरवद्यनिर्विकारनिखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणज्ञानानन्दैकस्वरूपनानाविधानन्तमहाविभूतिब्रह्मस्वरूपैक्यं यथा नोपपद्यते ; तथा चेतनस्याऽपि अनन्तदु:खयोगार्हस्य खद्योतकल्पस्य, अपहतपाप्मेत्यादिवाक्यावगतसकलहेयप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरब्रह्मभावानुपपत्तिः ॥ (2-1-13) 85

14 यथा देवादयः स्वे स्वे लोके सङ्कल्पमात्रेण स्वापेक्षितानि सृजन्ति ; तथा असौ पुरुषोत्तमः कृत्स्नं जगत् सङ्कल्पमात्रेण सृजति ॥ (2-1-25) 91

15 यथा अग्निजलादीनाम् अन्योन्यदृष्टविसजातीयानाम् औष्ण्यादिशक्तयश्च अन्योन्यदृष्टविसजातीयाः दृश्यन्ते ; तद्वत् लोकदृष्टविसजातीये परे ब्रह्मणि तत्र तत्रादृष्टाः सहस्रशः शक्तयः सन्तीति, न किंचिदनुपपन्नम् ॥ (2-1-28) 94

16 सामान्यतोदृष्टं चोद्यं सर्ववस्तुविलक्षणे परे ब्रह्मणि नावतरतीत्यर्थः । (2-1-28) ॥ 95

17 सकलेतरवस्तुविसजातीया परा देवता सर्वशक्त्युपेता च । तथैव परां देवतां दर्शयन्ति हि श्रुतयः—'पराऽस्य शक्तिः' इत्यादि । (2-1-30) ॥ 97

18 शब्दैकप्रमाणकं सकलेतरविलक्षणं (ब्रह्म) तत्तत्करणविरहेणाऽपि तत्तत्कार्यसमर्थम् । (2-1-31) ॥ 98

19 अवाप्तसमस्तकामस्य परिपूर्णस्य (परस्य ब्रह्मणः) स्वसङ्कल्पविकार्यविविधविचित्रचिदचिन्मिश्रजगत्सर्गे लीलैव केवला प्रयोजनम् । यथा लोके सप्तद्वीप मेव मेदिनीमधितिष्ठतः सम्पूर्णशौर्यवीर्यपराक्रमस्याऽपि महाराजस्य केवललीलैकप्रयोजनाः कन्दुकाद्यारम्भा दृश्यन्ते ; तथैव परस्याऽपि ब्रह्मणः स्वसङ्कल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादेः लीलैव प्रयोजनमिति सर्वं निरवद्यम् । (2-1-33) ॥ 100

20 सृज्यमानदेवादिक्षेत्रज्ञकर्मसापेक्षत्वात् विषमसृष्टेः, देवतिर्यङ्मनुष्यस्थावरात्मना उत्कृष्टमध्यमापकृष्टसृष्ट्या पक्षपातः (वैषम्यं), अतिघोरदु:खयोगकरणात् नैर्घृण्यं च न (परस्य ब्रह्मणः) प्रसज्येयाताम् । (2-1-34) ॥ 101

क्रम संख्या — पृ. सं

21 अतः-सर्वविलक्षणत्वात्, सर्वशक्तित्वात्, लीलैकप्रयोजनत्वात्, क्षेत्रज्ञकर्मानुगुण्येन विचित्रसृष्टियोगात्, प्रधानपरमाण्वादीनां कारणत्वे यद्धर्मवैकल्यमुक्तं वक्ष्यमाणं च तस्य सर्वस्य धर्मजातस्य कारणत्वोपपादिनः ब्रह्मण्युपपत्तेश्च ब्रह्मैव जगत्कारणमिति स्थितम्। (2–1–35, 36) ॥ 102, 103

22 न प्रधानं विचित्रजगद्रचनासमर्थम्; अचेतनत्वे सति तत्स्वभावाभिज्ञानधिष्ठितत्वात्, यथा रथ-प्रासादादिनिर्माणे केवलदार्वादिकम्। अचेतनस्य दार्वादेः तज्ज्ञानधिष्ठितस्य कार्यारम्भानुपपत्तेर्दर्शनात्, तज्ज्ञाधिष्ठितस्य कार्यारम्भप्रवृत्तेर्दर्शनाच्च, न प्राज्ञानधिष्ठितं प्रधानं कारणम्। (2–2–1) 110

23 यतः सत्त्वादयः द्रव्यधर्माः; न तु द्रव्यस्वरूपम्। सत्त्वादयो हि पृथिव्यादिद्रव्यगतलघुत्व-प्रकाशादिहेतुभूताः तत्स्वभावविशेषा एव; न तु मृद्धिरण्यादिवत् द्रव्यतया कार्यान्विता उपलभ्यन्ते। गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः। (2-2-1) ॥ 110, 111

24 अनभिज्ञो भवान् पुण्यपापस्वरूपयोः, पुण्य-पापस्वरूपे हि शास्त्रैकसमधिगम्ये। शास्त्रं च अनादिनिधनाविच्छिन्नपाठसम्प्रदायानाघ्रातप्रमादादिदोषगन्धवेदाख्याक्षरराशिः। तच्च—पुण्यापुण्ये परमपुरुषाराधन-तद्विपर्ययरूपे कर्मणी। तदनुग्रहनिग्रहायत्ते च तत्फले सुखदुःखे – इति वदति ॥ (2–2–2) 114

25 स च भगवान् पुरुषोत्तमः, अवाप्तसमस्तकामः, सर्वज्ञः सर्वेश्वरः सत्यसङ्कल्पः, स्वमाहात्म्यानुगुणलीलाप्रवृत्तः, 'एतानि कर्माणि समीचीनानि, एतान्यसमीचीनानी'ति कर्मद्वैविध्यं संनिधाय, तदुपादानोचितदेहेन्द्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदिश्य, स्वशासनावबोधि शास्त्रं च प्रदर्श्य, तदुपसंहारार्थम् अन्तरात्मतया अनुप्रविश्य, अनुमन्तृतया च नियच्छंस्तिष्ठति ॥ (2–2–2) 115

26 क्षेत्रज्ञास्तु-तदाहितशक्तयः तत्प्रदिष्टकरणकलेवरादिकाः तदाधाराश्च स्वयमेव स्वेच्छानुगुण्येन पुण्यपापरूपे कर्मणी उपाददते। ततश्च पुण्यरूपकर्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयते। शासनातिवर्तिनं च तद्विपर्ययैर्योजयति। अतःस्वातन्त्र्यादिवैकल्यचोद्यानि न अवकाशं लभन्ते। (2–2–3) ॥ 116

क्रमसंख्या | पृ. सं.

27 दया हि नाम, स्वार्थनिरपेक्षा परदुःखासहिष्णुता । स च स्वशासनातिवर्तिन्यपि वर्तमाना, न गुणायाऽवकल्पते ; प्रत्युत अपुंस्त्वमेवाऽऽवहति । (अतः) तन्निग्रह एव तत्र गुणः ; अन्यथा शत्रुनिग्रहादीनाम् अगुणत्वप्रसङ्गात् । स्वशासनातिवृत्तिव्यवसायनिवृत्तिमात्रेण अनाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण (तस्य) निरतिशयसुखसंवृद्धये (भगवान्) स्वयमेव प्रयतते । अतः प्राज्ञानधिष्ठितं प्रधानं न जगत्कारणम् । (2–2–3) ॥ 116

28 धेन्वाद्युपयुक्तं तृणोदकादिकं प्राज्ञ एव क्षीरीकरोति ; न स्वयमेव परिणमते । (2-2-4) 117

29 अतः जगदुत्पत्तेः अणुगतकर्मपूर्वकत्वाभावः ॥ (2-2-11) 129

30 न हि अन्येनोपक्रान्तम् अजानद्भिरन्यैः समापयितुं शक्यम् ॥ (2-2-24) 145

31 न खलु धर्मिणि विनष्टे, तद्धर्मस्य अर्थान्तरे सङ्क्रमणं दृष्टम् ॥ (2-2-25) 146

32 इष्टप्राप्तिः अनिष्टनिवृत्तिर्वा प्रयत्नादिभिः साध्यते । (2-2-26) 147

33 अतः वेदविरुद्धतत्त्वोपासनानुष्ठानाभिधानात्, पशुपतिमतमनादरणीयमेव ॥ (2-2-35) 163

34 वासुदेवाख्यं परं ब्रह्मैव सम्पूर्णषाड्गुण्यवपुः, आश्रितवत्सलं स्वाश्रितसमाश्रयणीयत्वाय स्वेच्छया सूक्ष्म-व्यूह-विभवभेद-भिन्नं, चतुर्धा अवतिष्ठते । तद्धि यथाधिकारं भक्तैः ज्ञानपूर्वेण कर्मणा अभ्यर्चितं सम्यक् प्राप्यते । विभवार्चनाद्व्यूहं प्राप्य व्यूहार्चनात् परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यते । विभवो हि नाम—राम-कृष्णादिप्रादुर्भावगणः । व्यूहः-वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धरूपः चतुर्व्यूहः । सूक्ष्मं तु—केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परंब्रह्म । अतः सङ्कर्षणादीनामपि, परस्यैव ब्रह्मणः स्वेच्छाविग्रहरूपत्वात्, 'अजायमानो बहुधा विजायते' इति श्रुतिसिद्धस्यैव आश्रितवात्सल्यनिमित्तस्वेच्छाविग्रहसङ्ग्रहरूपजन्मनः ('वासुदेवात् सङ्कर्षणो नाम जीवो जायते' इत्यादिना) अभिधानात्, तदभिधायिशास्त्रप्रामाण्यस्य अप्रतिषेधः ॥ (2-2-41) 168

क्रमसंख्या पृ. सं.

35 तत्र जीवमनोऽहङ्कारतत्त्वानामधिष्ठातारः सङ्कर्षणप्रद्युम्नानिरुद्धा इति, तेषामेव जीवादिशब्दैरभिधानम् अविरुद्धम् ; यथा आकाश-प्राणादिशब्दैः ब्रह्मणोऽभिधानम् ॥ (2-2-41) 158, 169

36 अतः, स भगवान् वेदैकवेद्यः परब्रह्माभिधानो वासुदेवः, निखिलहेयप्रत्यनीक-कल्याणैकतानानन्तज्ञानानन्दाद्यपरिमितोदारगुणसागरः, सत्यसङ्कल्पः, चातुर्वर्ण्य-चातुराश्रम्यव्यवस्थया अवस्थितान् धर्मार्थकाममोक्षाख्यपुरुषार्थाभि-मुखान् भक्तानवलोक्य, अपारकारुण्यसौशील्य-वात्सल्यौदार्यमहोदधिः, स्वस्वरूप स्वविभूति-स्वाराधन-तत्फलयाथात्म्यावबोधिनो वेदान् ऋग्यजुः-सामाथर्वभेदभिन्नान् अपरिमितशाखान् विध्यर्थवादमन्त्ररूपान्, स्वेतर-सकलसुर-नरदुरवगाहांश्च अवधार्य, तदर्थयाथात्म्यावबोधि पाञ्चरात्रशास्त्रं स्वयमेव निरमिमीतेति सर्वं निरवद्यम् ॥ (2-2-42) 172, 173

37 पौरुषेणाणां तन्त्राणां परस्परविरुद्धवस्तुवादितया, अपौरुषेयत्वेन निरस्तप्रमादादि-निखिलदोषगन्धवेदवेद्यवस्तुविरुद्धाभिधायित्वाच्च, यथावस्थितवस्तुनि प्रामाण्यं दुर्लभम्। वेदवेद्यश्च परब्रह्मभूतो नारायणः। अतः तत्तत्तन्त्राभिहित-प्रधानपुरुषपशुपतिप्रभृतितत्त्वस्य वेदान्तवेद्यपरब्रह्मभूतनारायणात्मकतयैव वस्तुत्वमभ्युपगमनीयम्। सर्वस्य ब्रह्मात्मकतामनुसन्दधानस्य, तत्तत्तन्त्राभि-हितानां तत्त्वानां नारायण एव निष्ठेति प्रतीयते ॥ अतः वेदान्तवेद्यः परब्रह्म-भूतो नारायणः स्वयमेव पाञ्चरात्रस्य कृत्स्नस्य वक्तेति, तत्स्वरूप-तदुपास-नाभिधायि तत्तन्त्रमिति च, तस्मिन् इतरतन्त्रसामान्यं न केनचिदुद्भावयितुं शक्यम् ॥ 176

38 परेण ब्रह्मणा नारायणेन-सांख्योक्तानि पञ्चविंशतितत्त्वानि, योगोक्तो यम-नियमाद्यात्मको योगः, वेदोदितकर्मस्वरूपाण्यङ्गीकृत्य तत्त्वानां ब्रह्मात्मकत्वम्, योगस्य ब्रह्मोपासनप्रकारत्वम्, कर्मणां तदाराधनरूपता (च) स्वयमेव पञ्चरात्रे विशदीकृतम् ॥ 177

39 उत्पत्त्यसम्भवः सतः-परमकारणस्य परस्यैव ब्रह्मणः। तद्व्यतिरिक्तस्य अव्यक्त-महदहङ्कारतन्मात्रेन्द्रियवियत्पवनादिकस्य प्रपञ्चस्य, एकविज्ञानेन

क्रम संख्या | पृ. सं.

सर्वविज्ञानप्रतिज्ञादिभिः अवगतकार्यभावस्य, अनुत्पत्तिर्नोपपद्यते (अतः) ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य ब्रह्मकार्यत्वमुक्तम् ॥ (2–3–9, 10) 186

40 समस्तवस्तुप्रकारिणो ब्रह्मणः, प्रकारभूतवस्तुग्राहिप्रत्यक्षादिप्रमाणाविषयत्वात्, वेदान्तश्रवणात् प्राक् प्रकार्यप्रतीतेः, प्रकारिप्रतीतिभावभावित्वाच्च तत्पर्यवसानस्य, लोके तत्तद्वस्तुमात्रे वाच्येकदेशे ते ते शब्दाः भङ्क्त्वा भङ्क्त्वा व्यपदिश्यन्ते । अथवा तेजःप्रभृतिभिः शब्दैः, तत्तद्वस्तुमात्रवाचितया व्युत्पन्नैः ब्रह्मणो व्यपदेशः अमुख्यः स्यात् !—इत्याशङ्क्य,

चराचरवाचिशब्दः, ब्रह्मणि मुख्य एव ; सर्वशब्दानां वाचकभावस्य ब्रह्मभावभावित्वात् । नामरूपव्याकरणश्रुत्या हि तथाऽवगतम् ॥ (2–3–17) 193, 194

41 कार्यत्वं हि नाम एकस्य द्रव्यस्य अवस्थान्तरापत्तिः । तत् जीवस्याप्यस्त्येव । इयांस्तु विशेषः—वियदादेरचेतनस्य यादृशोऽन्यथाभावः, न तादृशो जीवस्य । जीवस्य अन्यथाभावः, ज्ञानसङ्कोच-विकासलक्षणः । वियदादेस्तु स्वरूपान्यथाभावलक्षणः । सेयं स्वरूपान्यथाभावलक्षणा उत्पत्तिः, जीवे प्रतिषिध्यते ॥ (2–3–18) 197

42 कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः, प्रकारद्वये (चेतनाचेतनयोः) प्रकारिणि च (परमात्मनि च) समानः ॥ (2–3–18) 198

43 जीवस्य उत्पत्तिमरणवादिन्यः श्रुतयः ज्ञानसङ्कोच-विकासकरतत्तद्देहसम्बन्ध-वियोगाभिप्रायाः । (तस्य) उत्पत्तिप्रतिषेधवादिन्यः नित्यत्ववादिन्यश्च श्रुतयः-अचिदंशवत् स्वरूपान्यथात्वाभावाभिप्रायकाः । परविषयाः श्रुतयः (परस्य ब्रह्मणः) स्वरूपान्यथात्व-ज्ञानसङ्कोचविकासरूपोभयविधानिष्टविकाराभावाभिप्रायाः ॥ 199

44 एवं सर्वदा चिदचिद्वस्तुविशिष्टस्य ब्रह्मणः, सृष्टेः प्राक् एकत्वावधारणं, नामरूपविभागाभावात् उपपद्यते । (एवं) नामरूपविभागभावाभावाभ्यां (श्रुतिः) नानात्वैकत्वे वदति ॥ (2–3–18) 199

क्रमसंख्या पृ. सं.

स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरं ब्रह्म, कार्यका-रणोभयावस्थावस्थितमपि, सर्वदा निरस्तनिखिलदोषगन्धं, सत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरम् अवतिष्ठते। अपुरुषार्थाः स्वरूपान्यथाभावाश्च प्रकारभूतचिदचिद्वस्तुगताः— इति सर्वं समञ्जसम् ॥ (2-3-18) 197-200

(बालाग्रे'त्यादिना) अणुसदृशं वस्तु उद्धृत्य तन्मानत्वं जीवस्य श्रूयते। अतः अणुरेवाऽयमात्मा ॥ यथा हरिचन्दनबिन्दुः देहैकदेशवर्त्यपि सकलदेहव्यापिनमाह्लादं जनयति ; तद्वत्, आत्माऽपि देहैकदेशवर्ती, सकलदेह-(देश)व्यापिनीं(वर्तिनीं) वेदनामनुभवति ॥ (2-3-23, 24) 206-207

यथा एकदेशवर्तिनां मपि-द्युमणिप्रभृतीनामालोकः, अनेकदेशव्यापी दृश्यते ; तद्वत् हृदयस्थस्याऽऽत्मनो ज्ञानं सकलदेहं व्याप्य वर्तते। ज्ञातुः प्रभास्थानीयस्य ज्ञानस्य स्वाश्रयादन्यत्र वृत्तिः, मणिप्रभावदुपपद्यते ॥

यथा पृथिव्या गुणत्वेनोपलभ्यमानस्य गन्धस्य ततः (पृथिवीतः) व्यतिरेकः (भेदः), तथा 'जानामि' इति ज्ञातुर्गुणत्वेन प्रतीयमानस्य ज्ञानस्य आत्मनो व्यतिरेकः सिद्धः । (2-3-26, 27) ॥ 208-209

आत्मनः विज्ञानगुणसारत्वात्, विज्ञानस्य यावदात्मभावित्वात्, आत्मनोऽपि ज्ञानवत् स्वप्रकाशत्वेन च 'विज्ञानम्' इति व्यपदेशो न दोषः ।
(2-3-29, 30) 210-211

बाल्यावस्थायां सतोऽप्यनभिव्यक्तस्य पुंस्त्वाद्यसाधारणस्य धातोः, युवत्वे अभिव्यक्तौ पुंसः तद्वत्ता (पुरुषधातुमत्ता) यथा न कादाचित्की भवति ; (तथा) अस्य ज्ञानस्य, सुषुप्त्यादिष्वपि (जीवे) विद्यमानस्य, जागर्यादिषु अभिव्यक्तेः सम्भवात्, स्वरूपानुबन्धिधर्मत्वोपपत्तिः । विद्यमानस्य तस्य विषयगोचरत्वं जागर्यादावुपलभ्यते । अतः ज्ञातृत्वमेव जीवात्मनः स्वरूपम् । स चायमात्मा अणुपरिमाणः । (2-3-31) ॥ 212-213

शासनाच्च शास्त्रम् । शासनं च प्रवर्तनम् । शास्त्रस्य च प्रवर्तकत्वं बोधजननद्वारेण । अचेतनं च प्रधानं न बोधयितुं शक्यम् । शास्त्राणि हि

क्रमसंख्या पृ. सं.

स्वर्गमोक्षादिफलस्य भोक्तारमेव कर्तृत्वे नियुङ्क्ते । अतः शास्त्राणामर्थवत्त्वं, भोक्तुश्चेतनस्यैव कर्तृत्वे भवेत् । (2-3-33) ॥ 216-217

वागादिकरणसम्पन्नोऽप्यात्मा, यदा इच्छति, तदा करोति ; यदा तु नेच्छति, तदा न करोति । यथा तक्षा वास्यादिकरणसंनिधानेऽपि, इच्छानुगुण्येन करोति न करोति च । (2-3-39) 220

अस्य जीवस्य कर्तृत्वं परमात्मन एव हेतोर्भवति । सर्वासु क्रियासु पुरुषेण कृतं प्रयत्नमपेक्ष्य, अन्तर्यामी परमात्मा, तदनुमतिदानेन प्रवर्तयति, परमात्मानुमतिमन्तरेण अस्य प्रवृत्तिः नोपपद्यते ॥

यस्तु अतिमात्रपरमपुरुषानुकूल्ये व्यवसितः प्रवर्तते, तमनुगृह्णन् भगवान् स्वयमेव स्वप्राप्त्युपायेषु कल्याणेषु कर्मस्वेव रुचिं जनयति । यश्च अतिमात्रप्रातिकूल्ये व्यवसितः प्रवर्तते तं निगृह्णन् स्वप्राप्तिविरोधिषु अधोगतिसाधनेषु कर्मसु रुचिं जनयति । (2-3-40, 41) 221-223

'अयं जीवः ब्रह्मांशः' इत्यभिधीयते ; [अस्य जीवस्य ब्रह्मणः सकाशात्] नानात्वेन एकत्वेन च [श्रुतिषु] व्यपदेशात् । स्रष्टृत्व-सृज्यत्व, नियन्तृत्व-नियाम्यत्व, सर्वज्ञत्वाऽज्ञत्व, स्वाधीनत्व-पराधीनत्व, शुद्धत्वाऽशुद्धत्व, कल्याणगुणाकरत्व-तद्विपरीतत्व, पतित्व-शेषत्वादिभिः नानात्वव्यपदेशः ; 'तत्त्वमसि' 'अयमात्मा ब्रह्म' इति अभेदेन व्यपदेशः । एवम् उभयव्यपदेशमुख्यत्वसिद्धये, 'जीवोऽयं ब्रह्मणोंऽशः' इत्यभ्युपगन्तव्यः । (2-3-41) ॥ 228-229

एवं नित्यानामात्मनां बहुत्वे प्रामाणिके सति, ज्ञानस्वरूपत्वेन सर्वेषामेकरूपत्वेऽपि भेदकाकारः आत्मयाथात्म्यवेदनक्षमैरेव अवगम्यते । (2-3-43)॥ 231

यथा अग्न्यादित्यादेः भास्वतः, भारूपः प्रकाशः अंशो भवति ; यथा च गवाश्वशुक्लकृष्णादीनां गोत्वादिविशिष्टानां वस्तूनां, गोत्वादीनि विशेषणानि अंशाः ; यथा वा देहिनो देवमनुष्यादेः, देहः अंशः तद्वत् जीवः परमात्मनोंऽशः ॥ एकवस्त्वेकदेशत्वं हि अंशत्वम् । एवं विशेषणविशेष्ययोः जीव-परयोः अंशांशित्वं स्वभावभेदश्च उपपद्यते । यथैव हि

क्र.सं. पृ.सं

प्रभाया: प्रभावान् अन्यथाभूत: ; तथा प्रभास्थानीयात् स्वांशाज्जीवात् अंशी परोऽपि अर्थान्तरभूत: ॥

एवं जीव परयो: विशेषण-विशेष्यत्वकृतं स्वभाववैलक्षण्यमाश्रित्य, भेदनिर्देशा: प्रवर्तन्ते। अभेदनिर्देशास्तु, पृथक्सिद्ध्यनर्हविशेषणानां विशेष्यपर्यन्तत्व-माश्रित्य मुख्यत्वेनोपपद्यन्ते ॥ 'तत् त्वमसि' 'अयमात्मा ब्रह्म' इत्यादिषु तच्छब्दब्रह्मशब्दवत्, 'त्वम्, अयमात्मा' इति शब्दा अपि ; जीवशरीरक-ब्रह्मवाचकत्वेन एकार्थाभिधायित्वात् ॥ (2-3-45) 233, 234

एवं ब्रह्मणोंऽशत्वे, ब्रह्मप्रवर्त्यत्वे, ज्ञत्वे च सर्वेषां (जीवानां) समाने, एकरूपत्वे सर्वेषां सत्यपि, ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादिरूपशुच्यशुचिदेहसम्बन्ध-निबन्धनौ, केषांचित् वेदाध्ययनतदर्थानुष्ठानाद्यनुज्ञा, केषांचित् तत्परिहार:, केषांचित् दर्शन-स्पर्शनाद्यनुज्ञा, केषांचित् तत्परिहारश्च उपपद्येते। यथा अग्ने: अग्नित्वेनैकरूपत्वेऽपि, श्रोत्रियागारात् अग्निराहियते, श्मशानादेस्तु परिह्रियते ; यथा च अन्नादि श्रोत्रियादेरनुज्ञायते, अभिशस्तादेस्तु परिह्रियते [तद्वत्] ॥ (2-3-47) 234

ब्रह्मांशत्वादिना एकरूपत्वे सत्यपि, जीवानामन्योन्यभेदात्, अणुत्वेन प्रतिशरीरं भिन्नत्वाच्च, भोगव्यतिकरोऽपि न भवति ॥ (2-3-48) 234

इन्द्रियाणि न सप्तैव ; अपि तु एकादश। शरीरे स्थिते जीवे हस्तादीनामपि तस्य भोगोपकरणत्वात, कार्यभेदाच्च। दृश्यते हि श्रोत्रादीनामिव हस्तादीनामपि कार्यभेद: आदानादि:। अत: तेऽपि सन्त्येव॥ अध्यवसायाभि-मानचिन्तावृत्तिभेदात् मन एव बुद्ध्यहङ्कारचित्तशब्दै: व्यपदिश्यत इति, इन्द्रियाण्येकादशैव ॥ अधिकसङ्ख्यावादा:, मनोवृत्तिभेदाभिप्राया:। न्यूनव्यपदेशास्तु तत्र तत्र, विवक्षितगमनादिकार्यविशेषप्रयुक्ता: ॥ (2-4-5) 246

श्रेष्ठ: प्राण:, न वायुमात्रम् ; न च वायुक्रियाऽपि भवति। (श्रुतौ) प्राण इति वायुरिति च पृथगुपदेशात्। अवस्थान्तरमापन्नो वायुरेव प्राण: ; न तेज: प्रभृतिवत् द्रव्यान्तरम् ॥ (2-4-8) 250-251

प्राणापानव्यानोदानसमानाकारेण पञ्चधाऽवस्थित: अयं प्राण:, शरीरेन्द्रिय-धारणादिना जीवस्योपकरोतीति, (अस्य) चक्षुरादिवत् करणत्वम् ॥ (2-4-11) 253

क्रमसंख्या पृ. सं.

यथा कामादिवृत्तिभेदे तत्कार्यभेदेऽपि, न कामादिकं मनसस्तत्त्वान्तरम् ; एवम् अपानादयोऽपि प्राणस्यैव वृत्तिविशेषाः ; न तत्त्वान्तरम् ॥ (2-4-11) 254

(श्रेष्ठः प्राणोऽयम्) अणुः ; उत्क्रान्त्यादिश्रवणात् । 'सम एभिस्त्रिभिर्लोकैः' (महापरिमाणत्वश्रवणं तु) सर्वस्य प्राणिजातस्य प्राणायत्तस्थितित्वेन वैभववादः ॥ (2-4-12) 255

जीवेन सह अग्न्यादिदेवतानां प्राणविषयमधिष्ठानं, परमात्मनः सङ्कल्पादेव भवति ; साभिमानिदेवतानामिन्द्रियाणां जीवात्मनश्च स्वकार्येषु परमपुरुषायत्तत्वशास्त्रात् ॥ (2-4-13) 256

सर्वेषां परमात्माधिष्ठितत्वस्य नित्यत्वात्—स्वरूपानुबन्धित्वेन नियतत्वाच्च, एषामधिष्ठातृत्वं तत्सङ्कल्पादेव अवर्जनीयम् ॥ (2-4-14) 258

श्रेष्ठप्राणव्यतिरिक्ता एव प्राणाः इन्द्रियाणि ; श्रेष्ठादन्येष्वेव प्राणेषु समनस्केषु चक्षुरादिषु इन्द्रियशब्दव्यपदेशात् ॥ (2-4-15) 259

श्रेष्ठप्राणस्य चक्षुरादिभ्यो वैलक्षण्यं चोपलभ्यते । सुषुप्तौ हि प्राणस्य वृत्तिरुपलभ्यते ; चक्षुरादीनां तु वृत्तिः नोपलभ्यते । समनस्कानां चक्षुर्वागादीनां कार्यं च ज्ञानकर्मसाधनम् । प्राणस्य तु शरीरेन्द्रियधारणम् । प्राणाधीनधारणत्वात्तु इन्द्रियेषु प्राणशब्दव्यपदेशः ॥ (2-4-16) 260

त्रिवृत्करणं परस्यैव ब्रह्मणः । तत्समानकर्तृकं नाम-रूपव्याकरणं च तस्यैव । जीवसमष्टिभूतहिरण्यगर्भशरीरकस्य परस्यैव ब्रह्मणः कर्म, नामरूपव्याकरणम् ॥ (2-4-17) 264

—o—

॥ श्रीभाष्यतृतीयसम्पुटस्थानि नामानि ॥

I ग्रन्थपराणि नामानि

श्रुतिः
स्मृतिः
पुराणम्
इतिहासः
कपिलस्मृतिः
सांख्यस्मृतिः
योगस्मृतिः
मन्वादिस्मृतयः
वेदान्ताः
भगवद्गीता
महाभारतम्
वाजसनेयकम्
काण्वशाखा
माध्यन्दिनशाखा
अन्तर्यामिब्राह्मणम्
सुबालोपनिषत्
नारायणानुवाकः
वेदाख्यं शास्त्रम्
कपिलादितन्त्राणि
पञ्चरात्रतन्त्रम्
वेदबाह्यतन्त्राणि
पौष्करसंहिता
सात्वतसंहिता
परमसंहिता
भूमविद्या
वाकोवाक्यम्
ऋग्यजुःसामाथर्वाणो वेदाः
भारतसंहिता शतसहस्रिका
मोक्षधर्मः ज्ञानकाण्डम्
भीष्मपर्व
सात्वतं शास्त्रम्
शारीरकम्
वेदारण्यकम्
छान्दोग्यं सृष्टिप्रकरणम्
तैत्तिरीयकाथर्वणादि
छान्दोग्यश्रुतिः
प्रजापतिवाक्यम्
अध्यात्मशास्त्राणि

II उदाहृतग्रन्थकर्तृनामानि

जैमिनिः
मनुः
व्यासः
पराशरः
आपस्तम्बः
दक्षः
बादरायणः
वाल्मीकिः
पाणिनिः
ईश्वरकृष्णः
द्रमिडाचार्यः
कणादः
शिवः
नारायणः
पशुपतिः
आर्हताः

—o—

एतत्सम्पुटोपयुक्तसंकेताक्षरविवरणी

संकेताक्षराणि	सङ्केतिताः ग्रन्थाः	ग्रन्थकर्तारः
पू. मी. सू.	पूर्वमीमांसासूत्राणि	जैमिनिः
श्वे. उ.	श्वेताश्वतरोपनिषत्	—
म. स्मृ.	मनुस्मृतिः	मनुः
भ. गी.	भगवद्गीता	व्यासः
म. भा. शां.	महाभारते शान्तिपर्व	,,
वि. पु.	विष्णुपुराणम्	पराशरः
आप. ध.	आपस्तम्बधर्मसूत्रम्	आपस्तम्बः
द. स्मृ.	दक्षस्मृतिः	दक्षः
तै. सं.	तैत्तिरीयसंहिता	—
तै. उ. आन.	तैत्तिरीयोपनिषत् आनन्दवल्ली	—
कौषी. उ.	कौषीतक्युपनिषत्	—
मुण्ड. उ.	मुण्डकोपनिषत्	—
तै. ब्रा.	तैत्तिरीयं ब्राह्मणम्	—
छां. उ.	छान्दोग्योपनिषत्	—
ऐत. उ.	ऐतरेयोपनिषत्	—
कठ. उ.	कठोपनिषत्	—
ब्र. सू.	ब्रह्मसूत्राणि	बादरायणः
बृ. उ.	बृहदारण्यकोपनिषत्	—
बृ. उ. मा. पा.	बृहदारण्यकोपनिषदि माध्यन्दिनपाठः	—
सुबा. उ.	सुबालोपनिषत्	—
वा. रा. यु.	वाल्मीकिरामायणे युद्धकाण्डम्	वाल्मीकिः
तै. आर.	तैत्तिरीयारण्यकम्	—

संकेताक्षराणि	सङ्केतिताः ग्रन्थाः	ग्रन्थकर्तारः
पा. सू.	पाणिनीयाष्टाध्यायीसूत्राणि	पाणिनिः
नृ. उ. ता. उ.	नृसिंहोत्तरतापनीयोपनिषत्	—
महो.	महोपनिषत्	—
तै. ना. उ.	तैत्तिरीयनारायणोपनिषत्	—
सां. का.	साङ्ख्यकारिका	ईश्वरकृष्णः
द्र. भा.	द्रमिडभाष्यम्	द्रमिडाचार्यः
वै. द.	वैशेषिकदर्शनम्	कणादः
जै. द.	जैनदर्शनम्	जैनाः
शैव. आ.	शैवागमः	शिवः
शै. आ.	शैवागमः	,,
पा. प. सं.	पाञ्चरात्रे परमसंहिता	नारायणः
पौ. सं.	पौष्करसंहिता	,,
सा. सं.	सात्वतसंहिता	,,
पां. सं.	पांचरात्रीया संहिता	,,
ऐत. ब्रा.	ऐतरेयं ब्राह्मणम्	—
म. भा. भी.	महाभारते भीष्मपर्व	व्यासः
तै. भृ.	तैत्तिरीया भृगुवल्ली	—
प्रश्न. उ.	प्रश्नोपनिषत्	—
तै. उ. भृ.	तैत्तिरीयोपनिषदि भृगुवल्ली	—
गर्भ. उ.	गर्भोपनिषत्	—
शत. ब्रा.	शतपथब्राह्मणम्	—
ऐत. आर. उ.	ऐतरेयारण्यकोपनिषत्	—

—o—

संकेताक्षराणि	सङ्केतिताः ग्रन्थाः	ग्रन्थकर्तारः
[भा. प्र.	भावप्रकाशिका	श्री रङ्गरामानुजमुनयः]
[भा. द.	भाष्यार्थदर्पणः	श्री उत्तमूरु वीरराघवाचार्याः]
[शा. शा. दी.	शारीरकशास्त्रार्थदीपिका	रङ्गरामानुजमुनयः]
श्रु. प्र.	श्रुतप्रकाशिका	सुदर्शनसूरयः
ब्र. प.	ब्रह्मसूत्रपद्यमालिका	श्री श्री अहोबलमठाधीश्वराः
पू. मी.	पूर्वमीमांसीयमधिकरणम्	जैमिनिः
सा. रा.	सारार्थरत्नप्रभा	श्री उत्तमूरु वीरराघवाचार्याः
प. पा.	पदयोजनापाठः	

—o—

श्रीभाष्यद्वितीयाध्यायोल्लिखितानि नामानि

नामानि	पृ. सं.
(1) ऋष्यादिनामानि ॥	
परमर्षिः कपिलः	4
मनुः	14
नारायणः	6
आपस्तम्बः	6
पितामहः	5
परमपुरुषः	7
कौन्तेयः	8
पराशरः	6
विष्णुः	6
बृहस्पतिः	9
हिरण्यगर्भः	11
ईश्वरः	11
क्षेत्रज्ञः	11
पतञ्जलिः	28
अहल्या	26
सौभरिः	57
शुकः	59
प्रह्लादः	,,
बामदेवः	,,
भगवान् (श्रीकृष्णः)	115
नारदः	171
सूत्रकारः (व्यासः)	173
शाण्डिल्यः	171
बादरायणः	174
अवान्तरतपाः (वेदाचार्यः)	175
द्रमिडाचार्यः	114
द्रमिडभाष्यकारः	34
पौराणिकाः	16
साङ्ख्यः	32
काण्वाः	202
कणभुक्	201
आथर्वणिकाः	229
अभिमानिन्यो देवताः	257
चतुर्मुखः	264
श्वेतकेतुः	269
वासुदेवः	166
सङ्कर्षणः	,,
प्रद्युम्नः	,,
अनिरुद्धः	,,
पशुपतिः	164
ऋषिः	242
(2) दार्शनिकनामानि	
काणादाः	
कापिलाः	
वैशेषिकाः	134
सौगताः	,,
वैभाषिकः	146
सौत्रान्तिकः	,,

नामानि	पृ. सं.
योगाचारा:	148
प्रच्छन्नबौद्धा:	150
माध्यमिक:	152
जैना:	154
कापाला:	160
कालामुखा:	,,
पाशुपता:	,,
शैवा:	,,
शाक्या:	28
औलूक्या:	,,
आक्षपादा:	,,
क्षपणका:	,,

(3) दर्शनपराणि नामानि ॥

नामानि	पृ. सं.
लोकायतम्	9
ब्रह्मकारणवाद:	23
प्रधानकारणवाद:	33
अब्रह्मात्मकप्रधानकारणवाद:	11
परमाणुकारणवाद:	30
सशरीरब्रह्मकारणवाद:	33
केवलब्रह्मकारणवाद:	,,
मायाविद्याविभागवाद:	35
काणादवाद:	64
सत्कार्यवाद:	68
असत्कार्यवाद:	,,
औपाधिकभेदवाद:	124
शून्यवाद:	152
ईश्वरानधिष्ठितपरमाणुकारणवाद:	158

नामानि	पृ. सं.
जीवोत्पत्तिवाद:	170
जीवाज्ञानवाद:	45
भ्रान्तब्रह्मजीववाद:	235
उपहितब्रह्मजीववाद:	,,
पारमार्थिकोपाध्युपहितब्रह्मजीववाद:	236
आत्मोत्पत्तिवाद:	242
इन्द्रियोत्पत्तिवाद:	,,
साङ्ख्यपक्ष:	30
कणभक्षपक्ष:	,,
आक्षपादपक्ष:	,,
भिक्षुपक्ष:	,,
वैदिक: पक्ष:	105
सर्वगतत्वपक्ष: (आत्मन:)	213
ज्ञानमात्रत्वपक्ष: (आत्मन:)	213
कापिलमतम्	106
काणादपक्ष:	133
क्षणिकत्वपक्ष:	138
सुगतमतम्	152
जैनपक्ष:	154
जैनमतम्	158
सप्तभङ्गीनय:	156
आर्हतमतम्	159
पशुपतिमतम्	160
भागवतप्रक्रिया	167
पाञ्चरात्रशास्त्रप्रक्रिया	174
वेदान्तन्याय:	173
सांख्यसमय:	223
निरन्वयविनाश:	140

नामानि	पृ. सं.
निरधिष्ठानभ्रमः	61
प्रवाहानादित्वम्	48
बीजाङ्कुरन्यायः	44

(4) तत्तद्दर्शनाभ्युगन्तृपराणि नामानि ॥

नामानि	पृ. सं.
अद्वैतवादिनः	45
ब्रह्माज्ञानवादिनः	52
जीवाज्ञानवादिनः	53
द्वैतवादी	,,
भेदवादिनः	64
असत्कार्यवादिनः	39
बाह्यार्थास्तित्ववादिनः	135
क्षणिकत्ववादिनः	141
विज्ञानमात्रास्तित्ववादी	148
सर्वशून्यवादी	152
भेदाभेदवादिनः	157
सर्वगतजीववादिनः	237
आत्मैकत्ववादिनः	,,

(5) अर्थानुसन्धानोपयोगीनि कानिचन पदानि ॥

नामानि	पृ. सं.
अभ्युदयः	3
परमनिःश्रेयसम्	4
बन्धः	
मोक्षः	
धर्मः	4
अग्निहोत्रम्	3
दर्शपूर्णमासौ	,,
ज्योतिष्टोमः	4
त्रिगुणम्	6
अव्यक्तम्	,,
पुरुषः	6
परंब्रह्म	7
परमपुरुषः	7
परमपुरुषाराधनम्	,,
पुरुषोत्तमः	
मानवः	115
पुरुषार्थाः	
अपुरुषार्थाः	
ऐहिकामुष्मिके	8
योगमहिमा	9
साक्षात्कृतपरावरतत्त्वयाथात्म्याः	,,
निखिलजगद्भेषजम्	,,
अंशांशित्वम्	233
शरीर-शरीरिभावः	21
शरीरात्मभावः	233
सङ्कोच विकासौ	
देव-मनुष्यादयः	
इच्छाविग्रहः	
स्वेच्छाविग्रहसङ्ग्रहः	
हृदयायतनम्	
धातुसाम्य-वैषम्ये	33
पुण्य-पापे	
कर्मबन्धः	
संसारदशा	

नामानि	पृ. सं.
मोक्षदशा	
परकायप्रवेशः	
राजशासनम्	34
शासनानुवृत्तिः	,,
शासनातिवृत्तिः	,,
राजानुग्रहः	
निग्रहानुग्रहौ	
जीवेश्वरौ	
बद्ध-मुक्तौ	
शिष्याचार्यौ	
ज्ञाज्ञौ	
बन्ध-मोक्षौ	
अन्तर्भावितशक्त्यविद्योपाधिकं ब्रह्म	35
कारणान्तर्गतशक्त्यविद्योपाध्युपहितं ब्रह्म	,,
अखण्डैकरसम्	
बन्ध-मोक्षव्यवस्था	53
बद्ध मुक्तव्यवस्था	52
अकृताभ्यागम-कृतविप्रणाशौ	47
तत्त्वज्ञानम्	
पुरुषार्थः	
निर्विशेषचिन्मात्रम्	59
सत्य-मिथ्यार्थव्यवस्था	61
निरधिष्ठानभ्रमः	,,
लोकव्यवहारः	,,
काश-कुशावलम्बनम्	76
लोकवेदौ	79
आध्यात्मिकम्	83
आधिभौतिकम्	,,

नामानि	पृ. सं.
आधिदैविकम्	83
अपवर्गः	107
प्रत्यक्षानुमानागमाः	,,
प्रतिसर्गावस्था	112
सर्गावस्था	,,
पङ्ग्वन्धवत् (अन्ध-पङ्गुन्यायः)	118
चातुरात्म्योपासनम्	168
विभव-व्यूह-सूक्ष्माणि	169
चातुर्वर्ण्य-चातुराश्रम्ये	172
धर्मार्थकाममोक्षाः	,,
विध्यर्थवादमन्त्राः	173
गृहस्थ-ब्रह्मचारि-वानप्रस्थ-भिक्षुकाः	,,
ज्ञानयोग-कर्मयोगौ	174
प्रधान पुरुषौ	176
पञ्चविंशतितत्त्वानि	177
यमनियमादिः योगः	,,
अविद्याशक्तिः	199
उपाधिशक्तिः	,,
भोग्य-भोक्तृ-नियन्तृशक्तयः	,,
षोडशकलाः	204
सत्त्वरजस्तमोगुणाः	217
अनुग्रह-निग्रहौ	222
नियाम्यनियामकभावः	230
अंशांशिभावः	233
ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः	234
श्रोत्रियागारः	,,
स्वरूपान्यथाभावः	197

नामानि	पृ. सं.	नामानि	पृ. सं.
ज्ञानसङ्कोच-विकासलक्षणान्यथाभावः	197	अचेतनव्यष्टिः	21
यावदात्मभावित्वम्	211	त्रिवृत्करणम्	264
जीवोपकरणानीन्द्रियाणि	240	जीवसमष्टिः	265
परमागतिः	245	ऊर्णनाभिः	
योगदशा	,,	माक्षिकम्	
महाप्रलयः	248	सालभञ्जिका	
प्रपञ्चव्यष्टिसृष्टिः	262	रुचकम्	42
समष्टिसृष्टिः		स्वस्तिकम्	42
नामरूपव्याकरणम्	262	कटक-मुकुटादि	36
समष्टिजीवः	,,		

—o—

अनुबन्धः—४

अकारादिसूचनी

१) अधिकरणानां
२) ब्रह्मसूत्राणां
३) ब्र. सू. मालिकायाः
४) शा. न्याय. संग्रहस्य
५) तत्त्वसारस्य
६) अधिकरणसारावल्याः
७) नयसङ्गतिमालिकायाः

अधिकरणानां अकारादिसूचनी

क्र.सं.	अधिकरणानि	प. सं.	क्र.सं.	अधिकरणानि	प सं.
1	अंशाधि	226–237	18	प्राणाणुत्वाधि	247–249
2	आत्माधि	195–200	19	प्राणोत्पत्त्यधि	239–243
3	आरम्भणाधि	37–82	20	भोक्त्रापत्त्यधि	32–36
4	इतरव्यपदेशाधि	83–88	21	महद्दीर्घाधि	125–133
5	इन्द्रियाधि	259–260	22	योगप्रत्युक्त्यधि	10–11
6	उत्पत्त्यसम्भवाधि	166–177	23	रचनानुपपत्त्यधि	105–124
7	उपलब्ध्यधि	148–151	24	वायुक्रियाधि	250–254
8	उपसंहारदर्शनाधि	89–91	25	वियदधि	179–186
9	एकस्मिन्नसम्भवाधि	154–159	26	विलक्षणत्वाधि	12–29
10	कर्त्रधि	215–220	27	शिष्टापरिग्रहाधि	30–31
11	कृत्स्नप्रसक्त्यधि	92–98	28	श्रेष्ठाणुत्वाधि	255
12	ज्ञाधि	201–214	29	संज्ञामूर्तिक्लृप्त्यधि	261–270
13	ज्योतिराद्यधि	256–258	30	सप्तगत्यधि	244–246
14	तेजोऽधि	187–194	31	समुदायाधि	134–147
15	परायत्ताधि	221–225	32	सर्वथानुपपत्त्यधि	152–153
16	पशुपत्त्यधि	160–165	33	स्मृत्यधि	1–9
17	प्रयोजनवत्त्वाधि	99–103			

—o—

ब्रह्मसूत्राणां अकारादिसूचनी

क्र.सं.	ब्र. सू.	पृ.सं.	क्र.सं.	ब्र. सू.	पृ. सं.
1	अंशो नाना	226	5	अणुश्च	255
2	अकरणत्वाच्च	252	6	अदृष्टाऽनियमात्	236
3	अङ्गित्वाऽनु	119	7	अधिकं तु	84
4	अणवश्च	247	8	अधिकाररूप	189

क सं.	ब्र. सू.	पृ. सं.	क्र.सं.	ब्र. सू.	पृ. सं.
9	अधिष्ठानानु	163	36	आभास (सा)	235
10	अनुज्ञा	234	37	इतरव्यप	83
11	अनुस्मृते	143	38	इतरेतर	136
12	अन्तरा विज्ञान	192	39	इतरेषां चानु	9
13	अन्तवत्त्व	165	40	उत्क्रान्तिगत्या	204
14	अन्त्याऽवस्थिते	159	41	उत्तरोत्पादे	138
15	अन्यत्राऽभाव	117	42	उत्पत्त्यसम्भवात्	166
16	अन्यथाऽनु	119	43	उदासीनाना	147
17	अन्यथानुमेय	29	44	उपलब्धि	219
18	अपरिग्रहाच्च	133	45	उपसंहार	89
19	अपि स्मर्यते	231	46	उपादानाद्	218
20	अपीतौ तद्वत्	19	47	उभयथा	141
21	अभिमानिव्यप	17	48	उभयथा च	132
22	अभिसन्ध्यादि	236	49	उभयथाऽपि	128
23	अभ्युपगमेऽप्य	120	50	एतेन मातरिश्वा	185
24	अवस्थिति	207	51	एतेन योगः	10
25	अविरोधश्चन्दन	207	52	एतेन शिष्टा	30
26	अश्मादिवच्च	85	53	एवं चात्मा	158
27	असति प्रतिज्ञो	139	54	करणवच्चेन्न	164
28	असदिति चेन्न	19	55	कर्ता शास्त्रार्थ	215
29	असद्व्यपदेशा	79	56	कृतप्रयत्ना	222
30	असन्तते	234	57	कृत्स्नप्रसक्ति	92
31	असम्भवस्तु	186	58	गुणाद्वा	208
32	अस्ति तु	181	59	गौण्यसम्भवात्	181
33	आकाशे च	141	60	,,	242
34	आत्मनि चैवं	94	61	चक्षुरादि	251
35	आपः	188	62	चराचर	193

क्र.सं.	ब्र. सू.	पृ.सं.	क्र.सं.	ब्र. सू.	पृ.सं.
63	ज्ञोऽत एव	201	90	नित्योपलब्ध्य	213
64	ज्योतिराद्य	256	91	नैकस्मिन्न	154
65	त इन्द्रियाणि	259	92	पञ्चवृत्ति	253
66	तत्पूर्वकत्वा	243	93	पटवच्च	81
67	तथा प्राणाः	239	94	पत्युरसामञ्ज	160
68	तदनन्यत्व	37	95	पयोऽम्बुव	112
69	तदभिध्यानात्	190	96	परात्तु	221
70	तद्गुणसार	210	97	पुंस्त्वादि	212
71	तर्काप्रतिष्ठा	28	98	पुरुषाश्म	118
72	तस्य च	258	99	पृथगुपदे	209
73	तेजोऽतस्तथा	187	100	पृथिवी	188
74	दृश्यते तु	18	101	प्रकाशादि	231
75	देवादिव	91	102	प्रतिज्ञाऽहानि	183
76	न कर्मावि	101	103	प्रतिसङ्ख्या	140
77	न च कर्तुः	167	104	प्रदेशभेदा	237
78	न च पर्याया	159	105	भावे चोप	77
79	न तु दृष्टान्त	23	106	भेदश्रुते	259
80	न प्रयोजन	99	107	भोक्त्रापत्ते	32
81	न भावोऽनुप	151	108	मन्त्रवर्णात्	230
82	न वायुक्रिये	250	109	महद्दीर्घ	125
83	न वियदश्रुतेः	179	110	मांसादिभौम	266
84	न विलक्षण	12	111	यथा च तक्षो	270
85	नाऽणुरत	205	112	यथा च प्राणादिः	82
86	नाऽत्मा श्रुतेः	195	113	यावदात्म	211
87	नाऽभाव	148	114	यावद्विकारम्	185
88	नाऽसतो	146	115	रचनाऽनुप	105
89	नित्यमेव	131	116	रूपादिमत्त्वा	131

क.सं.	ब्र. सू.	पृ.सं.	क.सं	ब्र. सू.	पृ.सं.
117	लोकवत्तु	100	134	सत्वाच्चा	78
118	विकरणत्वा	97	135	सप्तगते	244
119	विज्ञानादि	167	136	समवायाभ्यु	129
120	विपर्ययेण	161	137	समाध्यभाव	220
121	विप्रतिषेधाच्च	120	138	समुदाय	134
122	,,	170	139	सर्वथाऽनु	152
123	वैधर्म्याच्च	151	140	सर्वधर्मो	103
124	वैशेष्यात्तु	269	141	सर्वोपेता च	96
125	वैषम्यनैर्घृण्ये	100	142	स्मरन्ति च	233
126	व्यतिरेकानव	113	143	स्मृत्यनवकाश	1
127	व्यतिरेको	209	144	स्याच्चैकस्य	182
128	व्यपदेशाच्च	218	145	स्वपक्षदोषाच्च	27
129	शक्तिविपर्ययात्	219	146	,,	95
130	शब्देभ्यः	184	147	स्वशब्दोन्मा	206
131	श्रुतेस्तु	93	148	स्वात्मना	205
132	श्रेष्ठश्च	248	149	हस्तादयस्तु	245
133	संज्ञामूर्ति	261			

—o—

ब्रह्मसूत्रार्थपद्यमालिकायाः अकारादिसूचनी

क.सं.	ब्र. प. मा.	पृ. सं.	क.सं.	ब्र. प. मा.	पृ. सं.
1	अक्रियत्वा	252	6	अदृष्टजोपाधि	236
2	अच्छिद्रर्मा	94	7	अद्वयश्च	188
3	अणून्येवे	247	8	अनन्यत्वं तु	37
4	अणुत्वेऽप्यात्म	206	9	अनपेक्ष	113
5	अणुरात्मेति	206	10	अपरस्य तु	78

क्र.सं.	ब्र. प. मा.	पृ.सं.	क्र.सं.	ब्र. प. मा.	पृ.सं.
11	अभिमानि	17	38	कामादिवृत्ति	253
12	अभिसन्धेस्त्व	236	39	कार्यनिष्ठ	132
13	अयमात्मा तु	215	40	कार्योत्पत्तौ	138
14	अवस्थान्तर	159	41	कुण्डलादिषु	77
15	अवस्थितेस्तु	207	42	कुतर्कस्या	28
16	अविद्योपहितो	237	43	कृम्यादेर्मक्षिका	18
17	अशरीर	163	44	क्षीराम्बुनोर्दधि	112
18	अश्मादीनां	85	45	खादिवच्च	239
19	आत्मा तु	208	46	गत्यागत्योः	205
20	आत्मा नोत्पद्यते	195	47	चतुर्मुख	261
21	आत्मा महानिति	205	48	चरन्ति सप्त	244
22	आनन्तर्य	191	49	चराचराश्रयाः	193
23	आपश्च तेजसा	188	50	जगत्प्रतीति	141
24	आभासा	235	51	जानामीति	209
25	इतरेतर	136	52	जगद्विलक्षण	12
26	इतरेषां	9	53	जीवत्वव्यप	83
27	इन्द्रियाणा	218	54	जीवस्तु	226
28	उत्क्रान्ति	204	55	जीवस्त्वकरणं	164
29	उत्पत्ति	179	56	जीवाभावा	101
30	उत्पन्नस्य	141	57	जीवोत्पत्त्यादि	166
31	एकदेश	233	58	ज्ञानस्य चार्थ	151
32	एकस्मिन्नेव	154	59	ज्ञानस्वरूपो	201
33	ऐतदात्म्य	185	60	ज्ञानादन्य	148
34	करणत्वेऽपि	259	61	ज्योतिरादेस्तु	256
35	कर्तुर्जीवाच्च	167	62	तज्ज्ञानगुण	210
36	काणादस्य	133	63	तत्सृष्टिपूर्वक	243
37	कादाचित्कं	128	64	तथाऽमृत	185

क.सं.	ब्र. प. मा.	पृ.सं.	क.सं.	ब्र. प. मा.	पृ.सं.
65	तद्देहपरिमाण	158	92	प्रधानसाधने	120
66	तन्मात्रभूत	192	93	प्रधानस्या	1
67	तस्या एव तु	219	94	प्रधानानु	119
68	तस्याप्यदृष्ट	165	95	प्रबलात्तर्क	29
69	ता अन्नमसृजन्त	189	96	प्रलये सृष्टिकाले	19
70	तृणादिकं	117	97	प्राक्सृष्टे	242
71	तेजश्च वायोः	187	98	प्राणादिस्तु	82
72	त्रिवृत्कृतेषु	269	99	प्राणोऽनूत्क्रा	255
73	देवादयः	91	100	बहुस्यामिति	190
74	द्व्यणुकं परमाणु	125	101	,,	92
75	नन्वसत्कार्य	19	102	ब्रह्मणोऽखिल	32
76	न वैषम्यं	100	103	ब्रह्मांशत्वेऽपि	231
77	निमित्तमात्रं	10	104	,,	234
78	निरन्वयौ	140	105	भेदेनास्यैव	84
79	निरिन्द्रिय	97	106	मतं पाशुपते	160
80	निषेधविध्योः	222	107	ममैवांशो	231
81	पङ्गुरन्ध	118	108	मुक्तात्मपरि	159
82	परमात्मायत्त	221	109	मोक्षसाधन	220
83	परात्माधिष्ठित	258	110	यतमान	147
84	पाञ्चरात्रेऽपि	170	111	रूपादिमत्त्व	131
85	पादोऽस्य विश्वा	230	112	लोके तु	100
86	पूर्वापर	120	113	वाय्ववस्था	251
87	पृथगुत्पत्ति	250	114	वास्यादि	220
88	प्रकृतेश्चैव	219	115	विचित्रसर्व	96
89	प्रतिज्ञाया	183	116	विज्ञातुर्न	209
90	प्रतिदेहं च	234	117	विज्ञानं यज्ञ	218
91	प्रधानपरमाण्वा	103	118	विनष्टेषु	146

क्र.सं.	ब्र. प. मा.	पृ.सं.	क्र.सं.	ब्र. प. मा.	पृ. सं.
119	विभुत्वे चात्म	213	135	सम्बन्धस्य	131
120	वेदापरिग्रहाः	30	136	सम्भूतशब्दस्य	182
121	व्यतिषङ्ग	81	137	सर्वदात्म	211
122	व्यपदेशादस	79	138	सर्वशून्यत्व	152
123	व्यवस्थिता	23	139	सर्वहेतोः	186
124	शब्दमात्रेण	93	140	सर्वेषां	134
125	श्रुते तु मांस	266	141	सुषुप्तौ	212
126	श्रुत्या चात्मन	181	142	सृष्टेः प्रयोजन	99
127	श्रेष्ठश्चोत्पद्यते	248	143	सृष्ट्याद्यनुप	105
128	स एवायं	143	144	स्थिते जीवे	245
129	सङ्कर्षणादिका	167	145	स्यात्सम्भूति	181
130	सत्त्वादीनां	119	146	स्वपक्षे दोषः	27
131	सदेव सोम्यैत	184	147	स्वपक्षे हि	95
132	समनस्के	259	148	स्वप्नादिव	151
133	समर्थेऽपि	89	149	हेतावसति	139
134	समवायाभ्युप	129			

—o—

शारीरकन्यायकलापसंग्रहश्लोकानां अकारादिसूचनी

क्र.सं.	शारीरक. सं	पृ.सं.	क्र.सं.	शारीरक. सं	पृ.सं.
1	अण्डबहि	390	7	कपिलकण	327
2	आकार एक	314	8	कपिलस्मृते	397
3	ईशश्च कर्ता	305	9	कर्तृनायाः	372
4	उत्पत्तिमन्तो	335	10	कर्तृत्वमेतस्य	350
5	उत्पत्त्या	390	11	कामानां समवा	294
6	एतेषां	390	12	कार्यता वियदा	372

क्र.सं.	शारीरक. सं.	पृ.सं.	क्र.सं.	शारीरक. सं	पृ. सं.
13	कार्याणि सर्वाणि	339	31	बुद्ध्याकारा	385
14	जीवः परस्मात्तु	327	32	ब्रह्म स्यात्	292
15	जीवब्रह्मैकत्वात्	297	33	ब्रह्मेति वेदान्त	278
16	जीवस्य ब्रह्म	288	34	भेदान्न जीवो	357
17	तच्छायवाक्यै	298	35	भोक्तृत्वं स्या	284
18	तस्मात् षष्ठं	298	36	यत्कारणं	290
19	तानि तु विभूनि	378	37	यद्यत्कार्यं	280
20	तोयेन जीवान्	393	38	लोकैः त्रिभिः	382
21	द्वाभ्यां स्मृत्यवि	298	39	वाक्यात्	380
22	न हि जननं	374	40	वागाद्यधिष्ठानं	383
23	नान्यं गुणेत्या	387	41	विज्ञानशब्दात्	344
24	नामादिसृष्टिस्तु	387	42	वेदाद्दता	300
25	नित्योत्पत्ति	316	43	सङ्करणूनां	310
26	पत्युः पशूनां	323	44	सप्त तु यदेति	376
27	प्रथमश्च द्वितीय	373	45	सर्वं च सत्त्वादि	320
28	प्रथमे प्रसक्त	390	46	स्मृतिन्याया	333
29	प्राणस्वरूप	390	47	स्मृतेर्विरोधात्	273
30	प्राणाभिधानात्	385			

—o—

तत्त्वसारश्लोकानां अकारादिसूचनी

क्र सं.	तत्त्वसारः	पृ. सं.	क्र.सं.	तत्त्वसारः	पृ. सं.
1	अधिष्ठाने	365	5	आदौ भेदश्रुती	358
2	अधीत्वं वेद्यत्वे	363	6	इदं मायावादे	365
3	अहंत्वज्ञातृत्वे	366	7	क्व वेदान्ताः	367
4	आदावीश्वर	351	8	चिन्मात्रव्यतिरेकि	361

क्र.सं.	तत्त्वसारः	पृ. सं.	क्र.सं.	तत्त्वसारः	पृ. सं.
9	जीवन्मुक्तिमतं	366	16	पुरोवर्ति	364
10	तथा हि प्रत्यक्ष	363	17	प्रकाशः कुम्भादौ	364
11	दुष्कर्मण्यव	352	18	मिथ्यात्वं भ्रान्ति	360
12	दुष्कर्मस्वनि	351	19	यच्छ्वेताश्वतर	359
13	दृश्यत्वादनृतं	360	20	रे रे खण्डनकार	362
14	न द्वैतं प्रति	358	21	सामानाधिकरण्य	359
15	नानात्वक्षणिकत्व	361	22	स्वरूपानादित्व	362

—o—

अधिकरणसारावलीश्लोकानां अकारादिसूचनी

क्र.सं.	अधिकरणसारावली	पृ.सं.	क्र.सं.	अधिकरणसारावली	पृ.सं.
1	अंशत्वं राम	368	15	एकद्व्यादि	312
2	अक्षाणां जन्म	391	16	एको यस्यास्ति	284
3	अक्षाद्युत्पत्त्य	374	17	कर्ता देवः	356
4	अख्यातिस्त्वन्य	319	18	कर्ता नह्यन्य	352
5	अग्न्यादावण्ड	389	19	कर्तृत्वं स्यात्	355
6	अग्रे सत्तामृषी	375	20	कल्प्योपादान	305
7	अव्यक्तादीन्	301	21	कल्प्यो बौद्धेति	312
8	अष्टावत्रापि	375	22	कार्यं किञ्चित्	302
9	आत्मार्थं विश्व	295	23	कार्यं धर्मे	286
10	ईक्षा तादृग्बहु	281	24	काले दुःखोप	353
11	उक्तं नित्योप	371	25	किञ्च स्वोक्त्या	348
12	उक्तः प्राणः	382	26	कूटस्थात्	339
13	उक्तेऽनन्यत्व	289	27	कृत्स्नं कार्यात्म	292
14	उत्क्रान्तिस्पन्द	346	28	क्लृप्तिर्व्योमादि	373

क सं.	अधिकरणसारावली	पृ.सं.
29	कैश्चिज्ज्ञानत्व	344
30	क्षेत्रज्ञानां	356
31	जातावाचार्य	332
32	जीवस्योत्पत्ति	3:9
33	जीवादत्यन्त	367
34	जीवोऽत्रानाद्य	330
35	ज्ञातृत्वं ज्ञान	345
36	ज्ञातृत्वं पुंस	348
37	तत्त्वादृक्तर्क	273
38	तन्त्रच्छाया	275
39	तर्कैरापात	392
40	तेजः प्राथम्य	337
41	दुर्वारा मोह	311
42	दृश्यन्ते सङ्गृ	326
43	दृष्टन्यायेन	296
44	दृष्टस्याणोः	306
45	दृष्टाम्मिन् वेद	328
46	देहं देहाति	342
47	देहव्याप्येक	377
48	देहात्मत्वे	342
49	दोषः स्यान्नि	354
50	द्रव्यं सर्वं हि	341
51	द्वाभ्यां स्मृत्या	276
52	धर्मस्थे त्वेव	345
53	न ग्राह्यग्राहकौ	314
54	नन्वत्राचेतना	303
55	नादृष्टं किञ्चि	083

क.सं	अधिकरणसारावली	पृ.सं.
56	नित्यं सम्बन्ध	308
57	नित्यत्वं व्योम्नि	391
58	निर्णीतं कर्म	275
59	निर्धूते सूत्र	309
60	निष्ठा सर्वेषु	325
61	पादद्वन्द्वं	274
62	पादेऽस्मिन्	334
63	पुंसा भोगा	304
64	पूर्वत्राविक्रिया	336
65	प्रत्यङ्ङात्मा	355
66	प्राक् पश्चात्	318
67	प्रागेवारम्भ	306
68	प्राजापत्ये हि	324
69	प्राणः प्रागुक्त	381
70	प्राणोऽपि स्याद्	386
71	प्रामाण्यं	328
72	बाधाभावा	300
73	बाह्योक्ताचार	310
74	बुद्धोऽसौ	311
75	बुद्धैक्यं	315
76	बोधेष्वाकार	313
77	भोक्तॄणां	384
78	मन्वाद्यैः	387
79	मायोदन्व	369
80	मायोपाधि	287
81	मिथ्याज्ञानादि	371
82	मेरोरंशः	370

क्र.सं.	अधिकरणसारावली	पृ.सं.	क्र.सं.	अधिकरणसारावली	पृ.सं.
83	या जीवेना	388	100	संवादादक्ष	283
84	यौक्तः सत्कार्य	337	101	सच्चासच्च	321
85	योगाः साङ्ख्य	333	102	सच्छब्दार्था	341
86	विश्रान्तिर्न	307	103	सत्त्वाद्यान्	303
87	विश्वं त्रैगुण्य	280	104	सत्त्वेऽसत्त्वे	317
88	विश्वं दुःखैक	295	105	सन्मात्रं ब्रह्म	370
89	विश्वारम्भे	287	106	सप्त प्राणाश्च	377
90	वृद्धिह्रासौ	322	107	सर्वं साङ्ख्यास्तु	335
91	वेदानां मानतो	329	108	सर्वं जानाति	323
92	वेदान् पूर्वं	279	109	सर्वेष्वानन्त्य	379
93	व्यापारज्ञान	349	110	साङ्ख्यस्मृत्या	299
94	व्योमैकं स्याद्	368	111	साङ्ख्या वैशेषिका	330
95	शक्तौ कर्तृ	291	112	साधारण्येन	353
96	शैवाद्याख्या	324	113	साध्यं हेतु	318
97	षड्विंशालम्बि	301	114	स्मर्ता श्रुत्यैव	276
98	संयोगाख्यं	293	115	स्मर्यन्ते पञ्च	331
99	संवादात्	320			

—o—

नयसङ्गतिमालिकाया अकारादिसूचनी

क्र.स.	नयसङ्गतिमालिका	पृ.सं.	क्र.स.	नयसङ्गतिमालिका	पृ.सं.
1	अत्र पादद्वय	338	4	आत्माधिकरण	376
2	अथ सार्वात्म्य	322	5	आद्ये स्यात्	278
3	अर्थाविरोधा	278	6	इत्थं सप्ताधि [इदं शोधनिकायां मुद्रितमस्ति]	—

क्र.सं.	नयसङ्गतिमालिका	पृ.सं.	क्र.सं.	नयसङ्गतिमालिका	पृ.सं.
7	इत्थमष्टाधि	334	24	प्राणेन्द्रिया	387
8	ईश्वराधिष्ठितै	309	25	मुख्यप्राण	382
9	एवं द्वितीयाद्य	299	26	योगस्मृत्य	280
10	एवं निरस्त	338	27	वस्त्वस्ति	316
11	एवं बाधः	305	28	विफला चित्प्रवृत्ति	305
12	औपचारिक	338	29	विलक्षणत्वाधि	282
13	क्षीरोदकादि	294	30	वैलक्षण्यं	291
14	ज्ञानरूपस्य	347	31	वैलक्षण्ये	288
15	ज्ञानैकगुण	350	32	शिष्टापरिग्रह	283
16	तथेन्द्रियाणां	378	33	श्रेष्ठप्राणस्य	383
17	न हि सर्वभाव	320	34	सङ्घातवादे	314
18	पाञ्चरात्रे	332	35	समष्टिसृष्टौ	389
19	प्रयोजनं विना	297	36	सर्वतोऽन्य	290
20	प्रपञ्चेनैवे	380	37	सर्वव्याख्याना	278
21	प्राक् शरीरात्म	285	38	सर्वं पाशुपतं	326
22	प्रागुक्तयुक्त्या	343	39	साक्षात्तु ब्रह्म	340
23	प्राणानां	385	40	स्वातन्त्र्य	357

—o—

श्रीभाष्यतृतीयसम्पुटस्य शोधनिका

शुद्धम्	पु.सं.	पं.सं.
आक्षेप-तत्परि	2	9
क्रियते	2	29
कारणत्वं	3	11
स्पृष्टो	3	23
अनवकाश	4	8
कुतः सृष्ट	5	9
स मूलं	6	11
यज्ञैस्त्वमि	8	17
स्मृत्यधि	9	16
[सूत्रे । 1) स्मृत्यन. 2) इतरे]	9	23
१० पृष्ठे पङ्क्तेरनन्तरं स्थाप्यम्		
तु कारणम् ॥ (ब्र.प. १४०)	9	25
इति स्मृत्यधिकरणम्॥१॥ इत्येतत्	9	25
१० पृष्ठे ६ पङ्क्तेरनन्तरं स्थाप्यम्		
अत्रत्यपाठान्तरप्रदर्शनं9पृष्ठेभाव्यम्	10	21
[1] वेदो-थ अयं पृष्ठे [1]वेदान्तो[1] इत्यत्र	12	22
स्थाप्यः		
प्रतियोगि	13	23
तत् जग	16	1
ननु च-वैल	16	7
मुक्त भवति	19	15
रस्यैव	20	26
अनश्नन्नन्यो	21	9
सम्बन्धनिबन्धनेति	21	17
व्याप्यशरीर	21	19

शुद्धम्	पु.सं.	प.सं.
मुक्तेश्वर	21	21
नन्दस्य भोगं	22	6
तनत्वनियमो	22	6
रुग्णशरीरस्य	22	13
नित्यस्य	22	15
रत्वसम्भवः	22	15
चेतनस्येति	22	21
परमात्मनः	22	25
प्रवृत्तिषु	22	27
अशरीरं (5 सङ्ख्यात्याज्या)	23	2
(श्वे.उ. 3–19)	23	3
असम्भावनी	23	11
[4]श्च[4] गुणाः	23	16
स्थिता गुणा	23	26
1 ततः-द. 2 जगतो ब्रह्मणश्च-थ.	23	28
3 तु शब्दः-त. 4 स्तु गुणाा-द.		
अस्मिन् पुटे पाठान्तरसङ्ख्यायां	24	1
स्खालित्यं समीकरणीयम्		
1 स्तु–द पूर्वपृष्ठे योज्यमासीत्	24	24
चेतनं च–इ.	24	25
सुबालो	25	1
[अपि तु] व्युत्पत्ति	26	16
स्वपक्षदोषाच्च ॥२·१·१०॥	27	16
व्यावृत्त्य	27	19
व्यावृत्तिः [प्रयोजनम्] ।	27	22

शुद्धम्	पु.सं.	पं.सं.
या तु	27	23
स पक्षः	27	24
न कारणम्	28	23
किंस्वरूपम् ?—थ	28	25
मुक्तस्याऽ—थ.	28	26
पुरुष	29	5
कुशलोत्प्रे	29	6
न आदरणीया ॥१२॥	29	12
न तु	29	19
अन्यथा	29	20
ष्ठितत्वं	30	10
श्रुतीनामन्य	30	15
इतिशिष्टापरिग्रहाधिकरणम् ॥४॥ इति अत्र भवितव्यमासीत्)	31	4
चतुर्विधत्वं विवक्षितम् ।	31	6
इति शिष्टा	31	6
विवरणं च]	32	4
क्षेप-परि	32	9
जीवेश्वर	34	2
र्न स्पृश्यते	34	18
श्च लोकान्	34	18
र्न स्पृश्यते	35	2
ऽपि	36	13
ध्सत्कार्य	39	9
तदतिरिक्तस्य—द	40	28
अविक्रुतम् उत्पा	41	4
देशादि	42	8

शुद्धम्	पु.सं	पं.सं.
रुचक (एवमेव बहुत्र)	41	11
व्यति	43	6
काल्पनि	45	4
नाशविकल्प	46	4
क्लृप्ति	47	2
जीव (भाव)াश्रया	47	13
ब्रह्माज्ञान	47	15
आशङ्क	47	25
षाप्रसक्ति	48	3
रुपपत्तिभि:	48	7
स्वरूपो	48	11
विपरीत	50	16
अत एव-ईक्षा	50	19
क्रीडया ? ।	52	2
पटादि	53	18
भिन्नत्वे (-) त्याज्यम्	53	18
प्रत्येकनिर	53	21
वस्तुत:परि	54	2,3
देश-काला	54	6
निरुपपदम्	54	20
समवधानं च	56	3
व्यतिरिक्तविषय	56	18
दायत्तत्वा	56	22
[उत्तरम्] ।	58	14
न अन्त:करण-	58	20
ज्ञप्तिमात्र	60	1
इति स्वाभ्यु (1) त्याज्यम्	60	8

शुद्धम्	पृ.सं.	पं.सं.	शुद्धम्	पृ.सं.	पं.सं.
हि नाम	60	26	असत्त्व	76	11-12
[6]स्य तु[6]	61	14	इत्यर्थः ।	77	18
[2]पटादि[2]	62	8	सन्धानं	78	1
[ब्रह्मणि	63	5	दमादायैव	79	17
निर्णयत्वेन-वा	63	26	सोम्यैवं	81	1
परत इति, धर्मभूत (1) त्याज्यम्	64	24	सत्त्वेव सोम्ये	81	3
मविज्ञातं	65	20	स्थापितम्, (1) त्याज्यम्	81	4
नान्तर-नामधे (—) त्याज्यम्	67	5	नन्यत्वे	81	8
दृश्यन्ते।	67	21	पटादन्यो	81	12
प्रत्यभिज्ञानप्रत्यक्ष	67	21	विशेषविशिष्टदेश	81	12
इति, सदेवेदम्	69	3	त्रसरूपं	82	3
ऽनन्यत्वम् अव (1) त्याज्यम्	69	9-10	देशाद्भिता	83	3
पदानाम् उक्ता (1) त्याज्यम्	69	17	जीवादर्थो	84	17
व्यावृत्त्या	69	18	स कारणं	85	5
न्तरं तेजःप्रभृति	9	20	(सु.बा.उ 7)	85	15
परत्वे	69	24	लोष्ट	85	19
सर्वज्ञस्य-त.द. स्य च वा	69	27	लोष्टादी	৪6	23
जगत्तेन	70	2	करण्यनिर्दे	86	5
देवताः' इति, (1) त्याज्यम्	70	6	द्रव्यस्य	87	6
भूत्वा बहवो	70	23	स्यात्!; न हि	87	8
यत्र त्वस्य	71	20	पौनरुक्त्य	87	17
इति शङ्कायां	72	25	कार्यत्वेनो (त्त्वे)त्याज्यम्	93	5
नियन्तृत्वा	73	9	एवं सतीति,	93	19
(श्वे.उ. 6–8)	75	9	ब्रह्मणः, (;) त्याज्यम्	94	2
'च' शब्दात्	75	27	मत्त्वेन च	96	13
कपाट	75	28	प्रयोजनवत्त्वात्	99	8
सत्त्वम्	76	10	सृष्टिवैविध्य	100	9

शुद्धम्	पु.सं.	पं.सं.	शुद्धम्	पु.सं.	पं.सं.
जीवाभावेना	101	27	इहप्रत्यय	130	4
प्रसङ्गश्च	102	9	इहप्रत्यय	130	16
पादप्रयो	105	10	प्रसङ्गोऽपि	131	18
भा.द) ।	106	25	वादादिना	133	3
केवलविकाराः	107	9	मुपपद्यते	136	8
तत्त्वे	107	13	श्रीभाष्यम् २-२-३]	138,140,142.144	
तमोमयसुख (—) त्याज्यम्	109	12	सर्वं सर्वत्र सर्वदा	138	9
[2]परिस्पन्द[2]	112	4	न बाह्यार्थो	150	16
परिकरा	113	15	नैकस्मिन्न	154	3
औषधि	114	25	अस्तीति कायन्ते	155	16
[1]सम्बिभन्तसया[1]	115	1	एकस्वभावाः	156	7
मानवः'॥ (भ.गी. 18–46)	115	7	षण्णां	158	4
[2]इति च[2]	115	11	विकासधर्मतया	159	3
[3]सर्वज्ञः सर्वेश्वरः[3]	115	11	कालामुखाः	160	9
[4]प्रदिश्य[4]	115	14	उत्पत्त्य	166	3
मेवाऽऽवह	116	7	द्व्यर्थः—इति	166	12
[1]वर्तितां	116	26	वगाहांश्च	173	3
[1]स्पन्द[1] (अस्मिन् पुटे संख्याभ्रंशः)	117	1	कृत्स्नस्य	175	17
			(म. भा. शां. 350)	177	12
पुरुषः	118	3	नुत्पत्त्य	181	10
बध्यतेऽद्धा	121	15	प्रतिज्ञाऽहानि	183	8
सतस्तस्या	122	14	रभावस्य ब्रह्म	186	1
प्रकाश्य	122	18	उत्पत्त्य	186	6
पारमा	124	17	केवलाभ्योऽद्भ्यः सृष्टि	188	7
फलिभावः]	125	17	तथाविधं च	190	12
यथा अस (,) त्याज्यम्	125	19	॥ २–३–१५ ॥ सूत्रसङ्ख्या	191	11
भ्युपगमा	129	18	॥ २–३–१६ ॥ ,,	192	1

शुद्धम्	पु.सं.	पं.सं.
[illegible]	194	2
[illegible]	196	20
[illegible]	197	10
[illegible]	201	18
[[illegible] [illegible]नुक्तं चैतन्यमेवेति [illegible]] (11-12 पङ्क्त्यो-[illegible] [illegible])	202	11
[illegible]स्मीति	203	1
[illegible]त्राऽपि	203	16
[illegible]: उप	212	21
[illegible]स्यैव	222	14
॥ २-३-४२ ॥ (सू.सं.)	226	4
उत परमेव ब्रह्म भ्रान्तम् ?	226	7
(ब्र. सू. 2-3-32)	237	8
(ब्र. सू. 2-3-36)	237	9
प्रयुक्ताः	246	13
पार्श्वस्थैरनु	247	17
[प्राणवायोः भूता	251	6
क्रमपठितानि	255	19
प्राणोऽनू	255	25
वागादीनां	260	7
कर्मसाध	260	8
टिका । भूतेन्द्रिय	261	10
सङ्गतिः । .... जीवोप	261	11
करणं च	263	9
अन्नं चाऽ	266	24
विचारापर	274	1

शुद्धम्	पु.सं.	पं.सं.
मेधाविनां	274	2
ज्ञातेन	274	3
शारीरक	275	6
॥ २-१-२ ॥ (अधि सं)	278	9
'नयसङ्गतिमालिका' इत्यादि पंक्ति चतुष्टयं 279 पुटे 21 पंक्तेः पश्चात् योजनीय-मासीत् ।	280	15 to 18
'अधिकरणसारावलिः' इत्यादि, निरासो भवति ॥८॥ इत्यन्तं, 281 पृष्ठे(162)'ईक्षातादक्' इत्येतच्छ्लोकात् पूर्वं योज्यमासीत्।	280	1
॥ २-१-३ ॥ (सू. सं.)	280	19
दृष्टा	281	12
शारीरकन्यायकलापसङ्ग्रहः (भोक्ता.)	284	2
उपाधिसम्बद्धपर	287	11
तत्त्वमस्या	288	21
नीतितः ॥ ७८ ॥	290	10
क्षीरायस्का	291	13
उपकरण	291	21
स्वीकुरुष्व ॥ १७ ॥	292	22
वेदादृता	300	9
नपेक्षं	301	19
समर्थात्	302	10
धीनताभङ्ग	302	19
पङ्ग्वन्ध	302	20

शुद्धम्	पृ.सं.	पं.सं.	शुद्धम्	पृ.सं.	पं.सं.
पद्येतु	303	4	पतं तथा ।	325	18
न्य.यगतिः	305	9	नैव ; न तार	325	27
मानानां च	305	15	विशिष्टोऽयम् अभि	326	9
वाक्यशेष	307	11	वाक्यैः	327	9
पारापर्य	307	16	सम्बन्धोऽपि	328	10
सर्वसंप्रति	307	24	धापनयनरूप	328	15
व्यक्त्यादि)	308	20	बाह्यागमतः	329	12
गुर्वी तु	308	26	बाह्यसाम्य	329	13
महद्दीर्घाधिकरणम् ॥ २ ॥	309	24	श्रेयस्साधनमर्थजातम्	331	1
क्षिणोति ॥ १५ ॥	310	16	स्यैवाऽर्थस्य	331	7
तुल्यन्यायतो	312	10	उपादेयं च भवति	331	28
बोध्य	312	16	ध्वस्तास्त	333	13
बोध्य-बुद्ध्योः	312	25	तदुत्थाः-मिथो	333	18
भिज्ञाप्यनुमिति	312	26	ब्रह्माज्ञान	333	21
वग्रहतया	313	20	राहित्यं	335	13
करणम् ॥ २-२-४ ॥	314	5	विरोधमात्र	335	14
व्यसत् स्यात्— (:) त्याज्यम्	314	14	निरूढं (—) त्याज्यम्	336	1
न ग्राह्य	314	19	शब्दाद्यव	337	26
चित्रो	314	19	तत्तच्छरीरि ॥	339	18
अयोग एव	317	8	क्रमेण यथा ; तथैव,	339	21
(1) अनिष्ट	317	15	याणि च' इत्ये	339	23
कोद्घोषणं	317	19	प्राण.... (:) त्याज्यम्	340	2
लाभाय	317	23	(श्लो. ५०-५३)	341	1
धर्मिग्रह	319	15	जननं तु (म्) त्याज्यम्	342	2
भिन्नं त्व	320	8	दोषतस्त्वैक्य	342	6
विरुद्धधर्म	322	1	न हि विज्ञातु	344	11
वसान	325	16	सुषुप्तौ	344	11

शुद्धम्	पृ.सं.	पं.सं.	शुद्धम्	पृ.सं.	पं.सं.
विषयं	346	20	'इत्थं सत्ताधिकरणीद्वितीयाध्याय- वर्तिनि । 372 तृतीयपादेप्रथितासङ्गत्यैवाऽनया मिथः॥' अयं श्लोकः 14 पङ्क्तेरनन्तरं 15 पङ्क्तेः प्राक् योजनीय आसीत् ।		
कर्तृता	347	16			
(श्लो. ५८-६०)	348	1			
दिशास्त्रं	348	21			
तदौपयिक	349	11			
न्यसम्भवित्वो	349	12	तेजो-जल	375	15
धिकरणम् ॥	350	7	धिकरणार्थस्यै	376	17
प्रत्यङ्ङात्मा	355	4	पादानक	377	19
साक्षित्वाद्यं	356	11	प्रधानत्वप्रति	377	20
गीतास्मृति	358	5	केचन	378	8
मिथ्याभूता	358	13	तत्त्वार्थ	378	10
स्वपरयो	359	11	प्रसङ्गतः ।	378	18
सामाना	360	6	न युज्यते,	379	16
दौस्स्थ्ये	361	9	श्रवणात्	380	3
शब्दौघेन	361	18	प्राणः स	381	21
सौगत-वेदान्त्ये	362	6	प्राणस्य	382	13
तात्त्विको	362	7	बाधात् ।	382	19
मार्थ्य	363	1	वेदगतो	383	8
त्पारमार्थ्य	363	5	तत्रैको हि	387	20
मार्थ्य	363	7	यथायोग्यं	388	6
अनुभाव्यैव	363	21	च्छरीरत्वस्य	388	18
वपुःप्रकारा	366	3	मध्यस्थिति	389	1
वपुर्गुणौ	366	14	भुक्तेऽन्नादौ	389	4
लभ्यमानया	367	1	गर्भशरीर	389	22
मूर्त्येकदेशा	368	15	करणानाम् ।	390	3
ब्रह्मत्वे	370	7	विधा अर्था अपि	390	22
प्रबोधात्	371	19	न्छ्रोत्रादौ	391	25

शुद्धम्	पु सं.	पं.सं.
स्वर्गिबृन्दे	391	26
साध्यस्याविरो	392	18
उत्पद्यत	393	10
धर्मकांस्तानु	396	16
निविष्टानां	397	20
पुराणं	402	12
ध्यानान्तःस्थस्य	403	4
रूपमभ	408	5
प्र.सं. 13 'अनेन' इत्यत्र	412	14
अविप्रतिपत्त्या	412	26
श्रैष्ठ्य	413	10,11
प्राणापर	413	14
त्मकं	415	27
एतदीयं ज्ञानं	426	16
(विवृतिः प्र.सं. 44.	427	20
(विवृतिः प्र. सं. 17.	428	14
(विवृतिः प्र. सं. 50	429	28
(एता) ह वै	430	17
अनुप्रविष्टाः	431	23
(समान-	433	5
वर्तन्ते)	433	7
मुख्याभावात्	436	25
सर्वधारक	441	16

शुद्धम्	पु.सं.	पं.सं.
लयानां	441	20
तद्गतं च	442	4
अविप्रतिपन्नत्वम्	442	24
तमःशरीर	443	6
तत्संयोगा	444	16
दविरतं	445	18
दज्ञानतो	446	6
(ब्र.सू. 2-1-35)	447	9
इच्छाविभ्र	447	19
मयो दिव्यः	447	21
वीर्याः	448	19
वान् यदा भवति	449	4
सर्गकर्मणि	449	26
मश्नुवते	450	3
(विवृतिः प्र. सं. 299	453	3
मिथो	454	7
सिद्धि	456	12
अम्बूपल	457	7
शिरस्सिद्ध	459	18
स ह्यनादि	459	24
ससर्जादौ	463	5
अण्डकारणभूत	463	10

—o—